आचार्यशर्ववर्मप्रणीतं

# कातन्त्रव्याकरणम्

तृतीयो भागः

द्वितीयखण्डम्

## व्याख्याचतुष्टयोपेतम्

कुलपतेः प्रो. राजेन्द्रमिश्रस्य प्रस्तावनया विभूषितम्

सम्पादकः

डॉ. जानकीप्रसादद्विवेदी

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
वाराणसी

ISBN : 81-7270-102-0(Vol. III, Pt. II)
ISBN : 81-7270-006-7 (Set)

SARASVATĪBHAVANA - GRANTHAMĀLĀ

[ Vol. 135 ]

# KĀTANTRAVYĀKARAṆA

## OF

## *ĀCĀRYA ŚARVAVARMĀ*

[ PART - THREE ]

( VOLUME - II )

*With four Commentaries*

'VṚTTI' & 'ṬĪKĀ'

*BY*

ŚRĪ DURGA SINGH

'KĀTANTRAVṚTTI PAÑJIKĀ'

*BY*

ŚRĪ TRILOCANADĀSA

'KALĀPACANDRA'

*BY*

KAVIRĀJA SUṢEṆA ŚARMĀ

'BILVEŚVARAṬĪKĀ'

*by*

*ĀCĀRYA BILVEŚVARA*

'SAMĪKṢĀ'

*By Editor*

*FOREWORD BY*

PROF. RAJENDRA MISHRA

VICE - CHANCELLOR

*EDITED BY*

PROF. JĀNAKĪ PRASĀDA DWIVEDĪ

*Dean, faculty of Śabdavidyā*

*Central Institute of Higher Tibetan Studies*

*(Deemed University)* Sarnath, Varanasi.

VARANASI

2003

*Research Publication Supervisor* —
**Director, Research Institute**
Sampurnanand Sanskrit University
Varanasi.

**ISBN : 81-7270-052-0 (Vol. III, Part II)**
**ISBN : 81-7270-006-7 (Set)**

*Published by* —
**Dr. Harish Chandra Mani Tripathi**
***Director, Publication Institute***
Sampurnanand Sanskrit University
Varanasi-221 002.

*Available at* —
**Sales Department,**
Sampurnanand Sanskrit University
Varanasi-221 002

**First Edition,** 500 Copies
**Price : Rs. 500.00**

*Printed by* —
**Anand Printing Press**
C. 27/170-A, Jagatganj,
Varanasi-221 002

सरस्वतीभवन-ग्रन्थमाला

[ १३५ ]

आचार्यशर्ववर्मप्रणीतं

# कातन्त्रव्याकरणम्

## (तृतीयो भागः)

[ द्वितीयखण्डम् ]

श्रीदुर्गसिंहकृताभ्यां कातन्त्रवृत्ति-टीकाभ्यां
श्रीमत्त्रिलोचनदासकृतया 'कातन्त्रवृत्तिपञ्जिका'-टीकया
कविराजसुषेणशर्मकृतया 'कलापचन्द्र'-टीकया
आचार्यबिल्वेश्वरकृतटीकया
सम्पादकीयसमीक्षया

No - 00,021

कुलपतेः प्रो०राजेन्द्रमिश्रस्य प्रस्तावनया च समलङ्कृतम्

सम्पादकः

प्रो०जानकीप्रसादद्विवेदः

आचार्यः संस्कृतविभागे, शब्दविद्यासङ्कायाध्यक्षश्च
केन्द्रीय-उच्चतिब्बतीशिक्षासंस्थानम्, सारनाथः, वाराणसी

वाराणस्याम्

२०६० तमे वैक्रमाब्दे १९२५ तमे शकाब्दे २००३ तमे खैस्ताब्दे

*अनुसन्धानप्रकाशनपर्यवेक्षकः* –
**निदेशकः, अनुसन्धानसंस्थानस्य**
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी।

**ISBN : 81-7270-102-0 (Vol. III, Part II)**
**ISBN : 81-7270-006-7 (Set)**

*प्रकाशकः* –
**डॉ०हरिश्चन्द्रमणित्रिपाठी**
***निदेशकः, प्रकाशनसंस्थानस्य***
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी-२२१००२

*प्राप्तिस्थानम्* –
**विक्रय-विभागः,**
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी-२२१००२

**प्रथमं संस्करणम्,** ५०० प्रतिरूपाणि
**मूल्यम्** – ५००.०० रूप्यकाणि

*मुद्रकः* –
**आनन्द प्रिंटिंग प्रेस**
सी० २७/१७०-ए, जगतगंज,
वाराणसी–२२१००२

# नान्दीवाक्

**कोविदं शर्ववर्माणं नौमि कातन्त्रमार्मिकम् ।**
**दर्शितश्शब्दविद्याया येन मार्गो विलक्षणः।।**
**ताथागतो भवेदाहोस्विदसौ स्याज्जिनानुगः ।।**
**शब्दानुशासनस्थेम्ना शर्ववर्मा महीयते ।।**

प्रथमवेदाङ्गत्वेन सुप्रतिष्ठितं व्याकरणशास्त्रं प्रत्नकालादिदानीं यावत्पाण्डित्य-पर्यायभूतमङ्गीक्रियते विद्वत्समवाय इत्यत्र न कोऽपि संशीतिलेशः । व्याकरणं वेदस्याङ्गमितिमात्रं विदन्ति प्रायेण सर्वे । तत्र न किमप्यनौचित्यम् । अङ्गं तु वर्तत एव व्याकरणं वेदस्य । परन्तु नैतावदेव । अङ्गशब्दस्य सार्थकता क्वचिदन्यस्मिन्नप्यर्थे सन्दृब्धा दृश्यते । अङ्ग्यन्ते प्रकाश्यन्ते विशदीक्रियन्ते वा वेदार्था अनेनेत्यङ्गमितीयं व्याख्यैव वेदाङ्गशब्दं सार्थकं साधयति । व्याकरणमपि वेदार्थप्रकाशनक्षमतयैव तदङ्गमुच्यत इति ममाभिप्रायः ।

**ब्राह्मणेन निष्कारणं षडङ्गो वेदोऽध्येयो ज्ञेयश्चे**त्युपदिशन् महाभाष्यकारोऽपि वेदषडङ्गजातं माहात्म्यदृशा विशिनष्टि । प्रथमे हि विद्वांसो वैय्याकरणा इति प्रतिपादयताऽधि-ध्वन्यालोकमाचार्यानन्दवर्धनेनापि व्याकरणशास्त्राधमर्णत्वमेवाऽऽलङ्कारिकाणां सश्रद्धं प्रकटितम् । किञ्च, लोकपरम्परायामपि सुभाषितमुखेन व्याकरणज्ञानस्यापरिहार्यत्वं प्रचलितमेव । तद्यथा–

**यद्यपि बहु नाधीषे पठ पुत्र तथापि व्याकरणम् ।**
**स्वजनः श्वजनो मा भूत्सकलः शकलः सकृच्छकृत् ।।**

एवंगुणविशिष्टमिदं विलक्षणशास्त्रमतिचिरत्नमित्यप्यवधेयम् । महाभाष्यकारः पतञ्जलिरेवात्र प्रमाणं यः खलु व्याकरणाध्ययनपरम्परां पौराणीं तदनन्तताञ्च साधु प्रतिपादयति । देवगुरुबृहस्पतिर्वक्ता, साक्षाद्देवराज इन्द्र एवाऽध्येता, दिव्यञ्च वर्षसहस्रं प्रवचनावधिः। हन्त, तथापि शब्दविद्यायाः पारं न जगाम । एवं स्फारीकुर्वाणो भाष्यकारः शब्दानुशासनाध्ययनपरम्पराया दैवं स्वरूपं प्रतिपादयति । तदेव व्याकरणशास्त्रं

लोकमवतीर्य विविधैराचार्यैः प्रोक्तं सत्सहस्रधारतामुपगतम् । यद्यपि वाङ्मयालोके महामुनेः पाणिनेरेव महती प्रतिष्ठा संल्लक्ष्यते, त्रिमुनिव्याकरणमिति विद्वज्जनमान्यतायां शिरोरत्नभूतत्वात् । तथापि नैतदविदितं विदुषां यत् प्रागपि पाणिनेरनेके यशस्विनश्शाब्दिकाः सञ्जाताः । तद्यथा —

**ऐन्द्रश्चान्द्रः काशकृत्स्नापिशली शाकटायनः ।**
**पाणिन्यमरजैनेन्द्रा जयन्त्यष्टौ च शाब्दिकाः ।।**

किञ्च, महामुनिः पाणिनिः स्वयमपि पदे पदेऽष्टाध्याय्यां स्वपूर्वसूरीन् वैय्याकरणान् सबहुमानं स्मरति । तत्र प्रथन्ते भागुरि-शाकल्य-स्फोटायनप्रभृतयः । वस्तुतो लोकम्भरीयेयं पाटी शब्दविद्योपासकानां माहेश्वरपरम्परेत्युच्यते । अस्यां परम्परायामेव त्रिमुनेरनन्तरं वामनजयादित्य-हरदत्त-कौण्डभट्ट-भट्टोजिदीक्षित-नागेशभट्टादयष्टीकाकाराः प्रक्रियाग्रन्थकाराश्च समवतीर्णाः । तैः पल्लवितं गगनाभोगविस्तृतं विपुलवाङ्मयं शब्दानुशासनस्येदानीमपि राष्ट्रेऽस्मिन् सुरक्षितं तिष्ठति ।

परन्तु समुज्जृम्भमाणे सति वैदिकधर्मविसंवादिनि सौगते जैने च सम्प्रदाये भारतराष्ट्रस्य परिस्थितिरेव विपरिवर्तिता । ईश्वरास्तित्वप्रत्याख्यानपरयोरनयोः सम्प्रदाययोर्यथा यथा कालक्रमापेक्षो विकासस्सञ्जातस्तथा तथैव वैदिकधर्मसंस्कृति-वाङ्मयपराङ्मुख्यमप्येतयोः स्फारतामुपगतम् । विकासस्यान्तिमावस्थायान्तु विसंवादोऽयमुभयोः प्रतिपदं प्रतिसन्दर्भं प्रतिप्रकरणञ्च समवलोक्यते ।

दार्शनिकं चिन्तनं बौद्धजैनमतयोरपि सन्दृश्यते; परन्तु तत्र वैदिकदर्शनानां सांख्ययोगन्यायवैशेषिकमीमांसावेदान्तादीनां प्रायेण सर्वेऽपि सिद्धान्ताः खण्डिता न्यक्कृता अन्यथाव्याख्याता वा। एवंकरणे तु क्वचिद्युक्तियुक्तत्वमपि परिदृश्यते । प्रायेण किन्तु महीयते पूर्वाग्रहग्रस्ततैव ।

वैदिकीं पुराणपरिपाटीं प्रतिस्पर्ध्य जैनविपश्चिद्भिरपि प्रणीतानि पुराणानि; परन्तु तेषु पुराणेषु वर्णितास्तावन्त एव शलाकापुरुषा इतिहाससम्मता संल्लक्ष्यन्ते यावन्तो वैदिकपरम्परातः प्रसह्य आत्मसात्कृताः । ये पुनर्नलरामवसुदेवकृष्णादीतराः स्वोपज्ञशलाकापुरुषास्ते केवलं काल्पनिका कथानायका एव । न तेषां दृश्यते कोऽपि यथार्थेतिहासः । एतदुक्तं भवति यद् वेदमात्रं विहाय जैनमतावलम्बिनः प्रतिस्पर्धामनस्कतया सर्वमपि वैदिकं वाङ्मयं तुल्यगुणविशिष्टैः स्वोपज्ञग्रन्थैस्तुल-

यितुमुपचक्रमिरे । वेदपरम्परावलम्बीनि महाकाव्यानि स्वमतपोषकैर्महाकाव्यैः, खण्डकाव्यानि खण्डकाव्यैः, कोषग्रन्थान् कोषग्रन्थैः, व्याकरणग्रन्थान् व्याकरणग्रन्थैः, नाट्यकथाचम्प्वादिरचनास्तद्गुणविशिष्टाभी रचनाभिः, दर्शनसिद्धान्तांश्च स्वदर्शनसिद्धान्तैस्ते यथाशक्ति यथामति सन्तुलितवन्तः । इयं वाङ्मयी प्रतिस्पर्धा परां काष्ठामधिरूढा सन्दृश्यते यदा वयं विष्णुसहस्रनामप्रतिस्पर्धिनीं कृतिं **जिनसहस्रनामेति** नाम्नीमवलोकयामः ।

भवतु, अनया वाङ्मय्या प्रतिस्पर्धया भगवत्या मल्लिकाक्षवाहिन्या महानुपकारस्सञ्जातः । न केवलं संख्यादृष्ट्या प्रत्युत काव्यसौष्ठव-चिन्तनगाम्भीर्य-बुद्धिविलासादिदृष्ट्याऽपि जैनमतकृतयः क्वचिन्महीयन्त एव । विशेषेण, मध्यकालीनो भारतीयेतिहासो यथा सुरक्षितो दृश्यते जैनमतग्रन्थेषु, न तथा क्वचिदन्यत्र । चातुर्मास्य-परम्परापरिपालननिरता नित्ययायावरा जैनश्रमणा लोकवृत्तानां प्रत्यक्षद्रष्टार आसन् । ग्रामग्रामटिकाऽरण्यपर्वतकन्दरानदनदीसागरादिपरिज्ञानपि तेषां प्रत्यक्षानुभूतमेवाऽऽसीत् । ततश्चैव जैनागमवाङ्मये समग्रमपि राष्ट्रं प्रतिबिम्बितं परिलक्ष्यते। नरनारीभूतप्रेतपिशाचपशुपक्षिप्रभृतिविविधजीवानां सूक्ष्मातिसूक्ष्माः प्रवृत्तीरपि महातपस्विन एते श्रमणा हस्तामलकवत् सहजमेव विदुः ।

प्रकृतमनुसरामस्तावत् । सैव वाङ्मयी प्रतिस्पर्धोभयोर्धर्मयोर्मध्ये शब्दानुशासन-परम्परामप्यवलम्ब्य प्रवृत्ता दृश्यते । ऐन्द्री व्याकरणपरम्पराऽऽद्यतमा परिलक्ष्यते महाभाष्यप्रामाण्यात् । वस्तुतः शिक्षानिरुक्तव्याकरणाभिधास्त्रयोऽपि वेदाङ्गविषया मिथस्सम्मिश्रिता एव परिलक्ष्यन्ते । व्याकरणं शब्दसाधुत्वं प्रतिपादयति, निरुक्तं तस्यैव शब्दस्य निर्वचनविषयिणीर्विविधाः सम्भावना गवेषयते, शिक्षाप्रतिपादयितृ प्रातिशाख्यञ्चापि विविधवेदशाखाप्रयुक्तशब्दसमवायस्य वैभिन्न्यं किञ्च, तेषामुच्चारणादिवैशिष्ट्यं विवृणोति । समेषामेवैषां विचारणा शब्दकेन्द्रितैव दृश्यते । अत्रापि निरुक्तप्रातिशाख्यपरम्परा तु वेदविवेचनमात्रपर्यवसितत्वाद् मध्येमार्गमेव क्वचिन्निरुद्धा; परन्तु शब्दसाधुत्वसिद्धिमात्रकेन्द्रितं व्याकरणशास्त्रमुत्तरोत्तरमुप-बृंहणपरिष्करणान्यथोपपादनादिप्रक्रियाभिर्विकासमुपगतम् ।

वस्तुत इयमासीन्माहेश्वरी परम्परा शब्दानुशासनस्य । चिरं यावदियं परम्परा महर्षिपाणिन्युपदिष्टामष्टाध्यायीमनुसरन्ती लोके परमां समज्ञां भेजे । महेश्वरडमरुकनिना-

दोद्गतचतुर्दशसूत्राणि व्याचक्षाणो दाक्षीसूनुश्शालातुरीयः पाणिनिः पूर्वसूरिमतानि सङ्गृह्य स्वाभिमतं निर्दुष्टं शब्दानुशासनं कृतवान् । तस्यैव नैयून्यं मनसि निधाय कात्यायनः कालान्तरे वार्त्तिकजातं प्रणिनाय । वार्त्तिकाणाञ्चापि साधुत्वमसाधुत्वं विचारयन् महाभाष्यकारः पतञ्जलिरष्टाध्याय्याः साङ्गोपाङ्गसमीक्षां कृतवान् । परिष्कारपरिबृंहणादिपरम्परेयं नागेशभट्टं यावद् (अष्टादशतमख्रिस्ताब्दं यावत् ) निर्विघ्नं प्रवर्तमाना सन्दृश्यते ।

माहेश्वरीपरम्पराप्रतियोगिन्येवासीन्माहेन्द्री परम्परा शब्दानुशासनस्य या खलु जैनमतानुयायिभिः किञ्च सौगतैश्चापि स्वीकृता पोषिता चाऽभूत् । शर्ववर्मप्रणीतं कातन्त्रव्याकरणं जैनपरम्पराभिमतमासीदिति प्रायोवादस्सम्प्रति प्रचलति जैनविद्वत्समवाये। व्याकरणस्यास्य रचनाविषये यो वृत्तान्तः प्रचलितस्तेनास्य रचनाकालोऽपि स्पष्टतामुपयाति। राज्ञः सातवाहनस्य शब्दविद्यामर्मज्ञा विदुषी राज्ञी, सरोवरजलैरसकृत् प्रहरन्तं पतिं निवारयन्ती प्राह–**मोदकं देहीति** । मा उदकं देहि, उदकप्रहारैर्मा पीडयेत्यासीदभिप्रायो राज्ञ्याः; परन्तु शब्दविद्याज्ञानविरहितो नरपतिर्मोदकपदगतं सन्धिरहस्यमविजानन् प्रियां सलिलक्रीडारतां प्रसादयितुं मोदकपिटकमेव प्रस्तुतवान् येन तन्मौढ्यसन्तप्ता राज्ञी स्फुटितहृदया जाता ।

तद्वृत्तं विज्ञायैव नरपतिं सुष्ठुरीत्या शब्दानुशासनपारङ्गतं विधातुं महावैय्याकरणः शर्ववर्मा मा उदकं देहीति राज्ञ्युक्तं पदत्रयमवलम्ब्य अध्यायत्रयपरिमितं कातन्त्रव्याकरणं प्रणीतवान् । माहेन्द्रीं परम्परां पुष्णातीदं व्याकरणमिति कोविदाः । किं वैशिष्ट्यमस्याः परम्परायाः । तदुच्यते– माहेश्वरीपरम्परा प्रत्याहारजटिला लोकाप्रयुक्तकृत्रिमशब्दसिद्धिपरा शब्दलाघवैकलक्ष्या चाभिमन्यते । माहेन्द्रीपरम्परा पुनः अर्थलाघवैकलक्ष्या लोकव्यवहृतशब्दसिद्धिपरा सुखाधिरोहा सङ्क्षिप्ता चेति । नामकरणरहस्यमपि विशदीक्रियते विपश्चिद्भिर्विचित्रयैव युक्त्या । काऽसौ ? काशकृत्स्नतन्त्रापेक्षया सङ्क्षिप्तत्वादेव व्याकरणमिदं कातन्त्रमित्युच्यते । व्याख्याविषयेऽस्मिन् विपश्चिदपश्चिमा एव प्रमाणम् । अन्यथा कुत्सितं तन्त्रं कातन्त्रमिति व्याख्याते सति काऽप्यन्यैव विचिकित्सा समुत्तिष्ठेत् ।

भवतु । कातन्त्रव्याकरणस्य सर्वजनोपयोगित्वमद्यापि रहस्यगर्भमेव तिष्ठति। एतदपि समुत्प्रेक्ष्यते यत्स्वगुणवत्तयैव व्याकरणमिदं वङ्गोत्कलशारदाभोटदेव-

नागर्यादिलिपिबद्धं सद् भारताद् बहिरपि लोकप्रियतामवाप । श्रीलङ्काभूटाननेपाल-तिब्बतादिक्षेत्रेषु सविशेषं ग्रन्थरत्नमिदं विद्वज्जनाऽभीष्टं जातम् । एवं सत्यपि प्रश्नोऽयमनुत्तरित एव तिष्ठति यत्कस्मादिदं व्याकरणं निजोदयभूमावेव प्रसिद्धिं नोपगतम् ? जैनमतावलम्बिनोऽपि यथेमं व्याकरणग्रन्थमात्मनीनं समुद्घोषयन्तोऽस्य प्रचारप्रसारार्थं बद्धपरिकरा दृश्यन्ते कथं नेतः पूर्वं तथाऽदृश्यन्त ? अनुसन्धानविषयोऽयं वृत्तान्तः।

सुखेन व्याकरणविषयावबोधः स्यादिति कातन्त्रव्याकरणकारस्य प्रतिज्ञा । सा प्रतिज्ञा चरितार्था दृश्यते ग्रन्थेऽस्मिन् ।

केन्द्रीय-उच्चतिब्बतीशिक्षासंस्थानस्य सारनाथस्थस्य शब्दविद्यासङ्कायाध्यक्षा विविधविद्याविद्योतितान्तःकरणाः सततस्वाध्यायात्मसात्कृतसारस्वतवर्चस्वा **आचार्यजानकीप्रसादद्विवेदाः** कतिपयहायनेभ्यः कातन्त्रव्याकरणस्य समुद्धाराय प्रयत्नवन्तो वर्तन्ते । श्रीदुर्गसिंहकृतां कातन्त्रवृत्तिं कातन्त्रटीकां, त्रिलोचनदासकृतां कातन्त्रवृत्तिपञ्जिकां, कविराजसुषेणशर्मकृतां कलापचन्द्रटीकां, बिल्वेश्वरकृतां टीकाञ्च सम्यगनुशील्य प्रो० द्विवेदमहोदया राष्ट्रभाषोपनिबद्धया स्वसमीक्षया कातन्त्रव्याकरणस्याभिप्रायं प्रकाशितवन्तः। तत्सारस्वताध्यवसायोऽसौ सम्प्रति सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीयप्रकाशनसंस्थानेन विविधैः खण्डैः प्रकाश्यते । इतः पूर्वं सन्धिप्रकरणात्मकः प्रथमभागः १९९७ मितख्रिस्ताब्दे, द्वितीयभागस्य प्रथमखण्डो नामचतुष्टयाध्यायस्य पूर्वार्धपादत्रयात्मकः १९९८ मितख्रिस्ताब्दे, तस्यैवाध्यायस्योत्तरार्धपादत्रयात्मको भागो द्वितीयभागस्य द्वितीयखण्डात्मकः १९९९ मितख्रिस्ताब्दे, तृतीयभागस्य प्रथमखण्डः क्रिया-पदान्वाख्यानात्मकः २००० मितख्रिस्ताब्दे क्रमेण प्राकाश्यमुपगताः ।

सुमहान्तमिमं विद्याध्यवसायमवलोक्य पण्डितवर्याणामाचार्य**जानकीप्रसादद्विवेदानां** दिल्लीस्थश्रीकुन्दकुन्दभारतीन्यासस्य प्रवरसमितिः १९९९ तमे ख्रिस्ताब्दे विद्वत्तल्लजांस्तान् आचार्योमास्वामिपुरस्कारेण लक्ष्मुद्रात्मकेन कातन्त्रसिन्धूपाधिना च मध्येविद्वत्कदम्बकं सम्मानितवतीति महते प्रमोदायाऽस्माकं शारदासपर्यार्पित-जीवितानाम् ।

तस्यैव ग्रन्थरत्नस्य तृतीयभागीयो द्वितीयः खण्ड इदानीं मत्कौलपत्ये प्राकाश्यमुपनीयत इत्यहोऽस्मदीयं सौभाग्यम् ।

**श्रीजानकीप्रसादाख्यो द्विवेदो विद्वदग्रणीः ।**
**व्याख्याति यत्ससंरम्भं कातन्त्रं तन्महीयताम् ।।**
**आराध्यश्शर्ववर्माऽसौ कल्पतशब्दानुशासनः ।**
**आराधकश्च नव्योऽयं द्विवेदस्तद्द्वयी जयेत् ।।**
**ऐन्द्रं विभुत्वमापन्नोऽस्म्यहं राजेन्द्रसंज्ञकः ।**
**यतोऽस्मन्नन्दने जातो हरिश्चन्द्रस्सुरद्रुमः ।।**
**विश्वविद्यालयस्यास्य समज्ञा दिग्दिगन्तगा ।**
**विभ्राजतेऽधुना नूनं यत्प्रसूनप्रकाशनैः ।।**

नात्र काचिदत्युक्तिः। अस्मत्प्रकाशनसंस्थाननिदेशकवर्याणां **डॉ० हरिश्चन्द्र-मणित्रिपाठि**महाभागानां तद्वशंवदानां **डॉ० हरिवंशकुमारपाण्डेय**प्रभृतीनामहर्निशोद्यममहिम्नैव प्रकाशनकार्यं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्येदानीं निखिलेऽपि सारस्वतजगति प्रथिम्नः परां काष्ठामधिरूढमिति समनुभूय सप्रणयं प्रकाशननिदेशकान् जयजीवशब्दैर्बहुशस्सभाजये । किञ्च, विद्वत्प्रवरान् **आचार्यजानकीप्रसादद्विवेदान्** अधिकातन्त्रं कृतभूरिपरिश्रमान् विश्वविद्यालयसारस्वतकीर्तिप्रतननदत्तचित्तान् पुनरप्येकवारं प्रत्युद्गच्छामि सनमस्कारम् ।

मन्ये, प्रकाशनेनानेन कातन्त्रप्रणयिनां विशेषपरितोषस्तु भविष्यत्येव, इतरेऽपि शब्दानुशासनरसिकाः परां प्रीतिमुपगमिष्यन्ति ।

**वाराणसी**
अक्षयतृतीया,
वि. सं. २०६०
(४ मई, २००३ ई०)

विद्वद्वशंवदः
[signature]
कुलपतिः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

।। श्रीः ।।

# भूमिका

**अहो श्रीकातन्त्रप्रणयनविधिः कोऽपि सुगमः**
**समारब्धः सन्धौ पुनरपि च नाम्नां विवरणे ।**
**अथाख्याताध्याये स्वमतिविभवैः सूत्रविदितः**
**कुमाराणां श्रेयो बुधजनमनोज्ञं वितनुते ।।**
**कार्त्तिकेयप्रसादेन शर्ववर्मसुधीमता ।**
**सातवाहनभूपाय प्रतिज्ञातेन यत्नतः ।।**

इदं नाविदितं विदुषां यद् आन्ध्रदेशाधिपतेः सातवाहनस्य विदुषी राज्ञी यद् **'मोदकं देहि'** इति वचनं साधिक्षेपमुक्तवती तदधिकृत्य शाब्दिकाचार्यशर्ववर्मणा प्रणीतस्याध्यायत्रितयात्मकस्य एकोनविंशतिपादान्वितस्य पञ्चपञ्चाशदधिकाष्टशतसूत्रोपेतस्य (८५५) कातन्त्रव्याकरणस्य प्रकाशितेषु चतुर्षु खण्डेषु एकोनचत्वारिंशदधिकपञ्चशतमितानि (५३९) सूत्राणि व्याख्याचतुष्टययुतानि समीक्षितानि सन्ति । तत्र १९९७तमे यीशवीयाब्दे प्रकाशिते सन्धिप्रकरणात्मके प्रथमभागे पञ्चसु पादेषु स्वर-व्यञ्जन-प्रकृतिभाव-अनुस्वार-विसर्गाभिधाः पञ्च सन्धयो वर्णिताः । तेन 'मोदकम्' इति पदे 'मा+उदकम्' इति सन्ध्यभिप्रायः प्रपूरितः। १९९८ तमे यीशवीयाब्दे प्रकाशितस्य नामचतुष्टयात्मकस्य द्वितीयभागस्य प्रथमखण्डे आद्यास्त्रयः पादाः, १९९९ तमे यीशवीयाब्दे प्रकाशिते द्वितीयखण्डे चान्तिमास्त्रयः पादा व्याख्याताः। अनयोर्द्वयोः खण्डयोः पुंलिङ्ग-स्त्रीलिङ्ग-नपुंसकलिङ्गशब्दानां कारक-समास-तद्धितप्रकरणानां चोपन्यासेन 'मोदकम् ' इति स्याद्यन्तपदेनोपलक्षितानि कार्याणि संक्षेपेण सूत्रेषु निबद्धानि ।

'देहि' इति यदाख्यातपदमवशिष्टं तस्यैव सम्पूर्तये शर्ववर्माचार्येणाष्टसु पादेषु त्याद्यन्तपदरूपाख्यातविषयः प्रस्तुतो दृश्यते । तस्यैव विवेचनार्थम् अथवा सन्धिभागे वर्णानाम् नामचतुष्टये स्याद्यन्तपदस्य च वर्णनानन्तरं वाक्यस्य संपूर्तयेऽपेक्षितानां क्रियापदानामन्वाख्यानार्थं तृतीयभागस्य प्रथमखण्डे आख्याताध्यायस्य १२३ सूत्रात्मकास्त्रयः पादाः संगृहीताः सन्ति। पादास्ते एवमवगन्तव्याः-परस्मैपादः, प्रत्ययपादः, द्विर्वचनपादश्च।

तृतीयभागस्यास्मिन् द्वितीयखण्डे आख्याताध्यायस्यावशिष्टाः पञ्च पादाः वर्तन्ते- १.सम्प्रसारणपादः, २.गुणादिपादः, ३.अनुषङ्गलोपादिपादः, ४. इडागमपादः,

५.धुडादिपादश्च। एतेषु पञ्चसु पादेषु ३१६ मितानि सूत्राणि वृत्तिकारेण दुर्गसिंहेन, टीकाकारेण दुर्गसिंहेन, विवरणपञ्जिकाकारेण त्रिलोचनदासेन, कलापचन्द्रकारेण आचार्यसुषेणविद्याभूषणेन च व्याख्यातानि। एतासां चतसृणां व्याख्यानामत्र सम्पादने हेतुरयमवश्यमवगन्तव्यो यत् पाणिनीयवाङ्मये यत् स्थानं वर्तते पातञ्जलमहाभाष्यस्य तदेव स्थानं कातन्त्रवाङ्मये वर्तते दुर्गवृत्तेः। एवमेव दुर्गवृत्तिटीका काशिकावृत्तिवत्, विवरणपञ्जिका जिनेन्द्रबुद्धीयन्यासवत् , कलापचन्द्रश्च हरदत्तकृतपदमञ्जरीवदाभाति। अत्र यत् किञ्चिद् विविधं वैशिष्ट्यं दृश्यते, तदिह संक्षेपेणोपनिबद्ध्यते —

## सूत्रकारादीनामभिमतानि

१. सिद्धपक्षे योक्तवर्जम् इत्यस्य व्यावृत्तिबलान्न भविष्यतीति चेत,न। सूत्रकारमतमिदम् (३/४/६९)।

२. शर्ववर्मणस्तु नोपलक्षणं सम्मतम् (३/५/४)।

३. सूत्रकारमतं वर्णयन्ति-नियमार्थो योयविभागः स इत्यविभक्तिकोऽयं निर्देशः (३/७/५)।

४. तन्मतं सूत्रकारस्येति भावः (दु०टी० ३/८/२३)।

५. सूत्रकारमतं तु क्विबेवात्र न दृश्यते (३/८/२७)।

६. सूत्रकारमतं तु क्विबेवात्र न दृश्यते, वाक्यकारसम्मतमेतत् (३/८/२७)।

७. एकयोगो वाक्यकारस्य दर्शनम् (दु०टी० ३/७/६)।

८. नैतद् भाष्यसम्मतम् (दु०टी० ३/७/३५)।

९. संश्लिष्टनिर्देशोऽयं भाष्यसम्मतः पक्षः (दु०टी० ३/८/२१)।

१०. नैतद् भाष्यचिन्तितम् (दु०टी० ३/८/२३)।

## शिष्टव्यवहारस्य प्रामाण्यम्

१. श्वयतिग्रहणमनर्थकमेव स्यादित्ययमेव पक्षः शिष्टसंमतः इत्यर्थः (दु०टी० ३/६/६)।

२. यदि शिष्टप्रयोगो दृश्यते इति भावः (दु०टी० ३/६/२४)।

३. यदि शिष्टप्रयोगो दृश्यते तदैतद् वक्तव्यमिति वाशब्देन शिष्टप्रयोगादर्शनान्न वक्तव्यमेवेति सूचयति (वि०प० ३/६/२४)।

४. शिष्टप्रयोगानुसारेणापरेऽप्येवं वेदितव्याः (वि०प० ३/८/२६)।

## रूढेर्व्यवहारः

१. शर्ववर्मणा कृल्लक्षणं न कृतम्,तस्मादीदृशमेव रूढमाश्रितमित्यर्थः (बि०टी० ३/४/२)।

२. आचार्यास्तु च्विशब्दं न पठन्ति, रूढिशब्दा हि तद्धिता इति (दु०टी० ३/४/६९)।

३. रूढिशब्दा हि तद्धिता इत्याचार्याश्च्विग्रहणं न कुर्वते (दु०टी० ३/४/७१)।

४. परदर्शने ये निपातास्ते रूढाः (दु०टी०३/४/७७)।

५. अशनायोदन्यधनायाः बुभुक्षापिपासाकाङ्क्षासु निपाता रूढाः (दु०वृ० ३/४/७७)।

६. रूढिशब्दा हि तद्धिता इति च्वावीत्वं मन्यते (दु०टी० ३/४/७७)।

७. परदर्शने ये निपाता रूढास्त इह धातवोऽभिधीयन्ते (वि०प० ३/४/७७)।

८. वेञ उभयपदित्वात् परस्मैपदित्वं रूढिविषयम् (दु०टी०३/४/८०)।

९. कथं पृच्छनीयम् ? रूढित्वात् (दु०वृ० ३/५/२७)।

१०. स इह रूढो गृह्यते (दु०टी० ३/६/१)।

११. दश्यतेऽनेनेति दशनो दन्त इति करणेऽपि भवति, रूढित्वाद् वा (वि०प० ३/६/४)।

१२. रूढित्वात् शादयति संशयनिवृत्त्यर्थम् (दु०टी० ३/६/२६)।

१३. (श्वश्रूयते) अपि तु विशिष्टमेव रूढम् (दु०वृ०३/६/६१)।

## सूत्रकारस्य रचनाया वैचित्र्येण कश्चिदाक्षेपः

१. स्थादोरिः सिच्यात्मने इति विदेर्ध्यात्। विचित्रा हि सूत्रस्य कृतिरिति (दु०टी० ३/५/२९)।

२. ननु स्फायेर्यो व इति कथन्न कृतम् ? सत्यम्। विचित्रा हि सूत्रस्य कृतिरिति (बि०टी०३/६/२५)।

## सम्प्रदायस्य प्रचलितत्वात् कातन्त्रस्य प्रतिष्ठा

१. कथं विषयान्तरं प्रतिबन्धुं क्षमते इति सम्प्रदायः (बि०टी०३/४/४)।

२. एकयोग इति सम्प्रदायः (बि०टी०३/४/५)।

३. आकारस्यानित्यत्वं बोधयतीति सम्प्रदायः (बि०टी०३/४/२९)।

४. अतः पुंवदिति सम्प्रदायः (बि०टी०३/६/४२)।

५. अन्यथा तदुपादानं व्यर्थं स्यादिति सम्प्रदायः (बि०टी०३/८/२४)।

## विवक्षाया मान्यता

१. ततः संक्रामन्तमाचष्टे इति विवक्षायामिना सिद्धम् (वि०प०३/४/६४)। द्र०-पृ०२७१,२९७,२९८,३३३।

## छान्दसप्रयोगाः

१. छान्दसावेतौ धातू (दीर्धीवेव्यौ) इत्येके (दु०वृ०३/५/१५)।

२. शर्ववर्मणस्तु वचनाद् भाषायामप्यवर्सायते, न ह्यसौ छान्दसान् व्युत्पादयति शब्दानिति (वि०प०३/५/१५)।

३. ऋषिवचनाद् वा। वस्तुतस्तु आर्षप्रयोग उपसर्गप्रतिरूपकेणाङा साधुरिति गोपीनाथः (बि०टी० ३/५/२४)।

४. इन्धेर्लिटि किद्वचनानर्थक्यम्, छान्दसत्वादिति (दु०टी०३/६/३)।

५. छान्दसा ह्येते प्रयोगा इति (दु०टी० ३/६/१६)।

६. तदेतन्न वक्तव्यम्, छान्दसत्वात् (वि०प०३/६/३९)।

७. अस्तेः सस्य छन्दसि दृश्यते न भाषायामिति (दु०टी०३/६/३९)।

८. छान्दसोऽयमित्याहुरन्ये (दु०टी०३/६/४३)।

९. अयं तु न मन्यते, छान्दसत्वात् (वि०प०३/६/८८)।

## अभिधानस्य प्रामाण्यम्

१. भाषायामप्यभिधानमस्तीति (दु०टी०३/४/१०)।

द्र०-पृ० २२, ४०, ४४, १०९, १३०, १३६, १३७, २२६, २६२, २७०, २७१, २७२, २७६, २८०, ३५५, ३७८, ३७९, ४६३, ४६४।

## लोकव्यवहारस्य प्रामाण्यम्

१. परेणैव सस्वरत्वं लोकतः सिद्धम् (दु०वृ०३/४/१)।

२. व्युत्पत्त्यर्थमाश्रित्य लोकव्यवहारं नानुसरन् बालः प्रवर्तते इति भावः (दु०टी० ३/४/१)।

३. विचक्षणो विद्वान् लोकतः सिद्धः (दु०वृ०३/४/८८)।

४. शर्ववर्मणस्तु मतं लोकोपचारादेव (दु०टी०३/५/४२)।

५. सजातिः सवर्ण इह लौकिक एव सम्भवति (दु०टी०३/६/५५)।

६. तत् पुनर्लोकप्रसिद्धेरभावात् तेनेति (वि०प०३/६/६१)।

७. यत् स्त्रीति लोकत: सिद्धमिदमुक्तं तद् विभक्तिविषयादन्यत्रैव बोध्यम् (बि०टी० ३/६/६१)।

८. आगमलिङ्गमिह लोकत: सिद्धं मन्दमतिबोधनार्थम् (दु०टी० ३/६/८७)।

९. कपिरिकादेर्लोकत: सिद्धि: (दु०वृ० ३/६/९९)।

१०. यच्च तद्ग्रहणेन गृहीतस्य थलो वृत्तौ विवरणं तत्तु सुखार्थमेव (वि०प० ३/७/३६)।

११. उपलक्षणं च लोकत: सिद्धम् (दु०टी० ३/८/२०)।

## 'अयमभिप्राय: - अस्यार्थ:' इत्यादि वचनेन कृता विशेषनिर्णया:

१. अयमभिप्राय: -चेक्रीयितं तावद् वर्तते (बि०टी० ३/४/१०)।

२. अयमभिप्राय: प्रकरणत्वेन (बि०टी० ३/७/१)।

३. अयमर्थ:—धातोरिति किमुक्तं भवति.....(वि०प० ३/७/१)।

४. अत्रायमर्थ:-पुरा किल दशरथेन राज्ञा मृगयां गतेन (दु०टी० ३/८/२१)।

५. प्राक् प्रतिषेध इति यदुक्तं तस्यायमाशय इति (बि०टी० ३/६/४०)।

६. अयमेवाशय:-उपधादीर्घस्यानुवृत्तिरर्थान्न भविष्यति (बि०टी० ३/६/६)।

७. अस्यार्थ:- हेतुकर्तृभये वर्तमानस्य ..(वि०प० ३/४/२३)।

८. अस्यार्थ:-'षिधु संराद्धौ' इत्यस्य दैवादिकस्य (वि०प० ३/४/२३)।

९. अस्यार्थ:-ज्ञाधातोर्ञकारो लुब् भवतीत्युक्तेऽपि (वि०प० ३./४/४२)।

१०. अस्यार्थ:- सार्वधातुकाधिकार: किम् असार्वधातुके० (वि०प० ३/४/४४)।

११. अस्यार्थ:-पिबतेरुपधालोप:-- (बि०टी० ३/५/४६)।

१२. अस्यार्थ:-अस्य तौ भवतो ययो: प्रत्यययो०-(बि०टी० ३/६/४०)।

१३. अस्यार्थ:-आङ्पूर्वकृधातुर्जनने वर्तते (बि०टी० ३/६/६१)।

१४. अस्यायमर्थ:-सार्वधातुक इति किमर्थम् (दु०टी० ३/४/३८)।

१५. अस्यायमर्थ:-इति नोच्यते (दु०वृ० ३/४/६४)।

१६. अस्यायमर्थ:-इकारेण करणभूतेन लक्षित: (बि०टी० ३/३/३५)।

## 'वस्तुतस्तु' इतिसंकेतवचनेन तात्पर्यकथनम्

१. वस्तुतस्तु स्नुहीत्यत्र विषयो नास्ति (बि०टी० ३/४/३४)।

२. वस्तुतस्तु क्र्यादीनामिनि बहुवचनं बोधयति (बि०टी० ३/४/४२) ।

३. वस्तुतस्तु यण्वद्भावमाश्रित्यानुषङ्गलोपः (बि०टी० ३/४/५२) ।

४. वस्तुतस्तु यणादौ णानुबन्धमन्तरेण०(बि०टी० ३/५/७) ।

५. वस्तुतस्तु आर्षप्रयोग उपसर्गप्रतिरूपकेणाङा साधुरिति गोपीनाथः (बि०टी० ३/५/२४) ।

६. वस्तुतस्तु एवं युज्यते पङ्क्ती (बि०टी० ३/५/४४) ।

७.वस्तुतस्तु 'राजीयति' इत्यत्र "यिन्यवर्णस्य"इति सूत्रबलात्० (बि०टी० ३/६/४६) ।

८. वस्तुतस्तु सनि परसूत्रेणेड् विभाष्यते (बि०टी० ३/७/३२) ।

९. वस्तुतस्तु चतुर्थग्रहणाभावे धुटां तृतीय इति (बि०टी० ३/८/८) ।

१०. वस्तुतस्तु स्वरदन्त्यपरा इत्यत्र स्वतन्त्रेण स्वरेण०(बि०टी० ३/८/२४) ।

## शर्ववर्माचार्येणाद्यव्याकरणस्य दर्शनम्, परलोकस्य जन्मान्तरार्थे प्रयोगश्च

१. भृजः स्वरात् परस्य स्वरे द्विर्भवति । ..... आद्यव्याकरणमतमेतत् (दु० वृ० ३।८।१०) ।

आधुनिकव्याकरणेषु नैतल्लक्षणमस्तीति भावः (दु०टी० ३।८।१०) ।

२. परलोके जन्मान्तरे फलमभ्युदयलक्षणं प्रयच्छन् परलोकप्रयोजनत्वात् पारलौकिको भवतीति प्रत्युदाहृियते (वि०प० ३।४।२३) ।

व्याख्याकारैर्बहूनि कार्याणि सुखावबोधार्थम् , मन्दमतिबोधार्थम् , अगुणार्थम् , अनुक्तसमुच्चयार्थम् , उच्चारणार्थम् ,उत्तरार्थम् , नियमार्थम् , प्रतिपत्तिगौरवनिरासार्थम् , स्पष्टार्थम् , स्वरूपपरिग्रहार्थम् , प्रतिषेधबाधनार्थम् , प्रयोगनिवृत्त्यर्थम् , विशेषप्रतिपत्त्यर्थम्, वैचित्र्यार्थम् , पूर्वपक्षार्थम् , व्युत्पत्त्यर्थं चाङ्गीकृतानि । एतेषां क्रमबद्धपरिचयार्थं वर्णानुक्रमेण सम्बद्धवचनानि ससन्दर्भं प्रस्तूयन्ते —

### १. [अगुणार्थम् – २]

१. परस्मैपदग्रहणम् एकत्वेऽपि क्वचिदगुणार्थम् (बि०टी० ३।५।१९) ।

२. णकारोऽगुणार्थः (दु०टी० ३।५।४१) ।

### २. [अनन्यार्थम् – १]

३. तिप्-निर्देशोऽयं सुखार्थः । अनन्यार्थ इत्येके (दु० टी० ३।४।२) ।

## ३. [अनित्यार्थम् - २]

४. 'आ' इति सिद्धे दीर्घग्रहणं संज्ञापूर्वकत्वादनित्यार्थमेव (दु० टी० ३।६।६)।

५. उत औरिति सिद्धे वृद्धिग्रहणं संज्ञापूर्वकत्वादनित्यार्थम् (दु० टी० ३।६।८४)।

## ४. [अनिर्दिष्टार्थम् – १]

६. कगे धातुरनिर्दिष्टार्थ इति यावत् (दु० टी० ३।४।६४)।

## ५. [अनुकर्षणार्थम् – १]

१. दु० टी० (३।८।२६)।

## ५. [अनुक्तसमुच्चयार्थः – ४]

७. चकारोऽनुक्तसमुच्चयार्थ इत्याह–अगुणे गुणिनि चेति (दु०टी० ३।४।५)।

८. इह चकारस्यानुक्तसमुच्चयार्थत्वात् सिद्धम् (वि० प० ३।४।५२)।

९. चकारोऽनुक्तसमुच्चयार्थः, तेन इकोऽपि स्यात् (दु० वृ० ३।४।५८)।

१०. चकारोऽनुक्तसमुच्चयार्थः, तेनेटि वा स्यात् (दु०वृ० ३।६।८६)।

## ६. [अनुषङ्गार्थः – १]

११. इकारानुबन्धो हि अनुषङ्गार्थ एव चरितार्थो गृह्यते (दु० टी० ३।४।८०)।

## ७. [अनुस्वारोपलक्षणार्थम् – १]

१२. णत्वविधौ नुग्रहणमनुस्वारोपलक्षणार्थम् (दु० टी० ३।६।१)।

## ८. [अन्त्यार्थः – १]

१३. अत एवान्त्यार्थोऽयमारम्भः इत्युक्तम् (वि०प० ३।७।२८)।

## ९. [अभिधानार्थम् – १]

१४. भाषायामपि चेक्रीयितलुगन्तस्याभिधानार्थम् (दु० टी० ३।५।३७)।

## १०. [अभिन्नबुद्ध्यर्थम् – १]

१५. तद्ग्रहणमभिन्नबुद्ध्यर्थम् (बि०टी० ३।४।३)।

## ११. [अभ्यासाधिकारनिवृत्त्यर्थम् – १]

१६. तदेतदभ्यासाधिकारनिवृत्त्यर्थं सुखार्थं चेति मन्यते (दु०टी० ३।४।६)।

## १२. [असन्देहार्थम् – ४]

१७-२०. तपरकरणमसन्देहार्थम् (दु०टी० ३।५।११; दु०टी० ३।५।४२; द्र०-बि०टी० ३।६।१; दु०टी० ३।६।१६)।

## १३. [अवयवार्थः – १]

२१. आदिशब्दोऽयमवयवार्थः (दु०टी० ३।६।५४)।

## १४. [आगमार्थम् – २]

२२. अथान्तग्रहणं किमर्थम् ? आगमार्थम् (वि० प० ३।४।२५)।

२३. आदिग्रहणमागमार्थम् (दु० टी० ३।५।४०)।

## १५. [आशङ्कार्थः – १]

२४. यस्तकारः स किमर्थं गृहीत इत्याशङ्कार्थः (वि० प० ३।५।३९)।

## १६. [निवृत्त्यर्थम् – १]

२५. इण्ग्रहणम् इङो निवृत्त्यर्थम् (दु०टी० ३।४।५८)।

## १७. [इन्सामान्यार्थम् – १]

२६. इन्ग्रहणम् इन्सामान्यार्थम् (दु० वृ० ३।५।४४; वि०प०)।

## १८. [उच्चारणार्थः – २२]

२७. वर्णात् कारशब्दोऽयमकार उच्चारणार्थ एव (दु० टी० ३।४।२५)।

२८. अकार उच्चारणार्थः (बि० टी० ३।४।३१)।

२९. नायमिकार उच्चारणार्थः (दु०टी० ३।४।८०)।

३०. अकार उच्चारणार्थः (दु० टी० ३।४।८३)।

३१. (दु०टी० ३।४।८७)। ३२. (दु० टी० ३।५।३५)। ३३. (वि० प० ३।५।४०)। ३४. (दु०टी० ३।५।४७)। ३५. (दु० टी० ३।६।२)। ३६. (दु० टी० ३।६।१९)। ३७. (दु० टी० ३।६।२१)। ३८. (दु० टी० ३।६।२२)। ३९. (दु० टी०, बि० टी० ३।६।३९)। ४०. (दु० वृ० ३।६।४५)। ४१. (दु० वृ० ३।६।४८)। ४२. (दु० टी० ३।६।६७)। ४३. (दु० टी० ३।६।७०)। ४४. (दु० टी० ३।६।८७)। ४५. (वि० प० ३।६।९७)। ४६. (दु० टी० ३।६।१००)। ४७. (दु० टी० ३।७।३८)। ४८. (दु० टी० ३।८।४)।

## १९. [उत्तरार्थम् – १९]

४९. स्वरादिग्रहणमुत्तरार्थम् (बि०टी० ३।४।२५)।

५०. न केवलमगुणाधिकार उत्तरार्थः (वि० प० ३।४।५४)।

५१. धातुग्रहणमप्युत्तरार्थमेव (दु० वृ० ३।४।५४)।

५२. दु० टी० (३।४।५७)। ५३. वि० प० (३।४।५७)। ५४. दु० वृ० (३।४।६२)। ५५. दु०टी० (३।४।७६)। ५६. दु० वृ० (३।५।२)। ५७. वि०प० (३।५।२)। ५८. दु०टी० (३।५।४४)। ५९. वि० प० (३।५।४४)। ६०. दु०टी० (३।६।१०)। ६१. दु० वृ० (३।६।५४)। ६२. दु० वृ० (३।६।१००)। ६३. वि० प० (३।७।१)। ६४. बि० टी० (३।७।३३)। ६५. दु० टी० (३।८।१३)। ६६. बि० टी० (३।८।१३)। ६७. बि०टी० (३।८।१६)।

## २०. [उपचारार्थम् – १]

६८. द्वयम् – ग्रहणम् अभ्यस्तनिमित्तमुपचारार्थम् (बि०टी० ३।८।३०)।

## २१. [उपदेशार्थम् – ३]

६९. स्वरान्तग्रहणमुपदेशार्थम् (दु०वृ० ३।६।६)।

७०. उपदेशार्थः पाठः (वि० प० ३।६।६)।

७१. स्वरान्तग्रहणमुपदेशार्थम् (बि०टी० ३।६।६)।

## २२. [उपधात्वप्रतिपत्त्यर्थम् – १]

७२. उपधाग्रहणम् ..... उपधात्वप्रतिपत्त्यर्थम् (वि० प० ३।८।१४)।

## २३. [उपलक्षणार्थम् – १]

७३. संयोगादिग्रहणम् उपलक्षणार्थम् (दु० टी० ३।६।३५)।

## २४. [उपसर्गानुवर्तनार्थम् – १]

७४. अपिग्रहणम् उपसर्गानुवर्तनार्थम् (दु० टी० ३।८।२६)।

## २५. [कार्यार्थम् – २]

७५. इकार उच्चारणार्थः कार्यार्थो वा (बि० टी० ३।५।३५)।

७६. परमार्थतोऽनुबन्धाः कार्यार्थं शब्दव्यवहारिभिरुपादीयन्ते (दु०टी० ३।८।३१)।

## २६. [कार्यित्वप्रतिपत्त्यर्थम् – १]

७७. सहग्रहणं स्वरस्यापि कार्यित्वप्रतिपत्त्यर्थम् (दु०टी० ३।४।१)।

## २७. [गणार्थम् – ३]

७८. अन्तग्रहणं गणपठितार्थम् (दु० टी० ३।५।४२)।

७९. बहुवचनं गणार्थम् (दु०वृ० ३।६।४५)।

८०. गणपाठशुद्ध्यर्थमिदमाह (दु०टी० ३।८।२४)।

## २८. [गत्यर्थम् – १]

८१. पुनस्तग्रहणं गत्यर्थम् (दु०वृ० ३।६।२७)।

## २९. [गुणार्थम् – ८]

८२. दु०टी० (३।४।४)। ८३. दु०वृ० (३।४।२७)। ८४. दु०टी० (३।४।५१)। ८५. दु०वृ० (३।४।६१)। ८६. दु०टी० (३।५।७)। ८७. दु०टी०, वि०प० (३।५।८)। ८८. दु०टी० (३।६।१३)। ८९. दु०वृ० (३।६।१७)।

## ३०. [ग्रहणार्थम् – १]

९०. उदनुबन्धग्रहणं 'शासु अनुशिष्टौ' इत्यस्य ग्रहणार्थम् (दु०टी० ३।५।४५)।

३१. चरितार्थम् – १ (९१), ३२. चेक्रीयितलुगन्तार्थ:–१ (९२), ३३. चेक्रीयितलुङ्निवृत्त्यर्थ:–१ (९३), ३४. जात्यर्थम् – १ (९४), ३५. ज्ञापनार्थम् – ४ (९५-९८), ३६. तदन्तविधिनिरासार्थम् – २ (९९-१००), ३७. तात्पर्यार्थम् – १ (१०१), ३८. तिबादिनिर्देशार्थम् – १ (१०२), ३९. धातुस्वरूपपरिग्रहार्थम् – १ (१०३), ४०. नि:सन्देहार्थम् – ३ (१०४-१०६), ४१. नित्यार्थम् – ५ (१०७-१११), ४२. नियमार्थम् – ९ (११२-१२०), ४३. निरासार्थम् – १ (१२१)। ४४. निर्देशसुखार्थम् – ३ (१२२-१२४)। ४५. प्रतिषेधार्थम् – २ (१२५-१२६)। ४६. प्रयोगनिषेधार्थम् – ५ (१२७-३१)। ४७. बालव्युत्पत्त्यर्थम् – १ (१३२)। ४८. बोधगौरवनिरासार्थम् - १ (१३३)। ४९. मन्दमतिबोधनार्थम् – १२ (१४५)। ५०. यथासङ्ख्यविघातार्थम् – १ (१४६)। ५१. योगविभागार्थम् – २ (१४८)। ५२. लाघवार्थम् – ५ (१५३)। ५३. लिङ्गार्थम् – २ (१५५)। ५४. लोपार्थम् – २ (१५७)। ५५. विभाषानिवृत्त्यर्थम् – १ (१५८)। ५६. विशेषणार्थम् – २ (१६०)। ५७. विशेषप्रतिपत्त्यर्थम् – ४ (१६४)। ५८. वैचित्र्यार्थम् – ९ (१७३)। ५९. व्यक्त्यवधारणार्थम् – १ (१७४)। ६०. पूर्वपक्षार्थम् – ४ (१७८)। ६१.

प्रकृतिनियमनिरासार्थम् – १ (१७९)। ६२. प्रतिपत्तिगौरवनिरासार्थम् – ८ (१८७)। ६३. प्रतिपत्त्यर्थम् – ५ (१९२)। ६४. व्युत्पत्त्यर्थम् – २ (१९४)। ६५. शङ्कानिरासार्थम् – २ (१९६)। ६६. सम्भवदर्शनार्थम् – २ (१९८)। ६७. सामान्यार्थम् – २ (२००)। ६८. सार्वधातुकप्रतिपत्यर्थम् – १ (२०१)। ६९. सुखप्रतिपत्त्यर्थम् – सुखार्थम् – सुखोच्चारणार्थम् – ८४ (२८५)। ७०. स्थानिवद्भावार्थम् - १ (२८६)। ७१. स्पष्टार्थम् – ४६ (३३२)। ७२. स्वरूपपरिग्रहार्थम् –१ (३३३)।

## एषां संग्रहः सारण्यां द्रष्टव्यः –

| क्र०सं० | प्रयोजनम् | संख्या | क्र०सं० | प्रयोजनम् | संख्या |
|---|---|---|---|---|---|
| १. | अगुणार्थम् | २ | २०. | उपचारार्थम् | १ |
| २. | अनन्यार्थम् | १ | २१. | उपदेशार्थम् | ३ |
| ३. | अनित्यार्थम् | २ | २२. | उपधात्वप्रतिपत्त्यर्थम् | १ |
| ४. | अनिर्दिष्टार्थम् | १ | २३. | उपलक्षणार्थम् | १ |
| ५. | अनुक्तसमुच्चयार्थम् | ४ | २४. | उपसर्गानुवर्तनार्थम् | १ |
| ६. | अनुषङ्गार्थम् | १ | २५. | कार्यार्थम् | २ |
| ७. | अनुस्वारोपलक्षणार्थम् | १ | २६. | कार्यित्वप्रतिपत्त्यर्थम् | १ |
| ८. | अन्त्यार्थम् | १ | २७. | गणार्थम् | ३ |
| ९. | अभिधानार्थम् | १ | २८. | गत्यर्थम् | १ |
| १०. | अभिन्नबुद्ध्यर्थम् | १ | २९. | गुणार्थम् | ८ |
| ११. | अभ्यासाधिकारनिवृत्त्यर्थम् | १ | ३०. | ग्रहणार्थम् | १ |
| १२. | असन्देहार्थम् | ४ | ३१. | चरितार्थम् | १ |
| १३. | अवयवार्थम् | १ | ३२. | चेक्रीयितलुगन्तार्थम् | १ |
| १४. | आगमार्थम् | २ | ३३. | चेक्रीयितलुङ्निवृत्त्यर्थम् | १ |
| १५. | आशङ्कार्थम् | १ | ३४. | जात्यर्थम् | १ |
| १६. | इङो निवृत्त्यर्थम् | १ | ३५. | ज्ञापनार्थम् | ४ |
| १७. | इन्सामान्यार्थम् | १ | ३६. | तदन्तविधिनिरासार्थम् | २ |
| १८. | उच्चारणार्थम् | २२ | ३७. | तात्पर्यार्थम् | १ |
| १९. | उत्तरार्थम् | १९ | ३८. | तिब्निर्देशार्थम् | १ |

| क्र०सं० | प्रयोजनम् | संख्या | क्र०सं० | प्रयोजनम् | संख्या |
|---|---|---|---|---|---|
| ३९. | धातुस्वरूपपरिग्रहार्थम् | १ | ५७. | विशेषप्रतिपत्त्यर्थम् | ४ |
| ४०. | नि:सन्देहार्थम् | ३ | ५८. | वैचित्र्यार्थम् | ९ |
| ४१. | नित्यार्थम् | ५ | ५९. | व्यक्त्यवधारणार्थम् | १ |
| ४२. | नियमार्थम् | ९ | ६०. | पूर्वपक्षार्थम् | ४ |
| ४३. | निरासार्थम् | १ | ६१. | प्रकृतिनियमनिरासार्थम् | १ |
| ४४. | निर्देशसुखार्थम् | ३ | ६२. | प्रतिपत्तिगौरवनिरासार्थम् | ८ |
| ४५. | प्रतिषेधार्थम् | २ | ६३. | प्रतिपत्त्यर्थम् | ५ |
| ४६. | प्रयोगनिषेधार्थम् | ५ | ६४. | व्युत्पन्त्यर्थम् | २ |
| ४७. | बालव्युत्पत्त्यर्थम् | १ | ६५. | शङ्कानिरासार्थम् | २ |
| ४८. | बोधगौरवनिरासार्थम् | १ | ६६. | सम्भवदर्शनार्थम् | २ |
| ४९. | मन्दमतिबोधनार्थम् | १२ | ६७. | सामान्यार्थम् | २ |
| ५०. | यथासङ्ख्यविघातार्थम् | १ | ६८. | सार्वधातुकप्रतिपत्त्यर्थम् | १ |
| ५१. | योगविभागार्थम् | २ | ६९. | सुखप्रतिपत्त्यर्थम् , | |
| ५२. | लाघवार्थम् | ५ | | सुखार्थम् , सुखोच्चारणार्थम् | ८४ |
| ५३. | लिङ्गार्थम् | २ | ७०. | स्थानिवद्भावार्थम् | १ |
| ५४. | लोपार्थम् | २ | ७१. | स्पष्टार्थम् | ४६ |
| ५५. | विभाषानिवृत्त्यर्थम् | १ | ७२. | स्वरूपपरिग्रहार्थम् | १ |
| ५६. | विशेषणार्थम् | २ | | | |

६७ + ३५ + ५८ + १७३ = ३३३

**प्रथमे परिशिष्टे** शर्ववर्मप्रणीतानां ८५५ सूत्राणां ग्रन्थक्रमेण पाठो वर्तते । **द्वितीये परिशिष्टे** पञ्चपञ्चाशदधिकाष्टशतमितानां (८५५) सूत्राणां समीक्षात्मकं विवरणमेकत्र संगृहीतम्। आचार्यशर्ववर्मप्रणीतस्य प्रत्येकं सूत्रस्य समीक्षा मया यथास्थानं सामान्यत: पाणिनीयसूत्रेण सह प्रस्तुता, तत्र उत्कर्षापकर्ष-गौरवलाघव – सरलतादुरूहता – अन्वर्थताकृत्रिमता – साम्यादिभेदेनोभयत्रान्तरं प्रदर्शितम् । सा एकस्मिन् परिशिष्टे सकलिता पाठकानां गवेषणापराणां जिज्ञासुजनानां च सौविध्याय । कातन्त्रपाणिनीययो रचनाप्रक्रियाविधानादिदृशा ४३९ सूत्रेषु साम्यमवलोक्यते, पाणिनीयापेक्षया कातन्त्रीयेषु २७१ सूत्रेषु लाघवम् , एकविंशतिसूत्रेषु

गौरवम् , ४३ सूत्रेषु उत्कर्षः, एकस्मिन् सूत्रेऽपकर्षः, २८ सूत्रेषु अन्वर्थता, सप्तसूत्रेषु च सरलता वर्तते । कातन्त्रापेक्षया पाणिनीयेषु ६० सूत्रेषु लाघवम् , २३२ सूत्रेषु गौरवम्, त्रिषु सूत्रेषूत्कर्षः, ३७ सूत्रेष्वपकर्षः, २९ सूत्रेषु कृत्रिमता, अष्टसूत्रेषु दुरूहता च संनिहिताऽवगन्तव्या। सारण्यामेषा समीक्षा एवं द्रष्टव्या —

## समीक्षासारणी

| समीक्षापक्षाः | कातन्त्रीये | पाणिनीये |
|---|---|---|
| साम्यम् | ४३९ सूत्रेषु | ४३९ सूत्रेषु |
| लाघवम् | २७१ सूत्रेषु | ६० सूत्रेषु |
| गौरवम् | २१ सूत्रेषु | २३२ सूत्रेषु |
| उत्कर्षः | ४३ सूत्रेषु | ३ सूत्रेषु |
| अपकर्षः | १ सूत्रे | ३७ सूत्रेषु |
| अन्वर्थता | २८ सूत्रेषु | × |
| कृत्रिमता | × | २९ सूत्रेषु |
| सरलता | ७ सूत्रेषु | × |
| दुरूहता | × | ८ सूत्रेषु |

निदर्शनार्थं द्वित्राः समीक्षा अत्र प्रस्तूयन्ते —

### १. साम्यम्

'अभवत् , अभूत् , अभविष्यत् ' इत्यादौ धातोः पूर्वम् अडागमः कातन्त्रे पाणिनीये चोभयत्र विधीयते —

**कातन्त्रसूत्रम् –** अड् धात्वादिर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु (३।८।१६) ।

**पाणिनीयसूत्रम् –** लुङ्लङ्लृङ्क्ष्वडुदात्तः (अ० ६।४।७१) ।

### २. लाघवं गौरवं च

'अट्–अत्' प्रभृतिधातुभ्यः 'आटीत् , आर्तात् ' इत्यादिशब्दरूपाणां सिद्ध्यर्थं कातन्त्रकारेण "अवर्णस्याकारः" (३।८।१८) सूत्रेण अकारस्याकारादेशं विधाय लाघवमाद्रियते। पाणिनिश्चैतदर्थम् "आडजादीनाम्" (अ० ६।४।७२) इत्यनेन आडागमम् "आटश्च" (अ० ६।१।९०) इत्यनेन वृद्ध्यादेशं विधाय गौरवमाननोति ।

### ३. उत्कर्षापकर्षौ

'कृष्णर्द्धिः' इत्यादिप्रयोगसिद्ध्यर्थं कातन्त्रे "ऋवर्णे अर्" (१।२।४) इत्यनेन

सूत्रेण पूर्ववर्तिनोऽकारस्य स्थानेऽरादेशः परवर्तिनः ऋकारस्य च लोपो विधीयते । परमत्र पाणिनिः "एकः पूर्वपरयोः" (अ० ६।१।७५) इत्यधिकारे, "आद् गुणः" (अ० ६।१।८७) इत्यनेन अकार-ऋकारयोः स्थाने अकारादेशम् , "उरण् रपरः" (अ० १।१।२१) इत्यनेन रपरत्वं च विदधाति । एतेन कातन्त्रे उत्कर्षः पाणिनीये चापकर्षः स्पष्टं प्रतीयते ।

**तृतीये परिशिष्टे** दुर्गवृत्तिनिर्दिष्टानां समीक्षांशे मया साधितानां ११३० शब्दरूपाणाम्, चतुर्थे परिशिष्टे चतसृषु व्याख्यासु समुद्धृतानां ३७ श्लोकवचनानां श्लोकांशानां च, पञ्चमे परिशिष्टे व्युत्पादितानां १२७ शब्दानाम् , षष्ठे परिशिष्टे विविधप्रयोजन–अर्थाद्यवबोधकानां १०२५ विशिष्टशब्दानाम् , सप्तमे परिशिष्टे ५२ समुद्धृतग्रन्थानाम् , अष्टमे परिशिष्टे ७१ स्मृतग्रन्थकाराणाम् , नवमे परिशिष्टे च २६ साङ्केतिक-पूर्णशब्दरूपाणां वर्णानुक्रमेण सूची प्रस्तुता वर्तते ।

एवं १९६८ तमर्यीशर्वीयवत्सरान्मया यद् यावच्च कातन्त्रमधीतम् , तदधिकृत्य सम्प्राप्तानुभवबलेन संक्षिप्ता सम्पादनयोजना २।२।१९९० तमे दिनाङ्के सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयीयप्रकाशनविभागे संप्रस्तुता, तस्याः स्पष्टीकरणं च विस्तरेणानुष्ठितं २०।६।९४ तमदिनाङ्कितपत्रेण । तदनुसारं सूत्र-सूत्रार्थप्रदर्शनपुरस्सरमाचार्यदुर्गसिंहविरचितायाः कातन्त्रवृत्तेः, कातन्त्रवृत्तिटीकायाः, त्रिलोचनदासस्य कातन्त्रवृत्तिपञ्जिकायाः, सुषेणविद्याभूषणस्य कलापचन्द्रस्य च सम्पादनमायोजितमासीत् । अत्रापि चानिवार्यं महत्त्वपूर्णमासीद् हिन्दीभाषायां व्याख्याचतुष्टयस्यास्य विषयाणां वैशिष्ट्यप्रदर्शनं पाणिनीयेन व्याकरणेन सह समीक्षाकार्यं च । परं कार्यमिदं दुरूहं समयसाध्यं चासीत् , तथापि पाणिनीयवाङ्मये महाभाष्य–काशिकावृत्ति–न्यास–पदमञ्जरीणामनुशीलनानुभवबलेन तादृशस्य 'दुर्गवृत्ति-टीका-पञ्जिका-कलापचन्द्र' इत्येतस्य व्याख्याचतुष्टयस्याध्ययनादिबलेन च सोत्साहमहं कार्यमिदं संपूरयितुं संकल्पितवान् । कार्यस्य गौरवमुपयोगितां व्यापकतां चाकलयन्ती प्रकाशनसमितिः १९९६ तमे यीशवीयवत्सरे मामकीनां यां योजनामङ्गीचकार, तस्यास्तृतीयभागस्य द्वितीयं खण्डमिदं वर्तते । आचार्यशर्ववर्मणा सन्धि-नामचतुष्टय-आख्याताख्येषु त्रिष्वध्यायेषु एकोनविंशतिपादेषु च ८५५ सूत्राणि यानि प्रणीतानि, तानीह परिसमाप्यन्ते । अत्रादिमङ्गलं "सिद्धो वर्णसमाम्नायः" (१।१।१) इतिसूत्रस्थसिद्धपदेन, मध्यमङ्गलम् "अथ परस्मैपदानि नव" (३।१।१) इतिसूत्रस्थाथपदेन, अन्त्यमङ्गलं च "आरुत्तरे च वृद्धिः" (३।८।३५) इतिसूत्रस्थवृद्धि-पदेनाचरितम् । अतः परं चतुर्थाध्यायात्मकमाचार्यवररुचिप्रणीतं कृत्प्रकरणमपि शीघ्रमेव पाठकानां विदुषां करतलगतं भविष्यतीत्याशासे ।

## कृतज्ञताप्रकाशः

विदुषामिदं सुविदितमेव यत् कातन्त्रव्याकरणमधिकृत्यान्वेषणकार्यस्य प्रवर्तनाय प्रेरणासूत्राण्यासन् आचार्यबलदेवोपाध्याय-रामशङ्करभट्टाचार्य-क्षेत्रेशचन्द्रचट्टोपाध्याय-

युधिष्ठिरमीमांसक-विश्वबन्धुशास्त्रि – फतहसिंह–पृथ्वीनाथपुष्पप्रभृतयो विद्वांसः । एतान् सर्वानेव विद्वद्वर्यान् इदानीं स्मारं स्मारमहं महतीं मुदमावहामि । मुनिजिनविजय–दीनानाथयक्ष–वेणीमाधव-व्रजमोहनजावलिया–नीलमणिमिश्र-मानगोविन्द-रामकृष्णशास्त्रि-हरीश-लक्ष्मीनारायण-ठाकुरदत्त-विनयसागर-जमुनालालबल्दुआ-बाबूराम-दलसुखमालवणियाँ-रमेशपुरोहित-भिक्षुजगदीशकश्यपादयोऽपि विद्वांसो नैव विस्मर्तुं शक्यन्ते, यैरन्वेषणप्रसङ्गे शारदा-उत्कल–वङ्गादिलिपिवाचनेन, पाठसंशोधन-इतिवृत्तपरिचयादिना च पूर्वमपूर्वं साहाय्यमारचितम् । तांस्तान् कातन्त्राचार्यान् प्रति प्रणतः सन् कृतज्ञतामावेदये, येऽद्यापि पाणिनीयादिव्याकरणान्तरापेक्षया सरलं संक्षिप्तं च कातन्त्रमुपस्थाप्य व्याकरणवाङ्मये लोकव्यवहारप्रधानां माहेन्द्रीं परम्परामुज्जीवयन्तो जयन्ति ।

यद्यपि भोटदेशीया बौद्धाः कातन्त्रं बौद्धव्याकरणमामनन्ति कलापनाम्ना च तत् प्रायेण व्यवहरन्ति, परं साम्प्रतं दिगम्बरजैनाचार्येषु मुनिवर्यः **श्रीविद्यानन्दमहाराजः** कातन्त्रं न केवलं जैनव्याकरणं मनुते, अथ च तद् एकविंशर्यीशवीयशतकस्य गौरवग्रन्थ-मुद्घोषयति। तदीया मान्यता वर्तते यद् ग्रन्थकारः शर्ववर्मा आसीद् दिगम्बरजैनाचार्यः । अनया धिया सः १४।३।१९९९ तमे दिनाङ्के एकलक्षमुद्रात्मकमाचार्य-उमास्वामिपुरस्कारं मह्यं प्रदत्तवान् । व्याकरणमिदमधिकृत्य २००० तमे र्यीशवीयवत्सरे **श्रुतपञ्चमी**महापर्वशुभावसरे जूनमासस्य षष्ठे सप्तमे च दिनाङ्के नवदिल्लीस्थश्रीकुन्दकुन्दभारतीन्यासस्य सौजन्येन अखिलभारतीयशौरसेनीप्राकृतसंसदस्तत्त्वावधाने द्विदिवसीयां राष्ट्रियसंगोष्ठीमायोजितवान्। अपि च ८।६।२००० तमदिनाङ्कादारभ्य २२।६।२००० तमदिनाङ्कपर्यन्तं पञ्चदशदिवसीया एका कार्यशालापि तेन व्याकरणेऽस्मिन् समायोजिता, यत्र मया बहूनि व्याख्यानानि प्रवर्तितानि । एतेन तेभ्यो भूयांसं प्रणामाञ्जलिं निवेदयन् कातन्त्रस्य प्रचाराय प्रसाराय च वन्दनीयानां तेषां सकाशाद् आशीराशिं कामये । तेषां प्रधानशिष्याः महाराज-**श्रीश्रुतसागर**प्रभृतयोऽप्यवसरेऽस्मिन् वन्दनीया भवन्ति ।

अभिनन्दनीयाः सन्ति प्राच्यभारतीयग्रन्थनिधिसंरक्षणसंकल्पपराः मान्याः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीय-प्रकाशनसमितिसदस्याः । मुद्रणनिर्देशन-अर्थव्यवस्था–समाधानादिकार्यजातस्य निर्वाहाय कुलपति–कुलसचिव-शोधनिदेशक–प्रकाशननिदेशक–तदीयसहयोगिनोऽपि यशोभाजो भवन्ति । तस्मात् परममाननीयान् कुलपति**श्रीराजेन्द्रमिश्र**-महोदयान् प्रति प्रणामाञ्जलिना, कुलसचिव–निदेशकवर्यान् प्रति विनयव्यवहारेण, अथ च सुहृद्वर्यान् प्रकाशन–निदेशक**श्रीहरिश्चन्द्रमणित्रिपाठि**महाभागान् प्रति सुहृत्संमित-सद्भावसंवलितधन्यवादप्रदानेन च स्वकीयां कृतज्ञतां विज्ञापयामि ।

काव्यादर्शं काव्यप्रकाशं चाधिकृत्य विद्यावारिध्युपाधये अन्वेषणकार्यरतः साहित्याचार्यो ज्येष्ठपुत्रः चि० **शरच्चन्द्रद्विवेदः** साम्प्रतमीक्ष्यपत्रसंशोधनादिकार्यसम्पादनेन साहाय्यमाचरन्

वाञ्छितमुत्तरदायित्वं निर्वहति विश्वासपदवीं चारोहति, तेन श्रेयसे अभ्युदयाय च स आशीर्भिः संयोज्यते। ईक्ष्यपत्रसंशोधनादिव्यवस्थाकार्येषु कौशलेन संसक्ता **डॉ० हरिवंशपाण्डेय-कन्हईसिंहकुशवाहा**प्रभृतयः प्रकाशनविभागीयसदस्यास्त्वरितमुद्रण-योजनाव्यापारपरा **आनन्दप्रिण्टिङ्गप्रेससदस्या** अपि धन्यवादार्हाः सन्ति।

*कार्त्तिकेयप्रसादेन रचितं शर्ववर्मणा ।*
*वर्धितं यच्च कातन्त्रं दुर्गसिंहादिभिः पुनः ।।*
*तदेव प्रथितं भूयो देशे देशान्तरेषु च ।*
*मानसं रमयेन्नित्यं शब्दविद्यानुरागिणाम् ।।*

**वि० सं० २०५९**
चैत्रपूर्णिमा, शनिवासरः
दि० २७।४।२००२

*विदुषामाश्रवः*
**जानकीप्रसादद्विवेदः**
**सम्पादकः**
आचार्यः संस्कृतविभागे
के० उ० ति० शि० संस्थानम्
सारनाथ-वाराणसी।

।। श्रीः ।।

# विषयानुक्रमणिका

## [आख्यातप्रकरणम्, ४-८ पादाः]


पृ० सं०

**चतुर्थः सम्प्रसारणपादः (सूत्रसंख्या-९२)** १–१५०

**१. सम्प्रसारणाधिकार** १-४

[आचार्य शर्ववर्मा ने अन्तस्थासंज्ञक वर्णों के सम्प्रसारण का अधिकार इस पाद के प्रारम्भ में उपस्थापित करके विधि-निषेधविषयक विविध सूत्र बनाए हैं। अन्तस्थासंज्ञक 'य्-र्-ल्-व्' इन अर्धमात्रिक वर्णों के स्थान में एकमात्रिक 'इ-उ-ऋ-ऌ' वर्णों के होने से सम्प्रसारण की अन्वर्थता सिद्ध होने के कारण कातन्त्रकार ने इसके लिए संज्ञासूत्र बनाने की आवश्यकता न समझकर अधिकार के रूप में प्रस्तुत किया है। काशकृत्स्नधातुव्याख्यान, निरुक्त, दुर्गभाष्य, गोपथब्राह्मण आदि में इसका उल्लेख, व्याख्याकारों की छह विशेषताएँ ]

**२. अगुणादि प्रत्ययों में सम्प्रसारण का विधान** ५-१४

[अगुण प्रत्ययों में ग्रहादिधातुगत, यण्-अगुण-परोक्षा-आशीर्विभक्तियों में स्वपादिधातुगत तथा अभ्यासस्थ स्वपादिधातुगत अन्तस्थासंज्ञक वर्णों का सम्प्रसारण, व्याख्याकारों द्वारा तिप् का निर्देश सुखार्थ, औणादिकों की अव्युत्पन्नता-व्युत्पन्नता, सूत्र का पृथग् विधान वैचित्र्यार्थ तथा सम्प्रदाय की मान्यता ]

**३. सम्प्रसारण का निषेध** १५-१७

['वेञ् तन्तुसन्ताने' तथा 'टु ओ श्वि गतिवृद्ध्योः' धातुओं में सम्प्रसारण का निषेध, चकार का अनुक्तसमुच्चयार्थ उपादान ]

**४. चेक्रीयित आदि प्रत्ययनिमित्तक स्वपादि धातुओं का सम्प्रसारण** १७-२६

[ चेक्रीयित-चण्-सन्-इन् प्रत्ययों के परवर्ती होने पर स्वपादि धातुओं का सम्प्रसारण, चेक्रीयित के लिए पाणिनि द्वारा यङ्-प्रत्यय का व्यवहार, चाय् -प्याय् धातुओं को क्रमशः 'कि-पि' आदेश, इक्-अ-श्तिप्प्रत्ययान्त धातुनिर्देश ]

**५. नित्य सम्प्रसारण तथा स्वरसहित यकारादि वर्णों का सम्प्रसारण २६-३५**

[ ह्वेञ् धातु को नित्य सम्प्रसारण, 'जुहाव' आदि में स्वरसहित वकार आदि को सम्प्रसारण, सम्प्रसारण के रहने पर पूर्ववर्ती का सम्प्रसारणनिषेध तथा इङ्गित आदि से आचार्यों के अभिप्राय का परिज्ञान ]

**६. एकारादि को आकारादेश ३५-४८**

[ सन्ध्यक्षरान्त धातु के अन्तिम वर्ण, दीङ् आदि धातुओं को आकारादेश, व्येञ् धातु को आकारादेश का निषेध, अन्त शब्द का अर्थ है- अवयव, अन्तग्रहण सुखार्थ, भट्टि-हेम-वररुचि-न्यासकार-पदकार आदि आचार्यों के विविध अभिमत तथा निपात-उपसर्ग-धातुओं की अनेकार्थकता ]

**७. अकार-यकार आगमादि तथा 'हि' आदि का लोप ४८-८२**

[ सृज्-दृश् धातुओं में अकारागम, दीङ् धातु में यकारागम, धातुगत आकार का लोप, आकार को ईकारादेश, आकार को एकार, अन् को उस्, त-हि-उ-अ-आ-न् का लोप तथा योगविभागार्थ-सुखार्थ-उच्चारणार्थ-स्पष्टार्थ-असन्दिग्धार्थ-वैचित्र्यार्थ-सम्भवदर्शनार्थ कुछ विषयों का उपस्थापन ]

**८. उपधा को इत्, जकार-एकार-इय्-उव् आदि आदेश ८२-१२७**

[ शास् धातु की उपधा को इत्, हन् को ज, एत्त्व-अभ्यासलोप, शस् आदि धातुओं में एत्त्व-अभ्यासलोप का निषेध, इवर्ण को इय्, उवर्ण को उव्, यकार-वकार-ऊकार आदेश, स्वरवद्भाव, ईकार-इकार आगम, समस्तलोपार्थ-सुखप्रतिपत्त्यर्थ-सुखार्थ-अनुक्तसमुच्चयार्थ-मन्दमतिबोधार्थ-उत्तरार्थ-स्पष्टार्थ-अनिर्दिष्टार्थ-सम्भवदर्शनार्थ-वैचित्र्यार्थ-श्रुतिसुखार्थ कुछ विषयों का उपस्थापन तथा शर्ववर्मा आदि आचार्यों के विविध मत ]

**९. घस्लृ-वयि-वध-गा आदि आदेश १२७-१५०**

[अद् को घस्लृ, वेञ् को वयि, हन् को वध्, इण् को गा, इङ् को गा, इण्-इङ् को गमि, अस् को भू, ब्रू को वच्, चक्षिङ् को ख्याञ्, अज को वी आदेश, अन् विकरण-सिच् प्रत्यय का लोप, सौत्र घस् धातु, उच्चारणार्थ-अनुषङ्गार्थ-श्रुतिसुखार्थ-स्वरूपग्राहकार्थ-उपलक्षणार्थ-अभिधानार्थ-प्रयोगनिरासार्थ-लाघवार्थ-इष्टसिद्ध्यर्थ-वैचित्र्यार्थ कुछ विषयों का उपस्थापन, टीकाकार-भट्टि-कश्चित् -एके आदि आचार्यों के विविध अभिमतों का परिचय, मरक् प्रत्यय के विषय में घस्लृ सौत्र धातु, इक्-अ-श्तिप् प्रत्ययों

का धातुस्वरूपार्थ निर्देश, शर्ववर्मा के द्वारा कृत्प्रत्ययों की रचना का अभाव, अभिधान का औचित्य, लोक-व्याकरण में निमित्त-नैमित्तिक का पौर्वापर्य, दो प्रकार की नित्यता= परमार्थनित्यता, व्यवहारनित्यता तथा लोकव्यवहार में विद्वान् की प्रसिद्धि ]

**पञ्चमो गुणपादः (सूत्रसंख्या-४८) १५१-२३०**

**१०. नाम्यन्त धातु-नाम्यन्त विकरण आदि को गुणादेश १५१-६०**

[नाम्यन्त धातु-नाम्यन्त विकरण-उपधासंज्ञक लघु नामी वर्ण-नाम्युपध धातु-कृ-मिद्धातु-नामिसंज्ञक इवर्ण-उवर्ण-ऋवर्ण को गुणादेश, विस्पष्टार्थ-वक्रोक्त्यर्थ-नियमप्रतिपत्त्यर्थ-नियमार्थ-सुखपाठार्थ-वैचित्र्यार्थ अनेक विषयों का उपस्थापन, योगविभाग की अपेक्षा अक्षराधिक्य की ग्राह्यता तथा एके-केचित् -सूत्रकार-शर्ववर्मा आदि आचार्यों के विविध अभिमत ]

**११. विविध धातुओं में गुणादेश का निषेध १६०-९५**

[ णानुबन्ध-चेर्क्रीयित प्रत्ययों के परे रहते नाम्यन्त-नाम्युपध धातु, उपधासंज्ञक-नामिसंज्ञक वर्ण-ऋकारान्त धातु-भृ धातु-सु धातु-दीर्धीङ् -वेवीङ् धातु-रुद-विद-मुषधातु-अनिट् धातु-धातु-विकरण-तुदादिगणपठित धातु -विद धातु-कुटादिगणपठित धातु-ओ विजी धातु को गुणादेश का निषेध, सुखार्थ-स्पष्टार्थ-नियमार्थ-प्रतिपत्तिगौरवनिरासार्थ-ज्ञापनार्थ-वैचित्र्यार्थ-असन्देहार्थ-लाघवार्थ-लोपार्थ-अगुणार्थ विविध कार्यों की सिद्धि, लौकिक संस्कृत में चेर्क्रीयितलुगन्त की प्रयोगानुसार मान्यता, पूर्वाचार्यकृत संज्ञा का आश्रयण, पण्डित-वासुदेवसेन-केचित्-कश्चित्-रमापति-दुर्ग-अन्य-हेमकर-शर्ववर्मा आदि आचार्यों के विविध अभिमत, शर्ववर्मा के अनुसार 'दीर्धीङ् -वेवीङ् ' धातुओं की लोक में मान्यता- ''शर्ववर्मणस्तु वचनाद् भाषायामप्यवसीयते, न ह्यसौ छान्दसान् व्युत्पादयति शब्दानिति''। कुछ विद्वानों के अनुसार दीर्धीङ् -वेवीङ् धातुओं का छान्दसत्व, एक उदाहरण के लिए सूत्र बनाने का औचित्य नहीं - ''न ह्येकमुदाहरणं प्रति योगारम्भं प्रयोजयति''। स्पष्टावबोध के लिए पृथक् सूत्र बनाना, आर्षप्रयोग का औचित्य तथा 'पृच्छनीयम्' में रूढि के अनुसार सम्प्रसारण की मान्यता ]

**१२. इकारादेश-नकारागम-नकारागमनिषेधादि १९५-२३०**

[ स्था-दाधातुगत आकार को इकारादेश, मुचादि धातुओं में नकारागम, रधधातु में नकारागम का निषेध, हि को धि आदेश, शास् को शा आदेश, नलोप-शीङ् धातु में रि-आगम, अट् प्रत्यय को औकारादेश, ऋकार को ईर् आदेश, ऋकार को उर् आदेश,

उपधासंज्ञक वर्ण को ह्रस्वादेश, ह्रस्वादेश का निषेध, अकार को ईकारादेश, 'घ्रा-स्था' धातुओं की उपधा को इत्त्व, सूत्रकृति की विचित्रता-''विचित्रा हि सूत्रस्य कृतिः'' । चेक्रीयितलुगन्त का भाषा में अप्रयोग, भाषा में भी चेक्रीयितलुगन्त का अभिधान, विशेषणविशेष्यभाव का प्रयोक्ता के अधीन होना, 'अर्चीकृतत्' के सम्बन्ध में शर्ववर्माचार्य का विशेष अभिमत, एक ही वर्ण का व्यवधान मान्य, अनेक वर्णों का नहीं, ज्ञापक विधियों की अनित्यता, सुखार्थ-निःसन्देहार्थ-स्पष्टार्थ-अभिधानार्थ-आगमार्थ-उच्चारणार्थ-परिभाषाबाधनार्थ-गणपठितार्थ-प्रतिपत्त्यर्थ-उत्तरार्थ-चेक्रीयितलुगनिवृत्त्यर्थ-प्रतिपत्तिगौरवनिरासार्थ अनेक विषयों का साधन तथा विविध आचार्यों के विशेष अभिमत ।

## षष्ठोऽनुषङ्गलोपादिपादः (सूत्रसंख्या – १०२) २३१-३७५

### १३. अनुषङ्गसंज्ञक नकार का लोप २३१-४०

[ नष्टः, नष्टवान् इत्यादि में नकार का लोप, गुणविधायक-गुणनिषेधक प्रत्ययों के परे रहते इदनुबन्ध-अनिदनुबन्ध वाली धातुओं में रहने वाले तथा विकरण 'न' के बाद आने वाले नकार का लोप, 'सर्मीधे' इत्यादि में नकार का लोप । उपलक्षणार्थ-व्यवस्थितविभाषार्थ-सुखार्थ या सुखप्रतिपत्त्यर्थ अनेक विषयों का उपस्थापन । अन्यः-अन्ये-कश्चित्-वयम् -सूत्रकार-भाष्यकार-पदकार-एके-अपरे आदि आचार्यों के विविध अभिमत । नु का ग्रहण अनुस्वारोपलक्षणार्थ, वा का ग्रहण व्यवस्थितविभाषार्थ, सम् -पूर्वक इन्ध धातु का भाषा में भी प्रयोग तथा पदकार-भाष्यकार में मतभेद ]

### १४. दीर्घ, वृद्धि तथा गुणादेश २४०-६२

[ 'पाचयति' इत्यादि में उपधासंज्ञक अकार को दीर्घ, 'निनाय, अनैषीत्, अभैत्सीत्' इत्यादि में नामिसंज्ञक वर्णों की वृद्धि, 'अपाक्षीत्, अवादीत्' इत्यादि में दीर्घ, 'अजागरीत्, असरत्, जागरयति, जजागरुः, सस्मरतुः, तेरतुः, आनर्च्छ' इत्यादि में गुणादेश । 'लिङ्गार्थ-स्पष्टार्थ-नित्यार्थ-उपदेशार्थ-ज्ञापनार्थ-अवधारणार्थ-सुखप्रतिपत्त्यर्थ-ज्ञात्यर्थ-पाठसुखार्थ-गुणार्थ-प्रायोगिकपरिग्रहार्थ-गुण्यर्थ' अनेक कार्यों का साधन । सञ्ज्ञापूर्वक वृद्धिनिर्देश की अनित्यता, जातिव्यक्तिनिर्देश, उपधा-नामी में से केवल नामी की ही अनुवृत्ति, शिष्टसंमत पक्ष का प्रदर्शन, स्पष्टावबोधहेतु योगविभाग का आश्रयण, 'अभ्र-वभ्र-मभ्र' इत्यादि दण्डक धातुएँ, पाठसुखार्थ 'अर्ति-सर्ति' धातुओं का तिप्प्रत्ययान्त निर्देश, सामान्य-विशेष में विशेष की अन्तरङ्गता, 'शशृवान् -ददृवान् ' इत्यादि छान्दस प्रयोग, धातुओं की अनेकार्थकता तथा तुष्यतु दुर्जनः-न्याय ]

**१५. अय् -आयि-गुण-घकारादि आदेश २६२-८३**

[ 'शय्यते' इत्यादि में अयादेश, 'शाययति' इत्यादि में 'आयि' आदेश । 'जपयति' इत्यादि में पकारागम, 'पालयति' इत्यादि में लकारागम, 'प्राणयति' इत्यादि में नकारागम, 'घातयति' इत्यादि में तकारादेश, 'जिगीषति' इत्यादि में गकारादेश, 'चिकीषति' इत्यादि में ककारादेश । 'उच्चारणार्थ-तदन्तविधिनिरासार्थ-प्रतिपत्तिगौरवनिरासार्थ-आगमार्थ-शङ्कानिरासार्थ -पाठसुखार्थ-स्वरूपग्राहकार्थ' अनेक कार्यों का साधन । आचार्य शर्ववर्मा के मतविशेष का उल्लेख, धातुओं की अनेकार्थकता, शिष्टसंमत प्रयोग की प्रामाणिकता, उपसर्ग से धात्वर्थ की भिन्नता, सूत्ररचना की विचित्रता तथा चेक्रीयितलुगन्त का भाषा में अप्रयोग ]

**१६. अकार-आकार-ओकार-सकार-उपधा आदि का लोप २८४-३२४**

['अधुक्षाताम् ' आदि में सण् प्रत्यय के अकार का लोप, 'दरिद्रयति' आदि में आकार, 'व्रष्टा' में चकार, 'द्यति' इत्यादि में ओकार, 'अदुः' इत्यादि में आकार, 'असि' में सकार, 'आवेविता' में ईकार, 'ब्राह्मणायते' इत्यादि में आकार, 'जग्मतुः' इत्यादि में उपधा, 'कारणा' इत्यादि में इन् प्रत्यय, 'गार्गीयति ' इत्यादि में य-प्रत्यय, 'विद्वस्यति' इत्यादि में नकार, 'अलविढ्वम्' इत्यादि में सिच् प्रत्यय का लोप । 'एके-हेमकर-उमापतिसेन-यः-अन्यः-कैश्चित् -पूर्वपक्षवादी-वृत्तिकृत् -पण्डित-केचित् -कुलचन्द्र-अमर-टीकाकार-पर-भाष्यकार-पञ्जीकृत् ' आदि आचार्यों के विविध विशिष्ट अभिमत । 'सुखार्थ-प्रतिपत्तिगौरवनिरासार्थ-पाठसुखार्थ-उच्चारणार्थ-उत्तरार्थ-अनित्यत्वार्थ' अनेक कार्यों की सिद्धि । व्यवस्थितविभाषा-प्रतिपत्तिगौरव की चर्चा, तिप्प्रत्यय से धातुस्वरूप का निर्देश, भाषा में भी 'दीधी-वेवी' धातुओं के प्रयोग की मान्यता, तद्धितान्त शब्दों की आकृतिप्रधानता, 'अनिट्' का ग्रहण मन्दमति के बोधनार्थ तथा कुछ आचार्यों के अनुसार चेक्रीयितलुगन्त का भी भाषा में प्रयोग ]

**१७. कि-ढ्-ध्-ष्-इ-दीर्घ-छ-आदि आदेश ३२४-५२**

[ 'वक्ता' इत्यादि में 'कि' आदेश, 'लेढा' इत्यादि में ढ् , 'अधोक्ष्यत् ' इत्यादि में घ् , 'नद्धा' इत्यादि में ध्, 'प्रष्टा' इत्यादि में ष् , 'पचेते' इत्यादि में इ, 'शाम्यति' इत्यादि में दीर्घ, 'गच्छति' इत्यादि में छ्, 'पिबति' इत्यादि में 'पिब्' आदि आदेश । 'मन्दमति-बोधार्थ-निर्देशसुखप्रतिपत्त्यर्थ-उच्चारणार्थ-प्रक्रियालाघवार्थ-तदन्तविधिनिषेधार्थ-प्रयोगनिवृत्त्यर्थ-प्रयोगनिषेधार्थ-तिबनिर्देशार्थ' विविध कार्यों की सिद्धि । 'अन्ये-येषाम् -भाष्यकार-दुर्गसिंह-केचित् -अमर-पण्डित-उमापतिसेन-कुलचन्द्र-अपर-अनित्यवादी-टीकाकार' आदि आचार्यों

के विविध अभिमत । निपातनविधि का इष्टविषयक होना, निपात विभक्तिप्रतिरूपक तथा त्याद्यन्तप्रतिरूपक होते हैं, एकदेश के स्थान में प्रवृत्त होने वाली विधि को विकार तथा समुदाय के स्थान में प्रवृत्त होने वाली विधि को आदेश कहते हैं ।

### १८. ह्रस्व-गुणादेश, इट्-ईट्-अट्- थ आगम ३५३-७५

[ 'पुनाति' इत्यादि में ह्रस्व, 'रौति' इत्यादि में वृद्धि, 'प्रोर्णोति-प्रोर्णौति' इत्यादि में वैकल्पिक गुण, 'तृणेढि' में इडागम, 'ब्रवीति' इत्यादि में ईडागम, 'आदत् ' इत्यादि में अडागम, 'दित्सा' इत्यादि में तकारादेश, 'अवोचत् ' इत्यादि में ओकार, 'अपास्थत' इत्यादि में थकारागम, 'अपप्तत्' इत्यादि में 'पप्ति' आदेश, 'कल्पयति' इत्यादि में लकारादेश, 'दुधुक्षति' इत्यादि में चतुर्थवर्णादेश । 'सुखप्रतिपत्त्यर्थ-प्रतिपत्तिगौरवनिरासार्थ-अनित्यार्थ-अनुक्तसमुच्चयार्थ-मन्दमतिबोधनार्थ-उच्चारणार्थ-उत्तरार्थ-चेक्रीयितलुगन्तार्थ' अनेक कार्यों की सिद्धि, 'केनचित् -अन्ये-एके-पूर्वाचार्य-केचित् -ये-वररुचि' आदि आचार्यों के विशिष्ट अभिमत । गण की समाप्ति का बोधक वृत्करण, चेक्रीयितलुगन्त का भी भाषा में प्रयोग । पूर्वाचार्यों की संज्ञा चर्करीत , इसका छन्द में प्रयोग, व्यवस्थावाची आदि शब्द, वर्णैकदेश वर्णच्छाया का अनुकरण करते हैं - 'वर्णैकदेशास्तु वर्णच्छायानुकारिणो न पुनर्वर्णाः' । वर्ण उसे कहते हैं जो स्वतन्त्र किसी प्रयत्न से उच्चरित होता है - 'पृथक् प्रयत्ननिर्वर्त्य हि वर्णमिच्छन्त्याचार्याः' तथा मन्दमति के अवबोधार्थ तिप् का ग्रहण ]

## सप्तमः इडागमादिपादः (सूत्रसंख्या-३८) ३७५-४२७

### १९. इडागम तथा सकारागम ३७५-९६

['भविष्यति' इत्यादि में असार्वधातुक प्रत्यय से पूर्व, 'क्रमिष्यति' इत्यादि में धातु से पर में, 'रोदिति' इत्यादि में प्रत्यय से पूर्व, 'ईशिषे' इत्यादि में ईश् धातु से, 'ईडिषे-गमिष्यति, हनिष्यति, व्यरंसीत्' इत्यादि में धातु से उत्तर में इडागम, 'ग्रहीता' इत्यादि में इट् को दीर्घ, 'व्यरंसीत् -अयासीत् ' इत्यादि में धातु के अन्त में सकारागम । 'विशेषणार्थ-स्पष्टार्थ-प्रतिपत्तिगौरवनिरासार्थ-नियमार्थ-यथासङ्ख्य-विघातार्थ-व्याप्त्यर्थ-नित्यार्थ-इष्टसिद्ध्यर्थ-योगविभागार्थ' अनेक कार्यों की सिद्धि । 'एके-माघ-उमापतिसेन-टीकाकार-वाक्यकार-सूत्रकार-केचित् -यः-अन्यः-अपरः' आदि आचार्यों के विविध मतों का विवेचन । इट् इत्यादि में टकार का ग्रहण विशेषणार्थ, विपरीतनियम की आशङ्का, धातु का अर्थ क्रिया, 'प्र' आदि उपसर्गों का अर्थभेदक होना-'प्रादयश्चोपसर्गा विशेषका भवन्ति'। 'चिक्रंसया

कृत्रिमपत्रिपङ्क्तेः' में माघ कवि का स्खलन, कृत् -तद्धित-समास की अभिधानलक्षणता- 'अभिधान-लक्षणा हि कृत्तद्धितसमासाः । रुदादि पाँच धातुओं का गण —

**रोदितिः स्वपितिश्चैव श्वसितिः प्राणितिस्तथा ।**
**जक्षितिश्चैव विज्ञेयो रुदादिः पञ्चको गणः ।।**

वैचित्र्यार्थ या नियमार्थ भिन्न योग का आश्रयण, वाक्यकार की प्रामाणिकता, वाक्यकार-भाष्यकार का दर्शन, व्याप्त्यर्थ 'अन्त' शब्द का सूत्र में पाठ, शर्ववर्मा के द्वारा "स्वरति-सूति०" इत्यादि सूत्र में 'धूञ्' पाठ का अनादर तथा लक्ष्यानुरोध से विभाषा की सिद्धि]

**२०. इडागम का निषेध** **३९६-४२७**

[ एकस्वरविशिष्ट आकारान्त धातु से, इवर्णान्त धातु से, उवर्णन्त धातु से, ऋकारान्त धातु से इडागम का निषेध । 'पचादि पाँच-छकारान्त प्रच्छ्-युजादि पन्द्रह-अदादि सोलह-राधादि ग्यारह-हन् आदि दो-आप् आदि ग्यारह-यम् आदि चार-रिश् आदि दश-द्विष आदि ग्यारह-वस् आदि दो-दह् आदि दश-ग्रहादि दो-उवर्णान्त' धातुओं से इडागम का निषेध, इवन्तादि-धातुओं से वैकल्पिक इडागम, 'भू-सू आदि-ऋकारान्त-कृ' धातु से इडागम का निषेध, तथा 'संस्कर्ता' आदि में सुडागम । 'सुखप्रतिपत्त्यर्थ-इष्टविषयार्थ-मन्दमतिबोधार्थ-स्पष्टार्थ-योगविभागार्थ-उत्तरार्थ-प्रतिपत्तिगौरवनिरासार्थ-प्रकृतिनियमनिरासार्थ-स्पष्टार्थ-उच्चारणार्थ' अनेक कार्यों की सिद्धि, 'एके-केचित् -वृत्तिकार-गुरु-पञ्जीकार-भाष्यकार-अन्ये-गणकार-परे' आदि आचार्यों के विशिष्ट अभिमत, वृत्करण से गणपठित धातुओं की निश्चित संख्या, 'अपि' शब्द का प्रयोग पादपूरणार्थ, 'रिहि-लुहि' सौत्र धातुएँ, समुच्चयमात्र के लिए चकार का पाठ, अप्राप्त विभाषा की चर्चा, मण्डूकप्लुति-अधिकार की आवश्यकता, मन्दबुद्धिवालों के भी उद्देश्य से कुछ वक्तव्य, सूत्रों में अध्याहार करना अत्यन्त आवश्यक होता है - 'सोपस्काराणि सूत्राणि । सवाक्याध्याहाराणीत्यर्थः' तथा लोकव्यवहार से शब्दसिद्धि ]

**अष्टमो धुडादिपादः (सूत्रसंख्या-३५)** **४२८-४८८**

**२१. प्रथम वर्ण-विसर्ग-ध्-क्-टवर्ग-दीर्घ आदि आदेश** **४२८-५१**

[ 'षण्मुखानि' इत्यादि में प्रथम वर्णादेश, 'पचावः' इत्यादि में विसर्गादेश, 'अदुग्ध' इत्यादि में धकारादेश, 'पेक्ष्यति' इत्यादि में ककारादेश, 'द्वेष्टि' इत्यादि में टवर्गादेश, 'मूढः' इत्यादि में दीर्घ, 'लब्धा' इत्यादि में तृतीय वर्णादेश, 'बभृज्जे' इत्यादि में जकार को द्वित्व, 'पचामि' इत्यादि में दीर्घ, 'अचकात्' इत्यादि में तकारादेश । 'प्रतिपत्तिगौरवनिरासार्थ-उच्चारणार्थ-नियमार्थ-स्पष्टार्थ-उत्तरार्थ-सुखार्थ-उपधात्वप्रतिपत्त्यर्थ अनेक' कार्यों की सिद्धि।

'टीकाकृत्-अन्यः-शर्ववर्मा-भाष्यकार-केचित् -हेमकर-दुर्ग-पदकार' आदि आचार्यों के विविध मत। अकार का उच्चारणार्थ पाठ, कहीं पर प्रकरण का अनादर, अन्वाचय अर्थ में चकार का प्रयोग, 'ओत्' में तकार का उच्चारण सुखार्थ, आद्यव्याकरण के अनुसार 'भृज्' धातुघटित जकार को द्वित्वविधान-'बभृज्जे, बभृज्जाते, बभृज्जिरे। आद्यव्याकरणमेतत्। आधुनिकव्याकरणेषु नैतल्लक्षणमस्तीति भावः'। दीर्घ आदि स्वर के धर्म होते हैं ]

## २२. अडागम-वृद्धि-सकार-नकारादि आदेश ४५१-६९

[ 'अकरोत् -अकार्षीत् -अकरिष्यत्' इत्यादि में अडागम, 'ऐधत' इत्यादि में आदि स्वर को वृद्धि, 'आप्नोत्' इत्यादि में धातु के आदि स्वर को आकारादेश, 'मा भवान् करोत्' इत्यादि में अडागम का निषेध, 'कृषीढ्वम्' इत्यादि में धकार को ढकारादेश, 'माक्ष्यति' इत्यादि में मार्जि-आदेश, 'सहते' इत्यादि में धातुपठित षकार को सकार, 'नयति' इत्यादि में धातुपठित णकार को नकारादेश। 'निर्देशसुखार्थ-उत्तरार्थ-स्वरूपग्राहकार्थ-स्पष्टार्थ-अभिधानार्थ-मन्दमतिबोधनार्थ-गणपाठशुद्ध्यर्थ-प्रपञ्चार्थ' विविध कार्यों की सिद्धि। 'एके -कवि-भाष्यकार-सूत्रकार-केचित् -टीकाकार-मनोरमाकार-रमानाथ' आदि आचार्यों के विविध मत। प्रकृति-प्रत्यय के समुदायरूप पद की प्रधानता- 'प्रकृतिप्रत्यययोः समुदायो हि पदं प्रधानमुच्यते'। कुछ आचार्यों के मतानुसार अवर्ण का उच्चारण मुखवर्ती सभी स्थानों से होता है - 'अवर्णः सर्वमुखस्थानमित्येके। जहाँ सुखपूर्वक बोध कराना अभीष्ट होता है वहाँ शब्दलाघव की चिन्ता नहीं होती -'सुखपाठप्रतिपत्तिरेवाभिमतम्, न शब्दलाघवम्'। तिप् प्रत्यय से किया जाने वाला निर्देश स्वरूपग्राहक के लिए होता है, संज्ञानिर्देशपूर्वक किसी कार्य का विधान अनित्य होता है, अवयव अर्थ में आदिशब्द का प्रयोग ]

## २३. षकार-अनुबन्ध-शिट्संज्ञा-सम्प्रसारणसंज्ञादि ४६९-८८

[ 'चिचीषति' इत्यादि में मूर्धन्य षकारादेश, 'आशिषः' इत्यादि में षकारादेश, 'तुष्टूषति' आदि में षकारादेश, 'अङ्गाः, वङ्गाः, कलिङ्गाः' इत्यादि में लुक् शब्द का नाम लेकर लोप किए जाने पर प्रकृति को निर्दिष्ट कार्य का अभाव, 'पपतुः' इत्यादि में आकार का लोप, 'इङ्-कृञ्' इत्यादि में 'ङ्-ञ्' आदि अनुबन्धों का अप्रयोग, शकारादि चार वर्णों की 'शिट्' संज्ञा, इवर्णादि की सम्प्रसारणसंज्ञा, 'अर्-ए-ओ' की गुणसंज्ञा तथा 'आर्-ऐ-औ' की वृद्धिसंज्ञा। 'प्रपञ्चार्थ - अवानुकर्षणार्थ-उपसर्गानुवर्तनार्थ-सुखसमासप्रतिपत्त्यर्थ - स्पष्टार्थ-पूर्वपक्षार्थ-मन्दमतिबोधनार्थ'-अनेक कार्यों का विवेचन। 'अन्ये-अपरः-वाक्यकार-सूत्रकार-भाष्यकार-अन्यः-टीकाकृत् -केचित्' आदि आचार्यों के विशिष्ट विचार। शिष्टजनों

के व्यवहारानुसार अन्य शब्दों का भी साधुत्व-'शिष्टप्रयोगानुसारेणापरेऽप्येवं वेदितव्या:' । वस्तुत: अनुबन्धों की योजना शाब्दिक आचार्यों द्वारा कार्यविशेष के उद्देश्य से की जाती है - 'परमार्थतोऽनुबन्धा: कार्यार्थं शब्दव्यवहारिभिरुपादीयन्ते' । गुण-वृद्धिसंज्ञाविषयक पूर्वाचार्यों की मान्यता ]

**परिशिष्टम् - १ = कातन्त्रसूत्रपाठ: ४८९-५०३**

**२४. सन्धिप्रकरण से आख्यातप्रकरणपर्यन्त सूत्रपाठ**

[सन्धिप्रकरण के ५ पादों में क्रमश: २३+१८+४+१६+१८=७९, नामचतुष्टयप्रकरण के ६ पादों में क्रमश: ७७+६५+६४+५२+२९+५०=३३७, आख्यातप्रकरण के ८ पादों में क्रमश: ३४+४७+४२+९३+४८+१०२+३८+३५= ४३९, कुल ८५५ सूत्रों का, जो आचार्य शर्ववर्मा द्वारा प्रणीत हैं पाठ ग्रन्थक्रमानुसार प्रस्तुत किया गया है ]

**परिशिष्टम् - २ = कातन्त्रपाणिनीयव्याकरणयोस्तुलनात्मकसूत्रसूची ५०४-६४**

**२५. शर्ववर्मप्रणीत ८५५ सूत्रों की पाणिनीय सूत्रों के साथ तुलनात्मक सूची**

[ वर्णानुक्रम से कातन्त्रीय प्रत्येक सूत्र की तुलना पाणिनीय सूत्र के साथ की गई है । तदनुसार कातन्त्रीय २७१ सूत्रों में लाघव, २१ सूत्रों में गौरव, ४३९ सूत्रों में साम्य, ४३ सूत्रों में वैशिष्ट्य, २८ सूत्रों में अन्वर्थता, ४३ सूत्रों में उत्कर्ष, ७ सूत्रों में सरलता, ६० पाणिनीय सूत्रों में लाघव, २३२ पाणिनीय सूत्रों में गौरव, ३ पाणिनीय सूत्रों में उत्कर्ष देखा जाता है ]

**परिशिष्टम् - ३=रूपसिद्धि; ५६५-८६**

**२६.** [ आख्यातप्रकरणगत पाद ४-८ के ३१६ सूत्रों की दुर्गवृत्ति में दिए गए ११३० उदाहरणों की वर्णक्रमानुसार पृष्ठाङ्क-सहित सूची दी गई है, इन्हें यथास्थान समीक्षा वाले अंश में सिद्ध किया गया है ]

**परिशिष्टम् ४ = श्लोक-श्लोकांशसूची ५८७-८९**

**२७.** [ आख्यातप्रकरणगत पाद ४-८ के ३१६ सूत्रों की 'दुर्गवृत्ति-दुर्गटीका-विवरणपञ्जिका-कलापचन्द्र' नामक ४ व्याख्याओं में उदधृत ३७ श्लोक-श्लोकांशवचनों की सूची पृष्ठाङ्कसहित दी गई है । ये श्लोक 'भट्टिकाव्य-अमरकोश-पाणिनीयशिक्षा-दुर्गासप्तशती-शिशुपालवध' आदि ग्रन्थों से दिए गए हैं ]

**परिशिष्टम् - ५ = व्युत्पादितशब्दसूची** ५९०-९२

२८. [दुर्गवृत्ति-दुर्गटीका-विवरणपञ्जिका-कलापचन्द्रनामक व्याख्याओं में जिन १२७ शब्दों की व्युत्पत्ति की गई है, उनकी सूची यहाँ पृष्ठाङ्कसहित प्रस्तुत है ]

**परिशिष्टम् - ६ = विशिष्टशब्दवचनानि** ५९३-६१५

२९. [ चार व्याख्याओं में १०२५ ऐसे शब्द तथा वचन हैं, जो विशिष्ट कहे जा सकते हैं, उनकी वर्णक्रमानुसार सूची यहाँ पृष्ठाङ्क-सहित दी गई है ]

**परिशिष्टम् ७ = उद्धृतग्रन्थसूची** ६१६-१७

३०. [चार व्याख्याओं में तथा समीक्षा के अन्तर्गत जिन ५२ ग्रन्थों को उद्धृत किया गया है, उनकी वर्णक्रमानुसार सूची यहाँ पृष्ठाङ्कसहित दी गई है ]

**परिशिष्टम् -८ = उद्धृतग्रन्थकारसूची** ६१८-२०

३१. [ चार व्याख्याओं में तथा समीक्षा के अन्तर्गत प्रस्तुत ७९ ग्रन्थकारों की सूची यहाँ वर्णानुक्रम से पृष्ठाङ्कसहित दी गई है ]

**परिशिष्टम् - ९ = साङ्केतिकशब्दपरिचयः** ६२१-२२

३२. [प्रकृत पञ्चम खण्ड (भाग ३, खण्ड २) में आवश्यकतानुसार प्रयुक्त २६ साङ्केतिक शब्दों के पूर्ण शब्दरूप पृष्ठाङ्कसहित दिए गए हैं ]

॥ श्रीः॥

## आचार्यशर्ववर्मप्रणीतम्

# कातन्त्रव्याकरणम्

## अथ तृतीये आख्याताध्याये चतुर्थः सम्प्रसारणपादः

### ५४०. सपरस्वरायाः सम्प्रसारणमन्तस्थायाः [३। ४। १]

### [सूत्रार्थ]

'परवर्ती धातुस्वर के साथ अन्तस्थासंज्ञक 'य्-र्-ल्-व्' वर्णों का सम्प्रसारण होता है' इसका अधिकार यहाँ से प्रारम्भ हो रहा है॥ ५४०।

### [दु० वृ०]

सह परेण धातुस्वरेणान्तस्थायाः सम्प्रसारणं भवत्यधिकृतं वेदितव्यम्। परेणैव सस्वरत्वं **लोकतः** सिद्धम्, परग्रहणं **स्पष्टार्थम्**। सम्प्रसारणं व्यृतोऽन्तस्थानिमित्ता नित्यत्वेन स्थिता अन्वाख्यास्यन्ते। अन्तस्थाग्रहणम् अभ्यासविकारबाधनार्थम्। तेन 'विव्यधे, विव्याध' इत्यादीनां यस्याभ्यासे सम्प्रसारणं सिद्धम्॥ ५४०।

### [दु० टी०]

सपर०। परश्चासौ स्वरश्चेति **परस्वरः**, सह परेण स्वरेण वर्तते इति वा विग्रहः। त्रिपदो बहुव्रीहि**रभिधानाद्** धात्वधिकाराच्च धातोरेव स्वर इत्याह—सहेत्यादि। सहग्रहणं स्वरस्यापि कार्यित्व**प्रतिपत्त्यर्थम्**। अन्यथा परः स्वरो यस्या अन्तस्थाया इति परस्वरोपलक्षिताया एव स्यात्। विशेषणं च व्यथादीनां व्यञ्जनपरस्य वस्य निवृत्त्यर्थमेव। पूर्वेणापि सहत्वमस्तीति वयरपि यस्य सम्प्रसारणं स्यात्। अथ वस्य पूर्वं सम्प्रसारणे यस्य सम्प्रसारणं न भविष्यति, तदसत्। यकारस्यानन्तरत्वात् प्रागेव सम्प्रसारणमिति मनसि कृत्वाह—परेणैवेत्यादि। **व्युत्पत्त्यर्थ**माश्रित्य **लोकव्यवहारं** नानुसरन् **बालः** प्रवर्तत इति भावः।

सम्प्रसारणविधाने सति व्यृतोऽन्तस्थानिमित्तायाः सम्प्रसारणसंज्ञायां च सत्यां विधानमिति इतरेतराश्रयदोषः इति हृदि कृत्वाह—सम्प्रसारणमित्यादि। **नित्यत्वं** पुनर्व्यवहारस्यानादित्वात्, न तु कूटस्थमविचाल्यमनपायि नित्यमिहोच्यते। अन्तस्थाग्रहणमन्तरेणापि अन्तस्थाया एव सिद्धम्, व्यृताऽन्तस्थानिमित्तत्वाद् इत्याह— अन्तस्थाग्रहणमित्यादि। अन्यथा 'विव्याध, विव्यधे' इत्यत्राभ्यासस्यादिर्व्यञ्जनमवशेष्यमिति यस्य निवृत्तौ वस्य सम्प्रसारणं प्रसज्येत। न पुनरिह पूर्वपरयोः परो विधिर्बलवानिति युज्यते वक्तुम्, तदपवादविषयत्वात्। श्वयतेरभ्यासस्य सम्प्रसारणप्रतिषेधोऽपि न ज्ञापक उच्यते, सविकल्पकान्यपि ज्ञापकानि भवन्तीति। पुत्रपत्योस्तत्पुरुषे यङः

सम्प्रसारणमिति न वक्तव्यमेव। अनृषेर्बहुस्वरादनिनोर्गुर्वाद्योर्यडादिश्यते स्त्रियाम्। कारीषस्येव गन्धोऽस्य इति कारीषगन्धः, तत इण्, कारीषगन्ध्यायाः पुत्रः कारीषगन्धीपुत्रः। कारीष–गन्ध्यायाः पतिः कारीषगन्धीपतिः। एवं परमकारीषगन्धीपुत्रः, परमकारीषगन्धीपतिः। यडन्तस्यापीति पुत्रपत्योरप्राधान्ये तु न दृश्यते– 'कारीषगन्ध्यायाः पुत्रकुलम्, कारीष–गन्ध्यायाः पतिकुलम्'। एवं स्त्रीप्रत्ययस्याप्राधान्येऽपि। न दृश्यते कारीषगन्ध्यामतिक्रान्तः अतिकारीषगन्ध्यः, तस्य पुत्रः अधिकारीषगन्ध्यपुत्रः, अतिकारीषगन्ध्यपतिः। तथा बन्धौ बहुव्रीहौ– कारीषगन्ध्या बन्धुरस्य कारीषगन्धीबन्धुः। एवं परमकारीषगन्धीबन्धुः। स्त्रीत्वोपसर्जने न दृश्यते– अतिकारीषगन्ध्यबन्धुः। मातामातृकमातृषु विभाषा–कारीषगन्ध्या माता अस्येति हे कारीषगन्धीमात। मातुरत् पुत्रस्तुतौ संबुद्धौ– कारीषगन्धीमातृकः, कारीष–गन्ध्यामातृकः, कारीषगन्धीमाता, कारीषगन्ध्यामाता। एवं 'श्वफल्कस्यापत्यं स्त्री' इत्यण्–श्वाफल्कीपुत्रः, श्वाफल्कीपतिरिति। एवंभूता एव समासशब्दा इति यडादेशोऽपि इह नादृत एव॥ ५४०।

## [वि० प०]

सपरस्वरायाः। अथ किमर्थं परग्रहणं 'सस्वरायाः' इत्यास्ताम्। तदयुक्तम्– पूर्वेणापि सहभावोऽस्तीति वयेर्यकारस्य वकाराकारेण पूर्वेण सह सम्प्रसारणं स्यात्। तथान्तरङ्गत्वाद् वकारस्य 'प्राक् सम्प्रसारणे न सम्प्रसारणम्' इति प्रतिषेधादयमदोषः। तदप्ययुक्तम्। अनन्तरत्वात् प्राग् यकारस्यैव सम्प्रसारणं स्यात्। एवं च सति 'ऊयतुः, ऊयुः' इति न सिध्यति। नैतत्, एवं **लोके** परेणैव स्वरेण सस्वरत्वमित्याह– परेणैवेति। ननु **''सम्प्रसारणं व्वृतोऽन्तस्थानिमित्ताः''** (३। ८। ३३) इत्यनेन सम्प्रसारणसंज्ञा विधेया, सा चैतद्-विधानमन्तरेण न सिध्यति, उत्पन्नस्य सतः संज्ञाकरणाद् अन्तरेण च संज्ञाम् एतद् विधानं न सिध्यति। इतरेतराश्रयदोषात् संज्ञाविधानं च न सिध्यतीत्याह-सम्प्रसारणमित्यादि। न हीदानीं सम्प्रसारणसंज्ञा विधीयते येनासौ संज्ञासंज्ञिनोर्विधानमन्तरेण न सम्भवतीति इतरेतराश्रयदोषमावहति। किन्तर्हि सम्प्रसारणनामधेयतया अन्तस्थानिमित्ता व्वृतो निमित्तत्वेन स्थिताः। केवलं **''सम्प्रसारणं व्वृतोऽन्तस्थानिमित्ताः''** (३। ८। ३३) इत्यनेनान्वाख्यास्यन्ते इत्यदोषः।

ननु यदि अन्तस्थानिमित्ता व्वृतः सम्प्रसारणम्, तत् किम् अन्तस्थाया इत्यनेन सम्प्रसारणस्यान्तस्थानिमित्तत्वादेवान्तस्थायाः स्थाने भविष्यति। न हि अन्यस्य स्थाने तावदन्तस्थानिमित्तत्वमुपपद्यते इत्याह–अन्तस्थेत्यादि। अन्यथा **'अभ्यासविकारेष्वपवादो नोत्सर्गं बाधते'** (कात० प० ६४) इति न्यायात् सम्प्रसारणविधिरपवादोऽप्युत्सर्गेणाभ्यास–लोपेन बाध्यते ततो व्यथादीनां धातूनाम् **''अभ्यासस्यादिर्व्वञ्जनमवशेष्यम्''** (३। ३। ९) इति यकारस्य लोपे वकारस्य संप्रसारणं स्यादिति। **'विव्यथे'** इति। **''व्यथेश्च''** (३। ४। ५) इति सम्प्रसारणम्। **'विव्याध'** इति **''परोक्षायामभ्यासस्योभयेषाम्''** (३। ४। ४) इति॥ ५४०।

## [बि० टी०]

सपरः। अथान्तरङ्गत्वाद् वकारस्य प्राक् सम्प्रसारणे **''न सम्प्रसारणे''** (३। ४। १९) इति प्रतिषेधादयमदोषः, तदप्ययुक्तम् अनन्तरत्वादिति। अनन्तरत्वमगुणप्रत्ययस्येत्यर्थः। अन्तस्थाग्रहणमभ्यासविकार इत्यादि **वृत्तिः**। ननु **''अभ्यासस्यादिर्व्यञ्जनमवशेष्यम्''** (३। ३। ९) इत्यत्रानादिर्लोपनीय इत्युक्तम्, अन्तस्थाग्रहणबलाद् वकारस्य लोपो न स्याद् इति तु वास्तविकोऽर्थः। तत् कथमुक्तं विकारबाधनार्थं विकारस्योपमर्दनजातरूपत्वाच्चेत्, नैवम्। अयमपि विकारः। तथा च 'लोपः सर्वापकर्षणाद्' इत्युक्तम्। अत्र तु समस्त–मभ्यासमपकृष्य लोपो न क्रियते किन्तु अवयवः, अतो विकारः। नैवम्, प्रकृतेरन्तापहारी लोपः प्रत्ययस्य सर्वापहारी लोपः इत्यादावेकदेशेऽपि लोपदर्शनात् ? सत्यम्, विकारशब्देन विकृतिरुच्यते, विकृतिर्विकारः, न तूपमर्दनाज्जातस्य परिग्रहः। ननु तथापि अभ्यासस्य विकृतिर्दृश्यते, व्यथादिधातौ थकारधकारयोर्लुप्तत्वात् ? सत्यम्, अन्तस्थाग्रहणेन ज्ञापितत्वाद् अन्तस्थाया विकृतिर्बाध्यते अभ्यासग्रहणस्याभ्यासावयवपरत्वादिति। अथ **''न वाश्व्योरगुणे च''** (३। ४। ६) इत्यत्राभ्यासे श्वयतेः प्रतिषेधादेवाभ्यासविकारबाधनम् ? सत्यम्। **'सविकल्पकानि ज्ञापकानि'** इति **टीकाकृत्**। तथानेनापि ज्ञाप्यते इत्याह– बाधनार्थमिति।

ननु सहशब्दो द्व्यर्थकस्तुल्यप्रतियोगी विद्यमानवचनश्च ततः कस्येह ग्रहणम् ? सत्यम्, तुल्यप्रतियोगी गृह्यते **''व्यथेश्च''** (३। ४। ५) इति ज्ञापकात्। अन्यथा 'विव्यथे' इत्यादौ अभ्यासयकारस्य इकारेऽकारस्य सत्त्वात् पुनर्यत्त्वं भविष्यति, किं सम्प्रसारणविधानेनेति। परेणैव सस्वरत्वं **लोकतः** सिद्धमिति–ननु सहग्रहणेन किम्, परस्मिन् स्वरो यस्याः सा परस्वरा तादृश्या अन्तस्थायाः सम्प्रसारणमित्युक्ते देश्यमेव नास्ति, किं सहग्रहणेन ? सत्यम्, यद्यपि बहुव्रीहिणा समुदाय उच्यते, तथापि अतद्गुणशङ्कया परसत्त्वे स्वरेऽपि सम्प्रसारणप्रसङ्गः। सहग्रहणं तद्गुणसंविज्ञानो बहुव्रीहिज्ञापनार्थम्। तर्हि **''व्यथेश्च''** (३ । ४। ५) इत्यादौ वैयर्थ्यभयादेव तद्गुणसंविज्ञानो बहुव्रीहिर्भविष्यति ? सत्यम्, सहग्रहणं स्वरस्यापि कार्यित्वप्रतिपादनार्थमिति **टीकाकृत्**। एतेनोभयस्थानित्वादेकतरव्यपदेशः, ततश्चास्यापि स्वरविधित्वमुपपन्नम्। किं च सहग्रहणं सहस्य सभावज्ञापनार्थम्। तेन सहस्य सो विभाषयेति न वाच्यम्।। ५४०।

## [समीक्षा]

'सम्प्रसारण' शब्द का अर्थ है– फैलाना, विस्तार करना। 'य्–व्–र्–ल्' वर्णों के स्थान में क्रमशः जो 'इ–उ–ऋ–लृ' आदेश होते हैं, उनमें इस अर्थ की सङ्गति सन्निहित है, क्योंकि यकारादि कोई भी व्यञ्जन अर्धमात्रिक ही होता है, जब कि इकारादि ह्रस्व स्वर एकमात्रिक होते हैं। इस प्रकार अर्धमात्रिक वर्णों के स्थान में एकमात्रिक वर्णों के आदेश से **विस्तार** सिद्ध है।

पाणिनि का संज्ञासूत्र है– ''इग्यणः सम्प्रसारणम्'' (अ० १। १। ४५)। **'यण्'** प्रत्याहार में 'य्–व्–र्–ल्' तथा **'इक्'** प्रत्याहार में 'इ–उ–ऋ–लृ' वर्णों का समावेश माना जाता है। कातन्त्रकार ने सम्प्रसारण को साक्षात् संज्ञा न कहकर उसका

अधिकार किया है और उसमें केवल संज्ञी = अन्तस्था का उल्लेख। परन्तु इस अधिकार के अन्तर्गत जो कार्य या विधि सम्पन्न होती है, वह 'इ–उ–ऋ' वर्णात्मक आदेश के रूप में इससे यही कहा जा सकता है कि उस समय प्रकृत अर्थ में इस संज्ञा के प्रसिद्ध होने से कातन्त्रकार ने एतदर्थ संज्ञासूत्र बनाना आवश्यक नहीं समझा।

महाभाष्यकार ने उक्त पाणिनीय सूत्र की व्याख्या में वर्णपक्ष तथा वाक्यपक्ष का आश्रय लिया है और भाविसंज्ञा की मान्यता को लौकिक उदाहरण के द्वारा सिद्ध किया है। काशकृत्स्नधातुव्याख्यान आदि में इसका उल्लेख प्राप्त होने से इसकी प्राचीनता सिद्ध है।

प्राचीन सन्दर्भ इस प्रकार हैं–

**काशकृत्स्नधातुव्याख्यान–** ''यजां यवराणां ग्वृतः सम्प्रसारणं कानुबन्धे'' (सू० ९९)।

**निरुक्त–** ''तद् यत्र स्वरादनन्तरान्तस्थान्तर्धातुर्भवति। तद्द्विप्रकृतीनां स्थानमिति प्रदिशन्ति'' (२। २। ३)।

''तत्राप्येकेऽल्पनिष्पत्तयो भवन्ति। तद् यथैतद् ऊतिर्मृदुः पृथुः पृषतः कुणारुम्'' (२। २। ५)।

भाष्यकार **दुर्गाचार्य** ने सम्प्रसार्य तथा असम्प्रसार्य नामक दो प्रकार वाली धातुओं की चर्चा की है। जैसे यज् धातु का सम्प्रसारणरूप– 'इष्टवान्, इष्टिः, इष्ट्वा' इत्यादि तथा असम्प्रसारणरूप 'यष्टुम्, यष्टव्यम्' इत्यादि।

**गोपथब्राह्मण–** ''को विकारी च्यवते प्रसारणमाप्नोति'' (१। १। २६)।

जैनेन्द्र तथा मुग्धबोध व्याकरणों में एतदर्थ 'जि' संज्ञा स्वीकार की गई है–

**जैनेन्द्रव्याकरण–** इग्यणो जिः (१। १। ४५)।

**मुग्धबोधव्याकरण–** यलोऽचेक् जिः (सूत्र ५३५)।

## [विशेष वचन]

१. परेणैव सस्वरत्वं लोकतः सिद्धम्, परग्रहणं स्पष्टार्थम् (दु० वृ०)।

२. व्युत्पत्त्यर्थमाश्रित्य लोकव्यवहारं नानुसरन् बालः प्रवर्तते इति भावः (दु० टी०)।

३. नित्यत्वं पुनर्व्यवहारस्यानादित्वान्नतु कूटस्थमविचाल्यमनपायि नित्यमिहोच्यते (दु० टी०)।

४. सा (सम्प्रसारणसञ्ज्ञा) चैतद्विधानमन्तरेण न सिध्यति, उत्पन्नस्य सतः सञ्ज्ञाकरणात्, अन्तरेण च सञ्ज्ञामेतद् विधानं न सिध्यति (वि० प०)।

५. विकारशब्देन विकृतिरुच्यते, विकृतिर्विकारो न तूपमर्दनाज्जातस्य परिग्रहः (बि० टी०)।

६. सहशब्दो द्व्यर्थकः– तुल्यप्रतियोगी विद्यमानवचनश्च (बि० टी०)।। ५४०।

## ५४१. ग्रहिज्यावयिव्यधिवष्टिव्यचिप्रच्छिव्रश्चिभ्रस्जीनामगुणे [३। ४। २]

### [सूत्रार्थ]

'ग्रह् – ज्या – वय् – व्यध् – वश् – व्यच् – प्रच्छ् – व्रश्च् – भ्रस्ज्' धातुओं का सम्प्रसारण होता है, अगुण प्रत्यय के परवर्ती होने पर।। ५४१।

### [दु० वृ०]

ग्रह्यादीनामन्तस्थायाः सपरस्वरायाः सम्प्रसारणं भवति अगुणे प्रत्यये परे। गृह्यते, गृह्णाति। जीयते, जिनाति। ऊयतुः, ऊयुः। **''न वाश्व्योरगुणे च''** (३। ४। ६) इति प्रतिषेधबाधनार्थं वेञो वयिरुच्यते। विध्यते–विध्यति। उष्टः, उशन्ति। विच्यते, विचति– कुटादित्वादगुणत्वम्। कथम् उरुव्यचाः असुन् ? औणादिकत्वात्। पृच्छ्यते– पृच्छति। कथं प्रश्नः ? प्रश्नाख्यानयोरिति वचनात्। वृश्च्यते, वृश्चति। भृज्ज्यते, भृज्जति। अगुण इति किम् ? ग्रहीता।। ५४१।।

### [दु० टी०]

ग्रहि०। गृह्यते इत्यादि। **'ग्रह उपादाने, ज्या वयोहानौ'** (८।१४, २३)। नाविकरणे संप्रसारणस्य तद् दीर्घमन्त्यमिति कृतेऽपि प्वादित्वाद् ह्रस्वो भवति, वेञादेशस्य वयेरिह ग्रहणम्, तत्रेकारनिर्देशप्रयत्नात्, न तु **'अय वय'** (१। ४०६) इत्यस्य यजादित्वाद् वेञः परोक्षायां प्रतिषेधं वक्ष्यति। स वयेर्मा भूदित्याह– न वाश्व्योरित्यादि। **'व्यध ताडने, वश कान्तौ'** (३। २५;२। ३)। तिप्– निर्देशोऽयं **सुखार्थः**। अनन्यार्थ इति **एके**। **'व्यच व्याजीकरणे'** (५। ८६)। कथमित्यादि। यदि व्यचेः कुटादित्वं **''सर्वधातुभ्योऽसुन्''** (कात० उ० ५। ३४), तस्मिन्नपि सम्प्रसारणं प्रसज्येत। युक्तिमाह– औणादिकत्वादिति। **'औणादिका अव्युत्पन्ना व्युत्पन्नाश्च'** (पुरु० प० वृ० ७०) इति, इह व्युत्पन्ना एवाद्रियन्ते, तेन व्यचेः कुटादित्वमनसुनीति न वक्तव्यं भवति। **'प्रच्छ ज्ञीप्सायाम्, व्रश्चू छेदने, भ्रस्ज पाके'** (५। ४९, १९, ४)।। ५४१।

### [वि० प०]

ग्रहिज्या०। जीयते इति। **'ज्या वयोहानौ'** (८। २३) इति संप्रसारणे कृते ''नाम्यन्तानाम्०'' (३। ५। १७) इत्यादिना यनि दीर्घः। जिनातीति। **''तद्दीर्घमन्त्यम्''** (४। १। ५२) इति कृतस्य दीर्घस्य पुनः प्वादित्वाद् ह्रस्वः। 'अन्येव विकरणे गुणः' इति नियमाद् नाविकरणस्यागुणत्वम्। ऊयतुः, ऊयुरिति। **'वेञ् तन्तुसन्ताने'** (१। ६११), ''वेञश्च वयिः'' (३। ४। ८१) इति वयिरादेशः, परोक्षायां कृतसम्प्रसारणस्य द्विर्वचनम्, समानलक्षणो दीर्घः। वेञादेश एव वयिरिह गृह्यते, तत्र वयिरितीकारस्यानन्यार्थत्वात्, न तु **'अय वय'** (१। ४०६) इत्यस्य। यद्येवम् अनर्थकं वयिग्रहणम्, यजादिषु वेञ् पठ्यते, ततः कृतादेशस्यापि स्थानिवद्भावात् तेनैव भविष्यति इत्याह– न वाश्व्योरित्यादि। **''न वाश्व्योरगुणे च''** (३। ४। ६) इत्यस्य प्रतिषेधस्य बाधनार्थमित्यर्थः, तेन कृतादेशस्यैव यजादिषु पठितस्य वेञः परोक्षायां प्रतिषेधे न कृतादेशस्येति सिद्धम्। विध्यतीति। **'व्यध ताडने'** (३। २५) दिवादित्वाद् यन्, पूर्ववदगुणत्वम्। उष्ट इति। **'वश कान्तौ'**

(२। ३) तस्, अदादित्वाद् अनो लुक्। विचतीति। **'व्यच् व्याजीकरणे'** (५। ८६), **''कुटादेरनिनिचट्सु''** (३। ५। २७) इति अन्विकरणस्यागुणत्वम्। यदि कुटादिरयं तर्हि **''सर्वधातुभ्योऽसुन्''** (कात० उ० ५। ३४) इति विहिते असुन्प्रत्ययेऽपि संप्रसारणं स्यात्। अतः केन प्रकारेणेदं सिध्यतीत्याह– कथमित्यादि। तेनौणादिकत्वादिति। औणादिका हि द्विविधाः– व्युत्पन्नाः अव्युत्पन्नाश्च। अत्र पुनरव्युत्पन्ना एवादृता इति व्यचेः कुटादित्वमनसुनीति न वक्तव्यं भवति। असुन्प्रत्ययादन्यत्र व्यचेः कुटादित्वमस्तीत्यर्थः। कथमित्यादि। याचीत्यादिना नङ्, **''च्छ्वोः शूटौ पञ्चमे च''** (४। १। ५६) इति छकारस्य शकारः। भ्रस्जेः सकारस्य ''धुटां तृतीयः'' (२। ३। ६०) इति दकारे पुनः **''तवर्गश्चटवर्गयोगे चटवर्गौ''** (२। ४। ४६) इति जकारः प्रच्छिव्रश्चिभ्रस्जादीनां तुदादित्वादनोऽगुणत्वम्। 'ग्रहीता' इति। **''इटो दीर्घो ग्रहेरपरोक्षायाम्''** (३। ७। १२) इति दीर्घत्वम्।। ५४१।

## [बि० टी०]

ग्रहि०। विचति। कुटादित्वादिति। तुदादित्वादगुणत्वमस्त्येव। यत् कुटादित्वादिति हेतुस्तदुभयोदाहरणस्वीकाराय। यद्येवं 'गृह्णाति' इत्यादावपि अगुणप्रदर्शनं कुरु, तस्माद् हेतुप्रदर्शनमनुचितम् ? सत्यम्। व्यचेः कुटादित्वमसुनीति सूत्रमुक्त्वा व्यचेः कुटादित्वम्– 'परिव्यचाः, उरुव्यचाः' इति साध्यते। तन्मते व्यचेः कुटादित्वप्रतिषेधा– भावात् कथमगुणत्वमिति प्रतिपादयन्नाह-कुटादित्वादिति। कथमित्यादि। यदि कुटादित्वादगुणत्वं तदाऽसुन्प्रत्ययेऽगुणत्वं स्यादित्याह – औणादिकत्वादिति। ननु औणादिकत्वेन किं साधितमिति चेत्, **शर्ववर्मणा** कृल्लक्षणं न कृतम्, तस्मादीदृशमेव रूढमाश्रितमित्यर्थः।। ५४१।

## [समीक्षा]

'ग्रह' इत्यादि धातुओं से 'क्त' इत्यादि प्रत्ययों के होने पर 'गृहीतः, गृहीतवान्, गृह्णाति' प्रभृति शब्दरूपों की सिद्धि के लिए रकारादि अन्तस्थासंज्ञक वर्णों के स्थान में ऋकारादि आदेश आवश्यक हैं। इनकी पूर्ति दोनों ही शाब्दिकाचार्य पाणिनि तथा शर्ववर्मा ने की है। पाणिनि का सूत्र है– ''ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छति–भृज्जतीनां ङिति च'' (अ० ६। १। १६)। दोनों ही आचार्यों ने ९ – ९ धातुएँ पढ़ी हैं। पाणिनि के अनुसार सम्प्रसारण 'कित् – ङित्' प्रत्ययों के परवर्ती होने पर तथा शर्ववर्मा के अनुसार अगुण प्रत्यय के परवर्ती होने पर सम्पन्न होता है। ज्ञातव्य है कि ''क्ङिति च'' (अ० १। १। ५) सूत्र से पाणिनि कित् – ङित् प्रत्ययों के पर में रहने पर गुण – वृद्धि का निषेध करते हैं, कातन्त्रकार ने ऐसे ही प्रत्ययों को अगुण मानकर यहाँ प्रयोग किया है।

## [विशेष वचन]

१. तिप्निर्देशोऽयं सुखार्थः, अनन्यार्थ इत्येके (दु० टी०)।

२. औणादिका अव्युत्पन्ना व्युत्पन्नाश्चेति, इह व्युत्पन्ना एवाद्रियन्ते (दु० टी०; वि० प०)।

३. शर्ववर्मणा कृल्लक्षणं न कृतम्, तस्मादीदृशमेव रूढमाश्रितमित्यर्थः (बि० टी०)।

## [रूपसिद्धि]

**१.गृह्यते।** ग्रह + यण् + ते। 'ग्रह उपादाने' (८। १४) धातु से कर्म अर्थ की विवक्षा में वर्तमानासंज्ञक प्रथम पुरुष – एकवचन 'ते' प्रत्यय, ''सार्वधातुके यण्'' (३। २। ३१) से यण् प्रत्यय, ''न णकारानुबन्धचेक्रीयितयोः'' (३। ५। ७) से गुण-निषेध तथा प्रकृत सूत्र द्वारा सम्प्रसारण।

**२. गृह्णाति।** ग्रह + ना + ति। 'ग्रह् उपादाने' (८। १४) धातु से वर्तमानासंज्ञक प्रथमपुरुष – एकवचन ति – प्रत्यय, ''ना क्र्यादेः'' (३। २। ३८) से ना – विकरण तथा प्रकृत सूत्र द्वारा सम्प्रसारण।

**३. जीयते।** ज्या + यण् + ते। 'ज्या वयोहानौ'' (८। २३) धातु से कर्म अर्थ में 'ते' प्रत्यय, यण् प्रत्यय, अगुण, सम्प्रसारण तथा ''नाम्यन्तानां यणायियिन्नाशीश्च्वचेक्रीयितेषु ये दीर्घः'' (३। ४। ७०) से दीर्घादेश।

**४. जिनाति।** ज्या + ना + ति।

**५. ऊयतुः।** वेञ् + परोक्षा – अतुस्। 'वेञ् तन्तुसन्ताने' (१। ६११) धातु से परोक्षभूत अर्थ में परोक्षाविभक्तिसंज्ञक प्रथमपुरुष – द्विवचन 'अतुस्' प्रत्यय, ''वेञश्च वयिः'' (३। ४। ८१) से वय् आदेश, ''परोक्षायां च'' (३। ५। २०) से अगुण, सम्प्रसारण, द्विर्वचन, अभ्यासकार्य तथा स् को विसर्गादेश।

**६. ऊयुः।** वेञ् + परोक्षा – उस्। पूर्ववत् प्रक्रिया।

**७. विध्यते।** व्यध् + यण् + ते। 'व्यध ताडने' (३। २५) धातु से कर्मार्थक ते – प्रत्यय, शेष प्रक्रिया पूर्ववत्।

**८. विध्यति।** व्यध् + यन् + ति। पूर्ववत् प्रक्रिया।

**९. उष्टः।** वश् + वर्तमाना – तस्। 'वश कान्तौ' (२। ३) धातु से वर्तमानासंज्ञक प्रथमपुरुष – द्विवचन तस् – प्रत्यय, ''अन् विकरणः कर्तरि'' (३। २। **३२) से अन्** – विकरण, ''अदादेर्लुग् विकरणस्य'' (३। ४। ९२) से उसका लुक्, ''द्वित्वबहुत्वयोश्च परस्मै'' (३। ५। १९) से अगुण, प्रकृत सूत्र से सम्प्रसारण, ''छशोश्च'' (३। ६। ६०) से श् को ष्, ''तवर्गस्य षटवर्गाट् टवर्गः'' (३। ८। ५) से त् को ट् तथा ''रसकारयोर्विसृष्टः'' (३। ८। २) से सकार को विसर्गादेश।

**१०. उशन्ति।** वश् + अन्ति। पूर्ववत् प्रक्रिया।

**११. विच्यते।** व्यच् + यण् + ते। 'व्यच व्याजीकरणे' (५। ८६) धातु से भाव अर्थ में आत्मनेपदसंज्ञक प्रथमपुरुष–एकवचन ते–प्रत्यय, यण् प्रत्यय, अन् विकरण,

''कुटादेरनिनिचट्सु'' (३। ५। २७) से अगुण तथा प्रकृत सूत्र से सम्प्रसारण।

१२. **विचति**। व्यच् + अन् + ति। पूर्ववत् प्रक्रिया।। ५४१।।

## ५४२. स्वपिवचियजादीनां यण्परोक्षाशी:षु [३। ४। ३]

### [सूत्रार्थ]

यण् प्रत्यय, अगुण, परोक्षासंज्ञक एवं आशीर्विभक्तिसंज्ञक प्रत्ययों के परवर्ती होने पर स्वप् – वच् तथा यजादिधातुगत अन्तस्थासंज्ञक वर्णों का सम्प्रसारण होता है।। ५४२।

### [दु० वृ०]

स्वपिवच्योर्यजादीनामन्तस्थाया: सपरस्वराया: सम्प्रसारणं भवति यणि परोक्षायामाशिषि चागुणे परत:। सुप्यते, सुषुपतु:, सुप्यात्। उच्यते, उच्यात्, इज्यते, ईजतु:, इज्यात्।

यजो वपो वहश्चैव वेञ्व्येञौ ह्वयतिस्तथा।
वद् – वसौ श्वयतिश्चैव नव यजादय: स्मृता:।। ५४२।

### [दु० टी०]

स्वपि०। स्वपिश्च वचिश्च यजादयश्चेति द्वन्द्व:, न तु स्वपिश्च वचिश्च यजश्च ते आदयो येषामिति विग्रह:। **'वच भाषणे, रुदिर् अश्रुविमोचने, ञि स्वप् शये'** (२। ३०, ३१, ३२) इति क्रमपाठाद् द्वन्द्वाद्धि यत् परं श्रूयते तल्लभते प्रत्येक–मभिसंबन्धमिति स्वपिग्रहणमनर्थकं स्यात्, यजादयश्च आगणान्तं व्यक्तयो निर्दिश्यन्ते। श्विवेञो: सम्प्रसारणप्रतिषेधलिङ्गार्थं न यथासङ्ख्यमिति हृदि कृत्वाह – स्वपिवच्यो-र्यजादीनामिति। यजादिवचिस्वपामिति न कृतम्, पाठगौरवभयात्।। ५४२।

### [वि० प०]

स्वपि०। स्वपिश्च वचिश्च यजादयश्चेति विग्रह:। न तु स्वपिश्च वचिश्च यजश्च ते आदयो येषामिति। एवं सति द्वन्द्वात् पर आदिशब्द: प्रत्येकमभिसम्बध्यते, स्वपिग्रहणमनर्थकं स्याद् वचादिद्वारेणैव सिद्धत्वात्। तथा च **'वच भाषणे, रुदिर् अश्रुविमोचने, ञि ष्वप शये'** (२। ३०, ३१, ३२) इति गणे पठ्यते। एतदेव विवरणे सूचयन्नाह – स्वपिवच्योर्यजादीनामिति। यजादयो हि बहवो व्यक्त्या निर्दिश्यन्ते इति यथासङ्ख्यमिह न भवति प्रकृतीनां बहुत्वात् **''न वाश्व्योरगुणे च''** (३। ४। ६) इति प्रतिषेधाच्च। यथासङ्ख्ये हि यजादीनामाशिष्येव संप्रसारणमिति परोक्षायां प्रतिषेधो व्यर्थ: स्यात्।। ५४२।

### [बि० टी०]

स्वपि०। सुप्यते, सुषुपतुरिति **वृत्ति:**। ननु गणस्यैकत्वाद् यजादीनामप्येकत्वं ततश्च यथासंख्यं कथन्न स्यादित्याह–न वाश्व्योरिति। अथोत्सृष्टानुबन्धानां व्यञ्जनादीनां यकार: कथन्न गृह्यते? सत्यम्। **'एकानुबन्धग्रहणे न द्व्यनुबन्धकस्य ग्रहणम्'** (परि० प० ३७)

इति न्यायात्। नन्वत्रागुणत्वाभावादेव संप्रसारणं न भविष्यति चेत्, **'निमित्तं च निमित्तेन'** इति न्यायात् तन्निवृत्तिः? सत्यम्। विशेषणत्वेनानुवृत्तौ न दूषणम्। यथा तेभ्योग्रहणं स्वरयवरपरनिवृत्त्यर्थमिति, तद्वदत्रापीति चेत् **''न णकारानुबन्धः''** (३। ५। ७) इत्यत्र णकारानुबन्धानां सामान्येन ग्रहणं भविष्यति चेत्, न। तत्र चेक्रीयिताख्यातेन सह साहचर्यं भविष्यति, ततश्च वाच्यमित्यादौ न स्यादेव सम्प्रसारणमिति चेत्, यन्मते तद्ग्रहणम् अभिन्नबुद्ध्यर्थमिति तन्मते तत्र साहचर्यं कुत इति चेत् क्यपः ककारानुबन्ध एव ज्ञापयति—कृद्यकाराणां क्यपो य एवागुणो नान्यस्य ओदौद्भ्यां कृद् य इत्यनेन ज्ञापयिष्यते।। ५४२।

## [समीक्षा]

'सुप्यते, उच्यते, इज्यते' इत्यादि शब्दरूपों के सिद्ध्यर्थ यकारादि अन्तस्थासंज्ञक वर्णों के सम्प्रसारण की आवश्यकता होती। इसकी पूर्ति पाणिनि तथा शर्ववर्मा दोनों ही आचार्यों ने की है। पाणिनि का सूत्र है – ''वचिस्वपियजादीनां किति च'' (अ० ६। १।१५)। पाणिनीय व्याकरण में यक् प्रत्यय कित् है, ''असंयोगाल्लिट् कित्'' (अ० १। २। ५) सूत्र द्वारा लिट् लकार को तथा ''किदाशिषि'' (अ० ३। ४। १०४) सूत्र द्वारा आशीर्लिङ् लकार को कित् घोषित किया गया है, अतः पाणिनीय निर्देश में कित् निमित्त का उल्लेख है। इसके विपरीत कातन्त्रकार ने यक् के लिए यण् इस णकारानुबन्ध वाले प्रत्यय का प्रयोग किया है तथा परोक्षा (लिट्) एवं आशीर्विभक्ति (आशीर्लिङ्) को कित् नहीं कहा है, इसलिए उन्हें 'यण्—परोक्षा—आशीः' इन् तीनों का सूत्र में पाठ करना पड़ा है। यह भेद शैलीगत है, अतः उभयत्र साम्य ही है।

## [विशेष वचन]

१. द्वन्द्वाद्धि यत् परं श्रूयते तल्लभते प्रत्येकमभिसंबन्धम् (दु० टी०; वि० प०)।

२. यजादिवचिस्वपामिति न कृतम्, पाठगौरवभयात् (दु० टी०)।

३. यजादयो हि बहवो व्यक्त्या निर्दिश्यन्ते इति यथासङ्ख्यमिह न भवति, प्रकृतीनां बहुत्वात् (वि० प०)।

४. एकानुबन्धग्रहणे न द्व्यनुबन्धकस्य ग्रहणम् (बि० टी०)।

## [रूपसिद्धि]

**१. सुप्यते**। स्वप् + यण् + ते। 'ञि ष्वप शये' (२। ३२) धातु से भाव अर्थ में वर्तमानासंज्ञक प्रथमपुरुष—एकवचन ते—प्रत्यय, ''धात्वादेः षः सः'' (३। ८। २४) से षकार को सकारादेश, ''**सार्वधातुके** यण्'' (३। २। ३१) से यण् प्रत्यय, ''न णकारानुबन्धचेक्रीयितयोः'' (३। ५। ७) से अगुण तथा प्रकृत सूत्र द्वारा वकार को सम्प्रसारण उकार।

**२. सुषुपतुः**। स्वप् + **परोक्षा—अतुस्**। 'ञि ष्वप शये' (२। ३२) धातु से परोक्षा-संज्ञक प्रथमपुरुष—द्विवचन **'अतुस्' प्रत्यय**, ''परोक्षायां च'' (३। ५। ३०) से अगुण,

प्रकृत सूत्र से सम्प्रसारण, ''चण्परोक्षाचेक्रीयितसनन्तेषु'' (३। ३। ७) से 'सुप्' को द्विर्वचन, ''पूर्वोऽभ्यासः'' (३। ३। ४) से पूर्ववर्ती 'सुप्' की अभ्याससंज्ञा, ''अभ्यास-स्यादिर्व्यञ्जनमवशेष्यम्'' (३। ३। ९) से उकारसहित 'स्' व्यञ्जन की रक्षा—प् का लोप, ''नामिकरपरः प्रत्ययविकारागमस्थः सिः षं नुविसर्जनीयषान्तरोऽपि'' (२। ४। ४७) से सकार को षकार तथा ''रेफसोर्विसर्जनीयः'' (२। ३। ६३) से सकार को विसर्गादेश।

**३. सुप्यात्।** स्वप् + यात्। 'ञि ष्वप शये' (२। ३२) से आशीर्विभक्तिसंज्ञक प्रथमपुरुष—एकवचन 'यात्' प्रत्यय, ''आशिषि च'' (३। ५। २२) से अगुण, तथा प्रकृत सूत्र से 'व' को सम्प्रसारण।

**४. उच्यते।** वच् + यण् + ते। 'वच परिभाषणे' (२। ३०) धातु से ते—यण् प्रत्यय, अगुणत्व तथा सम्प्रसारणविधि 'सुप्यते' की तरह।

**५. ऊचतुः।** वच् + परोक्षा—अतुस्। प्रायः 'सुषुपतुः'—सदृश प्रक्रिया।

**६. उच्यात्।** वच् + आशीः — यात्। सुप्यात्-सदृश प्रक्रिया।

**७. इज्यते।** यज् + यण् + ते। 'यज देवपूजासङ्गतिकरणदानेषु' (१। ६०८) धातु से ते—यण् प्रत्यय, अगुण, सम्प्रसारणविधि 'उच्यते' की तरह।

**८. ईजतुः।** यज् + परोक्षा—अतुस्। 'ऊचतुः' की तरह प्रक्रिया।

**९. इज्यात्।** यज् + आशीः—यात्। 'उच्यात्' की तरह प्रक्रिया।।५४२।

## ५४३. परोक्षायामभ्यासस्योभयेषाम् [३। ४ । ४]

### [सूत्रार्थ]

सूत्र सं० ५४१—५४२ में निर्दिष्ट ग्रहादि तथा स्वपादि सभी धातुओं से अभ्यास के सम्बन्ध में अन्तस्थासंज्ञक वर्णों के स्थान में सम्प्रसारण होता है, परोक्षाविभक्तिसंज्ञक प्रत्ययों के परवर्ती होने पर।। ५४३।

### [दु० वृ०]

उभयेषां ग्रहादिस्वपादीनामभ्यासस्यान्तस्थायाः सपरस्वरायाः सम्प्रसारणं भवति परोक्षायां परतः। गुण्यर्थोऽयम्। जग्राह, जग्रहिथ। जिज्यौ, जिज्यिथ। उवाय, उवयिथ। स्वपादीनां च — सुष्वाप, सुष्वपिथ। उवाच, उवचिथ। इयाज, इयजिथ। परोक्षायामिति किम् ? विवक्षति, वावच्यते।।५४३।

### [दु० टी०]

परो०। गुण्यर्थोऽयमिति। गुणिन्यर्थः प्रयोजनमस्येति विग्रहः। अगुणे परत्वादन्त-रङ्गत्वाच्च कृते सम्प्रसारणे पश्चाद् द्विर्वचनं सिद्धम्। ग्रहिप्रच्छिभ्रस्जां सम्प्रसारणे ऋवर्णस्याकारे च कृते सति चाभ्यासस्यादिर्व्यञ्जनमवशेष्यमिति नास्ति विशेषः। व्रश्चेस्तु सम्प्रसारणे पुनर्वस्य सम्प्रसारणं न भवतीत्यस्ति विशेषः। 'जग्राह' इति लक्षणमस्तीत्युदाहृतम्, एवं विव्याय, विव्ययिथ। विव्याध, विव्यधिथ। उवाश, उवशिथ। पप्रच्छ, पप्रच्छिथ।

वव्रश्च, वव्रश्चिथ। बभ्रज्ज, बभ्रज्जिथ। एवम् उवास, उवसिथ। उवाप, उवपिथ। उवाह, उवहिथ। यणाशिषोरभ्यासस्याभावात् परोक्षैवानन्तरा निमित्तमिति **कल्पना गरीयसीति** अभ्यासस्य निर्दिष्टत्वाद् येनाभ्यासः संभवति तत्र स्यादित्याह – परोक्षायामित्यादि। स्वपिवचियजादीनां यणाशिषोः परोक्षायां ततोऽभ्यासस्येति **योगविभागगौरवं** स्यात्। उभौ ग्रहादिस्वपादी अवयवौ येषामिति उभयशब्दो राश्योर्व्यक्तिषु बहुवचनम्। व्यवहितस्यापि ग्रहादेः परिग्रहार्थमुभयेषां ग्रहणमिति।।५४३।

## [वि० प०]

परोक्षायाम्०। अगुणे परत्वादन्तरङ्गत्वाच्च कृते संप्रसारणे द्विर्वचनमिति अभ्यासे संप्रसारणं सिद्धम्। अतो गुणिन्येवायमित्याह–गुण्यर्थोऽयमिति। गुणिन्यर्थः प्रयोजनमस्येति विग्रहः। 'जिज्यिथ' इति नित्यात्वतां स्वरान्तानामित्यादिना थलीट्पक्षे, इटि चेत्याकारलोपः। 'सुष्वपिथ' इत्यादावपि पूर्ववदिट्। अथ परोक्षाग्रहणं किमर्थम्, अनन्तरत्वादिह परोक्षानुवर्तिष्यते। न च वक्तव्यम्– यणाशिषोरप्यनुवृत्तिः स्यात्, तयोरभ्यासस्याभावात्। तदयुक्तम्, अभ्यासस्येह निर्दिष्टत्वाद् यस्मिन्नेवाभ्यासः सम्भवति, तस्मिन्नेव प्रत्यये स्याद् इत्याह – परोक्षायामित्यादि। तेन संश्चेक्रीयितयोर्न भवति।। ५४३।

## [बि० टी०]

परो०। अगुणे परत्वादिति **पञ्जी**। नन्वेतस्मात् पूर्वमेवैषां सम्प्रसारणमुक्तम्, कथं परत्वम् ? सत्यम्। एवं योजनीया **पञ्जी**। अस्य सूत्रस्य परत्वात् परस्मिन् विषयत्वात् पश्चाद् विषयत्वादिति यावत्। अगुणेऽन्तरङ्गत्वात् संप्रसारणे कृते द्विर्वचनमित्यस्यापि सिद्धं सम्प्रसारणमित्याह – गुणीति। ननु **''न सम्प्रसारणे''** (३। ४। १७) इत्यत्र विवि-धतुरित्यादौ अगुणेऽपि सम्प्रसारणस्यानङ्गीकृतत्वात्। तथा 'शिश्विधतुरित्यत्रापि अभ्यासे सङ्गच्छत एव प्रतिषेधः' इति **''न वाश्व्योः''** (३। ४। ६) इत्यत्रापि **पञ्ज्यां** कथमेतदुपपद्यते? सत्यम्। 'न सम्प्रसारणे' इत्यस्थितौ अत्र गुणिपरोक्षाभावे तु सामान्यतो भविष्यति, यतोऽनेनैवोक्तम् – कृतसम्प्रसारणस्य द्विर्वचनेऽभ्यासे विरूपसद्भावाद् 'वि' भागस्य सम्प्रसारणविषये निषेधाभावाद् गुणिन्यपि स्यादिति। अन्यथा च सामर्थ्यप्राप्तागुणेऽभ्यासे परोक्षायां कथं विषयान्तरं प्रतिबन्धुं क्षमते इति **सम्प्रदायः**।

परोक्षायामिति किमिति **वृत्तिः**। ननु परोक्षाग्रहणाभावेऽपि अनन्तरत्वेन आवर्तमानासु यण्परोक्षाशीःषु परोक्षाग्रहणं भविष्यति अभ्यासग्रहणात्। ततश्चागुणे कृतसम्प्रसारणस्य द्विरुक्त्या सम्प्रसारणं सिद्धमेव। अर्थाद् गुणिन्यां परोक्षायामस्य विषयः कथं चेक्रीयिते स्यात् ? सत्यम्। पूर्वस्मिन् परोक्षाया आशिषा व्यवधानात् तस्या इह नानुवृत्तिः। तथा च **टीकाकारः** – यणाशिषोरभ्यासाभावात् परोक्षैवानन्तरा निमित्तमिति **कल्पना गरीयसीति,** तथापि व्यवहितपाठ एव गुरुः। ततश्चाभ्यासग्रहणाद् येनाभ्यासः संभवति तस्मिन्नेव स्यादित्याह – परोक्षेति।। ५४३।

## [समीक्षा]

'जग्राह, उवाच, सुष्वाप, इयाज' इत्यादि परोक्षाविभक्तिक प्रयोगों के सिद्ध्यर्थ अभ्यासघटित अन्तस्थावर्णों के सम्प्रसारण की आवश्यकता होती है। इसकी पूर्ति दोनों ही आचार्यों ने की है। पाणिनि का सूत्र है – ''लिट्यभ्यासस्योभयेषाम्'' (अ० ६। १। १७)। ''परोक्षे लिट्'' (अ० ३। २। ११५) सूत्र द्वारा पाणिनि ने जिस परोक्षभूत अर्थ में 'लिट्' लकार का प्रयोग किया है, उस अर्थ में कातन्त्रकार का सूत्र है – ''परोक्षा'' (३। १। १३)। तदनुसार यहाँ 'परोक्षा' शब्द का प्रयोग समझना चाहिए।

## [विशेष वचन]

१. स्वपिवचियजादीनां यणाशिषोः परोक्षायां ततोऽभ्यासस्येति योगविभागगौरवं स्यात् (दु० टी०)।

२. व्यवहितस्यापि ग्रहादेः परिग्रहार्थमुभयेषां ग्रहणमिति (दु० टी०)।

३. अथ परोक्षाग्रहणं किमर्थम्, अनन्तरत्वादिह परोक्षाऽनुवर्तिष्यते। न च वक्तव्यम् – यणाशिषोरप्यनुवृत्तिः स्यात्, तयोरभ्यासस्याभावात् (वि० प०)।

४. अन्यथा च सामर्थ्यप्राप्तागुणेऽभ्यासे परोक्षायां कथं विषयान्तरं प्रतिबन्धुं क्षमते इति सम्प्रदायः (बि० टी०)।

५. तथा च टीकाकारः – यणाशिषोरभ्यासाभावात् परोक्षैवानन्तरा निमित्तम् इति कल्पना गरीयसीति, तथापि व्यवहितपाठ एव गुरुः (बि० टी०)।

## [रूपसिद्धि]

१. **जग्राह।** ग्रह् + परोक्षा – अट्। 'ग्रह उपादाने' (८। १४) धातु से परोक्षभूत अर्थ में परोक्षाविभक्तिसंज्ञक प्रथमपुरुष – एकवचन 'अट्' प्रत्यय, ''चण्परोक्षाचेक्रीयितसनन्तेषु'' (३। ३। ७) से धातु को द्विर्वचन, ''पूर्वोऽभ्यासः'' (३। ३। ४) से पूर्ववर्ती धातु की अभ्याससंज्ञा, प्रकृत सूत्र द्वारा रकार का सम्प्रसारण ऋकार, ''अभ्यासस्यादिर्व्यञ्जनमवशेष्यम्'' (३। ३। ९) से हकार का लोप, ''ऋवर्णस्याकारः'' (३। ३। १६) से ऋ को अ, ''कवर्गस्य चवर्गः'' (३। ३। १३) से गकार को जकार तथा ''अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिचट्सु'' (३। ६। ५) से उपधासंज्ञक अकार को दीर्घादेश।

२. **जग्रहिथ।** ग्रह + परोक्षा – थल्। 'ग्रह उपादाने' (८। १४) धातु से परोक्षभूत अर्थ में परोक्षाविभक्तिसंज्ञक मध्यमपुरुष – एकवचन 'थल्' प्रत्यय, 'ल्' अनुबन्ध का प्रयोगाभाव, द्विर्वचन, अभ्याससंज्ञा, सम्प्रसारण, हकार – लोप, ऋकार को अकार, ग् को ज् तथा ''नित्यात्वताम्'' से इडागम।

३. **जिज्यौ।** ज्या + परोक्षा – अट्। 'ज्या वयोहानौ' (८। २३) धातु से परोक्षभूत अर्थ में परोक्षाविभक्तिसंज्ञक प्रथमपुरुष – एकवचन 'अट्' प्रत्यय, द्विर्वचन, अभ्याससंज्ञा, सम्प्रसारण, ''आकारादट औ'' (३। ५। ४१) से अट् को औ तथा ''सन्ध्यक्षरे च'' (३। ६। ३८) से धातुघटित आकार का लोप।

४. **जिज्यिथ।** ज्या + इट् + थल्। 'ज्या वयोहानौ' (८। २३) धातु से

परोक्षाविभक्तिसंज्ञक मध्यमपुरुष – एकवचन – 'थल्' प्रत्यय, इडागम, द्विर्वचन, अभ्याससंज्ञा, सम्प्रसारण तथा "इचि च" (३। ४। ६६) से आकार का लोप।

५. **उवाय।** वेञ् + परोक्षा – अट्। 'वेञ् तन्तुसन्ताने' (१। ६११) धातु से परोक्षाविभक्तिसंज्ञक प्रथमपुरुष – एकवचन 'अट्' प्रत्यय, "वेञश्च वयिः" (३। ४। ८१) से 'वय्' आदेश, द्विर्वचन, अभ्याससंज्ञा, अभ्यासगत यकार का लोप, सम्प्रसारण तथा धातुगत उपधा को दीर्घादेश।

६. **उवयिथ।** वेञ् + परोक्षा – थल्। 'वेञ् तन्तुसन्ताने' (१। ६११) धातु से परोक्षाविभक्तिसंज्ञक मध्यमपुरुष–एकवचन 'थल्' प्रत्यय, इडागम, वय्-आदेश, द्विर्वचन, अभ्याससंज्ञा तथा सम्प्रसारण।

७. **सुष्वाप।** स्वप् + परोक्षा – अट्। 'ञि ष्वप् शये' (२। ३२) धातु से परोक्षाविभक्तिसंज्ञक प्रथमपुरुष – एकवचन 'अट्' प्रत्यय, "धात्वादेः षः सः" (३। ८। २४) से ष् को स्, द्विर्वचन, अभ्याससंज्ञा, सम्प्रसारण, प् का लोप्, दीर्घ तथा "निमित्तात् प्रत्ययविकारा०" (३। ८। २६) से सकार को षकारादेश।

८. **सुष्वपिथ।** स्वप् + परोक्षा – थल्। 'ञि ष्वप शये' (२। ३२) धातु से परोक्षाविभक्तिसंज्ञक मध्यमपुरुष – एकवचन 'थल्' प्रत्यय, इडागम, द्विर्वचन, अभ्याससंज्ञा, सम्प्रसारण, प् का लोप तथा सकार को षकारादेश।

९. **उवाच।** वच् + परोक्षा – अट्। 'वच परिभाषणे' (२। ३०) धातु से परोक्षाविभक्तिसंज्ञक प्रथमपुरुष – एकवचन 'अट्' प्रत्यय, द्विर्वचन, अभ्याससंज्ञा, सम्प्रसारण, चकारलोप तथा उपधासंज्ञक अकार को दीर्घ।

१०. **उवचिथ।** वच् + परोक्षा – थल्। 'वच परिभाषणे' (२। ३०) धातु से परोक्षाविभक्तिसंज्ञक मध्यमपुरुष – एकवचन 'थल्' प्रत्यय, इडागम, द्विर्वचन, अभ्याससंज्ञा, चकारलोप तथा सम्प्रसारण।

११. **इयाज।** यज् + परोक्षा – अट्। 'यज देवपूजासङ्गतिकरणदानेषु' (१। ६०८) धातु से परोक्षाविभक्तिसंज्ञक प्रथमपुरुष – एकवचन 'अट्' प्रत्यय, द्विर्वचन, अभ्याससंज्ञा, सम्प्रसारण, जकार का लोप तथा उपधासंज्ञक अकार को दीर्घादेश।

१२. **इयजिथ।** यज् + परोक्षा – थल्। 'यज देवपूजासङ्गतिकरणदानेषु' (१। ६०८) धातु से परोक्षाविभक्तिसंज्ञक मध्यमपुरुष – एकवचन 'थल्' प्रत्यय, इडागम, द्विर्वचन, अभ्याससंज्ञा, जकार का लोप तथा सम्प्रसारण।। ५४३।

## ५४४. व्यथेश्च [३। ४। ५]

### [सूत्रार्थ]

'व्यथ्' धातु के अभ्यास में वर्तमान अन्तस्थासंज्ञक वर्ण को सम्प्रसारण होता है, परोक्षासंज्ञक विभक्ति के परवर्ती होने पर।। ५४४।

### [दु० वृ०]

व्यथेरभ्यासस्यान्तस्थायाः सपरस्वरायाः सम्प्रसारणं भवति परोक्षायां परतः। विव्यथे, विव्यथाते, विव्यथिरे। परोक्षायामिति किम् ? वाव्यथ्यते।। ५४४।

## [बि० टी०]

व्यथे०। ननु पूर्वत्र 'व्यथ्युभयेषाम्' इति कथन्न कृतम् ? सत्यम्। **वैचित्र्यार्थ**मिति। ननु व्यथिना सह तत्पुरुषे विद्यमानसहशब्दार्थोऽपि स्याच्चेत्, असम्भवान्न स्यात्। नन्वेकयोगे पूर्वस्य गुण्यर्थत्वाद् 'विव्यथे, विव्यथाते, विव्यथिरे' इति न सिध्यति, कथ-मेकयोगोऽनेन समर्थित: ? सत्यम्, एकयोगे सति व्यथ्धातो: सम्प्रसारणासिद्धौ तदुपादान-मगुणार्थं भविष्यति। यथा पृथग्योगे परोक्षानुवृत्तौ व्याख्यायते, तद्वदेकयोगेऽपि व्याख्यातव्य इत्याशय:। ननु यदि एकयोगेऽपि अगुणपरोक्षालाभस्तत् कथं पृथक्करणमिति चेत्, अत एव पाठाद् गुणिन्या: परोक्षाया लाभ इत्यपि **सन्देह:** स्यात्। यथा द्युतादीनामात्मनेपदमप्य-स्तीति, तद्वदत्रापि स्यात्। तर्हि पृथक्करणेन किम् ? सत्यम्। एतदर्थमेव चकारोऽत्र विधेय:। एकयोग इति **सम्प्रदाय:**।। ५४४।

## [समीक्षा]

'विव्यथे, विव्यथाते, विव्यथिरे' इत्यादि शब्दरूपों के सिद्ध्यर्थ अभ्यासघटित यकार का सम्प्रसारणविधान अपेक्षित होता है। अत: इसका निर्देश उभयत्र किया गया है। पाणिनि का सूत्र है – ''व्यथो लिटि'' (अ० ७। ४। ६८)। परोक्षभूत अर्थ में पाणिनि ने लिट् शब्द का प्रयोग किया है – ''परोक्षे लिट्'' (अ० ३। २। ११५)। यह लिट् संज्ञा अत्यन्त कृत्रिम है, जबकि कातन्त्रकार द्वारा उस अर्थ में प्रयुक्त 'परोक्षा' संज्ञा अन्वर्थ है – ''स्मेनातीते, परोक्षा'' (३। १। १२-१३)।

## [विशेष वचन]

१. ननु पूर्वत्र 'व्यथ्युभयेषाम्' इति कथन्न कृतम् ? सत्यम्, वैचित्र्यार्थमिति (बि० टी०)।

२. - - - तर्हि पृथक्करणेन किम् ? सत्यम्, एतदर्थमेव चकारोऽत्र विधेय:, एकयोग इति सम्प्रदाय: (बि० टी०)।

## [रूपसिद्धि]

**१. विव्यथे।** व्यथ् + परोक्षा – ए। 'व्यथ दु:खभयचलनयो:' (१। ४९०) धातु से परोक्षाविभक्तिसंज्ञक आत्मनेपद-प्रथमपुरुष – एकवचन 'ए' प्रत्यय, द्विर्वचन, अभ्याससंज्ञा, थकार का लोप तथा सम्प्रसारण।

**२. विव्यथाते।** व्यथ् + परोक्षा – आते। 'व्यथ दु:खभयचलनयो:' (१। ४९०) धातु से परोक्षाविभक्तिसंज्ञक आत्मनेपद-प्रथमपुरुष – द्विवचन 'आते' प्रत्यय, द्विर्वचनादि तथा प्रकृत सूत्र से सम्प्रसारण।

**३. विव्यथिरे।** व्यथ् + परोक्षा – इरे। 'व्यथ दु:खभयचलनयो:' (१। ४९०) धातु से परोक्षासंज्ञक आत्मनेपद-प्रथमपुरुष – बहुवचन 'इरे' प्रत्यय, द्विर्वचनादि तथा प्रकृत सूत्र द्वारा अभ्यासघटित यकार को सम्प्रसारणादेश।। ५४४।

## ५४५. न वाश्व्योरगुणे च [३। ४। ६]

### [सूत्रार्थ]

'वेञ् तन्तुसन्ताने' (१। ६११) तथा 'टु ओ श्वि गतिवृद्ध्योः' (१। ६१६) धातुओं के अभ्यास में वर्तमान अन्तस्थासंज्ञक वर्णों का सम्प्रसारण नहीं होता है, गुणी तथा अगुण परोक्षाविभक्ति के परे रहने पर।। ५४५।

### [दु० वृ०]

'वेञ् – श्वि' इत्येतयोरभ्यासस्यानास्थायाः सपरस्वरायाः सम्प्रसारणं न भवति, अगुणे गुणिनि च परोक्षायां परतः। ववौ, ववतुः, ववुः वविथ। शिश्वाय, शिश्वियतुः, शिश्वियुः, शिश्वयिथ। अगुण इति वचनाद् वेञोऽनभ्यासोऽपि गृह्यते। श्वयतेर्वेति परस्य विभाषाऽस्त्येव।। ५४५।

### [दु० टी०]

न वा०। यजादित्वात् प्राप्ते प्रतिषेधे उच्यते, सत्यपि वारूपत्वेऽत्र न वातेरित्याह – वेञित्यादि। परोक्षायां विषयेऽगुणप्रत्यय इति सम्बन्धः। चकारोऽ**नुक्तसमुच्चयार्थ** इत्याह – अगुणे गुणिनि चेति। ननु किमर्थमगुणग्रहणं वयेः कृतसम्प्रसारणस्य द्विर्वचनम् अनादेशस्य च वेञो यजादित्वात् संप्रसारणमस्ति प्रतिषेधाभावात् तथैव। सत्यम्, अगुण इति वचनाद् वेञोऽनभ्यासोऽपि गृह्यते, तेन तस्यापि प्रतिषेधो भवति, सत्यपि वा अभ्यासाधिकारे परस्य सम्प्रसारणं नास्तीत्यनुमीयते। अभ्यासो वा न वर्तते अविशेषेण प्रतिषेध इति अयमेव पक्षो ज्यायान्। पूर्वाभ्यां तु पक्षाभ्यां वक्ष्यमाणेऽभ्यासनिवृत्तिं प्रतीष्टाश्रयणं स्यात्। श्वयतेस्तु नैतत् प्रयोजनम् ''श्वयतेर्वा'' (३। ४। १२) इत्यनेन परस्य विभाषाऽस्त्येवेति कृतसम्प्रसारणस्य द्विर्वचनम्। पक्षे तु अभ्यासस्य श्वयतेरगुणे प्रतिषेधोऽत्राविशेषादित्याह – अगुण इति। वचनाद् इत्यादि। तथापि किमेतेनागुणवचनेन वयेरेव सम्प्रसारणं न प्रकृतेरिति नियमः क्रियते, स च नियमः परोक्षायामेव तस्यां वयेर्विषयत्वाद् यजादिपाठसामर्थ्याच्च वेञो यणाशिषोः सम्प्रसारणं भवत्येव।

ननु **''परोक्षायामभ्यासस्योभयेषाम्''** (३। ४। ४) इति चरितार्थत्वात् कथं नियम इति चेदुत्तरत्राकरणात् तर्हीदमेवागुणग्रहणं ज्ञापयति—वारूपस्य पक्षे सम्प्रसारणमिति। वेञः सम्प्रसारणे उवादेशे सति द्विर्वचनं सिद्धम्। 'उवतुः, उवुः' इति वयेरगुणे विभाषया वादेशो न वक्तव्य एव। **कश्चिद्** आह – वातेरत्रानेकार्थत्वाद् धातूनां तन्तुसन्ताने वृत्तिरिति। तदेतदभ्यासाधिकारनिवृत्त्यर्थं **सुखार्थं** चेति मन्यते।। ५४५।

### [वि० प०]

न वाश्व्यो०। 'वेञ्–श्वी' इति सत्यपि वारूपत्वे **'वेञ् तन्तुसन्ताने'** (१। ६११) इत्यस्यैव प्रतिषेधो न **'वा गतिगन्धनयोः'** (२। १७) इत्यस्य, प्राप्तेरभावात्। तदभावश्च यजादिष्वपाठात्। अथागुणे प्रत्यये कथमभ्यासस्य सम्प्रसारणप्रतिषेध उपपद्यते। तथाहि,

अन्तरङ्गत्वात् पूर्वं सम्प्रसारणेन भवितव्यम्। ततः कृतसम्प्रसारणस्य द्विर्वचनमित्याह—अगुणेत्यादि। यदि अनभ्यासस्य मूलधातोरयं प्रतिषेधो न भवेत्, तदा कृतसम्प्रसारणस्यैव द्विर्वचनम् इत्यगुणेऽभ्यासेऽपि प्रतिषेधो न लभ्यते इत्यगुणग्रहणमनर्थकमेव स्यादिति भावः। श्वयतेस्तु नेदं ज्ञापकम् **''श्वयतेर्वा''** (३।४।१२) इति परस्य मूलधातोर्विभाषाऽस्त्येवेति। पक्षेऽकृतसंप्रसारणस्यैव द्विर्वचनम्, अतोऽभ्यासे सङ्गच्छत एव प्रतिषेध इति।। ५४५।

## [बि० टी०]

न वा०। ननु **भट्टौ 'खमुवुर्वसुधामूयुः'** इति प्रयोगः कथं संगच्छते। अत्र **पाणिनिः ''वश्चास्यान्यतरस्याम्''** (अ० ६। १।३९) इति सूत्रं कृतवान्। स्वमते तदभावात् कथं संप्रसारणमिति चेत् **''न वाश्व्योरगुणे च''** (३।४।६) इत्यत्र नञा निर्दिष्टत्वाद् इति। अगुण इति वचनाद् वेञोऽनभ्यासोऽपीति **वृत्तिः**। ननु ''व्यथेश्च'' (३।४।५) इत्यत्रागुणिनी परोक्षा लब्धा, ततः सामर्थ्यलब्धागुणग्रहणेऽपि वृत्तिः संगच्छते। गुणिन्यवर्तमानाया अत्रापि चकारो देयः। एवं व्येञ्-धातोरुपादानाद् गुणिनी परोक्षैव लभ्यते ? सत्यम्, अगुणानुवृत्तिर्नास्तीत्यपि प्रतिपद्येत, ततोऽभ्यासस्यापि निवृत्तिरित्याह—अगुण इति।। ५४५।

## [समीक्षा]

'ववौ, ववतुः, शिश्वाय, शिश्वयिथ' इत्यादि शब्दरूपों के सिद्ध्यर्थ 'वा—श्वि' धातुओं के अभ्यास में वर्तमान वकार के सम्प्रसारण-निषेध की आवश्यकता होती है, जिसे दोनों ही आचार्यों ने किया है। पाणिनि का सूत्र है — ''विभाषा श्वेः, वेञः'' (अ० ६।१।३०, ४०) 'वेञ्—श्वि' का एक ही सूत्र में पाठ करके कातन्त्रकार ने लाघव प्रदर्शित किया है, जब कि दो पृथक् सूत्रों की रचना से पाणिनीय व्याकरण में गौरव स्पष्ट है।

## [विशेष वचन]

१. चकारोऽनुक्तसमुच्चयार्थः (दु० टी०)।

२. कश्चिदाह — वातेरत्र अनेकार्थत्वाद् धातूनां तन्तुसन्ताने वृत्तिरिति। तदेतदभ्यासाधिकारनिवृत्त्यर्थं सुखार्थं चेति मन्यते (दु० टी०)।

३. 'वेञ्श्वी' इति सत्यपि वारूपत्वे 'वेञ् तन्तुसन्ताने' (१।६११) इत्यस्यैव प्रतिषेधो न 'वा गतिगन्धनयोः' (२।१७) इत्यस्य प्राप्तेरभावात्। तदभावश्च यजादिष्वपाठात् (वि० प०)।

४. अत्र पाणिनिः ''वश्चास्यान्यतरस्याम्'' (अ० ६। १। ३९) इति सूत्रं कृतवान्। स्वमते तदभावात् कथं सम्प्रसारणमिति चेत्, ''न वाश्व्योरगुणे च'' (३।४।६) इत्यत्र नञा निर्दिष्टत्वादिति।

## [रूपसिद्धि]

**१. ववौ।** वेञ् + परोक्षा — अट्। 'वेञ् तन्तुसन्ताने' (१।६११) धातु से परोक्षभूत अर्थ में परोक्षासंज्ञक प्रथमपुरुष — एकवचन 'अट्' प्रत्यय, ''सन्ध्यक्षरान्तानामाकारः'' (३।४।१९)

से एकार को आकार, ''चण्परोक्षाचेक्रीयितसनन्तेषु'' (३। ३। ७) से द्विर्वचन, अभ्याससंज्ञा, अभ्यासघटित आकार को ह्रस्व, प्राप्त सम्प्रसारण का प्रकृत सूत्र से निषेध, ''आकारादट औ'' (३। ५। ४१) से अट् प्रत्यय को औ आदेश तथा ''सन्ध्यक्षरे च'' (३।६।३८) से धातुगत आकार का लोप।

**२. ववतुः।** वेञ् + परोक्षा–अतुस्। 'वेञ् तन्तुसन्ताने' (१। ६११) धातु से परोक्षाविभक्तिसंज्ञक प्रथम पुरुष–द्विवचन अतुस्–प्रत्यय, एकार को आकार, द्विर्वचन, अभ्याससंज्ञा, ह्रस्व, ''आलोपोऽसार्वधातुके'' (३।४।२७) से आकारलोप तथा ''रसकारयोर्विसृष्टः'' (३।८।२) से सकार को विसर्गादेश।

**३. ववुः।** वेञ् + परोक्षा–उस्। 'वेञ्' धातु से परोक्षा–प्रथमपुरुष–बहुवचन 'उस्' प्रत्यय, ए को आ, द्विर्वचन, अभ्याससंज्ञा, ह्रस्व, आकारलोप तथा विसर्गादेश।

**४. वविथ।** वेञ् + परोक्षा – थल्। 'वेञ्' धातु से परोक्षा – मध्यमपुरुष-एकवचन 'थल्' प्रत्यय, ए को आ, ''नित्यात्वताम्'' से इडागम, द्विर्वचनादि तथा ''इटि च'' (३।४।२८) से आकारलोप।

**५. शिश्वाय।** श्वि + परोक्षा–अट्। 'टु ओ श्वि गतिवृद्ध्योः' (१। ६१६) धातु से परोक्षा–प्रथमपुरुष–एकवचन 'अट्' प्रत्यय, द्विर्वचन, अभ्याससंज्ञा, वकारलोप, ''अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिचट्सु'' (३।६।५) से धातुगत इकार को वृद्धि तथा ''ऐ आय्'' (१। २। १३) से आयादेश।

**६. शिश्वियतुः।** श्वि + परोक्षा–अतुस्। 'श्वि' धातु से परोक्षासंज्ञक 'अतुस्' प्रत्यय, द्विर्वचनादि, ''स्वरादाविवर्णो०'' (३।४।५५) इत्यादि से इकार को इयादेश तथा स् को विसर्गादेश।

**७. शिश्वियुः।** श्वि + परोक्षा–उस्। 'श्वि' धातु से परोक्षासंज्ञक 'उस्' प्रत्यय, द्विर्वचनादि, इकार को इय् तथा सकार को विसर्गादेश।

**१८. शिश्वयिथ।** श्वि + परोक्षा–थल्। 'श्वि' धातु से परोक्षासंज्ञक 'थल्' प्रत्यय, ''इडागमोऽ०'' (३। ७। १) से इडागम, द्विर्वचनादि, इकार को गुण तथा अयादेश।। ५४५।

## ५४६. स्वपिस्यमिव्येञां चेक्रीयिते [३। ४। ६]

### [सूत्रार्थ]

स्वप्, स्यम् तथा व्येञ् धातुघटित अन्तस्थासंज्ञक वर्णों को सम्प्रसारण होता है, चेक्रीयित प्रत्यय के परवर्ती होने पर ।। ५४६।

### [दु० वृ०]

प्राप्तप्राप्तं सम्प्रसारणं भवति चेक्रीयिते परे। सोषुप्यते, सेसिम्यते, वेवीयते।। ५४६।

### [बि० टी०]

स्वपिस्यमि०। 'ये' इति कृते सिध्यति चेक्रीयितग्रहणं **व्यक्त्यवधारणार्थम्,** तेना–भ्यासस्य निवृत्तिः। न च वक्तव्यम् – यण्यपि प्रवृत्तिरिष्यते स्वपिवच्योर्यजादित्वाच्च सिद्धेरिति **हेमकरः**। स्यमिपाठादेव निषेधो न वर्तते।। ५४६।

## [समीक्षा]

'सोषुप्यते, सेसिम्यते, वेवीयते' इत्यादि शब्दरूपों के सिद्ध्यर्थ सम्प्रसारण कार्य अपेक्षित होता है। इसका विधान दोनों ही आचार्यों ने किया है। पाणिनि का सूत्र है – ''स्वपिस्यमिव्येञां यङि'' (अ० ६। १। १९)। पाणिनि ने ''धातोरेकाचो हलादेः क्रियासमभिहारे यङ्'' (अ० ३। १। २२) सूत्र द्वारा यङ् प्रत्यय किया है, परन्तु कातन्त्रकार क्रियासमभिहार अर्थ में धातु से जो 'य' प्रत्यय करते हैं, उसकी उन्होंने चेक्रीयित संज्ञा भी की है –''धातोर्यशब्दश्चेक्रीयितं क्रियासमभिहारे'' (३।२। १४)। इस मान्यता के अनुसार ही 'यङि' तथा 'चेक्रीयिते' निर्देश किए गए हैं।

## [रूपसिद्धि]

**१. सोषुप्यते।** स्वप् + चेक्रीयित–य + ते। पुनः पुनरतिशयेन वा स्वपिति। 'ञि ष्वप शये' (२।३२) धातु से क्रियासमभिहार अर्थ में ''धातोर्यशब्दश्चेक्रीयितं क्रियासमभिहारे'' (३। २। १४) से चेक्रीयितसंज्ञक 'य' प्रत्यय, ''न णकारानुबन्ध–चेक्रीयितयोः'' (३।५।७) से अगुण, प्रकृत सूत्र से सम्प्रसारण, द्विर्वचन, पूर्ववर्ती 'सुप्' की अभ्याससंज्ञा, पकारलोप, ''गुणश्चेक्रीयिते'' (३।३।२८) से अभ्यासघटित उकार को गुण तथा ''निमित्तात् प्रत्ययविकारागमस्थः सः षत्वम्'' (३।८।२६) से सकार को षकारादेश। धातुसंज्ञा, ते–प्रत्यय।

**२. सेसिम्यते।** स्यम् + य + ते। 'स्यमु शब्दे' (१। ५४१) धातु से 'पुनः पुनरतिशयेन वा स्यमति' इस अर्थ में चेक्रीयितसंज्ञक 'य' प्रत्यय, प्रकृत सूत्र से सम्प्रसारण, द्विर्वचन, अभ्याससंज्ञा, गुण, 'सेसिम्य' की ''ते धातवः'' (३। २। १६) से धातुसंज्ञा, वर्तमानासंज्ञक आत्मनेपद 'ते' प्रत्यय, अन् विकरण।

**३. वेवीयते।** व्येञ् + य + ते। 'व्येञ् संवरणे' (१। ६१२) धातु से क्रियासमभिहार अर्थ में चेक्रीयितसंज्ञक 'य' प्रत्यय, ए को आ, प्रकृतसूत्र से सम्प्रसारण, ईकारादेश, द्विर्वचनादि, गुण, धातुसंज्ञा, ते–प्रत्यय तथा अन् विकरण।। ५४६।

## ५४७. स्वापेश्चणि [३। ४। ७]

## [सूत्रार्थ]

इन् प्रत्ययान्त स्वप् धातु (स्वापि) को संप्रसारण होता है, चण् प्रत्यय के पर में रहने पर।। ५४७।

## [दु० वृ०]

स्वापेरिनन्तस्य चणि परे सम्प्रसारणं भवति। असूषुपत्। स्वापेरिनन्तस्येति किम् ? स्वापमकरोत् असुषुपत्।। ५४७।

## [दु० टी०]

स्वापेः। स्वापेरितीनन्तानुकरणम्, नहि स्वापरूपो धातुरस्ति। य इका निर्दिश्यते इति हृदि कृत्वाह – इनन्तस्येति। किमिति किमर्थमिनन्तो निर्दिश्यते स्वपेश्चणीत्युक्तेऽप्यर्थादिना व्यवधाने भविष्यति इनमन्तरेण तदभावात् ? सत्यम्, स्वापेर्घञन्तस्यापि परिग्रहार्थमन्यथा घञोऽकारलोपस्य स्थानिवद्भावादनेकवर्णव्यवधानान्न प्राप्नोतीत्याह – स्वापमकरोदसुषुपदिति द्विर्वचनात् पूर्वं संप्रसारणं समानलोपत्वादिह दीर्घो लघोर्न भवति। चणीति किम् ? स्वाप्यते।। ५४७।

## [वि० प०]

स्वापेः। असूषुपदिति, स्वपेर्हेताविन्। अद्यतन्या दि, चण्, सम्प्रसारणम्, द्विर्वचनम्, दीर्घो लघोर्दीर्घः। न हीह स्वापरूपो धातुरस्ति, येन इक्प्रत्ययेनैवं निर्देशः स्यात्। अतः स्वपिरेवायमिनन्त इति मत्वा बोधयति – स्वापेरित्यादि। ननु किमर्थमयमिनन्तो निर्दिष्टः स्वपेश्चणीत्युच्यताम् अर्थादिना व्यवहिते चणि भविष्यति, तेन विना तदभावात् ? सत्यम्। स्वापेर्घञन्तस्यापि यथा स्याद् अन्यथा घञोऽकारस्य **''इनि लिङ्गस्य''** (३। २। १२) इत्यादिना लुप्तस्य स्थानिवद्भावादनेकवर्णव्यवहिते चणि न स्यादित्याह– स्वापमकरोदिति। असुषुपदिति। समानलोपत्वादिह दीर्घो लघोर्न भवति।। ५४७।

## [समीक्षा]

'असूषुपत्' इत्यादि प्रयोगों के सिद्ध्यर्थ दोनों ही व्याकरणों में सम्प्रसारण–कार्य का विधान किया गया है। पाणिनि का सूत्र है – ''स्वापेश्चङि'' (अ० ६। १। १८)। पाणिनीय चङ् प्रत्यय में जो कार्य 'ङ्' अनुबन्ध का है वही कातन्त्रव्याकरण के चण्प्रत्ययगत 'ण्' अनुबन्ध का समझना चाहिए। अतः उभयत्र समानता है।

## [रूपसिद्धि]

**१. असूषुपत्।** अट् + स्वप् + इन् + चण् + अद्यतनी–दि। स्वपन्तं प्रायुक्त। 'ञिष्वप शये' (२।३२) धातु से ''धातोश्च हेतौ'' (३।२। १०) सूत्र द्वारा इन् प्रत्यय, ''अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिचट्सु'' (३। ६। ५) से उपधावृद्धि, ''ते धातवः'' (३।२।१६) से 'स्वापि' की धातुसंज्ञा, अद्यतनीसंज्ञक परस्मैपद प्रथमपुरुष–एकवचन 'दि' प्रत्यय, ''अड् धात्वादिर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु'' (३। ८। १६) से अडागम, ''श्रिद्रुस्रुकमिकारितान्तेभ्यश्चण् कर्तरि'' (३। २। २६) से चण् प्रत्यय, प्रकृत सूत्र से सम्प्रसारण, ''चण्परोक्षाचेक्रीयितननन्तेषु'' (३।३।७) से 'सुप्' को द्विर्वचन, 'अ + सुप् + सुपि + चण् + दि' इस अवस्था में पूर्ववर्ती सुप् की अभ्यासंज्ञा, अभ्यासघटित पकार का लोप, सन्वद्भाव, ''दीर्घो लघोः'' (३। ३। ३६) से दीर्घ, कारितलोप तथा ''निमित्तात् प्रत्ययविकारागमस्थः सः षत्वम्'' (३। ८। २६) से सकार को षकारादेश।।५४७।

## ५४८. ग्रहिस्वपिप्रच्छां सनि [३।४।८]

### [सूत्रार्थ]

'ग्रह्–स्वप्–प्रच्छ्' धातुओं में वर्तमान अन्तस्थासंज्ञक वर्णों को सम्प्रसारण होता है, सन् प्रत्यय के परे रहने पर।।५४८।

### [दु० वृ०]

एषां सनि परे सम्प्रसारणं भवति। जिघृक्षति, सुषुप्सति, पिपृच्छिषति।।५४८।

### [वि० प०]

गृहि०। जिघृक्षतीति। हो ढः, **''तृतीयादेर्घढधभान्तस्य''** (३।६।१००) इत्यादिना आदिचतुर्थत्वं घकारः, ततः **''षढोः कः से''** (३।८।४), निमित्तात् षत्वम्। पिपृच्छिषतीति। ''स्मिङ्पूङ्०'' (३।७।११) इत्यादिना इट्।।५४८।

### [समीक्षा]

'जिघृक्षति, सुषुप्सति, पिपृच्छिषति' आदि शब्दरूपों के सिद्ध्यर्थ सम्प्रसारण का विधान दोनों ही व्याकरणों में किया गया है। पाणिनि ने उक्त तीन धातुओं को दो सूत्रों में पढ़ा है। गुणाभाव के लिए किद्–विधायक सूत्र में इन तीनों का एक ही सूत्र में पाठ है– ''रुदविदमुषग्रहिस्वपिप्रच्छः संश्च'' (अ० १।२।८); ''वचिस्वपियजादीनां किति च, ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च'' (अ० ६। १। १५–१६)।

### [रूपसिद्धि]

**१. जिघृक्षति।** ग्रह् + सन् + ति। ग्रहीतुमिच्छति। 'ग्रह उपादाने' (८। १४) धातु से ''धातोर्वा तुमन्तादिच्छतिनैककर्तृकात्'' (३। २। ४) से 'सन्' प्रत्यय, ''ग्रहगुहोः सनि'' (३। ७। ३१) से इडागम का निषेध, ''सनि चानिटि'' (३। ५। ९) से गुणाभाव, प्रकृत सूत्र से सम्प्रसारण, द्विर्वचन, अभ्याससंज्ञादि, ''ऋवर्णस्याकारः'' (३। ३। १६) से ऋकार को अकार, ''कवर्गस्य चवर्गः'' (३। ३। १३) से गकार को जकार, ''सन्यवर्णस्य'' (३। ३। २६) से अ को इत्त्व, ''हो ढः'' (३। ६। ५६) से हकार को ढकार, ''तृतीयादेर्घढधभान्तस्य धातोरादिचतुर्थत्वं सध्वोः'' (३। ६। १००) से गकार को घकार, ''षढोः कः से'' (३। ८। ४) से ढकार को ककार, धातुसंज्ञा, ति–प्रत्यय, तथा ''निमित्तात् प्रत्ययविकारागमस्थः सः षत्वम्'' (३। ८। २६) से सकार को षकारादेश।

**२. सुषुप्सति।** स्वप् + सन् + ति। स्वप्तुमिच्छति। 'ञि ष्वप शये' (२। ३२) धातु से इच्छा अर्थ में सन् प्रत्यय, ''आपितपितिपिस्वपिवपिशपिछुपिक्षिपिलिपिलुपिसृपेः पात्'' (३।७।२४) से अनिट्, ''सनि चानिटि'' (३।५।९) से अगुण, प्रकृत सूत्र से सम्प्रसारण, द्विर्वचनादि, धातुसंज्ञा, तिप्रत्यय, तथा ''निमित्तात्०'' (३। ८। २६) से सकार को षकारादेश।

**३. पिपृच्छिषति।** प्रच्छ् + सन् + ति। प्रष्टुमिच्छति। 'प्रच्छ ज्ञीप्सायाम्' (५।४९) धातु से इच्छार्थ में सन् प्रत्यय, ''स्मिङ्पूङ्रन्ज्वशूकृगृदृधृप्रच्छां सनि'' (३।७।११) से इडागम, प्रकृत सूत्र से संप्रसारण, द्विर्वचनादि, ''ऋवर्णस्याकारः'' (३।३।९६) से ऋ को अ, ''सन्यवर्णस्य'' (३।३।२६) से अ को इ, धातुसंज्ञा, ति–प्रत्यय तथा ''निमित्तात्०'' (३।८।२६) इत्यादि से सकार को षकारादेश।।५४८।

## ५४९. चायः किश्चेक्रीयिते [३। ४। ९]

### [सूत्रार्थ]

चाय् धातु को चेक्रीयितसंज्ञक प्रत्यय के परवर्ती होने पर 'कि' आदेश होता है।। ५४९।

### [दु० वृ०]

चायश्चेक्रीयिते परे किर्भवति। चेकीयते।। ५४९।

### [दु० टी०]

चाय०। ''चायृ पूजानिशामनयोः'' (१। ५८६)। **केचित्** कीति दीर्घ चेक्रीयितलुगन्तार्थं पठन्ति – चेकीतः, चेकीथः। लुग्विधिर्बलवानप्यादेशमपेक्षते वचनात्।। ५४९।

### [समीक्षा]

'चेकीयते' आदि शब्दरूपों के सिद्ध्यर्थ 'चाय' धातु को 'कि' आदेश का विधान दोनों ही आचार्यों ने किया है। पाणिनि का सूत्र है – ''चायः की'' (अ० ६। १। २१)। पाणिनि ने दीर्घ ईकारान्त 'की' आदेश किया है, जब कि कातन्त्रकार ने ह्रस्व इकारान्त 'कि' आदेश माना है। टीकाकार के अनुसार कातन्त्र के भी कुछ आचार्य चेक्रीयितलुगन्त के लिए दीर्घ ईकारान्त ही आदेश मानने के पक्ष में हैं।

### [रूपसिद्धि]

**१. चेकीयते।** चाय् + य + ते। पुनः पुनश्चायति। 'चायृ पूजानिशामनयोः' (१। ५८६) धातु से, ''धातोर्यशब्दश्चेक्रीयितं क्रियासमभिहारे'' (३। २। १४) से चेक्रीयितसंज्ञक 'य' प्रत्यय, प्रकृत सूत्र से 'चाय्' को 'कि' आदेश, द्विर्वचनादि, ''कवर्गस्य चवर्गः'' (३। ३। १३) से ककार को चकारादेश, ''गुणश्चेक्रीयिते'' (३। ३। २८) से अभ्यास-घटित इकार को गुण-एकार, ''नाम्यन्तानां यणायियिन्नाशीश्च्विचेक्रीयितेषु ये दीर्घः'' (३। ४। ७०) से दीर्घ, ''ते धातवः'' (३। २। १६) से 'चेकीय' की धातुसंज्ञा, वर्तमानासंज्ञक ते – प्रत्यय तथा अन् विकरण।। ५४९।

## ५५०. प्यायः पिः परोक्षायाम् [३। ४। १०]

### [सूत्रार्थ]

चेक्रीयितसंज्ञक प्रत्यय तथा परोक्षासंज्ञक प्रत्ययों के परवर्ती होने पर 'प्याय्' धातु को 'पि' आदेश होता है।। ५५०।

## [दु० वृ०]

प्यायश्चेक्रीयिते परे परोक्षायां च पिर्भवति। पेपीयते, आपिप्ये, आपिप्याते, आपिप्यिरे।। ५५०।

## [दु० टी०]

प्याय:। **'स्फायी ओ प्यायी वृद्धौ'** (१। ४१३)। न परोक्षा चेक्रीयितं निवर्तयत्यधिकारस्येष्टत्वात्। **यो**ऽपि परोक्षायां चेति पठति, तस्यापि चानुकृष्टत्वात् **''श्वयतेर्वा''** (३। ४। १२) इत्यत्र दुष्यति। अथ चकारोऽपि तत्र वर्त्तिष्यते यत्नबलात् तदा किमनेन चकारेण। अत्रापि दीर्घ चेक्रीयितलुगर्थं **केचित्** पठन्ति, **भाषायामप्यभिधानमस्तीति**। पेपीत:, पेपीथ:।। ५५०।

## [वि० प०]

प्याय:। परोक्षायामिति वचनाच्चेक्रीयितस्य निवृत्ति: कथन्न स्यादिति। न चोद्यम्, अधिकारस्येष्टत्वादित्याह – चेक्रीयिते परोक्षायां चेति। यदि पुन: परोक्षायां चेति पठ्यते, तदा चानुकृष्टत्वाद् उत्तरत्र चेक्रीयिताधिकारो न स्यात्। न चायमुक्तसमुच्चये चकार: शक्यते वक्तुम्, चेक्रीयितस्य दृष्टाधिकारत्वात् परोक्षैव नानुवर्तते गौणत्वात्। अथोत्तरत्रापि चकारोऽनुवर्तिष्यते, किमनेन यत्नेनेति। 'आपिप्ये' इति परोक्षायां **''य इवर्णस्यासंयोगपूर्वस्य''** (३। ४। ५८) इत्यादिना यकार:।। ५५०।

## [बि० टी०]

प्याय:। अधिकारस्येष्टत्वादिति। चायप्याय: किपी चेक्रीयितपरोक्षयोरित्येकयोगकरणादुभयत्र भविष्यति। नैवम्, यथासंख्यं भविष्यति, द्विविधेऽपि सूत्रार्थे **गौरवं** स्यादिति चेत्, चकारोऽनुवर्तिष्यते। **अयमभिप्राय:** – चेक्रीयितं तावद् वर्तते, तदापि चकारानुवृत्तौ चेक्रीयिते चेत्युक्ते परोक्षायामपि स्यादित्यर्थ:।। ५५०।

## [समीक्षा]

'पेपीयते' आदि शब्दरूपों के सिद्ध्यर्थ प्यायी धातु को 'पि' आदेश दोनों ही व्याकरणों में किया गया है। पाणिनि का सूत्र है – ''प्याय: पी:'' (अ० ६।१। २८)। अन्तर यह है कि पाणिनि ने दीर्घ ईकारान्त 'पी' आदेश किया है, जब कि कातन्त्रकार ने ह्रस्व इकारान्त 'पि' आदेश स्वीकार किया है। टीकाकार के अनुसार कुछ कातन्त्र-व्याख्याकार भी दीर्घान्त आदेश के पक्षधर हैं।

## [रूपसिद्धि]

**१. पेपीयते।** प्याय् + य + ते। 'स्फायी ओ प्यायी वृद्धौ' (१। ४१३) धातु से 'भृशं प्यायति' अर्थ में ''धातोर्यशब्दश्चेक्रीयितं क्रियासमभिहारे'' (३। २। १४) सूत्र द्वारा चेक्रीयितसंज्ञक 'य' प्रत्यय, प्रकृत सूत्र से 'पि' आदेश, द्विर्वचनादि, ''गुणश्चेक्रीयिते'' (३। ३। २८) से अभ्यासघटित इकार को गुण-एकार, ''नाम्यन्तानां यणायियिन्नाशीश्चिच्वेक्रीयितेषु ये दीर्घ:'' (३। ४। ७०) से धातुघटित इकार को ईकार, ''ते धातव:'' (३। २। १६) से 'पेपीय' की धातुसंज्ञा तथा वर्तमानासंज्ञक आत्मनेपद प्रथमपुरुष – एकवचन 'ते' प्रत्यय।

२. **आपिप्ये।** आङ् + प्याय् + ए। 'प्यायी' (१। ४१३) धातु से परोक्षाविभक्तिसंज्ञक आत्मनेपद प्रथमपुरुष – एकवचन 'ए' प्रत्यय, 'पि' आदेश, द्विर्वचनादि, ''य इवर्ण-स्यासंयोगपूर्वस्यानेकाक्षरस्य'' (३। ४। ५८) से धातुघटित इकार को यकारादेश।

३. **आपिप्याते।** आङ् + प्याय् + परोक्षा – आते। आङ् – पूर्वक प्यायी धातु से परोक्षाविभक्तिसंज्ञक आत्मनेपद-प्रथमपुरुषद्विवचन 'आते' प्रत्यय, 'पि' आदेश, द्विर्वचनादि तथा धातुघटित इकार को यकारादेश।

४. **आपिप्यिरे।** आङ् + प्याय् + परोक्षा – इरे। 'आङ्' उपसर्ग-पूर्वक 'प्यायी' धातु से परोक्षाविभक्तिसंज्ञक आत्मनेपद-प्रथमपुरुष – बहुवचन 'इरे' प्रत्यय, प्याय् को 'पि' आदेश, द्विर्वचनादि तथा इकार को यकारादेश।। ५५०।

## ५५१. श्वयतेर्वा [३। ४। ११]

### [सूत्रार्थ]

चेक्रीयितसंज्ञक 'य' प्रत्यय तथा परोक्षासंज्ञक प्रत्यय के परे रहते 'श्वि' धातु को वैकल्पिक सम्प्रसारण होता है।। ५५१।

### [दु० वृ०]

श्वयतेश्चेक्रीयिते परे परोक्षायां च संप्रसारणं भवति वा। शोशूयते, शेश्वीयते। शुशाव, शुशुवतुः। शिश्वाय, शिश्वियतुः।। ५५१।

### [दु० टी०]

श्वयते०। गुणिन्यप्राप्ते विभाषा अगुणे च प्राप्ते विभाषा। यस्मिन् पक्षे श्वयतेः संप्रसारणं नास्ति तदापि **''परोक्षायाम् अभ्यासस्योभयेषाम्''** (३। ४। ४) इति संप्रसारणं प्राप्नोतीति अभ्यासे प्रतिषिध्यते। **इतर** आह – नाप्राप्तयोरगुणाभ्यासलक्षणयोरियं श्वयतेर्विभाषा आरभ्यते। सा यथैवागुणं बाधते तथाभ्यासलक्षणमपि, परत्वाद् वा श्वयतेर्लक्षणस्यावकाशः – शुशाव, शुशविथ। शिश्वाय, शिश्वयिथ। अगुणलक्षण-स्यावकाशः 'शूनः, शूनवान्' इत्यादौ। इह तूभयं प्राप्नोति – शिश्वियतुः शिश्वियुरिति। यदि तर्हि परत्वाद् अगुणलक्षणं बाधते, एवम् अभ्यासलक्षणमपि, तत्राभ्यासलक्षण-स्यावकाशः। अन्ये यजादयः 'इयाज, उवाप' श्वयतिलक्षणस्यावकाशः पररूपं श्वयतेर-भ्यासस्योभयेषां प्राप्नोतीति 'शिश्वियतुः, शिश्वियुः' श्वयतिलक्षणं भवति परत्वादिति, नैतद् युक्तम्। यतो यजादय इति व्यवस्थावाच्यादिशब्दः, स च गणे पठितान् यजादीन् प्रत्येकमपेक्षते, कुतश्चोदनात् क्वचिदेव यजादौ कृतावकाशः स्यात्, तस्मादनवकाशमभ्यास-लक्षणं संप्रसारणं प्राप्नोतीति प्रतिषेधस्य विषयः।। ५५१।

### [वि० प०]

श्वयते०। 'शुशुवतुः, शिश्वियतुः' इति अतुस्, **''स्वरादाविवर्णोवर्णान्तस्य''** (३। ४। ५५) इत्यादिना इयुवौ।। ५५१।

## [बि० टी०]

श्वयते०। अप्राप्ते विभाषेयमिति **हेमकरः**। अनन्तरत्वादत्रापि नानुवर्तते पृथग् योगात्। ततश्च स्वकार्यानुपादानात् संप्रसारणमनुवर्तते। विशेषातिदिष्टत्वादिति वाऽऽश्रयणीयम्।। ५५१।

## [समीक्षा]

'शोशूयते, शुशाव' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में वैकल्पिक सम्प्रसारणविधान किया गया है। पाणिनि का सूत्र है – ''विभाषा श्वेः'' (अ० ६। १। ३०)। धातु का निर्देश इक्प्रत्ययान्त, अप्रत्ययान्त अथवा तिप् (श्तिप्) प्रत्ययान्त मान्य है – ''इकश्तिपो धातुनिर्देशे''। पाणिनि ने 'श्वेः' यह निर्देश इक्-प्रत्ययान्त किया है, जब कि कातन्त्रकार का 'श्वयतेः' यह पाठ श्तिप् (तिप्) प्रत्ययान्त है।

## [रूपसिद्धि]

**१. शोशूयते, शेश्वीयते।** श्वि + य + ते। भृशं श्वयति। 'टु ओ श्वि गति-वृद्ध्योः' (१। ६१६) धातु से ''धातोर्यशब्दश्चेक्रीयितं क्रियासमभिहारे'' (३। २। १४) सूत्र द्वारा क्रियासमभिहार अर्थ में चेक्रीयितसंज्ञक 'य' प्रत्यय, प्रकृत सूत्र से वैकल्पिक सम्प्रसारण, द्विर्वचन, अभ्याससंज्ञा, ''गुणश्चेक्रीयिते'' (३। ३। २८) से अभ्यासघटित उकार को गुण–ओकार, ''नाम्यन्तानां यणायियिन्नाशोश्च्वचेक्रीयितेषु ये दीर्घः'' (३। ४। ७०) से धातुघटित उकार को दीर्घ, ''ते धातवः'' (३। २। १६) से 'शोशूय' की धातुसंज्ञा तथा वर्तमानासंज्ञक आत्मनेपद-प्रथमपुरुष – एकवचन 'ते' प्रत्यय। सम्प्रसारण के अभाव में 'शेश्वीयते' शब्दरूप सिद्ध होगा।

**२. शुशाव, शिश्वाय।** श्वि + परोक्षा – अट्। 'टु ओ श्वि गतिवृद्ध्योः' (१। ६१६) धातु से परोक्षाविभक्तिसंज्ञक परस्मैपद-प्रथमपुरुष-एकवचन 'अट्' प्रत्यय, प्रकृत सूत्र से वैकल्पिक सम्प्रसारण, द्वित्व, ''अस्योपधाया दोर्घो वृद्धिर्नामिनामिनिचट्सु'' (३। ६। ५) से धातुटित उकार को वृद्धि औकार तथा 'औ आव्'' (१। २। १५) से औकार को 'आव्' आदेश। सम्प्रसारण के अभाव में 'शिश्वाय' रूप द्रष्टव्य है।

**३. शुशुवतुः, शिश्वियतुः।** श्वि + परोक्षा – अतुस्। 'श्वि' धातु से परोक्षाविभक्ति-संज्ञक प्रथमपुरुष – द्विवचन 'अतुस्' प्रत्यय्, प्रकृत सूत्र से वैकल्पिक सम्प्रसारण, द्विर्वचन, ''स्वरादाविवर्णोवर्णान्तस्य धातोरियुवौ'' (३। ४। ५५) से धातुघटित उकार को उव् तथा ''रसकारयोर्विसृष्टः'' (२। ३। ६३) से सकार को विसर्गादेश। सम्प्रसारण के अभाव में 'शिश्वियतुः' शब्दरूप सिद्ध होगा।। ५५१।

## ५५२. कारिते च संश्चणोः [३। ४। १२]

## [सूत्रार्थ]

सन् अथवा चण् प्रत्यय से युक्त क्ङिन्तसंज्ञक 'इन्' प्रत्यय के परे रहते 'श्वि' धातु को विकल्प से सम्प्रसारण होता है।। ५५२।

## [दु० वृ०]

श्वयतेः संश्चणोर्यत् कारितं तस्मिन् संप्रसारणं भवति वा। शुशावयिषति, शिश्वाययिषति। अशूशवत्, अशिश्वयत्। इनि कृतस्य स्थानिवद्भावात् शु – द्विर्वचनम्।। ५५२।

## [वि० प०]

कारिते०। शुशावयिषतीति। श्वयतेर्हेताविन्। तिपा निर्देशस्य स्वरूपग्राहकत्वादिह प्राङ् न वृद्धिः। विषयविज्ञानाद् वा वृद्धिरन्तरङ्गापि संप्रसारणेन बाध्यते। सांप्रसारणे तु वृद्ध्यावादेशौ भवतः एव इनि कृतस्य स्थानिवद्भावात् शु – द्विर्वचनम् – अशूशवद् इति। इन्नादिकं पूर्ववत् **''इन्यसमान०''** (३। ५। ४४) इत्यादिना ह्रस्वः **''दीर्घो लघोः''** (३। ३। ३६) इति च विशेषः। सम्प्रसारणाभावपक्षे दीर्घो लघोर्न भवति श्वशब्दयोगे गुरुत्वादिति।। ५५२।

## [बि० टी०]

कारिते०। वृद्धेरपि बाधकत्वमित्याह – विषयविज्ञानाद् वेति। शावयितुमिच्छतीति न **वाक्यम्**। सन्विषयकारिते सम्प्रसारणं तच्च विषयप्रागिच्छार्थविवक्षायामेव। अत इनि सति वाक्ये सनो विषयस्य प्राग् अभावात् सम्प्रसारणेऽपि श्वयितुमिच्छतीति सनुत्पत्तौ **वाक्यं** शुद्विर्वचनम्। सम्प्रसारणं तु अनेन कृतम्, तच्च सन् – चण्निमित्तके इनि न स्थानिवदिति **हेमः**। तयोर्विषये इनि सम्प्रसारणत्वाद् इन्मात्रनिमित्ते कार्ये स्थानिवदित्याह – इनि कृतस्येति।। ५५२।

## [समीक्षा]

'शुशावयिषति, अशूशवत्' आदि शब्दरूपों के सिद्ध्यर्थ सम्प्रसारण कार्य का विधान दोनों ही व्याकरणों में किया गया है। पाणिनि का सूत्र है – ''णौ च संश्चङोः'' (अ० ६। १। ३१)। पाणिनीय 'णिच्' प्रत्यय के लिए कातन्त्रकार ने इन् प्रत्यय किया है और उसकी कारितसंज्ञा भी की है – ''इन् कारितं धात्वर्थे'' (३। २। ९)। इसी प्रकार पाणिनीय 'चङ्' प्रत्यय के लिए कातन्त्र में णकारानुबन्धविशिष्ट 'चण्' प्रत्यय मान्य है। अतः उभयत्र समानता है।

## [रूपसिद्धि]

**१. शुशावयिषति, शिश्वाययिषेति।** श्वि + इन् + सन् + ति। श्वयन्तं प्रयोक्तुमिच्छति। 'टु ओ श्वि गतिवृद्ध्योः' (१। ६१६) धातु से ''धातोश्च हेतौ'' (३। २। १०) सूत्र द्वारा 'इन्' प्रत्यय ''धातोर्वा तुमन्तादिच्छतिनैककर्तृकात्'' (३। २। ४) से सन् प्रत्यय, प्रकृत सूत्र से वैकल्पिक सम्प्रसारण, ''अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिचट्सु'' (३। ६। ५) से वृद्धि, आव् आदेश, ''इडागमोऽसार्वधातुकस्यादिर्व्यञ्जनादेरयकारादेः'' (३। ७। १) से इडागम, ''चण्परोक्षाचेक्रीयितसनन्तेषु'' (३। ३। ७) से 'शु' को द्वित्व, ''पूर्वोऽ-

भ्यासः'' (३। ३। ४) से पूर्ववर्ती 'शु' की अभ्याससंज्ञा, ''नाम्यन्तयोर्धातुविकरणयोर्गुणः'' (३। ५। १) से इकार को गुण एकार, अयादेश, ''निमित्तात् प्रत्ययविकारागमस्थः सः षत्वम्'' (३। ८। २६) से सन्प्रत्ययघटित सकार को षकार, ''ते धातवः'' (३। २। १६) से 'शुशावयिष' की धातुसंज्ञा तथा वर्तमानाविभक्तिसंज्ञक परस्मैपद-प्रथमपुरुष – एकवचन 'ति' प्रत्यय। सम्प्रसारणाभावपक्ष में 'श्वि + इन्, वृद्धि, सन्, इडागम (श्वायि + इ + स), श्वि को द्वित्व, अभ्यासादिकार्य तथा गुणादेश – शिश्वाययिषति।

२. **अशूशवत्, अशिश्वयत्**। अट् + श्वि + इन् + चण् + दि। श्वयन्तं प्रायुक्त। 'टु ओ श्वि गतिवृद्ध्योः' (१। ६१६) धातु से इन् प्रत्यय, अद्यतनीविभक्तिसंज्ञक परस्मैपद-प्रथमपुरुष – एकवचन 'दि' प्रत्यय, अडागम, ''श्रिद्रुस्रुकमिकारितान्तेभ्यश्चण् कर्तरि'' (३। २। २६) से चण् प्रत्यय, सम्प्रसारण, वृद्धि (अशावि + चण्), 'शावि' को प्राप्त होने पर स्थानिवद्भाव होने से 'शु' को द्वित्वचन, ''इन्यसमानलोपोपधायाः'' (३। ५। ४४) से ह्रस्व, सन्वद्भाव, ''दीर्घो लघोः'' (३। ३। ३६) से लघु उकार को दीर्घ ऊकार, तथा कारितसंज्ञक इन् प्रत्यय का लोप। सम्प्रसारणाभावपक्ष में 'श्वि + इन्; वृद्धि-श्वायि, दि, चण्, अट्, श्वायि के स्थान में 'श्वि' को द्वित्व, अभ्यासादि कार्य, वलोप, ह्रस्व तथा कारितलोप होने पर 'अशिश्वयत्' रूप।। ५५२।

## ५५३. ह्वयतेर्नित्यम् [३। ४। १३]

### [सूत्रार्थ]

'सन्' तथा 'चण्' प्रत्ययों से सम्बद्ध कारितसंज्ञक इन् प्रत्यय के परे रहते 'ह्वेञ' धातु को नित्य सम्प्रसारण होता है।। ५५३।

### [दु० वृ०]

ह्वयतेः संश्चणोर्यत् कारितं तस्मिन्नित्यं संप्रसारणं भवति। जुहावयिषति, अजूहवत्। द्विर्वचननिमित्ते कारितव्यवधान एव यथा स्याद् इति वचनम्, तेन ह्वायकयितुमिच्छति जिह्वायकयिषति, अजह्वायकदिति।। ५५३।

### [दु० टी०]

ह्वयते०। किमर्थो योगविभाग इनि संश्चण्विषये यथा स्यात्। अन्यथा ह्वयतेरभ्यस्तस्य चेत्युच्यमाने ह्वाययतेः कथं भवति, नैवम्। इदमपि ह्वयतेरेवाभ्यस्तं द्विर्वचनमनभ्यासस्यैक–स्वरस्याद्यस्येति अवयदपक्षेऽपि ह्वयतेरेवाभ्यस्तं यस्य द्विर्वचनं तेन समुदायस्याभ्यस्तत्वात्। अथवा रूपाव्यतिरेकोऽत्र तिपा निर्देशात्, न तु अर्थाव्यतिरेकः। तेन ह्वयतेरेवाभ्यस्तत्वम्। अर्थाव्यतिरेके हि समाश्रीयमाणे 'जुहाव, जुहविथ' इत्यत्र स्यात्। जुहावयिषति, अजूहवदिति सिध्यति कारिते ह्वामात्ररूपत्वाद् रूपाव्यतिरेको युक्तः। जोहूयते, जुहूषतीत्यत्रापि सकारषकारौ ह्वयत्यङ्गभूतौ तद्व्यपदेशताम् आपन्नौ ह्वयतिग्रहणेन गृह्येते।

अथवा रूपाव्यतिरेको नाश्रीयते सनो यकारस्यापि द्विर्वचने प्राधान्याद् ह्वयतिनाऽ-

भ्यस्तस्य क्रियते व्यपदेशो ह्वयतेरत्राभ्यस्तमिति। जिह्वायकयिषतीत्याय्यादेशस्य ह्वयतिग्रहणेन ग्रहणाद् रूपातिरेकता। नैतद् दर्शनमिहाभ्यस्तनिमित्तमभ्यस्तमुच्यते **उपचारात्**। यथा 'आयुर्घृतम्' इति। तेन कृतसम्प्रसारणस्यैव द्विर्वचनम्, अन्यथा **''न सम्प्रसारणे''** (३। ४। १७) इति प्रतिषेधे द्वितीयस्य संप्रसारणं न स्यात्। कृदन्तस्य च ह्वयतेः संप्रसारणमिति प्रतिषेधो भवतीति मुख्येऽप्यर्थे सति गौणे वर्तते, लक्षणानुरोधात्। यथा **''रागान्नक्षत्रयोगात्''** (२। ६। ७) इत्यभ्यस्तनिमित्ते प्रत्यय इत्यर्थः। कथन्तर्हि षष्ठी अभ्यस्तस्य प्रत्ययस्य यो ह्वयतिरिति संबन्धात् सूत्रत्वात् सप्तम्यर्थे षष्ठीति **अन्ये**। एवं सति योगविभाग इति हृदि कृत्वाह-द्विर्वचननिमित्त इत्यादि। एवशब्दः स्वयोगव्यवस्थापकः। ह्वायकमाचष्टे इतीन्, ततः सन्। ह्वायकमाख्यदिति इन्, ततश्चण्। तिब् – निर्देशेन तु **''शाच्छासाह्वा-व्यावेपामिनि''** (३। ६। २१) इत्यायिरादेशोऽपि बाध्यते इति वचनात्, तेन 'अकृतव्यूहाः कौमाराः कार्यं दृष्ट्वा कृतमपि शास्त्रं निवर्तयन्ति' इति नाश्रयितव्यं भवति। कथं 'शुशुवतुः, शुशुवुः' इति परत्वादियादेशो न भवति, तत्रापि तिब्निर्देशस्य स्वरूपग्राहकत्वान्न दोषः। 'जुहुवतुः, जुहुवुः' इति ह्वयतेरालोपोऽसार्वधातुके न भवति द्विर्वचनापेक्षत्वादित्यन्तरङ्गत्वात् प्रागेव संप्रसारणम्। **अन्ये** तु **''सपरस्वरायाः''** (३। ४। १) इत्यत्र परग्रहणं प्राप्तमपि कार्यं बाधित्वा सम्प्रसारणमेवाग्रेऽवधारयतीति मन्यन्ते। तच्च न प्रयोजयतीति नित्यग्रहणं **विभाषानिवृत्त्यर्थम्**।। ५५३।

## [वि० प०]

ह्वयतेः। जुहावयिषतीत्यत्रापि पूर्ववत् सम्प्रसारणेन **''शाच्छासाह्वा०''** (३। ६। २१) इत्यादिना आयिरादेशोऽन्तरङ्गोऽपि बाध्यते। सम्प्रसारणे तु पूर्ववदिनि वृद्ध्यादौ कृते स्थानिवद्भावाद् हुद्विर्वचनम्। अजूहवदिति। पूर्ववदिन्नादिकं कार्यम्। अथ किमर्थोऽयं **योगविभागो** ह्वयतेर्नित्यमभ्यस्तस्य चेत्युच्यताम्। एवमपि 'जुहावयिषति, अजूहवत्' इति सिध्यत्येवाभ्यस्तत्वादित्याह – द्विर्वचनेत्यादि। कारितेन व्यवधानमस्येति **कारितव्यव-धानं** द्विर्वचननिमित्तम्। एतदुक्तं भवति – यदि पुनर्द्विर्वचननिमित्तप्रत्ययव्यवहिते संप्रसारणं भवति, तदा कारितेनैव व्यवहिते यथा स्यात्, अन्यव्यवहिते मा भूत् तेन वुणादि- प्रत्ययेन व्यवहिते न भवति, अन्यथा तत्राभ्यस्तनिमित्ते संप्रसारणं भवद् यथा कारितव्यवहिते भवति, तथा वुणादिप्रत्ययव्यवहितेऽपि स्यादिति। ह्वयतेर्वुण् ''आयिरिच्यादन्नानाम्'' (३। ६। २०) आयिः, ह्वायकमाचष्टे इनीन्। ह्वायकयितुमिच्छतीति सन्, द्विर्वचनादिकं कार्यं तथा चण्प्रत्ययेऽपीति।। ५५३।

## [समीक्षा]

'जुहावयिषति, अजूहवत्' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में सम्प्रसारणविधान किया गया है। पाणिनि का सूत्र है – ''ह्वः सम्प्रसारणम्'' (अ० ६। १। ३२)। कातन्त्रकार ने सूत्र में साक्षात् 'नित्य' शब्द का पाठ किया है। पाणिनि ने सूत्र में 'नित्य' शब्द नहीं पढ़ा है, परन्तु व्याख्याकारों ने उसको सिद्धि इस प्रकार

की है कि सूत्र सं० ६।१।१३ में 'संप्रसारण' शब्द पढ़ा गया है, उसी की अनुवृत्ति से कार्यसंभव होने पर भी सूत्र सं० ६।१।३२ में जो पुनः 'सम्प्रसारण' शब्द का उपादान किया गया है वह 'विभाषा' की निवृत्ति के लिए है।

## [रूपसिद्धि]

**१. जुहावयिषति।** ह्वेञ् + इन् + इट् + सन् + ति। ह्वयन्तं प्रयोक्तुम् इच्छति। 'ह्वेञ् स्पर्धायां शब्दे च'' (१।६१३) धातु से इन् प्रत्यय, ''सन्यक्षरान्तानामाकारोऽ०'' (३।४।२०) से एकार को आकार, सन्, इडागम, सम्प्रसारण, वृद्धि-औ (हावि + इट् + सन्), हु को द्वित्व, अभ्यासादि, ''हो जः'' (३।३।१२) से ह् को ज्, गुण तथा सन्घटित सकार को षकारादेश।

**२. अजूहवत्।** अट् + ह्वेञ् + इन् + चण् + दि। ह्वयन्तं प्रायुक्त। 'ह्वेञ् स्पर्धायां शब्दे च'' (१।६१३) धातु से हेत्वर्थक ''धातोश्च हेतौ'' (३।२।१०) से, इन् प्रत्यय, चण्विषय में सम्प्रसारण, वृद्धि-औ, आव् आदेश, ''ते धातवः'' (३।२।१६) से 'हावि' की धातुसंज्ञा, अद्यतनीविभक्तिसंज्ञक परस्मैपद प्रथमपुरुष-एकवचन 'दि' प्रत्यय, अडागम, चण्प्रत्यय, 'हु' को द्विर्वचन, ''इन्यसमानलोपोपधाया ह्रस्वश्चणि'' (३।५।४४) से ह्रस्व, ''हो जः'' (३।३।१२) से ह् को ज्, सन्वद्भाव, ''दीर्घो लघोः'' (३।३।३६) से दीर्घ तथा कारितलोप।। ५५३।

## ५५४. अभ्यस्तस्य च [३।४।१४]

## [सूत्रार्थ]

अभ्यस्तनिमित्तक प्रत्यय के परे रहने पर परवर्ती स्वरसहित ह्वेञ्-धातुघटित अन्तस्थासंज्ञक वर्ण के स्थान में सम्प्रसारण होता है।। ५५४।

## [दु० वृ०]

ह्वयतेरभ्यस्तमात्रस्यान्तस्थायाः सपरस्वरायाः सम्प्रसारणं भवति। जुहाव, जुहूषति, जोहूयते।। ५५४।

## [वि० प०]

अभ्यस्त०। अभ्यस्तनिमित्तमिहाप्यभ्यस्तमु**पचारात्**। अभ्यस्तनिमित्ते प्रत्यये ह्वयतेः सम्प्रसारणमित्यर्थः। सूत्रत्वात् सप्तम्यर्थे षष्ठीयम्। तेनाभ्यस्तनिमित्ते प्रत्यये सम्प्रसारणे कृते पश्चाद् द्विर्वचनम्, अन्यथा **''न सम्प्रसारणे''** (३।४।१७) इति प्रतिषेधाद् द्वितीयस्य सम्प्रसारणं न स्यात्। जुहावेति सम्प्रसारणे द्विर्वचनम्, ततो वृद्ध्यावादेशौ स्वर-विधित्वादिति।। ५५४।

## [समीक्षा]

'जुहाव, जुहूषति' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों व्याकरणों में 'ह्वेञ्' धातुघटित वकार को सम्प्रसारण किया गया है। पाणिनि का भी यही सूत्र है — ''अभ्यस्तस्य च'' (अ० ६।१।३३)। इस सम्प्रसारणविधि में अन्तर यह है कि

पाणिनि केवल 'व्' का सम्प्रसारण करते हैं, अतः उन्हें ''सम्प्रसारणाच्च'' (अ० ६। १।१०८) से परवर्ती स्वर का पूर्वरूप आदेश भी करना पड़ता है, परन्तु कातन्त्रकार ने परवर्ती स्वर के सहित अन्तस्थासंज्ञक वर्णों का सम्प्रसारणविधान किया है। अतः उन्हें पूर्वरूप आदेश करने की आवश्यकता नहीं होती है।

## [रूपसिद्धि]

**१. जुहाव।** ह्वेञ् + परोक्षा—अट्। 'ह्वेञ् स्पर्धायां शब्दे च' (१। ६१३) धातु से परोक्षभूत अर्थ की विवक्षा में परोक्षाविभक्तिसंज्ञक परस्मैपद प्रथमपुरुष-एकवचन 'अट्' प्रत्यय, प्रकृत सूत्र से सम्प्रसारण, 'हु' को द्विर्वचन, ''हो जः'' (३।३।१२) से हकार को जकार, धातुगत उकार को वृद्धि-औकार तथा औकार को 'आव्' आदेश।

**२. जुहूषति।** ह्वेञ् + सन् + ति। ह्वातुमिच्छति। 'ह्वेञ्' धातु से इच्छार्थ में सन् प्रत्यय, ''अनिडेकस्वरा०'' (३।७।१३) से अनिट्, प्रकृत सूत्र से संप्रसारण, द्विर्वचन, अभ्याससंज्ञा, हकार को जकार, दीर्घ, षत्व, 'जुहूष' की ''ते धातवः'' (३। २। १६) से धातुसंज्ञा तथा वर्तमानासंज्ञक 'ति' प्रत्यय।

**३. जोहूयते।** ह्वेञ् + य + ते। पुनः पुनर्ह्वयति। 'ह्वेञ्' धातु से चेर्क्रीयितसंज्ञक 'य' प्रत्यय, धातुगत एकार को आकार, प्रकृत सूत्र से संप्रसारण, द्वित्वादि, हकार को जकार, गुणादेश, दीर्घ 'जोहूय' की धातुसंज्ञा तथा वर्तमानासंज्ञक आत्मनेपद-प्रथमपुरुष—एकवचन 'ते' प्रत्यय।। ५५४।

## ५५५. द्युतिस्वाप्योरभ्यासस्य [३। ४। १५]

## [सूत्रार्थ]

द्युत् तथा इनन्त स्वप् धातुओं के अभ्यास में वर्तमान परवर्ती स्वरसहित अन्तस्थासंज्ञक वर्णों का सम्प्रसारण होता है।। ५५५।

## [दु० वृ०]

द्युतिस्वाप्योरभ्यासस्यान्तस्थायाः सपरस्वरायाः संप्रसारणं भवति। दिद्युते, दिद्युताते, दिद्योतिषते, अदिद्युतत्। सुष्वापयिषति। स्वापेरिनन्तस्य ग्रहणान्न घञादौ, तेन सिष्वापयिषति।। ५५५।

## [दु० टी०]

द्युति०। ननु स्वापेरिति किमर्थो दीर्घनिर्देशः, स्वपेः शुद्धस्याभ्यासस्य परोक्षादिषु संप्रसारणमस्तीति प्रत्ययान्तरयुक्तस्य ग्रहणं चेत् कृदन्तेऽपि प्रसङ्गः — सिष्वापकयिषतीति। तस्मात् स्वापेरिति निर्देशादेवेनन्तस्य ग्रहणम्, तर्हि स्वापेर्घञि स्वापं करोतीति इनि स्वापयति। कारिते कृते निर्देशसारूप्यमस्तीति 'सिष्वापयिषति' इत्यत्रापि प्राप्नोति? सत्यम्, अनामधातोरेवात्र ग्रहणं द्युतिना साहचर्यात्। मुख्यो वा संश्लेषो गृह्यते न **गौणः**। **गौणत्वं** पुनर्घञोऽकारलोपेऽसंश्लेषादित्याह — स्वापेरित्यादि।। ५५५।

## [वि० प०]

द्युति०। अदिद्युतदिति। ''**इन्यसमान०**'' (३। ५।४४) इत्यादिना धातोरोकारस्य ह्रस्व उकारः। शेषं पूर्ववत्। अथ किमर्थमिदं स्वापेरिनन्तस्य निर्देशः, यावता शुद्धस्य स्वपेरभ्यासस्य परोक्षादिषु संप्रसारणमस्त्येव। तद् यथा ''**परोक्षायामभ्यासस्योभयेषाम्**'' (३। ४। ४) इति ''**ग्रहिस्वपिप्रच्छां सनि**'' (३। ४। ९), ''**स्वपिस्यमिव्येञां चेक्रीयिते**'' (३। ४। ७) इत्यतोऽर्थादेवात्र प्रत्ययान्तरयुक्तस्य ग्रहणं भविष्यतीत्याह—स्वापेरिनन्तस्येत्यादि। ननु तथापि सिष्वापकयिषतीति वुणन्तस्य व्यावर्तने चरितार्थत्वादिनन्तनिर्देशः कथं घञन्तमपि व्यावर्तयेत्। इह इनि कृते निर्देशस्य समानरूपत्वमस्तीति स्यादेव संप्रसारणम्? सत्यमेतत्। किन्तु द्युतिना शुद्धधातुना साहचर्यात् स्वापिरिह शुद्धधातुरेव गृह्यते, नामधातुत्वाच्चायमशुद्ध इति। यदि पुनरिह वचनात् प्रत्ययान्तरयुक्तस्य ग्रहणं भवेत्, तदा शुद्धस्यैव भविष्यतीति द्युतिना साहचर्यात्, न घञन्तस्याशुद्धस्य स्यादित्युच्यते। तदा इनन्तग्रहणं **प्रतिपत्ति-गौरवनिरासार्थमेव** स्यात्। स्वपनं **स्वापस्तं** करोतीतीन्। अभ्यासलोपे ''**सन्यवर्णस्य**'' (३। ३। २६) इतीत्त्वम्।। ५५५।

## [बि० टी०]

द्युति०। अनिनन्तनिर्देशात् कथम् अदिद्युतदिति, नैवम्। अत्रापि अभ्यासे द्युतभागस्य विद्यमानत्वाद् भवत्येव संप्रसारणम् इत्याह — अदिद्युतदिति **वृत्तिः**।। ५५५।

## [समीक्षा]

'दिद्युते, सुष्वापयिषति' आदि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में 'द्युत्—स्वापि' घटित अन्तस्थासंज्ञक वर्णों का सम्प्रसारणविधान किया गया है। पाणिनि का सूत्र है — ''द्युतिस्वाप्योः सम्प्रसारणम्'' (अ० ७।४।६७)। इनन्त 'स्वप्' धातु के अभीष्ट होने से सूत्र में 'स्वापि' का पाठ है। अतः घञ्प्रत्ययान्त 'स्वाप' से 'करोति' अर्थ में 'स्वापं करोति' इन् प्रत्यय करने पर सम्प्रसारण नहीं होता है, इससे 'सिष्वापयिषति' रूप सिद्ध होगा, 'सुष्वापयिषति' नहीं।

## [रूपसिद्धि]

**१. दिद्युते।** द्युत् + परोक्षा—ए। 'द्युत दीप्तौ' (१।४७३) धातु से परोक्षाविभक्तिसंज्ञक आत्मनेपद प्रथमपुरुष—एकवचन 'ए' प्रत्यय, ''चण्परोक्षाचेक्रीयितसनन्तेषु'' (३।३।७) से द्विर्वचन, अभ्याससंज्ञा, तकारलोप, सम्प्रसारण तथा ''सर्वत्रात्मने०'' (३। ५। २१) से अगुण।

**२. दिद्युत्यते।** द्युत् + य + ते। भृशं द्योतते। 'द्युत दीप्तौ' (१। ४७३) धातु से क्रियासमभिहार अर्थ में ''धातोर्यशब्दश्चेक्रीयितं क्रियासमभिहारे'' (३।२। १४) से चेक्रीयितसंज्ञक 'य' प्रत्यय, ''चण्परोक्षाचेक्रीयितसनन्तेषु'' (३।३।७) से धातु को द्विर्वचन, अभ्याससंज्ञा, सम्प्रसारण, ''ते धातवः'' (३।२। १६) से 'दिद्युत्य' की धातु-संज्ञा तथा वर्तमानासंज्ञक आत्मनेपद- प्रथमपुरुष—एकवचन 'ते' प्रत्यय।

**३. दिद्योतिषते।** द्युत + सन् + इट् + ते। द्योतितुमिच्छति। 'द्युत दीप्तौ' (१।४७३) धातु से "धातोर्वा तुमन्तादिच्छतिनैककर्तृकात्" (३।२।४) सूत्र द्वारा इच्छार्थ में 'सन्' प्रत्यय, इडागम, द्वित्व, अभ्याससंज्ञा, तकारलोप, प्रकृत सूत्र से सम्प्रसारण, "संश्चेति वा वक्तव्यम्" से वैकल्पिक गुणादेश तथा सकार को षकारादेश।

**४. अदिद्युतत्।** अट् + द्युत् + इन् + चण् + दि। द्योतमानं प्रायुक्त। 'द्युत् दीप्तौ' (१।४७३) धातु से "धातोश्च हेतौ" (३। २। १०) सूत्र द्वारा 'इन्' प्रत्यय, गुण, 'द्योति' की "ते धातवः" (३।२। १६) से धातुसंज्ञा, अद्यतनीसंज्ञक परस्मैपद-प्रथमपुरुष–एकवचन 'दि' प्रत्यय, अडागम, चण् प्रत्यय, द्विर्वचन, अभ्याससंज्ञा, तकारलोप, प्रकृत सूत्र द्वारा सम्प्रसारण तथा कारितलोप।

**५. सुष्वापयिषति।** स्वप् + इन् + सन् + ति। स्वपन्तं प्रयोक्तुमिच्छति। 'ञि ष्वप शये' (२।३२) धातु से हेत्वर्थक 'इन्' प्रत्यय, "अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिचट्सु" (३।६।५) से दीर्घ, "ते धातवः" (३।२।१६) से 'स्वापि' की धातुसंज्ञा, "धातोर्वा तुमन्ताद् इच्छतिनैककर्तृकात्" (३।२।४) से 'सन्' प्रत्यय, इडागम, द्वित्व, प्रकृत सूत्र द्वारा सम्प्रसारण, षकारादेश, गुण तथा अयादेश।। ५५५।

## ५५६. न सम्प्रसारणे [३। ४। १६]

### [सूत्रार्थ]

एक बार सम्प्रसारण हो जाने पर पुनः सम्प्रसारण नहीं होता है।। ५५६।

### [दु० वृ०]

सम्प्रसारणे कृते पुनः संप्रसारणं न भवति। विध्यते, वेविध्यते, विव्यथे, विविधतुः विविधुः, संविव्यतुः, संविव्युः। एकदेशविकृतस्यानन्यवद्भावाद् व्यक्तौ जातौ च वचनम्।। ५५६।

### [दु० टी०]

न संप्र०। **व्यक्तौ जातौ** च वचनमिति। **व्यक्तौ** यावन्ति लक्ष्याणि तावन्ति लक्षणवाक्यानि इति भावः। **जातौ** चैकमेवेदं लक्षणम्, सकृल्लक्ष्ये लक्षणस्य चरितार्थत्वात्, परोक्षायामगुणे कृतसंप्रसारणानां द्विर्वचने **"परोक्षायामभ्यासस्योभयेषाम्"** (३।४।४) इति पूर्वस्य प्राप्नोति, एकयोगलक्षणं खल्वपि संप्रसारणम्, तद् यदि तावत् परमभिनिवृत्तं (पूर्वमप्यनभिनिवृत्तम्) **प्रसक्तस्यानभिनिवृत्तस्य** प्रतिषेधेन निवृत्तिः शक्या कर्तुम्। यो हि भुक्तवन्तं ब्रूयान्मा भुङ्क्ष्वेति, किन्तेन कृतं स्यात्। तथापि परमभिनिवृत्तम्, पूर्वमप्य (न) भिनिवृत्तम्। अत्र निमित्तसंशयोऽनुपपन्नः। **"न सम्प्रसारणे सम्प्रसारणम्"** (३।४।१७) इति यत् तावदुच्यते उच्यमानेऽप्येतस्मिन् कुत एतत् परस्य भविष्यति न पुनः पूर्वस्येति। **इहेङ्गितेन आचरितेन चेष्टितेन निमिषितेन महता वा सूत्रप्रणयनेनाचार्याणामभिप्रायो लक्ष्यते।** एतदेव ज्ञापयति – परस्य भवति न पुनः पूर्वस्येति। यदयं **"न सम्प्रसारणे सम्प्रसारणम्"** (३।४।१७) इति प्रतिषेधो नास्तीति। न च **'अन्त्यविकारेऽन्त्यसदेशस्य**

**कार्यं भवति'** (कात० प० ६१) इति नैतस्याः परिभाषायाः सन्ति प्रयोजनानीति। नैवमिह व्याख्येयम् परेण स्वरेणेति पूर्वस्यासम्बन्धादिति।। ५५६।

## [वि० प०]

न संप्र०। व्यधेर्यणि चेक्रीयिते च ग्रह्यादित्वात् सम्प्रसारणे कृते **'यावत्सम्भवस्तावद् विधिः'** (कात० प० २७) इति पुनर्वकारस्य प्राप्नोतीति निषेध उच्यते। तथा **''व्यथेश्च''** (३।४।५) इति व्यथेरभ्यासस्य प्राप्नोति, तथा व्यथेः परोक्षायामगुणे कृतसंप्रसारणस्य द्विर्वचनं **''परोक्षायामभ्यासस्योभयेषाम्''** (३।४।४) इति पुनरभ्यासस्य प्राप्नोति। 'संविव्यतुः, संविव्युः' इति व्येञो यजादित्वात् सम्प्रसारणे **''तद् दीर्घमन्त्यम्''** (४।१।५२) इति दीर्घत्वे च य इवर्णस्येत्यादिना यकारः। अथ किमर्थमिदं यावता संप्रसारणे सति निर्दिष्टा धातव एव न भवन्ति, कुतः पुनः संप्रसारणप्रसङ्ग इत्याह — एकदेशविकृतस्यानन्यवद्भावादिति। तथाहि लोके छिन्नकर्णलाङ्गूलः श्वा श्वैव भवति नाश्वादिरिति, तद्वदत्रापीति भावः। **व्यक्तौ जातौ** च वचनम् इति तत्र **व्यक्तौ** यावन्ति लक्षणानि तावन्ति लक्षणवाक्यानीति। 'विध्यते' इत्यादौ यकारस्य सम्प्रसारणेऽन्यदेव ग्रह्यादिलक्षणं वकारस्याप्यनन्यवदिति तस्यापि संप्रसारणं स्यात् तल्लक्षणस्याकृतार्थत्वादिति। जातौ चैकमेवेदं लक्षणं सकृल्लक्ष्ये लक्षणस्य चरितार्थत्वादिति विविधतुरित्यादावगुणे कृतसंप्रसारणद्विर्वचने **''परोक्षायामभ्यासस्योभयेषाम्''** (३।४।४) इति स्याद् यस्मादत्र पक्षे आत्मप्रवृत्तिरेव भवति, नान्यत्र निवृत्तिरित्यन्यस्य निवर्तनीयस्याभावादात्मप्रवृत्तिरेव स्यादिति भावः।। ५५६।

## [बि० टी०]

न संप्र०। व्यक्तौ जातौ च वचनमिति **वृत्तिः**। विध्यतीत्यत्र प्रतिव्यक्ति प्रयोगाल्लक्षणमपि बहुतरं स्यात्।। ५५६।

## [समीक्षा]

'विध्यते, विव्यथे, वेविध्यते' इत्यादि शब्दरूपों में 'य' को संप्रसारण करने के बाद 'व' को भी संप्रसारण प्राप्त होता है, उसके निषेध का विधान दोनों ही व्याकरणों में किया गया है। पाणिनि का सूत्र है — ''न संप्रसारणे सम्प्रसारणम्'' (अ० ६।१।३७)। पुनः सम्प्रसारण होने से अनिष्ट रूपापत्ति के वारणार्थ उक्त निषेध करना आवश्यक है। यह निषेध जाति तथा व्यक्तिरूप उभय पक्षों में मान्य है। वृत्तिकार दुर्गसिंह का इस विषय में अभिमत है — 'एकदेशविकृतस्यानन्यवद्भावाद् व्यक्तौ जातौ च वचनम्' (दु० वृ०)।

## [विशेष वचन]

१. व्यक्तौ यावन्ति लक्ष्याणि भवन्ति तावन्ति लक्षणवाक्यानीति भावः। जातौ चैकमेवेदं लक्षणम्, सकृल्लक्ष्ये लक्षणस्य चरितार्थत्वात् (दु० टी०; वि० प०)।

२. इहेङ्गितेन आचरितेन चेष्टितेन निमिषितेन महता वा सूत्रप्रणयनेनाचार्याणामभिप्रायो लक्ष्यते (दु० टी०)।

३. लोके छिन्नकर्णलाङ्गूलः श्वा श्वैव भवति नाश्वादिरिति। तद्वदत्रापीति भावः (वि० प०)।

## [रूपसिद्धि]

१. **विध्यते**। व्यध् + यण् + ते। 'व्यध ताडने' (३।२५) धातु से कर्म अर्थ में ''सार्वधातुके यण्'' (३।२।३१) से 'यण्' प्रत्यय, अगुणविधान, ''ग्रहिज्यावयि-व्यधि०'' (३।४।२) इत्यादि से 'य' को सम्प्रसारण, पुनः वकार को सम्प्रसारण प्राप्त होने पर प्रकृत सूत्र से उसका निषेध।

२. **वेविध्यते**। व्यध् + य + ते। 'व्यध ताडने' (३।२५) धातु से क्रियासमभिहार अर्थ में चेक्रीयितसंज्ञक 'य' प्रत्यय, ''ग्रहिज्यावयिव्यधि०'' (३।४।२) इत्यादि से 'य' को सम्प्रसारण 'इ', पुनः प्राप्त सम्प्रसारण का निषेध, द्विर्वचन, अभ्याससंज्ञा, धकार-लोप, अभ्यासघटित इकार को गुण, ''ते धातवः'' (३।२।१६) से 'वेविध्य' की धातु-संज्ञा तथा वर्तमानासंज्ञक आत्मनेपद- प्रथमपुरुष-एकवचन 'ते' प्रत्यय।

३. **विव्यथे**। व्यथ् + परोक्षा—ए। 'व्यथ दुःखभयचलनयोः' (१।४९०) धातु से परोक्षाविभक्तिसंज्ञक आत्मनेपद-प्रथमपुरुष—एकवचन 'ए' प्रत्यय, द्विर्वचन, अभ्याससंज्ञा, ''व्यथेश्च'' (३।४।५) से अभ्यासघटित 'य' को सम्प्रसारण, थकार—लोप, पुनः सम्प्रसारणप्राप्ति का प्रकृत सूत्र से निषेध।

४. **विविधतुः**। व्यध् + परोक्षा—अतुस्। 'व्यध्' धातु से परोक्षासंज्ञक प्रथमपुरुष—द्विवचन 'अतुस्' प्रत्यय, सम्प्रसारण, द्विर्वचनादि तथा ''रसकारयोर्विसृष्टः'' (३।८।२) से स् को विसर्गादेश।

५. **विविधुः**। व्यध् + परोक्षा—उस्। 'व्यध्' धातु से परोक्षाविभक्तिसंज्ञक परस्मैपद प्रथमपुरुष—बहुवचन 'उस्' प्रत्यय, सम्प्रसारण, द्विर्वचनादि तथा सकार को विसर्गादेश।

६. **संविव्यतुः**। सम् + व्येञ् + परोक्षा—अतुस्। 'व्येञ् संवरणे' (१।६१२) धातु से परोक्षाविभक्तिसंज्ञक परस्मैपद-प्रथमपुरुष—द्विवचन 'अतुस्' प्रत्यय, सम्प्रसारण, ''तद् दीर्घमन्यम्'' (४।१।५२) से दीर्घ, द्वित्व, अभ्याससंज्ञा, अभ्यासघटित दीर्घ को ह्रस्व, ''य इवर्णस्या०'' (३।४।५८) से इकार को यकार तथा सकार को विसर्गादेश।

७. **संविव्युः**। सम् + व्येञ् + परोक्षा—उस्। 'सम्' उपसर्गपूर्वक 'व्येञ्' धातु से परोक्षाविभक्तिसंज्ञक परस्मैपद-प्रथमपुरुष-बहुवचन 'उस्' प्रत्यय, सम्प्रसारण, द्विर्वचनादि तथा सकार को विसर्गादेश।। ५५६।

## ५५७. न वशेश्चेक्रीयिते [३। ४। १७]

## [सूत्रार्थ]

चेक्रीयितसंज्ञक 'य' प्रत्यय के परवर्ती होने पर 'वश्' धातु को सम्प्रसारण नहीं होता है।। ५५७।

## [दु० वृ०]

वशेश्चेक्रीयिते परे संप्रसारणं न भवति। वावश्यते।। ५५७।

## [समीक्षा]

'वावश्यते' आदि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में 'वश्' धातु गत वकार के संप्रसारण का निषेध किया गया है। पाणिनि का सूत्र है – ''न वशः'' (अ० ६।१। २०) चेक्रीयित से भिन्न प्रत्ययों में तो संप्रसारण होता ही है – उष्टः, उशन्ति। इस सूत्र पर वृत्ति के अतिरिक्त 'दुर्गवृत्तिटीका, विवरणपञ्जिका' तथा 'कलापचन्द्र' नामक व्याख्या प्राप्त नहीं है।

## [रूपसिद्धि]

**१. वावश्यते**। वश् + य + ते। भृशं वष्टि। 'वश कान्तौ' (२।३) धातु से क्रियासमभिहार अर्थ में ''धातोर्यशब्दश्चेक्रीयितं क्रियासमभिहारे'' (३। २। १४) सूत्र द्वारा चेक्रीयितसंज्ञक 'य' प्रत्यय, ''ग्रहिज्यावयिव्यधिवष्टिव्यचिप्रच्छिव्रश्चिभ्रस्जीनामगुणे'' (३।४।२) से प्राप्त सम्प्रसारण का प्रकृत सूत्र द्वारा निषेध, ''चण्परोक्षाचेक्रीयितसनन्तेषु'' (३।३।७) से द्वित्व, ''पूर्वोऽभ्यासः'' (३।३।४) से पूर्ववर्ती 'वश्' की अभ्याससंज्ञा, ''अभ्यासस्यादिर्व्यञ्जनमवशेष्यम्'' (३।३।९) से 'व' की रक्षा – श् का लोप, ''दीर्घो लघोः'' (३।३।३६) से अभ्यासघटित अकार को दीर्घ, ''ते धातवः'' (३। २। १६) से 'वावश्य' की धातुसंज्ञा तथा ''सम्प्रति वर्तमाना'' (३। १। ११) के नियमानुसार वर्तमान अर्थ की विवक्षा में ''वर्तमाना'' (३। १। २४) सूत्र द्वारा आत्मनेपदसंज्ञक प्रथमपुरुष–एकवचन 'ते' प्रत्यय।। ५५७।

## ५५८. प्रच्छादीनां परोक्षायाम् [३। ४। १८]

## [सूत्रार्थ]

परोक्षाविभक्तिसंज्ञक प्रत्ययों के परवर्ती होने पर 'प्रच्छ्–व्रश्च्–भ्रस्ज्' धातुओं से सम्प्रसारण का निषेध होता है।। ५५८।

## [दु० वृ०]

प्रच्छिव्रश्चिभ्रस्जीनां परोक्षायां संप्रसारणं न भवति। पप्रच्छतुः, पप्रच्छुः। वव्रश्चतुः, वव्रश्चुः। बभ्रज्जतुः, बभ्रज्जुः।। ५५८।

## [दु० टी०]

प्रच्छा०। प्राप्तिपूर्वकत्वात् प्रतिषेधस्य प्रच्छिव्रश्चिभ्रस्जा गृह्यन्ते इति भावः।। ५५८।

## [वि० प०]

प्रच्छा०। प्रतिषेधस्य प्राप्तिपूर्वकत्वाद् ग्रह्यादिसूत्रपठिता एव प्रच्छादयो गृह्यन्ते, न तु गणपठिता इत्याह–प्रच्छिव्रश्चिभ्रस्जीनामिति। भ्रस्जेः सकारस्य धुटान्तृतीयत्वे **''तवर्गश्चटवर्गयोगे चटवर्गौ''** (२।४।४६) इति जकारः।। ५५८।

## [समीक्षा]

'पप्रच्छतुः, वव्रश्चतुः, बभ्रज्जतुः' आदि शब्दरूपों की सिद्धि उभयत्र भिन्न भिन्न रूप में की गई है। पाणिनि के अनुसार "लिट्यभ्यासस्योभयेषाम्" (अ० ६।१।१७) सूत्र द्वारा अभ्यासघटित रेफ को सम्प्रसारण करके 'वव्रश्चतुः' आदि शब्द- रूप सिद्ध किए गए हैं, जबकि कातन्त्रकार प्रकृत सूत्र द्वारा सम्प्रसारण का निषेध करके द्वित्व होने पर रेफ का भी लोप करके उक्त रूप सिद्ध करते हैं। इस प्रकार प्रकृत विषय में दोनों व्याकरणों की शैली बिल्कुल भिन्न है।

## [रूपसिद्धि]

**१. पप्रच्छतुः।** प्रच्छ + परोक्षा – अतुस्। 'प्रच्छ ज्ञीप्सायाम्' (५।४९) धातु से परोक्षाविभक्तिसंज्ञक प्रथमपुरुष-द्विवचन–अतुस्–प्रत्यय, इस धातु को "ग्रहिज्यावयि-व्यधिवष्टिविचतिवृश्चतिप्रच्छति०" (३।४।२) आदि सूत्र से प्राप्त सम्प्रसारण का प्रकृत सूत्र से निषेध, "चण्परोक्षाचेक्रीयितसनन्तेषु" (३।३।७) से प्रच्छ् को द्विर्वचन, अभ्याससंज्ञा, प् की रक्षा–'र्–च्छ्' का लोप, तथा "रसकारयोर्विसृष्टः" (२।३।६३) से सकार को विसर्गादेश।

**२. पप्रच्छुः।** प्रच्छ् + परोक्षा–उस्। 'प्रच्छ ज्ञीप्सायाम्' (५।४९) धातु से परोक्षाविभक्ति-संज्ञक परस्मैपद-प्रथमपुरुष – बहुवचन 'उस्' प्रत्यय, तथा अन्य प्रक्रिया पूर्ववत्।

**३. वव्रश्चतुः।** व्रश्च् + परोक्षा – अतुस्। 'ओ व्रश्चू छेदने' (५।१९) धातु से परोक्षाविभक्तिसंज्ञक परस्मैपद-प्रथमपुरुष – द्विवचन 'अतुस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**४. वव्रश्चुः।** व्रश्च् + परोक्षा – उस्। 'ओ व्रश्चू छेदने' (५।१९) धातु से परोक्षा-विभक्तिसंज्ञक परस्मैपद-प्रथमपुरुष – बहुवचन 'उस्' प्रत्यय एवं अन्य प्रक्रिया पूर्ववत्।

**५. बभ्रज्जतुः।** भ्रस्ज् + परोक्षा – अतुस्। 'भ्रस्ज् पाके' (५।४) धातु से परोक्षा-संज्ञक प्र० पु० – द्विवचन 'अतुस्' प्रत्यय, प्राप्त सम्प्रसारण का प्रकृत सूत्र से निषेध, द्विर्वचन, अभ्याससंज्ञा, 'भ' की रक्षा – 'र् – स् – ज्' का लोप, "द्वितीय-चतुर्थयोः प्रथमतृतीयौ" (३।३।११) से भकार को बकार, "धुटां तृतीयः" (३।८।८) से स् को द् "तवर्गश्चटवर्गौ०" (२।४।४६) इत्यादि से द् को ज् तथा सकार को विसर्गादेश।

**६. बभ्रज्जुः।** भ्रस्ज् + परोक्षा – उस्। 'भ्रस्ज पाके' (५।४) धातु से परोक्षाविभक्तिसंज्ञक परस्मैपद-प्रथमपुरुष – बहुवचन 'उस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ५५८।

## ५५९. सन्ध्यक्षरान्तानामाकारोऽविकरणे [३। ४। १९]

## [सूत्रार्थ]

सन्ध्यक्षरान्त धातु के अन्तिम वर्ण को आकारादेश होता है, विकरण से भिन्न प्रत्यय के परवर्ती होने पर।। ५५९।

## [दु० वृ०]

सन्ध्यक्षरान्तानां धातूनामविकरणविषये आकारो भवति। धेट् – धाता। ग्लै – ग्लाता। म्लै – म्लाता। दो–दाता। सुग्लः, सुम्लः। **''उपसर्गे त्वातो डः''** (४। २। ५२) स्यात्। अन्तग्रहणं धातुसंज्ञाकाले सन्ध्यक्षरार्थम्। तेन चेता, स्तोता। अविकरण इति किम् ? ग्लायति, म्लायति।। ५५९।

## [दु० टी०]

सन्ध्य०। सन्ध्यक्षरमेवान्ते येषामिति बहुव्रीहिः। ननु किमर्थमन्तग्रहणं **'येन विधिस्तदन्तस्य'** (कात० प० ३) इति लभ्यते। धातोः प्रकृतस्य विधिभाजः सम्भवाद् अवश्यमिह धात्वधिकार आश्रयणीयः। 'गोभ्याम्, नौभ्याम्' इत्यत्र मा भूदिति। ननु राय आत्वं ज्ञापकम्, तर्हि नियमार्थमेव स्यात्। रायो व्यञ्जनादावेवात्वमिति। तथा **''अमूशसोरा''** (२।२।३४) इत्यपि गोरात्त्वबाधनार्थं शसि नियमार्थं स्यात्। न च धातुना सन्ध्यक्षराणि विशिष्यन्ते। धातोः सन्ध्यक्षराणामिति कुतः 'ढौकृ, त्रौकृ' (१।३३२, ३३१) – 'ढौकिता, त्रौकिता' इत्यत्रात्वस्य प्राप्तिः, विशेषणविशेष्यभावस्य कामचारत्वात्, तर्ह्यन्तग्रहणमुपदेशसन्ध्यक्षरान्तत्वप्रतिपत्त्यर्थम्। अनुशब्दोऽत्रावयववचनः, अवयवश्चारम्भकः, स च धातुसंज्ञायामेवेति। यद्येवं 'चेता, स्तोता' इत्यत्राप्यारम्भकत्वं न विहन्यते, तेन विना धातुत्वस्याप्रतीतेः ? सत्यम्, सन्ध्यक्षरं च तदन्तं चेति कृत्वा तदन्तविधिस्तेन सर्वदा सन्ध्यक्षरान्तानामिति स्थितम्। न च वक्तव्यम्, परनिमित्तकस्य सन्ध्यक्षरस्यात्वं न भवति, यदयं ''स्मिजिक्रीत्रामिनि'' (३।४।२४) इत्यात्वं शास्ति, नैवं नियमार्थं सम्भाव्यते इति एषामिन्येवात्वमित्याह – अन्तग्रहणमित्यादि। **'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्'** (कात० प० ७५) इति चेत्, तदान्तग्रहणं **सुखप्रतिपत्त्यर्थम्।**

न विकरणोऽविकरण इति पर्युदासेऽपि न विद्यते विकरणो यस्मिन्निति बहुव्रीहावपि 'सुग्लः, सुम्लः' इति अनिर्दिष्टप्रत्यये परे आत्वं भवति विषयसप्तमीत्वात्। तथा 'जग्ले, मम्ले' इत्यभ्यासस्येकारो न भवति। धातुनिर्देशाश्च न विरुध्यन्ते शाच्छासाह्वा इत्यादयः प्रसज्यप्रतिषेधेऽपि विधेरनिमित्तत्वाद् विषयतया सर्वं युक्तम् इत्युक्तम् अविकरणविषय इति। अत्र च लिङ्गं **''ह्वावामश्च''** (४।३।२) इति कबाधनार्थमणं यत् शास्ति। अननीति सिद्धेऽविकरणग्रहणं विभक्त्यन्ननिवृत्त्यर्थम्, अन्यथा अण्प्रत्यये बुद्धिस्थे भविष्यति प्रतिषेधः स्यात्। **'पै ओ वै'** (१।२६१)-अपासिषुः। **'धेट्'** (१।२६४) – अधासिषुरिति सिचः परस्यान उस्।। ५५९।

## [वि० प०]

सन्ध्य०। **''उपसर्गे त्वातो डः''** (४।२।५२) स्यादिति। एतेन 'अविकरणे' इति **विषयसप्तम्याः** फलं दर्शितम्। तथाहि बुद्धिस्थे प्रत्यये आकारे कृते सति डप्रत्ययो युज्यते। **परसप्तम्यां** तु डप्रत्यये सत्याकारः, आकारे च सति डप्रत्यये इति

इतरेतराश्रयदोषाश्रयत्वात् 'सुग्लः, सुम्लः' इति न सिध्यतीति। विषयसप्तम्याश्च लिङ्गं **''ह्वावामश्च''** (४।३।२) इति कप्रत्ययबाधनार्थम् अण्विधानमेव। अन्यथा ह्वेञ्प्रभृतीनामाकारान्तत्वाभावादेव **''आतोऽनुपसर्गात् कः''** (४।३।४) इति कप्रत्ययो नास्ति। ततः **''कर्मण्यण्''** (४।३।१) इत्यनेनैव सिध्यतीति भावः। अथान्तग्रहणं किमर्थं यावता धातुरधिकृतः सन्ध्यक्षरेण विशिष्यते, विशेषणेन च तदन्तविधिरिति सिद्धम् इत्याह – अन्तग्रहणमित्यादि। ननु 'चेता, स्तोता' इति लाक्षणिकत्वादेवात्र न भविष्यति किमनेनेति? नैवम्, इह 'धेट्' धातुरपि लाक्षणिको भवितुमर्हति। टकारस्य **''योऽनुबन्धोऽप्रयोगी''** (३।८।३१) इति लक्षणविषयत्वादिति मन्यते, अनित्या हि परिभाषा भवतीति। तथा च **''स्मिजिक्रीञामिनि''** (३।४।२४) इत्यादावाकारस्य लाक्षणिकस्यापि ग्रहणे 'विस्मापयते' इति **''अर्तिह्री०''** (३।६।२२) इत्यादिना पकारागमः सिद्धः।। ५५९।

## [बि० टी०]

सन्ध्य०। संहितायामपि अधिकरणे इत्येव मन्तव्यम्, ''ह्वावामश्च'' (४।३।२) इति निर्देशात्। ननु 'ह्वेञ्' धातोरलि 'आह्वाय' इत्यादि प्रयोगः कथं संगच्छते, तत्राकारः स्याच्चेत् ? न, एतेषां 'ग्लै' प्रभृतीनामाकारान्तत्वं कृत्वा दिवादिपाठे सिध्यति, यदेतद् वचनम्, तदाकारस्यानित्यत्वं बोधयतीति **सम्प्रदायः**।। ५५९।

## [समीक्षा]

'धाता, ग्लाता, म्लाता, दाता' इत्यादि प्रयोगों के सिद्ध्यर्थ 'धेट्, ग्लै, म्लै, दो' धातुघटित 'ए–ऐ–ओ' के स्थान में 'आ' आदेश करने की आवश्यकता होती है। इसका विधान दोनों व्याकरणों में किया गया है। पाणिनि का सूत्र है – ''आदेच उपदेशेऽशिति'' (अ० ६।१।४५)। कातन्त्रीय प्रकृत सूत्र में 'अन्त' शब्द का पाठ किए जाने से मूलतः धातुओं में विद्यमान सन्ध्यक्षर का ग्रहण किया जाता है। इसके फलस्वरूप 'चेता, स्तोता' में सूत्र की प्रवृत्ति नहीं होती, क्योंकि मूलतः यहाँ धातुओं में क्रमशः इकार तथा उकार (चि, स्तु) विद्यमान है, गुणादेश करने पर 'एकार-ओकार' वर्ण निष्पन्न होते हैं।

## [विशेष वचन]

१. अन्तग्रहणं धातुसंज्ञाकाले सन्ध्यक्षरार्थम् (दु० वृ०)।

२. अन्तग्रहणमुपदेशसन्ध्यक्षरान्तत्वप्रतिपत्त्यर्थम् (दु० टी०)।

३. अन्तशब्दोऽवयववचनः, अवयवश्चारम्भकः, स च धातुसंज्ञायामेवेति (दु० टी०)।

४. लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमिति चेत्, तदान्तग्रहणं सुखप्रतिपत्त्यर्थम् (दु० टी०)।

५. अननीति सिद्धेऽविकरणग्रहणं विभक्त्यन्निवृत्त्यर्थम् (दु० टी०)।

६. अनित्या हि परिभाषा भवति (वि० प०)।

७. एतेषां ग्लै-प्रभृतीनामाकारान्तत्वं कृत्वा दिवादिपाठे सिध्यति, यदेतद् वचनम्, तदाकारस्यानित्यत्वं बोधयतीति सम्प्रदायः (बि० टी०)।

## [रूपसिद्धि]

**१. धाता।** धा + तृच् + सि। 'धेट पाने' (१।२६४) धातु से कर्ता अर्थ में ''वुण्तृचौ'' (४।२।४७) सूत्र द्वारा 'तृच्' प्रत्यय, 'च्' अनुबन्ध का अप्रयोग, प्रकृत सूत्र से एकार को आकारादेश, 'धातृ' की लिङ्गसंज्ञा, प्रथमाविभक्ति—एकवचन 'सि' प्रत्यय, ''आ सौ सिलोपश्च'' (२।१। ६४) से ऋकार को आकार तथा 'सि' प्रत्यय का लोप।

**२. ग्लाता।** ग्लै + तृच् + सि। 'ग्लै हर्षक्षये' (१। २५१) धातु से 'तृच्' प्रत्यय, प्रकृत सूत्र से ऐकार को आकार, सि—प्रत्यय, ऋ को आ तथा सि—प्रत्यय का लोप।

**३. म्लाता।** म्लै + तृच् + सि। 'म्लै गात्रविनामे' (१।२५२) धातु से तृच् प्रत्यय, ऐ को आ, सि—प्रत्यय, ऋ को आ तथा सि का लोप।

**४. दाता।** दो + तृच् + सि। 'दो अवखण्डने' (३।२२) धातु से कर्ता अर्थ में तृच् प्रत्यय, ओकार को आकार, लिङ्गसंज्ञा, सि—प्रत्यय, ऋ को आ तथा सि—प्रत्यय का लोप।। ५५९।

## ५६०. न व्ययतेः परोक्षायाम् [३।४।२०]

## [सूत्रार्थ]

परोक्षाविभक्तिसंज्ञक प्रत्यय के परे रहते 'व्येञ्' धातु को आकारादेश नहीं होता है।। ५६०।

## [दु० वृ०]

व्येञो धातोः परोक्षायामाकारो न भवति। संविव्याय, संविव्ययिथ, अगुणे सम्प्रसारणमस्त्येव।। ५६०।

## [दु० टी०]

न व्य०। नन्वगुणे यजादित्वात् संप्रसारणमस्ति, आत्वेऽपि न कश्चिद् दोष इति। न व्ययतेरट्थलोरित्यास्ताम् ? सत्यम्। परोक्षाग्रहणं ज्ञापयति 'सम्प्रसारणविधि-रत्रानित्यः' इति। तेन 'संविव्ययतुः, संविव्ययुः' इत्यपि भवति। तथा च **भट्टौ** — **''अस्त्रैः संविव्ययुर्देहान् वाहनान्यधिशिश्यिरे''** इति। सम्प्रसारणे तु 'संविव्यतुः, संविव्युः, संविव्यिव, संविव्यिम, संविव्ये, संविव्याते, संविव्यिरे।। ५६०।

## [वि० प०]

न व्ययतेः। 'संविव्याय, संविव्ययिथ' इति **''परोक्षायामभ्यासस्योभयेषाम्''** (३।४।४) इत्यभ्यासस्य संप्रसारणं सिद्धम्। वृव्येऽदां नित्यमिट्, थलीडागमः, अगुणे

सम्प्रसारणमस्त्येवेति परोक्षायामगुणे स्वरेण सह संप्रसारणेन भवितव्यम्। न तत्र प्रतिषेधस्य प्रयोजनमस्तीति भावः। यद्येवम्, किमनेन परोक्षाग्रहणेन, अट्थलावन्तरेणान्यो गुणी नास्तीति 'न व्ययतेरट्थलोरित्यास्ताम्? सत्यम्। परोक्षाग्रहणं ज्ञापयति – 'संप्रसारणविधिरनित्यः' इति। तेनागुणेऽप्याकारप्रतिषेधेऽयादेशे च 'संविव्ययतुः संविव्ययुः' इति सिद्धम्। तथा च **भट्टौ – 'वस्त्रैः संविव्ययुर्देहान्'** इति प्रयोगो दृश्यते। संप्रसारणे तु 'संविव्यतुः, संविव्युः' इति स्यादेव।। ५६०।

## [बि० टी०]

न व्यय०। ननु यद्यत्रागुणे संप्रसारणम्, अर्थाद् गुणिन्येव स्यात् तदा परोक्षाग्रहणेन किम्, अट्थलोरित्यास्ताम् ? सत्यम्। अत्र **वररुचिः** – परोक्षाग्रहणं संप्रसारणस्यानित्यत्वार्थम्। तथा च **भट्टिः – ''वस्त्रैः संविव्ययुर्देहान्''** इति प्रयोगः। **टीकायाम**प्येतत् समर्थितम्, अभ्यासस्य तु **''परोक्षायामभ्यासस्योभयेषाम्''** (३।४।४) इत्यस्त्येव।। ५६०।

## [समीक्षा]

'संविव्याय, संविव्ययिथ' आदि शब्दरूपों के सिद्ध्यर्थ 'व्येञ्' धातुघटित एकार के आकारादेश की आवश्यकता नहीं होती है। अतः दोनों व्याकरणों में आकारादेश का निषेध किया गया है। पाणिनि का सूत्र है – ''न व्यो लिटि'' (अ० ६।१।४६)। सूत्र में 'परोक्षा' शब्द के पाठ से सम्प्रसारणविधि को अनित्य माना गया है। अतः अगुण प्रत्ययों के परे रहते सम्प्रसारण होता है।

## [विशेष वचन]

१. अगुणे सम्प्रसारणमस्त्येव (दु० वृ०)।

२. परोक्षाग्रहणं ज्ञापयति–संप्रसारणविधिरत्रानित्य इति। तेन 'संविव्ययतुः, संविव्ययुः' इत्यपि भवति (दु० टी०; वि० प०)।

३. अत्र वररुचिः – परोक्षाग्रहणं संप्रसारणस्यानित्यत्वार्थम् (बि० टी०)।

## [रूपसिद्धि]

**१. संविव्याय।** सम् + व्येञ् + अट्। 'सम्' उपसर्गपूर्वक 'व्येञ् संवरणे' (१।६१२) धातु से परोक्षाविभक्तिसंज्ञक परस्मैपद-प्रथमपुरुष – एकवचन 'अट्' प्रत्यय, ''सन्ध्यक्षरान्तानामाकारोऽविकरणे'' (३।४।१९) से प्राप्त आकारादेश का प्रकृत सूत्र द्वारा निषेध, ''चणपरोक्षाचेक्रीयितसनन्तेषु'' (३।३।७) से द्विर्वचन, ''पूर्वोऽभ्यासः'' (३।३।४) से अभ्याससंज्ञा, ''अभ्यासस्यादिर्व्यञ्जनमवशेष्यम्'' (३।३।९) से व् की रक्षा–य् का लोप, ''ह्रस्वः'' (३।३।१५) से अभ्यासघटित एकार को ह्रस्व, ''अस्योपधाया दीर्घो वृद्धिर्नामिना-

मिनिचट्सु'' (३।६।५) से धातुघटित एकार को वृद्धि-ऐकार तथा ''ऐ आय्'' (१।२।३) से ऐकार को आयादेश।

२. **संविव्ययिथ**। सम् + व्येञ् + परोक्षा—थल्। 'सम्' उपसर्गपूर्वक 'व्येञ्' (१। ६१२) धातु से परोक्षाविभक्ति-मध्यमपुरुष – एकवचन 'थल्' प्रत्यय, ''नित्यात्वतां स्वरान्तानाम्'' से इडागम, द्विर्वचनादि, तथा ''ए अय्'' (१। २। १२) से अयादेश।। ५६०।

## ५६१. मीनातिमिनोतिदीङां गुणवृद्धिस्थाने [३। ४।२१]

### [सूत्रार्थ]

मीञ्, डुमिञ् तथा दीङ् धातु के अन्त में आकारादेश होता है, गुण—वृद्धि के प्रसङ्ग में।। ५६१।

### [दु० वृ०]

एषां गुणवृद्ध्योः प्रसङ्गे आकारो भवति। मीञ्—प्रमाता, प्रमापयति। डुमिञ् – निमाता, निमापयति। दीङ् – उपदाता, उपदापयति। उपदायो वर्तते। **''इङाभ्यां च''** (४।५।६) इति घञ् स्यात्। गुणवृद्धिस्थाने इति किम् ? प्रमीयते। वर्णान्तस्य विधित्वाद्-भ्यासस्य न स्यात् – प्रमेमीयते।। ५६१।

### [दु० टी०]

मीना०। स्थानशब्दोऽयं प्रसङ्गवचनो विषयसप्तमी चेत्याह-उपदाय इत्यादि। एवम् ईषदुपादानमिति **''आद्भ्यो ग्वदरिद्राते:''** (४।५।१०४) इति युर्भवति। मीनाति-मिनोत्योरच् – खल् – अल्प्रत्ययेषु प्रतिषेध इति। अचि निमीनातीति – **निमय:**। खलि – ईषन्मय:। अलि—प्रमयो वर्तते। एवं प्रमिणोतीति **प्रमय:**, ईषत्प्रमय:, प्रमयो वर्तते इति। न च वक्तव्यम् – **'अभिधानलक्षणा हि कृत:'** इति। तिप्—निर्देशाद् **'मीङ् हिंसायाम्'** (३।८५) इत्यस्य दैवादिकस्य न भवति—मेता, मेतुम्। मोङ्—मिञ्—दीङामित्युक्तेऽपि **पाठगौरवं** स्यात्। गुणवृद्ध्योरिति कृते षष्ठ्यपि सम्भाव्येत। एदैत्स्थाने इत्युक्तेऽपि गुणवृद्धिग्रहणं **सुखप्रतिपत्त्यर्थम्**। गुणवृद्धी तिष्ठतो यस्मिन् प्रत्यये स **गुणवृद्धिस्थान** इति, तस्मिन् विषये वा गुणवृद्धिस्थाने इति।। ५६१।

### [वि० प०]

मीनाति०। स्थानशब्द इह प्रसङ्गवचन इत्याह-गुणवृद्ध्योः प्रसङ्गे इति। प्रमातेति गुणप्रसङ्गे, प्रमापयतीति वृद्धिप्रसङ्गे चोदाहरणम्। अत्राकारे कृते **''अर्तिह्री०''** (३।६।२२) इत्यादिना पकारागमः इन्प्रत्यये भवति। एवमन्यत्रापि। पूर्ववदिहापि **विषयसप्तमीयम्**। तेनाकारान्तलक्षणो घञ्प्रत्ययो न विरुध्यते इत्याह—उपदायो वर्तते इतीङ्वद्भावाद् **''आयिरिच्यादन्तानाम्''** (३।६।२०) इत्यायिरादेश इति।। ५६१।

## [बि० टी०]

मीनाति०। गुणवृद्धिस्थाने इति किमिति **वृत्तिः**। ननु 'प्रमीयते' इत्यत्रात्वेऽपि दामादित्वादित्त्वेन भवितव्यम्। कथं व्यावृत्तिरिति चेत्, स्वरादावगुणे क्रियमाणमेतदपि व्यावर्तयति।। ५६१।

## [समीक्षा]

'प्रमाता, प्रमापयति, निमापयति, उपदाता' आदि शब्दरूपों के सिद्ध्यर्थ 'मी–मि–दी' धातुघटित ईकार–इकार के स्थान में आकारादेश की अपेक्षा होती है। इसकी पूर्ति दोनों ही व्याकरणों में की गई है। पाणिनि का सूत्र है – ''मीनातिमिनोतिदीङां ल्यपि च'' (अ० ६। १। ५०)। तदनुसार ल्यप् प्रत्यय में भी आकारादेश होने से 'प्रमाय, निमाय, उपदाय' शब्दरूप भी सिद्ध होते हैं। पाणिनीय व्याकरण में 'एच्' प्रत्याहार में पठित 'ए' की गुणसंज्ञा तथा 'ऐ' की वृद्धिसंज्ञा होती है। फलतः आकारादेश की प्रवृत्ति गुण–वृद्धि के प्रसङ्ग में माननी पड़ती है। कातन्त्रकार ने सूत्र में ही 'गुणवृद्धिस्थाने' शब्द का पाठ करके लाघव उपस्थापित किया है।

## [विशेष वचन]

१. वर्णान्तस्य विधित्वादभ्यासस्य न स्यात्–प्रमेमीयते (दु० वृ०)।

२. 'एदैत्स्थाने' इत्युक्तेऽपि गुणवृद्धिग्रहणं सुखप्रतिपत्त्यर्थम् (दु० टी०)।

३. पूर्ववदिहापि विषयसप्तमीयम्, तेनाकारान्तलक्षणो घञ्प्रत्ययो न विरुध्यते (वि० प०)।

## [रूपसिद्धि]

**१. प्रमाता।** प्र + मी +श्वस्तनी–ता। 'प्र' उपसर्गपूर्वक 'मीञ् हिंसायाम्' (८।७) धातु से श्वस्तनीसंज्ञक प्रथमपुरुष – एकवचन 'ता' प्रत्यय, ''इवर्णादश्विश्रिडीङ्शीङः'' (३। ७। १४) से अनिट् तथा ''नाम्यन्तयोर्धातुविकरणयोर्गुणः'' (३। ५। १) से गुणादेश प्राप्त होने पर प्रकृत सूत्र से ईकार को आकार।

**२. प्रमापयति।** प्र + मी + इन् + अन् + ति। प्रमीणन्तं प्रयुङ्क्ते। 'प्र' उपसर्गपूर्वक 'मीञ् हिंसायाम्' (८।७) धातु से, ''धातोश्च हेतौ'' (३। २। १०) सूत्र द्वारा 'इन्' प्रत्यय, ''अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिचट्सु'' (३। ६। ५) से वृद्धि प्राप्त होने पर प्रकृत सूत्र से ईकार को आकार, ''अर्तिह्वीब्लीरीक्नूयीक्ष्माय्यादन्तानामन्तः पो यलोपे गुणश्च नामिनाम्'' (३। ६। २२) से 'प्' आगम, ''ते धातवः'' (३। २। १६) से 'प्रमापि' की धातुसंज्ञा, वर्तमानासंज्ञक परस्मैपद- प्रथमपुरुष–एकवचन 'ति' प्रत्यय, ''अन् विकरणः कर्तरि'' (३।२।१६) से 'अन्' विकरण, इन्प्रत्ययघटित इकार को गुणादेश तथा एकार को अयादेश।

**३. निमाता।** नि + मि + श्वस्तनी–ता। 'नि' उपसर्गपूर्वक 'डु मिञ् प्रक्षेपणे'

(४।४) धातु से श्वस्तनीसंज्ञक प्रथमपुरुष–एकवचन 'ता' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**४. निमापयति।** नि + मि + प् + इन् + अन् + ति। 'नि' उपसर्गपूर्वक 'मि' धातु से इन् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**५. उपदाता।** उप + दीङ् + श्वस्तनी–ता। 'उप' उपसर्गपूर्वक 'दीङ् क्षये' (३।८३) धातु से श्वस्तनीविभक्तिसंज्ञक प्रथमपुरुष–एकवचन 'ता' प्रत्यय, ''नाम्यन्तयो-र्धातुविकरणयोर्गुणः'' (३।५।१) से प्राप्त गुणादेश को बाधकर प्रकृत सूत्र द्वारा ईकार को आकार।

**६. उपदापयति।** उप + दी + इन् + अन् + ति। 'उप' उपसर्गपूर्वक 'दीङ्' धातु से इन् प्रत्यय, वृद्धि को बाधकर ईकार को आकार, पकारागम, 'उपदापि' की धातु-संज्ञा, ति–प्रत्यय, अन्–विकरण, इकार को गुणादेश तथा एकार को अय्।

**७. उपदायो वर्तते।** उप + दीङ् + घञ् + सि। 'उप' उपसर्गपूर्वक 'दीङ्' धातु से घञ् प्रत्यय (इङाभ्यां च–४।५।६), प्रकृत सूत्र से ईकार को आकार, ''सिद्धिरिञ्वद्ञ्णानुबन्धे'' (४।१।१) से इञ्वद्भाव, ''आयिरिच्यादन्तानाम्'' (३।६।२०) से आकार को 'आय्' 'उपदाय' की लिङ्गसंज्ञा, सि–प्रत्यय तथा सकार को विसर्गादेश।। ५६१।

## ५६२. सनि दीङः [३।४।२२]

### [सूत्रार्थ]

'सन्' प्रत्यय के परे रहते 'दीङ्' धातु के अन्त में आकारादेश होता है।। ५६२।

### [दु० वृ०]

दीङः सन्याकारो भवति। उपदिदासते। ''**नाम्यन्तानामनिटाम्**'' (३।५।१७) इत्यगुणत्वाद् वचनम्।। ५६२।

### [दु० टी०]

सनि०। ''**नाम्यन्तानामनिटाम्**'' (३।५।१७) इति सनि गुणो नास्तीति वचनम्। **केचिद्** दीङः सन्यात्त्वं नेच्छन्ति 'दिदीषते' इति भवितव्यम्, तदसत्, **न्यास**सम्मतमेतत्। तथा च **पदकारो**ऽप्याह – दीङः सन्यात्त्वं वक्तव्यम्, अत्र लालायितः फणीति ? दीङश्च अतः सनीति योगविभागे दीङ्ग्रहणं न कर्तव्यं भवति, किन्तु **वाक्यभेदे प्रतिपत्तिगौरवं** स्यात्।। ५६२।

### [बि० टी०]

सनि०। ननु किमर्थमिदं **'मीनातिमिनोत्योर्गुणवृद्धिस्थाने दीङः सनि'** इति कृतेऽप्यभिमतं सिध्यति किं पृथग्वचनेन ? सत्यम्, **वैचित्र्यार्थम्**। ''**नाम्यन्तानामनिटाम्**'' (३।५।१७) इत्यगुणत्वाद् वचनमिति **वृत्तिः**। ननु **कथमिदं** संगच्छते, यावता 'उपदायो वर्तते' इति सिद्ध्यर्थं **वृत्तिकृद्** विषयसप्तमीम् उक्तवान्। न ह्यन्यथैव सिध्यति ततश्च विषयत्वादेवात्वं स्यादिति। कुतो नाम्यन्तानामित्यस्यावसरः ? सत्यम्। पूर्वेण गुण-

वृद्ध्योः प्रसङ्गे आकारः क्रियते, तत्प्रसङ्गश्च प्रत्ययोत्पत्तेः पश्चादेव, यतो विधौ निमित्तसप्तमी ततश्च गुणवृद्ध्योरिति कृतेऽप्येतदुपपद्यते, तस्मात् स्थानग्रहणं बोधयति, यत् प्रत्ययोत्पत्तौ गुणस्यावश्यम्भावः, तस्मिन्नेव विषयिणि आत्वं स्यात्। अत्र प्रत्ययोत्पत्तौ अगुणत्वाद् गुणो नावश्यम्भावी। नाम्यन्तानामनिटामित्यनेनागुणत्वादित्याह—नाम्यन्तानामनिटामित्यादि।। ५६२।

## [समीक्षा]

'उपदिदासते' इत्यादि शब्दरूपों के सिद्ध्यर्थ 'दी' धातुघटित ईकार को आकारादेश की आवश्यकता होती है। इसे कातन्त्रकार ने स्वतन्त्र सूत्र बनाकर तथा पाणिनि ने ''मीनातिमिनोतिदीङां ल्यपि च'' (अ० ६।१।५०) में चकार से एच्=गुणवृद्धि की अनुवृत्ति करके पूर्ण किया है। कुछ आचार्य आकारादेश नहीं मानते हैं, अतः उनके अनुसार 'दिदीषते' रूप ही साधु माना जाता है। संभवतः इसी कारण पाणिनीय व्याकरण में स्वतन्त्ररूप से इसका विधान नहीं किया गया है। आकारादेश के विधान से पदकार—भाष्यकार—न्यासकार सहमत प्रतीत होते हैं। टीकाकार का वचन प्रमाण के रूप में प्रस्तुत है — **''केचिद् दीङः सन्यात्त्वं नेच्छन्ति 'दिदीषते' इति भवितव्यम्, तदसत्, न्याससम्मतमेतत्। तथा च पदकारोऽप्याह — दीङः सन्यात्त्वं वक्तव्यम्, अत्र लालायितः फणीति''** (कात० वृ० टी०)।

पूर्ववर्ती सूत्र से प्रकृत सूत्र को पृथक् पढ़े जाने पर टीकाकार ने सहमति व्यक्त की है, परन्तु आचार्य बिल्वेश्वर इसे वैचित्र्यार्थ मानते हैं — ''मीनातिमिनोत्योर्गुणवृद्धिस्थाने दीङः सनि च'' इति कृतेऽप्यभिमतं सिध्यति किं पृथग् वचनेन ? सत्यम्, वैचित्र्यार्थम्'' (बि० टी०)।

## [रूपसिद्धि]

**१. उपदिदासते।** उप + दीङ् + सन् + ते। उपदातुमिच्छति। 'उप' उपसर्गपूर्वक 'दीङ् क्षये' (३।८३) धातु से ''धातोर्वा तुमन्तादिच्छतिनैककर्तृकात्'' (३।२।४) सूत्र द्वारा 'सन्' प्रत्यय, ''इवर्णादश्विश्रिडीङ्शीङः'' (३। ७। १४) से अनिट्, ''नाम्यन्तानामनिटाम्'' (३।५। १७) से गुणनिषेध, प्रकृत सूत्र से ईकार को आकार, ''चण्परोक्षाचेक्रीयितसनन्तेषु'' (३।३।७) से 'दा' को द्वित्व, ''पूर्वोऽभ्यासः'' (३।३।४) से पूर्ववर्ती 'दा' की अभ्याससंज्ञा, ''ह्रस्वः'' (३। ३। १५) से अभ्याससंज्ञक दा—घटित आकार को ह्रस्व, ''सन्यवर्णस्य'' (३।३।२५) से अकार को इकार, ''ते धातवः'' (३।२। १६) से 'उपदिदास' की धातुसंज्ञा, वर्तमानाविभक्तिसंज्ञक आत्मनेपद-प्रथमपुरुष— एकवचन 'ते' प्रत्यय तथा अन् विकरण।। ५६२।

## ५६३. स्मिजिक्रीङामिनि [३।४।२३]

## [सूत्रार्थ]

'इन्' प्रत्यय के परे रहते 'स्मि—जि—क्री—इङ्' धातुओं में अन्तिम वर्ण के स्थान में आकारादेश होता है।। ५६३।

## [दु० वृ०]

एषां धातूनामिति परे आकारो भवति। विस्मापयते, जापयति, क्रापयति, अध्यापयति। हेतुकर्तृभये स्मिङोऽभिधानात्—कुञ्चिकयैनं विस्माययति। करणाद् भये न स्यात्। भातिरिनन्तो हेतुभयेऽपि वर्तते – मुण्डो भापयते। भीषिचिन्तीति वचनाद् भियः षान्तता। मुण्डो भीषयते। विस्फुरणं विस्फारस्तं करोतीतीन् – विस्फारयति, विस्फोरयति। हेतुकर्तृविवक्षायामिन्। चप सान्त्वने चयनेऽपि वृनिः– चापयति। चिञस्तु—चाययति। डु वप प्रजनेऽपि—पुरोवातो गाः प्रवापयति। वी प्रजने—प्रवाययति गर्भं ग्राहयतीत्यर्थः। तपः साधयति, धर्मं साधयतीति। पारलौकिकेऽपि साधिना भवितव्यमेव। षिधु गत्यामित्यनेन च – अन्नं सेधयति, ग्रामं सेधयति इति भवितव्यमेव। सिध्यतिनापि – तपस्तापसं सेधयति। कस्त्वामुल्लापयते। श्येनो वर्त्तिकामुल्लापयते। लातेरेवायं प्रयोगः। विसंवादाभिभवयोर्लियः कारिते प्रयोगो नास्ति, **अनभिधानात्।** रुचादिरयम्। विलाता, विलेता, विलास्यते, विलेष्यते, विलाय, विलीय। लातेर्लियश्च प्रयोगः, **अनेकार्थत्वाद् धातूनाम्**।। ५६३।

## [दु० टी०]

स्मिजि०। **'स्मिङ् ईषद्धसने, जि जये, डुक्रीञ् द्रव्यविनिमये, इङ् अध्ययने'** (१।४५७, १९१; ८।१; २।५६) । हेतुकर्त्रित्यादि। प्रयोजकाद् भये (विस्मये) वर्तमानस्य स्मयतेरात्वम्। मुण्डो विस्मापयते। जटिलो विस्मापयते। **'अभिधानलक्षणा हि कृत्तद्धितसमासाः'** इति बाहुल्याद् उच्यते। अन्येऽप्यभिधानादिति भावः। हेतुकर्तृभीस्म्योरिन्निति रुचादिरिति करणाद् भये परस्मैपदम्। **''भियो हेतुभये''** इत्यात्वं वा वक्तव्यम्। ईकारान्तस्य भियः षान्तता चेति न वक्तव्यमित्याह – भातिरित्यादि। रुचादित्वादात्मनेपदम्। दीप्तौ तु 'भापयति' इति भवितव्यम्, प्रकाशयतीत्यर्थः। षकारान्तता कथमित्याह—भीषिचिन्तिपूजिकथिकुम्बिचर्चिस्पृहितोलिदोलिभ्यश्चेति भावः। अथवा एवं भीषिर्हेतुभये **स्वभावात् प्रकृत्यन्तरमस्ति।** बिभेतेश्च हेतुभये प्रयोगो नाभिधीयते, तदा भीषिस्म्योरिति रुचादौ पाठः कर्तव्यः।

**सूत्रकारस्य** मतमिनन्तस्य स्मयतेरवश्यं हेतुना सम्बन्धः। तत्र यद् भयं स धातोरर्थः क्रिया, अवश्यं सा हेतोः कारकस्य साध्या भवति, तत्रानेन 'हेतुभये' इति हेतुना विशेषणेन न किञ्चिदपि निवर्तते। तत्रैतत् स्याद् अविवक्षितो यदा हेतुस्तदा तद् भयं हेतोर्न भवति, तस्यानेन निवृत्तिरिति नैतच्छक्यम्, इनन्तश्च धातुर्हेतोरविवक्षेति विप्रतिषेधः स्यात् तस्मात् 'कुञ्चिकयैनं विस्मापयति' इत्यात्वेन भवितव्यमेव। अथैवं मन्यते 'बिभेत्यस्मादिति **भयम्**'। अपादान—'साधनम्' हेतुरेव भयमिति कर्मधारयः पूर्ववद् विशेष्यस्याप्यभिधानान्न भावसाधने षष्ठीसमास इति, तथाप्यभिधानमाश्रयितव्यम्, किमेतेन हेतुभयग्रहणेनेति भावः। स्फुरतिचिनोत्योरात्वं वा सन्ध्यक्षरस्येति न वक्तव्यमित्याह –

विस्फुरणमित्यादि। **''स्फुरिस्फुल्योर्घञ्ज्योतः''** (४।१।७४) इत्यात्वे नामकारितान्ताच्च हेतुविवक्षायामिना सिद्धमिति भावः।

इनि कृतं स्थानिवदिति 'पुस्फारयिषति, अपुस्फुरत्' इति वर्णविकारः, तत आत्वं वा घञन्तस्य 'पिस्फारयिषति, अपस्फारत्' इति रूपं केन निवार्यते। **''वेतेः प्रजने वा''** इति न वक्तव्यम्, प्रजनो गर्भग्रहणं जन्मन उपक्रमो वेति, तस्मिन् वर्तमानस्येत्याह— डुवपिरित्यादि। वातिर्वा, **अनेकार्थत्वाद् धातूनामिति। ''सिध्यतेरपारलौकिके''** (अ० ६।१।४९), तत्राप्यज्ञानार्थस्येति वक्तव्यम्। परलोके प्रयोजनमस्य **पारलौकिकम्,** न चेत् सिध्यतिरदृष्टफले वर्तते इत्यर्थः। 'अन्नं साधयति, पाकं साधयति। काम्पिल्ले साधयति, राजनि साधयति' इत्याख्यातिपूर्विकायां सम्पदि वर्तते। अपारलौकिक इति किम्? तपस्तापसः सेधयति ज्ञानमस्योत्पद्यते प्रत्यक्षीभवतीति, तं सिध्यन्तं तपः प्रयोजयति ज्ञानमस्य प्रकाशयति, उत्थापयति विमलीकरोतीत्यर्थः। अन्नं साधयति ब्राह्मणेभ्यो दास्यामीति सत्यपि पारलौकिके भवति सर्वत्रैव पारलौकिकस्य वाक्यविषयत्वात् सिध्यतेरात्वं सेधयतीति प्रयोगनिवृत्त्यर्थं साधेः प्रतिबन्धाभावादस्ति प्रयोगः, यत्ना निर्देशाद् भौवादिकस्यापि अपारलौकिके नास्त्यात्वमित्यनर्थकं वचनमित्याह—तप इत्यादि। विसंवादाभिभवयोर्लियः **केचिद्** आत्वमिच्छन्ति, **केचित्** पूजाविसंवादाभिभवेषु, तदनर्थकमित्याह— कस्त्वामित्यादि।

**भाष्यकारास्तु** लीयतेरात्मनेपदमिच्छन्ति, तदा लिनातेरात्वं नास्तीति विलाययतीति भवितव्यमेवेति विशेषाभावः। विसंवादाभिभवयोरित्युपलक्षणं पूजायामपि वेदितव्यम्। लियो गुणवृद्धिस्थाने यदि चात्वं वेति न वाच्यमित्याह— विलातेत्यादि। अपाद् गुरेर्वा णमीत्यपि न वक्तव्यम्। **'गुरी उद्यमे'** (५।१०८), **''णम् चाभीक्ष्ण्ये द्विश्च पदम्''** (४।६।५) 'अपगारम् अपगारम्। अपगोरम्, अपगोरम्' इति। गृधातुरिह उद्यमेऽपि वर्तते इति।। ५६३।

## [वि० प०]

स्मिजि० । एषामाकारे कृते पूर्ववत् पकारागमः। 'विस्मापयते' इति। हेतुकर्तृभीस्म्योरिन्निति रुचादित्वादात्मनेपदम्। ''बिभेतेर्हेतुभये वा'' इति वक्तव्यम्। **अस्यार्थः** — हेतुकर्तृभये वर्तमानस्य **'ञि भी भये'** (२।६८) इत्यस्यात्वं वा भवति। तथा **''भियो हेतुभये षुक्''** (अ० ७।३।४०) इत्यपि वक्तव्यम्। ईकारान्तपक्षे सकारागमार्थमिति। तदयुक्तम्, ष्ठात्वन्तरेणैव सिद्धत्वाद् इत्याह— भातिस्तित्यादि। हेतुभयेऽपीति न केवलं दीप्तावित्यपि शब्दार्थः। हेतुभये रुचादित्वाभ्युपगमादात्मनेपदम्। दीप्तौ तु परस्मैपदमेव— भापयति। प्रकाशयतीत्यर्थः। भियः षान्तताऽपि ज्ञापकात् सिद्धेत्याह— भीषिचिन्तीत्यादि। **''भीषिचिन्तिपूजिकथिकुम्बिचर्चिस्पृहितोलिदोलिभ्यश्च''** (४।५।८३) इति वचनादित्यर्थः। न हि भीषिरूपो धातुरस्ति य एवम् इका निर्दिश्यते, अत्रापि **''हेतुकर्तृभीस्म्योरिन्''** (३।२।४२—६२) इति रुचादिवचनादात्मनेपदम्।

विस्फुरणमित्यादि। ''स्फुरिस्फुल्योर्घञ्ज्योतः'' (४।१।७४) इत्यात्वम्। **''इन्कारितं धात्वर्थे''** (३।२।९) इतीनि कृतेऽपि पुनर्हेतुविवक्षायामिन्। पक्षे 'विस्फोरयति'

इत्यस्त्येव। तथा चिनोतेरपि विकल्पो न वक्तव्यः, रूपद्वयस्य न्यायसिद्धत्वादित्याह– चप सान्त्वने इत्यादि। तेन ''चिस्फुरोर्णौ वा'' इति न वक्तव्यं भवति। चिनोतेः स्फुरतेश्च णौ कारिते वा आत्वमित्यर्थः। कथं तर्हि 'पुस्फारयिषति, अपुस्फुरत्' इति इनि कृतस्य स्थानिवद्भावाद् उकारवतो द्विर्वचने सत्येतदुपपद्यते, नान्यथा, सत्यम्, इह वर्णविकारः परस्यौकारस्यात्वं द्रष्टव्यम्। पक्षे 'पुस्फोरयिषति, अपुस्फुरत्' इति स्यादेवेति। घञन्तस्य तु 'पिस्फारयिषति, अपस्फारत्' इति भवितव्यमेव। तथा वेतेः प्रजने वेति न वक्तव्यम्। प्रकृत्यन्तरेणैव सिद्धत्वादित्याह– डु वपिरित्यादि। प्रजनं गर्भग्रहणम् 'सिध्यतेरपारलौकिके' इति न वक्तव्यम्।

**अस्यार्थः– 'सिधु संराद्धौ'** (३।३३) इत्यस्य दैवादिकस्य कारिते आत्वं भवति। परलोके प्रयोजनमस्येति **पारलौकिकम्**। ततोऽन्यस्मिन्निति। तद् यथा 'अन्नं साधयति, ग्रामं साधयति'। अन्नादिकमिह **लोके** तृप्त्यादिप्रयोजनत्वाद् इहलौकिकं भवति, न पारलौकिकमिति। अपारलौकिक इति किम्? तपस्तापसः सेधयति। अत्र सिध्यतिर्ज्ञानविशेषे वर्तते। तापसः सिध्यति। ज्ञानविशेषमासादयति। तं सिध्यन्तं तपः प्रयुङ्क्ते सेधयति, स च ज्ञानविशेष उत्पन्नः। **परलोके जन्मान्तरे फलमभ्युदयलक्षणं** प्रयच्छन् परलोकप्रयोजनत्वात् पारलौकिको भवतीति प्रत्युदाहियते। अथ अन्नं साधयति, ब्राह्मणेभ्यो दास्यामीति कथमाकारः। स हि विशिष्टेनाभिसम्बन्धिना अन्नं साधयन् जन्मान्तरे फलं प्राप्नोतीति, पारलौकिके सिध्यतीति वर्तते। नैतदेवम्, सिध्यतेरत्रार्थो निष्पत्तिरिति। न चासौ परलोकप्रयोजना। किन्तर्हि अर्थनप्रयोजना अन्ननिष्पत्तिरिति। अन्नस्य च यज्ज्ञानं तत्परलोकप्रयोजनत्वात् पारलौकिकमिति। अन्नं साधयतीति साधिनैव सिद्धे सिध्यतेः सेधयतीति प्रयोगनिवृत्त्यर्थं वचनम्। तदेतन्न वक्तव्यम्, व्यावृत्तेरभावादित्याह–तप इत्यादि भवितव्यमेवेति प्रतिबन्धकस्याभावादित्यर्थः। यत् पुनरपारलौकिकग्रहणम्, तत् पुनः सिध्यतेः सेधयतीति प्रयोगनिवृत्तौ चरितार्थं कथं पारलौकिके साधेः प्रयोगं प्रतिबध्नीयात्।

यद्यपि सेधयतीति प्रयोगनिवृत्त्यर्थं वचनमुक्तम्, तदप्यसङ्गतमित्याह-षिधु गत्याम् इत्यनेन चेति। सिध्यतेरिति यना निर्देशाद् दैवादिकस्य नाम, नैष प्रयोगो भौवादिकस्य तु को निषेद्धुं शक्यते। न च अत एव वचनादिति युज्यते वक्तुम्। इह दैवादिकस्य ग्रहणं भौवादिकस्य प्रतिषेद्धुमशक्यत्वात्। अन्यथा सामान्येनैवात्वमुक्तं स्यात्, ततो यना निर्देशाद् भौवादिकस्य निवृत्तिः। यदाह **जयादित्यः** – सिध्यतेरिति यना निर्देशः, षिधु गत्यामित्यस्य भौवादिकस्य निवृत्त्यर्थ इति। सिध्यतिनापीति। अत्रात्वविधानस्याभावात् पारलौकिके भवत्येवेति भावः। विसंवादाभिभवयोर्लिंयः कारिते **कश्चिद्** आत्वमाह, तदिह न वक्तव्यम्, प्रकृत्यन्तरेणैव सिद्धत्वादिति दर्शयन्नाह – कस्त्वामित्यादि। तर्हि यदा लीधातु-रनयोरर्थयोरनुवर्तते, तदा आत्वस्याभावात् कारितेऽनिष्टरूपमापद्यते इत्याह– विसंवादेत्यादि। रुचादिरयमिति। ''**प्रलम्भने गृधिवञ्च्योः**'' (३।२।४२–६३) इत्यनुवर्तमाने ''**पूजाभि-भवयोश्च लातेः**'' (३।२।४२–६४) इति वचनादात्मनेपदमित्यर्थः। तथा गुणवृद्धिस्थाने यपि च लीधातोरात्वं वेति न वक्तव्यम्। रूपद्वयस्य धातुद्वयेन सिद्धत्वादित्याह–

लातेरित्यादि। लियश्चेति **'लीङ् श्लेषणे'** (३।८७) इति दैवादिकस्य **'ली श्लेषणे'** (८।२६) इति क्रैयादिकस्य चेत्यर्थः कथं 'विलास्यते' इति आत्मनेपदम्, लाधातोः परस्मैपदित्वात्? सत्यम्। गुणवृद्धिस्थाने लातेरुभयपदं चेष्यते, **यजादेराकृतिगणत्वात्।**

ननु भातिरिनन्तो हेतुभयेऽपि वर्तते इत्यादि यदुक्तं तत् कथम्? यावता धातवो गणे नियतार्था उक्ता इत्याह– अनेकार्थत्वाद् धातूनाम् इति। अनेकार्थत्वं च **''मृषः क्षमायाम्''** (४।१।१६) इति क्षमाग्रहणेन ज्ञापयिष्यते। तथा चोक्तम् –

**निपाताश्चोपसर्गाश्च धातवश्चेति ते त्रयः।**
**अनेकार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शनम्।। इति।**

तेषां निपातादीनामर्थस्य गणे पाठो **निदर्शनम् उदाहरणमात्रमित्यर्थः**।। ५६३।

## [बि० टी०]

स्मिजि०। गुणे कथमोकारवतो द्विर्वचनं गुणस्यापि इनि कृतत्वात्। नैवम्, तदा अवर्णो नास्ति, अवर्णे परे स्थानिवद्भावात्। नापीनि कृतो गुणः सामान्यप्रत्ययाश्रयणात्। परस्य तु गुणबाधको नाकारः, सन्ध्यक्षरकार्यिणः प्रस्तावात्। परस्यौकारस्येति न कथं द्विर्वचनात् परो ह्रस्वस्वरविधिः स्वर इत्यादि वचनं बाधते ह्रस्वस्यापरचिन्तया प्रयोजनाभावात्, तदा स्वरविधिः स्वर इत्यादि वचनं प्रवर्तते, यदा पूर्ववद् द्विर्वचनं तदा लिखितम्, न तु ह्रस्वत्वमन्तरङ्गत्वं चिन्त्यते, प्रयोजनाभावात्। अन्नं सेधयतीति **मतान्तरेऽपि** गमयतीत्यर्थः।। ५६३।

## [समीक्षा]

'विस्मापयते, जापयति, क्रापयति, अध्यापयति' आदि शब्दरूपों के सिद्ध्यर्थ इन् प्रत्यय (णिच्) परे रहते धातु के अन्त में विद्यमान वर्ण को आकारादेश की आवश्यकता होती है। उस आकारादेश का विधान दोनों ही व्याकरणों मे किया गया है। एतद्विषयक पाणिनि के दो सूत्र हैं – ''क्रीङ्जीनां णौ, नित्यं स्मयतेः'' (अ० ६। १। ४८, ५७)। कातन्त्रकार ने 'स्मि' धातु को भी एकत्र कर दिया है, अतः उन्हें एक ही सूत्र बनाना पड़ा है। सूत्रभेद करने के कारण पाणिनीय व्याकरण में गौरव ही कहा जाएगा।

## [विशेष वचन]

१. हेतुकर्तृभये स्मिडोऽभिधानात् कुञ्चिकयैनं विस्माययति। करणाद् भये न स्यात् (दु० वृ०)।

२. विसंवादाभिभवयोर्लियः कारिते प्रयोगो नास्ति, अनभिधानात् (दु० वृ०)।

३. अनेकार्थत्वाद् धातूनाम् इति (दु० वृ०)।

४. अभिधानलक्षणा हि कृत्तद्धितसमासा इति बाहुल्यादुच्यते। अन्येऽप्यभिधानादिति भावः (दु० टी०) ।

५. भीषिर्हेतुभये स्वभावात् प्रकृत्यन्तरमस्ति। बिभेतेश्च हेतुभये प्रयोगो नाभिधीयते (दु० टी०)।

६. सूत्रकारस्य मतम् इनन्तस्य स्मयतेरवश्यं हेतुना सम्बन्धः (दु० टी०)।

७. तथाप्यभिधानमाश्रयितव्यम्, किमेतेन हेतुभयग्रहणेनेति भावः (दु० टी०)।

८. विसंवादाभिभवयोर्लियः केचिदात्वमिच्छन्ति, केचित् पूजाविसंवादाभिभवेषु (दु० टी०; वि० प०)।

९. भाष्यकारास्तु लीयतेरात्मनेपदमिच्छन्ति, तदा लिनातेरात्वं नास्ति (दु० टी०)।

१०. परलोके जन्मान्तरे फलमभ्युदयलक्षणम् प्रयच्छन् (वि० प०)।

११. अनेकार्थत्वाद् धातूनाम् — — — — — — —, तथा चोक्तम् —

**निपाताश्चोपसर्गाश्च धातवश्चेति ते त्रयः।**
**अनेकार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शनम्।। इति (वि० प०)।**

## [रूपसिद्धि]

**१. विस्मापयते।** वि + स्मि + प्—आगम + इन् + अन् + ते। विस्मयमानं प्रयुङ्क्ते 'वि' उपसर्ग-पूर्वक 'ष्मिङ् ईषद्धसने' (१। ४५७) धातु से "धातोश्च हेतौ" (३। २। १०) सूत्र द्वारा इन् प्रत्यय, प्रकृत सूत्र से धातुघटित इकार को आकार "अर्तिह्वीब्लीरीक्नूयी-क्ष्माय्यादन्तानामन्तः पो यलोपो गुणश्च नामिनाम्" (३। ६। २२) से प् का आगम, "ते धातवः" (३। २।१६) से 'विस्मापि' की धातुसंज्ञा, वर्तमानासंज्ञक आत्मनेपद-प्रथमपुरुष — एकवचन 'ते' प्रत्यय, "अन् विकरणः कर्तरि" (३। २। ३२) से अन् विकरण, "अनि च विकरणे" (३। ५। ३) से इकार को गुण-एकार, तथा "ए अय्" (१। २। १२) से एकार को अयादेश।

**२. जापयति।** जि + प् + इन् + अन् + ति। जयन्तं प्रयुङ्क्ते। 'जि जये' (१। १९१) धातु से इन् प्रत्यय, प्रकृत सूत्र से आकारादेश; प् आगम, 'जापि' की धातुसंज्ञा, 'ति' प्रत्यय, अन् विकरण, गुण तथा अयादेश।

**३. क्रापयति।** क्री + प् + इन् + अन् + ति। क्रीणन्तं प्रयुङ्क्ते। 'डु क्रीञ् द्रव्यविनिमये' (८। १) धातु से इन् प्रत्यय, ईकार को आकार, प् आगम, 'क्रापि' की धातुसंज्ञा, ति—प्रत्यय, अन् विकरण, गुण तथा अयादेश।

**४. अध्यापयति।** अधि + इङ् + प्—आगम + इन् + अन् + ति। अधीयानं प्रयुङ्क्ते। 'अधि' उपसर्गपूर्वक 'इङ् अध्ययने' (२। ५६) धातु से इन् प्रत्यय, इकार को आकार, प्—आगम, 'अध्यापि' की धातुसंज्ञा, ति—प्रत्यय, अन् विकरण, गुण तथा अयादेश।। ५६३।

## ५६४. सृजिदृशोरागमोऽकारः स्वरात् परो धुटि गुणवृद्धिस्थाने [३। ४। २४]

## [सूत्रार्थ]

गुण तथा वृद्धि के प्रसङ्ग में 'सृज्' एवं 'दृश्' धातु-घटित स्वर वर्ण के बाद अकारागम होता है, धुडादि प्रत्यय के परे रहने।। ५६४।

## [दु० वृ०]

सृजिदृशोः स्वरात् परो धुडादौ प्रत्यये गुणवृद्ध्योः प्रसङ्गेऽकारागमो भवति। सृज–स्रष्टा, अस्राक्षीत्। दृश–द्रष्टा, अद्राक्षीत्। धुटीति किम् ? ससर्ज, ददर्श। गुणवृद्धिस्थान इति किम् ? सृक्षीष्ट, दृक्षीष्ट। **योगविभागात्** स्पृशादीनां वा। स्पृश-स्प्रष्टा, अस्प्राक्षीत्। मृश – म्रष्टा, अम्राक्षीत्। कृष – क्रष्टा, अक्राक्षीत्। तृप – त्रप्ता, अत्राप्सीत्। दृप – द्रप्ता, अद्राप्सीत्। पक्षे – स्पर्ष्टा, अस्पार्क्षीत् इत्यादि।। ५६४।

## [दु० टी०]

सृजि०। **'स्पृश संस्पर्शे, मृश आमर्षणे, कृष विलेखने, तृप प्रीणने, दृप हर्षणमोचनयोः, गम्लृ सृप्लृ गतौ'** (५। ५४, ५८, ६; ३। ३५, ३६; १। २७९), एतेषां **केचिद्** इच्छन्ति, **केचिद्** नेच्छन्ति, तदुभयं प्रमाणीकृत्याह – **योगविभागादिति।** 'सृजिदृशोर्ऋतः परे' इति सिद्धे आगमग्रहणं **योगविभागार्थम्।** [विभञ्जनं **विभागः,** विपरीतकरणमुच्यते] स्वरात् परोऽकारागमो धुटि गुणवृद्धिस्थाने ततः सृजिदृशोरिति योगविभागाच्चेष्टसिद्धिरिति भावः।। ५६४।

## [वि० प०]

सृजि०। सृजेर्भृजादित्वात् षत्वम्, दृशेश्च, छशोश्चेति। स्रष्टेति। नाम्युपधलक्षणस्य गुणस्य प्रसङ्गे अस्राक्षीदिति। **''व्यञ्जनान्तानामनिटाम्''** (३। ६। ७) इति वृद्धिप्रसङ्गे अकारागमः, **''सिचः''** (३। ६। ९०) इतीट्। **''अस्य च दीर्घश्च''** (३। ६। ८) सिचि भवति। एवमन्यत्रापि। सृक्षीष्ट, दृक्षीष्ट इति। **''सिजाशिषोश्चात्मने''** (३। ५। १०) इत्यगुणत्वम्। पक्षे – स्पर्ष्टा, अस्पार्क्षीत् इति। अकारागमाभावपक्षे लघूपधलक्षणो गुणो व्यञ्जनान्तलक्षणा वृद्धिरिति।। ५६४।

## [बि० टी०]

सृजि०। ऋत इति सिद्धे स्वरग्रहणं **योगविभागार्थम्।** योगविभागपक्षे पूर्वधातूनां नानुवृत्तिः। अथ परग्रहणं किमर्थम्, परदिग्योगलक्षणपञ्चम्या सिध्यति। **सुखार्थमिति हेमकरः।।** ५६४।

## [समीक्षा]

श्वस्तनी–अद्यतनी आदि विभक्तियों में 'स्रष्टा, अस्राक्षीत्' इत्यादि शब्दरूपों को सिद्ध करने के लिए 'सृज् – दृश्' धातुघटित ऋकार के बाद अकारागम करने की आवश्यकता होती है। इसकी **पूर्ति कातन्त्रकार** ने अकारागम से तथा पाणिनि ने 'अम्' आगम से की है। पाणिनि का **सूत्र** है – ''सृजिदृशोर्झल्यमकिति'' (अ० ६।१।५८)। पाणिनीय व्याकरण में अम् **आदि मित्** आगमों का स्थान निश्चित करने के लिए ''मिदचोऽन्त्यात् परः'' (अ० १।१।४७) सूत्र बनाया गया है, तदनुसार अन्तिम अच्

के बाद मित् आगम होते हैं। पाणिनि ने जिन तृप् – दृप् आदि धातुओं में अमागम के लिए ''अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्'' (अ० ६।१।५९) सूत्र बनाया है, उनमें अकारागम का विधान योगविभाग से स्वीकार किया गया है।

**[विशेष वचन]**

१. योगविभागात् स्पृशादीनां वा (दु० वृ०)।

२. 'स्पृश संस्पर्शे, मृश आमर्षणे, कृष विलेखने, तृप प्रीणने, दृप हर्षणमोचनयो:, गम्लृ सृप्लृ गतौ' एतेषां केचिदिच्छन्ति केचिन्नेच्छन्ति, तदुभयं प्रमाणीकृत्याह – योग-विभागादिति (दु० टी०)।

३. ऋत इति सिद्धे स्वरग्रहणं योगविभागार्थम्, सुखार्थमिति हेमकर:। (बि० टी०)।

## [रूपसिद्धि]

**१. स्रष्टा।** सृज् + श्वस्तनी – ता। 'सृज विसर्गे' (३ ।११६) धातु से अनद्यतन **भविष्यत् अर्थ** में श्वस्तनीविभक्तिसंज्ञक परस्मैपद – प्रथमपुरुष-एकवचन 'ता' प्रत्यय, ''**युजिरुजिरञ्जिभुजिभजिभञ्जिसञ्जित्यजिभ्रस्जियजिमस्जिसृजिनिजिविजिस्वञ्जेर्जात्**'' (३। ७। २०) सूत्र से अनिट्, ''नामिनश्चोपधाया लघो:'' (३। ५। २) से प्राप्त गुण के विषय में प्रकृत सूत्र से ऋकार के अनन्तर अकारागम, ''रमृवर्ण:'' (१। २। १०) से ऋकार को रकार, ''भृजादीनां ष:'' (३। ६। ५९) से जकार को षकार तथा ''तवर्गस्य षटवर्गाट्टवर्ग:'' (३। ८। ५) से तकार को टकारादेश।

**२. अस्राक्षीत्।** अट् + सृज् + अकारागम + सिच् + ईट् + अद्यतनी – दि। 'सृज विसर्गे' (३। ११६) धातु से अद्यतनीसंज्ञक प्रथमपुरुष – एवकचन 'दि' प्रत्यय, ''अड् धात्वादिर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु'' (३। ८। १६) से अडागम, ''सिजद्यतन्याम्'' (३। २। २४) से सिच् प्रत्यय, अनिट्, प्रकृत सूत्र से अकारागम, ज् को ष्, ''षढो: क: से'' (३। ८। ४) से ष् को क्, ''निमित्तात् प्रत्ययविकारागमस्थ: स: षत्वम्'' (३। ८। २६) से स् को ष्, 'क – ष्' के संयोग से क्ष, ''अस्य च दीर्घ:'' (३। ६। ८) से अकार को दीर्घ, ''सिच:'' (३। ६। ९०) से ईडागम एवं दकार को तकारादेश।

**३. द्रष्टा।** दृश् + श्वस्तनी – ता। 'दृशिर् प्रेक्षणे' (१। २८९) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय तथा अन्य प्रक्रिया 'स्रष्टा' की तरह।

**४. अद्राक्षीत्।** अट् + दृश् + अकारागम + सिच् + ईट् + अद्यतनी – दि। 'दृशिर् प्रेक्षणे' (१। २८९) धातु से अद्यतनीविभक्तिसंज्ञक प्रथमपुरुष – एकवचन 'दि' प्रत्यय तथा अन्य प्रक्रिया 'अस्राक्षीत्' की तरह।। ५६४।

## ५६५. दीङोऽन्तो यकार: स्वरादावगुणे [३। ४। २५]

## [सूत्रार्थ]

दीङ् धातु के अन्त में यकारागम होता है, अगुण तथा स्वरादि प्रत्यय के परे रहने पर।। ५६५।

## [दु० वृ०]

दीङोऽन्तो यकारो भवति स्वरादावगुणे प्रत्यये परे। उपदिदीये, उपदिदीयाते, उपदिदीयिरे। दीङोऽवयवत्वेन द्विर्वचनं स्याद् आत्त्वं च न स्यात्।। ५६५।

## [दु० टी०]

दीङो०। स्वरादिरगुणः परोक्षाप्रत्यये एव सम्भवतीत्याह-उपदिदीये इत्यादि। **'दीङ् क्षये'** (३।८३)। अन्तग्रहणं किमर्थम् प्रत्ययविधावकरणात् प्रत्ययो न भविष्यति। न चादेशोऽत्र कृते द्विर्वचने **''य इवर्णस्य''** (३।४।५८) इत्यादिना यत्त्वेन सिद्धत्वात् तस्माद् 'दीङः' इत्यवयवलक्षणैव षष्ठी भविष्यति। प्रत्ययस्य धातुप्रत्ययौपश्लेषिकाधिकरणत्वादनियत एव यकारः स्याच्चेत्तथापि **''सृजिदृशोरागमः''** (३।४।२५) इत्यतः स्वरात् परम् आगमग्रहणं सुखार्थमनुवर्तिष्यते, तर्हि मन्दधियामागमाधिकारे बुद्धिमकुर्वतां **स्पष्टार्थम्।** किञ्च स्वरादावित्**युत्तरार्थं** लाघवाय प्रत्ययोऽप्यत्र संभाव्यते इत्याह – दीङोऽवयवत्वेनेत्यादि। अन्यथानित्यत्वात् प्रत्यये सति व्यवधानात् कथं द्विर्वचनं **''मीनातिमिनोतिदीङां गुणवृद्धिस्थाने''** (३।४।२२) इत्यात्त्वं स्यादिति, तर्हि कथं 'दिदीयिढ्वम्' इति ढत्वं स्याद् अनाम्यन्तत्वात् ? सत्यम्, तत्रैव वर्णयिष्यामः। वर्णात् कारशब्दोऽयमकार **उच्चारणार्थ** एव। **''अस्य च लोपः''** (३।६।४९) इत्यपि **प्रक्रियागौरवम्।** स्वरादाविति किमर्थम् ? उपदीयते। अगुण इति किम् ? उपादानम्, भावे युट्।। ५६५।

## [वि० प०]

दीङो०। पारिशेष्यादिह स्वरादिरगुणः परोक्षाप्रत्यय एव निमित्तं संभवतीति। तत्रैवोदाहरणमाह – उपदिदीये इत्यादि। अथान्तग्रहणं किमर्थम् ? आगमार्थं ततः किम् **'आगमा यद्गुणीभूतास्ते तद्ग्रहणेन गृह्यन्ते'** (का० परि० १४) इत्येतदर्थम्, इतोऽपि किं सिद्धमित्याह – दीङ इत्यादि। अन्यथा नित्यत्वान्मध्ये स्वतन्त्रप्रत्यय एव स्यात्। अतस्तेन व्यवहितायां परोक्षायां द्विर्वचनं न स्याद् अगुणविधानाभावाद् गुणी चायमिति गुणस्थानित्वाद् **''मीनातिमिनोतिदीङां गुणवृद्धिस्थाने''** (का० परि० १४) इत्यात्त्वं स्यादित्यर्थः। यदि पुनः पूर्वसूत्रादागमग्रहणं स्वरात् पर इति चानुवर्तते, तदान्तग्रहणं **सुखार्थमेव** भवति।। ५६५।

## [बि० टी०]

दीङः। परोक्षायामिति सिद्धे स्वरादिग्रहण**मुत्तरार्थम्,** तेन 'ग्लायते' इत्यत्र न स्यात्।। ५६५।

## [समीक्षा]

'उपदिदीये, उपदिदीयाते, उपदिदीयिरे' इत्यादि शब्दरूपों के सिद्ध्यर्थ 'दीङ्' धातु के अन्त में यकार की आवश्यकता होती है। इसकी सिद्धि कातन्त्रकार ने यकारागम तथा पाणिनि ने युडागम से की है। पाणिनि का सूत्र है – ''दीङो युडचि

क्ङिति'' (अ० ६।४।६३)। पाणिनि का युडागम टित् है, अतः उसके आदि में विधानहेतु ''आद्यन्तौ टकितौ'' (अ० १।१।४६) यह परिभाषासूत्र लगाना पड़ता है। इसके अतिरिक्त 'दीङः' के पञ्चम्यन्त होने के कारण अजादि प्रत्यय को ही युडागम होगा – यह व्याख्या भी करनी पड़ती है। जबकि कातन्त्रकार ने सूत्र में ही यकारागम को दीङ् धातु के अन्त में निर्दिष्ट किया है। अतः कातन्त्र में स्पष्टतः प्रक्रियालाघव है और पाणिनीय व्याकरण में प्रक्रियागौरव।

## [विशेष वचन]

१. दीङोऽवयवत्वेन द्विर्वचनं स्याद् आत्त्वं च न स्यात् (दु० वृ०)।

२. स्वरात् परम् आगमग्रहणं सुखार्थमनुवर्त्तिष्यते, तर्हि मन्दधियामागमाधिकारे बुद्धिमकुर्वतां स्पष्टार्थम् (दु० टी०)।

३. वर्णात् कारशब्दोऽयमकार उच्चारणार्थ एव (दु० टी०)।

४. यदि पुनः पूर्वसूत्रादागमग्रहणं 'स्वरात् परः' इति चानुवर्तते, तदान्तग्रहणं सुखार्थमेव भवति (वि० प०)।

५. परोक्षायामिति सिद्धे स्वरादिग्रहणमुत्तरार्थम् (बि० टी०)।

## [रूपसिद्धि]

**१. उपदिदीये।** उप + दी + य् + ए। 'उप' उपसर्गपूर्वक 'दीङ् क्षये' (३।८३) धातु से परोक्षाविभक्तिसंज्ञक प्रथमपुरुष–एकवचन 'ए' प्रत्यय, 'दी' धातु को द्वित्व, पूववर्ती 'दी' की अभ्याससंज्ञा, उसका ह्रस्व तथा प्रकृत सूत्र से 'दी' के बाद यकारागम।

**२. उपदिदीयाते।** उप + दी + य् + आते। 'उप' उपसर्गपूर्वक 'दीङ् क्षये' (३।८३) धातु से परोक्षाविभक्तिसंज्ञक प्रथमपुरुष–द्विवचन 'आते' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**३. उपदिदीयिरे।** उप + दी + य् + इरे। 'उप' उपसर्गपूर्वक 'दीङ् क्षये' धातु से परोक्षाविभक्तिसंज्ञक प्रथमपुरुष – बहुवचन 'इरे' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ५६५।

# ५६६. आलोपोऽसार्वधातुके [३।४।२६]

## [सूत्रार्थ]

धातु के अन्त्य अवयवरूप आकार का लोप होता है, असार्वधातुक प्रत्यय के विषय में अगुण तथा स्वरादि प्रत्यय के परे रहते।। ५६६।

## [दु० वृ०]

धातोराकारस्य लोपो भवति असार्वधातुके स्वरादावगुणे प्रत्यये परे। पपुः, तस्थुः, गोदः, संस्था। अगुण इति किम् ? दानम्। स्वरादाविति किम् ? ग्लायते। असार्वधातुक इति किम् ? यान्ति।। ५६६।

## [दु० टी०]

आलोप०। आलोप इत्यसमस्तं वा पदं धातोरिति विशेषणं चेद् अनन्तस्याप्याकारस्य लोपः प्रसज्येत – जजागरुरिति। नैवम्, असार्वधातुकमित्यौपश्लेषिकमधिकरणमाकारस्य कार्यिण इति भावः। आकारेण धातुर्विशिष्यते, विशेषणेन च तदन्तविधिरित्याकारान्तस्य धातोरिति। एवं सति व्यवच्छेद्याभाव इत्याह – धातोराकारस्येति। 'पपुः, तस्थुः' इति कृते द्विर्वचने पश्चाद् आकारस्य लोपः, स्वरविधित्वात्। 'गां ददाति' इति। **''आतोऽनुपसर्गात् कः''** (४।३।४)। संस्थानं **संस्था**। **''आतश्चोपसर्गे''** (४।५।८४) इत्यङ्। असार्वधातुक इति किम् ? वान्ति, यान्ति।। ५६६।

## [वि० प०]

आलोपो०। गोद इति गां ददातीति। **''आतोऽनुपसर्गात् कः''** (४।३।४) इति कप्रत्ययः। संस्थानं संस्थेति। **''आतश्चोपसर्गे''** (४।५।८४) इत्यङ्।। ५६६।

## [बि० टी०]

आलोपो०। पपुरिति **वृत्तिः**। ननु कथमिदमुदाहरणम्, यावता **''आकारस्योसि''** (३।६।३७) इत्यनेन लोप एव नास्ति ? सत्यम्। तत्र लाक्षणिकपरिग्रहार्थमिति **हेमः**। अगुण इति किमिति **वृत्तिः**। ननु कथमुक्तम्, निमित्तस्य निमित्तेन व्याघातत्वात् ? सत्यम्। निमित्तस्येत्यत्र निमित्तपदं विशेष्यनिमित्तपरमिति **हेमः**।। ५६६।

## [समीक्षा]

'पपुः, तस्थुः, गोदः' इत्यादि शब्दरूप 'पा–स्था–दा' धातुओं के अन्तिम आकार का लोप किए विना सिद्ध नहीं हो सकते, अतः आकारलोप का विधान दोनों ही व्याकरणों में किया गया है। पाणिनि का सूत्र है – ''आतो लोप इटि च'' (अ० ६।४।६४)। तदनुसार इडागम वाले 'पपिथ, ददिथ' आदि शब्दरूपों में भी आकारलोप प्रवृत्त होता है। इस विषय में कातन्त्रकार ने पृथक् सूत्र बनाया है – ''इटि च'' (३।४।२७)। इस प्रकार पाणिनीय सूत्र रचना को ही लाघवाधायक कहा जाएगा।

## [रूपसिद्धि]

१. **पपुः**। पा + परोक्षा–उस्। 'धेट पा पाने' (१।२६४) धातु से परोक्षाविभक्तिसंज्ञक प्रथमपुरुष–बहुवचन 'उस्' प्रत्यय, ''परोक्षायां च'' (३।५।२०) से अगुण, ''चण्परोक्षाचेक्रीयितसनन्तेषु'' (३।३।७) से द्विर्वचन, अभ्याससंज्ञा, अभ्याससंज्ञक पा-धातुघटित आकार को ह्रस्व, प्रकृत सूत्र से आकार का लोप तथा सकार का विसर्गादेश।

२. **तस्थुः**। स्था + परोक्षा–उस्। 'ष्ठा गतिनिवृत्तौ' (१।२६७) धातु से परोक्षा-विभक्तिसंज्ञक प्रथमपुरुष–बहुवचन 'उस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**३. गोदः**। गो + दा + क + सि। गां ददाति। 'गो' पूर्वक 'डु दाञ् दाने' (२।८४) धातु से "आतोऽनुपसर्गात् कः" (४।३।४) सूत्र द्वारा 'क' प्रत्यय, "के यण्वच्च योक्तवर्जम्" (४।१।७) से अगुण, प्रकृत सूत्र से आकारलोप तथा सि–घटित सकार का लोप।

**४. संस्था**। सम् + स्था + अङ् + सि। 'सम्' उपसर्गपूर्वक 'ष्ठा गतिनिवृत्तौ' (१।२६७) धातु से "आतश्चोपसर्गे" (४।५।८४) से अङ् प्रत्यय, "ङे न गुणः" (४।१।६) से अगुण, प्रकृत सूत्र से आकारलोप, "स्त्रियामादा" (२।४।४९) से स्त्रीप्रत्यय–आ, लिङ्गसंज्ञा, सि–प्रत्यय तथा उसका लोप।। ५६६।

## ५६७. इटि च [३।४।२७]

### [सूत्रार्थ]

इट् परे रहते धातु के अन्तिम आकार का लोप होता है।। ५६७।

### [दु० वृ०]

धातोराकारस्य लोपो भवति इटि परे। पपिथ, ददिथ। इटीति किम् ? पपाथ। गुण्यर्थमिदम्।। ५६७।

### [दु० टी०]

इटि। **ये** तु चेक्रीयितलुगन्तं **भाषायामि**च्छन्ति, **ते** दादितुम्, दादितव्यम् इत्युदाहरन्ति। गुण्यर्थमिदमिति। इह हि इडादावगुणे पूर्वेणैव सिद्धमिति भावः। पपिव, ददिव। चकार उक्तसमुच्चयमात्रे। योगविभागश्च **स्पष्टार्थ** एव।। ५६७।

### [वि० प०]

इटि। पपिथ, ददिथेति। "**नित्यात्वतां स्वरान्तानाम्**" इति वचनाद् इड् वा।। ५६७।

### [बि० टी०]

इटि। इडादावगुणे पूर्वेणैव सिद्धम्। पपिव, ददिव इति। चकार उक्तसमुच्चयमात्रे। पृथग्योगश्च **स्पष्टार्थ** इति **टीकाकृत्**। इटीति किमिति **वृत्तिः**। ननु इड्ग्रहणाभावे कस्य किं स्यात् ? सत्यम्। अगुणवचने पूर्वेणैव सिद्धे अर्थाद् गुणिन्येव स्यात्। तत्र पारिशेष्यात् थल्प्रत्यय एव स्यात्, थलीत्यास्ताम् इत्याह – इटीति किमिति।। ५६७।

### [समीक्षा]

'पपिथ, ददिथ' आदि इडागम वाले रूपों के साधनार्थ आकारलोप की अपेक्षा होती है। जिसकी पूर्ति दोनों ही आचार्यों ने की है। तदनुसार कातन्त्रकार को प्रकृत सूत्र स्वतन्त्ररूप में बनाना पड़ा है, जबकि पाणिनि का एक ही सूत्र है – "आतो लोप इटि च" (अ० ६।४।६४)। कातन्त्रकार ने "आलोपोऽसार्वधातुके" (३।४।२६) में "इटि

च'' का समावेश न करके पृथक् सूत्र बनाया है, जिसका कारण टीकाकारों के अनुसार स्पष्ट रूप में अर्थावबोध है। इस प्रकार पाणिनीय प्रक्रिया में लाघव तथा कातन्त्रीय प्रक्रिया में गौरव संनिहित है।

## [विशेष वचन]

१. ये तु चेक्रीयितलुगन्तं भाषायामिच्छन्ति (दु० टी०)।

२. योगविभागश्च स्पष्टार्थ एव (दु० टी०; बि० टी०)।

## [रूपसिद्धि]

**१. पपिथ।** पा + परोक्षा–थल्। 'पा पाने, पा रक्षणे' (१।२६४; २।२१) धातु से परोक्षाविभक्तिसंज्ञक मध्यमपुरुष–एकवचन 'थल्' प्रत्यय, ''नित्यात्वतां स्वरान्तानाम्'' वचन के अनुसार इडागम, द्वित्व, अभ्याससंज्ञा, ह्रस्व तथा प्रकृत सूत्र से आकारलोप।

**२. ददिथ।** दा + परोक्षा–थल्। 'डु दाञ् दाने' (२।८४) धातु से परोक्षाविभक्तिसंज्ञक मध्यमपुरुष–एकवचन थल् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ५६७।

# ५६८. दा–मा–गायति–पिबति–स्था–स्यति–जहातीनामीकारो व्यञ्जनादौ [३।४।२८]

## [सूत्रार्थ]

'दा, मा, गै, पा, स्था, सो' तथा 'हा' धातुघटित आकार के स्थान में ईकारादेश होता है, सार्वधातुकसंज्ञक से भिन्न, व्यञ्जनादि तथा गुणनिषेधक प्रत्यय के परे रहते।। ५६८।

## [दु० वृ०]

दासंज्ञक–मारूप–गायति–पिबति–स्था – स्यति – जहातीनामन्त ईकारो भवति, असार्वधातुके व्यञ्जनादावगुणे प्रत्यये परे। दीयते, धीयते, मीयते, गीयते। गायतीति निर्देशाद् **'गाङ् गतौ'** (१।४५९) इत्यस्य गायते इति भवितव्यमेव। पीयते। पातेस्तु न स्यात् – पायते। स्थीयते, अवसीयते। स्यतीति निर्देशात् – सायते, सासायते। सनोतेर्ये वात्त्वम्। हीयते। हाङस्तु – हायते।। ५६८।

## [दु० टी०]

दामा०। दासंज्ञकमारूपेति। **''स्वं रूपं शब्दस्याशब्दसंज्ञा''** (का० परि० २८) इति **शास्त्रे** स्वमेव रूपं ग्राह्यं भवति, न बाह्योऽर्थः, शब्दसंज्ञा वर्जयित्वा संज्ञाविधानबलादेव न स्वरूपग्रहणमित्यर्थः। न च शब्देनार्थावगतेरर्थे कार्यासम्भवात् तद्वाचिनां संप्रत्ययो भविष्यति। यदयं **''ह्रस्वोऽम्बार्थानाम्''** (२।१।४०) इत्यादावर्थग्रहणं करोति। किं च **''श्रुतानुमितयोः श्रौतसम्बन्धो विधिर्बलवान्'** (का० परि० ९२) इति येनैव शब्देनार्थोऽवगतस्तस्यैव ग्रहणं भवति, नान्यस्येत्यर्थः। 'माङ् माने, मा माने, मेङ् प्रतिदाने' (२।८६, ३६; १।४६२), इह **'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्'**

(का० परि० ७५) इति नाश्रीयते। दासाहचर्याच्च मारूपं गृह्यते, गायतीति निर्देशादिति **'कै गै रै शब्दे'** (१।२५६) इत्यस्यैव ग्रहणमिति न **'च्युङ् छ्युङ् ज्युङ् झ्युङ् प्रुङ् प्लुङ् गाङ् श्यैङ् गतौ'** (१।४५९) इत्यस्येति। तथा च नहि गीतमित्युक्ते गतमित्यभिधीयते। **''सनोतेर्ये वात्वम्''** इति धुटि खनिसनिजनां ये वेति। 'देदीयते' इत्यादौ परत्वादीत्त्वे कृते पश्चाद् द्विर्वचनम्। व्यञ्जनादाविति किम् ? ददतुः, ददुः। आलोपात् खलु परत्वादीत्त्वं स्यात्।। ५६८।

## [वि० प०]

दा–मा०। दारूपस्य न ग्रहणम्। **''स्वं रूपं शब्दस्याशब्दसंज्ञा''** (का० परि० २८) इति वचनाद् यदि तेन शब्देन संज्ञा न गम्यते तदा शब्दस्य स्वं रूपं गृह्यते। अनेन संज्ञा गम्यते तस्मात् संज्ञैव गृह्यते इत्यर्थः, न स्वरूपमिति।। ५६८।

## [बि० टी०]

दामा०। नन्वत्र व्यञ्जनग्रहणं किमर्थम् – यणीत्यास्ताम्। आदिग्रहणं तदादित्वनिरासार्थं भविष्यति ? सत्यम्, **स्पष्टार्थम्**।। ५६८।

## [समीक्षा]

'दीयते, धीयते, गीयते' इत्यादि शब्दरूपों के सिद्ध्यर्थ 'दा–धा–गा' आदि धातुघटित आकार को ईकारादेश की अपेक्षा होती है, इसकी पूर्ति दोनों व्याकरणों में की गई है। पाणिनि का सूत्र है – ''घुमास्थागापाजहातिसां हलि'' (अ० ६। ४। ६६)। पाणिनि ने जिन 'दा–धा' धातुओं की ''दाधा घ्वदाप्'' (अ० १। १। २०) सूत्र से 'घु' संज्ञा की है, उनकी कातन्त्रकार ने ''अदाब्दाधौ दा'' (३। १। ८) से 'दा' संज्ञा की है। अतः उनके सूत्रों में 'घु–दा' शब्दों का उल्लेख किया गया है। इसी प्रकार पाणिनि 'हल्' प्रत्याहार से जिन वर्णों का बोध कराते हैं, उनके अवबोधार्थ कातन्त्र में व्यञ्जन शब्द का व्यवहार किया जाता है। इस प्रकार सामान्यतया उभयत्र समानता है।

## [विशेष वचन]

१. गायतीति निर्देशाद् गाङ् गताविन्यस्य 'गायते' इति भवितव्यमेव (दु० वृ०)।
२. संज्ञाविधानबलादेव न स्वरूपग्रहणमित्यर्थः (दु० टी०)।
३. अनेन संज्ञा गम्यते तस्मात् संज्ञैव गृह्यते इत्यर्थः, न स्वरूपमिति (वि० प०)।
४. आदिग्रहणं तदादित्वनिरासार्थं भविष्यति ? सत्यम्, स्पष्टार्थम् (बि० टी०)।

## [रूपसिद्धि]

**१. दीयते।** दा + यण् + ते – कर्मवाच्य वर्तमाना। 'डु दाञ् दाने' (२। ८४) धातु से कर्मवाच्य वर्तमानासंज्ञक आत्मनेपद – प्रथमपुरुष–एकवचन 'ते' प्रत्यय, ''सार्वधातुके यण्'' (३।२।३१) से यण् प्रत्यय, ''न णकारानुबन्धचेक्रीयितयोः'' (३। ५। ७) से अगुण तथा प्रकृत सूत्र से आकार को ईकारादेश।

**२. धीयते।** धा + यण् + ते – कर्मवाच्य। 'डु धाञ् धारणपोषणयोः' (२।८५)

धातु से कर्मवाच्य में वर्तमानासंज्ञक प्रथमपुरुष–एकवचन 'ते' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**३. मीयते।** मा + यण् + ते – कर्मवाच्य। 'माङ् माने, मा माने, मेङ् प्रतिदाने' (२।८६, २६; १।४६२) से कर्मवाच्य में प्रथमपुरुष – एकवचन 'ते' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**४. गीयते।** गा + यण् + ते – कर्मवाच्य। 'गाङ् गतौ' (१।४५९) धातु से कर्मवाच्य में वर्तमानासंज्ञक प्रथमपुरुष–एकवचन 'ते' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**५. पीयते।** पा + यण् + ते – कर्मवाच्य। 'पा पाने' (१।२६४) से कर्मवाच्य में प्रथमपुरुष–एकवचन 'ते' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**६. स्थीयते।** स्था + यण् + ते – कर्मवाच्य। 'ष्ठा गतिनिवृत्तौ' (१।२६७) धातु से कर्मवाच्य में वर्तमानासंज्ञक आत्मनेपद-प्रथमपुरुष–एकवचन 'ते' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**७. अवसीयते।** अव + सो + यण् + ते – कर्मवाच्य। 'अव' उपसर्गपूर्वक 'षो अन्तकर्मणि' (३।२१) धातु से कर्मवाच्य में 'ते' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

८. **हीयते।** हा + यण् + ते– कर्मवाच्य। 'ओ हाक् त्यागे' (२। ७१) धातु से कर्मवाच्य में 'ते' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ५६८।

## ५६९. आशिष्येकारः [३।४।२९]

### [सूत्रार्थ]

पूर्ववर्ती सूत्र ५६८ में पठित 'दा–मा' आदि धातुओं से आशीर्विभक्तिसंज्ञक अगुण व्यञ्जनादि प्रत्यय के पर में रहने पर धातुघटित आकार को एकारादेश होता है।। ५६९।

### [दु० वृ०]

दामादीनामाशिष्यगुणे व्यञ्जनादौ परतः एकारो भवति। देयात्, धेयात्, मेयात्, गेयात्, पेयात्, स्थेयात्, अवसेयात्, हेयात्। अगुण इति किम्? दासीष्ट, मासीष्ट। वा संयोगादेरस्थ इति वक्तव्यम्। ग्लेयात्–ग्लायात्। म्लेयात्–म्लायात्। अस्थ इति किम्? स्थेयात्।। ५६९।

### [दु० टी०]

आशि०। वा संयोगादेरिति धातोराकारस्य संयोगादेरिति संबन्धः। **केचिद्** इच्छन्ति, **केचिन्ने**च्छन्ति इति, तन्मतमाश्रित्योच्यते वक्तव्यमिति।। ५६९।

### [वि० प०]

आशि०। वक्तव्यमिति व्याख्येयमित्यर्थः। **केचिदि**च्छन्ति **केचिन्ने**च्छन्ति। **यो** नेच्छति **तन्मतमिह प्रमाणमित्यर्थः**।। ५६९।

## [बि० टी०]

आशि०। दामादिपाठान्नित्यमिति चेत् तदा स्थाधातुवर्जितानामेव स्यात्।। ५६९।

## [समीक्षा]

'देयात्, धेयात्, पेयात्' इत्यादि शब्दरूपों के सिद्ध्यर्थ 'दा' आदि धातुओं के अन्त में विद्यमान आकार के स्थान में एकारादेश की अपेक्षा होती है। इसका विधान दोनों ही आचार्यों ने किया है। पाणिनि का सूत्र है – ''एर्लिङि'' (अ० ६।४।६७)। वृत्तिकार दुर्गसिंह ने संयोगादि धातुओं से एकारादेश के विषय में कहा है कि 'वा संयोगादेरस्थ इति वक्तव्यम्'। तदनुसार 'स्था' धातु को छोड़कर 'ग्ला–म्ला' आदि संयोगादि धातुओं से एकारादेश विकल्प से प्रवृत्त होता है। अत: 'ग्लेयात्– ग्लायात्' आदि दो दो रूप सिद्ध होते हैं। पाणिनि ने एतदर्थ स्वतन्त्र सूत्र बनाया है– ''वाऽन्यस्य संयोगादे:'' (अ० ६।४।६८)। इसमें 'अन्य' पद से 'स्था' भिन्न धातुओं के अवबोध में गौरव अवश्य होता है। वृत्तिकार दुर्गसिंह ने सूत्र में ही 'अस्थ' पढ़कर लाघव का आश्रय लिया है।

## [विशेष वचन]

१. केचिदिच्छन्ति, केचिन्नेच्छन्ति। यो नेच्छति तन्मतमिह प्रमाणम् इत्यर्थ: (दु० टी०; वि० प०)।

## [रूपसिद्धि]

**१. देयात्।** दा + यात् – आशी:। 'डु दाञ् दाने' (२। ८४) धातु से आशीर्विभक्तिसंज्ञक परस्मैपद-प्रथमपुरुष – एकवचन 'यात्' प्रत्यय, ''आशिषि च परस्मै'' (३। ५। २२) से अगुण। तथा प्रकृत सूत्र से धातुघटित आकार को एकारादेश।

**२. धेयात्।** धा + यात् – आशी:। 'डु धाञ् धारणपोषणयो:' (२। ८५) धातु से आशीर्विभक्तिसंज्ञक 'यात्' प्रत्यय तथा अन्यप्रक्रिया पूर्ववत्।

**३. मेयात्।** मा + यात् – आशीर्विभक्ति। 'माङ् माने, मा माने, मेङ् प्रतिदाने' (२। ८६, २६; १।४६२) धातु से आशीर्विभक्तिसंज्ञक 'यात्' प्रत्यय तथा पूर्ववत् प्रक्रिया।

**४. गेयात्।** गा + यात् – आशी:। 'गाङ् गतौ' (१। ४५९) धातु से 'यात्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**५. पेयात्।** पा + यात् – आशी:। 'पा पाने' (१।२६४) धातु से 'यात्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**६. स्थेयात्।** स्था + यात् – आशी:। 'ष्ठा गतिनिवृत्तौ' (१। २६७) धातु से यात् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**७. अवसेयात्।** अव + सो + यात् – आशी:। 'अव' उपसर्गपूर्वक 'षो अन्तकर्मणि' (३।२१) धातु से यात् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

८. **हेयात्**। हा + यात् – आशीः। 'ओ हाक् त्यागे' (२।७१) धातु से 'यात्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ५६९।

## ५७०. अन उस् सिजभ्यस्तविदादिभ्योऽभुवः [३।४।३०]

### [सूत्रार्थ]

अभ्यस्त, विदादि धातु तथा सिच् से परवर्ती अन् प्रत्यय के स्थान में 'उस्' आदेश होता है 'भू' धातु को छोड़कर।। ५७०।

### [दु० वृ०]

सिजभ्यस्तविदादिभ्यो भूवर्जितेभ्यः परस्यान उसादेशो भवति। सिचः – अकार्षुः, उदगुः, अदुः। परस्य न लुग्लोप इति। अभ्यस्तात्– अददुः, अजुहवुः, अनेनिजुः। विदादयः – 'विद ज्ञाने' (२।२७)। आदन्तद्विषः– अविदुः, अरुः, अलुः, अद्विषुः। **गणकृतमनित्यमिति** वा स्यात्। ह्यस्तन्यन एवार्थात् – अविदन्, अरान्, अलान्, अद्विषन्। अभुव इति किम् ? अभूवन्।। ५७०।

### [दु० टी०]

अन०। उदगुरिति। **''इणो गा''** (३।४।८४) इति। **''आकारस्योसि''** (३।६।३७) इत्यालोपः। एवम् अदुरिति। **'डु दाञ् दाने'** (२।८४)। **''इण्स्था०''** (३।४।९३) इत्यादिना सिचो लुकि परस्य प्रत्ययलोपलक्षणम् अस्तीति सिच एवोदाहरणमित्याह – परस्येत्यादि। अददुरिति। **'डु दाञ् दाने'** (२।८४)। अभ्यस्तत्वान्नित्यमुस् भवति न विदादिलक्षणो विकल्पः। एवम् अदरिद्रुः, अदधुरिति। विदादीत्यादिशब्दो व्यवस्थावचन इत्याह–**'विद ज्ञाने'** (२।२७) इत्यादि। 'अभुव' इत्यत्र वाक्यान्तरस्य न भवति प्रतिषेध इति मतान्तरमेवेति। अबोभुवुरिति। एवं सति वकारागमो नास्तीति उवादेशः।। ५७०।

### [वि० प०]

अनः। अकार्षुरिति। ''सिचि परस्मै स्वरान्तानाम्'' (३।६।६) इति वृद्धिः। उदगुरिति। उत्पूर्वः 'इण् गतौ' (२। १३), ''इणो गा'' (३।४।८४) इति गादेशः। अदुरिति। 'डु दाञ् दाने' (२।८४)। उभयत्रापि ''इण्स्थादा०'' (३।४।९३) इत्यादिना सिचो लुक्। ''आकारस्योसि'' (३।६।३७) इत्याकारलोपः। ननु कथमिह उसादेशः, नित्यत्वात् सिचो लुका भवितव्यम्। न चात्र प्रत्ययलोपलक्षणमस्ति लुग्लोपत्वादित्याह – परस्येत्यादि। परस्य प्रत्ययस्य कार्यं प्रति लुग्लोपपरिभाषा नोपतिष्ठते इत्यतः प्रत्ययलोपलक्षणमवधार्यते। कथमेवमिति चेदुच्यते – **'लुग्लोपे** न प्रत्ययकृतम्' (कलाप० २२२। ६९) इत्यत्र प्रत्यये परे प्रकृतेर्यत् कार्यं तल्**लुग्लोपे** न भवति, परस्य तु प्रत्ययस्य स्यादेवेति। अभ्यस्तेति सर्वत्र जुहोत्यादित्वाद् **द्विर्वचनम्**, ''जुहोतेरभ्यस्तानामुसि'' (३।४।६१) इति गुणः। विदादीत्यादिशब्दस्य व्यवस्था**वाचित्वा**दित्याह – 'विद ज्ञाने' (२।२७) इत्यादि। अभ्यस्तेभ्यो विदादिभ्यश्चादादित्वाद**नो लुक्**। ह्यस्तन्यन एवार्थादिति अद्यतन्याः सिच्

– द्वारेणैव सिद्धत्वादिति भावः। अभूवन्निति। अत्रापि पूर्ववत् सिचो लुक्। ''भुवो वोऽन्तःपरोक्षाद्यतन्योः'' (३।४।६२) इति वकारागमः।। ५७०।

## [बि० टी०]

अन०। 'सिजादिभ्यः' इति कृते सिध्यति, आदिशब्दस्य व्यवस्थावाचित्वादेवैषां ग्रहणं भविष्यति ? सत्यम्। गणकृतमनित्यमिति **हेमः**।। ५७०।

## [समीक्षा]

'अकार्षुः, अददुः, अविदुः' इत्यादि शब्दरूपों के सिद्ध्यर्थ 'अन्' (प्र० पु० – ब० व०) प्रत्यय के स्थान में उस् आदेश आवश्यक होता है। इसका विधान दोनों ही आचार्यों ने किया है। पाणिनि ने प्रथमपुरुष-बहुवचन में 'झि' प्रत्यय किया है तथा आदेश में भी जकारानुबन्ध की योजना की है – जुस्। उनका सूत्र है – ''सिजभ्यस्तविदिभ्यश्च'' (अ० ३।४।१०९)। विदादिगुण के पाठ से वहाँ 'गणकृतमनित्यम्' (का० परि० २९) इस परिभाषा के अनुसार उसादेश वैकल्पिक हो सकता है। इसका समाधान करते हुए कहा गया है कि केवल ह्यस्तनीविभक्ति के ही अन् को उस् आदेश प्रवृत्त होगा, अद्यतनी में तो सिच् प्रत्यय होने पर ही उसादेश होता है – 'गणकृतमनित्यमिति वा स्यात्, ह्यस्तन्यन एवार्थात्' (दु० वृ०)।

## [विशेष वचन]

१. आदिशब्दो व्यवस्थावचनः (दु० टी०)।

२. ह्यस्तन्यन एवार्थादिति अद्यतन्याः सिज्द्वारेणैव सिद्धत्वादिति भावः (वि० प०)।

३. गणकृतमनित्यमिति हेमः (बि० टी०)।

## [रूपसिद्धि]

**१. अकार्षुः**। अट् + कृ + सिच् + अन् – उस्। 'डु कृञ् करणे' (७।७) धातु से अद्यतनीविभक्तिसंज्ञक प्रथमपुरुष–बहुवचन 'अन्' प्रत्यय, ''अड् धात्वादिर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु'' (३।८।१६) से धातुपूर्व अडागम, ''सिजद्यतन्याम्'' (३।२।२४) से सिच् प्रत्यय, ''ऋतोऽवृङ्वृञः'' (३।७।१६) से अनिट्, ''सिचि परस्मै स्वरान्तानाम्'' (३।६।६) से ऋ को वृद्धि, ''निमित्तात् प्रत्ययविकारागमस्थः सः षत्वम्'' (३।८।२६) से सिच् प्रत्ययगत सकार को षकार, प्रकृत सूत्र से अन् को उस् तथा सकार को विसर्गादेश – ''रसकारयोर्विसृष्टः'' (३। ८। २) सूत्र द्वारा।

**२. उदगुः**। उत् + अट् + इण् – गा + अन् – उस्। उत् उपसर्गपूर्वक 'इण् गतौ' (२।१३) धातु से अद्यतनीविभक्तिसंज्ञक प्रथमपुरुष–बहुवचन 'अन्' प्रत्यय, ''इणो गा'' (३।४।८४) से इण् धातु को 'गा' आदेश, अडागम, सिच् प्रत्यय, ''अनिडेकस्वरादातः'' (३।७।२१) से अनिट्, ''इण्स्थादापिबतिभूभ्यः सिचः परस्मै'' (३।४।९३) से सिच् का लुक्, प्रकृत सूत्र से अन् को उस् तथा ''आकारस्योसि'' (३।६।३७) से आकार का लोप।

**३. अदुः।** अट् + दा + सिच् – लुक् + अन्–उस्। 'डु दाञ् दाने' (२।८४) धातु से अन् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**४. अददुः।** अट् + दा + अन् – ह्यस्तनी। 'डु दाञ् दाने' (२।८४) धातु से ह्यस्तनीविभक्तिसंज्ञक प्रथमपुरुष–बहुवचन 'अन्' प्रत्यय, अडागम, ''अन् विकरणः कर्तरि'' (३।२।३२) से अन् विकरण, ''अदादेर्लुग् विकरणस्य'' (३।४।९२) से अन् का लुक्, ''जुहोत्यादीनां सार्वधातुके'' (३।३।८) से दा को द्वित्व, पूर्ववर्ती दा की अभ्याससंज्ञा, उसको ह्रस्व, ''द्वयमभ्यस्तम्'' (३।३।५) से दोनों की अभ्यस्तसंज्ञा, प्रकृत सूत्र से अन् को उस्, ''अभ्यस्तानामाकारस्य'' (३।४।४२) से आकारलोप तथा सकार को विसर्ग आदेश।

**५. अजुहवुः।** अट् + हु + अन्–ह्यस्तनी। 'हु दाने' (२। ६७) धातु से ह्यस्तनीसंज्ञक अन् प्रत्यय, अडागम, अन् विकरण का लुक्, द्वित्व, अभ्याससंज्ञा, ''हो जः'' (३। ३। १२) से हकार को जकार ''अभ्यस्तानामुसि'' (३। ५। ६) से धातुघटित उकार को गुण, अन् को उस् तथा सकार को विसर्ग।

**६. अनेनिजुः।** अट् + निज् + अन् – ह्यस्तनी। 'निजिर् शौचपोषणयोः'' (२।८१) धातु से अन् प्रत्यय, अडागम, द्वित्व, अभ्याससंज्ञा, ''निजिविजिविषां गुणः सार्वधातुके'' (३।३।२३) से अभ्यासगत इकार को गुण, प्रकृत सूत्र से उस्, अगुण तथा सकार को विसर्गादेश।

**७. अविदुः।** अट् + विद् + अन् –ह्यस्तनी। 'विद ज्ञाने' (२।२७) धातु से ह्यस्तनीसंज्ञक अन् प्रत्यय, अडागम, अन्लुक्, ''द्वित्वबहुत्वयोश्च परस्मै'' (३।५।९९) से अगुण, प्रकृत सूत्र से अन् को उस् तथा सकार को विसर्गादेश।

**८. अरुः।** अट् + रा + अन्–ह्यस्तनी। 'रा दाने' (२।२२) धातु से ह्यस्तनीसंज्ञक अन् प्रत्यय, अन्विकरण का लुक्, प्रकृत सूत्र से अन् को उस्, ''आकारस्योसि'' (३।६।३७) से आकारलोप तथा स् को विसर्ग।

**९. अलुः।** अट् + ला + अन्–ह्यस्तनी। 'ला दाने' (२।२२) धातु से अन् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**१०. अद्विषुः।** अट् + द्विष् + अन् – ह्यस्तनी। 'द्विष अप्रीतौ' (२।६०) धातु से अन् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ५७०।

## ५७१. इचस्तलोपः [३।४।३१]

### [सूत्रार्थ]

इच् प्रत्यय के बाद अद्यतनीसंज्ञक 'त' प्रत्यय का लोप होता है।। ५७१।

### [दु० वृ०]

इचस्तप्रत्ययस्य सर्वस्य लोपो भवति। अपादि, अलावि। इचस्त इति किम् ? अकारितराम्।। ५७१।

## [दु० टी०]

इचः। न्यायान्निर्दिष्टस्य प्रत्ययस्य सर्वापहारी लोप इत्याह-इच इत्यादि। अथ किमर्थं तग्रहणम्, इचः परस्य प्रत्ययस्य लोपो भवन् अर्थात् तप्रत्ययस्य निमित्तस्य लोपो विज्ञायते ? सत्यम्। तशब्दस्य लोपे कृते 'तराम्–तमाम्' इत्येतयोरपि प्रत्ययान्तरयोर्लोपः प्राप्नोति **'यावत्सम्भवस्तावद् विधिः'** (का० परि० ५४) इति प्रयोगः समवायिरूपभेदः पुनः प्रवृत्तावप्यस्ति भिन्नफलमिति स्यादेव पुनः प्रवृत्तिरिति भावः। तग्रहणे सति न भवतीचः सम्बन्धी यस्तशब्द इति पञ्चम्यामपि **'अर्थवद्ग्रहणे नानर्थकस्य'** (का० परि० ४) इति वा। अत आह-इचस्त इत्यादि। आख्यातत्वादाख्यातिकस्यैव लोप इत्यपि **प्रतिपत्तिर्गरीयसीति**।। ५७१।

## [वि० प०]

इचस्त०। सर्वस्येति। **'निर्दिश्यमानानामादेशिनामादेशाः'** (का० परि० ७) इति न्यायात् प्रत्ययस्य सर्वापहारी लोप इत्यर्थः। अपादि इति। **''इजात्मने पदेः प्रथमैकवचने''** (३।२।२९) इतीच्। अलावीति। **''भावकर्मणोश्च''** (३।२।३०) इतीच्। **''इचस्त०''** (३।४।३२) इत्यादि, **''आख्यातकिमेकारान्ताव्ययेभ्यः क्रियागुणप्रकर्षवृत्तिभ्य एव तराम् तमाम्''** (२।६।४०–१) इति तमादित्वात् 'तराम्' प्रत्ययः। यदि तग्रहणं न स्यात् तदा **'यावत्सम्भवस्तावद् विधिः'** (का० परि० ५४) इति। अत्रापीचः परस्य तराम्–प्रत्ययस्य लोपः स्यात्। तथापि तदेकदेशस्य तस्य लोपः कथन्न स्यादिति चेत्, नैवम्। तद्ग्रहणे सतीचः सम्बन्धी यस्तशब्दः इति वेदितव्यम्। कश्चेचः सम्बन्धी तकारो यमाश्रित्यासावुत्पद्यते इति, अत एवेचः सम्बन्धी यस्तकारः सः किमर्थं गृहीतः इत्याशङ्क्यार्थः। तद्ग्रहणमन्तरेण पञ्चम्यपि स्यादिति तरामोऽपि लोपः स्यात्।। ५७१।

## [बि० टी०]

इच०। नन्वत्र तकारस्याकार **उच्चारणार्थः** किन्त्वकारसहितस्यैव, अतो निर्दिश्यमानानामित्युक्तम्, आकाराभावे न षष्ठी, इच् तलोप इति कृतं स्यात्। इच्सम्बन्धी त 'इच्–त' इति कृते केवलस्य लोपो भविष्यति किं षष्ठीनिर्देशेनेत्याह – इचस्तकारस्येति **वृत्तिः**।। ५७१।

## [समीक्षा]

'अकारि, अपाचि, अकारितराम्' इत्यादि शब्दों के सिद्ध्यर्थ इच् (चिण्) प्रत्यय के बाद अद्यतनीसंज्ञक त–प्रत्यय के लोप की आवश्यकता होती है, जिसका विधान दोनों व्याकरणों में किया गया है। पाणिनि का सूत्र है – ''चिणो लुक्'' (अ० ६। ४। १०४)। पाणिनि ने चिण् प्रत्यय तथा कातन्त्रकार ने इच् प्रत्यय किया है। उभयत्र इकारमात्र ही शेष रहता है, शेष अनुबन्ध हैं। लुक्–लोप का भी विधान अपने व्याकरण की व्यवस्थानुसार किया गया है। तराम्–तमाम् के रहने पर तलोप असिद्ध हो जाता है, अतः 'तराम्–तमाम्' घटित तकार का लोप नहीं होता।

## [विशेष वचन]

१. यावत्सम्भवस्तावद्विधिरिति प्रयोगः समवायिरूपभेदः पुनः प्रवृत्तावप्यस्ति (दु० टी०)।

२. आख्यातत्वादाख्यातिकस्यैव लोप इत्यपि प्रतिपत्तिर्गरीयसीति (दु० टी०)।

३. 'निर्दिश्यमानानामादेशिनामादेशाः' इति न्यायात् प्रत्ययस्य सर्वापहारी लोप इत्यर्थः (वि० प०)।

## [रूपसिद्धि]

१. **अपादि।** अट् + पद् + इच् + त। 'पद गतौ' (३। १०७) धातु से अद्यतनीविभक्तिसंज्ञक त—प्रत्यय, ''अड् धात्वादिर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु'' (३। ८। १६) से धातुपूर्व अडागम, ''इजात्मने पदेः प्रथमैकवचने'' (३।२।२९) से इच् प्रत्यय, ''अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिचट्सु'' (३।६।५) से दीर्घ तथा प्रकृत सूत्र से तकारलोप।

२. **अलावि।** अट् + लू + इच् + त। 'लूञ् छेदने' (८।९) धातु से अद्यतनीसंज्ञक त—प्रत्यय, अडागम, इच्, वृद्धि, आव् आदेश तथा प्रकृत सूत्र से 'त' प्रत्यय का लोप।। ५७१।

## ५७२. हेरकारादहन्तेः [३।४।३२]

## [सूत्रार्थ]

अकार से परवर्ती धातुविहित 'हि' प्रत्यय का लोप होता है, हन् धातु को छोड़कर।। ५७२।

## [दु० वृ०]

धातोर्विहितस्य हेरकारात् परस्य लोपो भवति अहन्तेः। पच, पठ, भव, दीव्य। हेर्व्यक्तित्वात्— पचतात्। अकारादिति किम् ? याहि। अहन्तेरिति किम् ? जहि शत्रून्। सन्निपातलक्षणस्य वर्णग्रहणे निमित्तत्वात्।। ५७२।

## [दु० टी०]

हेरकारा०। कथमिह लोपो न भवति पचहि, पठहि। हिशब्दोऽयमव्ययो यस्मादर्थे वर्तते इत्याह — धातोर्विहितस्य हेरिति। यस्तु प्रकरणमाश्रयति नासौ विहितविशेषणमाद्रियते, पश्चात् पठतादिति हेर्लोपश्च प्राप्नोति, तातणादेशश्च, तत्र परत्वात् तातण्। पुनः स्थानिवद्भावात् लोपो न भवति। **'सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव'** (का० परि० ३६) इति न्यायात्। एवमुत्तरत्रापि **''हन्तेर्जः हौ''** (३।४।४९) इति हि—प्रत्ययमपेक्ष्य जकारादेशे सति अकारान्तता, ततश्च **'सन्निपातलक्षणो विधिरनिमित्तं तद्विघाताय'** (का० परि० ३१) इति न भविष्यति ? सत्यम् । अहन्तेरिति प्रतिषेधो विज्ञापयति — वर्णग्रहणे निमित्तत्वादिति। तेन 'दाक्षिः, प्लाक्षिः' इत्यत्र निमित्तत्वमेव इणोऽवर्णलोपे कर्तव्ये इति मनसि कृत्वाह — सन्निपात इत्यादि।। ५७२।

## [वि० प०]

हेरकारा०। पचतादिति। ''**आशिषि तुह्योस्तातण् वा वक्तव्यः**'' इति वचनात् परत्वात् तातणि कृते स्थानिवद्भावात् पुनर्लोपः प्राप्नोतीति व्यक्त्यन्तरत्वान्न भवति। जहीति। ''**हन्तेर्ज हौ**'' (३।४।४९) इति जादेशः। ननु हौ परे जादेशोऽयमिति **सन्निपातलक्षणपरिभाषा** न तल्लोपे निमित्तम्, किम् अहन्तेरिति प्रतिषेधेन ? सत्यम्। वर्णग्रहणे निमित्तत्वादित्याह – सन्निपातेत्यादि। तथा च ''**अकारो दीर्घं घोषवति**'' (२।१।१४) इत्यत्र वर्णग्रहणे निमित्तत्वादिति परिभाषा घोषवद्ग्रहणेन ज्ञापितेति।। ५७२।

## [समीक्षा]

'पच, पठ, गच्छ, धाव' आदि शब्दरूपों के सिद्ध्यर्थ पञ्चमीविभक्तिसंज्ञक 'हि' प्रत्यय के लोप की आवश्यकता होती है, इसी का विधान दोनों ही आचार्यों ने किया है। पाणिनि का सूत्र है – ''अतो हेः'' (अ० ६।४।१०५)। कातन्त्रकार ने हन्–धातु का निषेध सूत्र में किया है, अतः 'जहि' में 'हि' का लोप नहीं होना है। पाणिनि ने इसका विधान नहीं किया है।

## [रूपसिद्धि]

**१. पच।** पच् + अन् + हि। 'डु पचष् पाके' (१।६०३) धातु से पञ्चमीविभक्तिसंज्ञक मध्यमपुरुष–एकवचन 'हि' प्रत्यय, ''अन् विकरणः कर्तरि'' (३।२।३२) से अन् विकरण तथा प्रकृत सूत्र से 'हि' का लोप।

**२. पठ।** पठ् + अन् + हि। 'पठ पठने' (१। १११) धातु से पञ्चमीसंज्ञक। मध्यमपुरुष – एकवचन 'हि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**३. भव।** भू + अन् + हि। 'भू सत्तायाम्' (१।१) धातु से हि–प्रत्यय, अन् विकरण, ''नाम्यन्तयोर्धातुविकरणयोर्गुणः'' (३। ५। १) से भूधातुघटित ऊकार को गुण, ''ओ अव्'' (१। २। १४) से ओ को अवादेश तथा प्रकृत सूत्र से 'हि' का लोप।

**४. दीव्य।** दिव् + यन् + हि। 'दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिकान्तिगतिषु' (३।१) धातु से पञ्चमीविभक्तिसंज्ञक 'हि' प्रत्यय, ''दिवादेर्यन्'' (३।२।३३) से यन् विकरण, ''नामिनो र्वोरकुर्छुरोर्व्यञ्जने'' (३।८।१४) से दिव्धातुघटित इकार को दीर्घ तथा प्रकृत सूत्र से हि का लोप।। ५७२।

## ५७३. नोश्च विकरणादसंयोगात् [३।४।३३]

## [सूत्रार्थ]

संयोगभिन्न नु–विकरण से परवर्ती हि का लोप होता है।। ५७३।

## [दु० वृ०]

नोश्च विकरणादसंयोगात् परस्य हेर्लोपो भवति। चिनु, सुनु। विकरणादिति किम् ? नुहि। असंयोगादिति किम् ? राध्नुहि।। ५७३।

## [दु० टी०]

नोश्च०। न विद्यते संयोगो यस्येति विग्रहः। चकारः उक्तसमुच्चयमात्रे। नुहीति। 'नु स्तुतौ' (२।७)। राध्नुहीति। 'राध साध संसिद्धौ' (४।१६)॥ ५७३।

## [बि० टी०]

नोश्च विक०। न विद्यते संयोगो यस्येति। 'तक्ष्णुहि' इत्यत्रैव प्रतिषेधः स्यात्। कथं राध्नुहीति। अथ न संयोगोऽसंयोगः इति चेत् केवलो नुः संयोगो न भवत्येव ? सत्यम्, बहुव्रीहिरेवायं नोरवयवेन व्यञ्जनेनेति भिन्नेन वा संयोगो नास्ति। **टीकायाम**पि बहुव्रीहिर्दर्शितः॥ ५७३।

## [समीक्षा]

'चिनु, सुनु' इत्यादि शब्दरूपों के सिद्ध्यर्थ 'नु' विकरण के बाद 'हि' के लोप की आवश्यकता होती है। इसका विधान दोनों ही आचार्यों ने किया है। पाणिनि का सूत्र है – ''उतश्च प्रत्ययादसंयोगपूर्वात्'' (अ० ६।४।१०६)। पाणिनि ने उकार का उल्लेख करके 'उ–नु' दोनों ही विकरणों से परवर्ती 'हि' का लोप करके लाघव प्रदर्शित किया है। कातन्त्रकार ने 'नु' तथा 'उ' विकरणों का भिन्न–भिन्न सूत्रों में उल्लेख स्पष्टावबोध के लिए किया है। तनादिगणपठित धातुओं से होने वाले 'उ' विकरण से परवर्ती 'हि' का लोप करने के लिए अग्रिम सूत्र है – ''उकाराच्च'' (३।४।३४)।

## [रूपसिद्धि]

१. **चिनु**। चि + नु + हि। 'चिञ् चयने' (४।५) धातु से पञ्चमी विभक्ति-संज्ञक मध्यमपुरुष–एकवचन 'हि' प्रत्यय, ''नुः ष्वादेः'' (३।२।३४) से 'नु' विकरण तथा प्रकृत सूत्र से हि का लोप।

२. **सुनु**। सु + नु + हि। 'षुञ् अभिषवे' (४।१) धातु से पञ्चमीविभक्तिसंज्ञक हि–प्रत्यय, नु–विकरण तथा प्रकृत सूत्र से हि का लोप॥ ५७३।

# ५७४. उकाराच्च [३।४।३४]

## [सूत्रार्थ]

'उ' विकरण से परवर्ती 'हि' प्रत्यय का लोप होता है॥ ५७४।

## [दु० वृ०]

उकाराच्च विकरणात् परस्य हेर्लोपो भवति। तनु, कुरु। विकरणादिति किम् ? नुहि॥ ५७४।

## [दु० टी०]

उकारात्०। उकाराच्च विकरणादसंयोगादित्येकयोगे उकाराकरणादिति द्वयोः सामानाधिकरण्यनिर्देशे विशेषणविशेष्यभावं प्रति **कामचार** इति न युक्तः पक्षः। उकारात्

किम्भूताद् विकरणात्, विकरणात् किम्भूताद् उकारान्तादिति। अत्रासंयोगग्रहणात् तदन्तमेव न्याय्यं स्यात्। किञ्चासन्दिग्धार्थं सूत्रं प्रशस्यते **बुधैः**।। ५७४।

## [वि० प०]

उकारात्। कुर्विति। **'डु कृञ्'** (७।७), हि, **''तनादेरुः''** (३।२।३७), **''करोतेः''** (३।५।४) इति गुणः, **''अस्योकारः सार्वधातुकेऽगुणे''** (३।४।३९) इत्युकारः, **''हौ च''** (३।५।२४) इत्यगुणत्वम्।। ५७४।

## [बि० टी०]

उकारात्०। 'नुहि' इति **वृत्तिः**। ननु कथमुक्तं यावता पूर्वस्य व्यावृत्तिबलान्न भविष्यति ? सत्यम्। स्नुहीति प्रत्युदाहृतम्। एतदपि विषयीकरोति चेद् असंयोगस्य व्यावृत्त्या न भविष्यतीति चेद्, असंयोगादिति नानुवर्तते इष्टत्वादिति। अथवा 'उतो नोश्च विकरणात्' इत्येकयोगे सिद्धे पृथक्करणादसंयोगादिति निवर्तते इति **कश्चित्। वस्तुतस्तु** स्नुहीत्यत्र विषयो नास्ति। असंयोगादित्यत्र न विद्यते संयोगो यस्मिन्निति तादृशस्य नोरित्युक्ते सिद्धत्वात्, किञ्च पूर्ववद् उत्त्वेन व्यावृत्त्या उकारस्य व्यावृत्तिः प्रतिबन्धुं न क्षमते। यथा 'मातुः स्मृतवान्' इत्यत्र कृद्योगलक्षणषष्ठ्यभावो निष्ठादित्वात्। स्मृत्यर्थद्वारा भवत्येवेत्याह—विकरणादिति।। ५७४।

## [समीक्षा]

उक्त सूत्र की समीक्षा द्रष्टव्य है, जिसमें पाणिनि के द्वारा 'नुविकरण—उकार' दोनों से परवर्ती 'हि' का लोप करने के लिए एक ही सूत्र बनाया गया है तथा कातन्त्रकार ने स्पष्टावबोधार्थ दो सूत्र बनाए हैं।

## [विशेष वचन]

१. विशेषणविशेष्यभावं प्रति कामचारः इति न युक्तः पक्षः (दु० टी०)।

२. किञ्चासन्दिग्धार्थं सूत्रं प्रशस्यते बुधैः (दु० टी०)।

३. अथवा 'उतो नोश्च विकरणात्' इत्येकयोगे सिद्धे पृथक्करणाद् असंयोगाद् इति निवर्तते इति कश्चित् (बि० टी०)।

## [रूपसिद्धि]

१. **तनु**। तन् + हि—पञ्चमी। 'तनु विस्तारे' (७।१) धातु से पञ्चमीविभक्तिसंज्ञक मध्यमपुरुष—एकवचन 'हि' प्रत्यय, ''तनादेरुः'' से उ—विकरण तथा प्रकृत सूत्र से 'हि' का लोप।

२. **कुरु**। कृ + हि—पञ्चमी। 'डु कृञ् करणे' (७।७) धातु से पञ्चमीविभक्तिसंज्ञक 'हि' प्रत्यय, ''तनादेरुः'' (३।२।३७) से उ—विकरण, ''करोतेः'' (३।५।४) से ऋ को गुण-अर्, उ को प्राप्त गुण का ''हौ च'' (३।५।२४) सूत्र से निषेध, ''अस्योकारः'' (३।४।३९) से अकार को उकार तथा प्रकृत सूत्र से हि का लोप।। ५७४।

## ५७५. उकारलोपो वमोर्वा [३।४।३५]

### [सूत्रार्थ]

असंयोग से परवर्ती विकरणघटित उकार का लोप होता है 'व्–म्' के परे रहते।। ५७५।

### [दु० वृ०]

असंयोगाच्च परस्य विकरणस्योकारस्य लोपो भवति वा वमोः परतः। सुन्वः, सुनुवः। सुन्मः, सुनुमः। तन्वः, तनुवः। तन्मः, तनुमः। आद्यन्तवद्भावात्-'सुनोमि, तनोमि' इति परत्वात् स्वरादेशत्वाद् वा सिद्धम्।। ५७५।

### [दु० टी०]

उकार०। **अर्थवशाद् विभक्तिविपरिणाम** इत्याह – असंयोगस्य विकरणस्येति। 'सुन्वः, सुन्मः' इति युक्तम्, अवयवार्थस्य सम्भवात्। 'तन्वः, तन्मः' इति कथमिति मनसि कृत्वाह – आद्यन्तवद्भावाद् इति। **''आद्यन्तवदेकस्मिन्''** (का० परि० २०) इत्युच्यते, अर्थोऽत्रान्वयी अर्थवत्तायां व्यपदेशिवद्भावः, सार्वधातुकार्था हि भावकर्मकर्तारः, शब्दोपजननमात्रं विकरणा इत्यानर्थक्याद् **व्यपदेशिवद्भावो** न प्राप्नोति ? सत्यम्। 'सहाभिधायिनो विकरणाः' इत्युक्तमेव। 'सुनोमि, तनोमि' इति परत्वाद् इत्युभयसावकाशे **'पूर्वपरयोः परो विधिर्बलवान्'** (कलाप० २२१।५०) इति गुण एवावयवव्यपदेशेन च स्थानिवद्भाव इति, स्वरादेशत्वाद् वेति **'लोपस्वरादेशयोः स्वरादेशो विधिर्बलवान्'** (का० परि० ३५) इति भावः। अगुणम् अनुवर्तयन्ति **अन्ये**। पुनरुकारग्रहणम् उकाराद् वमोर्लोप इति पञ्चमीयोगनिवृत्त्यर्थ इति। पुनर्लोपग्रहणं विकरणोकारस्येति सामानाधिकरण्यविघातार्थम्। किमर्थं वाग्रहणम् उत्तरत्र नित्यत्वमस्तीति विभाषा अनुमीयते, तर्हि पूर्वेष्वपि योगेषु संभाव्यते। यथा **''कर्तृकर्मणोः कृति नित्यम्''** (२।४।४१) इति स्थितम्।। ५७५।

### [वि० प०]

उकारलोपः। ननु कथं 'तन्वः, तन्मः' इत्यत्रोकारलोपः, यावता विकरणस्य य उकारस्तस्य लोप इति। अयं तूकारमात्रविकरण इत्याह – आद्यन्तवद्भावादिति। एकस्मिन्नपि व्यपदेशिवद्भावेनाद्यन्तवद्भावः। यथा 'राहोः शिरः, शिलपुत्रकस्य शरीरम्' इति भावः।। ५७५।

### [बि० टी०]

उकार०। 'सुनोमि, तनोमि' इति वृत्तिः। **'सर्वविधिभ्यो लोपविधिर्बलवान्'** (का० परि० ३४) इति कथन्न स्यात् चेत्, तुष्यतु दुर्जनः, तथापि स्वरादेशः स्यात्।। ५७५।

### [समीक्षा]

'सुन्वः, सुन्मः, तन्वः, तन्मः' इत्यादि शब्दों के सिद्ध्यर्थ विकरण 'उ' के लोप

की आवश्यकता होती है, इसका विधान दोनों व्याकरणों में किया गया है। पाणिनि का सूत्र है – ''लोपश्चास्यान्यतरस्यां म्वोः'' (अ० ६। ४। १०७)।

## [विशेषवचन]

१. अर्थवशाद् विभक्तिविपरिणामः (दु० टी०)।

२. सहाभिधायिनो विकरणाः (दु० टी०)।

३. एकस्मिन्नपि व्यपदेशिवद्भावेनाद्यन्तवद्भावः (वि० प०)।

## [रूपसिद्धि]

१. **सुन्वः**। सु + नु + वस्। 'षुञ् अभिषवे' (४। १) धातु से वर्तमानाविभक्तिसंज्ञक उत्तमपुरुष–द्विवचन 'वस्' प्रत्यय, ''नुः ष्वादेः'' (३।२।३४) से 'नु' विकरण, प्रकृत सूत्र से नु–विकरणगत उकार का लोप तथा सकार को विसर्गादेश। उकारलोप न होने पर 'सुनुवः' रूप साधु होगा।

२. **सुन्मः**। सु + नु + मस्। 'षुञ् अभिषवे' (४। १) धातु से वर्तमानासंज्ञक उत्तमपुरुष–बहुवचन 'मस्' प्रत्यय, नु–विकरण, प्रकृत सूत्र से उकार का लोप तथा सकार का विसर्गादेश। उकारलोप के अभाव में 'सुनुमः' शब्दरूप साधु होगा।

३. **तन्वः**। तन् + उ + वस्। 'तनु विस्तारे' (७। १) धातु से वर्तमानासंज्ञक उत्तमपुरुष–द्विवचन 'वस्' प्रत्यय, ''तनादेरुः'' (३।२।३७) से 'उ' विकरण, प्रकृत सूत्र से उसका लोप तथा सकार को विसर्गादेश। उकार का लोप न होने पर 'तनुवः' रूप सिद्ध होगा।

४. **तन्मः**। तन् + उ + मस्। 'तनु विस्तारे' (७१) धातु से वर्तमानासंज्ञक उत्तमपुरुष–बहुवचन 'मस्' प्रत्यय, उ–विकरण, उसका लोप तथा सकार को विसर्गादेश। उकारलोप के अभाव में 'तनुमः' शब्द साधु माना जाता है।। ५७५।

# ५७६. करोतेर्नित्यम् [३।४।३६]

## [सूत्रार्थ]

'कृ' धातु से होने वाले विकरण के उकार का लोप होता है, व् तथा म् के परवर्ती होने पर।। ५७६।

## [दु० वृ०]

करोतेः परस्य विकरणोकारस्य नित्यं लोपो भवति वमोः परतः। कुर्वः, कुर्मः।। ५७६।

## [दु० टी०]

करोतेः। **सुखपाठार्थ** एव तिब् निर्दिश्यते। नित्यग्रहणं किमर्थम्, वचनान्नित्यमिति चेत्, इह ''ये च'' (३।४।३८) इति अबाधिता विभाषा वर्तते।। ५७६।

## [समीक्षा]

'कुर्वः, कुर्मः' शब्दों के सिद्ध्यर्थ अपेक्षित उ–विकरण के लोप का विधान दोनों ही आचार्यों ने किया है। पाणिनि का सूत्र है – ''नित्यं करोतेः'' (अ० ६।४।१०८)।

## [रूपसिद्धि]

१. **कुर्वः**। कृ + उ + वस्। 'डु कृञ् करणे' (७।७) धातु से वर्तमानाविभक्तिसंज्ञक उत्तमपुरुष–द्विवचन 'वस्' प्रत्यय, ''तनादेरुः'' (३।२।३७) से उ–विकरण, ''करोतेः'' (३।५।४) से कृधातुगत ऋ को गुण-अर्, ''नाम्यन्तयोर्धातुविकरणयोर्गुणः'' (३।५।१) से उ–विकरण को गुणादेश प्राप्त होने पर ''द्वित्वबहुत्वयोश्च परस्मै'' (३।५।१९) से उसका निषेध, ''अस्योकारः सार्वधातुकेऽगुणे'' (३।४।३९) से अकार को उकार, प्रकृत सूत्र से उ–विकरण का लोप तथा सकार को विसर्गादेश।

२. **कुर्मः**। कृ + उ + मस्। 'डु कृञ् करणे' (७।७) से मस् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ५७६।

# ५७७. ये च [३। ४। ३७]

## [सूत्रार्थ]

यकार के परवर्ती होने पर कृ–धातु से होने वाले विकरण के उकार का नित्य लोप होता है।। ५७७।

## [दु० वृ०]

करोतेर्नित्यं विकरणोकारस्य लोपो भवति ये च परतः। कुर्यात्, कुर्याताम्, कुर्युः।। ५७७।

## [दु० टी०]

ये च। चकार उक्तसमुच्चयमात्रे उकारलोपस्य दीर्घविधावस्थानिवद्भावाद् व्यञ्जने दीर्घत्वं प्राप्तं कुर्छुरोर्निषिध्यते।। ५७७।

## [समीक्षा]

'कुर्यात्, कुर्याताम्, कुर्युः' इत्यादि शब्दरूपों के सिद्ध्यर्थ विकरण उकार के लोप की अपेक्षा होती है, इसका विधान दोनों ही आचार्यों ने किया है। पाणिनि का भी यही सूत्र है – ''ये च'' (अ० ६। ४। १०९)।

## [रूपसिद्धि]

१. **कुर्यात्**। कृ + उ + यात्। 'डु कृञ् करणे' (७।७) धातु से सप्तमीविभक्तिसंज्ञक प्रथमपुरुष–एकवचन 'यात्' प्रत्यय, उ–विकरण, कृधातु–गत ऋ को गुण-अर्, अ को उ, उसका गुण प्राप्त होने पर उसका निषेध तथा प्रकृत सूत्र से उ–विकरण का लोप।

२. **कुर्याताम्**। कृ + उ + याताम्। 'डु कृञ् करणे' (७।७) धातु से सप्तमीविभक्तिसंज्ञक प्रथमपुरुष–द्विवचन 'याताम्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

३. **कुर्युः**। कृ + उ + युस्। 'डु कृञ् करणे' (७।७) धातु से सप्तमीविभक्तिसंज्ञक प्रथमपुरुष–बहुवचन 'युस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ५७७।

## ५७८. अस्योकारः सार्वधातुकेऽगुणे [३।४।३८]

### [सूत्रार्थ]

कृधातुघटित ऋकार को गुण हो जाने के बाद अकार को उकारादेश होता है, अगुण सार्वधातुकसंज्ञक प्रत्यय के परे रहते।। ५७८।

### [दु० वृ०]

करोतेरकारस्यागुणे सार्वधातुके परे उकारो भवति। कुरुतः, कुर्वन्ति। कथं कुरु ? प्रत्ययलोपलक्षणत्वाद् गुणो नैव स्वरूपनिर्देशात्। सार्वधातुक इति किम् ? सञ्चस्करुः। अगुण इति किम् ? करोमि।। ५७८।

### [दु० टी०]

अस्यो०। ह्रस्वोऽयमादेशो न दीर्घोऽकुर्छुरोरिति निषेधात्। गुणो नैवेत्यादि। यदि **"नामिनश्चोपधाया लघोः"** (३।५।२) इति वर्तते, तदा रेफोकार इति विदध्यादिति भावः। कारग्रहणं **निर्देशसुखार्थम्**। यस्त्वाह – कारग्रहणं **स्वरूपपरिग्रहार्थम्**, तदा दीर्घोऽपि न भविष्यति किं कुर्छुरोर्दीर्घप्रतिषेधेनेति ? सार्वधातुक इति किम् ? सञ्चस्करुरिति। ऋतश्च संयोगादेरिति परोक्षायामगुणे कृते सत्यकारोऽस्त्येवागुणत्वं प्रसिद्धमिति अगुणनिमित्तं न विहन्यते, यद्येवं विकरणेन करोतिर्विशिष्यते विशेषणेन च तदन्तविधिर्विकरणान्तस्य करोतेरिति। किं सार्वधातुकग्रहणेन करोतेरित्युकारनिर्देशाद् वा।

न च भूतपूर्वसार्वधातुकप्रतिपत्त्यर्थमुच्यते कुर्विति प्रत्ययलोपलक्षणत्वाद् इत्युक्तमेव। यद्यत्र सार्वधातुकग्रहणं न क्रियते तदा अस्तेरित्यत्र भूतवान् इत्यादेर्लोपः स्यात् तदादेशास्तद्वदिति, नैवम्। अत इति तत्रोच्यते इति तिब्बलाद् वा। यच्च **'उभयेषामीकारो व्यञ्जनादावदः'** (३।४।४४) इत्यत्र सार्वधातुक इति किं लालायते इत्युक्तम्, तत्रापि प्रतिविधीयते आकारेणोभये विशिष्यन्ते, **'विशेषणेन च तदन्तविधिः'** इत्युभयेषामाकारान्तानामिति। अत्र तु चेक्रीयितान्तस्य द्विर्वचने यकारान्तमभ्यस्तमिति। तर्हि 'यायावरः' इति दुष्यति, यलोपे कृते परिशिष्टस्याभ्यस्तसंज्ञा सन्निविशते, ततः **"यातेर्वरः"**। **"प्रत्ययलुकां चानाम्"** (४।१।४) इति गुणप्रतिषेधः। तत्रापि क्र्यादिविकरणस्य साहचर्यात् सार्वधातुकस्यैवाभ्यस्तस्येत्युच्यते। अथ 'येन विधिस्तदन्तस्य' (का० परि० ३) इति, न च तत्रास्ति विकरणस्य समीपत्वात् ? सत्यम्, सम्बन्धेनापि नार्थो भिद्यते विकरणे यः करोतिरिति करोतिमाश्रित्य विकरणो भवतीति आश्रयाश्रयिभावसम्बन्धः।

सार्वधातुक इति किम् ? दरिद्रायकः, दरिद्राणमिति। **अस्यायमर्थः** – सार्वधातुक इति किमर्थम् **"दरिद्रातेरसार्वधातुके"** (३।६।३४) इति लोपोऽस्ति, युवोरनिटि सनि च

लोपो न दृश्यते। अत्रापि व्यञ्जनादावगुण इति वर्तमानादप्राप्तिरिति नास्ति परिहार इति भावः। अथ मतं कारयामासतुरिति स्वरविधिः स्वरे द्विर्वचननिमित्ते कृते द्विर्वचने **''अस्यादेः सर्वत्र''** (३।३।१८) इति दीर्घ बाधित्वा परत्वादकारलोपः स्यात् तथापि इह नास्ति व्यावृत्तिरिति भावः, अन्यत्रापि **सुखप्रतिपत्तिफलमेव** सार्वधातुकमिति।। ५७८।

## [वि० प०]

अस्यो०। ननूकारे कृते **'एकदेशविकृतमनन्यवत्'** (का० परि० १) इति न्यायात् करोतिरेवायमिति पुनः करोतेरित्युपधायाः **'यावत्सम्भवस्तावद्विधिः'** (का० परि० ५४) इति कथं गुणो न भवतीत्याह-गुणो नैव स्वरूपनिर्देशादिति। अन्यथौकारमेव निर्दिशेदिति भावः। सार्वधातुक इत्यादि। सम्–पूर्वः कृञ्, परोक्षाया उस् **''सुट् भूषणे सम्पर्युपात्''** (३।७।३८) इति सुट्, द्विर्वचनम्, **''ऋतश्च संयोगादेः''** (३।६।१५) इति गुणे सति आकारोऽस्त्येवेति। यदि पुनः सार्वधातुकग्रहणं न स्यात् तदेहापि स्यादिति। ननु चागुणग्रहणादिहागुणे भवति। अत्र च गुणस्य सद्भावाद् गुण्येवायं प्रत्ययः इति कुतः प्रसङ्ग इति न चोद्यम्। अगुणत्वं हि प्रसिद्धमिह गृह्यते, तच्चास्त्येवेति। **''ऋतश्च संयोगादेः''** (३।६।१५) इत्यत्रागुण एव परोक्षाप्रत्यये गुण इति नैतावता तस्य गुणित्वं स्यादिति।। ५७८।

## [बि० टी०]

अस्यो०। ननु 'मेर्गुणित्वेऽप्यकारो वक्तव्यः' इति **वररुचिः**। यथा –

किं करोमि कथं कुर्मि कुत्र गच्छामि माधव!
दुर्योधनविहीनं तु सर्वशून्यमिदं जगत्।। **इति** भारते।

सत्यम्, अगुण इत्यस्य नञा निर्दिष्टत्वात्। **केचित्** तु कार्यिनिमित्तयोर्व्युत्क्रमनिर्देशं वर्णयन्ति। ननु उकार इति दीर्घो ह्रस्वो वा, उभयथा निर्देशस्य साम्यात् ? सत्यम्। आद्ये **निःसन्देहार्थं** पृथक् पठेत्। अथ पश्चादप्येवं कथं न स्यादिति चेत् **'कमलवनोद्घाटनं कुर्वते ये'** इति प्रयोगात्। अथवा **''नामिनो वोरकुर्छुरोर्व्यञ्जने''** (३।४।१४) इत्यत्र कुर्ग्रहणस्य कुर्याद् इत्युक्तत्वाद् ह्रस्व एवायमिति।। ५७८।

## [समीक्षा]

'कुरुतः, कुर्वन्ति' इत्यादि शब्दों के सिद्ध्यर्थ कृधातुघटित ऋकार को गुण (अर्) आदेश होने के बाद अकार को उकारादेश करने की आवश्यकता होती है। इसकी पूर्ति दोनों ही आचार्यों ने की है। पाणिनि का सूत्र है – ''अत उत् सार्वधातुके'' (अ० ६। ४। ११०)।

## [रूपसिद्धि]

**१. कुरुतः**। कृ + उ + तस्। 'डु कृञ् करणे' (७।७) धातु से वर्तमानाविभक्तिसंज्ञक प्रथमपुरुष–द्विवचन 'तस्' प्रत्यय, ''तनादेरुः'' (३।२।३७) से उ–विकरण, ''करोतेः'' (३।५।४) से कृधातुघटित ऋकार को गुण-अर्, ''द्वित्वबहुत्वयोश्च'' (३।५।९) से अगुण, प्रकृत सूत्र द्वारा अकार को उकार तथा सकार को विसर्गादेश।

२. **कुर्वन्ति**। कृ + उ + अन्ति। 'डु कृञ् करणे' (७।७) धातु से वर्तमानाविभक्तिसंज्ञक प्रथमपुरुष–बहुवचन 'अन्ति प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ५७८।

## ५७९. रुधादेर्विकरणान्तस्य लोपः [३।४।३९]

### [सूत्रार्थ]

रुधादि धातुओं से होने वाले विकरण 'न' के अन्तिम अकार का लोप होता है, अगुण सार्वधातुकसंज्ञक प्रत्यय के परे रहते।। ५७९।

### [दु० वृ०]

रुधादेर्विकरणान्तस्य लोपो भवति अगुणे सार्वधातुके परे। रुन्द्धः, रुन्धन्ति। भिन्तः, भिन्दन्ति। अगुण इति किम् ? रुणद्धि, भिनत्ति।। ५७९।

### [दु० टी०]

रुधादेः। किमर्थमन्तग्रहणम्। अस्येति वर्त्तिष्यते, तथा वक्ष्यमाणेऽप्यादिग्रहणमनर्थकम्, तथा अस्तेरप्यकरणीयम्भवति। परत्वादवर्णस्याकार इति दीर्घस्य कथं लोपः ? सत्यम्, **मन्दधियां सुखसम्बन्धविशेषज्ञापनार्थम्,** अन्यथा निर्दिष्टस्य विकरणस्यैव लोपः प्रतिपद्यते अस्तेश्चान्तस्येति।। ५७९।

### [वि० प०]

रुधादेः। रुन्द्धः इति। "**स्वराद् रुधादेः परो नशब्दः**" (३।२।३६) इति नशब्दः; अन्तलोपेऽनुस्वारे वर्गे वर्गान्तः, "**घढधभेभ्यस्तथोर्धोऽधः**" (३। ८। ३), "**धुटां तृतीयश्चतुर्थेषु**" (३।८।८) इति पूर्वधकारस्य दत्वम्। भिन्तः इत्यादि। "**अघोषेष्वशिटां प्रथमः**" (३। ८। ९)।। ५७९।

### [समीक्षा]

'रुन्धन्ति, भिन्दन्ति' इत्यादि शब्दों के सिद्ध्यर्थ 'न' विकरणघटित अकार के लोप की आवश्यकता होती है, इसका विधान दोनों ही आचार्यों ने किया है। पाणिनि का सूत्र है – "श्नसोरल्लोपः" (अ० ६। ४। १११)।

### [रूपसिद्धि]

१. **रुन्द्धः**। रुध् + न + तस्। 'रुधिर् आवरणे' (६। १) धातु से वर्तमानासंज्ञक प्रथमपुरुष–द्विवचन 'तस्' प्रत्यय, "द्वित्वबहुत्वयोश्च परस्मै" (३।५।९) से अगुण, "स्वराद् रुधादेः परो नशब्दः" (३।२।३६) से न–विकरण, प्रकृत सूत्र से न–घटित अकार का लोप, "घढधभेभ्यस्तथोर्धोऽधः" (३।८।३) से 'त्' को ध्, "धुटां तृतीयश्चतुर्थेषु" (३।८।८) से धातुघटित ध् को द्, न् को अनुस्वार, अनुस्वार को न् तथा स् को विसर्गादेश। "धुटां धुट्येकवर्गे" (कात० परि० सं०-७६) से द् का लोप होने पर 'रुन्धः' रूप बनेगा।

---

१. इस विषय में कातन्त्रपरम्परा का एक श्लोकवचन प्रसिद्ध है – 'त्रयो यत्रैकवर्गीया मध्यमस्तत्र लुप्यते' (द्र०-वर्द्धभाष्य)।

२. **रुन्धन्ति**। रुध् + न + अन्ति। 'रुधिर् आवरणे' (६।१) धातु से वर्तमानाविभक्तिसंज्ञक प्रथमपुरुष–बहुवचन 'अन्ति' प्रत्यय, न–विकरण तथा प्रकृत सूत्र से न–विकरणघटित अकार का लोप।

३. **भिन्तः**। भिद् + न + तस्। 'भिदिर् विदारणे' (६।२) धातु से 'तस्' प्रत्यय, न–विकरण, अगुण, प्रकृत सूत्र द्वारा अन्तलोप, "अघोषेष्वशिटां प्रथमः" (३।८।९) से द् को त् तथा सकार का विसर्गादेश।

४. **भिन्दन्ति**। भिद् + न + अन्ति। 'भिदिर् विदारणे' (६।२) धातु से वर्तमानासंज्ञक 'अन्ति' प्रत्यय, न–विकरण तथा अन्तलोप॥ ५७९।

## ५८०. अस्तेरादेः [३।४।४०]

### [सूत्रार्थ]

'अस्' धातु के आदि अवयव अकार का लोप होता है, अगुण सार्वधातुकसंज्ञक प्रत्यय के परे रहते॥ ५८०।

### [दु० वृ०]

अस्तेरादेरवयवस्य लोपो भवति अगुणे सार्वधातुके परे। स्तः, सन्ति। अगुण इति किम् ? अस्ति॥ ५८०।

### [दु० टी०]

अस्ते०। तिब्–निर्देशः **सुखार्थ** एव॥ ५८०।

### [समीक्षा]

'स्तः, सन्ति' आदि शब्दरूपों के सिद्ध्यर्थ 'अस्' धातुघटित अकार के लोप की आवश्यकता होती है, इसकी पूर्ति दोनों ही व्याकरणों में देखी जाती है। अन्तर यह है कि कातन्त्रकार ने न–विकरण तथा अस् धातु में अकारलोप के लिए स्वतन्त्र दो सूत्र बनाए हैं, जबकि पाणिनि ने "श्नसोरल्लोपः" (अ० ६। ४। १११) इस एक ही सूत्र से कार्य सम्पन्न किया है। इस प्रकार यहाँ पाणिनिकृत लाघव स्पष्ट है।

### [रूपसिद्धि]

१. **स्तः**। अस् + अन्–विकरणलुक् + तस्। 'अस् भुवि' (२।२८) धातु से वर्तमानासंज्ञक 'तस्' प्रत्यय, "अन् विकरणः कर्तरि" (३।२।३२) से अन् विकरण, "अदादेर्लुग् विकरणस्य" (३।४।९२) से उसका लुक्, प्रकृत सूत्र द्वारा अस्धातुघटित अकार का लोप तथा सकार को विसर्गादेश।

२. **सन्ति**। अस् + अन्–विकरणलुक् + अन्ति। 'अस् भुवि' (२।२८) धातु से 'अन्ति' प्रत्यय, अन् विकरण, उसका लुक्, अगुण तथा प्रकृत सूत्र द्वारा अस्–धातुगत अकार का लोप॥ ५८०।

## ५८१. अभ्यस्तानामाकारस्य [३।४।४१]

### [सूत्रार्थ]

अभ्यस्तसंज्ञक शब्दों के अन्तर्गत **आकार का लोप होता है,** अगुण सार्वधातुकसंज्ञक प्रत्यय के पर में रहने पर।। ५८१।

### [दु० वृ०]

अभ्यस्तसंज्ञकानामाकारस्यागुणे सार्वधातुके परे लोपो भवति। मिमते, मिमताम्। जिहते, जिहताम्। दत्ते, धत्ते। अगुण इति किम् ? जहाति।। ५८१।

### [दु० टी०]

अभ्यस्ता०। व्यञ्जनादावीत्त्वं वक्ष्यति, स्वरादौ विधिरयं तथापरश्च योग इति।। ५८१।

### [वि० प०]

अभ्यस्तानाम्०। मिमते इत्यादि। जुहोत्यादित्वाद् द्विर्वचनम्, माङ्हाङोरभ्यासस्य **''भृञ्हाङ्माङामित्''** (३।३।२४) इतीत्त्वम्, **''आत्मने चानकारात्''** (३।५।३९) इति नलोपः। धत्ते इति। 'डु धाञ्'। पूर्ववद् द्विर्वचनम्, अभ्यासतृतीयत्वे तथोश्च दधातेरिति पुनर्दकारस्य धकारः।। ५८१।

### [समीक्षा]

'मिमते, जिहते, दत्ते, धत्ते' इत्यादि शब्दरूपों के सिद्ध्यर्थ धातुघटित आकार के लोप की आवश्यकता होती है, इसका विधान दोनों ही व्याकरणों में किया गया है। पाणिनि का सूत्र है – ''श्नाभ्यस्तयोरातः'' (अ० ६।४। ११२)।

### [रूपसिद्धि]

**१. मिमते।** मा + अन्लुक् + अन्ते। 'माङ् माने शब्दे च' (२। ८६) धातु से वर्तमानासंज्ञक प्रथमपुरुष–बहुवचन 'अन्ते' प्रत्यय, ''अन् विकरणः कर्तरि'' (३।२।३२) से अन् विकरण, ''अदादेर्लुग् विकरणस्य'' (३।४।९२) से उसका लुक्, अगुण, द्वित्व, अभ्याससंज्ञादि, ''भृञ्हाङ्माङामित्'' (३।३।२४) से अभ्यासगत अकार को इकार, अभ्यस्त के आकार का लोप तथा ''लोपोऽभ्यस्तादन्तिनः'' (३। ५।३८) से नलोप।

**२. मिमताम्।** मा + अन्लुक् + अन्ताम्। 'माङ् माने शब्दे च' (२। ८६) धातु से पञ्चमीविभक्तिसंज्ञक प्रथमपुरुष–बहुवचन 'अन्ताम्' प्रत्यय, अन् विकरण, उसका लुक्, अगुण, द्वित्व, अभ्याससंज्ञादि, अभ्यासगत अकार को इकार, अभ्यस्त के आकार का लोप तथा नलोप।

**३. जिहते।** हा + अन्-लुक् + अन्ते। 'ओ हाङ् गतौ' (२।८७) धातु से वर्तमानासंज्ञक प्रथमपुरुष–बहुवचन 'अन्ते' प्रत्यय, अन्लुक्, अगुण, द्वित्व, अभ्याससंज्ञादि, ''हो जः'' (३।३। १२) से हकार को जकार, अकार को इकार, प्रकृत सूत्र से आकार का लोप तथा नलोप।

४. **जिहताम्।** हा + अन्लुक् + अन्ताम्। 'ओ हाङ् गतौ' (२। ८७) से पञ्चमीसंज्ञक 'अन्ताम्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

५. **दत्ते।** दा + अन्लुक् + ते। 'डु दाञ् दाने' (२। ८४) धातु से वर्तमानाविभक्तिसंज्ञक आत्मनेपद-प्रथमपुरुष–एकवचन 'ते' प्रत्यय, अन्लुक्, द्विर्वचनादि, "ह्रस्वः" (३।३।१५) से ह्रस्व, प्रकृत सूत्र से आकारलोप तथा "अघोषेष्वशिटां प्रथमः" (३।८।९) से दकार को तकार।

६. **धत्ते।** धा + अन्लुक् + ते। 'डु धाञ् धारणपोषणयोः' (२।८५) धातु से 'ते' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ५८१।

## ५८२. क्र्यादीनां विकरणस्य [३।४।४२]

### [सूत्रार्थ]

क्र्यादिगणपठित धातुओं से अगुण सार्वधातुकसंज्ञक प्रत्यय के परे रहते विकरणघटित आकार का लोप होता है।। ५८२।

### [दु० वृ०]

क्र्यादीनां धातूनामगुणे सार्वधातुके परे विकरणाकारस्य लोपो भवति। क्रीणते, क्रीणन्ति। प्रीणते, प्रीणन्ति। कथं स्तभ्नन्तीति? उपलक्षणत्वात्। क्र्यादीनामिति किम्? दीव्यामः, सीव्यामः। विकरणस्येति **सुखप्रतिपत्त्यर्थम्**। अगुण इति किम्? क्रीणाति।। ५८२।

### [दु० टी०]

क्र्यादीनाम्०। विकरणस्येति **सुखप्रतिपत्त्यर्थम्** इति। क्र्यादीनां व्यक्तीनामाकारस्यासम्भवात् जानन्तीत्यत्र च जादेशस्य दीर्घत्वस्य सामर्थ्याद् विकरणाकारस्य लोपो भवति, किन्तु कार्यित्वप्रतिपत्तिरेव न भवतीत्यर्थः। "नाभ्यस्तयोराकारस्य" इति कृते उभयेषामिति वचनं न विधेयं स्यात्। स्तभ्नन्तीत्याद्यर्थं क्र्यादिग्रहणं विकरणोपलक्षणार्थमित्यपि मतं न वर्णितं स्यात्। 'स्नान्ति' इत्यत्रापि **'अर्थवद्ग्रहणे नानर्थकस्य'** (का० परि० ४) इति **'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्'** (का० परि० ७५) तथा **'म्ना अभ्यासे'** (१।२६८) इति **"म्नो मनः"** (३। ६। ७४) इति 'मनावः, मनामः' इति, नैवम्, **प्रतिपत्तिर्गरीयसीति**।। ५८२।

### [वि० प०]

क्र्यादी०। उपलक्षणत्वादिति। 'क्र्यादीनां विकरणस्य' इत्यनेन ना–विकरण उपलभ्यते। तेन **"स्तन्भु-स्तुन्भु-स्कन्भु-स्कुन्भु-स्कुभ्यो नुश्चेति वा वक्तव्यम्"** इत्यनेनापि विहितस्य नाविकरणस्याकारलोपो भवति। ननु तत्र स्तन्भादीनां क्रैयादिकत्वाभ्युपगमादेव पक्षे नाविकरण इति वक्तव्यार्थो दर्शितः, ततः क्रैयादिकत्वादेव सिद्धो लोपः किमुपलक्षणेन? सत्यमेतत्, किन्तु **मन्दधियस्तु** गणपठितानेव क्रैयादिकान् मन्यन्ते इत्युपलक्षणमुच्यते। ननु विकरणस्येत्युक्तेऽर्थात् क्रैयादिकानामिति गम्यते। न ह्यन्येषां धातूनां विकरणाकारः सम्भवति, नैवम्। यदा **"अस्य वमोर्दीर्घः"** (३।८।११) इति यनोऽकारस्य दीर्घस्तदापि स्यादित्याह– क्र्यादीनामिति। यदि पुनरिह लाक्षणिकत्वादेव न भवतीत्युच्यते तदा

**स्पष्टार्थमेव** क्र्यादिग्रहणम्भवति। अथ **विकरण**ग्रहणं किमर्थं क्र्यादीनां धातूनामाकारस्यासम्भवात्, जानन्तीत्यत्र **''ज्ञश्च''** (३।६।८२) इति जादेशस्याकारकरणसामर्थ्यादाकारलोपाभावेऽर्थात् क्र्यादीनां विकरणाकार इति गम्यते इत्याह– विकरणस्येति। यद्विकरणग्रहणं तद्विकरणस्य य आकारस्तस्य लोप इति **प्रतिपत्त्यर्थम्,** अन्यथा कार्यिणः प्रतिपत्तिरेव स्यादिति। इह यद्यपि उक्तेन न्यायेन विकरणाकारस्येति दर्शितम् तथापि **व्यामोहः** स्यादित्यर्थः।। ५८२।

## [बि० टी०]

क्र्यादीनाम्०। जानन्तीति **पञ्जी**। नन्वत्र ''ज्ञश्च'' (३।६।८२) इति जादेशे कृतेऽनेनाकारलोपः कथ न स्यात्। आकारकरणसामर्थ्यादिति चेत्, जानातीत्यादौ प्रयोजनम्। अत्र **उमापतिः** –

**'ज्ञश्चेत्यस्मिन् जाकरणं किमर्थं ज्ञो ञो लुक् स्याच्चेति कृतेऽपि सिद्धिः'।**

**अस्यार्थः** – ज्ञाधातोर्ञकारो लुग् भवतीत्युक्तेऽपि जानातीत्यादेः सिद्धिः। न च साध्यमन्यव्याजेन साधितमिति दोषः। तथा च **टीकाकारः** – साध्यम् अन्यव्याजेन साधयितुं युज्यते, तस्माज्ज्ञकारेण किम्, जारूप एव तिष्ठति नान्यत्। तथा च **वाचस्पतिः** – ननु जा जानेर्विकरणे इत्यास्तां ततो **'वर्णान्तस्य विधिः'** (का० परि० ५) इति न्यायात् सिध्यति। **''ज्ञश्च''** (३।६।८२) इत्यत्र ज्ञो ञलुकं कृत्वा जादेशो बोधयति, जारूप एव तिष्ठति नान्यदिति। किञ्च ''ज्ञश्च'' इति क्रियताम्, आकारोऽनुवर्तते आकारकरणस्य सस्वरत्वात् **'अन्त्याभावेऽन्त्यसदेशस्य ग्रहणम्'** (का० परि० ३९) भविष्यति। यद् वा ज्ञो ञिति क्रियताम्, ज्ञाधातुर्ञनुबन्धः स्यादित्यर्थः इत्यभिमतसिद्धेनाकारो लुप्यते। यत्तु **पञ्जीकृता** सामर्थ्यादित्युक्तम्, तच्च सकृद्गतन्यायेन। **हेमकर**स्तु आकारकरणस्य फलमाह, अन्यथा ज्ञो जिरिति विदध्यात्। **वस्तुतस्तु** क्र्यादीनामिति बहुवचनं बोधयति – विकरणाकारस्यैव लोपः। अथ क्र्यादीनामप्याकारलोपः स्यात्? सत्यम्, बहुव्रीहौ क्र्यादीनामित्युपलक्षणत्वाद् उपलक्षणस्य कार्येऽनुपयोगित्वात्। यथा चित्रगुरानीयतामिति।। ५८२।

## [समीक्षा]

'लुनते, लुनताम्, क्रीणते, प्रीणते, प्रीणन्ति' इत्यादि शब्दरूपों के सिद्ध्यर्थ क्र्यादिगणपठित धातुओं से होने वाले 'ना' विकरण में आकार के लोप की आवश्यकता होती है, इसका विधान दोनों ही व्याकरणों में उपलब्ध है। पाणिनि का सूत्र है – ''श्नाभ्यस्तयोरातः'' (अ० ६।४।११२)। अन्तर यह है कि पाणिनि ने श्नाविकरण तथा अभ्यस्तसंज्ञक शब्द (धातु का द्वित्वरूप) में विद्यमान आकार के लोपार्थ एक ही सूत्र बनाया है, जब कि स्पष्ट अवबोधार्थ कातन्त्रकार ने दो पृथक् सूत्र बनाए हैं। क्र्यादिगणपठित धातुओं से किया जाने वाला विकरण पाणिनीय व्याकरण में शकारानुबन्धविशिष्ट है, परन्तु कातन्त्रव्याकरण में यह अनुबन्धरहित है।

## [विशेष वचन]

१. विकरणस्येति सुखप्रतिपत्त्यर्थम् (दु० वृ०)।

२. प्रतिपत्तिर्गरीयसीति (दु० टी०)।

३. मन्दधियस्तु गणपठितानेव क्रैयादिकान्मन्यन्ते इत्युपलक्षणमुच्यते (वि० प०)।

४. तदा स्पष्टार्थमेव क्र्यादिग्रहणं भवति (वि० प०)।

५. यद् विकरणग्रहणं तद्विकरणस्य य आकारस्तस्य लोप इति प्रतिपत्त्यर्थम्, अन्यथा कार्यिणः प्रतिपत्तिरेव स्यादिति। इह यद्यपि उक्तेन न्यायेन विकरणाकारस्येति दर्शितं तथापि व्यामोहः स्यादित्यर्थः (वि० प०)।

६. वस्तुतस्तु क्र्यादीनामिति बहुवचनं बोधयति विकरणाकारस्यैव लोपः (बि० टी०)।

७. बहुव्रीहौ क्र्यादीनामित्युपलक्षणत्वादुपलक्षणस्य कार्येऽनुपयोगित्वात् (बि० टी०)।

## [रूपसिद्धि]

१. **क्रीणते।** क्री + ना + अन्ते। 'डु क्रीञ् द्रव्यविनिमये' (८।१) धातु से वर्तमानाविभक्तिसंज्ञक प्रथमपुरुष–बहुवचन 'अन्ते' प्रत्यय, "ना क्र्यादेः" (३।२।३८) से 'ना' विकरण, "द्वित्वबहुत्वयोश्च परस्मै" (३। ५। १९) से अगुण, प्रकृत सूत्र से आकारलोप तथा "आत्मने चानकारात्" (३।५।३९) से 'अन्ते' प्रत्ययगत नकार का लोप।

२. **क्रीणन्ति।** क्री + ना + अन्ति। 'डु क्रीञ् द्रव्यविनिमये' (८। १) धातु से वर्तमानासंज्ञक 'अन्ति' प्रत्यय, ना–विकरण, अगुण तथा आकारलोप।

३. **प्रीणते।** प्री + ना + अन्ते। 'प्रीञ् तर्पणे कान्तौ च' (८।२) धातु से अन्ते प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

४. **प्रीणन्ति।** प्री + ना + अन्ति। 'प्रीञ् तर्पणे कान्तौ च' (८।२) धातु से अन्ति प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ५८२।

## ५८३. उभयेषामीकारो व्यञ्जनादावदः [३।४।४३]

## [सूत्रार्थ]

अभ्यस्तघटित तथा क्र्यादिविकरणघटित आकार को ईकार आदेश होता है, 'दा' धातु को छोड़कर, अगुण तथा व्यञ्जनादि सार्वधातुकसंज्ञक प्रत्यय के परे रहते।। ५८३।

## [दु० वृ०]

राश्यपेक्षयोभयशब्दो व्यक्त्यपेक्षया बहुवचनम्। उभयेषामभ्यस्तक्र्यादिविकरणानां दावर्जितानामाकारस्य व्यञ्जनादावगुणे सार्वधातुके परे ईकारो भवति। मिमीते, **जिहीते,** लुनीते, पुनीते। व्यञ्जनादाविति किम्? मिमते, क्रीणते। अगुण इति किम्? **जहाति,** क्रीणाति। सार्वधातुक इति किम्? लालायते। अद इति किम्? दत्से, धत्से।। ५८३।

## [दु० टी०]

उभये०। **'माङ् माने, ओ हाङ् गतौ'** (२। ८६, ८७) जुहोत्यादित्वाद् द्विर्वचनम्। व्यञ्जनादावित्यादिग्रहणं **स्पष्टार्थम्**।। ५८३।

## [वि० प०]

उभये०। उभावभ्यस्तक्र्यादिविकरणौ अवयवौ येषाम् इति **''उभान्नित्यमयट्''** तमादित्वात्। ननु चाभ्यस्तक्र्यादिविकरणयोर्यो राशिस्तदपेक्षया तयोरवयवत्वम्। अतो वाक्यार्थवशेन उभयशब्दस्य राशिरभिधेयो भवति तस्य चैकत्वात् कथं बहुवचनमित्याह– राश्यपेक्षयेत्यादि। यद्यपि राश्यपेक्षयाऽयमुभयशब्दस्तथापि राशिस्थव्यक्तपेक्षया बहुवचनमिति भावः। लालायते इति। अत्यर्थं लातीति वाक्ये धातोर्यशब्दः। 'धत्से' इति पूर्ववत् **''तथोश्च दधातेः''** (३। ६। १०२) इत्यभ्यासे दकारस्य धकारः।। ५८३।

## [बि० टी०]

उभये०। व्यक्त्यपेक्षया बहुवचनम्, एतदेवाह – उभौ अवयवौ येषामिति। एतदेव एकारोऽवयवो यस्य **''दामागायति०''** (३।४।२९) इत्यतः पूर्वं सूत्रद्वये कृते **वैचित्र्यार्थमिह** पाठः। व्यञ्जनादिग्रहणं च **वैचित्र्यार्थ**मिति।। ५८३।

## [समीक्षा]

'लुनीते, पुनीते, जिहीते, मिमीते' इत्यादि शब्दरूपों के सिद्ध्यर्थ नाविकरणघटित तथा अभ्यस्तघटित आकार को ईकारादेश करने की आवश्यकता होती है। इसकी पूर्ति दोनों ही व्याकरणों में देखी जाती है। पाणिनि का सूत्र है – ''ई हल्यघोः'' (अ० ६। ४। ११३)। पाणिनीय व्याकरण में 'दा–धा' धातुओं की घु–संज्ञा की गई है, अतः वहाँ उसमें ईकारादेश के निषेधार्थ 'अघोः' शब्द का पाठ है। कातन्त्रकार ने एतदर्थ 'दा' संज्ञा की है, इसलिए उन्होंने 'अदः' शब्द पढ़ा है।

## [विशेष वचन]

१. व्यञ्जनादावित्यादिग्रहणं स्पष्टार्थम् (दु० टी०)।
२. पूर्वं सूत्रद्वये कृते वैचित्र्यार्थमिह पाठः (बि० टी०)।
३. व्यञ्जनादिग्रहणं च वैचित्र्यार्थमिति (बि० टी०)।

## [रूपसिद्धि]

१. **मिमीते**। मा + अन्लुक् + ते। 'माङ् माने' (२। ८६) धातु से वर्तमानाविभक्तिसंज्ञक प्रथमपुरुष – एवकचन 'ते' प्रत्यय, अन्विकरण, उसका लुक्, ईकारादेश, द्विर्वचन, अभ्याससंज्ञा तथा ह्रस्व।

२. **जिहीते**। हा + अन्लुक् + ते। 'ओ हाङ् गतौ' (२। ८७) धातु से 'ते' प्रत्यय, प्रकृत सूत्र से आकार को ईकार, द्वित्व, अभ्याससंज्ञा, ह्रस्व, तथा ''हो जः'' (३। ३। १२) से हकार को जकार।

३. **लुनीते**। लू + ना + ते। 'लूञ् छेदने' (८। ९) धातु से 'ते' प्रत्यय, ''ना क्र्यादेः'' (३। २। ३८) से 'ना' विकरण ''प्वादीनां ह्रस्वः'' (३। ६। ८३) से लू – धातुगत दीर्घ ऊकार को ह्रस्व तथा ना – विकरणगत आकार को प्रकृत सूत्र से ईकारादेश।

४. **पुनीते**। पू+ ना + ते। 'पूञ् पवने' (८। ८) धातु से 'ते' प्रत्यय, ना विकरण, धातु को ह्रस्व तथा नाविकरणगत आकार को ईकारादेश।। ५८३।

## ५८४. इकारो दरिद्रातेः [३। ४। ४४]

### [सूत्रार्थ]

'दरिद्रा' धातुघटित आकार को इकारादेश होता है, अगुण व्यञ्जनादि सार्वधातुकसंज्ञक प्रत्यय के परे रहते।। ५८४।

### [दु० वृ०]

दरिद्रातेराकारस्यागुणे सार्वधातुके व्यञ्जनादाविकारो भवति। दरिद्रितः, दरिद्रिथः। सार्वधातुक इति किम् ? दरिद्राणम्, दरिद्रायकः, दिदरिद्रासति। व्यञ्जनादाविति किम् ? दरिद्रति। अगुण इति किम् ? दरिद्राति। भियो वेति वक्तव्यम् — बिभितः, बिभीतः।। ५८४।

### [दु० टी०]

इकारः। पूर्वस्यापवादोऽयम्। तिब्निर्देशः **सुखार्थः**। भिय इत्यादि। **केचिद्** भिय इति इकारमिच्छन्ति, **तन्मतं** प्रमाणीकृत्याह — वक्तव्यमिति।। ५८४।

### [वि० प०]

इकारः। सार्वधातुक इत्यादि। **अस्यार्थः** — सार्वधातुकाधिकारः किम् ? असार्वधातुके दरिद्रातेरसार्वधातुके इत्यन्त्यलोपेऽस्त्येव। तत्र युट्वुणोरन्तलोपो न विद्यते तत्र मा भूत्, यद् वक्ष्यति युट्वुणोरनिटि सनि च न स्यादिति। ननु तत्रागुणत्वाभावाद् व्यञ्जनादित्वाभावाच्च न भविष्यति किमनेनेति ? सत्यम्। **सुखार्थमेव** सार्वधातुकाधिकार इति। दरिद्रायण इति वुण् इज्वद्भावादायिरादेशः, भिय इत्यादि। **कश्चिदिच्छति, कश्चिन्नेच्छति** तदिह प्रमाणमित्यर्थः।। ५८४।

### [समीक्षा]

'दरिद्रितः, दरिद्रिथः' आदि प्रयोगों के साधुत्वार्थ दरिद्राधातुघटित आकार को इकारादेश की आवश्यकता होती है, इसका विधान दोनों व्याकरणों में किया गया है। पाणिनि का सूत्र है — ''इट् दरिद्रस्य'' (अ० ६। ४। ११४)। वृत्तिकार दुर्गसिंह ने 'भियो वेति वक्तव्यम्' इस वचन से 'बिभितः' आदि प्रयोग सिद्ध किए हैं, परन्तु पाणिनि ने एतदर्थ ''भियोऽन्यतरस्याम्'' (अ० ६। ४। ११५) स्वतन्त्र सूत्र बनाया है।

### [विशेष वचन]

१. तिब्निर्देशः सुखार्थः (दु० टी०)।

२. सुखार्थमेव सार्वधातुकाधिकारः (वि० प०)।

### [रूपसिद्धि]

१. **दरिद्रितः**। दरिद्रा + अन्लुक् + तस्। 'दरिद्रा दुर्गतौ' (२। ३७) धातु से वर्तमानासंज्ञक परस्मैपद—प्रथमपुरुष — द्विवचन 'तस्' प्रत्यय, ''अन् विकरणः कर्तरि''

(३। २। ३२) से अन् विकरण, ''अदादेर्लुग् विकरणस्य'' (३। ४। ९२) से उसका लुक्, प्रकृत सूत्र से धातुघटित आकार को इकारादेश तथा सकार को विसर्गादेश।

२. **दरिद्रिथ:**। दरिद्रा + अन्लुक् + थस्। 'दरिद्रा दुर्गतौ' (२। ३७) से थस् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ५८४।

## ५८५. लोप: सप्तम्यां जहाते: [३। ४। ४५]

### [सूत्रार्थ]

'ओ हाक् त्यागे' धातुघटित आकार का लोप होता है, सप्तमीविभक्तिसंज्ञक अगुण प्रत्यय के परे रहते।। ५८५।

### [दु० वृ०]

जहातेराकारस्य सप्तम्यामगुणे लोपो भवति। जह्यात्, जह्याताम्, जह्यु:। व्यञ्जनादावगुणे सार्वधातुके इत्त्वं वा वक्तव्यम्। जहित:, जहीत:। हौ चात्वमित्वमीत्वं चेष्टम् – जहाहि, जहिहि, जहीहि।। ५८५।

### [दु० टी०]

लोप:। व्यञ्जनादौ सार्वधातुके इत्यादि **मतान्तरमे**तदपि वर्णितम्। 'लोपो ये जहाते:' इत्युक्ते आशिष्यपि स्यात् – हेयादिति। सार्वधातुके इति विशेषणं वर्त्तिष्यते चेत्, **प्रतिपत्तिरियं गरीयसीति**। तिब्निर्देश: **सुखप्रतिपत्त्यर्थ:**।। ५८५।

### [वि० प०],

लोप:। व्यञ्जनादावित्यादि। अत्रापि पूर्ववद् वक्तव्यमित्यर्थ:। हौ चेत्येतदपि **मतान्तरेण** वर्णितमिह जहीहीति प्रमाणम्।। ५८५।

### [समीक्षा]

प्रत्ययभेद से 'ओ हाक् त्यागे' धातुघटित आकार का लोप, इकार–ईकार आदेश होते हैं। पाणिनि के एतदर्थ तीन सूत्र हैं – ''जहातेश्च, आ च हौ, लोपो यि'' (अ० ६। ४। ११६, ११७, ११८)। कातन्त्रकार आचार्य शर्ववर्मा ने 'जह्यात्' इत्यादि शब्दों में आकारलोप के विधानार्थ प्रकृत सूत्र बनाया है। अन्य दो कार्यों के विधानार्थ वृत्तिकार ने दो वार्त्तिकवचन पढ़े हैं – ''व्यञ्जनादावगुणे सार्वधातुके इत्त्वं वा वक्तव्यम्, हौ चात्वमित्वमीत्वं चेष्टम्''। तिप्प्रत्ययान्त धातुनिर्देश सुखार्थ पढ़े जाते हैं। अत: टीकाकार ने कहा है – ''तिब्निर्देश: सुखप्रतिपत्त्यर्थ:'' (दु० टी०)।

### [रूपसिद्धि]

१. **जह्यात्**। हा + अन्लुक् + यात्। 'ओ हाक् त्यागे' (२। ७१) धातु से सप्तमीविभक्तिसंज्ञक प्रथमपुरुष – एकवचन 'यात्' प्रत्यय, अन्–विकरण, उसका लुक्, 'हा' को द्वित्व, अभ्याससंज्ञा, ह्रस्व, ''हो ज:'' (३। ३। १२) से अभ्यासवर्ती हकार को जकार तथा प्रकृत सूत्र से हाधातुघटित आकार का लोप।

२. **जह्याताम्**। हा+अन्लुक्, याताम्। 'ओ हाक् त्यागे' (२।७१) धातु से सप्तमीसंज्ञक 'याताम्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

३. **जह्युः**। हा+अन्लुक् + युस्। 'ओ हाक् त्यागे' (२।७१) धातु से सप्तमीसंज्ञक 'युस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ५८५।

## ५८६. धुटि हन्तेः सार्वधातुके [३। ४। ४६]

### [सूत्रार्थ]

हन्धातुघटित नकार को लोप होता है, [1]धुडादि अगुण सार्वधातुक प्रत्यय के परे रहते।। ५८६।

### [दु० वृ०]

हन्तेर्धुडादौ सार्वधातुकेऽगुणेऽन्तस्य लोपो भवति। हतः, हथः, आहते, आहताम्। धुटीति किम् ? हन्वः, हन्मः। अगुण इति किम् ? हन्ति। प्रतिषिद्धेटां मध्ये हन्तेरेव सार्वधातुके **सम्भवदर्शनार्थमिदम्**।। ५८६।

### [दु० टी०]

धुटि०। कृतमनपेक्ष्य **शर्ववर्मणा** विरचितमिदमिति न दुष्यति। वनोति–तनोतीत्यादिना सिध्यतीति कुतश्चोद्यम्।। ५८६।

### [वि० प०]

धुटि०। आहते, आहतामिति **''आडो यमहनौ स्वाङ्गकर्मकौ च''** (३। २। ४२–२२) इति रुचादित्वादात्मनेपदम्। 'हन्वः' इति वमोर्वकारस्य दन्त्योष्ठ्यत्वाद् धुट्त्वाभावः। अथ किमर्थमिदं यावता **''वनोतितनोति०''** (८। १। ५९) इत्यादिना हन्तेः प्रतिषिद्धेट्त्वादेव सार्वधातुके पञ्चमलोपो भविष्यति, न च गमादीनामस्ति प्रसङ्गस्तेषां विकरणेन व्यवधानाद् आनन्तर्यस्यैव सार्वधातुकेऽसम्भवादित्याह – प्रतिषिद्धेटामित्यादि। यद्यपि हन्तेरादादिकत्वाद् आनन्तर्यं सार्वधातुके सम्भवति तथापि सम्भवस्यैव दर्शनार्थमिदम्। किञ्च यस्मात् कृत्प्रकरणमनपेक्ष्य **शर्ववर्मणा** प्रणीतम् इदमिति कुतस्तेन सिध्यतीति।। ५८६।

### [बि० टी०]

धुटि०। हन्तेरेव सार्वधातुके सम्भवदर्शनार्थमिति **वृत्तिः**। एतेन एतद्देश्यमपास्तम्। हन्तेः सार्वधातुके एवेति प्रकृतिनियमः कथन्न स्यात्, 'हतः, हतवान्' इत्यादौ पञ्चमलोपो न स्यादिति।। ५८६।

### [समीक्षा]

'हतः, आहते' इत्यादि शब्दों के **सिद्ध्यर्थ** नलोप का विधान दोनों व्याकरणों में मिलना है। पाणिनि का सूत्र है – ''अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति''

---

१. धुट्संज्ञक वर्ण – क ख ग घ, च छ ज झ, ट ठ ड ढ, त थ द ध, प फ ब भ, श ष स ह (द्र० सू० २। १। १७)। पाणिनीय झल् प्रत्याहार।

(अ० ६। ४। ३७)। इसके अनुसार पाणिनि ने अनेक धातुओं में नकार – मकार अनुनासिक का लोप किया है, जबकि कातन्त्रकार ने केवल हन्धातुगत नकारलोप के विधानार्थ प्रकृत सूत्र बनाया है।

## [विशेष वचन]

१. प्रतिषिद्धेटां मध्ये हन्तेरेव सार्वधातुके सम्भवदर्शनार्थमिदम् (दु० वृ०)।

२. कृतमनपेक्ष्य शर्ववर्मणा विरचितमिदमिति न दुष्यति (दु० टी०)।

३. सम्भवस्यैव दर्शनार्थमिदम्। किञ्च यस्मात् कृत्प्रकरणमनपेक्ष्य शर्ववर्मणा प्रणीतमिदमिति कुतस्तेन सिध्यतीति (वि० प०)।

## [रूपसिद्धि]

१. **हतः**। हन् + अन्लुक् + तस्। 'हन् हिंसागत्योः' (२। ४) धातु से वर्तमानासंज्ञक प्रथमपुरुष – द्विवचन 'तस्' प्रत्यय, अन्–विकरण, उसका लुक् तथा प्रकृत सूत्र से नकार का लोप।

२. **हथः**। हन् + अन्लुक् + थस्। 'हन् हिंसागत्योः' (२। ४) धातु से वर्तमानासंज्ञक 'थस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

३. **आहते**। आङ् + हन् + अन्लुक् + ते। 'आङ्' उपसर्गपूर्वक 'हन् हिंसागत्योः' (२।४) धातु से वर्तमानासंज्ञक आत्मनेपद 'ते' प्रत्यय, अन् विकरण, उसका लुक् तथा प्रकृत सूत्र द्वारा नकार का लोप।

४. **आहताम्**। आङ् + हन् + ताम्। 'आङ्' उपसर्गपूर्वक 'हन् हिंसागत्योः' (२। ४) धातु से पञ्चमीविभक्तिसंज्ञक प्रथमपुरुष – एकवचन 'ताम्' प्रत्यय, अन् विकरण, उसका लुक् तथा प्रकृत सूत्र द्वारा नकार का लोप।। ५८६।

# ५८७. शासेरिदुपधाया अण्व्यञ्जनयोः [३। ४। ४७]

## [सूत्रार्थ]

अण् तथा व्यञ्जनादि अगुण प्रत्यय के परे रहते 'शास्' धातु की उपधा को इत् आदेश होता है।। ५८७।

## [दु० वृ०]

शासेरुपधाया इद् भवति अणि व्यञ्जनादावगुणे प्रत्यये परे। अन्वशिषत्, शिष्यते, शिष्टः। कथं मित्रं शास्तीति **मित्रशीः** ? विलोपात् **'स्वरादेशो विधिर्बलवान्'** (कलाप० २२३। ९५) इति। अणा सहचरितः शासुरिह गृह्यते – आशास्ते, आशास्यमानः। कथम् **आशीः, ज्ञापकात्**।। ५८७।

## [दु० टी०]

शासेः। मित्रं शास्तीति क्विप्। कथं विलोपात् **'स्वरादेशो विधिर्बलवान्' (कलाप०** २२३। ९५) नित्यत्वाद् वेरेव लोपः स्यात्। ततश्च **'न वर्णाश्रये प्रत्ययलोपलक्षणम्'**

(कलाप० २२१। ३६) इति न दुष्यति, नित्यायाः परिभाषायाः अनित्यत्वमभ्युपगम्योच्यते। यदि वा वर्णाश्रयेऽपि प्रत्ययलोपलक्षणं क्वचिदिति। अणेत्यादि। साधारणासाधारणसन्निपातेऽपि विशेषावस्थानं गृह्यते। यथा वृद्धानां किशोराणां मध्ये धेनवो वध्यन्ताम् इत्युक्ते वडवा एव प्रतीयन्ते, तस्माच्छासेरण् प्रत्ययो विहितः **'शासु अनुशिष्टौ'** (२। ३९) इत्यस्य ग्रहणम्, न **'आङः शास इच्छायाम्'** (२। ४६) इत्यस्यात्मनेपदिनः। ननु साहचर्यम् **एकवाक्यतायां** युज्यते। यथा किशोरा धेनवो वध्यन्ताम् इति। अयन्तु भिन्नवाक्यान्तरश्रुतोऽण् कथं वाक्यान्तरश्रुतस्य शासेरवच्छेदकः स्यात्, नैवम्। **लोके** ह्येकवाक्यावस्थमनेकवाक्यावस्थस्यासम्बन्धि श्रूयमाणमेकप्रकरणापन्नं सद्विशेष्यावच्छेदकं दृश्यते। यथा धेनवो मुच्यन्ताम्, किशोरा वध्यन्ताम् इति। कथम् आशीर्ज्ञापकादिति यस्माद् **''आशिषि च परस्मै''** (३। ५। २२) इत्यादयो निर्दिष्टा दृश्यन्ते।। ५८७।

## [वि० प०]

शासेः। अन्वशिषदिति। **'अनुपूर्वः शासु अनुशिष्टौ'** (२। ३९), पुषादित्वाद् अण्। **''शासेरिदुपधायाः''** (३। ४। ४८) इत्यादिना इत्त्वे सति **''शासिवसिघसीनां च''** (३। ८। २७) इति षत्वम्। 'पिष्टः' इति तस्, निष्ठा वा। **''तवर्गस्य षाट्टवर्गाट्टवर्गः''** (३। ८। ५) इति। अनेत्यादि अण्। प्रत्ययस्तावदयं शासेरनुशासनादेव विहितस्तेनाणि यस्येकारो भवन् व्यञ्जनेऽपि तस्यैव भवतीत्यर्थः। तेन **'आङः शास इच्छायाम्'** (२। ४६) इत्यस्य न भवतीति। इदन्तर्हि न सिध्यतीत्याह – कथमित्यादि। सम्पदादित्वाद् भावे क्विप्। ज्ञापकादिति **''आशिषि च परस्मै''** (३। ५। २२) इत्यादिनिर्देशादिति भावः।। ५८७।

## [समीक्षा]

'अन्वशिषत्, शिष्यते, शिष्टः' इत्यादि शब्दरूपों के सिद्ध्यर्थ शास्धातु की उपधा को इकारादेश करने की आवश्यकता होती है, इसकी पूर्ति दोनों व्याकरणों में की गई है। पाणिनि का सूत्र है – '' शास इदङ्हलोः'' (अ० ६। ४। ३४)।

## [रूपसिद्धि]

१. **अन्वशिषत्**। अनु + शास् + अण् + दि। 'अनु' उपसर्गपूर्वक 'शासु अनुशिष्टौ' (२। ३९) धातु से अद्यतनीसंज्ञक प्रथमपुरुष – एकवचन 'दि' प्रत्यय, ''पुषादिद्युताद्यृलृकारानुबन्धार्तिशास्तिभ्यश्च परस्मै'' (३। २। २८) से अण्–प्रत्यय, ''न णकारानुबन्धचेक्रीयितयोः'' (३। ५। ७) से अगुण, प्रकृत सूत्र द्वारा आकार को इकार तथा ''शासिवसिघसीनां च'' (३। ८। २७) से मूर्धन्य षकारादेश।

२. **शिष्यते**। शास् + यण् + ते। **'शासु** अनुशिष्टौ' (२। ३९) धातु से कर्मवाच्य में वर्तमानासंज्ञक 'ते' प्रत्यय, ''सार्वधातुके यण्'' (३। २। ३१) से यण् प्रत्यय, प्रकृत सूत्र से आकार को इकार तथा धातुघटित सकार को षकारादेश।

३. **शिष्टः**। शास् + क्तः। 'शासु **अनुशिष्टौ**' (२। ३९) धातु से ''निष्ठा'' (४। ३। ९३) सूत्र द्वारा निष्ठासंज्ञक 'क्त' प्रत्यय, **इकार**, षकार तथा तकार को टकारादेश।। ५८७।

## ५८८. ''हन्तेर्ज हौ [३। ४। ४८]

### [सूत्रार्थ]

हन् धातु को जकारादेश होता है 'हि' प्रत्यय के परे रहते।। ५८८।

### [दु० वृ०]

हन्तेर्जकारो भवति हौ परे। जहि शत्रून्। हेर्व्यक्तित्वात् – हतात्। परत्वात् तातण्।। ५८८।

### [दु० टी०]

हन्ते०। अनेकवर्णत्वात् सर्वस्यादेशोऽयम्। हतादिति। **''हन्तेर्ज हौ''** (३। ४। ४८) इति जकारश्च प्राप्नोति परत्वात् तातणेव भवतीत्याह–तुह्योस्तातणिति। **''धुटि हन्तेः सार्वधातुके''** (३। ४। ४७) इति नलोपः, तिब्निर्देशश्चेक्रीयितलुग्निवृत्त्यर्थ इति **एके**–जंघंहि।। ५८८।

### [वि० प०]

हन्तेः। हतादिति। परत्वाद् आशिषि **''तुह्योस्तातण्''** वा इत्यर्थः। **''धुटि हन्तेः सार्वधातुके''** (३। ४। ४७) इति नलोपः।। ५८८।

### [समीक्षा]

पञ्चमी (लोट् लकार) विभक्तिसंज्ञक परस्मैपद–मध्यमपुरुष – एकवचन 'हि' प्रत्यय के परे रहते 'हन्' धातु के स्थान में 'ज' आदेश किए विना 'जहि' शब्दरूप की निष्पत्ति नहीं हो सकती, अतः दोनों ही आचार्यों ने 'ज' आदेश का विधान किया है। पाणिनि का सूत्र है – ''हन्तेर्जः'' (अ० ६। ४। ३६)। अतः उभयत्र समानता ही है।

### [रूपसिद्धि]

१. **जहि** शत्रून्। हन् + अन्लुक् + हि। 'हन् हिंसागत्योः' (२। ४) धातु से पञ्चमीविभक्तिसंज्ञक परस्मैपद–मध्यमपुरुष – एकवचन 'हि' प्रत्यय, ''अन् विकरणः कर्तरि'' (३। २। ३२) से अन् विकरण, ''अदादेर्लुग् विकरणस्य'' (३। ४। ९२) से उसका लुक्, ''धुटि हन्तेः सार्वधातुके'' (३। ४। ४७) से हन्–धातुगत नकार का लोप तथा प्रकृत सूत्र द्वारा हकार का जकारादेश।। ५८८।

## ५८९. दाऽस्त्योरेऽभ्यासलोपश्च [३। ४। ४९]

### [सूत्रार्थ]

दासंज्ञक तथा अस् धातु से 'हि' प्रत्यय के परे रहते उनके अन्तिम वर्ण के स्थान में एकारादेश होता है तथा अभ्यासलोप भी होता है।। ५८९।

### [दु० वृ०]

दासंज्ञकस्यास्तेश्च हौ परेऽन्तस्यैकारो भवति, अभ्यासलोपश्च यथासम्भवम्। देहि, धेहि। अस् – एधि। अलोपश्चेति सिद्धेऽभ्यासग्रहणं **समस्तलोपार्थम्**।। ५८९।

## [दु० टी०]

दाऽस्त्योः। यथासम्भवमिति **अन्वाचयशिष्टो**ऽयं चकार इत्यर्थः। एधीति। अन्तेरिति धिभावः **''अस्तेरादेः''** (३। ४। ४१) इत्याकारलोपः। अलोपश्चेत्यादि। यदि पुनरिहाभ्यासान्तस्य लोपः स्यात् तदा दास्त्योरे लोपश्चेति कुर्यात्। यस्मादभ्यास एवाकारलोपः सम्भवति नान्यत्रेत्याह – अभ्यासेत्यादि। **कश्चिदा**ह–लोपश्चेति सानुबन्धोऽयम्, तेन सर्वस्य भवतीति, तदसत्। नात्र सानुबन्धः संभवतीति परिभाषा आद्रियते, परत्वात् **''तुह्योस्तातण्''** इति कृते 'दत्तात्, धत्तात्' इति **'सकृदगतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव'** (का० परि० ३६) इति भवति।। ५८९।

## [वि० प०]

दास्त्यो०। एधीति। अस्तेरिति **''हेर्धिः''** (३। ५। ३५), **''अस्तेरादेः''** (३। ४। ४१) इत्याकारलोपः। ननु **'वर्णान्तस्य विधिः'** (का० परि० ५) इति न्यायाद् अभ्यासान्तलोपेन भवितव्यम्, न समस्तस्येति। तदयुक्तम्। एवं हि सति 'दास्त्योरे अलोपश्च' इति सिद्धे किमभ्यासग्रहणेन। न ह्याकारमन्तरेणान्योऽभ्यासस्यान्तो भवतीत्याह – अलोपश्चेति।। ५८९।

## [समीक्षा]

'दा – धा – अस्' धातुओं से सिद्ध होने वाले 'देहि, धेहि, एधि' शब्दों में एकारादेश करने की आवश्यकता होती है, इसका विधान दोनों ही व्याकरणों में किया गया है। पाणिनि का सूत्र है – ''घ्वसोरेद्धावभ्यासलोपेश्च'' (अ० ६। ४। ११९)। यह ज्ञातव्य है कि पाणिनि ने ''दाधा घ्वदाप्'' (अ० १।१। २०) से जिन 'दा – धा' धातुओं की 'घु' संज्ञा की है, कातन्त्रकार ने तदर्थ 'दा' संज्ञा का व्यवहार किया है– ''अदाब् दाधौ दा'' (३। १। ८)। इसलिए पाणिनि ने 'घु' शब्द का तथा कातन्त्रकार ने 'दा' शब्द का उक्त सूत्रों में प्रयोग किया है।

## [विशेष वचन]

१. अलोपश्चेति सिद्धे अभ्यासग्रहणं समस्तलोपार्थम् (दु० वृ०)।

२. अन्वाचयशिष्टोऽयं चकार इत्यर्थः (दु० टी०)।

## [रूपसिद्धि]

१. **देहि**। दा + अन्लुक् + हि। 'डु दाञ् दाने' (२। ८४) धातु से पञ्चमीविभक्तिसंज्ञक मध्यमपुरुष – एकवचन 'हि' प्रत्यय, अन् विकरण्, उसका लुक्, द्वित्व आदि तथा प्रकृत सूत्र द्वारा आकार को एकार – अभ्यासलोप।

२. **धेहि**। धा + अन्लुक् + हि। 'डु धाञ् धारणपोषणयोः' (२। ८५) धातु से पञ्चमीसंज्ञक 'हि' प्रत्यय, अन् विकरण, उसका लुक्, द्वित्व आदि तथा प्रकृत सूत्र द्वारा आकार को एकार – अभ्यासलोप।

३. **एधि**। अस् + अन्–लुक् + हि–धि। 'अस् भुवि' (२।२८) धातु से 'हि' प्रत्यय, अन्– विकरण, उसका लुक्, ''अस्तेः'' (३।५।३६) से 'हि' को 'धि', प्रकृत सूत्र से अकार को एकार तथा ''अस्तेरादेः'' (३।४।४१) से अकारलोप।। ५८९।

## ५९०. अस्यैकव्यञ्जनमध्येऽनादेशादेः परोक्षायाम् [३।४।५०]

### [सूत्रार्थ]

अगुण परोक्षासंज्ञक प्रत्ययों के परे रहते अनादिष्ट धातुगत अकार के स्थान में एकारादेश तथा अभ्यासलोप होता है।। ५९०।

### [दु० वृ०]

अगुणे परोक्षायां परतोऽनादेशादेर्धातोरस्यैकव्यञ्जनमध्यगतस्यैत्त्वं भवति अभ्यासलोपश्च।। पेचतुः, पेचुः, नेमतुः, नेमुः। सेहे। चकाराधिकारात् क्वचिद् दीर्घोऽपि गृह्यते। अपपूर्वो राध हिंसायाम्– अपरेधतुः। हिंसायाम् इत्येव – आरराधतुः। 'राजिभ्राजिभ्राशिभ्लाशीनां वा वक्तव्यम्' – रेजतुः, रराजतुरित्यादि। अन्यत्र न भवति – चकाशे। थलि च सेट्यप्येवम् – रेजिथ, रराजिथ। असहायव्यञ्जनमध्यगतस्येति किम् ? ततक्षतुः। अनादेशादेरिति किम् ? बभणतुः। अगुण इति किम् ? अहं पपच।। ५९०।

### [दु० टी०]

अस्यैक०। एकशब्दोऽत्रासहायवाची। एकं च तद् व्यञ्जनं चेति एकव्यञ्जनम्, द्वयोरसंयोगव्यञ्जनयोर्मध्यगत इत्यर्थः। न विद्यते आदेश आदौ यस्येति बहुव्रीहिरगुणे परोक्षायां परतः इत्यादि। **'णम् प्रह्वत्वे शब्दे, षह मर्षणे'** (१।१५९, ५६०), **''णो नः, धात्वादेः षः सः''** (३।८।२५, २४) इति निर्निमित्तके नत्वसत्वे, अतः परोक्षायामनादेशादिर्भवति परोक्षायां परतोऽनादेशादेरिति धातोर्विशेषणेऽप्यर्थादादेश एव विशेषितो भवति। ननु च कृतार्थं परोक्षाग्रहणं कथमादेशो (शेन) विशिष्यते, पच्यते इत्यत्रापि प्राप्नोति अयमप्यगुण इति पूर्ववदभ्यासलोपश्चेत्यन्वाचीयते, तर्हि चकारोऽत्र न संयुज्यते। एवमपि पापच्यते इत्यत्रापि स्यात्, दीर्घादेशोऽत्र बाधको भविष्यति ? नैवम्, अभ्यासविकारेषु न बाधते इति। अथ मतम्, नाप्राप्ते अभ्यासविकारे क्वचिद् व्यञ्जनावशेषे क्वचिद् ह्रस्वे अभ्यासलोप आरभ्यते, तथापि श्रुतत्वाद् आवर्तनाच्च परोक्षायामेवैत्त्वं भवति इति। चकारेत्यादि। एवं प्रतिरेधतुः, प्रतिरेधुः। अथ **'राध हिंसायाञ्च'** (४।१६) इत्यनेन सिद्धम्। राधेः परोक्षायां हिंसायां नास्ति **वृत्तिः**। एवं भ्रेजे, भ्रेजाते, भ्रेशे, भ्रेशाते, भ्लेशे, भ्लेशाते। पक्षे–बभ्राज इत्यादि। थलि च सेट्यप्येवम् इति। 'अपरेधिथ, रेजिथ, रराजिथ' इत्यादि। एकयोरसहाययोर्मध्ये इत्युक्ते **व्यञ्जनग्रहणं सुखप्रतिपत्त्यर्थम्**। 'अहं पपच' इत्युत्तमे **''अस्योपधायाः''** (३।६।५) वा दीर्घः।। ५९०।

### [वि० प०]

अस्यैक०। **ननु कथं** 'नेमतुः, सेहे' इत्यादि। यस्माद् **''णो नः, धात्वादेः षः सः'' (३।८।२५, २४) इति कृते आदेशादित्त्वमस्तीति** ? तदयुक्तम्, न खल्वत्र ''अनादेशादेः'' इति सामान्येन प्रतिषेधः, किन्तर्हि परोक्षायां यो धातुरनादेशादिरिति एतदेव सुखार्थेन सूचितम् अगुणे परोक्षायां परतोऽनादेशादेर्धातोरिति। नत्वसत्वे चोपदेशावस्थायामेव भवतः, न परोक्षानिमित्ते भवितुमर्हतः। तद्विधाने निमित्तस्यानपेक्षत्वात्।

न चैवमेत्त्वमपरोक्षनिमित्तं भवतीति वक्तव्यम्। श्रुतत्वात् परोक्षायामेवैत्त्वमिति। राजीत्यादि। एवं भ्रेजे, बभ्राजे, भ्रेशे, बभ्राशे, भ्लेशे, बभ्लाशे। थलि च सेट्यप्येवमिति। अपरेधिथ, रेजिथ, रराजिथेति। इतरे आत्मनेपदित्वात् थल्विषया न भवन्ति। एकशब्दोऽयमसहायवचन इति प्रत्युदाहरन्नाह—असहायेत्यादि। 'अहं पपच' इति। **''अस्योपधाया अट्युत्तमे वा''** (३। ६। ५) इति दीर्घाभावे प्रत्युदाहरणम्।। ५९०।

## [समीक्षा]

'पेचतुः, पेचुः, नेमतुः, नेमुः, सेहे' इत्यादि परोक्षाविभक्ति के शब्दरूपों के सिद्ध्यर्थ एत्त्व और अभ्यासलोप की आवश्यकता होती है। पाणिनि का सूत्र है — ''अत एकहल्मध्येऽनादेशादेर्लिटि'' (अ० ६।४।१२०)। पाणिनीय लिट् के लिए कातन्त्रव्याकरण में परोक्षासंज्ञा का तथा हल् के लिए व्यञ्जनसंज्ञा का व्यवहार किया गया है, तदनुसार सूत्र में शब्दों का प्रयोग है।

## [विशेष वचन]

१. चकाराधिकारात् क्वचिद् दीर्घोऽपि गृह्यते (दु० वृ०)।

२. एकशब्दोऽत्रासहायवाची (दु० टी०; वि० प०)।

३. व्यञ्जनग्रहणं सुखप्रतिपत्त्यर्थम् (दु० टी०)।

## [रूपसिद्धि]

१. **पेचतुः**। पच् + अतुस्। 'डु पचष् पाके' (१।६०३) धातु से परोक्षाविभक्तिसंज्ञक प्रथमपुरुष—द्विवचन 'अतुस्' प्रत्यय, द्वित्व, अभ्याससंज्ञा, चकारलोप, धातुघटित अकार को एकार, अभ्यासलोप तथा सकार को विसर्ग आदेश।

२. **पेचुः**। पच् + उस्। 'डु पचष् पाके' (१।६०३) धातु से उस् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

३. **नेमतुः**। नम् + अतुस्। 'णम् प्रह्वत्वे शब्दे च' (१।५५९) धातु से 'अतुस्' प्रत्यय, ''णो नः'' (३।८।२५) से णकार को नकार, द्वित्व, अभ्याससंज्ञा, मकारलोप, प्रकृत सूत्र से धातुघटित अकार को एकार, अभ्यासलोप तथा सकार को विसर्गादेश।

४. **नेमुः**। नम् + उस्। 'णम् प्रह्वत्वे शब्दे च' (१।५५९) धातु से 'उस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

५. **सेहे**। सह् + ए। ''षह मर्षणे' (१।५६०) धातु से परोक्षाविभक्तिसंज्ञक आत्मनेपद— प्रथमपुरुष—एकवचन 'ए' प्रत्यय ''धात्वादेः षः सः'' (३।८।२४) से षकार को सकार, द्वित्त्व, अभ्याससंज्ञा, हकारलोप, प्रकृत सूत्र द्वारा धातुघटित अकार को एकारादेश तथा अभ्यासलोप।। ५९०।

# ५९१. थलि च सेटि [३। ४। ५१]

## [सूत्रार्थ]

सेट् थल् प्रत्यय के परे रहते अनादेशादि धातुगत अकार को एकारादेश तथा अभ्यासलोप होता है।। ५९१।

## [दु० वृ०]

थलि च सेटि परतोऽनादेशादेर्धातोरस्यैकव्यञ्जनमध्यगतस्यैत्त्वं भवति अभ्यासलोपश्च। पेचिथ, नेमिथ। सेटीति किम् ? पपक्थ। अनादेशादेरिति किम् ? बभणिथ। एकव्यञ्जन-मध्यगतस्येति किम् ? विव्ययिथ।। ५९१।

## [दु० टी०]

थलि०। **'नित्यात्वतां स्वरान्तानां सृजिदृशोश्च वेट् थलि'** इति वक्ष्यति, 'सेटि' इत्यनेन परोक्षा विशिष्यते चेद् गुण्यर्थोऽयमारम्भः इति थलीति विज्ञायते। 'पेचिव, पेचिम' इति पूर्वेणैव सिद्धं थल्ग्रहणमिह **सुखार्थम्**। चकारेण चोत्तरत्र परोक्षाधिकर्तव्या, अन्यथा थलेव वर्तते। सहग्रहणं च **सुखार्थमेव**।। ५९१।

## [वि० प०]

थलि। **'नित्यात्वतां स्वरान्तानाम्'** इत्यादिना वक्ष्यमाणवचनेन थलि वेट्। विव्ययिथेति। तत्रैव **''वृव्येऽदां नित्यमिट् थलि''** इति नित्यमिट्। **''न व्ययतेः परोक्षायाम्''** (३।४।२१) इत्यात्त्वप्रतिषेधः। **''परोक्षायामभ्यासस्य''** (३।४।४) इत्यादिनाऽभ्यासे सम्प्रसारणम्।। ५९१।

## [बि० टी०]

थलि च। ननु **''इटि च''** (३।४।२८) इति कृते प्रस्तुतपरोक्षायामगुणे पूर्वेणैव सिद्धे गुणिनि भवन् थलीति लभ्यते। थल्ग्रहणं सेड्ग्रहणं च **सुखार्थमिति प्रदीपः**।। ५९१।

## [समीक्षा]

'पेचिथ, शेकिथ, नेमिथ' इत्यादि शब्दरूपों के सिद्ध्यर्थ एकारादेश तथा अभ्यासलोप की आवश्यकता होती है। इसकी पूर्ति दोनों ही व्याकरणों में की गई है। पाणिनि का सूत्र है – ''थलि च सेटि'' (अ० ६।४।१२१)। इस प्रकार सूत्र और कार्य के समान होने से उभयत्र एकरूपता ही कही जाएगी।

## [विशेष वचन]

१. थल्ग्रहणमिहं सुखार्थम् (दु० टी०)।

२. सहग्रहणं च सुखार्थमेव (दु० टी०)।

३. थल्ग्रहणं सेड्ग्रहणं च सुखार्थमिति प्रदीपः (बि० टी०)।

## [रूपसिद्धि]

१. **पेचिथ**। पच् + इट् + थल्। 'डु पचष् पाके' (१।६०३) धातु से परोक्षाविभक्तिसंज्ञक परस्मैपद–मध्यमपुरुष–एकवचन 'थल्' प्रत्यय, ''नित्यात्वतां स्वरान्तानाम्'' से इडागम, द्विर्वचन, अभ्याससंज्ञा, धातुघटित अकार को एकार तथा अभ्यासलोप।

२. **नेमिथ**। नम् + इट् + थल्। 'णम् प्रह्वत्वे शब्दे च' (१।१५९) धातु से परोक्षा मध्यमपुरुष–एकवचन 'थल्' प्रत्यय, इडागम, द्विर्वचनादि, एत्त्व तथा अभ्यासलोप।। ५९१।

## ५९२. तृफलभजत्रपश्रन्थिग्रन्थिदन्भीनां च [३। ४। ५२]

### [सूत्रार्थ]

परोक्षाविभक्तिसंज्ञक अगुण सेट् थल् प्रत्यय के परे रहते 'तृ–फल्–भज्–त्रप्–श्रन्थ्–ग्रन्थ्' एवं 'दन्भ्' धातुओं में अकार को एकारादेश तथा अभ्यासलोप होता है।। ५९२।

### [दु० वृ०]

तृप्रभृतीनाम् अत एत्त्वं भवति, अभ्यासलोपश्च परोक्षायामगुणे थलि च सेटि परतः। गुण्यादेशादिसहायव्यञ्जनत्वाद् वचनम्। तेरतुः, तेरिथ। फेलतुः, फेलिथ। भेजतुः, भेजिथ। त्रेपे, त्रेपाते, त्रेपिरे। श्रेथतुः, ग्रेथतुः, देभतुः। अनुषङ्गलोपिनां मध्ये दन्भेरेवेति नियमात् – ममथ्वान्। निरनुषङ्गैः साहचर्यात् 'शश्रन्थिथ, जग्रन्थिथ, ददम्भिथ' इत्यनुषङ्गिणां न स्यात्। अगुण इति किम् ? अहं ततर। जृभ्रमुत्रसिस्वनफणस्यमां वा वक्तव्यम्। 'जेरतुः, जजरतुः। जेरिथ, जजरिथ' इत्यादि।। ५९२।

### [दु० टी०]

तृफल०। तेरतुरिति। **'तॄ प्लवनतरणयोः'** (१।२८३), **''ऋदन्तानां च''** (३।६।१६) इति गुणोऽकारस्यैत्त्वम्। फेलतुरिति। **'फल निष्पत्तौ, दल त्रि फला विशरणे'** (१।१७६, १६५) वा, **''द्वितीयचतुर्थयोः प्रथमतृतीयौ''** (३। ३। ११) इत्यादेशादिस्तथा भेजतुरिति। **'भज श्रिञ् सेवायाम्, त्रपूष लज्जायाम्, श्रन्थ ग्रन्थ सन्दर्भे, दन्भु दम्भे'** (१। ६०४, ३८३; ८। ३३; ४। १९)। एषां सहायव्यञ्जनमध्येऽकार इत्याह – गुणीत्यादि। दन्भिग्रहणं किमर्थम्, नलोपे सत्याकारोऽसहायव्यञ्जनमध्य इति ? सत्यम्, **नियमार्थं** दन्भेरेवेति। न पुनः प्रकृतिनियमः। अनुषङ्गलोपिनां मध्ये **''दन्भेः परोक्षायामेव''** इति व्यावृत्तेरभावादित्याह – अनुषङ्गीत्यादि। **'मन्थ विलोडने'** (८।३४), क्वन्सुकानयोरनुषङ्गलोपं प्रतिपादयिष्यामः। निरनुषङ्गैरित्यादि मतम् अनुषङ्गलोपविधावेव वर्णयिष्यामः। **'जृष भृष वयोहानौ'** (१।५३१), एवं **'भ्रमु चलने'** (१।५५८), भ्रेमतुः, बभ्रमतुः। भ्रेमिथ, बभ्रमिथ। **'त्रसी उद्वेगे'** (३।८) – त्रेसतुः, तत्रसतुः, त्रेसिथ। **'स्वन ध्वन शब्दे, फण गतौ'** (१।५४१, ५३८), स्वेनतुः, सस्वनतुः। स्वेनिथ, सस्वनिथ। फेणतुः, पफणतुः। फेणिथ, पफणिथ। स्येमतुः, सस्यमतुः। स्येमिथ, सस्यमिथ। वक्तव्यम्=व्याख्येयम्। चकारोऽनुक्तसमुच्चये। श्रन्थिग्रन्थिदन्भेरिति समाहारात् सुखपाठे सिद्धे बहुवचनं वा गणार्थमिति मण्डूकप्लुत्यात्र व्यवस्थितविभाषाधिकर्तव्या। **अन्य** आह – **अन्ये** नेच्छन्ति **एके** इच्छन्तीति उभयमतमत्रावलम्बितम्।। ५९२।

### [वि० प०]

तृफल०। तेरतुरिति। **''ऋदन्तानां च''** (३।६।१६) इति गुणोऽत्र, **''नशासददवादिगुणिनाम्''** (३।५।५४) इति प्रतिषेधः प्राप्तः। **'फल निष्पत्तौ, दल त्रि फला विशरणे'** (१।१७६, १६५) इत्युभयोरपि ग्रहणम्। न ह्यत्र निरनुबन्धग्रहणे न सानुबन्धकस्येत्यादृतम्। **''फलभजोर्द्वितीयचतुर्थयोः''**

इत्यादिना आदेशादित्वादप्राप्तेः। **''त्रपादीनां च''** सहायव्यञ्जनत्वादिति। अत एवोक्तम्, गुण्यादेशादिसहायव्यञ्जनत्वाद् वचनमिति **''परोक्षायामिन्धिश्रन्थिग्रन्थिदन्भीनामगुणे''** (३।६।३) इति श्रन्थादेरनुषङ्गलोपः। दन्भेरनुषङ्गलोपे सत्यसहायव्यञ्जनमस्ति पूर्वेणैव सिद्धत्वात् किमनेनेति ? सत्यम्। नियमार्थमित्याह — अनुषङ्गिणामित्यादि। ममथ्वानिति। **'मन्थ विलोडने'** (८।३४), क्वन्सुः, कानुबन्धत्वाद् अनुषङ्गलोपः। जृ इत्यादि। एवं भ्रेमतुः, भ्रेमिथ। त्रेसतुः, त्रेसिथ। स्वेनतुः, स्वेनिथ। फेणतुः, फेणिथ। स्येमतुः, स्येमिथ। पक्षे—'बभ्रमतुः, बभ्रमिथ' इत्यादि। वक्तव्यम्=व्याख्येयम्। इह चकारस्या**नुक्तसमुच्चयार्थत्वात्** सिद्धमित्यर्थः।। ५९२।

## [बि० टी०]

तृफल०। अनुषङ्गलोपिनामिति **वृत्तिः**। ननु 'ममथ्वान्' इति कथं सिद्धम्। **''परोक्षाया—मिन्धि०''** (३।६।३) इत्यस्य व्यावृत्तिबलादेवानुषङ्गलोपो न स्यात् ? सत्यम्। परोक्षावद्भावाद् वत्करणं स्वाश्रयकार्यमपि बोधयति। किञ्च कार्यिनिमित्तयोर्व्युत्क्रमनिर्देशो बोधयति — आतिदेशिके न नियमः। कश्चित् क्वन्सोर्द्विकानुबन्धं वर्णयति। **वस्तुतस्तु** यण्वद्भावमा—श्रित्यानुषङ्गलोपः, न परोक्षावद्भावात्।। ५९२।

## [समीक्षा]

'तेरतुः, तेरिथ, फेलतुः, फेलिथ' इत्यादि शब्दरूपों की सिद्धि एत्त्व—अभ्यासलोप के विना नहीं हो सकती, अतः दोनों ही व्याकरणों में इसका विधान किया गया है। पाणिनि के सूत्र हैं — ''तृफलभजत्रपश्च, राधो हिंसायाम्, वा जॄभ्रमुत्रसाम्, फणां च सप्तानाम्'' (अ० ६।४।१२२—१२५)। दोनों व्याकरणों में धातुपरिगणन भिन्नरूप में हुआ है। सूत्रसंख्या की दृष्टि से कातन्त्र के एक सूत्र की तुलना में पाणिनीय के चार सूत्र गौरवाधायक ही कहे जा सकते हैं।

## [विशेष वचन]

१. चकारोऽनुक्तसमुच्चये। श्रन्थिग्रन्थिदन्भेरिति समाहारात् सुखपाठे सिद्धे 'बहुवचनं वा गणार्थमिति मण्डूकप्लुत्यात्र व्यवस्थितविभाषाधिकर्तव्या (दु० टी०)।

२. अन्य आह — अन्ये नेच्छन्ति एके इच्छन्तीति उभयमतमत्रावलम्बितम् (दु० टी०)।

३. इह चकारस्यानुक्तसमुच्चयार्थत्वात् सिद्धमित्यर्थः (वि० प०)।

## [रूपसिद्धि]

१. **तेरतुः**। तॄ + अतुस्। 'तॄ प्लवनतरणयोः' (१।२८३) धातु से परोक्षाविभक्तिसंज्ञक प्रथमपुरुष—द्विवचन 'अतुस्' प्रत्यय, अन् विकरण, द्वित्व, अभ्याससंज्ञा, ''ऋदन्तानां च'' (३।६।१६) से गुण—अर् तथा प्रकृत सूत्र से एत्व—अभ्यासलोप।

२. **तेरिथ**। तॄ + थल्। 'तॄ प्लवनतरणयोः' (१।२८३) धातु से परोक्षाविभक्तिसंज्ञक मध्यमपुरुष—एकवचन 'थल्' प्रत्यय, इडागम तथा अन्य प्रक्रिया पूर्ववत्।

३. **फेलतुः**। फल + अतुस्। 'फल निष्पत्तौ, ञि फला विशरणे' (१।७६, १६५) धातु से 'अतुस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

४. **फेलिथ**। फल + थल्। 'फल निष्पत्तौ, ञि फला विशरणे' (१।१७६, १६५) धातु से परोक्षाविभक्तिसंज्ञक मध्यमपुरुष–एकवचन 'थल्' प्रत्यय, इडागम तथा अन्य प्रक्रिया पूर्ववत्।

५. **भेजतुः**। भज् + अतुस्। 'भज श्रिञ् सेवायाम्' (१।६०४) धातु से परोक्षाविभक्तिसंज्ञक प्रथमपुरुष–द्विवचन 'अतुस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

६. **भेजिथ**। भज् + इट् + थल्। 'भज श्रिञ् सेवायाम्' (१।६०४) धातु से परोक्षाविभक्तिसंज्ञक मध्यमपुरुष–एकवचन 'थल्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

७. **त्रेपे**। त्रप् + ए। 'त्रपूष् लज्जायाम्' (१।३८३) धातु से परोक्षाविभक्तिसंज्ञक आत्मनेपद–प्रथमपुरुष–एकवचन 'ए' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

८. **त्रेपाते**। त्रप् + आते। 'त्रपूष् लज्जायाम्' (१। ३८३) धातु से परोक्षाविभक्तिसंज्ञक आत्मनेपद–प्रथमपुरुष–द्विवचन 'आते' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

९. **त्रेपिरे**। त्रप + इरे। 'त्रपूष् लज्जायाम्' (१। ३८३) धातु से परोक्षासंज्ञक 'इरे' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

१०. **श्रेथतुः**। श्रन्थ् + अतुस्। 'श्रन्थ सन्दर्भे' (९। २७६) धातु से परोक्षासंज्ञक 'अतुस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

११. **ग्रेथतुः**। ग्रन्थ् + अतुस्। 'ग्रन्थ सन्दर्भे' (९। २७६) धातु से परोक्षासंज्ञक 'अतुस' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

१२. **देभतुः**। दन्भ् + अतुस्। 'दन्भ् दम्भे' (४। १९) धातु से परोक्षासंज्ञक अतुस् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ५९२।

## ५९३. न शस–दद–वादि–गुणिनाम् [३।४।५३]

### [सूत्रार्थ]

अगुण परोक्षासंज्ञक सेट् थल् प्रत्यय के परे रहते शस्, दद्, वकारादि तथा गुणी धातुओं को एत्व एवं अभ्यासलोप नहीं होता है।। ५९३।

### [दु० वृ०]

शसेर्ददेर्वकारादीनां गुणिनां च धातूनामेत्त्वमभ्यासलोपश्च न भवति अगुणे परोक्षायां थलि च सेटि परतः। विशशसतुः। विशशसिथ, दददे, दददाते, दददिरे, ववमतुः, ववमिथ, विशशरतुः, विशशरिथ, निनयिथ।। ५९३।

### [दु० टी०]

न शस्। **'शस गतौ, दद दाने'** (१।२४०, ३०५), वकार एवादिर्येषाम्, गुणो विद्यते येषामिति। **'टु वम उद्गिरणे, श्रृ हिंसायाम्, णीञ् प्रापणे'** (१। ५५७; ८।१५; १। ६००)। न च गुणऽकारस्य लाक्षणिकत्वम्, किन्तर्हि गुणस्यैव। गुणानामिति **केचित्** पठन्ति। गुणशब्देनाभिनिर्वृत्तस्यारित्यस्यैकारस्य ओकारस्य च योऽकारस्तस्य प्रतिषेध इति।। ५९३।

## [वि० प०]

न शस०। विशशसतुरिति। **'शसु हिंसायाम्'** (१।२४०)। विशशरतुः। **'शृ हिंसायाम्'** (८। १५)। पूर्ववद् गुणः। इड् वा नयतेरिति।। ५९३।

## [समीक्षा]

'विशशसतुः, ददे, ववमतुः, विशशरतुः, निनयिथ' आदि परोक्षाविभक्तिक प्रयोगों के सिद्ध्यर्थ एत्त्व–अभ्यासलोप वाञ्छित नहीं है, अतः उपरितन सूत्र से प्राप्त इन दोनों कार्यों का निषेध किया गया है। पाणिनि का सूत्र है – ''न शसददवादिगुणानाम्'' (अ० ६। ४। १२६)।

## [रूपसिद्धि]

१. **विशशसतुः**। वि + शस् + अतुस्। 'वि' उपसर्गपूर्वक 'शसु हिंसायाम्' (१। २४०) धातु से परोक्षासंज्ञक 'अतुस्' प्रत्यय, द्वित्वादि, प्राप्त एत्त्व–अभ्यासलोप का प्रकृत सूत्र द्वारा निषेध तथा सकार को विसर्गादेश।

२. **विशशसिथ**। वि + शस् + थल्। 'शस्' धातु से परोक्षासंज्ञक थल् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

३. **ददे**। दद् + ए। 'दद दाने' (१। ३०५) धातु से परोक्षासंज्ञक आत्मनेपद–प्रथमपुरुष–एकवचन 'ए' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

४. **ददाते**। दद् + आते। 'दद दाने' (१।३५०) धातु से परोक्षासंज्ञक 'आते' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

५. **ददिरे**। दद् + इरे। 'दद' धातु से 'इरे' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

६. **ववमतुः**। वम् + अतुस्। 'टु वम उद्गिरणे' (१।५५७) धातु से परोक्षासंज्ञक 'अतुस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

७. **ववमिथ**। वम + इट् + थल्। 'वम्' धातु से परोक्षासंज्ञक 'थल्' प्रत्यय, इडागम तथा अन्य प्रक्रिया पूर्ववत्।

८. **विशशरतुः**। वि + शृ + अतुस्। 'वि' उपसर्गपूर्वक 'शृ हिंसायाम्' (८। १५) धातु से परोक्षासंज्ञक प्रथमपुरुष–द्विवचन 'अतुस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

९. **विशशरिथ**। वि + शृ + इट् + थल्। 'वि' उपसर्गपूर्वक 'शृ हिंसायाम्' (८। १५) धातु से थल् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

१०. **निनयिथ**। नी + इट् + थल्। 'णीञ् प्रापणे' (१। ६००) धातु से परोक्षासंज्ञक मध्यमपुरुष–एकवचन 'थल्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ५९३।

## ५९४. स्वरादाविवर्णोवर्णान्तस्य धातोरियुवौ [३।४।५४]

## [सूत्रार्थ]

अगुण स्वरादि प्रत्यय के परे रहते इवर्णान्त तथा उवर्णान्त धातुओं के स्थान में क्रमशः 'इय्–उव्' आदेश होते हैं।। ५९४।

## [दु० वृ०]

स्वरादावगुणे प्रत्यये परे इवर्णोवर्णान्तस्य धातोरियुवौ भवतः, निर्दिष्टस्य स्थानिन एवान्तरतम्यात्। शिश्रियतुः, शिश्रियुः। चिक्रियतुः, चिक्रियुः। चुक्षुवतुः, चुक्षुवुः। पुपुवतुः, पुपुवुः। युवन्ति, रुवन्ति, लुवन्ति। स्वरादाविति किम् ? श्रीयात्, लूयात्। अगुण इति किम् ? श्रयिता, लविता। **धातुग्रहणमप्युत्तरार्थमेव**॥ ५९४।

## [दु० टी०]

स्वरा०। अगुणाधिकारः इह **मन्दमतिबोधार्थ** एव। यस्माद् इयुव्भ्यां गुणवृद्धी परे इति। एवं नाययति **नायकः**, लावयति **लावकः**॥ ५९४।

## [वि० प०]

स्वरादा०। श्रीयादिति। आशिषि यात्। **''नाम्यन्तानाम्०''** (३।५।१७) इत्यादिना दीर्घः। अथ धातुग्रहणं किमर्थम् ? **प्रकरणान्महाधात्वधिकाराच्च** धातुरेव विज्ञायते इत्याह—धातुग्रहणमपीत्यादि। 'श्रयिता, लविता' इत्यत्र परत्वाद् गुणेन भवितव्यम्। अतो न केवलमगुणाधिकार **उत्तरार्थः**। धातुग्रहणमपीत्यपिशब्दार्थः॥ ५९४।

## [समीक्षा]

'शिश्रियतुः, चिक्रियतुः, युवन्ति, लुवन्ति' आदि शब्दरूपों के साधनार्थ धात्वन्त-घटित 'इवर्ण—उवर्ण' के स्थान में 'इय्—उव्' आदेशों की अपेक्षा होती है। इसकी पूर्ति दोनों व्याकरणों में की गई है। पाणिनि का सूत्र है — ''अचि श्नुधातुभ्रुवां य्वोरियङुवङौ'' (अ० ६।४।७७)। 'अच्—स्वर' शब्दों का तथा इयङ्—उवङ् में अनुबन्धों की योजना अपने अपने व्याकरण की पद्धति के आधार पर की गई है।

## [विशेष वचन]

१. अगुणाधिकार इह मन्दमतिबोधार्थ एव (दु० टी०)।

२. अतो न केवलम् अगुणाधिकार उत्तरार्थः, धातुग्रहणमपि (वि० प०)।

## [रूपसिद्धि]

१. **शिश्रियतुः**। श्रि + अतुस्। 'श्रिञ् सेवायाम्' (१। ६०४) धातु से परोक्षाविभक्तिसंज्ञक प्रथमपुरुष—द्विवचन 'अतुस्' प्रत्यय, द्वित्वादि, प्रकृत सूत्र से श्रिधातुघटित इकार को 'इय्' आदेश तथा सकार को विसर्ग।

२. **चिक्रियतुः**। क्री + अतुस्। 'डु क्रीञ् द्रव्यविनिमये' (८।१) धातु से 'अतुस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

३. **चुक्षुवतुः**। क्षु + अतुस्। 'टु क्षु शब्दे' (२।१०) धातु से परोक्षासंज्ञक 'अतुस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

४. **पुपुवतुः**। पू + अतुस्। 'पूञ् पवने' (८। ८) धातु से परोक्षाविभक्तिसंज्ञक 'अतुस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

५. **युवन्ति**। यु + वर्तमाना—अन्ति। 'यु मिश्रणे' (२। ६) धातु से वर्तमानासंज्ञक प्रथमपुरुष—बहुवचन 'अन्ति' प्रत्यय, अन् विकरण का लुक् तथा प्रकृत सूत्र से उकार को 'उव्' आदेश।

६. **रुवन्ति**। रु + वर्तमाना—अन्ति। 'रु शब्दे' (२। १०) धातु से वर्तमानासंज्ञक 'अन्ति' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

७. **लुवन्ति**। लू + वर्तमाना—अन्ति। 'लूञ् छेदने' (८।९) धातु से वर्तमानासंज्ञक 'अन्ति' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ५९४।

## ५९५. अभ्यासस्यासवर्णे [३।४।५५]

### [सूत्रार्थ]

इवर्णान्त तथा उवर्णान्त धातु के अभ्यास को 'इय्—उव्' आदेश होते हैं, असवर्ण स्वर के परे रहते।। ५९५।

### [दु० वृ०]

इवर्णोवर्णान्तस्य धातोरभ्यासस्यासवर्णे स्वरे इयुवौ भवतः। इयेष, उवोष, इयृयात्। असवर्ण इति किम् ? ईषतुः, ऊषतुः।। ५९५।

### [दु० टी०]

अभ्या०। स्वर इति किम् ? इयाज, उवाप।। ५९५।

### [वि० प०]

अभ्यास०। इषेरुषेश्च लघूपधत्वाद् गुणे कृतेऽसवर्णो भवति, न चात्र **'स्वरादेशः परनिमित्तकः पूर्वविधिं प्रति स्थानिवत्'** (का० परि० ९) इति वक्तव्यम्, अत एव वचनात्। न ह्यन्यथा अस्यावकाश उपपद्यते इति। इयृयादिति। **'ऋ सृ गतौ'** (२। ७४) इति जौहोत्यादिकः सप्तम्याः 'यात्'। **''अर्तिपिपर्त्योश्च''** (३।३।२५) इतीकारः।। ५९५।

### [बि० टी०]

अभ्यास०। इयेष, उवोष इत्यत्र **पञ्जी**। अत एव वचनात् स्वरादेशस्य न स्थानिवदिति कथमुक्तम्, यावता 'इयृयात्' इत्यत्राभ्यासे इयादेशस्य सत्त्वात् ? सत्यम्। 'उवोष' इत्यत्रैव बोद्धव्या **पञ्जी**पङ्क्तिरिति।। ५९५।

### [समीक्षा]

'इयेष, उवोष' आदि शब्दों की सिद्धि अभ्यासघटित 'इ—उ' को 'इय्—उव्' आदेश किए विना नहीं हो सकती, अतः उनका विधान दोनों ही व्याकरणों में किया गया है। पाणिनि का सूत्र है — ''अभ्यासस्यासवर्णे'' (अ० ६।४।७८)। इस प्रकार विधानसाम्य तथा सूत्रशब्दावलीसाम्य से उभयत्र समानता है।

## [रूपसिद्धि]

१. **इयेष**। इष् + परोक्षा–अट्। 'इषु इच्छायाम्' (५।७०) धातु से परोक्षाविभक्तिसंज्ञक परस्मैपद–प्रथमपुरुष–एकवचन 'अट्' प्रत्यय, ''चण्परोक्षाचेक्रीयितसनन्तेषु'' (३।३।७) से 'इष्' धातु को द्वित्व, ''पूर्वोऽभ्यासः'' (३।३।४) से पूर्ववर्ती 'इष्' की अभ्यासंज्ञा, ''अभ्यासस्यादिर्व्यञ्जनमवशेष्यम्'' (३।३।९) से 'इ' का शेष–'ष्' का लोप, ''नामिनश्चोपधाया लघोः'' (३।५।२) से 'इष्' धातु की उपधा इकार को गुण तथा प्रकृत सूत्र से अभ्यासगत इकार को इयादेश।

२. **उवोष**। उष् + परोक्षा–अट्। 'उष दाहे' (१।२२९) धातु से परोक्षासंज्ञक प्रथमपुरुष– एकवचन 'अट्' प्रत्यय तथा अभ्यासगत उकार को उवादेश के अतिरिक्त अन्य प्रक्रिया पूर्ववत्।। ५९५।

## ५९६. नोर्विकरणस्य [३।४।५६]

## [सूत्रार्थ]

ष्वादिगणपठित धातुओं से होने वाले 'नु' विकरण के अन्तर्गत उकार को 'उव्' आदेश होता है, अगुण स्वरादि प्रत्यय के परे रहते।। ५९६।

## [दु० वृ०]

विकरणस्य नोरुकारस्यागुणे स्वरादावुव् भवति आन्तरतम्यात्। प्राप्नुवन्ति, प्राप्नुवन्तु, शक्नुवन्ति शक्नुवन्तु। नोरिति किम् ? क्षण्वन्ति। विकरणस्येति किम् ? तन्वन्ति।। ५९६।

## [दु० टी०]

नोर्वि०। असंयोगात् परस्य नोर्वत्वं वक्ष्यतीत्यतः संयोगात् परस्योदाह्रियते। ननु च नुरयं सार्वधातुकस्य सहभावेनार्थवान् ततश्च **'अर्थवद्ग्रहणे नानर्थकस्य'** (का० परि० ४) इति तन्वन्तीति कुतः प्राप्तिः, 'उ'–विकरणोऽर्थवान् न तु नुरिति ? सत्यम्, **मन्दमतिबोधार्थमेव** विकरणग्रहणम्।। ५९६।

## [वि० प०]

नोर्वि०। क्षण्वन्तीति। **'क्षणु क्षिणु हिंसायाम्'** (७।३) इति तनादित्वाद् उ–विकरण इत्यर्थः।। ५९६।

## [समीक्षा]

'प्राप्नुवन्ति, शक्नुवन्ति' आदि ष्वादिगणपठित धातुओं से सिद्ध होने वाले शब्दों में नु–विकरणगत उकार को उवादेश करने की आवश्कता होती है। इसका विधान कातन्त्रकार तथा पाणिनि दोनों ने ही किया है। पाणिनि का सूत्र है – ''अचि श्नुधातु–भ्रुवां य्वोरियङुवङौ'' (अ० ६।४।७७)। अन्तर यह है कि सुखावबोधार्थ कातन्त्रकार ने ५९४ तथा ५९६ ये दो सूत्र पृथक् पृथक् बनाए हैं, जबकि पाणिनि ने इन दोनों को एक ही सूत्र में पढ़ा है।

## [विशेष वचन]

१. मन्दमतिबोधार्थमेव विकरणग्रहणम् (दु० टी०)।

## [रूपसिद्धि]

**१. प्राप्नुवन्ति।** प्र + आप् + नु–विकरण + वर्तमाना – अन्ति। 'प्र' उपसर्गपूर्वक 'आप्लृ व्याप्तौ' (४। १४) धातु से वर्तमानाविभक्तिसंज्ञक प्रथमपुरुष–बहुवचन 'अन्ति' प्रत्यय, ''नुः ष्वादेः'' (३। २। ३४) से 'नु' विकरण, प्रकृत सूत्र द्वारा नु–विकरणगत उकार को उवादेश तथा समानदीर्घ।

**२. प्राप्नुवन्तु।** प्र + आप् + नु–विकरण + पञ्चमी–अन्तु। 'प्र' उपसर्गपूर्वक 'आप्लृ व्याप्तौ' (४। १४) धातु से पञ्चमीसंज्ञक 'अन्तु' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**३. शक्नुवन्ति।** शक् + नु–विकरण + वर्तमाना–अन्ति। 'शक्लृ शक्तौ' (४। १५) धातु से वर्तमानासंज्ञक 'अन्ति' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**४. शक्नुवन्तु।** शक् + नु + अन्तु। 'शक्लृ शक्तौ' (४। १५) धातु से पञ्चमीसंज्ञक प्रथमपुरुष–बहुवचन 'अन्तु' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ५९६।

# ५९७. य इवर्णस्यासंयोगपूर्वस्यानेकाक्षरस्य [३।४।५७]

## [सूत्रार्थ]

अनेक अक्षरों वाली धातु के अन्तर्गत असंयोगपूर्व इवर्ण के स्थान में यकारादेश होता है, अगुण स्वरादि प्रत्यय के परे रहते।। ५९७।

## [दु० वृ०]

अनेकाक्षरस्य धातोर्य इवर्णस्तस्यासंयोगपूर्वस्य यकारो भवति स्वरादावगुणे प्रत्यये परे। विव्यतुः, विव्युः, निन्यतुः, निन्युः। दिग्यिरे, निन्यिरे। असंयोगपूर्वस्येति किम् ? शिश्रियतुः, चिक्रियतुः। अनेकाक्षरस्येति किम् ? अधीयते।। ५९७।

## [दु० टी०]

यः। न विद्यते संयोगः पूर्वो यस्माद् इवर्णादिति, न विद्यते एकमक्षरं यस्य धातो-रिति। ननु किमिति धातुग्रहणम् **उत्तरार्थ**मेवेत्युक्तम्। न च धातुग्रहणमन्तरेण लिङ्गमिह संभाव्यते, एवं तर्हि इवर्णो योऽसावसंयोगपूर्वस्तदन्तस्यानेकाक्षरस्य यत्वे विधीयते – 'अधीयते' इत्यत्रापि स्यात्। अथ **महाधात्वधिकाराद्** धातुरस्तीति, तर्हि सर्वं धातोरेव विशेषणं स्यात्। इवर्णान्तस्यानेकाक्षरस्यासंयोगपूर्वस्येति। ततश्च 'व्यशिश्वियत्' इत्यत्र धातोः पूर्वो व्यशब्दः संयोग इति प्रतिषेधः स्यात् – 'शिश्रियतुः, चिक्रियतुः' इत्यत्र य एव स्यादिति धातुग्रहणं व्यधिकरणषष्ठीप्रतिपत्त्यर्थं भविष्यति विशेषणविशेष्यभावस्येष्टत्वाद् इत्यपि **प्रतिपत्तिगौरवम्।** असंयोगाद् इति सिद्धे पूर्वग्रहणं **स्पष्टार्थम्।** नेति सिद्धे यकारादेशः सवर्णार्थः – 'चिक्यिरे, निन्यिरे'। अन्यथा सवर्णे केन यत्त्वं स्यादिति। इवर्ण इति किम् ? नुनुवतुः, नुनुवुः।। ५९७।

## [वि० प०]

य इवर्ण०। यदुक्तं धातुग्रहण**मुत्तरार्थम्**, तस्य **फल**माह—अनेकाक्षरस्य धातोर्य इवर्ण इति। एतेनानेकाक्षरस्येति धातोर्विशेषणम् असंयोगपूर्वस्येति, एतत् पुनरिवर्णस्येति दर्शितम्। अन्यथा अनेकाक्षरस्येत्यपि इवर्णस्य विशेषणं स्यात्। असंयोगपूर्वो य इवर्णस्त-दन्तसमुदायस्यानेकाक्षरस्य यत्वमिति। एवं सति 'अधीयते' इत्यत्रापि स्यात् तदन्तसमुदाय-स्यानेकाक्षरत्वादिति। अथ **महाधात्वधिकाराद्** अनेकाक्षरस्येति धातोर्विशेषणमुच्यते। यद्येवम् असंयोगपूर्वस्येत्यपि धातोरेव विशेषणं स्यात् तदा 'व्यशिश्विवयत्' इत्यत्रैव प्रतिषेधः स्यात्। इह धातोः पूर्वो व्यशब्दः संयोगोऽस्तीति **'श्विधेटोर्वा वक्तव्यम्'** इति वचनात् श्वयतेश्चण्। इह तु यत्वमेव स्यात्। 'शिश्विवयतुः, चिक्रियतुः' इति धातोः पूर्वं संयोगत्वाभावादिति। 'दिग्यिरे' इति **''दिगि दयतेः परोक्षायाम्''** (३।३।४२) इति दिग्यादेशोऽभ्यासलोपश्च। 'अधीयते' इति अधिपूर्व इङ् अध्ययने, इयादेशः, **''आत्मने चानकारात्''** (३। ५। ३९) इति नलोपः॥ ५९७।

## [समीक्षा]

'निन्यतुः, निन्युः, ग्रामण्यौ, ग्रामण्यः, दिग्यिरे, निन्यिरे' आदि शब्दों के सिद्ध्यर्थ असंयोगपूर्व अनेकाक्षर—धातुघटित इवर्ण को यकारादेश की अपेक्षा होती है। इसका समाधान दोनों ही आचार्यों ने किया है। पाणिनि का सूत्र है — ''एरनेकाचोऽसंयोगपूर्वस्य'' (अ० ६।४।८२)। पाणिनि के 'एः' प्रयोग की अपेक्षा 'इवर्णस्य' का प्रयोग अधिक स्पष्टाधायक है। ज्ञातव्य है कि 'अक्षर' शब्द का प्रयोग केवल स्वर वर्णों के लिए तथा व्यञ्जनयुक्त स्वरवर्णों के लिए होता रहा है। अतः पाणिनि के 'अनेकाचः' पद की अपेक्षा कातन्त्रकार के 'अनेकाक्षरस्य' शब्द के उल्लेख में स्पष्टता अधिक है।

## [विशेष वचन]

१. महाधात्वधिकाराद् धातुरस्तीति (दु० टी०)।
२. असंयोगादिति सिद्धे पूर्वग्रहणं स्पष्टार्थम् (दु० टी०)।
३. तदन्तसमुदायस्यानेकाक्षरत्वात् (वि० प०)।
४. अथ महाधात्वधिकारादनेकाक्षरस्येति धातोर्विशेषणमुच्यते (वि० प०)।

## [रूपसिद्धिः]

१. **विव्यतुः**। व्येञ् + परोक्षा—अतुस्। 'व्येञ् संवरणे' (१।६१२) धातु से परोक्षाविभक्तिसंज्ञक परस्मैपद—प्रथम पुरुष—द्विवचन 'अतुस्' प्रत्यय, ''परोक्षायां च'' (३। ५। २०) से अगुण, ''स्वपिवचियजादीनां यण्परोक्षाशीःषु'' (३।४।३) से 'ये' को सम्प्रसारण, ''तद् दीर्घमन्त्यम्'' (४।१।५२) से दीर्घ, ''चण्परोक्षाचेक्रीयितसनन्तेषु'' (३।३।७) से 'वी' धातु को द्विर्वचन, पूर्ववर्ती 'वी' की अभ्याससंज्ञा, ''ह्रस्वः'' (३।३।१५) से ह्रस्व, प्रकृत सूत्र से ईकार को यकार तथा सकार को विसर्गादेश।

२. **विव्युः**। व्येञ् + परोक्षा— उस्। 'व्येञ् संवरणे' (१। ६१२) धातु से परोक्षा—विभक्तिसंज्ञक 'उस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

३. **निन्यतुः**। नी + परोक्षा—अतुस्। 'णीञ् प्रापणे' (१।६००) धातु से परोक्षासंज्ञक 'अतुस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

४. **निन्युः**। नी + परोक्षा—उस्। 'णीञ् प्रापणे' (१।६००) धातु से परोक्षासंज्ञक 'उस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

५. **दिग्यिरे**। देङ् + परोक्षा—इरे। 'देङ् त्रैङ् पालने' (१।४६३) धातु से परोक्षासंज्ञक आत्मनेपद प्रथमपुरुष—बहुवचन 'इरे' प्रत्यय, ''दिगि दयतेः परोक्षायाम्'' (३।३।४२) से 'देङ्' को 'दिगि' आदेश, द्वित्व, अभ्यासलोप तथा प्रकृत सूत्र से इकार को यकारादेश।

६. **निन्यिरे**। नी + परोक्षा—इरे। 'णीञ् प्रापणे' (१।६००) धातु से परोक्षाविभक्तिसंज्ञक आत्मनेपद-प्रथम पुरुष—बहुवचन 'इरे' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ५९७।

## ५९८. इणश्च [३।४।५८]

### [सूत्रार्थ]

अगुण स्वरादि प्रत्यय के परे रहते 'इण्' धातु को यकारादेश होता है।। ५९८।

### [दु० वृ०]

इणो धातोरगुणे स्वरादौ यकारो भवति। यन्ति, यन्तु। **चकारोऽनुक्तसमुच्चयार्थः**, तेन इकोऽपि स्यात्—अधियन्ति, अधियन्तु।। ५९८।

### [दु० टी०]

इणश्च। अयमपीयादेशापवादः। एकाक्षरार्थ आरम्भः। **इण्ग्रहणम् इङो निवृत्त्यर्थम्**—अधीयते।। ५९८।

### [समीक्षा]

'यन्ति, यन्तु, अधियन्ति, अधियन्तु' आदि शब्दरूपों के साधनार्थ इकार को यकारादेश की आवश्यकता होती है। इसकी पूर्ति दोनों व्याकरणों में की गई है। पाणिनि का सूत्र है — ''इणो यण्'' (अ० ६।४।८१)। वृत्तिकार दुर्गसिंह की व्याख्या के अनुसार सूत्र में चकार का पाठ अनुक्तसमुच्चयार्थ है। अतः 'इक् स्मरणे' (२।१२) से भी यह कार्य उपपन्न होता है, तदनुसार 'अधियन्ति, अधियन्तु' आदि प्रयोग भी सिद्ध होते हैं, परन्तु 'इङ् अध्ययने' (२। ५६) धातु का इसमें समावेश न होने से 'अधीयते' में यकारादेश प्रवृत्त नहीं होगा।

### [विशेष वचन]

१. चकारोऽनुक्तसमुच्चयार्थः (दु० वृ०)।

२. इण्ग्रहणम् इङो निवृत्त्यर्थम् (दु० टी०)।

### [रूपसिद्धिः]

१. **यन्ति**। इण् + वर्तमाना—अन्ति। 'इण् गतौ' (२।१३) धातु से वर्तमानासंज्ञक प्रथमपुरुष—बहुवचन 'अन्ति' प्रत्यय तथा प्रकृत सूत्र से इकार को यकारादेश।

२. **यन्तु**। इण् + पञ्चमी—अन्तु। 'इण् गतौ' (२।१।३) धातु से पञ्चमीसंज्ञक प्रथमपुरुष—बहुवचन 'अन्तु' प्रत्यय, "अन् विकरणः कर्तरि" (३।२।३२) से 'अन्' विकरण, "अदादेर्लुग् विकरणस्य" (३।४।९२) से उसका लुक्, "द्वित्वबहुत्वयोश्च परस्मै" (३।५।९९) से अगुण तथा प्रकृत सूत्र से इकार को यकारादेश।। ५९८।

## ५९९. नोर्वकारो विकरणस्य [३।४।५९]

### [सूत्रार्थ]

अगुण स्वरादि प्रत्यय के परवर्ती होने पर असंयोगपूर्व 'नु' विकरणघटित उकार को वकारादेश होता है।। ५९९।

### [दु० वृ०]

नोर्विकरणस्यासंयोगपूर्वस्य स्वरादावगुणे वकारो भवति। सुन्वन्ति, चिन्वन्ति। विकरणस्येति किम् ? नुवन्ति, नोनुवः। असंयोगपूर्वस्येति किम् ? तक्ष्णुवन्ति।। ५९९।

### [दु० टी०]

नोर्व०। नोनुवः इति। भृशं नौतीति यशब्दः, पचादित्वादच्, तस्य लुगचि।। ५९९।

### [वि० प०]

नोर्व०। नोनुवः इति। भृशं नौतीति धातोर्यशब्दः, पचादित्वाद् अच्, **"तस्य लुगचि"** (४।४।४५) इति कृते **"प्रत्ययलुकां चानाम्"** (४।१।४) इति अगुणत्वादुवादेशः।। ५९९।

### [समीक्षा]

स्वादिगणपठित धातुओं में "नुः ष्वादेः" (३।२।३४) से 'नु' विकरण होता है, जिससे 'सुन्वन्ति, चिन्वन्ति' आदि शब्दरूप सिद्ध होते हैं, परन्तु इनके सिद्ध्यर्थ नु—विकरणघटित उकार को वकारादेश की आवश्यकता होती है। इसकी पूर्ति दोनों ही आचार्यों ने की है। पाणिनि का सूत्र है — "हुश्नुवोः सार्वधातुके" (अ० ६।४।८७)। पाणिनि ने 'श्नु' विकरण के साथ 'हु' धातु को भी एक ही सूत्र में सम्मिलित कर लिया है, परन्तु कातन्त्रकार ने दो सूत्र बनाए हैं।

### [रूपसिद्धिः]

१. **सुन्वन्ति**। सु + नु + वर्तमाना—अन्ति। 'षुञ् अभिषवे' (४।१) धातु से वर्तमानाविभक्तिसंज्ञक 'अन्ति' प्रत्यय, "**नु ष्वादेः**" (३।२।३४) से 'नु' विकरण तथा प्रकृत सूत्र से नु—घटित उकार को वकारादेश।

२. **चिन्वन्ति**। चि + नु + वर्तमाना—अन्ति। 'चिञ् चयने' (४।५) धातु से 'अन्ति' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ५९९।

## ६००. जुहोतेः सार्वधातुके [३।४।६०]

### [सूत्रार्थ]

अगुण स्वरादि सार्वधातुकसंज्ञक प्रत्यय के परे रहते 'हु' धातुघटित उकार को वकारादेश होता है।। ६००।

### [दु० वृ०]

जुहोतेरुकारस्य स्वरादावगुणे सार्वधातुके परे वकारो भवति। जुह्वति, जुह्वतु। अगुण इति किम् ? जुहवानि। (सार्वधातुक इति किम् ? जुहुवुः) स्वरादाविति किम् ? जुहुयात्।। ६००।

### [दु० टी०]

जुहो०। तिब्निर्देशः **सुखपाठप्रतिपत्त्यर्थ** एव। सार्वधातुक इति किम् ? जुहुवतुः, जुहुवुः। ''हुनुविकरणयोः सार्वधातुके'' इत्येकयोगेन सिध्यति **पृथग्योगः स्पष्टार्थः**।। ६००।

### [वि० प०]

जुहोतेः। जुह्वतीति। **''लोपोऽभ्यस्तादन्तिनः''** (३।५।३८) इति नलोपः। 'जुहवानि' इत्यत्रापि परत्वाद् गुणेनैव भवितव्यम् इत्यगुणाधिकारो **मन्दधियां सुखार्थ** एव।। ६००।

### [समीक्षा]

'हु' धातु से सिद्ध होने वाले 'जुह्वति, जुह्वतु' आदि प्रथमपुरुष–बहुवचन के रूपों में उकार को वकारादेश की अपेक्षा होती है, इसकी पूर्ति दोनों ही व्याकरणों में की गई है। पाणिनि ने एतदर्थ 'हु' धातु तथा 'श्नु' विकरण को एक ही सूत्र में पढ़ा है, परन्तु कातन्त्रकार ने मन्दमतिवालों के सुखावबोधार्थ अथवा स्पष्टार्थ पृथक् दो सूत्र बनाए हैं।

### [विशेष वचन]

१. तिब्निर्देशः सुखपाठप्रतिपत्त्यर्थ एव (दु० टी०)।
२. पृथग्योगः स्पष्टार्थः (दु० टी०)।
३. अगुणाधिकारो मन्दधियां सुखार्थ एव (वि० प०)।

### [रूपसिद्धि]

१. **जुह्वति**। हु + अन्लुक् + वर्तमाना–अन्ति। 'हु दाने' (२।६७) धातु से वर्तमानासंज्ञक परस्मैपद–प्रथमपुरुष–बहुवचन 'अन्ति' प्रत्यय, अन्-विकरण, उसका लुक्, ''जुहोत्यादीनां सार्वधातुके'' (३।३।८) से 'हु' धातु को द्वित्व, अभ्याससंज्ञा, ''हो जः'' (३। ३। १२) से अभ्यासघटित हकार को जकार, ''द्वित्वबहुत्वयोश्च परस्मै'' (३। ५। १९) से अगुण, प्रकृत सूत्र से 'उ' को व् तथा प्रत्ययघटित नकार का लोप।

२. **जुह्वतु**। हु + अन्लुक् + पञ्चमी–अन्तु। 'हु दाने' (२।६७) धातु से पञ्चमीविभक्तिसंज्ञक 'अन्तु' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ६००।

## ६०१. भुवो वोऽन्तः परोक्षाऽद्यतन्योः [३।३।६१]

### [सूत्रार्थ]

परोक्षा–अद्यतनीविभक्तिसंज्ञक स्वरादि प्रत्ययों के परवर्ती होने पर 'भू' धातु के अन्तिम ऊकार को वकारादेश होता है।। ६०१।

### [दु० वृ०]

भुवो धातोरन्तो वकारो भवति परोक्षाद्यतन्योः स्वराद्योः परतः। बभूव, बभूवतुः, बभूवुः। बभूविथ, अभूवन्, अभूवम्। पुनर्वकारो गुणवृद्धिबाधनार्थः। नित्यश्चेदगुणाधिकारः स्यात्। स्वराद्योरिति किम् ? अभूत्, बभूवान्। 'बभूवुषः' इति **'असिद्धं बहिरङ्गमन्तरङ्गे'** (का० परि० ३३) इति।। ६०१।

### [दु० टी०]

भुवः। पुनर्वकार इत्यादि। **''नोर्वकारो विकरणस्य''** (३। ४। ६०) इत्यतो वकारोऽनुवर्तते, तेन वकारो वकार इति वकार एव भवतीत्यर्थः। तस्माद् गुणवृद्ध्योः परत्वेऽपि बाधा सिद्धेति भावः। ननु च **'नित्यानित्ययोर्नित्यविधिर्बलवान्'** (का० परि० ४९) इति वकारागम एवेत्यवस्थान्तरेऽपि स एव भवतीति निमित्तम्, कुतो गुणवृद्धिप्रसङ्गः। **व्यक्तिपक्षे** हि **'शब्दान्तरस्य विधिः प्राप्नुवन्नित्यो भवितुमर्हति'** (व्या० परि० ७७) इति? नैवम्, पूर्वसूत्रे गुणाधिकारः सम्बध्यते, व्यावृत्तेः सम्भवात्, तथात्रापीत्युवादेशस्यैव बाधकः स्यादिति पुनर्वकार उच्यते। ननु च **''य्वोर्व्यञ्जनेऽये''** (४। १। ३५) इत्यनेन लोपो भविष्यति, स्वरानुवर्तनेन किम् ? सत्यम्, विधानबलाद् वकारस्य स्थितिरेव मन्यते।। ६०१।

### [वि० प०]

भुवो०। अभूवन्निति। **''इण्स्था०''** (३।४।९३) इत्यादिना सिचो लुक्। पुनरित्यादि। पूर्वसूत्राद् वकारानुवर्तनाद् वकारो वकार इति किमुक्तं भवति–वकार एवेति। तेन बभूविथेति गुणस्य, बभूवेति वृद्धेश्च परत्वेऽपि बाधा सिद्धेति। अथ कृताकृतप्रसङ्गित्वेनाधिकृत एव वकारो नित्यत्वाद् भवन् गुणवृद्धी बाधिष्येते, किं पुनर्वकारेणेति चेत् तर्हि पूर्वसूत्रसम्बद्धोऽगुणाधिकारोऽपि स्यात्। तस्मात् पुनर्वकारेणासौ निवर्त्यत इति। **बभूवान्** इति क्वन्सुः, अस्य च परोक्षावद्भावो द्विर्वचनादिकं भवतीति। अथ **''अघुट्स्वरादौ सेट्कस्यापि''** (२।२।४६) इत्यादिना वन्सेर्वकारस्योत्वे स्वरादित्वमस्तीति न कथं वकारागम इत्याह – बभूवुष इति। वकारागमे प्रकृत्याश्रितत्वाद् अन्तरङ्गे कर्तव्ये बहिरङ्गमुत्वमसिद्धं भवतीत्यर्थः। उवादेशे तु कर्तव्ये सिद्धम्, अनित्यत्वादस्याश्च परिभाषाया इति।। ६०१।

### [समीक्षा]

'बभूव, अभूवन्, अभूवम्' इत्यादि प्रयोगों के सिद्ध्यर्थ 'भू' धातु के अनन्तर वकार की आवश्कता होती है। इसकी पूर्ति कातन्त्रकार ने वकारागम से तथा पाणिनि

ने वुगागम से की है। पाणिनि का सूत्र है – ''भुवो वुग् लुङ्लिटोः'' (अ० ६।४।८८)। ''नोर्वकारो विकरणस्य'' (३।३।५९) सूत्रपठित 'वकारः' पद की अनुवृत्ति से ही कार्यसिद्धि होने पर प्रकृत सूत्र में जो पुनः 'वः' का ग्रहण किया गया है, वह गुण–वृद्धि के बाधनार्थ है। वृत्तिकार दुर्गसिंह ने कहा है – 'पुनर्वकारो गुणवृद्धिबाधनार्थः'। कातन्त्रकार ने प्रकृत सूत्र में ही वकारागम को 'भू' के अन्त में निर्दिष्ट किया है, जब कि कातन्त्रकार ने कित् आगमों के अन्त में विधानार्थ एक स्वतन्त्र परिभाषासूत्र की रचना की है – ''आद्यन्तौ टकितौ'' (अ० १। १। ४६)।

## [विशेष वचन]

१. तेन वकारो वकार इति वकार एव भवतीत्यर्थः (दु० टी०)।

२. व्यक्तिपक्षे हि शब्दान्तरस्य विधिः प्राप्नुवन्नित्यो भवितुमर्हति (दु० टी०)।

३. विधानबलाद् वकारस्य स्थितिरेव मन्यते (दु० टी०)।

४. वकारागमे, प्रकृत्याश्रितत्वादन्तरङ्गे कर्तव्ये बहिरङ्गमुत्वमसिद्धं भवतीत्यर्थः। उवादेशे तु कर्तव्ये सिद्धम् अनित्यत्वादस्याश्च परिभाषाया इति (वि० प०)।

## [रूपसिद्धि]

१. **बभूव**। भू + परोक्षा–अट्। 'भू सत्तायाम्' (१।१) धातु से परोक्षाविभक्तिसंज्ञक परस्मैपद-प्रथमपुरुष–एकवचन 'अट्' प्रत्यय, प्रकृत सूत्र द्वारा 'भू' धातु के अन्त में (अन्त्यावयव) वकारागम, ''चणपरोक्षाचेक्रीयितसनन्तेषु'' (३। ३। ७) से 'भूव्' को द्विर्वचन, पूर्ववर्ती 'भूव्' की ''पूर्वोऽभ्यासः'' (३। ३। ४) से अभ्याससंज्ञा, ''अभ्यासस्यादिर्व्यञ्जनमवशेष्यम्'' (३। ३। ९) से व् का लोप, ''ह्रस्वः'' (३। ३। १५) से अभ्यासवर्ती दीर्घ ऊकार को ह्रस्व उकार, ''भवतेरः'' (३।३।२२) से भू–घटित उकार को अकार तथा ''द्वितीयचतुर्थयोः प्रथमतृतीयौ'' (३। ३। ११) से भ् को ब् आदेश।

२. **बभूवतुः**। भू + परोक्षा–अतुस्। 'भू सत्तायाम्' (१। १) धातु से परोक्षासंज्ञक अतुस् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

३. **बभूवुः**। भू + परोक्षा–उस्। 'भू सत्तायाम्' (१। १) धातु से परोक्षासंज्ञक उस् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

४. **बभूविथ**। भू + परोक्षा–थल्। 'भू सत्तायाम्' (१। १) धातु से परोक्षाविभक्तिसंज्ञक परस्मैपद-मध्यमपुरुष–एकवचन 'थल्' प्रत्यय, ''इडागमोऽसार्वधातुकस्यादिर्व्यञ्जनादेरयकारादेः'' (३। ७। १) से इडागम तथा अन्य प्रक्रिया पूर्ववत्।

५. **अभूवन्**। अट् + भू + वकारागम + अन्। 'भू सत्तायाम्' (१।१) धातु से अद्यतनीविभक्तिसंज्ञक परस्मैपद-प्रथमपुरुष–बहुवचन 'अन् प्रत्यय, प्रकृत सूत्र से वकारागम, ''अड् धात्वादिर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु'' (३। ८। १६) से अडागम, सिच् प्रत्यय तथा उसका लुक्, ''भुवः सिज्लुकि'' (३। ७। ३४) से अगुण तथा इडागम का निषेध।

६. **अभूवम्**। अट् + भू + वकारागम + अम्। 'भू सत्तायाम्' (१। १) धातु से अद्यतनीसंज्ञक परस्मैपद-उत्तमपुरुष–एकवचन 'अम्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ६०१।

## ६०२. गोहेरूदुपधायाः [३। ४। ६२]

### [सूत्रार्थ]

'गुहू संवरणे' (१।५९५) धातु में गुण हो जाने पर स्वरादि प्रत्यय के परवर्ती होने पर उपधावर्ती ह्रस्व उकार को ऊत् आदेश होता है।। ६०२।

### [दु० वृ०]

गोहेः कृतगुणस्य स्वरादौ परतः उपधायाः ऊद् भवति। गूहयति, गूहिता, गूहकः। गोहेः कृतगुणस्येति किम् ? जुगुहुः। **उपधाग्रहणमुत्तरार्थं** च।। ६०२।

### [दु० टी०]

गोहेः। स्वरादाविति किम् ? निगोढः, निगोढुम्, जोगुहिता, जोगुहितुम् इति **''प्रत्ययलुकां चानाम्''** (४। १। ४) इति गुणप्रतिषेधात्। **कश्चिद्** आह – गोहिग्रहणं विषयार्थम्। भावी यत्र गुणस्तत्र गुणं बाधित्वा उत्वं क्रियत इति, तन्मतेनापि गुरूपधत्वाद् गुणोऽयादेशोऽपि नास्तीति। न चात्रासिद्धवद्भाव आद्रियते। तस्मान्नित्यं निगुह्य गतः इति भवितव्यम्। 'गोहेरूदोतः' इति सिद्धे उपधाग्रहणमुत्तरार्थं क्रियमाणमिहापि **सुखप्रतिपत्त्यर्थं** भवतीत्यत आह–उपधे**त्यादि**।। ६०२।

### [वि० प०]

गोहेः। न हि गोहरूपो धातुरस्ति 'येन इका निर्दिश्यते, तस्माद् **'गुहू संवरणे'** (१।५९५) इत्यस्यैव गुणे सत्ययं निर्देश इत्याह–गोहेः कृतगुणस्येति। अथ गोहेरोदूत्' इत्यास्तां किमुपधाग्रहणेन, न ह्योकारादन्य उपधावर्णोऽस्तीत्याह – उपधेत्यादि। उत्तरार्थं क्रियमाणमिहापि **सुखार्थं** भवतीत्यर्थः।। ६०२।

### [समीक्षा]

'गूहयति, निगूहति, निगूहकः' आदि शब्दरूपों के सिद्ध्यर्थ गुणघटित रूप 'गोह्' में उपधासंज्ञक ओकार के ऊकारादेश की आवश्यकता होती है, इसका विधान दोनों ही आचार्यों ने किया है। पाणिनि का सूत्र है – ''ऊदुपधाया गोहः'' (अ० ६।४।८९)। व्याख्याकारों ने 'गोहेरोदूतः, गोहेरूदोत्' ये न्यासान्तर भी बताए हैं, जिनसे उपधाग्रहण की कोई आवश्यकता नहीं रह जाती है, परन्तु वैसा न करके जो उपधाग्रहण किया गया है, उसकी सार्थकता उत्तरवर्ती सूत्र में तो होती ही है, प्रकृत सूत्र में भी उसे सुखार्थ पढ़ा गया है।

### [विशेष वचन]

१. उपधाग्रहणमुत्तरार्थं च (दु० वृ०)।

२. कश्चिदाह – गोहिग्रहणं विषयार्थम्, भावी यत्र गुणस्तत्र गुणं बाधित्वा उत्त्वं क्रियते इति (दु० टी०)।

३. 'गोहेरुदोतः' इति सिद्धे उपधाग्रहणमुत्तरार्थं क्रियमाणमिहापि सुखप्रतिपत्त्यर्थं भवति (दु० टी०; वि० प०)।

## [रूपसिद्धि]

१. **गूहयति**। गुह + इन् + अन् + वर्तमाना–ति। 'गुहू संवरणे' (१। ५९५) धातु से "धातोश्च हेतौ" (३। २। १०) सूत्र द्वारा इन् प्रत्यय, "नामिनश्चोपधायाः" (३। ५। २) से उपधागुण, 'गोहि' की "ते धातवः" (३। २। १६) से धातुसंज्ञा, वर्तमानासंज्ञक प्रथमपुरुष–एकवचन 'ति' प्रत्यय, "अन् विकरणः कर्तरि" (३।२।३२) से 'अन्' विकरण, प्रकृत सूत्र से ओकार को ऊकार, "अनि च विकरणे" (३।५।३) से इकार को गुण तथा एकार को अयादेश।

२. **गूहिता**। गुह् + इट् + ता। 'गुहू संवरणे' (१।५९५) धातु से श्वस्तनीसंज्ञक प्रथमपुरुष–एकवचन 'ता' प्रत्यय, "स्वरतिसूतिसूयत्यूदनुवन्धात्" (४।६।८३) से इडागम, "नामिनश्चोपधायाः" (३।५।२) से उपधासंज्ञक उकार को गुण तथा प्रकृत सूत्र से ओकार को ऊकारादेश।

३. **गूहकः**। गुह् + वुण् + सि। 'गुहू संवरणे' (१।५९५) धातु से कर्ता अर्थ में "वुण्तृचौ" (४।२।४७) सूत्र द्वारा 'वुण्' प्रत्यय, गुण, "युवुभ्रामनाकान्ताः" (४।६।५४) से 'वु' को 'अक' आदेश, गुण, प्रकृतसूत्र से ओकार को ऊकार, 'गूहक' की लिङ्गसंज्ञा, प्रथमाविभक्ति–एकवचन 'सि' प्रत्यय तथा "रेफसोर्विसर्जनीयः" (२।३।६३) से सकार को विसर्गादेश।। ६०२।

## ६०३. दुषेः कारिते [३।४।६३]

## [सूत्रार्थ]

कारितसंज्ञक प्रत्यय के पर में होने पर 'दुष्' धातु को उपधा को ऊकारादेश होता है।। ६०३।

## [दु० वृ०]

दुषेरुपधाया ऊद् भवति कारिते परे। दूषयति। कारिते इति किम् ? दोषो वर्तते। कारित इति संज्ञापूर्वकत्वाद् वा चित्तविकारे–चित्तं दूषयति, चित्तं दोषयति। प्रज्ञां दूषयति, प्रज्ञां दोषयति।। ६०३।

## [दु० टी०]

दुषेः। गुणं बाधित्वा अत्र ऊदादेशः क्रियते, यपि तु 'प्रदुष्य गतः' इति गुरूपध–त्वात्। दोषणं दुट्। सम्पदादित्वात् क्विप्। दुषमाचष्टे दूषयतीति भवितव्यम्, इका धातु-स्वरूपग्रहणात्। 'वा चित्तविकारे' इति **'दुष वैकृत्ये'** (३।२८), चित्तस्य विकारे वैकृत्ये **इत्यर्थः**। 'वा चित्ते' इत्युक्तेऽपि चित्तविषयस्य चित्तकर्तृकस्येति प्रतीयते, यद् **वृत्तौ विकारग्रहणं** तत् **सुखार्थम्**। चित्तं दुष्यति, तदन्यो दूषयतीत्यर्थः। **अन्य** आह – वा

चित्तविकारे कारिते वचनं **स्पष्टार्थम्**। दोषं करोतीति इन्। एवं विवक्षायां पुरुषं दोषयतीत्यपि भवितव्यमेव।। ६०३।

## [समीक्षा]

'दूषयति, दूषयन्ति' आदि प्रयोगों के साधनार्थ 'दोष्' की उपधा में विद्यमान ओकार को ऊकारादेश की अपेक्षा होती है। इसे दोनों ही आचार्यों ने विहित किया है। पाणिनि का सूत्र है – ''दोषो णौ'' (अ० ६।४।९०)। कातन्त्रकार ने 'कारित' संज्ञा–पूर्वक निर्देश के होने से इसे अनित्य माना है, इसके फलस्वरूप 'चित्तविकार-अर्थ' में ऊकारादेश वैकल्पिक प्रवृत्त होता है। पाणिनि ने ''वा चित्तविरागे'' (अ० ६।४।९१) सूत्र स्वतन्त्ररूप में बनाया है।

## [विशेष वचन]

१. कारित इति संज्ञापूर्वकत्वाद् 'वा चित्तविकारे' (दु० वृ०)।

२. 'वा चित्ते' इत्युक्तेऽपि चित्तविषयस्य चित्तकर्तृकस्येति प्रतीयते। यद् वृत्तौ विकारग्रहणं तत् सुखार्थम् (दु० टी०)।

## [रूपसिद्धि]

१. **दूषयति**। दुष् + इन् + अन् + ति। 'दुष वैकृत्ये' (३। २८) धातु से ''इन् कारितं धात्वर्थे'' (३। २। ९) से इन् प्रत्यय, ''नामिनश्चोपधायाः'' (३। ५। २) से उपधासंज्ञक उकार को गुण ओकार प्राप्त होता है, इसे बाधकर प्रकृत सूत्र से उकार को ऊकार, धातुसंज्ञा, वर्तमानासंज्ञक 'ति' प्रत्यय, अन् विकरण, ''नाम्यन्तयोर्धातुविकरणयोर्गुणः'' (३। ५। १) से इन्प्रत्ययघटित इकार को गुण तथा ए को अयादेश।। ६०३।

## ६०४. मानुबन्धानां ह्रस्वः [३।४।६४]

## [सूत्रार्थ]

घटादिगणपठित धातुएँ मानुबन्ध मानी जाती हैं, उन 'म्' अनुबन्ध वाली धातुओं की उपधा को ह्रस्व आदेश होता है कारितसंज्ञक प्रत्यय के पर में रहने पर।। ६०४।

## [दु० वृ०]

घटादयो मानुबन्धा अन्वाख्याताः, तेषामुपधायाः कारिते परे ह्रस्वो भवति। घटयति, व्यथयति। **'ह्रगे ह्रगे षगे ष्थगे संवरणे'** (१।५११) ह्रगयति, ह्रगयति, सगयति, स्थग–यति। **'कगे नोच्यते'** (१। ५१२)। **अस्यायमर्थः** इति नोच्यते। कगयति। 'चन च' (१। ५१७), **'वनु च नोच्यते'** (१। ५१८), **'चन च हिंसार्थः'**, वनु च कगेवत्। चनयति, वनयति। **'स्मृ आध्याने'** (१। ५२१), स्मरयति चिन्तायाम्। अन्यत्र न भवति – विस्मारयति। जनीजृष्क्नसुरञ्जोऽमन्ताश्च। 'जनी प्रादुर्भावे' (१।५३१), जनयति। जृष्–जरयति। **'क्नसु ह्वरणदीप्त्योः'** (३।६) – क्नसयति। 'रञ्ज रागे' (१।५३१) – रजयति मृगान्। रञ्जेर्मृगरमणेऽनुपङ्गलोपः। अमन्ताश्च–रमयति, श्रमयति, भ्रमयति।

ज्वल–ह्वल–ह्मल–नमोऽनुपसर्गा वा – ज्वलयति, ह्वलयति, ह्मलयति, नमयति। पक्षे– ज्वालयति, ह्वलयति, ह्मलयति, नामयति।

सोपसर्गास्तु नित्यं मानुबन्धाः। 'ज्वल दीप्तौ' (१। ५१९) घटादिः – प्रज्वलयति। तथा **'ह्वल ह्मल चलने'** (१।५२०)–प्रह्वलयति, प्रह्मलयति। अमन्तत्वाद् उपनमयति। ग्लास्नावनुवमश्च। ग्लपयति, ग्लापयति। स्नपयति, स्नापयति। वनयति, वानयति। वमयति, वामयति। अनुपसर्गा इति किम् ? प्रग्लापयति, प्रस्नापयति, उपवनयति, उद्वमयति। न कम्यमिचमः। कामयति, आमयति, चामयति। शमोऽदर्शने। शमयति रोगान्। दर्शने तु न भवति – निशामयति रूपम्। स्खदिरवपरिभ्यां च। अवस्खदयति, परिस्खदयति। अवपरिभ्यामेवेति नियमादन्योपसर्गान्न भवति। प्रस्खादयति, उपस्खादयति। **'फण गतौ'** (१।५३८) पठ्यते मानुबन्धश्च–फणयति। गतेरन्यत्र न भवति – फाणयति फाण्टम्। **अन्ये सुगमा** इति नोदाहृताः। कथम् उद्घाटितः कपाटः चौरस्योत्क्राथयतीति ? घञन्तादिन्। संक्रामयतीति। शन्तृङन्तादिन्।। ६०४।

## [दु० टी०]

मानु०। घटादयो मानुबन्धा अन्वाख्याताः इति पूर्वे **गणकारा** येषां प्रत्येकं मकारानुबन्धत्वमुपदिष्टवन्तस्ते घटादयो मानुबन्धाः लाघवायान्वाख्याताः अर्वाग्**गणकृते**त्यर्थः। **'हेड वेष्टने'** (१।५०३) इति पाठसामर्थ्याद् ह्रस्वत्वे सत्युपधालक्षणो गुणो न भवतीति हिडयति। कगे इत्यादि। कगे धातुर**निर्दिष्टार्थ** इति यावत्। चन चेत्यादि। **'श्रथ क्रथ क्लथ हिंसार्थाः'** (१। ५१६) इत्यतो हिंसार्थः सम्बध्यते इति भावः। वनु च कगेवदिति। वनुधातोरनिर्दिष्टार्थो मानुबन्ध इत्यर्थः। **'स्मृ आध्याने'** (१। ५२१) इति आ समन्ताद् ध्यानम् आध्यानम्। ननूपधालक्षणो रन्जेर्दीर्घ एव नास्ति कथं ह्रस्वः ? सत्यम्, अस्य मानुबन्धसंज्ञा ज्ञापयति – रन्जेरनुषङ्गलोपोऽस्ति, ज्ञापकज्ञापिताश्च लक्ष्यमनुसरन्तीत्याह – रन्जेरित्यादि। **''न कम्यमिचमः''** (१। ५३४) इति **'कमु कान्तौ, अम रोगे, चमु अदने'** (१। ४०५, १४०, १५६), अमन्तत्वान्मानुबन्धसंज्ञाप्राप्तौ प्रतिषिध्यते। **''शमोऽदर्शने''** इति। अदर्शन एव मानुबन्धसंज्ञेत्यर्थः।

**धातुपारायणिकास्तु** प्रतिषेध एव सम्बध्नन्ति। दर्शने मानुबन्धसंज्ञा न भवतीत्यर्थः। घोषवल्लक्षणमुत्वमिह। यमोऽपरिवेषणे इति यमोऽपरिवेषणे मानुबन्धसंज्ञा न भवतीत्यर्थः। तदा प्रत्युदाहरणं मूलोदाहरणं भवति अर्थात्। स्खदिरवपरिभ्यां चेति। अत्रापि **'स्खद स्खदने'** (१। ४९४) इत्यस्य मानुबन्धसंज्ञा न भवतीत्यर्थः। **'फण गतौ'** (१। ५३८) इति उपयमनेन ज्ञाप्यते–धातुत्वं मानुबन्धत्वं चेत्यर्थः। **'फण गतौ'** (१। ५३८) इत्यस्य तु **एके** मानुबन्धसंज्ञां नेच्छन्ति, गतावपि फाणयतीत्याहुः। तेषाम् अस्मात् पूर्वं **वृत्करणम्।** संक्रामयतीति शन्तृङन्तादिन्निति संक्रामन्तमाचष्टे इति विवक्षयापि भवतीत्यर्थः। **'चह शाठ्ये'** (९। १००, १८६) **केचिन्**मानुबन्धत्वमिच्छन्ति–चहयति।। ६०४।

## [वि० प०]

मानु०। घटादयो मानुबन्धा अन्वाख्याता इति **पूर्वे गणकारा** घटादीनां प्रत्येकं मानुबन्धत्वमुपदिष्टवन्तः, तथोपदेशे च ग्रन्थगौरवं मन्यमानैराधुनिकैर्गणकृद्भिर्लाघवार्थ– मन्वाख्याता घटादयो मानुबन्धा इत्युक्तम्। वनु च कगेवदित्यनिर्दिष्टार्थः, कगधातुर्मानु– बन्ध इत्यर्थः। **'चन च, वनु च' नोच्यते** (१। ५१७, ५१८) इत्येतौ धातू गणपठितौ। अनयोः क्रमेणार्थमाह – चन च **हिंसार्था** इत्यतश्चकारेण हिंसा अनुकृष्यते, ततश्चनिरपि हिंसार्थ इति। वनु च कगेवदिति अनिर्दिष्टार्थो वनुरपि मानुबन्ध इत्यर्थः। रन्जेरित्यादि। एतत्तु घटादित्वं रन्जेः पाठ एव ज्ञापयति, स हि ह्रस्वार्थः, ह्रस्वश्चानुषङ्गलोपाभावे दीर्घत्वाभावान्नोपपद्यते इति। ज्ञापकज्ञापिताश्च विधयो लक्ष्यमनुसरन्तीति मृगरमणादन्यत्र रञ्जयति वस्त्रम्। ज्वलेत्यादि। ज्वलयति, ज्वालयतीत्युदाहरणम्। कथं सोपसर्गास्तु नित्यं मानुबन्धा इत्याशङ्क्याह – **'ज्वल दीप्तौ'** (१। ५१९, ५३२, ५४३) इत्यादिना पुनरेषां घटादित्वं दर्शयतीति।

ग्लेत्यादि। गणे चकारोऽनुपसर्गा वेत्यनुकर्षणार्थः, ग्लपयति, ग्लापयतीत्यादि पूर्ववत्। उपवनयति, उद्वमयतीति। वनु च नोच्यते अमन्ताश्चेति वचनात् सोपसर्गयोर्वमि– वम्योर्नित्यं मानुबन्धत्वमिति। **''न कम्यमिचमः''** (१।५३४) इति **''अमन्ताश्च''** (१। ५३१) इति प्राप्ते प्रतिषेधोऽयम् – कामयति, आमयति, आचामयतीति। **''शमोऽदर्शने''** (१। ५३५) इति अमन्तत्वात् सिद्धे नियमार्थो गणे पाठोऽदर्शन एवेति। स्खदिरवपरिभ्यां चेति–अवस्खदयति, परिस्खदयतीत्युदाहरणम् मानुबन्धश्चेति। गतावेव फणधातुर्मानु– बन्ध इत्यर्थः। **फाण्टमि**ति द्रवद्रव्यालोडिताः शक्तव उच्यन्ते। संक्रामयतीति शन्तृङन्तादिन्निति शन्तृङ्प्रत्यये अन्विकरणे **''क्रमः परस्मै''** (३। ६। ६८) इति दीर्घत्वम्, ततः संक्राम– न्तमाचष्टे इति **विवक्षायामि**ना सिद्धमित्यर्थः।। ६०४।

## [समीक्षा]

व्याख्याकारों के अनुसार पूर्ववर्ती गणकारों ने 'घट म् ष्' इस प्रकार से घटादि धातुओं का पाठ किया था, लाघवप्रिय अर्वाचीन गणकारों ने वैसा पाठ न करके घटादिगणपठित धातुओं को मित् मान लिया। कातन्त्रकार तथा पाणिनि दोनों ही आचार्यों ने ऐसा ही किया है। कातन्त्रकार की प्रक्रिया के अनुसार कारितसंज्ञक 'इन्' प्रत्यय होने पर ''अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिचट्सु'' (३। ६। ५) से उपधादीर्घ तथा पाणिनि के अनुसार ''अत उपधायाः'' (अ० ७।२। ११६) से उपधावृद्धि होने पर 'घटयति, व्यथयति, स्थगयति' आदि शब्दों के सिद्ध्यर्थ ह्रस्वादेश करने की आवश्यकता होती है, जिसकी पूर्ति दोनों ही आचार्यों ने की है। पाणिनि का सूत्र है – ''मितां ह्रस्वः'' (अ० ६। ४।९२)। वृत्तिकार ने बहुत से वार्त्तिक वचन पढ़े हैं, जिनके अनुसार कुछ धातुओं से अर्थविशेष में ही ह्रस्व होता है, उनसे भिन्न अर्थों में नहीं।

## [विशेष वचन]

१. सोपसर्गास्तु नित्यं मानुबन्धाः। ज्वल दीप्तौ घटादिः – प्रज्वलयति (दु० वृ०)।

२. घटादयो मानुबन्धा अन्वाख्याता इति। पूर्वे गणकारा येषां प्रत्येकं मकारानुबन्धत्वमुपदिष्टवन्तस्ते घटादयो मानुबन्धा लाघवायान्वाख्याता अर्वाग्गणकृतेत्यर्थः (दु० टी०)।

३. कगे–धातुरनिर्दिष्टार्थ इति यावत् (दु० टी०; वि० प०)।

४. आ समन्ताद् ध्यानम् आध्यानम् (दु० टी०)।

५. फण गतावित्यस्य त्वेके मानुबन्धसंज्ञां नेच्छन्ति, गतावपि फाणयतीत्याहुः। तेषामस्मात् पूर्ववद् वृत्करणम्। (दु० टी०)।

६. चह शाठ्ये केचिन्मानुबन्धत्वमिच्छन्ति–चहयति (दु० टी०)।

७. पूर्वे गणकारा घटादीनां प्रत्येकं मानुबन्धत्वमुपदिष्टवन्तः, तथोपदेशे च ग्रन्थगौरवं मन्यमानैराधुनिकैर्गणकृद्भिलाघवार्थमन्वाख्याता घटादयो मानुबन्धा इत्युक्तम् (वि० प०)।

८. ज्ञापकज्ञापिताश्च विधयो लक्ष्यमनुसरन्ति (वि० प०)।

९. फाण्टमिति द्रवद्रव्यालोडिताः शक्तव उच्यन्ते (वि० प०)।

## [रूपसिद्धि]

१. **घटयति**। घट + इन् + अन् + ति। घटमानं प्रयुङ्क्ते। 'घट चेष्टायाम्' (१। ४८९) धातु से "धातोश्च हेतौ" (३। २। १०) सूत्र द्वारा 'इन्' प्रत्यय, "अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिचट्सु" (३। ६। ५) से उपधादीर्घ, प्रकृत सूत्र से उपधाह्रस्व, 'घटि' की "ते धातवः" (३। २। १६) से धातुसंज्ञा, वर्तमानासंज्ञक परस्मैपद–प्रथमपुरुष–एकवचन 'ति' प्रत्यय, "अन् विकरणः कर्तरि" (३।२।३२) से 'अन्' विकरण, "नाम्यन्तयोर्धातुविकरणयोर्गुणः" (३। ५। १) से घटि–गत इकार को गुण तथा "ए अय्" (१। २। १२) से ए को अयादेश।

२. **व्यथयति**। व्यथ् + इन् + अन् + ति। 'व्यथ दुःखभयचलनयोः' (१।४९०) धातु से इन् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

३–३२. ह्रगयति, ह्लगयति, सगयति, स्थगयति, कगयति, चनयति, वनयति, स्मरयति, जनयति, जरयति, क्नसयति, रजयति मृगान्, रमयति, श्रमयति, भ्रमयति, ज्वलयति, ह्वलयति। प्रह्मलयति, ग्लपयति, स्नपयति, वनयति, वमयति, शमयति, अवस्खदयति, परिस्खदयति, फणयति, झलयति, नमयति, प्रज्वलयति, प्रह्लयति, इन रूपों में धातुओं के अतिरिक्त समग्र प्रक्रिया पूर्ववत् समझनी चाहिए।। ६०४।

## ६०५. इचि वा [३।४।६५]

## [सूत्रार्थ]

कारित प्रत्यय के अनन्तर अद्यतनी में इच् प्रत्यय के परवर्ती होने पर मानुबन्ध धातुओं को वैकल्पिक ह्रस्व होता है।। ६०५।

## [दु० वृ०]

मानुबन्धानां धातूनामिचि कारिते परे ह्रस्वो भवति वा। अघटि, अघाटि। अव्यथि, अव्याथि। 'क्षजि गतौ दाने च, दक्ष हिंसायां च' (१।४९५, ४९६) इति घटादिपाठबलाद् अनुपधाया अपि दीर्घत्वम्। तेन अक्षज्जि, अक्षाज्जि। अदक्षि, अदाक्षि।। ६०५।

## [दु० टी०]

इचि०। ननु कारिते प्रागेव ह्रस्वे कृते पश्चादिचि दीर्घस्याभावात् कथमिचि परे कारिते विभाषया ह्रस्व उच्यते ? सत्यम्। इचीति विषयसप्तमी, तेन **बुद्धिस्थ**मिचः परत्वं भवतीति न दोषः। वचनात् पूर्वेण प्राप्तोऽपि वा ह्रस्वो न भवति। अशंशमि, अशंशामि' इति चेक्रीयितान्ताद् इनि कृते **''अस्य च लोपः''** (३। ६। ४९) इति पर–सप्तम्यामपि न स्थानिवद्भाव इति दीर्घविधित्वात्। एवम् 'अशमि, अशामि' इति शमेरिनन्तात् शमयन्तं प्रयोजितवानिति द्वितीये इनि कारितस्य संज्ञाशब्दत्वात् कारितमात्रे भवतीति कुतः प्रथमकारितलोपस्य स्थानिवद्भावेनोपधाह्रस्वविघात इति जातेराश्रयणाद् वा **'हेड वेष्टने'** (१। ५०३) इत्यत्र तु 'अहिडि, अहेडि' इति भवितव्यमेवेति मतम्। यस्तु ह्रस्वं कृत्वा दीर्घं विधत्ते, तस्य 'अहिडि, अहौडि' इति कुतः एकारस्थितिः, तदपि मतमुच्यते। वाशब्दोऽत्र समुच्चये इति ह्रस्वो वा दीर्घश्च वा भवतीत्यर्थः। एवं सति संयोगान्तेऽपि न विरोधः। **'कदि क्रदि क्लदि वैक्लव्ये'** (१।४९८)। अकन्दि, अकान्दि। अक्रन्दि, अक्रान्दि। चण्परे कारिते इनीचीति कार्यं दृश्यते, **अभिधान**लक्षणत्वात्। कृतः णम् चाभीक्ष्ण्ये द्विश्च पदम् – घटं घटम्, घाटं घाटम्। व्यथं व्यथम्, व्याथं व्याथम्।। ६०५।

## [वि० प०]

इचि०। इचीति विषयसप्तमीयम् अनुत्पन्ने बुद्धिस्थ एव प्रत्यये विकल्प इति कुतः पुनरिदं चोद्यम्। अन्तरङ्गत्वात् प्रागेव कारिते ह्रस्वे कृते कथं विभाषेति।। ६०५।

## [समीक्षा]

'अघटि, अघाटि, अव्यथि, अव्याथि' आदि अद्यतनीविभक्ति में इच्प्रत्ययान्त शब्दों के सिद्ध्यर्थ वैकल्पिक ह्रस्व अथवा वैकल्पिक दीर्घ की अपेक्षा होती है। एतदर्थ कातन्त्रकार ने वैकल्पिक ह्रस्व तथा पाणिनि ने वैकल्पिक दीर्घ का विधान किया है। उनका सूत्र है – ''चिण्णमुलोर्दीर्घोऽन्यतरस्याम्'' (अ० ६।४।९३)। वस्तुतः पूर्ववर्ती सूत्र में ह्रस्वविधि निर्दिष्ट होने के कारण प्रकृत सूत्र में भी उसी का विधान समीचीन प्रतीत होता है – कार्यसिद्धि की दृष्टि से। ऐसी स्थिति में उससे भिन्न मार्ग का आश्रय लेना विविधता के अतिरिक्त और कोई वैशिष्ट्य नहीं कहा जा सकता है।

## [विशेष वचन]

१. क्षजि गतौ दाने च, दक्ष हिंसायां चेति घटादिपाठबलादनुपधाया अपि दीर्घत्वम्। तेन अक्षज्जि, अक्षाज्जि। अदक्षि, अदाक्षि (दु० वृ०)।

२. इचीति विषयसप्तमी, तेन बुद्धिस्थमिचः परत्वं भवतीति न दोषः। वचनात् पूर्वेण प्राप्तोऽपि वा ह्रस्वो न भवति (दु० टी०)।

३. वाशब्दोऽत्र समुच्चये इति ह्रस्वो वा दीर्घश्च वा भवतीत्यर्थः (दु० टी०)।

४. इचीति विषयसप्तमीयम् अनुत्पन्ने बुद्धिस्थे एव प्रत्यये विकल्पः (वि० प०)।

## [रूपसिद्धि]

१. **अघटि, अघाटि**। अट् + घट + इन् + इच् + त। 'घट चेष्टायाम्' (१।४८९) धातु से "धातोश्च हेतौ" (३। २। १०) सूत्र द्वारा 'इन्' प्रत्यय, "अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिचट्सु" (३। ६। ५) से उपधादीर्घ, "ते धातवः" (३। २। १६) से 'घाटि' की धातुसंज्ञा, अद्यतनीसंज्ञक आत्मनेपद–प्रथमपुरुष–एकवचन 'त' प्रत्यय, "अड् धात्वादिर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु" (३। ८। १६) से धातुपूर्व अडागम, "भावकर्मणोश्च" (३। २। ३०) से इच् प्रत्यय (अघाटि + इच् + त), प्रकृत सूत्र से ह्रस्व, "कारितस्यानामिड् विकरणे" (३। ६। ४४) से इन् का लोप तथा "इचस्तलोपः" (३। ४। ३२) से त–लोप।

यतः ह्रस्वविधि वैकल्पिक है, अतः पक्ष में 'अघाटि' रूप सिद्ध होगा।

२. **अव्यथि, अव्याथि**। अट् + व्यथ् + इन् + इच् + त। 'व्यथ दुःखभयचलनयोः' (१।४९०) धातु से इन् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।।६०५।

## ६०६. जनिवध्योश्च [३।४।६६]

## [सूत्रार्थ]

इच् प्रत्यय के परे रहते जन् तथा वध् धातु को नित्य ह्रस्व होता है।।६०६।

## [दु० वृ०]

इच्–मात्रमिह वर्तते। जनिवध्योरिचि परे नित्यं ह्रस्वो भवति। अजनि, अवधि। यद्यपि बन्धने वधिस्तथापीचि हिंसायाम्। तथा च – भक्षकश्चेन्नास्ति वधकोऽपि न विद्यते। वधिः प्रकृत्यन्तरम् इति **एके**।।६०६।

## [दु० टी०]

जनि०। इच्मात्रमिह वर्तते इति। अन्यथा ह्येकयोगे चकारेण मानुबन्धानामनुवर्तनं भविष्यतीति भावः। तस्मादनन्तरम् इच् वर्तते न कारितमित्यर्थः। हन्तेरादेशस्य वधेर्दीर्घ एव नास्तीति वक्ष्यति, तस्मादाह – यद्यपि बन्ध बन्धने इत्यादि। **गणेऽपठितोऽपि वधिर्हिंसायां धातुर्ज्ञातव्य** इत्याह–वधिरित्यादि।।६०६।

## [वि० प०]

जनि०। इच्मात्रमिह स्मर्यते इति। इजेव इच्मात्रं तदिह वर्तते, न कारितमित्यर्थः। यदि पुनरिह कारितमप्यनुवर्तते तदा पूर्वेण सहाभिन्नार्थत्वाज्जनिवध्योश्चेति वेत्येकमेव सूत्रं विदध्यात्। चकारेण मानुबन्धानुकर्षणं भविष्यति, तदयुक्तम्। एकयोगे हि जनिवध्योरपि

विकल्पः स्यात्, अतो नित्यार्थ एव पृथग्योग इति कथन्न स्यात्? नैवम्। मानुबन्ध-त्वादेव सिद्धे जनेरुपादानं नित्यार्थमिति चेत्? नैवम्। घटादौ **'जनी प्रादुर्भावे'** (३।९४) इति पठ्यते न **'जन जनने'** (२।८०) इति। एतदर्थो जनेः पुनः पाठः स्यात् तदयुक्तम्। अस्य पाठेऽप्यस्मिन् विकल्पे रूपद्वयमेव साध्यम्, तच्च घटादिपाठेनैव सिद्धम्, अर्थरूपयोरभेदात्। तस्मादेकयोगेऽपि जनेर्न विकल्पः, तत्साहचर्याद् वधेरपि नित्यम्, अतः पृथग्योगादनन्तर इजेव वर्तते इति। तर्हि इचा सहैकयोगनिर्दिष्टो वाशब्दः कथमिह न वर्तते इति चेत्, नैवम्। इनिच्समुदायसम्बद्धं वाग्रहणमपि तन्निवृत्तौ निवर्तते इति नित्यं भवति। अथवा **'इष्टितो ह्यधिकाराणां प्रवृत्तिनिवृत्ती स्याताम्'** (चा० परि० ४३) इति वा न दोषः।

**अन्ये** तु **'जन जनने'** (२।८०) इत्यस्य न **भाषायां** प्रयोगः इति मन्यन्ते, **शर्ववर्मण**स्तु मतं लक्ष्यते भाषायामपीति। तथा च **''इङ्जनोः सध्वे च''** इति सार्व-धातुके इडागमार्थं वचनमुक्तम्। **वृत्तिकारोऽपि** जजनानीत्यादिकमुदाहरति जौहोत्यादिकत्वादि। जनेः **''दीपजन०''** इत्यादिना योगविभागाद् वधेश्च **''भावकर्मणोश्च''** (३।२।३०) इतीचि कृते **''अस्योपधा०''** (३।६।५) इत्यादिना दीर्घत्वे सत्यनेन ह्रस्व इति।।६०६।

## [बि० टी०]

जनि०। यद्यपि बन्धने वधिरिति **वृत्तिः**। नन्ु किमर्थमिदं वक्तव्यम्– **''अद्यतन्याञ्च''** (३। ४। ८३) इत्यनेन हन्तेर्वधिरादेशः क्रियते, तस्यात्र ग्रहणे सति ह्रस्वो भविष्यति, हन्धातोर्हिंसार्थत्वादिति नैवम्। तत्र इञ्निर्देशस्य स्वरूपग्राहकत्वाद् विरूपं न भविष्यतीति व्याख्येयम्। ततश्च दीर्घः प्राप्नोति तत्रैव ह्रस्वः क्रियते यदि दीर्घो न स्यात्तदा कथमिदं न्याय्यम्, तर्हि **''अद्यतन्यां च''** (३।४।८३) इत्यनेन हन्तेर्वधिरादेशे कृते इञ्निर्देशस्य स्वरूपग्राहकत्वाद् दीर्घो न भविष्यति। तदाह– अवधीदिति सिद्धम्, किं वधेरुपा-दानेना**र्थकृतलाघवं** भविष्यति। नैवम्, **''सिद्धिरिञ्वद् ञ्णानुबन्धे''** (४। १। १) इत्यत्र 'वधः, वधकः' इति ह्रस्वनिर्देशमनर्थकमेव स्यात्, अनेनैव सिद्धे 'वधः' इति सिद्धौ दीर्घाभावात् तस्माद् अद्यतन्यामेव कृतार्थः? सत्यम्, 'वध बन्धने' इत्यस्मान्निन्दायां सनो विधानाद् अद्यतन्यादयो नाभिधीयन्ते इत्युक्तम्। इह वधिग्रहणाद् हिंसायाम-भिधीयते।।६०६।

## [समीक्षा]

'अजनि, जनकः, अवधि, वधकः' इत्यादि शब्दरूपों के सिद्ध्यर्थ ह्रस्वादेश करने की आवश्यकता होती है, इसकी पूर्ति दोनों ही आचार्यों ने की है। पाणिनि का सूत्र है– ''जनिवध्योश्च'' (अ० ७।३।३५)। अन्तर यह है कि कातन्त्रकार पहले दीर्घ का विधान करके ह्रस्व का निर्देश करते हैं तथा पाणिनि प्राप्त वृद्धिविधान का निषेध कर देते हैं। अतः उभयत्र समानता ही है। वृत्तिकार दुर्गसिंह ने कहा है कि यद्यपि 'वध' धातु बन्धन अर्थ में पठित है तथापि इच् प्रत्यय में वह हिंसार्थक मानी जाती है। अन्यथा 'वधकः' का अर्थ 'हिंसकः' नहीं हो पाएगा, जो कि इस वचन में वाञ्छित है– 'भक्षकश्चेन्नास्ति वधकोऽपि न विद्यते'।

## [विशेष वचन]

१. यद्यपि बन्धने वधिस्तथापीचि हिंसायाम् (दु० वृ०)।

२. वधिः प्रकृत्यन्तरमित्येके (दु० वृ०)।

३. गणेऽपठितोऽपि वधिर्हिंसायां धातुर्ज्ञातव्यः (दु० टी०)।

४. इष्टितो ह्यधिकाराणां प्रवृत्तिनिवृत्ती स्याताम् (वि० प०)।

५. अन्ये तु 'जन जनने' इत्यस्य न भाषायां प्रयोगः इति मन्यन्ते, शर्ववर्मणस्तु मतं लक्ष्यते भाषायामपीति (वि० प०)।

६. 'वध बन्धने' इत्यस्मान्निन्दायां सनो विधानाद् अद्यतन्यादयो नाभिधीयन्ते इत्युक्तम्, इह वधिग्रहणाद् हिंसायामभिधीयते (बि० टी०)।

## [रूपसिद्धि]

१. **अजनि**। अट् + जन् + इच् + त। 'जन जनने' (२।८०) धातु से अद्यतनीसंज्ञक आत्मनेपद–प्रथमपुरुष–एकवचन 'त' प्रत्यय, अडागम, इच् प्रत्यय, "अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिचट्सु" (३।६।५) से उपधादीर्घ, प्रकृत सूत्र से ह्रस्व तथा "इचस्तलोपः" (३।४।३२) से त–प्रत्यय का लोप।

२. **अवधि**। अट् + बन्ध + इच् + त। 'बन्ध बन्धने' (८।३२) धातु से त–प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।।६०६।

## ६०७. ओतो यिन्नायी स्वरवत् [३।४।६७]

## [सूत्रार्थ]

ओकार से पर में प्रवृत्त होने वाले 'यिन्–आयि' प्रत्ययों को स्वरवद्भाव होता है।।६०७।

## [दु० वृ०]

ओतः परौ यिन्नायी स्वरवद् भवतः। गव्यति, गव्यते। अवोऽपि न स्यात्, गवाजिनवद् इष्टत्वात्।।६०७।

## [दु० टी०]

ओतः। नामान्तरेण यिन्नाय्योरभावान्नाम्न ओत इति स्थितम्, ओकारेणार्थादायातं वा नाम विशिष्यते ओकारान्तान्नाम्न इति गोशब्दस्य स्वरेऽकारागमो रूढिविषय इत्याह – **अवोऽपीत्यादि**। किञ्च सामान्यादोकारादतिदिश्यमानं स्वरत्वं कथं विशिष्टाद् गोशब्दाद् येनाकारवर्णागमे 'गवीयति, गवायते' इत्यनिष्टरूपं शङ्क्यते इति वत्करणस्यासंज्ञारूपत्वात् **'ओतोऽव् औतश्चाव्'** इति कृते स्वरग्रहणं **वैचित्र्यार्थं** भवति, नाम्यन्तलक्षणे आयेराकारलोपे **सत्यधादेशो** न स्यात्। तथा वक्ष्यमाणेऽप्यावादेश इत्यायिग्रहणम्। ननु च परत्वादन्तरङ्गो **विधिर्बलवानिति** प्रागेवादेशे कृते व्यञ्जनान्तलक्षण आयेराकारलोपो भवति, **किमर्थमायिग्रहणम्** ? सत्यम्। **'निमित्ताभावे नैमित्तिकस्याप्यभावः'** (का० परि० २७)

इति ज्ञापनार्थमायिग्रहणम्। यिन्नाय्योः स्वरत्वे स्वरे यद् दृष्टं कार्यं तद् भवतीति व्यञ्जने सन्धिप्रतिषेधात्, अर्थाद् अवावौ स्वरेऽसवर्णलक्षणावित्यदोषः।।६०७।

## [वि० प०]

ओतः। 'गव्यति, गव्यते' इति। गामिच्छति, गौरिवाचरतीति यिन्नायी। **''नामिव्यञ्जनान्तात्०''** (३।६।४२) इत्यादिना परत्वादायेराकारलोपे कृते स्वरस्याभावादवादेशो न स्यादिति। आयेरपि स्वरवद्भाव उच्यते। यदि पुनरन्तरङ्गत्वादवादेशे कृते पश्चाद् व्यञ्जनान्तलक्षण आकारलोपो भविष्यतीत्युच्यते, तदा **'निमित्ताभावे नैमित्तिकस्याप्यभावः'** (का० परि० २७) इति ज्ञापनार्थमायिग्रहणम्, तेन 'धिनोति, कृणोति' इति सिद्धम्। नन्वोकारस्य स्वरेणैतदेव कार्यं यदुक्तम् ओत इति, अपि तु गोशब्दस्याकारागमेऽपि स्वरे निश्चित एव, तस्मिंश्च सत्यव इत्यकारान्तत्वाद् **''यिन्यवर्णस्य''** (३। ४। ७८) इतीत्त्वे समानदीर्घत्वे च 'गवीयति, गवायते' इत्यनिष्टरूपं प्राप्नोतीत्याह—अवोऽपीत्यादि। अपिशब्दोऽत्र भिन्नक्रमे योऽयमकारागमस्तस्मिंश्च सत्यवोऽपि स्यात्, न पुनर्नित्यमविति। पुनरर्थेऽपि अव् स्यात्, अः पुनर्न स्यादित्यर्थः। इष्टत्वादिति न खलु तत् सूत्रम् अपि तु वर्णागम **इष्टसिद्ध्यर्थ**मुपन्यस्त इति कथमनिष्टसिद्धये भवतीति।। ६०७।

## [बि० टी०]

ओतो०। ननु 'गव्यति, गव्यते' इत्यत्रावादेशे सति **अन्तर्वर्तिनीं विभक्तिमा**श्रित्य पदत्वं विद्यते। ततः **''अयादीनाम्''** (१। २। १६) इत्यनेन वलोपः कथन्न स्यात्। नैवम्, तत्र प्रागुक्तानां ग्रहणात्। न च वाच्यम्, अत्रापि **''ओ अव्''** (१। २। १४) इत्यनेनावादेशः कार्यातिदेशत्वादनेनैवादेशादकारलोपः। अथवा यत्र प्रकृतिर्विद्यते तत्रैव लोपस्य विषयः एकसूत्रत्वादिति। सामान्येनातिदेशाद् विशिष्टाद् गोशब्दात् स्वरत्वाभाव इति **टीका**।। ६०७।

## [समीक्षा]

'गव्यति, गव्यते, शङ्कव्यं दारु, माण्डव्यः' आदि शब्दरूपों के सिद्ध्यर्थ ओकार के पश्चात् आने वाले यकारादि प्रत्ययों (यिन्—आयि) के परवर्ती होने पर ओकार के स्थान में अवादेश की आवश्यकता होती है। इसकी पूर्ति कातन्त्रकार ने 'यिन् — आयि' प्रत्ययों में स्वर का अतिदेश (स्वरवद्भाव) करके तथा पाणिनि ने साक्षाद् अवादेश का विधान करके की है। उनका सूत्र है— ''वान्तो यि प्रत्यये'' (अ० ६। १। ७९)। वृत्तिकार दुर्गसिंह ने कहा है कि 'गवाजिनम्' की तरह यहाँ 'अव' यह अकारान्त आदेश नहीं होगा, किन्तु वकारान्त 'अव्' आदेश ही उपपन्न होगा, शिष्टजनों के द्वारा अभीष्ट होने के कारण — 'अवोऽपि न स्याद् गवाजिनवद् इष्टत्वात्'।

## [रूपसिद्धि]

१. **गव्यति**। गो + यिन् + ति। गामिच्छति, गौरिवाचरति। 'गो' शब्द से आत्मेच्छा अर्थ में ''नाम्न आत्मेच्छायां यिन्'' (३। २। ५) सूत्र से 'यिन्' प्रत्यय, प्रकृत सूत्र से

उसको स्वरवद्भाव, ''ओ अव्'' (१। २। १४) से ओ को अवादेश, 'गव्य' की ''ते धातवः'' (३। २। १६) से धातुसंज्ञा, वर्तमानासंज्ञक परस्मैपद – प्रथमपुरुष – एकवचन 'ति' प्रत्यय, अन् विकरण तथा अकार का लोप।

२. **गव्यते**। गो + आयि + ते। गामिच्छति, गौरिवाचरति। 'गो' शब्द से ''कर्तुरायिः सलोपश्च'' (३। २। ८) सूत्र द्वारा 'आयि' प्रत्यय, ''नामिव्यञ्जनान्तादायेरादेः'' (३। ६। ४२) से आकारलोप, प्रकृत सूत्र से 'आयि' को स्वरवद्भाव होने से ''ओ अव्'' (१। २। १४) सूत्र द्वारा 'ओ' को अवादेश, 'गव्य' की धातुसंज्ञा, ते – प्रत्यय, अन् – विकरण तथा अकारलोप।। ६०७।

## ६०८. औतश्च [३। ४। ६८]

### [सूत्रार्थ]

औकार से परवर्ती 'यिन् – आयि' प्रत्ययों को स्वरवद्भाव होता है।। ६०८।

### [दु० वृ०]

औतः परौ यिन्नायी स्वरवद् भवतः। नाव्यति, नाव्यते। यथासङ्ख्यभयात् पृथगुच्यते।। ६०८।

### [दु० टी०]

औ०। औकारमिच्छत्याचरति वा औशब्दादायौ यिनि च कृते 'आव्यति, आव्यते' इति भवितव्यमेव।। ६०८।

### [बि० टी०]

औत०। औकारमिच्छतीति, औकार इवाचरतीति च वाक्ये यिन्नायी 'आव्यति, आव्यते' इति **टीका**।। ६०८।

### [समीक्षा]

पूर्ववर्ती सूत्र तथा प्रकृत सूत्र को एक साथ ही पढ़ना चाहिए, जैसा कि पाणिनि ने भी ''वान्तो यि प्रत्यये'' (६। १। ७९) सूत्र में किया है। इसका स्पष्टीकरण करते हुए वृत्तिकार दुर्गसिंह ने कहा है कि 'ओदौतोः– यिन्नायी' ऐसा सूत्रपाठ होने पर यथासङ्ख्य (ओ से यिन् तथा औ से आयि का अन्वय) का भय या भ्रम हो सकता है, वह न हो, अर्थात् स्पष्टावबोधार्थ पृथक् सूत्र बनाया गया है – 'यथासंख्यभयात् पृथगुच्यते'।

### [रूपसिद्धि]

१. **नाव्यति**। नौ + यिन् + ति। नावमात्मन इच्छति, नौरिवाचरति। 'नौ' शब्द से यिन् प्रत्यय, अनुबन्धों का प्रयोगाभाव, प्रकृतसूत्र से स्वरवद्भाव, औकार को 'आव्' आदेश, 'नाव्य' की धातुसंज्ञा, वर्तमानासंज्ञक 'ति' प्रत्यय, अन् – विकरण तथा अकार का लोप।

२. **नाव्यते**। नौ + आयि + ते। नावमात्मन इच्छति, नौरिवाचरति। 'नौ' शब्द से 'आयि' प्रत्यय, आकारलोप, प्रकृत सूत्र से स्वरवद्भाव, औकार को आव् आदेश, 'नाव्य' की धातुसंज्ञा, वर्तमानासंज्ञक 'ते' प्रत्यय, अन्-विकरण तथा अकारलोप।। ६०८।

## ६०९. नाम्यन्तानां यणायियिन्नाशीश्च्वचेक्रीयितेषु ये दीर्घः [३। ४। ६९]

### [सूत्रार्थ]

नाम्यन्त धातुओं को यण् – आयि – यिन् – आशीर्विभक्ति तथा चेक्रीयितसंज्ञक प्रत्यय – घटित 'य्' के परवर्ती होने पर एवं च्वि – प्रत्यय के परे रहते दीर्घ आदेश होता है।। ६०९।

### [दु० वृ०]

नाम्यन्तानां धातूनां यणादिषु ये च्वौ च परतः आन्तरतम्याद् दीर्घो भवति। चीयते, मन्तूयति, अग्नीयते, पटूयति, चीयात्, चेचीयते। च्वौ च – पटूकरोति। ये इति किम् ? कृषीष्ट। नामीति सम्भवदर्शनार्थमिदम्।। ६०९।

### [दु० टी०]

नाम्य०। यणादिषु ये इति यणादिविषये यो यकार इत्यर्थः व्यावृत्तिः पुनराशी–र्विभक्तावेव संभवति, तद्द्वारेणान्यत्रापि संबध्यते एकवाक्यत्वाल्लघुप्रतिपत्तिबन्धनत्वाच्च। **''च्वौ च''** (अ० ७। ४। २६) इति च्विप्रत्यय एव प्रतीयते, शब्दस्यासम्भवात्। **आचार्यास्तु** च्विशब्दं न पठन्ति, **रूढिशब्दा हि तद्धिता इति**। नामीति सम्भवदर्शनम् **मन्दधियां सुखबोधार्थमिति** भावः। यिनि च्वौ च परत्वाद् अपवादत्वाच्च ईत्त्वेनभवितव्यम्, आयौ तु समानलक्षणे दीर्घेऽप्यविशेषः यणाशीश्चेक्रीयितेष्वस्य च लोपः इति वचनाच्चेति।। ६०९।

### [वि० प०]

नाम्य०। मन्तूयति इति। मन्तुशब्दात् कण्ड्वादित्वाद् यण्। ''च्वौ च'' इति। अपटुं पटुं करोति इति **''अभूततद्भावे कृभ्वस्तिषु विकाराच्च्विः''** (अ० ५। ४। ५०) इति च्विप्रत्ययः, स्वभावाच्च्व्यन्तम् अव्ययम्। अथ किमर्थं नामिग्रहणं नहि यणादिष्वन्यो ह्रस्वः संभवति। तथा अकारस्य यणाशीश्चेक्रीयितेषु परत्वाद् अस्य च लोपेन भवितव्यम्, तथा यिनि च्वौ च प्रत्यये ईत्वेन आयिप्रत्यये तु समानलक्षणे दीर्घोऽप्यविशेष इति परिशिष्टो नाम्येव सम्भवतीत्याह – नामीति सम्भवदर्शनार्थमिति। यदेव सम्भवति तदेव दर्शितं **सुखार्थ**मित्यर्थः। नामीत्युपलक्षणं नाम्यन्तानामित्येतदपीत्यर्थः, न चान्तग्रहणादृते मध्यस्य स्यादिति वचनीयं य इत्युपश्लेषलक्षणसप्तमीत्वादिति।। ६०९।

### [बि० टी०]

नाम्य०। 'ये' इत्यस्य व्यावृत्तिराशिष्येवेति **टीका**। ननु कथमिदमुक्तं ये – ग्रहणाभावे जितमित्यत्र कानुबन्धे यण्वद्भावाद् दीर्घः स्यात्। सिद्धपक्षे 'योक्तवर्जम्'

इत्यस्य व्यावृत्तिबलान्न भविष्यतीति चेत्, न। **सूत्रकार**मतमिदम्। ननु द्युभवतीति **''दिव उद् व्यञ्जने''** (२। २। २५) इत्यनेन उत्वे कृते च्वौ परतः कथन्न दीर्घः ? सत्यम्, उदिति उकारस्य स्वरूपग्रहणाल्लाक्षणिकत्वाद् वा।। ६०९।

## [समीक्षा]

'चीयते, अग्नीयते, चीयात्, चेचीयते, पटूकरोति' आदि शब्दरूपों के सिद्ध्यर्थ नाम्यन्त धातु अथवा धातुघटित नामिसंज्ञक वर्ण को दीर्घादेश करने की आवश्यकता होती है, जिसकी पूर्ति दोनों ही व्याकरणों में की गई है। पाणिनि के सूत्र हैं – ''अकृत्सार्वधातुकयोर्दीर्घः, च्वौ च'' (अ० ७। ४। २५–२६)।

## [विशेष वचन]

१. नामीति सम्भवदर्शनार्थमिदम् (दु० वृ०)।

२. आचार्यास्तु च्विशब्दं न पठन्ति, रूढिशब्दा हि तद्धिताः इति (दु० टी०)।

३. नामीति सम्भवदर्शनं मन्दधियां सुखबोधार्थमिति भावः (दु० टी०)।

४. यदेव सम्भवति तदेव दर्शितं सुखार्थमित्यर्थः (वि० प०)।

५. नामीत्युपलक्षणं नाम्यन्तानामित्येतदपीत्यर्थः। न चान्तग्रहणादृते मध्यस्य स्यादिति वचनीयम्, 'ये' इत्युपश्लेषलक्षणसप्तमीत्वादिति (वि० प०)।

६. सिद्धपक्षे योक्तवर्जमित्यस्य व्यावृत्तिबलान्न भविष्यतीति चेत्, न। सूत्रकार–मतमिदम् (बि० टी०)।

## [रूपसिद्धि]

१. **चीयते**। चि + यण् + ते। 'चिञ् चयने' (४। ५) धातु से वर्तमानासंज्ञक प्रथमपुरुष–एकवचन 'ते' प्रत्यय, कर्म अर्थ में ''भावकर्मणोः'' (३। २। ३०) से यण् प्रत्यय, 'ण्' अनुबन्ध का प्रयोगाभाव तथा प्रकृत सूत्र से चि – धातु के अन्त में विद्यमान इकार को दीर्घ।

२. **मन्तूयति**। मन्तु + यण् + ते। 'मन्तु' धातु से ति – प्रत्यय, ''कण्ड्वादिभ्यो यण्'' से यण् प्रत्यय तथा प्रकृत सूत्र से उकार को दीर्घादेश।

३. **अग्नीयते**। अग्नि + आयि + ते। अग्निरिवाचरति। 'अग्नि' शब्द से 'आचरति' अर्थ में 'आयि' प्रत्यय, आकार का लोप, प्रकृत सूत्र से अग्निघटित इकार को दीर्घ, 'अग्नीय' की धातुसंज्ञा, ते–प्रत्यय, अन् – विकरण तथा अकार का लोप।

४. **पटूयति**। पटु + यिन् + ति। पटुमिच्छति। 'पटु' शब्द से 'यिन्' प्रत्यय, अनुबन्ध का प्रयोगाभाव, प्रकृत सूत्र से उकार को दीर्घ, 'पटूय' की धातुसंज्ञा, ति – प्रत्यय, अन् – विकरण तथा अकारलोप।

५. **चीयात्**। चि + आशीः– यात्। 'चि' धातु से आशीर्विभक्तिसंज्ञक परस्मैपद – प्रथमपुरुष – एकवचन 'यात्' प्रत्यय, तथा प्रकृत सूत्र से चि – धातुगत इकार को दीर्घ आदेश।

६. **चेचीयते**। चि + य + ते। पुनः पुनरतिशयेन वा चिनोति। 'चिञ् चयने' (४। ५) धातु से ''धातोर्यशब्दश्चेक्रीयितं क्रियासमभिहारे'' (३। २।१४) सूत्र द्वारा चेक्रीयितसंज्ञक 'य' प्रत्यय ''चण्परोक्षाचेक्रीयितसनन्तेषु'' (३। ३। ७) से धातु को द्विर्वचन, अभ्याससंज्ञा, प्रकृतसूत्र से धातुगत – इकार को दीर्घ, 'चेचीय' की धातुसंज्ञा, वर्तमानासंज्ञक आत्मनेपद – प्रथमपुरुष – एकवचन 'ते' प्रत्यय, अनुविकरण तथा अकारलोप।

७. **पटूकरोति**। अपटुं पटुं करोति। 'पटु' शब्द से 'च्वि' प्रत्यय तथा प्रकृत सूत्र से दीर्घ आदेश।। ६०९।

## ६१०. इणोऽनुपसृष्टस्य [३। ४। ७०]

### [सूत्रार्थ]

आशीर्विभक्तिसंज्ञक यकारादि प्रत्यय के पर में रहने पर उपसर्गरहित 'इण्' धातु को दीर्घ होता है।। ६१०।

### [दु० वृ०]

इणो धातोरनुपसृष्टस्यैवाशिषि ये परे दीर्घो भवति। ईयात्, ईयास्ताम्। अनुपसृष्टस्यैवेति किम् ? अन्वियात्। यणो व्यवहितपाठान्नेहानुवृत्तिरिति गम्यते। तेन 'समीयते' इति नियमो न स्यात्।। ६१०।

### [दु० टी०]

इणो०। **''नाम्यन्तानां यणायि०''** (३। ४। ७०) इत्यादिना दीर्घे सिद्धे वचनमिदं नियमार्थमित्याह – इणोऽनुपसृष्टस्यैवेति, इण एवानुपसृष्टस्येति न विपरीतनियमः श्रुतत्वादिण इति। यस्तु समानलक्षणो दीर्घः सम्भवत्येवेत्यत्र दर्शनम् अतीयात्, प्रतीयात्। **नैयासिकास्तु** ह्रस्वं विदधते, अविशेषाद् ह्रस्व इति मन्यन्ते। **तन्मतेनात्र** पूर्वलोपो द्रष्टव्यः। यण् इत्यादि। यद्यनुवृत्तिरिष्टा आशीःसमीपे यणः पाठः कृतः स्यादिति भावः।। ६१०।

### [वि० प०]

इणो०। पूर्वेणैव सिद्धे **नियमार्थमिदम्**। नियमश्च श्रुतत्वादिणः प्रकृतेरेवेत्याह – इणोऽनुपसृष्टस्यैवेति। अथाशिषि 'ये' इति कथमुक्तम् – बहवो हि प्रत्ययाः पूर्वमुक्ता इति ? सत्यम्, यिन्नायिच्वीनां लिङ्गप्रत्ययानां चेक्रीयितस्यापि व्यञ्जनादिविहितस्येणो धातोः स्वरादेर्नास्त्येव सम्भवः, तर्हि कथं यणो नानुवृत्तिरित्याह – यणो व्यवहितेत्यादि। अन्यथा आशिषः समीपमेव यणं पठेत्। ततः पारिशेष्यादनन्तराशीरेवानुवर्तते इति न दोषः।। ६१०।

### [बि० टी०]

इणो०। नियमश्च श्रुतत्वादिणः **प्रकृतेरित्यादि** सूत्रनिर्दिष्टत्वात् श्रुत इणः आशीरनुवर्तनादनुमिता अत एव **'श्रुतानुमितयोः श्रौतसम्बन्धो विधिर्बलवान्'** (का०

परि० ९२) इति न्यायात् प्रकृतिनियमः। तर्हि प्रकृतेः श्रुतः एवशब्दः प्रत्ययं नियमयति, प्रत्ययात् श्रुत एव शब्दः प्रकृतिं नियमयति इति व्युत्पत्त्या प्रकृतेः श्रुत एवशब्दः कथं प्रत्ययं नियमयतीति। तदुक्तम्, प्रत्ययात् श्रुत एवशब्द इत्यादिन्यायोऽयमप्यकिञ्चित्कर एवं प्रायेणः सम्भवतीत्युक्तम्, अन्यथा यत्र विशेषणे श्रुत एवशब्दस्तत्र का वार्ता। ननु मुख्यत्वाद् इण्शब्दस्य निकटे एवशब्दो दातुं युज्यते कथं विशेषणे एवशब्दो दत्तः, अप्रधानत्वात्। तत्राह **गुरुः** – सविशेषणे विधिनिषेधौ विशेषणमुपसंक्रामतः सति विशेष्य–बाधे **इत्यत्र सविशेषणे** कृते नियमे विशेषणे पर्यवसितः स तत्र विशेषणं प्रधानम्, अत एव **विशेषणे एवशब्दो** दत्तः।। ६१०।

## [समीक्षा]

'इण् गतौ' (२। १३) धातु से आशीर्विभक्ति में 'ईयात्, ईयास्ताम्' आदि शब्दरूपों के सिद्ध्यर्थ धातु के इकार को दीर्घविधान की आवश्यकता होती है। इसकी पूर्ति दोनों ही व्याकरणों में की गई है। कातन्त्रकार ने साक्षात् दीर्घविधान किया है।, परन्तु पाणिनि के ''एतेर्लिङि'' (अ० ७। ४। २४) सूत्र से 'उदियात्, समियात्' इत्यादि प्रयोगों में ह्रस्वविधान की व्याख्या करते हुए कहा गया है, कि ह्रस्वविधान उपसर्गयोग में ही होता है। इसके फलस्वरूप उपसर्ग के अभाव में 'ईयात्' इत्यादि प्रयोगों में दीर्घविधि उपपन्न होगी।

## [विशेष वचन]

१. यणो व्यवहितपाठान्नेहानुवृत्तिरिति गम्यते (दु० वृ०)।

२. नैयासिकास्तु ह्रस्वं विदधतेऽविशेषाद् ह्रस्व इति मन्यन्ते (दु० टी०)।

३. पूर्वेणैव सिद्धे नियमार्थमिदम्,नियमश्च श्रुतत्वाद् इणः प्रकृतेरेव (वि० प०)।

## [रूपसिद्धि]

१. **ईयात्**। इण् + आशीः – यात्। 'इण् गतौ' (२।१३) धातु से आशीर्विभक्तिसंज्ञक परस्मैपद – प्रथमपुरुष – एकवचन 'यात्' प्रत्यय, तथा प्रकृत सूत्र से इकार को दीर्घ आदेश।

२. **ईयास्ताम्**। इण् + आशीः – यास्ताम्। 'इण् गतौ' (२। १३) धातु से आशीर्विभक्तिसंज्ञक परस्मैपद – प्रथमपुरुष – द्विवचन 'यास्ताम्' प्रत्यय तथा प्रकृत सूत्र से इकार को दीर्घ आदेश।। ६१०।

## ६११. ऋत ईदन्तश्च्विचेक्रीयितयिन्नायिषु [३। ४। ७१]

## [सूत्रार्थ]

च्वि – चेक्रीयित – यिन् – आयि प्रत्ययों के परे रहते ऋकारान्त धातु के अन्त में ईकार आगम होता है।। ६११।

## [दु० वृ०]

ऋदन्तस्य च्विचेक्रीयितयिन्नायिषु परतः ईदन्तो भवति। मात्रीकरोति, जेह्रीयते, स्वस्रीयति, दुहित्रीयते। ऋत इति किम् ? कृ – चेकीर्यते।। ६११।

## [दु० टी०]

ऋतः। **रूढिशब्दा हि तद्धिताः इत्याचार्या**श्च्विग्रहणं न कुर्वते। अथ किमर्थं दीर्घोच्चारणं **''नाम्यन्तानां यण्''** (३। ४। ७०) इत्यादिना दीर्घो भविष्यति, वक्ष्यमाणमिग्रहणं च न विधेयं स्यात् तर्हि 'क्रियते, क्रियात्' इत्यत्रापि दीर्घः प्रसज्येत, यद्येवम्, पुनरिकारस्तत्रोच्यते तद्बलाद् दीर्घो न भविष्यति। प्राप्ते हि दीर्घत्वे इकार आरभ्यमाणस्तस्य बाधकः स्यात्। भिन्नविषयेऽपि बाधा भवतीत्यागमेऽपि कृते न दीर्घः। **'सकृद् बाधितो विधिर्बाधित एव'** (का० परि० ३६) इत्याचक्षतेऽन्ये।। ६११।

## [समीक्षा]

'मात्रीकरोति, जेह्रीयते, चेक्रीयते' इत्यादि शब्दरूपों के सिद्ध्यर्थ ऋकारान्त धातु के अन्त में ईकार की आवश्यकता होती है। इसे दोनों ही आचार्यों ने पूर्ण किया है। अन्तर यह है कि कातन्त्रकार ने 'ई' आगम किया है, तदनुसार पूर्ववर्ती ऋकार को रकारादेश होकर 'चेक्रीयते' आदि शब्द सिद्ध होते हैं, परन्तु पाणिनि ने 'ऋ' के स्थान में 'रीङ्' आदेश करके लाघव प्रदर्शित किया है, क्योंकि इसके फलस्वरूप 'ऋ' को रकारादेश नहीं करना पड़ता है।

## [विशेष वचन]

१. रूढिशब्दा हि तद्धिता इत्याचार्याश्च्विग्रहणं न कुर्वते (दु ० टी०)।

२. भिन्नविषयेऽपि बाधा भवति (दु० टी०)।

## [रूपसिद्धि]

१. **मात्रीकरोति**। मातृ + च्वि–करोति। अमातरं मातरं करोति। 'मातृ' शब्द से 'च्वि' प्रत्यय, प्रकृत सूत्र से ऋकार के बाद 'ई' का आगम तथा ''रम् ऋवर्णः'' (१। २। १०) से 'ऋ' को 'र्' आदेश।

२. **जेह्रीयते**। ह + चेक्रीयित–य + ते। पुनः पुनर्हरति। 'हृञ् हरणे' (१।५९६) धातु से ''धातोर्यशब्दश्चेक्रीयितं क्रियासमभिहारे'' (३। २। १४) सूत्र द्वारा चेक्रीयितसंज्ञक 'य' प्रत्यय, प्रकृत सूत्र से 'ई' आगम, ऋ को र्, 'ह्री' को द्विर्वचन, अभ्याससंज्ञादि, ''हो जः'' (३। ३। १२) से ह् को ज्, अभ्यासघटित इकार को गुण, 'जेह्रीय' की धातुसंज्ञा, वर्तमानासंज्ञक आत्मनेपद–प्रथमपुरुष–एकवचन 'ते' प्रत्यय, अन्विकरण तथा अकार का लोप।

३. **स्वस्रीयति**। स्वसृ + यिन् + ति। स्वसारमात्मनः इच्छति। 'स्वसृ' शब्द से ''नाम्न आत्मेच्छायां यिन्'' (३।२।५) से 'यिन्' प्रत्यय, अनुबन्धों का प्रयोगाभाव,

प्रकृत सूत्र से 'ई' आगम, 'ऋ' को 'र्' आदेश, 'स्वस्रीय' की धातुसंज्ञा, वर्तमानासंज्ञक 'ति' प्रत्यय तथा अन्–विकरण।

४. **दुहित्रीयते**। दुहितृ + आयि + ते। दुहितेवाचरति। 'दुहितृ' शब्द से ''कर्तुरायिः सलोपश्च'' (३। २। ८) से 'आयि' प्रत्यय, प्रकृत सूत्र से ईकारागम, ऋ को र्, ''नामिव्यञ्जनान्तादायेरादेः'' (३। ६। ४२) से 'आयि' प्रत्यय के आदि में विद्यमान आकार का लोप, 'दुहित्रीय्' की धातुसंज्ञा, वर्तमानासंज्ञक 'ते' प्रत्यय तथा अन्–विकरण।। ६११।

## ६१२. इरन्यगुणे [३।४।७२]

### [सूत्रार्थ]

ऋदन्त धातु के अन्त में इकारागम होता है अगुण अन्–विकरण के परे रहते।। ६१२।

### [दु० वृ०]

ऋदन्तस्यानि विकरणेऽगुणे इकारोऽन्तो भवति। आद्रियते, आध्रियते। ऋत इति किम् ? किरति, गिरति। अगुण इति किम् ? स्मरति। **'आदेशाद् आगमो विधिर्बलवान्'** (हैम० परि० ५०) इति।। ६१२।

### [दु० टी०]

इर०। पुनरिकारग्रहणमुत्तरत्र दीर्घनिवृत्त्यर्थम् इह क्रियमाणमपि कथमियादेशं न बाधते ? नैवम्, दीर्घे ह्यनुवर्तमाने दीर्घत्ववत्लादियादेशो बाध्यते, अन्यथा ह्रस्व एवात्र कृतः स्यादिति मन्यते। **'दृङ् आदरे, धृङ् अवस्थाने, कॄ विक्षेपे, गॄ निगरणे'** (५।११२, ११३; ५।२१, २२), शब्दान्तरस्य विधिः प्राप्नुवन्नित्यो गुणः इति मन्यमान आहअगुण इत्यादि। अथ **'आगमादेशयोरागमो विधिर्बलवान्'** (हेम० परि० ५०) इति, तथापि **मन्दमतिबोधनार्थम्**– गुणग्रहणमिति।। ६१२।

### [वि० प०]

इर०। **'दृङ् आदरे, धृङ् अवस्थाने'** (५।११२, ११३) तुदादित्वादनोऽगुणत्वम्। इकारोऽन्तोऽवयव इति धातुग्रहणेन ग्रहणादियादेशो भवतिः अथ किमर्थोऽगुणग्रहणं स्मरतीत्यादौ गुणिनि अन्तरङ्गत्वाद् गुणे कृते ऋदन्तो न भवति कः पुनर्ऋकारागमः ? सत्यम्। **'आगमादेशयोरागमविधिर्बलवान्'** (हैम० परि० ५०) इति गुणं बाधित्वा इकारागमो भवति, अतोऽगुणग्रहणमिति।। ६१२।

### [समीक्षा]

'आद्रियते, आध्रियते' इत्यादि शब्दरूपों के सिद्ध्यर्थ 'दृ' आदि ऋकारान्त धातु के अनन्तर इकार की आवश्यकता होती है, इसकी पूर्ति कातन्त्रकार ने इकारागम (ऋ को र्) से की है, परन्तु पाणिनि ने अन्तवर्ती ऋकार को 'रिङ्' आदेश करके लाघव प्रदर्शित किया है। उनका सूत्र है – ''रिङ् शयग्लिङ्क्षु'' (अ० ७।४।२८)।

## [विशेष वचन]

१. पुनरिकारग्रहणमुत्तरत्र दीर्घनिवृत्त्यर्थम् (दु० टी०)।

२. तथापि मन्दमतिबोधनार्थमगुणग्रहणम् (दु० टी०)।

## [रूपसिद्धि]

१. **आद्रियते**। आङ् + दृ + ते। 'आङ्' उपसर्गपूर्वक 'दृङ् आदरे' (५।११२) धातु से वर्तमानासंज्ञक आत्मनेपद–प्रथमपुरुष–एकवचन 'ते' प्रत्यय, ''अन् विकरणः कर्तरि'' (३।२।३२) से अन्–विकरण, ''तुदादेरनि'' (३।५।२५) से अगुण, प्रकृत सूत्र से 'ऋ' के अन्त में इकारागम, ''रमृवर्णः'' (१।२।१०) से ऋ को र् तथा इकार को ''स्वरादाविवर्णोवर्णान्तस्य धातोरियुवौ'' (३।४।५५) से इयादेश।

२. **आध्रियते**। आङ् + धृ + ते। 'आङ्' उपसर्गपूर्वक 'धृङ् अवस्थाने' (५।११२) धातु से वर्तमानासंज्ञक 'ते' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ६१२।

# ६१३. यणाशिषोर्ये [३।४।७३]

## [सूत्रार्थ]

यण् प्रत्यय तथा आशीर्विभक्ति के परे रहते ऋदन्त धातु के अन्त में इकारागम होता है।। ६१३।

## [दु० वृ०]

ऋदन्तस्य यणाशिषोर्ये परे इकारोऽन्तो भवति। क्रियते, क्रियात्। 'ये' इति किम्? कृषीष्ट।। ६१३।

## [दु० टी०]

यणा०। आशिषं प्रति विशेषणं चरितार्थम्, चरितार्थम् यणोऽन्यभिचारात् एकवाक्यतायां **लघुप्रतिपत्त्यर्थ** स्वरूपविशेषणमित्याह – 'आशिषि ये' इति।। ६१३।

## [बि० टी०]

**यणा०। अत्रापि ये उक्तत्वात् कृतः इत्यादौ दीर्घो न स्यात्। ननु 'क्रियते' इत्यत्रानेन इकारागमे कृते ''नाम्यन्तानाम्'' (३।४।७०) इत्यादिना दीर्घः कथन्न स्यात्? सत्यम्। ''इरन्यगुणे'' (३।४।७२) इत्यत्र इकारकरणात्। अन्यथा 'ऋत ईदन्तः' (३।४।७२) इत्यत ईदनुवर्तनाद् 'आद्रियते' इत्यादयः सिध्येयुः। न हि तत्र ह्रस्वस्य फलमपि इयादेशत्वाद् इतोऽनुवर्तनादेव सिद्धेः, तस्मादिकारकरणान्न दीर्घ इति सम्प्रदायविदः। अत्रापि ये उक्तत्वात् 'कृतः, स्मृतः' इत्यत्र कानुबन्धस्य यण्वद्भावान्न इकारागमः।। ६१३।**

## [समीक्षा]

'क्रियते, क्रियात्' इत्यादि शब्दरूपों के साधनार्थ ऋकारान्त धातु के अनन्तर इकार की आवश्यकता होती है। इसकी पूर्ति कातन्त्रकार ने इकारागम से तथा पाणिनि ने ऋ को रिङ् आदेश करके की है। इस प्रकार पाणिनीय निर्देश में लाघव है, क्योंकि ऋ को रिङ् आदेश करने पर रकारादेश की आवश्यकता नहीं रहती है।

## [विशेष वचन]

१. एकवाक्यतायां लघुप्रतिपत्यर्थं स्वरूपविशेषणम् (दु० टी०)।

२. तस्मादिकारकरणान्न दीर्घ इति सम्प्रदायविदः (बि० टी०)।

## [रूपसिद्धि]

१. **क्रियते**। कृ + यण् + ते। 'डु कृञ् करणे' (७। ७) धातु से कर्म अर्थ में वर्तमानासंज्ञक आत्मनेपद ते–प्रत्यय, ''सार्वधातुके यण्'' (३।२।३१) सूत्र द्वारा यण् प्रत्यय, 'ण्' अनुबन्ध का प्रयोगाभाव, प्रकृत सूत्र द्वारा इकारागम तथा ''रमृवर्णः'' (१।२। १०) से ऋ को र् आदेश।

२. **क्रियात्**। कृ + आशीः–यात्। 'डु कृञ् करणे' (७।७) धातु से आशीर्विभक्तिसंज्ञक परस्मैपद–प्रथमपुरुष–एकवचन 'यात्' प्रत्यय, प्रकृत सूत्र से इकारागम तथा ऋकार को रकारादेश।। ६१३।

## ६१४. गुणोऽर्त्तिसंयोगाद्योः [३।४।७४]

## [सूत्रार्थ]

यण् प्रत्यय तथा आशीर्विभक्तिसंज्ञक प्रत्यय-घटित 'य' के परे रहते 'ऋ' धातु एवं संयोगादि-धातुघटित ऋकार के स्थान में गुणादेश होता है।। ६१४।

## [दु० वृ०]

अर्त्तेः संयोगादेश्च धातोर्ऋतो यणाशिषोर्ये परे गुणो भवति। अर्यते, अर्यात्। स्मर्यते, स्मर्यात्। **'असिद्धं बहिरङ्गमन्तरङ्गे'** (का० परि० ३३) इति। संस्क्रियते, संस्क्रियात्।। ६१४।

## [दु० टी०]

गुणो०। पूर्वस्यापवादोऽयम्। **'ऋ प्रापणे'** (१।२७५) इति भ्वादौ, **'ऋ सृ गतौ'** (२। ७४) इति जुहोत्यादौ। **तिपा स्वरूपं निर्दिश्यते** इति विशेषणस्याभावाद् विकरणो नोपपद्यते, जौहोत्यादिकत्वाच्च न द्विर्वचनमिति। 'ऋ' इति सिद्धे अर्त्तिनिर्देशः **श्रुतिसुखार्थ** एव। असिद्धमित्यादि। बहिरङ्गत्वं सुटो द्विपदाश्रयत्वाद् गुणस्य त्वन्तरङ्गत्वमेकपदाश्रयत्वादिति न करोतेः सुटि कृते संयोगादिरित्यर्थः। य इति किम् ? ऋषीष्ट, स्मरीषीष्ट। अरिति सिद्धे गुणग्रहणं **वैचित्र्यार्थम्**।। ६१४।

## [वि० प०]

गुणो०। **''सुड् भूषणे सम्पर्युपात्''** (३।७।३८) इति सुटि कृते संयोगादित्व–मस्तीत्याह – असिद्धमित्यादि। सुटः पुनर्बहिरङ्गत्वमुभयपदाश्रितत्वादिति। गुणस्यान्तर–ङ्गत्वमेकपदाश्रितत्वादिति, तेन इकारागमः पूर्वेण भवतीति।। ६१४।

## [बि० टी०]

गुणोऽर्त्ति०। 'ऋतः' इति कृते सिध्यति भौवादिकादादिकयोर्ग्रहणम्। **तिप्–निर्देशः सुखार्थ** एव। 'अर्' इति सिद्धे गुणग्रहणमपि तथैव। ननु 'निष्क्रियते' इत्यत्र कथं गुणो

न स्यात्, धातोः संयोगादित्वात्, न देश्यम् आदिग्रहणस्यैवावयवार्थत्वात् संयोगादिरवयवो यस्येत्यर्थेऽत्र न भवति। न ह्यत्र धात्वववयवः संयोगादिः, अवयवश्चारम्भकस्तदभावादत्र न भवति। ननु **'अर्थवद्ग्रहणे नानर्थकस्य'** (का० परि० ४) इति न्यायादत्र न भवति किमादिग्रहणेन ? सत्यम्, **बोधगौरवनिरासार्थम्** आदिग्रहणम्।। ६१४।

## [समीक्षा]

'अर्यते, अर्यात्, स्मर्यते, स्मर्यात्' इत्यादि शब्दों के सिद्ध्यर्थ 'ऋ' के स्थान में गुणादेश की अपेक्षा होती है, इसका विधान दोनों ही आचार्यों ने किया है। पाणिनि का भी यही सूत्र है – ''गुणोऽर्त्तिसंयोगाद्योः'' (अ० ७।४।२९)। पाणिनीय सूत्रपाठ के अनुसार उपरितन सूत्र ''रिङ् शयग्लिङ्क्षु'' (अ० ७।४।२८) से 'श–यक्–लिङ्' तीनों की अनुवृत्ति प्राप्त होती है, परन्तु 'श' (तुदादि–विकरण) प्रत्यय के परे रहते गुण सम्भव नहीं है, अतः 'श' की अनुवृत्ति नहीं की जाती है – ''श इत्यत्रासम्भवान्नानुवर्तते'' (काशिकावृत्तिः ७।४।२९)। कातन्त्रकार ने इकारादेश के लिए दो सूत्र बनाए हैं, जिनमें अगुण (शप्रत्यय) का प्रथम तथा 'यण्–आशिष्' का द्वितीय सूत्र में उल्लेख है। अतः काशिकाकार की तरह उक्त व्याख्या यहाँ अनुवृत्ति के विषय में नहीं करनी पड़ती है।

## [विशेष वचन]

१. 'ऋ' इति सिद्धे अर्त्तिनिर्देशः श्रुतिसुखार्थ एव (दु० टी०)।

२. अरिति सिद्धे गुणग्रहणं वैचित्र्यार्थम् (दु० टी०)।

३. तिप्–निर्देशः सुखार्थ एव (बि० टी०)।

४. बोधगौरवनिरासार्थम् आदिग्रहणम् (बि० टी०)।

## [रूपसिद्धि]

१. **अर्य्यते**। ऋ + यण् + ते। 'ऋ प्रापणे च, ऋ सृ गतौ' (१।२७५; २।७४), धातु से कर्म अर्थ में वर्तमानासंज्ञक आत्मनेपद–प्रथमपुरुष–एकवचन 'ते' प्रत्यय, ''सार्वधातुके यण्'' (३।२।३१) से यण् प्रत्यय तथा प्रकृत सूत्र से ऋकार गुणादेश।

२. **अर्यात्**। ऋ + आशीः–यात्। 'ऋ' धातु से आशीर्विभक्तिसंज्ञक 'यात्' प्रत्यय तथा प्रकृत सूत्र से ऋकार को गुणादेश।

३. **स्मर्यते**। स्मृ + यण् + ते। 'स्मृ चिन्तायाम्, स्मृ आध्याने' (१।२७२, ५२१) धातु से वर्तमानासंज्ञक 'ते' प्रत्यय, ''सार्वधातुके यण्'' (३। २। ३१) से यण् प्रत्यय तथा प्रकृत सूत्र से ऋकार को गुणादेश।

४. **स्मर्यात्**। स्मृ + आशीः – यात्। 'स्मृ' धातु से आशीर्विभक्तिसंज्ञक 'यात्' प्रत्यय तथा प्रकृत सूत्र से 'ऋ' को गुणादेश।। ६१४।

## ६१५. चेक्रीयिते च [३।४।७५]

### [सूत्रार्थ]

चेक्रीयितसंज्ञक 'य' प्रत्यय के परे रहने 'ऋ' तथा संयोगादि धातु के ऋकार को गुणादेश होता है।। ६१५।

### [दु० वृ०]

अर्त्तेः संयोगादेश्च धातोर्ऋतश्चेक्रीयिते परे गुणो भवति। अरार्यते, सास्मर्यते।। ६१५।

### [दु० टी०]

चेक्री०। चकार उक्तसमुच्चयमात्रे। 'अरार्यते' इति गुणे कृते **''स्वरादेर्द्वितीयस्य''** (३।३।२) इति यस्य सरेफस्य द्विर्वचनम्।। ६१५।

### [वि० प०]

चेक्री०। 'अरार्यते' इति ऋप्रभृतिश्चेति वचनाच्चेक्रीयितम्।। ६१५।

### [बि० टी०]

चेक्री०। एकयोगे कृते चानुकृष्टत्वान्नोत्तरत्र, तदा **भिन्नयोगः सुखार्थः**।। ६१५।

### [समीक्षा]

चेक्रीयितसंज्ञक 'य' प्रत्यय के परे रहने 'ऋ' धातु से 'अरार्यते' आदि तथा संयोगादि 'स्मृ' धातु से 'सास्मर्यते' आदि शब्दों के साधनार्थ ऋ को अरादेश की अपेक्षा होती है, इसकी पूर्ति दोनों ही आचार्यों ने गुणविधान से की है। पाणिनि का सूत्र है — ''यङि च'' (अ० ७।४।३०)।

### [विशेष वचन]

१. चकारः उक्तसमुच्चयमात्रे (दु० टी०)।

२. चानुकृष्टत्वान्नोत्तरत्र, तदा भिन्नयोगः सुखार्थः (वि० टी०)।

### [रूपसिद्धि]

१. **अरार्यते**। ऋ + चेक्रीयित — य + ते। पुनः पुनरियर्त्ति। 'ऋ प्रापणे च, ऋ सृ गतौ' (१।२७५, २७४) धातु से ''धातोर्यशब्दश्चेक्रीयितं क्रियासमभिहारे'' (३। २। १४) सूत्र द्वारा चेक्रीयितसंज्ञक 'य' प्रत्यय, प्रकृत सूत्र से 'ऋ' को गुण, ''स्वरादेर्द्वितीयस्य'' (३।३।२) से रेफसहित 'य' को द्विर्वचन, अभ्याससंज्ञादि, 'अरार्य' की धातुसंज्ञा तथा विभक्तिकार्य।

२. **सास्मर्यते**। स्मृ + चेक्रीयित — य + ते। पुनः पुनः स्मरति। 'स्मृ चिन्तायाम्, स्मृ आध्याने' (१। २७२, ५२१) धातु से चेक्रीयितसंज्ञक 'य' प्रत्यय, प्रकृत सूत्र से 'ऋ' को गुण, द्विर्वचनादि, 'सास्मर्य' की धातुसंज्ञा तथा विभक्तिकार्य।। ६१५।

## ६१६. घ्राध्मोरीः [३। ४। ७६]

### [सूत्रार्थ]

चेक्रीयितसंज्ञक 'य' प्रत्यय के परे रहने 'घ्रा – ध्मा' धातुओं के अन्तिम आकार को ईकार आदेश होता है।। ६१६।

### [दु० वृ०]

'घ्रा –ध्मा' इत्येतयोश्चेक्रीयते परे ईर्भवति। जेघ्रीयते, देध्मीयते। हन्तेर्घ्नीर्वा वक्तव्यः– जेघ्रीयते, जङ्घन्यते।। ६१६।

### [दु० टी०]

घ्रा०। **दीर्घोच्चारणमुत्तरार्थम्**। 'हन्तेर्घ्नीर्वा वक्तव्यः' इति हन्तेर्घ्नीरादेशो विभाषया वक्तव्यः = व्याख्येयः इत्यर्थः। अथवा घ्नीधातुर्हिंसायां चेक्रीयित एवाभिधीयते। हन्तेस्तु 'जङ्घन्यते' इति भवति। तथा च प्रयोगः– **''त्वन्तु राजन् ! चटकमपि न जङ्घन्यसे''** इति।। ६१६।

### [वि० प०]

घ्राध्मो०। 'हन्तेर्घ्नीर्वा वक्तव्यः' इति घ्नीरिति धात्वन्तरं हिंसार्थे चेक्रीयित एवाभिधीयते इति वक्तव्यस्यार्थः। हन्तेस्तु 'जङ्घन्यते' इति स्यादेव। तथा च **''त्वन्तु राजन् ! चटकमपि न जङ्घन्यसे''** इति प्रयोगो दृश्यते।। ६१६।

### [बि० टी०]

घ्राध्मोः। रीति नाशङ्क्यते, भेदनिर्देशात्। अन्यथा घ्राध्मो रीरिति विदध्यात्। घ्राध्मो रीरूपेण **विपरिणाम** इत्यर्थः। अनेकवर्णः सर्वस्यैव भविष्यति। हन्तेर्घ्नीर्वा वक्तव्य इति। हन्धातुर्हिंसायां गतौ च वर्तते। यदा हिंसायाम्, तदा 'जेघ्नीयते' इति स्यात्। यदा गतौ, तदा 'जङ्घन्यते' इति **परः**।। ६१६।

### [समीक्षा]

'जेघ्रीयते, देध्मीयते' इत्यादि शब्दरूपों के सिद्ध्यर्थ 'घ्राध्मा' धातु के अन्तिम आकार को ईकार आदेश करने की आवश्यकता होती है। अतः इसका विधान दोनों ही व्याकरणों में किया गया है। पाणिनि का सूत्र है – ''ई घ्राध्मोः'' (अ० ७।४।३१)। कातन्त्रकार के ''घ्राध्मोरीः'' इस सूत्रपाठ में 'री' आदेश की आशङ्का नही करनी चाहिए, क्योंकि 'री' आदेश की स्थिति में ''घ्राध्मो रीः'' ऐसा भेदबोधक पाठ होता। व्याख्याकारों ने हन् के अतिरिक्त 'घ्नी' को भी धातु माना है – 'घ्नीरिति धात्वन्तरं हिंसार्थे चेक्रीयित एवाभिधीयते' (वि० प०; दु० टी०)।

### [रूपसिद्धि]

१. **जेघ्रीयते**। घ्रा + य + ते। पुनः पुनर्जिघ्रति। 'घ्रा गन्धोपादाने' (१। २६५) धातु से क्रियासमभिहार अर्थ में ''धातोर्यशब्दश्चेक्रीयितं क्रियासमभिहारे'' (३। २। १४) सूत्र

द्वारा चेक्रीयितसंज्ञक 'य' प्रत्यय, प्रकृत सूत्र से घ्रा–धातु में अन्तिम आकार को ईकार, ''चण्परोक्षाचेक्रीयितसनन्तेषु'' (३। ३। ७) से 'घ्री' को द्वित्व, अभ्याससंज्ञा, रेफ का लोप, ह्रस्व, अभ्यासवर्ती इकार को गुण, ''द्वितीयचतुर्थयोः प्रथमतृतीयौ'' (३। ३। ११) से घ् को ग्, ''कवर्गस्य चवर्गः'' (३। ३। १३) से ग् को ज्, 'जेघ्रीय' की धातुसंज्ञा तथा विभक्तिकार्य।

२. **देध्मीयते**। ध्मा + य + ते। पुनः पुनर्धमति। 'ध्मा शब्दाग्निसंयोगयोः' (१।२६६) धातु से क्रियासमभिहार अर्थ में 'य' प्रत्यय, प्रकृत सूत्र से धातुगत आकार को ईकार तथा अन्य प्रक्रिया प्रायः पूर्ववत्।।६१६।

## ६१७. यिन्यवर्णस्य [३।४।७७]

### [सूत्रार्थ]

'यिन्' प्रत्यय के परे रहते अवर्ण के स्थान में ईकार आदेश होता है।। ६१७।

### [दु० वृ०]

यिनि परेऽवर्णस्य ईकारो भवति। वस्त्रीयति, मालीयति। च्वौ च दीर्घीभवति – मालीस्यात्। अशनायोदन्यधनायाः बुभुक्षापिपासाकाङ्क्षासु निपाता **रूढाः**। अशन–मिच्छति भोक्तुम् अशनायति। उदकमिच्छति पातुम् उदन्यति। धनमिच्छति तृष्णक् – धनायति।। ६१७।

### [दु० टी०]

यिन्य०। अवर्णस्याग्रहणे प्राप्ते ईत्त्वमुच्यते। च्वौ चेत्यादि। **रूढिशब्दा हि तद्धिता** इति च्वावीत्वं मन्यते। अशनायेत्यादि। अन्यत्राशनमिच्छति दातुम् अशनीयतीति आत्त्वं न भवति। उदकमिच्छति स्नानाय उदकीयति, कस्य नत्वमलोपश्च न भवति। धनमिच्छति दानाय धनीयति, अत्राप्याकारो न भवति। अत्र **समाधिः – परदर्शने** ये निपातास्ते **रूढाः**, तेऽत्र धातव एव यिन्यभिधीयन्ते। अशनमिच्छति भोक्तुम्, उदकमिच्छति पातुम्, धनमिच्छति तृष्णग् इति नाम्नो यिन्प्रत्ययो नाभिधीयते। एवं **''वृषाश्वयोः सश्चान्तो मैथुनतृष्णायाम्''** इति न वक्तव्यम्। वृषमिच्छति गौर्मैथुनाय–वृषस्यति। एवम् अश्वस्यति बडवा। आभ्यां तु यिन्नाभिधीयते। तथा **''नामिनोऽसन्तश्चादनतृष्णायाम्''** इति न वक्तव्यम्। दधि भक्षितुमिच्छति 'दध्यस्यति, दधिष्यति'। एवं 'मध्वस्यति, मधुष्यति'। क्षीरास्यति, क्षीरस्यति। लवणास्यति, लवणस्यति। क्षीरलवणाभ्यां सान्तत्वमेवेति **एके**।। ६१७।

### [वि० प०]

यिन्य०। च्वौ चेति। एतत्तु तद्धितानां **रूढिशब्दत्वात्**। अशनायेत्यादि। अत्र यथायोगमात्त्वम्, कस्य च नत्वम् अलोपश्चेति निपात्यते। अन्यत्राशनमिच्छति दातुम् अशनीयति। उदकमिच्छति स्नानाय उदकीयति। धनमिच्छति दानाय धनीयति इति **व्याख्यानम्**, पुनरत्र परदर्शने ये निपाता **रूढास्त** इह धातवोऽभिधीयन्ते। अशनायधातु–

र्बुभुक्षायाम्, उदन्यधातुः पिपासायाम्, धनायधातुराकाङ्क्षायामिति। 'अशनमिच्छति भोक्तुम्, उदकमिच्छति पातुम्, धनमिच्छति तृष्णक्' इत्यर्थे यिन् प्रत्ययो नाभिधीयते।। ६१७।

## [बि० टी०]

यिन्य०। 'वस्त्रीयति, मालीयति' इत्यत्र अवर्णभेदात् प्रदत्तम्। अशनायेत्यादि। अश्यते य इति कर्मणि युट्, तर्हि अकारलोपः कथं स्याद् इति पूर्वपक्षः सिद्धान्तश्च **टीकायां** लिखितत्वादिह न लिखितः ?।। ६१७।

## [समीक्षा]

'वस्त्रीयति, मालीयति' आदि शब्दरूपों के सिद्ध्यर्थ 'वस्त्र, माला' आदि शब्दों के अन्त में विद्यमान अवर्ण के स्थान में ईकारादेश की जो अपेक्षा होती है, उसकी पूर्ति दोनों ही आचार्यों ने की है। पाणिनि का सूत्र है – ''क्यचि च'' (अ० ७। ४। ३३)। पाणिनि ने इच्छा अर्थ में ''सुप आत्मनः क्यच्'' (अ० ३। १। ८) सूत्र से 'पुत्रीयति' आदि प्रयोगों के सिद्ध्यर्थ 'क्यच्' प्रत्यय किया है, परन्तु कातन्त्रकार एतदर्थ ''नाम्न आत्मेच्छायां यिन्'' (३। २। ५) से 'यिन्' प्रत्यय करते हैं। व्याख्याकारों ने 'अशनायति' आदि के सिद्ध्यर्थ सूत्र बनाना आवश्यक नहीं माना है।

## [विशेष वचन]

१. अशनायोदन्यधनाया बुभुक्षापिपासाकाङ्क्षासु निपाता रूढाः (दु० वृ०)।

२. रूढिशब्दा हि तद्धिता इति च्वावीत्त्वं मन्यते (दु० टी०)।

३. अत्र समाधिः – परदर्शने ये निपातास्ते रूढास्तेऽत्र धातव एव यिन्यभिधीयन्ते (दु० टी०)।

४. एतत्तु तद्धितानां रूढिशब्दत्वात् (वि० प०)।

५. पुनरत्र परदर्शने ये निपाता रूढास्त इह धातवोऽभिधीयन्ते (वि० प०)।

## [रूपसिद्धि]

१. **वस्त्रीयति**। वस्त्र + यिन् + ति। वस्त्रमात्मन इच्छति। 'वस्त्र' शब्द से, आत्मेच्छा अर्थ में ''नाम्न आत्मेच्छायां यिन्'' (३। २। ५) सूत्र द्वारा 'यिन्' प्रत्यय, 'इ–न्' अनुबन्धों का प्रयोगाभाव, प्रकृत सूत्र से वस्त्रशब्दान्त्य अकार के स्थान में ईकार, 'वस्त्रीय्' की ''ते धातवः'' (३। २। १६) से धातुसंज्ञा तथा विभक्तिकार्य।

२. **मालीयति**। माला + यिन् + ति। मालामात्मन इच्छति। 'माला' शब्द से 'यिन्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ६१७।

## ६१८. अदेर्घस्लृ सनद्यतन्योः [३।४।७८]

## [सूत्रार्थ]

सन् प्रत्यय तथा अद्यतनीविभक्तिसंज्ञक प्रत्यय के परे रहते 'अद्' धातु के स्थान में 'घस्लृ' आदेश होता है।। ६१८।

## [दु० वृ०]

अदेः स्थाने घस्लृगादेशौ भवति सनद्यतन्योः परतः। लृदणर्थः। जिघत्सति, अघसत्॥ ६१८।

## [दु० टी०]

अदेः। सनि लृकारानुबन्धस्य फलं नास्तीत्याह—लृदणर्थ इति। अणेवार्थः प्रयोजनमस्य लृकारानुबन्धस्येत्यर्थः॥ ६१८।

## [वि० प०]

अदेः। लृदणर्थ इति। लृदिति तकार **उच्चारणार्थः**। लृकारोऽद्यतन्यामण्प्रत्ययार्थः। **''सस्य सेऽसार्वधातुके''** (३।६।९३) इति सनि घसेश्च सकारस्य तकारः॥ ६१८।

## [बि० टी०]

अदेः। अत्र विषयसप्तमीत्वाद् 'अघासीत्' इत्यत्र निमित्ताभावो न भविष्यति। 'अघत्साताम्' इत्यत्र सिचा व्यवहिते निमित्ताभावो न स्यात्। यत्तु पर इत्युक्तम्, तन्तु प्रथमकक्षातः। किञ्च उभयसप्तमीयम्। परसप्तमीपक्षे वृत्तिरिति **वररुचिः**। **''अघोषेष्वशिटां प्रथमः''** (३।८।९) इत्याद्यनर्थकमेव। अर्थाद् **''अघोषे प्रथमः''** (३।३।६१) इत्यनेन, अन्यथा **''अघोषेष्वशिटां प्रथमः''** (३।८।९) इत्यघोषे प्रत्ययेऽशिटां वर्णानां प्रथमः इत्यर्थः। प्रकृत्यघोषे तस्याविषयत्वात् कथं प्राप्नोतीति **टीकाकारेणाप्यघोषे** इत्युक्तम्। ननु तथापि **''अघोषे प्रथमः''** (३।३।६१) इति कथं कत्वम्, अकारलोपस्य स्थानिवद्भावादिति चेत्, न। **''न पदान्त०''** (का० परि० १०) इत्यादिना प्रतिषेधात्। न च वक्तव्यम् **'असिद्धं बहिरङ्गमन्तरङ्गे''** (का० परि० ३३) इति कथन्न स्यात् स्थानिवद्भावविधौ तस्यानादरात्। अन्यथा यत्र स्थानिवद्भावस्तत्र 'असिद्धं बहिरङ्गम्' इति प्रवर्तते, तदा स्थानिवद्भावनिषेधस्य क्व विषयः इति।

तेनासार्वधातुके इत्यादि। ननु असार्वधातुकस्य प्रयोगो न भवतीत्युक्ते सार्वधातुके भवतीति स्यात्। यथा 'दक्षिणेन चक्षुषा पश्यति' इत्युक्ते वामेन न पश्यति इत्यवगम्यते, तथात्रापि स्यात्। नैवम्, अत्रापिशब्दो भावनीयः, असार्वधातुकेऽस्य प्रयोगो न भवतीति। एतदुक्तं भवति — सार्वधातुके तावन्न भवति, असार्वधातुकेऽपि न भवतीत्यर्थः। ननु असार्वधातुके न भवति, अत एव वचनात् सार्वधातुकेऽपि कथन्न भवतीत्युपपद्यते ? सत्यम्। सार्वधातुके यदा भवति तदा गणे न निक्षिप्यताम्। घस्लृधातुस्ततः सामान्येन स्यात्, असार्वधातुके न भविष्यति, अत एव वचनात्। तस्माद् गणे न कृत्वा यत्सरकप्रकरणे पठति, तन्सरगविषय एव प्रयोगो नान्यस्मिन्। अपिशब्दमन्तरेणापि युज्यते **पञ्जी**। असार्वधातुकस्थस्य प्रयोगो न भवति। सार्वधातुके प्रयोगः स्यादिति चेत्, न, उक्तन्यायात्। कस्मिंश्चित् पुस्तके वाऽस्यैव प्रयोगो भवतीति पाठो विद्यते, तदेवं युज्यते **पञ्जी**। सार्वधातुकेऽप्यस्य प्रयोगो नास्ति, अस्मिन् पक्षेऽपिशब्दो भावनीयः। असार्वधातुकेऽपि तावन्न भवति, सार्वधातुकेऽपि न भवतीत्यर्थः। ननु असार्वधातुके कथन्न स्यात् तदेतत् पुनः, अत एव वचनादिति॥ ६१८।

## [समीक्षा]

वर्तमान धातुपाठों के अनुसार कुछ ऐसी भी धातुएँ हैं, जो आदेश के रूप में भी प्रयुक्त होती हैं। जैसे – अस् के स्थान में भू, सृ के स्थान में धौ (धाव्) तथा अद् के स्थान में घस्लृ इत्यादि। 'अद्' धातु से सन् प्रत्यय तथा अद्यतनीविभक्ति के 'जिघत्सति, अघसत' रूपों को सिद्ध करने के लिए 'घस्लृ' आदेश की अपेक्षा होती है। इसकी पूर्ति दोनों ही व्याकरणों में की गई है। पाणिनि का सूत्र है – ''लुङ्सनोर्घस्लृ'' (अ० २।४।३७)। पाणिनि ने जिस सामान्य भूतकाल अर्थ के अवबोधार्थ लुङ् लकार का प्रयोग किया है, कातन्त्रकार की तदर्थ 'अद्यतनी' संज्ञा है।

## [रूपसिद्धि]

१. **जिघत्सति**। अद्–घस्लृ + सन् + ति। अत्तुमिच्छति। 'अद भक्षणे' (२। १) धातु से ''धातोर्वा तुमन्तादिच्छतिनैकंकर्तृकात्'' (३।२।४) सूत्र द्वारा इच्छार्थ में सन् प्रत्यय, प्रकृत सूत्र से 'अद्' को 'घस्लृ' आदेश, लृ–अनुबन्ध का प्रयोगाभाव, ''वसतिघसेः सात्'' (३।७।२९) से अनिट्, द्विर्वचन, अभ्याससंज्ञा, इत्त्व, घ् को ग्, ग् को ज्, ''सस्य सेऽसार्वधातुके तः'' (३।६।९३) से सकार को तकार, 'जिघत्स' की धातुसंज्ञा तथा विभक्तिकार्य।

२. **अघसत्**। अट् + अद् + सिच् + दि। 'अद् भक्षणे' (२। १) धातु से अद्यतनीविभक्तिसंज्ञक परस्मैपद–प्रथमपुरुष–एकवचन 'दि' प्रत्यय, ''अड् धात्वादि–र्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु'' (३। ८। १६) से धातुपूर्व अडागम, 'इ–च्' अनुबन्धों का प्रयोगाभाव, प्रकृत सूत्र से घस्लृ आदेश, ''वसतिघसेः सात्'' (३।७।२९) से अनिट्, ''पुषादिद्युताद्यृलृकारानुबन्धार्तिशास्तिभ्यश्च परस्मै'' (३।२।२८) से अण् प्रत्यय तथा दकार को तकारादेश।। ६१८।

## ६१९. वा परोक्षायाम् [३।४।७९]

## [सूत्रार्थ]

परोक्षाविभक्तिसंज्ञक प्रत्यय के परे रहने 'अद्' धातु को विकल्प से 'घस्लृ' आदेश होता है।। ६१९।

## [दु० वृ०]

परोक्षायां परतोऽदेर्घस्लृरादेशो भवति वा। जघास, जक्षतुः। आद, आदतुः। घस्लृ अदने। **सौत्रोऽयं धातुर्भाषायां मरुद्विषय एव**।। ६१९।

## [दु० टी०]

वा परो०। जक्षतुरिति। ''**गमहनजनखनघसामुपधायाः**'' (३।६।४३) इत्युपधा–लोपः, ''**अघोषे प्रथमः**'' (२।३।६१), निमित्तात् षत्वमिति। ''**म्रदिघसां मरक्**'' (४।४।४०) इति वचनादित्याह – 'घस्लृ अदने' इत्यादि। ननु **'घस् अदने'** इति गणे पठ्यताम्,

'वा परोक्षायाम्' इति वचनं न विधेयं स्याद् धात्वन्तरप्रयोगसिद्धेः। पूर्वं तु वचनम् अदेः **प्रयोगनिवृत्त्यर्थं** कर्तव्यम्। नैवम्, तथापि घसेर्धात्वन्तरस्यासार्वधातुकप्रयोगाभावज्ञापनार्थं 'वा परोक्षायाम्' इति कर्तव्यमेव। अथा**भिधानात्** तन्निवृत्तिर्भविष्यतीति **प्रतिपत्तिगौरवं** स्यात्।। ६१९।

## [वि० प०]

वा परो०। जक्षतुरिति। **''गमहन्०''** (३।६।४३) इत्यादिनोपधालोपः। घकारस्याघोषे प्रथमे **''शासिवसिघसीनां च''** (३।८।२७) इति षत्वम्। ननु किमर्थमिदं **''स्रदिघसां मरक्''** (४।४।४०) इति वचनात् सौत्रो घसिरस्ति। ततः पक्षे तेनैव सिद्धमित्याह – घस्लृ अदने इत्यादि। मरग्विषय इति। मरग्विषयोऽस्येति समासेनावधारणं गम्यते, न पुनरत्र प्रयोगोऽस्तीति। तेनासार्वधातुके नास्य प्रयोगो भवति तत्पुनरत एव वचनादवसीयते। अन्यथा धातुद्वयेन रूपद्वयस्य सिद्धत्वात् किमनेनेति। यदि पुनः कृत्प्रत्ययमनपेक्ष्य एतदवधारणमुच्यते तदा चोद्यमेव नास्तीति।। ६१९।

## [समीक्षा]

यह ज्ञातव्य है कि पाणिनि ने 'घस्लृ अदने' (पा० धा० पा० १।४५९) स्वतन्त्र भी धातु पढ़ी है, उससे भी लिट् लकार में 'जघास, जक्षतुः' आदि शब्दरूप सिद्ध होते हैं। यहाँ 'अद्' धातु को 'घस्लृ' आदेश करके भी उक्त रूप बनाए गए हैं। पाणिनि का सूत्र है – ''लिट्यन्यतरस्याम्'' (२।४।७०)। कातन्त्रकार ने धातुपाठ में 'घस्लृ' धातु नहीं पढ़ी है, व्याख्याकारों के अनुसार वह सौत्र धातु है, केवल 'मरक्' प्रत्ययान्त शब्दरूप 'घस्मरः' बनाने के लिए–''स्रदिघसां मरक्'' (४।४।४०)। पाणिनीय लिट् लकार के लिए कातन्त्रकार ने 'परोक्षा विभक्ति' का प्रयोग किया है।

## [विशेष वचन]

१. घस्लृ अदने, सौत्रोऽयं धातुर्भाषायां मरग्विषय एव (दु० वृ०)।

२. अथाभिधानात् तन्निवृत्तिर्भविष्यतीति प्रतिपत्तिगौरवं स्यात् (दु० टी०)।

३. 'स्रदिघसां मरक्' इति वचनात् सौत्रो घसिरस्ति (वि० प०)।

## [रूपसिद्धि]

१. **जघास**। अद् + परोक्षा–अट्। 'अद भक्षणे' (२।१) धातु से परोक्षाविभक्तिसंज्ञक परस्मैपद–प्रथमपुरुष–एकवचन 'अट्' प्रत्यय, 'ट्' अनुबन्ध का प्रयोगाभाव, प्रकृत सूत्र से 'घस्लृ' आदेश, 'घस्' को द्विर्वचन, अभ्याससंज्ञा, आदिव्यञ्जनशेष, घ् को ग्, ''कवर्गस्य चवर्गः'' (३। ३। १३) से ग् को ज् तथा ''अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिचट्सु'' (३। ६। ५) से उपधा अकार को दीर्घादेश।

'घस्लृ' आदेश के अभाव में 'आद' रूप बनेगा।

२. **जक्षतुः**। अद् + परोक्षा–अतुस्। 'अद् भक्षणे' (२।१) धातु से परोक्षासंज्ञक 'अतुस्' प्रत्यय, प्रकृत सूत्र से अद् को 'घस्लृ' आदेश, द्विर्वचन, अभ्याससंज्ञा, आदि

व्यञ्जन का शेष, घ् को ग्, ग् को ज्, ''गमहनजनखनघसामुपधायाः स्वरादावनण्यगुणे'' (३।६।४३) से उपधा अकार का लोप, ''अघोषेष्वशिटां प्रथमः'' (३।८।९) से घ् को क्, ''शासिवसिघसीनां च'' (३।८।२७) से सकार को षकार तथा सकार को विसर्गादेश।। ६१९।

## ६२०. वेञश्च वयिः [३।४।८०]

### [सूत्रार्थ]

परोक्षाविभक्तिसंज्ञक प्रत्यय के परे रहते 'वेञ्' धातु को 'वयि' आदेश विकल्प से होता है।। ६२०।

### [दु० वृ०]

वेञो धातोः परोक्षायां परतो वयिरादेशो भवति वा। उवाय, ऊयतुः, ऊयुः। ववौ, ववतुः, ववुः। इकारः **स्वरूपग्राहकः**।। ६२०।

### [दु० टी०]

वेञः। इकारः स्वरूपग्राहक इति। तत्र ग्रहादिभिः परस्मैपदिभिः साहचर्यादात्मनेपदिनः **'अय वय गतौ'** (१।४०६) इत्यस्य ग्रहणमुक्तम्, वेञ उभयपदित्वात् परस्मैपदित्वं रूढिविषयमिति भावः। नायमिकार **उच्चारणार्थः**, किन्तर्हि अनुबन्धः कथमिदनुबन्धत्वाद–नुषङ्गो न स्यात्। यद्येवं सानुषङ्गमेव कथमिदनुबन्धत्वादनुषङ्गो न स्यात्। यद्येवं सानुषङ्गमेव विदध्याद् इति अन्यार्थत्वाच्च इकारानुबन्धो **ह्यनुषङ्गार्थ** एव चरितार्थो गृह्यते तत्रेति।। ६२०।

### [वि० प०]

वेञश्च। इकारः स्वरूपग्राहक इति, तेन ग्रह्यादिसूत्रेऽस्यैव ग्रहणं न पुनः 'अय वय' इत्यादेरित्यर्थः।। ६२०।

### [समीक्षा]

'वेञ्' धातु से परोक्षाविभक्ति में 'उवाय, ऊयतुः' इत्यादि शब्दरूपों के सिद्ध्यर्थ 'वय्' आदेश अपेक्षित होता है। इसका विधान दोनों ही आचार्यों ने किया है। पाणिनि का सूत्र है – ''वेञो वयिः'' (अ०२। ४। ४ १)। 'वयि' आदेश में इकारानुबन्ध स्वरूपग्रहण के लिए है।

### [विशेष वचन]

१. इकारः स्वरूपग्राहकः (दु० वृ०; दु० टी०)।

२. तत्र ग्रहादिभिः .....परस्मैपदित्वमिति रूढिविषयमिति भावः। नायमिकार उच्चारणार्थः (दु० टी०)।

### [रूपसिद्धि]

१. **उवाय**। वेञ् + परोक्षा–अट्। 'वेञ् तन्तुसन्ताने' (१।६११) धातु से परोक्षा–

विभक्तिसंज्ञक परस्मैपद–प्रथमपुरुष–एकवचन 'अट्' प्रत्यय, प्रकृत सूत्र से 'वयि' आदेश, इकारानुबन्ध का प्रयोगाभाव, द्विर्वचन, अभ्याससंज्ञा, आदि व्यञ्जन का अवशेष, 'व' को सम्प्रसारण तथा उपधासंज्ञक अकार को दीर्घ। 'वयि' आदेश न होने पर 'ववौ' रूप सिद्ध होता है।

२. **ऊयतुः**। वेञ् + परोक्षा–अतुस्। 'वेञ्' धातु से 'अतुस्' प्रत्यय, 'वयि' आदेश तथा द्विर्वचनादि। पक्ष में 'ववतुः' रूप होता है।

३. **ऊयुः**। वेञ् + परोक्षा–उस्। 'वेञ्' धातु से 'उस्' प्रत्यय, 'वयि' आदेश तथा द्विर्वचनादि। पक्ष में 'ववुः' रूप साधु माना जाता है।। ६२०।

## ६२१. हन्तेर्वधिराशिषि [३।४।८१]

### [सूत्रार्थ]

आशीर्विभक्तिसंज्ञक प्रत्यय के परे रहते 'हन्' धातु को 'वधि' आदेश होता है।। ६२१।

### [दु० वृ०]

हन्तेर्वधिर्भवति आशिषि परतः। वध्यात्, वध्यास्ताम्।।६२१।

### [दु० टी०]

हन्तेः। तिप्–निर्देशोऽत्र **श्रुतिसुखार्थ** एव।।६२१।

### [समीक्षा]

'हन्' धातु से 'वध्यात्' आदि शब्दरूपों के सिद्ध्यर्थ 'वध' आदेश अपेक्षित होता है, इसका विधान दोनों ही व्याकरणों में किया गया है। पाणिनि का सूत्र है– ''हनो वध लिङि'' (अ० २। ४। ४२)। कातन्त्रीय सूत्रपाठ में 'हन्ति' यह तिप्प्रत्ययान्त निर्देश श्रुतिसुखार्थ माना जाता है– ''तिप्–निर्देशोऽत्र श्रुतिसुखार्थ एव'' (दु० टी०)।

### [रूपसिद्धि]

१. **वध्यात्**। हन् + आशीर्विभक्ति–यात्। 'हन् हिंसागत्योः' (२।४) धातु से आशीर्विभक्तिसंज्ञक परस्मैपद–प्रथमपुरुष–एकवचन 'यात्' प्रत्यय तथा प्रकृत सूत्र से हन् को वध् आदेश।

२. **वध्यास्ताम्**। हन् + आशीर्विभक्तिसंज्ञक–यास्ताम्। 'हन्' धातु से परोक्षासंज्ञक 'यास्ताम्' प्रत्यय तथा 'वध्' आदेश।। ६२१।

## ६२२. अद्यतन्यां च [३। ४। ८२]

### [सूत्रार्थ]

अद्यतनीविभक्तिसंज्ञक प्रत्यय के परे रहते 'हन्' को 'वध्' आदेश होता है।। ६२२।

### [दु० वृ०]

हन्तेरद्यतन्यां च परतो वधिर्भवति। अवधीत्, अवधिष्टाम्। अनान्तत्वादिटि कृते

वा दीर्घो न स्यात्, इङ्निर्देशस्य स्वरूपग्राहकत्वात्। वाशब्दो व्यवस्थावाचीह स्मर्यते, तेनात्मनेपदे वा आहत, आहसाताम्। आवधिष्ट, आवधिषाताम्।। ६२२।

## [दु० टी०]

अद्य०। चकार उक्तसमुच्चयमात्रे। **''हनिमन्यतेर्नात्''** (३। ७। २३) इति हन्तेर्न–कारादिट्प्रतिषेधेऽनकारान्ताद् इड् भवत्येव। व्यञ्जनादीनां सेटां विभाषया दीर्घोऽपि नैव, **इकश्तिपो धातोः स्वरूपे निर्दिश्यन्ते**। एवमत्र स्वरूपत्वं यदि वध एवावतिष्ठते। अकारान्तनिर्देशे हि अस्य च लोपे स्थानिवद्भावात् सिध्यति किन्त्वकार उच्चारणार्थ इति प्रतिपत्त्यर्थ इत्याह – अनान्तत्वादित्यादि। **''वा परोक्षायाम्''** (३।४।८०) इत्यतो **''हन्तेर्वधिराशिषि''** (३। ४। ८२) इत्यतिक्रम्य वाग्रहणं मण्डूकप्लुत्या वर्तते, तत्तु **व्यवस्थितविभाषया** इत्याह – वाशब्द इत्यादि। आङो यमहनौ रुचादी।। ६२२।

## [वि० प०]

अद्य०। **''हनिमन्यतेर्नात्''** (३। ७। २३) इति नकारान्तादेव हन्तेरिट्प्रतिषेधः, वध्यादेशे च नान्तत्वाभावाद् इडागमे कृते व्यञ्जनादीनां **''सेटामनेदमनुबन्धक्षान्तक्षणश्वसां वा''** इति वक्ष्यमाणवचनेन विभाषया दीर्घः कथं न स्यादित्याह – अनान्तत्वादिति। अस्य हेतुमाह – इङ्निर्देशस्य स्वरूपग्राहकत्वादिति भावः। वधिरिति इङ्निर्देशः स्वरूपग्राहकः, ततो वैरूप्यहेतुर्न भवतीत्यर्थः। वाशब्द इत्यादि। **''आङो यमहनौ स्वाङ्गकर्मकौ च''** (३।२।४२–२२) इति रुचादित्वादात्मनेपदम्। ''हनेः सिच्यात्मने दृष्टः'' इति वचनात् पक्षे नकारलोपः।। ६२२।

## [बि० टी०]

अद्य०। अवधीदिति। अनान्तत्वादिटि कृते इत्यादि। ननु यद्यनान्तत्वाद् इट्प्राप्तिस्तर्हि 'योक्ता, अत्ता, बोद्धा' इत्यादिषु **''चवर्गस्य किरसवर्णे, अघोषेष्वशिटां प्रथमः''** (३। ६। ५५) इति कृते जान्तदान्तधान्तत्वाभावान्न कथमिट्। जान्ताद् विहिते प्रत्यये न भवतीति व्याख्यां करिष्यामः। तर्हि 'अवधीत्' इत्यत्र दूषणं स्यात्। विहितविशेषणं चेद् इति इट् न प्राप्नोति, नैवम्। अत्रान्तरङ्गत्वाद् वधादेशो न भवतीति, ततः सिच्परत एवेट्। ननु 'अवधिष्ट' इत्यत्र किमस्तु, अत्रापि नान्ताद् विहितः सिच्प्रत्ययः ? सत्यम्, **''हन्तेर्वधिराशिषि, अद्यतन्यां च''** (३। ४। ८२, ८३) इति विषयसप्तमीमाश्रयिष्यामः। किञ्च **''इणो गा''** (३। ४। ८३) गादेशे कृते 'अगात्' इति साध्ये **''अद्यतन्यां च''** (३। ४। ८३) इत्यवश्यं विषयसप्तमी मन्तव्या, अन्यथा अडागमस्यान्तरङ्गत्वेन वृद्धिरपि।

तथा च तत्प्राग्वृद्धौ स्थानिवद्भावाद् गादेशे कृते गादिति स्यात्, ततश्च **'ततोऽभ्यगाद् गाधिसुतः'** इति **भट्टौ** न स्यात्। **वृत्ता**वद्यतन्यां परत इति यदुक्तं तत् प्रथमकक्षातः। एकापीयं सप्तमी अर्थवशाद् द्विधा भिद्यते – परसप्तमी विषयसप्तमी च। आदादिकेण्विधानात् कथमुक्तं परसप्तमीपक्षे वृत्तिर्विषयसप्तमीपक्षे बोद्धव्या। यद् वा **''वसतिघसेः सात्''** (३। ७। २९) इति घसिग्रहणेन ज्ञापयति – सर्वातिदेशे विहितविशेषणं

नाद्रियते, अन्यथा घसग्रहणं व्यर्थं स्यात्। अदेर्दान्तत्वाद् विहितमसार्वधातुकमनिडेव। नन्वस्मिन् पक्षे 'जग्धः, जग्धवान्' इति कथमनिट् ? सत्यम्। एतत्प्रकरणविहिता-सार्वधातुके ज्ञापकं न **शर्ववर्मणा** कृत्प्रत्ययो विहितः इति।। ६२२।

## [समीक्षा]

हन् धातु से 'अवधीत्, अवधिष्टाम्' आदि शब्दरूपों के निष्पादनार्थ 'हन्' धातु के स्थान में 'वध' आदेश की जो अपेक्षा होती है, उसकी पूर्ति दोनों ही आचार्यों ने की है। पाणिनि का सूत्र है– ''लुङि च'' (अ० २। ३। ४३)। वृत्तिकार दुर्गसिंह ने 'वधि' इस इक्प्रत्ययान्त आदेश को स्वरूपग्राहक माना है। उनके अनुसार ''वा परोक्षायाम्'' (३। ४। ७९) सूत्रपठित 'वा' शब्द व्यवस्थावाची है, अतः यहाँ आत्मनेपद में 'वधि' विकल्प से प्रवृत्त होगा, जिसके फलस्वरूप 'आहत, आवधिष्ट' इस प्रकार के दो – दो रूप निष्पन्न होंगे।

## [विशेष वचन]

१. इङ्निर्देशस्य स्वरूपग्राहकत्वात् (दु० वृ०)।

२. वाशब्दो व्यवस्थावाचीह स्मर्यते (दु० वृ०)।

३. इकश्तिपो धातोः स्वरूपे निर्दिश्यन्ते (दु० टी०)।

४. वाग्रहणं मण्डूकप्लुत्या वर्तते, ननु व्यवस्थितविभाषया (दु० टी०)।

५. वधिरिति इङ्निर्देशः स्वरूपग्राहकः (वि० प०)।

६. एकापीयं सप्तमी अर्थवशाद् द्विधा भिद्यते – परसप्तमी विषयसप्तमी च (बि० टी०)।

७. न शर्ववर्मणा कृत्प्रत्ययो विहितः (वि० टी०)।

## [रूपसिद्धि]

१. **अवधीत्**। अट् + हन् + सिच् + दि। 'हन् हिंसागत्योः' (२। ४) धातु से अद्यतनीविभक्तिसंज्ञक प्रथमपुरुष 'दि' प्रत्यय, अडागम, सिच् प्रत्यय, इडागम, प्रकृत सूत्र द्वारा 'हन्' को 'वध्' आदेश, ''सिचः'' (३। ६। ९०) से ईट् का आगम, सिच् का लोप, दीर्घ तथा दकार को तकारादेश।

२. **अवधिष्टाम्**। अट् + हन् + सिच् + ताम्। 'हन् हिंसागत्योः' (२। ४) धातु से अद्यतनीसंज्ञक परस्मैपद – द्विवचन 'ताम्' प्रत्यय तथा अन्य प्रक्रिया प्रायः पूर्ववत्।। ६२२।

## ६२३. इणो गा [३। ४। ८३]

## [सूत्रार्थ]

अद्यतनीविभक्तिसंज्ञक प्रत्यय के परे रहते 'इण्' धातु को 'गा' आदेश होता है।। ६२३।

## [दु० वृ०]

इणो धातोर्गादेशो भवति अद्यतन्यां परतः। अगात्, अगाताम्। इण्वदिकोऽपि – अध्यगात्।। ६२३।

## [दु० टी०]

इणो गा। इण्वदिकोऽपीत्यत्र **समाधिः**। इण्ग्रहणमिकारं परस्मैपदिनमासन्नपाठमुपलक्षयति। तेन **'इक् स्मरणे'** (२। १२) इत्यस्यापि भवतीति। कथम् 'अगायि भवता, अगासाताम्, अगासत' इति इचा सिचा च गादेशान्नित्यत्वेन व्यवधानात् ? सत्यम्, विषयसप्तम्या भविष्यति।। ६२३।

## [वि० प०]

इणः। **''इण्स्था०''** (३। ४। ९३) इत्यादिना सिचो लुक्। इण्वदिकोऽपीति इण्वत् कार्यमिकोऽपि भवतीत्यर्थः। कथमेतत् ? सत्यम्, इण्ग्रहण**मुपलक्षणम्**, तेन सादृश्यात् परस्मैपदिनमेकस्वरं सानुबन्धं सन्निहितपाठमुपलक्षयति, ततः **'इक् स्मरणे'** (२। १२) इत्यस्यापि भवतीत्यर्थः।। ६२३।

## [समीक्षा]

'इण्' धातु से अद्यतनी ( = लुङ् लकार) विभक्ति में 'अगात्, अगाताम्' आदि शब्दरूपों के सिद्ध्यर्थ 'इण्' के स्थान में 'गा' आदेश की आवश्यकता होती है, जिसकी पूर्ति दोनों ही आचार्यों ने की है। पाणिनि का सूत्र है – ''इणो गा लुङि'' (अ० २। ४। ४५)। उभयत्र व्याख्याकारों ने 'इण्वद् इकोऽपि वक्तव्यम्' यह वार्त्तिक वचन प्रस्तुत करके 'इक् स्मरणे' धातु से भी 'गा' आदेश स्वीकार किया है, जिसके फलस्वरूप 'अध्यगात्' आदि प्रयोग निष्पन्न होते हैं।

## [विशेष वचन]

१. इण्ग्रहणमिकारं परस्मैपदिनमासन्नपाठमुपलक्षयति, तेन 'इक् स्मरणे' इत्यस्यापि भवतीति (दु० टी०)।

२. इण्ग्रहणमुपलक्षणम् (वि० प०)।

## [रूपसिद्धि]

१. **अगात्**। अट् + इण् + सिच् + दि। 'इण् गतौ' (२। १३) धातु से अद्यतनीविभक्तिसंज्ञक प्रथमपुरुष – एकवचन 'दि' प्रत्यय, ''अड् धात्वादि-र्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु'' (३। ८। १६) से धातुपूर्व अडागम, ''अनिडेकस्वरादातः'' (३। ७। १३) से अनिट्, ''सिजद्यतन्याम्'' (३। २। २४) से सिच् प्रत्यय, प्रकृत सूत्र से इण् को 'गा' आदेश, ''इण्स्थादापिबतिभूभ्यः सिचः परस्मै'' (३। ४। ९३) से सिच् का लुक् तथा दकार को तकारादेश।

२. **अगाताम्**। अट् + इण् + सिच् + ताम्। 'इण् गतौ' (२। १३) धातु से अद्यतनीविभक्तिसंज्ञक 'ताम्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ६२३।

## ६२४. इङः परोक्षायाम् [३। ४। ८४]

### [सूत्रार्थ]

परोक्षाविभक्तिसंज्ञक प्रत्यय के परे रहते 'इङ्' धातु के स्थान में 'गा' आदेश होता है।। ६२४।

### [दु० वृ०]

इङः परोक्षायां परतो गादेशो भवति। अधिजगे, अधिजगाते, अधिजगिरे। इङ इति किम् ? **'इट् इ गतौ'** (१। १०२) – उदियाय। अद्यतनीक्रियातिपत्त्योर्वा गीरादेश इष्यते – अध्यगीष्ट, अध्यैष्ट, अध्यगीष्यते, अध्यैष्यते। इनि संश्चणोर्गायतेरध्ययनेऽपि वृत्तिः – अधिजिगापयिषति, अध्यजीगपत्। इङस्तु – अध्यापिपयिषति, अध्यापिपत्।। ६२४।

### [दु० टी०]

इङः। अद्यतनीक्रियातिपत्त्योरित्यादि। अत्र संग्रहणमुच्यते। अधिपूर्वो गीधातुर– द्यतनीक्रियातिपत्त्योरेवादिश्यते, उच्चार्यतेऽभिधानात्, आचार्येणेति भावः। इङा च **रूपान्तर**मिति।। ६२४।

### [वि० प०]

इङः। अद्यतनीत्यादि, अत्र संग्रहः। आङ्पूर्वो गीधातुरद्यतनीक्रियातिपत्त्योरेव प्रसिद्धः, पक्षे च रूपान्तरम् इङोऽस्त्येवेति। अध्यैष्ट इति। **''स्वरादीनां वृद्धिरादेः''** (३। ८। १७) इति वृद्धिः। इनीत्यादि। संश्चणोर्य इन्प्रत्ययस्तस्मिन्नपि गादेशो न वक्तव्य इत्यर्थः। **'कै गै रै शब्दे'** (१। २५६) इत्यनेन सिद्धम्, **''अर्तिह्री०''** (३। ६। २२) इत्यादिना पकारागमः। चणि **''इन्यसमानलोपोपधायाः''** (३। ५। ४४) इत्यादिना ह्रस्वः। असमानलोपत्वादभ्यासे सन्वत् कार्यम्, **''दीर्घो लघोः''** (३। ३। ३६) इति दीर्घः। इङस्त्विव्यादि। **''स्मिजिक्रीङामिनि''** (३। ४। २४) इत्याकारः, पूर्ववत् पकारागमः, **''स्वरादेर्द्वितीयस्य''** (३। ३। २) इति द्विर्वचनम्, तेन विकल्पः सिद्ध इति।। ६२४।

### [समीक्षा]

'इङ्' धातु से परोक्षाविभक्ति में 'अधिजगे, अधिजगाते' इत्यादि शब्दरूपों के निष्पादनार्थ 'गा' आदेश करने की आवश्यकता होती है। इसकी पूर्ति दोनों ही आचार्यों ने की है। पाणिनि का सूत्र है– ''गाङ् लिटि'' (अ० २।४।४९)। व्याख्या– कारों ने अद्यतनी – क्रियातिपत्ति विभक्तियों में वैकल्पिक 'गी' आदेश स्वीकार कर 'अध्यगीष्ट, अध्यैष्ट' आदि शब्दरूप सिद्ध किए हैं।

### [विशेष वचन]

१. अद्यतनीक्रियातिपत्त्योर्वा गीरादेश इष्यते (दु० वृ०)।
२. इनि संश्चणोर्गायतेरध्ययनेऽपि वृत्तिः (दु० वृ०)।
३. उच्चार्यतेऽभिधानात्, आचार्येणेति भावः (दु० टी०)।

## [रूपसिद्धि]

१. **अधिजगे**। अधि + इङ् + परोक्षा – ए। 'अधि' उपसर्गपूर्वक 'इङ् अध्ययने' (२। ५६) धातु से परोक्षाविभक्तिसंज्ञक आत्मनेपद – प्रथमपुरुष – एकवचन 'ए' प्रत्यय, प्रकृत सूत्र से 'इङ्' को 'गा' आदेश, द्विर्वचन, अभ्याससंज्ञा, ह्रस्व तथा गकार को जकारादेश।

२. **अधिजगाते**। अधि + इङ् + परोक्षा – आते। 'अधि' उपसर्गपूर्वक 'इङ् अध्ययने' (२। ५६) धातु से परोक्षासंज्ञक 'आते प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

३. **अधिजगिरे**। अधि + इङ् + परोक्षा – इरे। 'अधि' उपसर्गपूर्वक 'इङ्' धातु से परोक्षासंज्ञक प्रथमपुरुष–बहुवचन 'इरे' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ६२४।

## ६२५. सनीणिङोर्गमिः [३। ४। ८५]

## [सूत्रार्थ]

'सन्' प्रत्यय के परे रहते 'इण् – इङ्' धातुओं के स्थान में 'गमि' आदेश होता है।। ६२५।

## [दु० वृ०]

सनि परे इणिङोर्गमिरादेशो भवति। ग्रामं जिगमिषति, वेदान् अधिजिगांसते। गम्लृ बोधने सनि नाभिधीयते चेत् तथायमपि। अर्थान् प्रतीषिषति। **'इट् इ गतौ'** (१। १०२) बोधनेऽपि दृश्यते – गमयति। गमिनैव सिद्धम्। अर्थान् प्रत्याययति, शास्त्रमध्यापयतीति भवितव्यमेव।। ६२५।

## [दु० टी०]

सनि०। **पर**स्त्वाह – अबोधने (अज्ञाने) गमिरादेश इति, तच्च विशेषणम् इण एव, इङः इकश्चासम्भवाद् अव्यभिचाराच्चेति। तर्हि **'गम्लृ सृप्लृ गतौ'** (१। २७९) इत्यस्य सनि केन वार्यते, विशेषणबलाच्चेति न वक्तव्यम् **अभिधानमेव** युक्तम्, तथा प्रतीतेरित्याह-गम्लृ इत्यादि। तथायमपीति। **'इण् गतौ'** (२। १३) इत्यपि नाभिधीयते इत्यर्थः। कथम् अर्थान् प्रतीषिषतीत्याह – इट् इत्यादि। तथा इणिकोरबोधने कारिते गमिरादेशो न वक्तव्य इत्याह – गमयतीत्यादि। किञ्च बोधनेऽपि दृश्यते गमिः – गम्यतेऽर्थः, गमयन्ति अर्थान् शब्दाः इति।। ६२५।

## [वि० प०]

सनी०। जिगमिषतीति। **''से गमः परस्मै''** (३। ७। ६) इतीट्। अधिजिगांसते इति। **''हनिङ्गमोरुपधायाः''** (३। ८। १३) इति दीर्घः। इकोऽपीत्युक्तोऽस्य **समाधिः**। **कश्चिद्** आह – इणो धातोरबोधने गमिरादेश इति। तेनेह न भवति – अर्थान् प्रतीषिषतीति। अत्र पुनर्बोधनेऽपि अश्नोति विशेषाभावादिति। परस्य चोद्यमानस्य समानत्वमापादयति – बोधने मा भूद् इणो गमिरादेशः। यस्तु **'गम्लृ सृप्लृ गतौ'** (१।

२७९) इति, तस्य बोधने प्रयोगः, स केन निवार्यते, तेन चाबोधने इति विशेषणेनेति वक्तव्यम् – अर्थान् प्रतीषिषतीति प्रयोगसिद्धौ चरितार्थस्य धात्वन्तरनिवारणे सामर्थ्यविरहात्। अतोऽनभिधानमेव युक्तम्, तथा प्रतीतेः। न हि जिगमिषतीत्युक्ते बोधनमभिधीयते। यदि चानभिधानं ब्रूयात्, तदा अत्रापि समानमित्याह-गम्लृ बोधने इत्यादि। अयमपीति। इण्धातुरपि सनि बोधने नात्राभिधीयते, तत् कथं **बोधने** गमिरादेशः प्राप्नोतीति पर्यनुयोगो नास्माकमित्यर्थः। अर्थान् प्रतीषिषतीत्ययं पुनर्नेणः प्रयोगः, किन्तर्हि अन्यस्यैवेत्याह– अर्थानित्यादि। तथा इणिकोरप्यबोधने **कारिते** गमिरादेशो न वक्तव्यः। यदाह **''णौ गमिरबोधने''** (अ० २। ४। ४६) इति **दर्शयति** – गमयतीत्यादि। आदेशविधानाभावात् परस्य प्रत्युदाहरणमिह न्यायसिद्धमिति **दर्शयन्नाह** – अर्थानित्यादि। इणिकोरिह कारिते वृद्धिः। किञ्च बोधनेऽपि गमिरिह दृश्यते। यथा अर्थान् गमयन्ति शब्दा इति नास्ति व्यावृत्तिः (परमत)।। ६२५।

## [बि० टी०]

सनीणिङो०। ननु **''इणो गमिरबोधने''** (अ० २। ४। ४६) इति परः, अबोधने इणो गमिरादेशो भवति। **भवन्मते** कथमित्याह – गम्लृ बोधने इति। तथायमपीति। अयमिण्धातुरित्यर्थः। ननु इण्धातोः सन् विधीयते इत्युक्तम्, तदा कथम् अर्थान् प्रतीषिषति ? सत्यम्। **'इट् इ गतौ'** (१। १०२) इति। तर्हि अर्थभेद इत्याह – बोधनेऽपीति। आदादिके अन्विधानाभावात् कथमुक्तम्।। ६२५।

## [समीक्षा]

'एतुमिच्छति' इस अर्थ में 'इण्' धातु से 'जिगमिषति' इत्यादि तथा 'अध्येतुमिच्छति' इस अर्थ में 'इङ्' धातु से 'अधिजिगांसते' इत्यादि शब्दरूपों के सिद्ध्यर्थ 'इण् – इङ्' धातुओं के स्थान में 'गमि' आदेश की अपेक्षा होती है, इसकी पूर्ति दोनों ही आचार्यों ने की है। पाणिनि के दो सूत्र हैं– ''सनि च, इङश्च'' (अ० २। ४। ४७–४८)। ''णौ गमिरबोधने'' (अ० २। ४। ४६) से पाणिनि ने जो 'अबोधन' अर्थ में इण् धातु को 'गमि' आदेश करके 'गमयति' आदि शब्द सिद्ध किए हैं, उस पर कातन्त्रव्याख्याकारों का वक्तव्य है कि 'गम्यतेऽर्थः, गमयन्ति शब्दाः अर्थान्' आदि वचनों में बोधन अर्थ उपलब्ध होता है और तदर्थक प्रयोग 'गम्लृ गतौ' धातु से ही सिद्ध हो जाते हैं। अतः उस प्रकार के सूत्र बनाने की कोई आवश्यकता नहीं है– ''इणिकोरबोधने कारिते गमिरादेशो न वक्तव्यः - - - - - बोधनेऽपि दृश्यते गमिः– गम्यतेऽर्थः, गमयन्त्यर्थान् शब्दाः इति'' (दु० टी०)। ''ननु इणो गमिरबोधने इति परः, अबोधने इणो गमिरादेशो भवति। भवन्मते कथमित्याह–गम्लृ बोधने इति'' (बि० टी०)।

## [विशेष वचन]

१. **इट् इ गतौ बोधनेऽपि दृश्यते–गमयति, गमिनैव** सिद्धम् (दु० वृ०)।

२. अभिधानमेव युक्तम्, तथा प्रतीतेः (दु० टी०)।

३. आदेशविधानाभावात् परस्य प्रत्युदाहरणमिह न्यायसिद्धमिति दर्शयन्नाह अर्थानित्यादि (वि० प०)।

## [रूपसिद्धि]

१. **ग्रामं जिगमिषति**। इण् + सन् + ति। एतुमिच्छति। 'इण् गतौ' (२। १३) धातु से इच्छा अर्थ में "धातोर्वा तुमन्तादच्छितिनैककर्तृकात्" (३। २। ४) सूत्र द्वारा सन् प्रत्यय, न् अनुबन्ध का प्रयोगाभाव, प्रकृत सूत्र से इण् को गम् आदेश, "से गमः परस्मै" (३। ७। ६) से इडागम, "चण्परोक्षाचेक्रीयितसनन्तेषु" (३। ३। ७) से 'गम्' को द्विर्वचन, "पूर्वोऽभ्यासः" (३। ३। ४) से पूर्ववर्ती 'गम्' की अभ्याससंज्ञा, आदि व्यञ्जन का शेष, "सन्यवर्णस्य" (३। ३। २६) से अकार को इकार, "कवर्गस्य चवर्गः" (३। ३। १३) से गकार को जकार, "नामिकरपरः प्रत्ययविकारागमस्थः सिः षं नुविसर्जनीयषान्तरोऽपि" (२। ४। ४८) से सकार को षकार, "ते धातवः" (३। २। १६) से 'जिगमिष' की धातुसंज्ञा तथा विभक्तिकार्य।

२. **वेदान् अधिजिगांसते**। अधि + इङ् + सन् + ते। अध्येतुमिच्छति। **'अधि'** उपसर्गपूर्वक 'इङ् अध्ययने' (२। ५६) धातु से सन् प्रत्यय, प्रकृत सूत्र से गम् **आदेश**, द्विर्वचनादि, "हनिङ्गमोरुपधायाः" से दीर्घ, म् को अनुस्वार, परसवर्ण, **'अधिजिगांस'** की धातुसंज्ञा तथा विभक्तिकार्य।। ६२५।

## ६२६. अस्तेर्भूरसार्वधातुके [३। ४। ८६]

## [सूत्रार्थ]

सार्वधातुकसंज्ञा से भिन्न (असार्वधातुक) विषय में 'अस्' धातु को 'भू' आदेश होता है।। ६२६।

## [दु० वृ०]

अस्तेर्भूरादेशो भवति असार्वधातुकविषये। भविता, भूतः। भव्यम्, **"स्वराद् यः"** (४। २। १०)। तिप्रा निर्देशः किम् ? असिता।। ६२६।

## [दु० टी०]

अस्ते०। **लोके व्याकरणे** च निमित्तनैमित्तिकयोः पौर्वापर्यं दृष्टम्; यथा बीजाङ्कुरयोः। **"सनानः सवर्णे दीर्घीभवति"** (१। २। १) इति दीर्घात् सवर्णस्य पूर्वत्व (परत्व) मेव, **तस्माद्** असार्वधातुके निमित्ते भूरादेशो विधीयमानः प्रकृत्यवस्थायामेव युक्तस्तस्मिन् परतः प्राप्नोति, भव्यमिति न सिध्यति। व्यञ्जनान्तत्वाद् ण्यर्णि कृते तेन भाव्यम्, तथा **प्रवेयमिति**। अजेर्वीभाव आख्येय इति चक्षिङः ख्याञादेशे **नैष दोषः, सामान्याश्रयत्वादिति**। **असार्वधातुकसामान्यं ण्यणादिप्रत्ययस्यापि** गम्यते, **यतोऽभिहिताद् यदर्थप्रतीतिः, स तस्यार्थ इति न्याय्यम्। असार्वधातु**कशब्दाच्च **सामान्यमेव गम्यते**, न तु विशेषा ण्यणादयः **सामान्यविशेषयोश्च परस्परविरोधात्**। यथा विशेषाश्रयणे सामान्यं नाश्रीयते

**''घ्यणावश्यके''** (४। ६। ५९) इति। तथा सामान्याश्रयेऽपि न विशेषाश्रय: इति। अत्र प्रथममेव बुद्ध्या निरूप्य सार्वधातुकसामान्यमादेशा: क्रियन्ते, कृतेषु च तेषु तत्सामान्या-- भिव्यक्तयेऽनुरूपां व्यक्तिं प्रयुञ्जते। भ्वादेशो यां व्यक्तिम्, वच्यादेशो घ्यण्व्यक्तिमिति प्रतिषेधस्तु सनिमित्तक: सार्वधातुकापेक्षत्वात्। 'अस्ति, स्त:, सन्ति' इत्यादेशो न भवतीत्यर्थ:।

सामान्यस्य पौर्वापर्यमिति विषयसप्तमीयमुच्यते, विषयश्चानन्यभाव इति। यथा मत्स्यानां जलं विषय इति, भावि निमित्तं वा। यथा 'युद्धविषये सन्नह्यति'। भाविनि युद्धे सन्नह्यतीत्यर्थ इति। तथात्राप्यनुत्पन्न एवासार्वधातुके भूप्रभृतय आदेशा:। पश्चाद् यथासम्भवं प्रत्ययोत्पत्तिरिति। प्रत्यय: परश्चेति नियम: प्रयोगशब्दानाम्, न तु लक्षणशब्दानाम्। तथाहि भूप्रभृतय: केवला एव गणेषु पठ्यन्ते तथा लिङ्गानि चेति। इयं कार्यशब्ददर्शने युक्तिरुक्ता नित्यशब्ददर्शनेऽप्युच्यते असार्वधातुकविषया भव्यवाच्य-- प्रभृतिशब्दसंहतय उपचारादसार्वधातुकशब्देनाभिधीयन्ते तासु बालव्युत्पत्त्यर्थ-- मन्वाख्यायमाना: स्वरेखाङ्किता भूवचिप्रभृतय: आदेशा: कर्तव्या:। अत एवोच्यते **द्विधा नित्यता – परमार्थनित्यता, व्यवहारनित्यता च**। अस्ते: प्रयोगनिवृत्त्यर्थं वचनमिदम्।। ६२६।

## [वि० प०]

अस्ते:। **''स्वराद् य:''** (४। २। १०) इत्यनेन 'असार्वधातुके' इति विषयसप्तम्या: फलं दर्शितम्। तथाहि बुद्धिस्थे प्रत्यये भूरादेशस्तत: स्वरान्तत्वाद् यप्रत्यय: इति। एवं च सति भव्यमिति सिध्यति, तथोत्तरत्रापि।। ६२६।

## [बि० टी०]

अस्ते:। ननु किमर्थमिदम् 'भविता, भवितव्यम्' इति भूधातुना सिध्यति? सत्यम्। अस्ते: **प्रयोगनिरासार्थं लाघवार्थ**मविकरणे इति न कृतम्, अस्तिब्रूचक्षिङां विकरणस्य स्थितेरभावात् तद्विषयात् कल्पनीयं स्यात्, सार्वधातुकविषयत्वमेव युक्तम्।। ६२६।

## [समीक्षा]

'अस्' धातु से 'भविता, भूत:' आदि प्रयोगों के सिद्ध्यर्थ 'भू' आदेश की अपेक्षा को दोनों ही आचार्यों ने पूर्ण किया है। पाणिनि का सूत्र है– ''अस्तेर्भू:'' (अ० २। ४। ५२)। पाणिनि ने सार्वधातुक से भिन्न आर्धधातुक संज्ञा की है और उसका ''आर्धधातुके'' (अ० २। ४। ३५) सूत्र द्वारा अधिकार निश्चित किया है। इसी अधिकार के अन्तर्गत 'भू' आदि अपेक्षित आदेशों का विधान है। कातन्त्रकार सार्वधातुक से भिन्न प्रत्ययों के लिए 'असार्वधातुक' संज्ञा का प्रयोग करते हैं। सूत्र में 'अस्ति' का पाठ किया गया है, अत: अदादिगणपठित ही 'अस्' को 'भू' आदेश होता है, 'अस दीप्त्यादानयोश्च'' (१। ५७२) इस भ्वादिगणपठित धातु को नहीं। अत: उससे 'भविता' रूप सिद्ध न होकर 'असिता' ही रूप सिद्ध होता है।

## [विशेष वचन]

१. लोके व्याकरणे च निमित्तनैमित्तकयोः पौर्वापर्यं दृष्टम् (दु० टी०)।
२. अभिहिताद् यदर्थप्रतीतिः स तस्यार्थ इति न्याय्यम् (दु० टी०)।
३. सामान्यविशेषयोश्च परस्परविरोधात् (दु० टी०)।
४. प्रत्ययः परश्चेति नियमः प्रयोगशब्दानां न तु लक्षणशब्दानाम् (दु० टी०)।
५. द्विधा नित्यता – परमार्थनित्यता व्यवहारनित्यता च (दु० टी०)।

## [रूपसिद्धि]

१. **भविता**। अस् + इट् + पञ्चमी – ता। 'अस् भुवि' (२। २८) धातु से पञ्चमीविभक्तिसंज्ञक परस्मैपद – प्रथमपुरुष – एकवचन 'ता' प्रत्यय, प्रकृत सूत्र से अस् को 'भू' आदेश, ''इडागमोऽसार्वधातुकस्यादिर्व्यञ्जनादेरयकारादेः'' (३। ७। १) से इडागम, ''नाम्यन्तयोर्धातुविकरणयोर्गुणः'' (३। ५। १) से भूधातुघटित ऊकार को गुण तथा ''ओ अव्'' (१। २।१४) से ओकार को अवादेश।

२. **भूतः**। अस् + क्त + सि। 'अस् भुवि' (२। २८) धातु से ''निष्ठा'' (४। ३। ९३) सूत्र द्वारा निष्ठासंज्ञक 'क्त' प्रत्यय, 'क' अनुबन्ध का प्रयोगाभाव, अस् को भू – आदेश, ''के यण्वच्च योक्तवर्जम्'' (४। १। ७) से यण्वद्भाव, ''न णकारानुबन्धा– चेक्रीयितयोः'' (३। ५। ७) से अगुण, 'भूत' शब्द की ''धातुविभक्तिवर्जमर्थवल्लिङ्गम्'' (२। १। १) से लिङ्गसंज्ञा, सि–प्रत्यय तथा ''रेफसोर्विसर्जनीयः'' (२। ३। ६३) से सकार को विसर्गादेश।

३. **भव्यम्**। अस् + य + सि। 'अस्' धातु से ''स्वराद् यः'' (४। २। १०) सूत्र द्वारा 'य' प्रत्यय, प्रकृत सूत्र से 'अस्' को 'भू' आदेश, भू – धातुघटित ऊकार को गुण, ''ओदौद्भ्यां कृद् यः स्वरवत्'' (४। १।३१) से 'य' प्रत्यय को स्वरवद्भाव तथा ''ओ अव्'' (१। २। १४) से अवादेश, 'भव्य' शब्द की लिङ्गसंज्ञा, सि–प्रत्यय तथा उसको ''अकारादसंबुद्धौ मुश्च'' (२। २। ७) से 'मु' आदेश।। ६२६।

## ६२७. ब्रुवो वचिः [३। ४। ८७]

## [सूत्रार्थ]

असार्वधातुक प्रत्यय के परे रहते 'ब्रू' धातु को 'वचि' आदेश होता है।। ६२७।

## [दु० वृ०]

ब्रुवो धातोर्वचिरादेशो भवति असार्वधातुकविषये। वक्ता, वक्ष्यति। वाच्यम्– **''ऋवर्णव्यञ्जनान्ताद् घ्यण्''** (४। २। २५)।। ६२७।

## [दु० टी०]

ब्रुवः। ब्रुवः प्रयोगनिवृत्त्यर्थं वचनम् आत्मनेपदार्थं च। **इकार इहोच्चारणार्थ एव**।। ६२७।

## [समीक्षा]

'ब्रूञ् व्यक्तायां वाचि' (२। ६६) धातु से असार्वधातुक 'ता, स्यति, घ्यण्' आदि प्रत्ययों में 'वक्ता, वक्ष्यति, वाच्यम्' आदि शब्दरूपों के सिद्ध्यर्थ दोनों ही आचार्यों ने 'वच्' आदेश किया है। पाणिनि का भी यही सूत्र है– ''ब्रुवो वचिः'' (अ० २। ४। ५३)। 'ऊचे, वक्ष्यते' आदि आत्मनेपद में यह आदेश प्रवृत्त होता है। 'वचि' आदेश में 'इकार' को उच्चारणार्थ पढ़ा गया है– ''इकार इहोच्चारणार्थ एव'' (दु० टी०)।

## [रूपसिद्धि]

१. **वक्ता**। ब्रू + श्वस्तनी – ता। 'ब्रूञ् व्यक्तायां वाचि' (२। ६६) धातु से श्वस्तनीविभक्तिसंज्ञक परस्मैपद – प्रथमपुरुष – एकवचन 'ता' प्रत्यय, प्रकृत सूत्र से 'ब्रू' को 'वच्' आदेश, ''पचिवचिसिचिरिचिमुचेश्चात्'' (३। ७। १८) से इडागम का निषेध तथा ''चवर्गस्य किरसवर्णे (३। ६। ५५) से चकार को ककारादेश।

२. **वक्ष्यति**। ब्रू + भविष्यन्ती – स्यति। 'ब्रूञ् व्यक्तायां वाचि' (२।६६) धातु से भविष्यन्तीसंज्ञक परस्मैपद – प्रथमपुरुष–एकवचन 'स्यति' प्रत्यय, प्रकृत सूत्र से 'ब्रू' को 'वच्' आदेश, चकार को ककारादेश तथा ''नामिकरपरः प्रत्ययविकारागमस्थः सिः षं नुविसर्जनीयषान्तरोऽपि'' (२। ४। ४७) से 'स्यति' प्रत्ययघटित सकार को षकार, 'क् + ष्' संयोग से 'क्ष्'।

३. **वाच्यम्**। ब्रू + घ्यण्। 'ब्रूञ् व्यक्तायां वाचि' (२। ६६) धातु से ''ऋवर्णव्यञ्जनान्ताद् घ्यण्'' (४। २। ३५) से 'घ्यण्' प्रत्यय, 'घ् – ण्' अनुबन्धों का प्रयोगाभाव, प्रकृत सूत्र से 'वच्' आदेश, ''सिद्धिरिज्वद् ज्ञानुबन्धे'' (४। १। १) से इज्वद्भाव, ''अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिचट्सु'' (३। ६। ५) से उपधासंज्ञक अकार को दीर्घ आदेश, 'वाच्य' शब्द की लिङ्गसंज्ञा तथा विभक्तिकार्य।। ६२७।

## ६२८. चक्षिङः ख्याञ् [३। ४। ८८]

## [सूत्रार्थ]

असार्वधातुक प्रत्यय के परे रहते 'चक्षिङ्' धातु को 'ख्याञ्' आदेश होता है।। ६२८।

## [दु० वृ०]

चक्षिङः ख्याञादेशो भवति असावधातुकविषये। आख्याता, आख्यास्यति, आख्यास्यते। ञनुबन्धत्वादुभयपदम्। आख्येयम्। **''आत्खनो रिच्च''** १४।३।१२) इति यः। कथं 'संचक्ष्यो दुर्जनः'। वर्जनीय इत्यर्थः। नृचक्षा राक्षसः। असुन् औणादिकत्वात्। विचक्षणो **विद्वान् लोकतः सिद्धः**।। ६२८।

## [दु० टी०]

चक्षि०। चक्षिङ् आत्मनेपदीत्याह–ञनुबन्धत्वादुभयपदम् इति। तस्मात् **'ख्या**

**प्रकथने'** (२।२४) इत्यनेन न सिध्यति चक्षिङः प्रयोगश्च प्राप्नोति ख्यादिस्तावदयमादेशः क्ष्यादिरपीष्यते। **कैश्चिद्** आक्ष्याता, आक्ष्यातुम्। 'संचक्ष्यः' इति व्यञ्जनान्तत्वाद् घ्यण्, वर्जनेऽत्र धातुर्वर्तते। 'नृन् चष्टे' इति हिंसायामत्र धातुः, अन्यत्र विचष्टे इति विचक्षणः **''कृत्ययुटोऽन्यत्रापि''** (४।५।९२) इति कर्तरि युट्। बोधनेऽत्र धातुर्वर्तते इति।। ६२८।

## [समीक्षा]

'चक्षिङ्' धातु से असार्वधातुक 'ता–स्यति' आदि प्रत्ययों में 'आख्याता, आख्यास्यति, आख्यास्यते' आदि शब्दरूपों के सिद्ध्यर्थ दोनों ही आचार्यों ने 'ख्याञ्' आदेश का विधान किया है। पाणिनि का भी यही सूत्र है – ''चक्षिङः ख्याञ्'' (अ० २।४।५४)। यह ज्ञातव्य है कि 'चक्षिङ्' धातु ङानुबन्ध होने से आत्मनेपदी है ''कर्तरि रुचादिङानुबन्धेभ्यः'' (३।२।४२), परन्तु यहाँ उभयपदी अभीष्ट होने से 'ख्याञ्' आदेश में ञकारानुबन्ध किया गया है – ''इन्ञ्यजादेरुभयम्'' (३।२।४५)। इसके फलस्वरूप 'आख्यास्यति, आख्यास्यते' आदि रूप उभयपदों में सिद्ध होते हैं। किन्हीं विद्वानों के मतानुसार 'क्ष्या' आदेश होता है, अतः 'आक्ष्याता, आक्ष्यातुम्' शब्दरूप भी साधु माने जाते हैं।

## [विशेष वचन]

१. कथं संचक्ष्यो दुर्जनः, वर्जनीय इत्यर्थः (दु० वृ०)।

२. विचक्षणो विद्वान् लोकतः सिद्धः (दु० वृ०)।

३. संचक्ष्यः इति। ..... वर्जनेऽत्र धातुर्वर्तते (दु० टी०)।

४. नृन् चष्टे (नृचक्षा) इति हिंसायामत्र धातुः (दु० टी०)।

५. विचष्टे इति विचक्षणः ..... बोधनेऽत्र धातुर्वर्तते इति (दु० टी०)।

## [रूपसिद्धि]

१. **आख्याता**। आ + चक्षिङ् + श्वस्तनी–ता। 'आङ्' उपसर्गपूर्वक 'चक्षिङ् व्यक्तायां वाचि' (२।४१) धातु से श्वस्तनीसंज्ञक प्रथमपुरुष–एकवचन 'ता' प्रत्यय, प्रकृत सूत्र से 'ख्या' आदेश, 'ञ्' अनुबन्ध का प्रयोगाभाव तथा ''अनिडेकस्वरादातः'' (३। ७। १३) से इडागम का अभाव।

२. **आख्यास्यति, आख्यास्यते**। आ + चक्षिङ् + स्यति। 'आङ्' उपसर्गपूर्वक भविष्यन्तीसंज्ञक प्रथमपुरुष–एकवचन 'स्यति' प्रत्यय, प्रकृत सूत्र से 'ख्या' आदेश। आत्मनेपदसंज्ञक 'ते' प्रत्यय में 'आख्यास्यते' रूप।। ६२८।

# ६२९. वा परोक्षायाम् [३।४।८९]

## [सूत्रार्थ]

परोक्षाविभक्तिसंज्ञक प्रत्यय के परे रहते 'चक्षिङ्' के स्थान में 'ख्याञ्' आदेश विकल्प से होता है।। ६२९।

## [दु० वृ०]

चक्षिङः परोक्षायां ख्याञादेशो भवति वा। आचख्ये, आचख्यौ, आचचक्षे।। ६२९।

## [दु० टी०]

वा परो०। पूर्वेण नित्ये प्राप्ते विभाषेयमुच्यते।। ६२९।

## [समीक्षा]

'चक्षिङ्' धातु से परोक्षाविभक्ति में 'आचख्ये, आचख्यौ' आदि शब्दरूपों के सिद्ध्यर्थ दोनों ही आचार्यों ने वैकल्पिक ख्याञ् आदेश का विधान किया है। पाणिनि का सूत्र है – ''वा लिटि'' (अ० २।४।५५)। यह ज्ञातव्य है कि 'ख्याञ्' आदेश के अनुबन्ध होने से परस्मैपद तथा आत्मनेपद दोनों में ही रूप बनेंगे, जबकि 'चक्षिङ्' धातु ङकारानुबन्धविशिष्ट है, अतः उससे केवल आत्मनेपद में रूप बनेंगे।

## [रूपसिद्धि]

१. **आचख्ये**। आङ् + चक्षिङ् + ए। 'आङ्' उपसर्गपूर्वक 'चक्षिङ् व्यक्तायां वाचि' (२।४१) धातु से परोक्षासंज्ञक आत्मनेपद–प्रथमपुरुष–एकवचन 'ए' प्रत्यय, प्रकृत सूत्र से 'ख्याञ्' आदेश, ञ्-अनुबन्ध का प्रयोगाभाव, द्विर्वचन, अभ्याससंज्ञा, आदिव्यञ्जन का शेष, ह्रस्व, ख् को क्, ''कवर्गस्य चवर्गः'' (३।३।१३) से क् को च् तथा धातुगत आकार का लोप।

२. **आचख्यौ**। आङ् + चक्षिङ् + अट्। 'आङ्' उपसर्गपूर्वक 'चक्षिङ्' धातु से परोक्षासंज्ञक परस्मैपद–प्रथमपुरुष–एकवचन 'अट्' प्रत्यय, 'ख्या' आदेश, द्विर्वचनादि, ''आकारादट औ'' (३।५।४१) से अट् के स्थान में औ तथा ''मध्यक्षरे च'' (३।६।३८) से धातुगत आकार का लोप।

३. **आचक्षे**। आ + चक्षिङ् + ए। 'आङ्' उपसर्गपूर्वक 'चक्षिङ्' धातु से परोक्षासंज्ञक 'ए' प्रत्यय तथा ख्याञादेश के अभाव में 'चक्ष्' को द्विर्वचनादि।। ६२९।

# ६३०. अजेर्वीः [३।४।९०]

## [सूत्रार्थ]

असार्वधातुक प्रत्यय के परे रहने पर 'अज' धातु को 'वी' आदेश होता है।। ६३०।

## [दु० वृ०]

अजेर्वीरादेशो भवत्यसार्वधातुकविषये। विव्यतुः, विव्युः, दर्पणोऽयम्, वीतः, वीतवान्। व्यञ्जनादौ वेति **केचित्** – प्राजिता, प्रवेता। प्राजिष्यते, प्रवेष्यते। प्राजितुम्, प्रवेतुम्। घञल्क्यप्सु च न स्यात् – समाजः, उदजः, समज्या। प्राजनो दण्डः, प्रवयणो दण्डः इति च। वाधिकारा**दियमिष्टसिद्धि**रिति।। ६३०।

## [दु० टी०]

अजे०। 'समाजः' इति घञ्। 'उदजः' इति ''**समुदोरजः पशुषु**'' (४।५।५१)

इत्यल्। 'समज्या' इति **''समजासनिसदिनिपतिशीङ्सुविद्यटिचरिमनिभृञिणां संज्ञायाम्''** (४।५।७६) इति क्यप्। युट्प्रत्यये च विभाषेति गुणोत्कर्षभावेन **व्यवस्थितविभाषा**–माह–**वैचित्र्यार्थम्**।। ६३०।

## [वि० प०]

अजे०। घञित्यादि। 'समाजः' इति भावे घञ्। 'उदजः' इति ''समुदोरजः पशुषु'' (४।५।५१) इत्यल्। 'समज्या' इति। ''समजासनि०'' (४।५।७६) इत्यादिना क्यप्।। ६३०।

## [समीक्षा]

'अज्' धातु से 'अतुस्, उस्, अनीय, क्त, क्तवन्तु' आदि प्रत्ययों में 'विव्यतुः, वयनीयम्, वीतवान्' आदि शब्दरूपों के सिद्ध्यर्थ दोनों ही आचार्यों ने सूत्र बनाए हैं। पाणिनि का सूत्र है – ''अजेर्व्यघञपोः'' (अ० २।४।५६)। पाणिनि ने 'अघञपोः' शब्द का सूत्र में ही पाठ किया है, तदनुसार 'समाजः, समजः' आदि शब्दों में 'वी' आदेश प्रवृत्त नहीं होता। कातन्त्रसूत्रकार ने सूत्र में यह पाठ नहीं किया है, अतः वृत्तिकार दुर्गसिंह ने वृत्ति में कहा है – 'घञल्क्यप्सु च न स्यात्'। यह ज्ञातव्य है कि पाणिनि ने 'क्यप्' प्रत्यय का पाठ नहीं किया है, अतः वृत्तिकार को उसकी पूर्ति करनी पड़ी है – 'घञपोः प्रतिषेधे क्यप उपसंख्यानम्'' (काशिका० २।४।५६–वा०)। अतः 'समज्या' में भी विहित आदेश नहीं होता है।

## [विशेष वचन]

१. वाधिकारादियमिष्टसिद्धिः (दु० वृ०)।

२. व्यवस्थितविभाषामाह–वैचित्र्यार्थम् (दु० टी०)।

## [रूपसिद्धि]

१. **विव्यतुः**। अज् + परोक्षा–अतुस्। 'अज क्षेपणे च'' (१।६४) धातु से परोक्षाविभक्तिसंज्ञक परस्मैपद–प्रथमपुरुष–द्विवचन 'अतुस्' प्रत्यय, प्रकृत सूत्र से 'अज्' को 'वी' आदेश, द्विर्वचन, अभ्याससंज्ञा, ह्रस्व, ''य इवर्णस्यासंयोगपूर्वस्यानेकाक्ष–रस्य'' (३।४।५८) से अभ्याससंज्ञक वी–घटित ईकार को यकार तथा ''रसकारयोर्विसृष्टः'' (३।८।२) से सकार को विसर्गादेश।

२. **विव्युः**। अज + परोक्षा–उस्। 'अज' धातु से परोक्षासंज्ञक प्रथमपुरुष–बहुवचन 'उस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

३. **वयनीयम्**। अज् + अनीय + सि। 'अज' धातु से 'अनीय' प्रत्यय, प्रकृत सूत्र से 'अज्' को 'वी' आदेश, गुण, अयादेश, 'वयनीय' की लिङ्गसंज्ञा तथा विभक्तिकार्य।

४. **वीतः**। अज् + क्त + सि। 'अज्' धातु से ''निष्ठा'' (४।३।९३) सूत्रद्वारा क्त–प्रत्यय, क्–अनुबन्ध का प्रयोगाभाव, प्रकृत सूत्र से 'वी' आदेश, यण्वद्भाव, अगुण, लिङ्गसंज्ञा तथा विभक्तिकार्य।

५. **वीतवान्**। अज् + क्तवन्तु + सि। 'अज्' धातु से कर्ता अर्थ में क्तवन्तु प्रत्यय, अज् को वी–भाव, लिङ्गसंज्ञा तथा विभक्तिकार्य।।६३०।

## ६३१. अदादेर्लुग् विकरणस्य [३।४।९१]

### [सूत्रार्थ]

अदादिगणपठित धातुओं से होने वाले 'अन्' विकरण का लुक् होता है।। ६३१।

### [दु० वृ०]

अदादेर्गणाद् विकरणस्य लुग् भवति। अत्ति, हन्ति, जुहोति, बिभेति, जुहुत:, बिभीत:। लुग्लोपत्वान्न गुण:। विकरणस्येति किम् ? अघ्नन्। अदाद्यन्तर्गणो जुहोत्यादिरिति।। ६३१।

### [दु० टी०]

अदा०। लुञ्चनं लुक्। 'लुन्च अपनयने' (१।४७), सम्पदादित्वाद् भावे क्विप्। सार्वधातुकं कर्तृत्वार्थस्य साहाय्यायोत्पद्यते। विकरणस्येत्यादि। ''अदादेर्लुगन:'' इति कृते अन्निति किमयं सानुबन्धो निरनुबन्धो वा, ततश्च 'अघ्नन्' इति **''असन्ध्यक्षरयोरस्य तौ तल्लोपश्च''** (३।६।४०) कृते प्राप्नोतीति विप्रतिपद्येत।। ६३१।

### [वि० प०]

अदा०। अघ्नन्निति ह्यस्तन्यन्विकरणस्य लुक्, **''गमहन्०''** (३। ६। ४३) इत्यादि–नोपधालोप:, **''लुप्तोपधस्य च''** (३।६।२९) इति घत्वम्। यदि विकरणग्रहणमपनीय अदादेर्लुगित्युच्यते, तदा किमयं सानुबन्धो निरनुबन्धो वेति संशय:। निरनुबन्धपक्षेऽत्रापि विकरणाकारस्य **''असन्ध्यक्षरयोरस्य तौ तल्लोपश्च''** (३। ६। ४०) इति कृते अन् विद्यते इति स्यात्। सानुबन्धपक्षे सिध्यत्येवाभिमतं विकरणस्यैवान: सानुबन्धत्वात्। केवलम् अत्रांशे निश्चायको नास्तीति विकरणस्येत्युच्यते।। ६३१।

### [बि० टी०]

अदा०। ननु **''अन् विकरण: कर्तरि''** (३।२।३२) इत्यत्र अन्–विकरण: कर्तरि अनदादेरिति क्रियताम्। न च देश्यम्, यादृग्जातीयस्येति न्यायाददादेर्गणवर्जनसादृश्याद् विधिरपि गणे स्यात्। ततो गणपरिपठितधातोरन् स्यात्, न चिकीर्षादे:। यद् वा **''भावादिकर्मणोर्वोदुपधात्''** (४। १। १७) इत्यत्र व्यवस्थितेऽधिकाराद् गुण्यन: स्याद् इत्युक्तम्, तेन 'गुधितम्' इत्यत्र न स्यादिति न सङ्गच्छते। किञ्चायं कृत्प्रकरणानपेक्षित्वाद् कथं सूत्रमिदं **दुर्गवाक्ये दुर्गवाक्य– टीकाकारेष्वेवमाह** – अदादेरनकरणात्। तेनासार्व–धातुककर्तृत्वात् अस्य साहचर्याभावात् कर्तृत्वं नोपपद्यते।। ६३१।

**।। इति श्रीबिल्वेश्वरटीकायामाख्याते तृतीयाध्याये चतुर्थ: सम्प्रसारणपाद: समाप्त:।।**

## [समीक्षा]

गणपठित धातुओं से पाणिनि ने 'शप्' तथा कातन्त्रकार ने 'अन्' यह सामान्य विकरण किया है। प्रक्रिया के अनुसार सभी व्याकरणों में गणपठित धातु तथा आख्यातसंज्ञक प्रत्ययों के मध्य में जिस प्रत्यय का विधान किया जाता है, उसे विकरण कहते हैं – 'प्रकृतिप्रत्ययमध्यपठितत्वं विकरणत्वम्'। इसके साथ ही भ्वादिगणपठित धातुओं में तो सामान्य विकरण सर्वत्र प्रवृत्त होता है और स्वरूपतः उसकी स्थिति भी बनी रहती है, परन्तु 'अदादि' प्रभृति गणों की धातुओं में उसकी प्राप्ति तो होती है, लेकिन उसे बाधकर अन्य विकरण हो जाते हैं। अदादिगण की धातुओं में उसका लुक् ही दोनों आचार्यों ने किया है। पाणिनि का सूत्र है – ''अदिप्रभृतिभ्यः शपः'' (अ० २।४।७२)।

## [रूपसिद्धि]

१. **अत्ति**। अद् + अन्लुक् + वर्तमाना–ति। 'अद भक्षणे' (२। १) धातु से वर्तमानासंज्ञक परस्मैपद प्रथमपुरुष–एकवचन 'ति' प्रत्यय, ''अन् विकरणः कर्तरि'' (३।२।३२) से अन् विकरण, प्रकृत सूत्र से उसका लुक् तथा दकार को तकारादेश।

२. **हन्ति**। हन् + अन्लुक् + वर्तमाना–ति। 'हन् हिंसागत्योः' (२।४) धातु से वर्तमानासंज्ञक 'ति' प्रत्यय, अन् विकरण तथा उसका लुक्।

३. **जुहोति**। हु + अन्लुक् + वर्तमाना – ति। 'हु दाने' (२।६७) धातु से ति–प्रत्यय, अन् विकरण, उसका लुक् ''जुहोत्यादीनां सार्वधातुके'' (३।३।८) से द्विर्वचन, अभ्याससंज्ञा, हकार को जकार तथा धातुघटित उकार को गुणादेश।

४. **बिभेति**। भी + अन्लुक् + वर्तमाना–ति। 'ञि भी भये' (२।६८) धातु से ति–प्रत्यय, अन् विकरण, उसका लुक्, 'भी' को द्विर्वचन, अभ्याससंज्ञा, ह्रस्व, भ् को ब् तथा धातुगत ईकार को गुणादेश।

५. **जुहुतः**। हु + अन्लुक् + वर्तमाना–तस्। 'हु दाने' (२।६७) धातु से वर्तमानासंज्ञक प्रथमपुरुष–द्विवचन 'तस्' प्रत्यय, अन् विकरण, उसका लुक् तथा द्विर्वचनादि।

६. **बिभीतः**। भी + अन्लुक् + वर्तमाना–तस्। 'ञि भी भये' (२।६८) धातु से वर्तमानासंज्ञक 'तस्' प्रत्यय, अन्विकरण, उसका लुक्, द्विर्वचनादि। 'जुहुतः, बिभीतः' में ''लुग्लोपे न प्रत्ययकृतम्'' (३।८।२९) के अनुसार गुणादेश नहीं होता है।। ६३१।

## ६३२. इण्–स्था–दा–पिबति–भूभ्यः सिचः परस्मै [३।४।९२]

## [सूत्रार्थ]

परस्मैपदसंज्ञक प्रत्यय के परे रहते 'इण्, स्था, दा, पा, भू' धातुओं से होने वाले 'सिच्' प्रत्यय का लुक् होता है।। ६३२।

## [दु० वृ०]

इणादिभ्यः परस्य सिचो लुग् भवति परस्मैपदे परतः। अगात्, अध्यगात्, अस्थात्, अदात्, अधात्, अपात्, अभूत्। पिबतेरिति किम् ? **'पा रक्षणे'** (२।२१) – अपासीत्। परस्मा इति किम् ? समस्थिषत, अदिषत, अधिषत। **घ्राशाच्छासाधेटां वा वक्तव्यम्** – अघ्रात्, अघ्रासीत्। अशात्, अशासीत्। अच्छात्, अच्छासीत्। असात्, असासीत्। अधात्, अधासीत्।। ६३२।

**।। इति दौर्गसिंह्यां वृत्तावाख्याते तृतीयाध्याये सम्प्रसारणपादश्चतुर्थः समाप्तः।।**

●

## [दु० टी०]

इण्०। इहापि 'इण्वदिकोऽपि ग्रहणम्' इत्याह—अध्यगादिति। 'दा' इति संज्ञा गृह्यते, देङः आत्मनेपदित्वाद् इहाग्रहणम्। अलुग्विकरणेन भवतिना साहचर्यात् पिबतेर्ग्रहणं भविष्यति, किं तिपा निर्देशेन, **'पै ओ वै शोषणे'** (१।२६१) इत्यस्याप्यग्रहणम्, लाक्षणिकत्वादिति ? सत्यम्, **प्रतिपत्तिरियं गरीयसीति।** घ्राशाच्छासाधेटां वा वक्तव्यम् इति **'घ्रा गन्धोपादाने, शो तनूकरणे, छो छेदने, षो अन्तकर्मणि, धेट् पा पाने'** (१।२६५; ३।१९, २०, २१; १।२६४), दासंज्ञकत्वान्नित्ये प्राप्ते विभाषेयम्। वक्तव्यं व्याख्येयमिति **केचिन्नित्यं केचिद्** विभाषेयं स्मरन्ति, तदनेन वाक्येनाविर्भावितमिति भावः। तनादीनां तथासोर्नलोपमिच्छन्त्येके, तेषां **''ह्रस्वाच्चानिटः''** (३।६।५२) इति सिचो लोपो भवति। थासा सहचरितस्तशब्दोऽप्येकवचनमेव गृह्यते, तनादयः आगणान्तात्। अतत, अतथाः। असत, असथाः। **केचित्** सनोतेर्लुकं सिचं कृत्वा आत्वमिच्छन्ति। असात, असाथाः। अतनिष्ट, अतनिष्ठाः। असनिष्ट, असनिष्ठाः।। ६३२।

**।। इति दुर्गसिंहविरचितायां कातन्त्रवृत्तिटीकायामाख्याते तृतीयाध्याये चतुर्थः सम्प्रसारणपादः समाप्तः।।**

●

## [वि० प०]

इण्०। अत्रापि 'इण्वदिकोऽपि भवति' इत्याह—अध्यगादिति। अपासीदिति सिचि परे **''यमिरमिनम्यादन्तानां सिरन्तश्च''** (३।७।१०) इति इट्। **''इटश्चेटि''** (३।६।५३) इति सिचो लोपः, समानदीर्घत्वम्। 'समस्थिषत, अदिषत' इत्यादि। **''समवप्रविभ्यः''** (३। २। ४२–१४) इति रुचादित्वात् तिष्ठतेर्ददातेश्च ञनुबन्धत्वादात्मनेपदम्, अन्त, सिच्, ''स्थादोरिरद्यतन्यामात्मने'' (३।५।२९) इत्यनेन इकारः, **''आत्मने चानकारात्''** (३।५।३९) इति नलोपः, ''घ्राशा०'' इत्यादिना सिचः स्थितिपक्षे **''यमिरमिनम्यादन्तानां सिरन्तश्च''** (३। ७। १०) इति पूर्ववत्। वक्तव्यं व्याख्येयमित्याह – **केचिदिच्छन्ति, केचिन्नेच्छन्ति। तन्मतप्रमाणमित्यर्थः।।** ६३२।

**।। इति श्रीमत्त्रिलोचनदासकृतायां कातन्त्रवृत्तिपञ्जिकायाम् आख्याते तृतीयाध्याये सम्प्रसारणपादश्चतुर्थः समाप्तः।।**

●

## [समीक्षा]

'अगात्, अध्यगात्, अदात्, अभूत्' आदि अद्यतनी विभक्ति के शब्दरूपों में ''सिजद्यतन्याम्'' (३।२।२४) से होने वाले 'सिच्' प्रत्यय के लोप की जो अपेक्षा होती है, उसकी पूर्ति दोनों ही आचार्यों ने की है। पाणिनि का सूत्र है – ''गातिस्थाघुपाभूभ्यः सिचः परस्मै'' (अ० २।४।७७)। यह ज्ञातव्य है कि जिन धातुओं की पाणिनि 'घु' यह कृत्रिम संज्ञा करते हैं, कातन्त्रकार ने उनकी 'दा' यह अन्वर्थ संज्ञा की है, तदनुसार ही सूत्रों में यहाँ उनका पाठ किया गया है। पाणिनि के 'गाति–पा' पाठ की अपेक्षा कातन्त्रकार का 'इण्–पिबति' यह पाठ अधिक स्पष्टार्थावबोधक है। 'केचित्, एके' शब्दों से विविध पूर्वाचार्यों के मतों का व्याख्याकारों ने स्मरण किया है।

## [विशेष वचन]

१. इहापि इण्वदिकोऽपि ग्रहणम् इत्याह–अध्यगादिति (दु० टी०, वि० प०)।

२. अलुग्विकरणेन भवतिना साहचर्यात् पिबतेर्ग्रहणं भविष्यति (दु० टी०)।

३. प्रतिपत्तिरियं गरीयसीति (दु० टी०)

४. वक्तव्यं व्याख्येयमिति। केचिन्नित्यं केचिद् विभाषेयं स्मरन्ति, तदनेन वाक्येनाविर्भावितमिति भावः (दु० टी०)।

५. वक्तव्यं व्याख्येयमित्याह – केचिदिच्छन्ति, केचिन्नेच्छन्ति। तन्मतं प्रमाणमित्यर्थः (वि० प०)।

## [रूपसिद्धि]

**१. अगात्।** अट् + इण् + अद्यतनी–दि। 'इण् गतौ' (२। १३) धातु से **अद्यतनीविभक्तिसंज्ञक परस्मैपद**–प्रथमपुरुष–एकवचन 'दि' प्रत्यय, ''अड् धात्वादिर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु'' (३। ८। १६) से धातुपूर्व अडागम, ''सिजद्यतन्याम्'' (३। २। २४) से सिच् प्रत्यय, **''इणो गा''** (३। ४। ८३) से 'इण्' को 'गा' आदेश, ''अनिडेकस्वरादातः'' (३। ७। १३) से अनिट्, प्रकृत सूत्र से 'सिच्' प्रत्यय का लुक् तथा प्रत्ययस्थ दकार को तकारादेश।

**२. अध्यगात्।** अधि + अट् + इक् + अद्यतनी–दि। 'इक् स्मरणे' (२। १२) धातु से अद्यतनीसंज्ञक 'दि' प्रत्यय, अडागम, सिच् प्रत्यय, 'इक्' को 'गा' आदेश, अनिट्, सिच्–लोप तथा 'द्' को 'त्'।

**३. अस्थात्।** अट् + स्था + अद्यतनी–दि। 'ष्ठा गतिनिवृत्तौ' (१।२६७) धातु से 'दि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**४. अदात्।** अट् + दा + अद्यतनी–दि। 'डु दांञ् दाने' (२। ८४) धातु से 'दि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**५. अधात्।** अट् + धा + अद्यतनी–दि। 'डु धाञ् धारणपोषणयोः' (२।८५) धातु से 'दि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**६. अपात्।** अट् + पा + अद्यतनी–दि। 'पा पाने' (१।२६४) धातु से 'दि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**७. अभूत्।** अट् + भू + अद्यतनी–दि। 'भू सत्तायाम्' (१। १) धातु से 'दि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ६३२।

**।। इत्याख्याते तृतीयाध्याये समीक्षात्मकश्चतुर्थः सम्प्रसारणपादः समाप्तः।।**

●

# अथ तृतीये आख्याताध्याये पञ्चमो गुणपादः

## ६३३. नाम्यन्तयोर्धातुविकरणयोर्गुणः [३। ५। १]

### [सूत्रार्थ]

प्रत्यय के पर में रहने पर नाम्यन्त धातु तथा नाम्यन्त विकरण को अन्तरतम गुण आदेश होता है।। ६३३।

### [दु० वृ०]

नाम्यन्तयोर्धातुविकरणयोरन्तरतमो गुणो भवति, अर्थात् प्रत्यये परे। एता, चेता, नेता, स्तोता, भविता, कर्त्ता। सुनोति, तनोति। नाम्यन्तयोरिति किम् ? उम्भिता, क्रीणाति, ग्लायति, म्लायतीत्यैकारोपदेशबलान्न गुणः। नीभ्याम्, लूभ्याम् इति **गौणत्वात्**।। ६३३।

### [दु० टी०]

नाम्य०। ननु विकरणस्य सार्वधातुकनिमित्तत्वात् सार्वधातुके परतो गुणो भवति, धातोस्तु निर्निमित्त एव गुणः स्यात्, 'नामिनः' इति प्रतिषेधादिविषयो विषयसप्तम्योपपद्यते। ''उवर्णादावश्यके घ्यण्'' वचनाद् भूतपूर्वाच्च न विरुध्यते। वक्ष्यमाणेऽपि योगे 'कुण्डिता, विच्छिता' इत्यत्र न गुणप्रसङ्गः, धातूपदेशावस्थायामेव ज्ञापितस्यानुषङ्गस्य नित्यत्वात्। तथा निरपेक्षस्वरूपमात्राश्रितस्य छकारस्य द्विर्भावस्येति, किन्तु 'चेता, स्तोता, कर्ता' इतीट्प्रतिषेधो न स्यात् **'सकृद् बाधितो विधिर्बाधित एव'** (का० परि० ३६) इत्यस्याविषयत्वात्, इवर्णाद् ऋकाराद् उकाराच्च यद् विहितम-सार्वधातुकमिति व्याख्या नोपपद्यते। नात्र बुद्धिकृतव्यापार आश्रीयते **''प्रत्ययः परश्च''** (३। २। १) इति वचनात् सार्वधातुकासार्वधातुकनिमित्त इत्यदोषः। अथवा विकरणः सनिमित्तकस्तत्साहचर्याद् धातुरपि सनिमित्तक एवेति विकरणेन साहचर्याद् धातुरपि सार्वधातुकनिमित्तक एवेति नोच्यते यणादिषु गुणप्रतिषेधात्। नामी अन्ते ययोरिति अन्तग्रहणं विस्पष्टार्थमेव **'येन विधिस्तदन्तस्य''** (का० परि० ३) इति वचनात्। अथ धातु- विकरणाभ्यां नामी विशिष्यते **''नामिनश्चोपधाया लघोः''** (३। ५। २) इति नियमार्थं स्याद् विशेषणविशेष्यभावस्येष्टविषयत्वात्। अत्र अरित्यकारः कण्ठ्यो रेफो मूर्धन्यो वचनादेकदेशेनान्तरतमतया ऋवर्णस्य मूर्धन्यस्य स्थाने प्रवर्तते।

एतेति। **'इण् गतौ'** (२। १३) व्यपदेशिवद्भावेन नाम्यन्तत्वमस्तीति भावः। ननु **''नामिनो गुणवृद्धी''** इति परिभाषैव कथमिह न कृता स्थानान्तरेषु च नामिग्रहणं न विधेयं स्यात् ? सत्यम्। यत्र गुणवृद्धी श्रूयेते तत्र नामिन एव स्थाने वेदितव्ये इति चरितार्थत्वान्नामिनस्तदन्तविधिना **सम्बन्धो** न स्यात्। अथ यत्र गुणवृद्धी श्रूयेते तत्र

नामिन इत्येतदुपस्थितं वेदितव्यम्। तेन च तदन्तविधिर्भविष्यतीति **प्रतिपत्तिरियं गरीयसी** स्यात्। नाम्यन्तस्य गुण इत्युक्ते प्रकरणवशाद् धात्वधिकाराच्च 'पटुता' इति कुतो गुण-प्रसङ्गः, किन्तु विकरणस्येति योगविभागः स्यात्। **'वरमक्षराधिक्यं न पुनर्योगविभागः'** इति युक्तम्। धातुविकरणयोरिति। 'उम्भिता, क्रीणाति' इति भकारस्यौष्ठ्यस्य ओकार ओष्ठ्यः स्यात्। आकारस्य कण्ठ्यस्य एकारः कण्ठ्योऽपि गुणः स्याद् इति नामिग्रहणम्। नीभ्याम्, लूभ्यामिति। यद्यपि क्विबन्तानामपि धातुत्वमस्ति तथापि लिङ्गत्वाभिसंबन्धाद् गौणत्वमिति भावः।। ६३३।

## [वि० प०]

नाम्यन्तयोः। ननु सार्वधातुके विकरणस्य भवतो गुणोऽपि तस्मिन्नेव भवतीति युक्तम्, धातोस्तु नामिनो निर्निमित्त एव गुणः स्यात्। न च वक्तव्यम्। एवं सति यणादिषु गुणप्रतिषेधो व्यर्थः इति तस्य विषयसप्तम्यैवोपपन्नत्वात्। अथ **''उवर्णादावश्यके''** (४।२।३७) इति वचनाद् गुणस्य सनिमित्ततां मन्यते। अन्यथा निरपेक्षस्य गुणे सति उवर्णाभावाद् घ्यण्विधानमनर्थकमिति, तदयुक्तम्। कृतेऽपि गुणे भूतपूर्वगत्या वचनाद् घ्यण् भविष्यतीति? सत्यमेतत्, किन्तु **''इवर्णादश्विश्रिडीङ्शीङः''** (३। ७। १४) इत्यादिनेट्प्रतिषेधोऽनर्थकः स्यात्। तत्र हि इवर्णान्ताद् विहितमसार्वधातुकमनिडिति व्याख्यानं करिष्यति। यदि पुनरिह निरपेक्षो गुणः स्यात्, तदेतन्नोपपद्यते इत्यनर्थकमेवेदं स्यादित्याह — अर्थाद् इत्यादि। अथवा सनिमित्तेन विकरणेन साहचर्याद् धातोरपि सनिमित्तस्यैव गुण इति।

न च वक्तव्यम्, विकरणस्य सार्वधातुकस्यैव निमित्तत्वाद् धातोरपि सार्वधातुकमेव निमित्तमिति यणादिष्वसार्वधातुकेषु प्रतिषेधस्यानर्थक्यप्रसङ्गात्। एवमुत्तरत्रापि सूत्रे इति। [छिदिभिदिरुधिक्रुधीत्यादेरनिड्विधानमनर्थकमिति]। **''अर्पूर्वे द्वे सन्ध्यक्षरे च गुण''** (३।८।३४) इति स्थानेऽन्तरतमतया प्रवर्तते, अत्र अर् इत्यकारः कण्ठ्यो रेफो मूर्धन्य इति वचनादेशान्तरतमतया ऋवर्णस्य मूर्धन्यस्य स्थाने भवति। एवम् एकारः कण्ठतालव्यः। इवर्णस्य तालव्यस्यैव गुण एकारः, ओकारश्च कण्ठ्य ओष्ठ्यश्चेति उवर्णस्य ओष्ठ्यस्य गुण ओकार इति। एता इति। व्यपदेशिवद्भावेन इणो नाम्यन्तता। 'उम्भिता, क्रीणाति' इति। अन्यथा भकारस्यौष्ठ्यस्य ओकार ओष्ठ्यो गुणः स्याद् आकारस्य कण्ठ्यस्य एकदेशान्तरतमः 'अर्' स्यादिति भावः।। ६३३।

## [समीक्षा]

कातन्त्रकार ने अवर्णभिन्न स्वरों की 'नामी' संज्ञा की है — ''स्वरोऽवर्णवर्जो नामी'' (१।१। ७), तदनुसार 'इममें इ—ई—उ—ऊ—ऋ—ॠ—ऌ—ॡ—ए—ऐ—ओ—औ' इन १२ वर्णों का समावेश होता है। पाणिनि ने 'इक्' प्रत्याहार में 'इ—उ—ऋ—ऌ' इन चार वर्णों को स्वीकार किया है। दोनों व्याकरणों में प्रकृत सूत्र के जो उदाहरण दिए गए हैं, उनमें 'इ—उ—ऋ' वर्णों को ही गुण आदेश होता है। अतः 'नाम्यन्त—इगन्त'

निर्देशों में पाणिनीय 'इगन्त' निर्देश ही अधिक उपयुक्त कहा जा सकता है। उनके "सार्वधातुकार्धधातुकयोः" (अ० ७।३।८४) सूत्र में 'इगन्त' को ही गुण का विधान किया गया है। कातन्त्रीय 'धातु–विकरण' यह उभय निर्देश अधिक स्पष्टता का बोधक है, जबकि पाणिनि विकरणसहित धातु की अङ्गसंज्ञा मानकर इगन्त विकरण को गुण आदेश करते हैं।

## [विशेष वचन]

१. वचनाद् भूतपूर्वाच्च न विरुध्यते (दु० टी०)।
२. नात्र बुद्धिकृतव्यापार आश्रीयते (दु० टी०)।
३. अन्तग्रहणं विस्पष्टार्थमेव (दु० टी०)।
४. वरमक्षराधिक्यं न पुनर्योगविभाग इति युक्तम् (दु० टी०)।

## [रूपसिद्धि]

**१. एता।** इण् + श्वस्तनी–ता। 'इण् गतौ' (२।१३) धातु से श्वस्तनीविभक्तिसंज्ञक प्रथम पुरुष–एकवचन 'ता' प्रत्यय तथा प्रकृत सूत्र से इकार को गुणादेश-एकार।

**२. चेता।** चि + श्वस्तनी–ता। 'चिञ् चयने' (४।५) धातु से श्वस्तनीविभक्तिसंज्ञक प्रथमपुरुष–एकवचन 'ता' प्रत्यय तथा प्रकृत सूत्र से इकार को गुणादेश एकार।

**३–६. नेता।** नी + श्वस्तनी–ता। **स्तोता।** स्तु + श्वस्तनी–ता। **भविता।** भू + ता। **कर्ता।** कृ + ता। क्रमशः 'णीञ् प्रापणे, ष्टुञ् स्तुतौ, भू सत्तायाम्, डु कृञ् करणे' (१।६००, २।६५, १।१, ७।७) धातु से ता–प्रत्यय, प्रकृत सूत्र से ईकार–उकार–ऊकार तथा ऋकार को गुणादेश।

**७–८. सुनोति।** सु + नु + ति। **तनोति।** तन + उ + ति। 'षुञ् अभिषवे' (४।१) तथा 'तनु विस्तारे' (७।१) धातु से वर्तमानासंज्ञक प्रथमपुरुष–एकवचन 'ति' प्रत्यय, "नुः प्वादेः" (३।२।३४) से 'नु' विकरण, "तनादेरुः" (३।२।३७) से 'उ' विकरण तथा प्रकृत सूत्र द्वारा विकरणघटित उकार को गुणादेश।। ६३३।

## ६३४. नामिनश्चोपधाया लघोः [३।५।२]

## [सूत्रार्थ]

धातु में उपधासंज्ञक लघुभूत नामी वर्णों का गुण आदेश होता है प्रत्यय के परवर्ती होने पर।। ६३४।

## [दु० वृ०]

धातोरुपधाया नामिनो लघोर्गुणो भवति। कोपिता, कोपिष्यते, वर्णिता, वर्णिष्यते। 'भेत्ता, छेत्ता' इति प्रत्यये परे धातोरुपधैव। चकार **उत्तरार्थः**।। ६३४।

## [दु० टी०]

नामि०। विकरणस्य नाम्युपधत्वं नास्तीत्याह – धातोरिति। धात्वधिकारोऽत्र वर्तत

एव व्यक्तौ प्रत्ययश्चावश्यं भावीति। भेत्तेत्यादि। **''सनि चानिटि''** (३। ५। ९) इति प्रतिषेधो ज्ञापयति—प्रत्ययव्यञ्जनसंयोगे यद् गुरुत्वं तल्लघोरुपधाया गुणस्य न बाधकमिति वर्णयन्त्येके। **'वार्णात् प्राकृतं बलीयः'** (का० परि० ८१) इति वा संयोगात् प्राक् प्रकृतेरयं गुणः। नामिन इति किम् ? पठिता। उपधाया इति किम् ? रुणद्धि। लघोरिति किम् ? धूपिता।। ६३४।

## [वि० प०]

नामिनः। ननु प्रत्ययस्य व्यञ्जनसंयोगे सति धातोर्गुरूपधत्वात् कथं गुण इत्याह — 'भेत्ता, छेत्ता' इति। प्रत्ययो निमित्तं धातुश्च नैमित्तिकः, ततः प्रत्यये निमित्ते पूर्वस्य नैमित्तिकस्य धातोरुपधैव इकारः, न तूपधोपधेति। एतदुक्तं भवति, यद्यपि परगमनं प्रवृत्तं तथापि यावन्नैमित्तिको भागस्तदपेक्षया लघूपधत्वमस्त्येव। यदपेक्षया च गुरूपधत्वं तन्निमित्तं नैमित्तिकाद् बहिरिति न दोषः। ननु चकारः किमर्थः, नहि नाम्यन्तानुकर्षणमिह युज्यते पूर्वेणैव सिद्धत्वादित्याह — चकार उत्तरार्थ इति। तेनोत्तरत्र सूत्रे नाम्यन्तानुवृत्तिरपि सिद्धा, अन्यथा अनन्तरत्वाद् 'उपधायाः' इत्येतदेवानुवर्तते इति।। ६३४।

## [बि० टी०]

नामिनः। ननु उपधेति स्त्रीलिङ्गत्वाद् **''नामिनो लघोः''** इति कथमुपपद्यते। न च वक्तव्यं नामिन एव विशेषणम् उपधाया लघोरिति च धातोरुपधाया लघोरिति विशेषदर्शनात् ? सत्यम्। नामिन एव विशेषणं यद् वृत्तौ विवृतं तत् **तात्पर्यार्थ**मिति शेषः। भेत्ता, छेत्तेति। ननु कथमयं **राद्धान्तो** दत्तः, गुरूपधत्वात् कथं गुणप्राप्तिः। **सिद्धान्त**—माह-धातोरुपधैव। तस्मादन्यः **पूर्वपक्षोऽ**सिद्धान्तोऽयुक्तः। पुनरयं **वक्रोक्त्यार्थो** बोधयितुं पार्यते। यथा इयं देवी मानुषी वेति **प्रश्नः**। तत्राह — चक्षुषी न निमीलयति। अत एव देवी मानुषी नेति प्रतिपादयति, तथात्र धातुश्च नैमित्तिक इति। ननु कथमिदमुक्तं निमित्ते भवो **नैमित्तिक** इति प्रत्ययेन धातोर्जन्माभावात् ? न देश्यं संसृष्टार्थे इकण् प्रत्ययेन संसृष्टत्वादित्यर्थः।। ६३४।

## [समीक्षा]

'भेदनम्, कोषिता, वर्तिष्यते, भेत्ता' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में गुणविधान किया गया है। पाणिनि का सूत्र है — ''पुगन्तलघूपधस्य च'' (अ० ७। ३। ८६)। अतः उभयत्र समानता है।

## [विशेष वचन]

१. चकार उत्तरार्थः (दु० वृ०)।

२. धात्वधिकारोऽत्र वर्तते एव (दु० टी०)।

३. नामिन एव विशेषणं यद् वृत्तौ विवृत्तम्, तात्पर्यार्थमिति शेषः (बि० टी०)।

## [रूपसिद्धि]

**१. कोषिता।** कुष् + इट् + ता। 'कुष निष्कर्षे' (८। ४०) धातु से श्वस्तनीसंज्ञक

'ता' प्रत्यय, ''इडागमोऽसार्वधातुकस्यादिर्व्यञ्जनादेरयकारादेः'' (३। ७। १) से इडागम तथा प्रकृत सूत्र से उपधासंज्ञक उकार को गुण आदेश।

२. **कोषिष्यते।** कुष् + इट् + स्यते। 'कुष्' धातु से भविष्यन्तीसंज्ञक 'स्यते' प्रत्यय, इडागम, गुणादेश तथा सकार को षकारादेश।

३. **वर्तिता।** वृत् + इट् + ता। 'वृतु वर्तने' (१। ४८४) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय, इडागम तथा प्रकृत सूत्र से गुणादेश।

४. **वर्तिष्यते।** वृत् + इट् + स्यते। 'वृतु' धातु से भविष्यन्तीसंज्ञक 'स्यते' प्रत्यय, इडागम, गुण तथा सकार को षकारादेश।

५ — ६. **भेत्ता।** भिद् + ता। **छेत्ता।** छिद् + ता। 'भिदिर् विदारणे, छिदिर् द्विधाकरणे (६। २, ३) धातुओं से 'ता' प्रत्यय, गुणादेश तथा दकार को तकार।। ६३४।

## ६३५. अनि च विकरणे [३। ५। ३]

### [सूत्रार्थ]

'अन्' विकरण के परे रहते नाम्यन्त तथा नाम्युपध धातु को गुण आदेश होता है।। ६३५।

### [दु० वृ०]

नामिन उपधाया नाम्यन्तस्य चान्येव विकरणे गुणो भवति। रोचते, वर्धते, भवति, नयति। अन्येव विकरण इति किम् ? नृत्यति, सुनोति, क्रीणाति, पुषाण। विकरण इति किम् ? अदुहन्।। ६३५।

### [दु० टी०]

अनि०। उपधाधिकारान्नाम्यन्तस्य न प्राप्नोतीति चकाराधिकारस्य प्रयोजनमाह — नाम्यन्तस्य चेति। ननु करोतेर्गुणविधानबलादन्यस्य नामिनो गुणः क्रियते किं चकाराधिकारेण। एवं तर्हि उपधाया लघोरिति नानुवर्तते इति ईक्षते इत्यत्रापि स्यात्। नैवम्, करोतेर्गुण एवोपधाया गुणं व्यावर्तयिष्यति, न ह्येकेन **विधिर्नियमश्च** युज्यते इति? सत्यम्, **प्रतिपत्तिरियं गरीयसीति। 'सिद्धे सत्यारम्भो विधिर्नियमार्थः'** (का० परि० ५९) इत्याह — अन्येव विकरणेति। यनादौ विकरणे नैव भवतीति भावः। **प्रकृतिनियम** एवात्र युज्यते प्रत्ययनियमस्यासम्भवाद् अनुग्रहणं **नियमप्रतिपत्त्यर्थम्।** विकरण इत्युच्यमाने पूर्वयोगयोर्विकल्पितां बोधयति। अनि चेत्युच्यमाने अर्थात् सजातीये नियमो भविष्यतीति न चोद्यम्, ह्यस्तन्यनि विधिरयं सम्भाव्यते इत्याह — विकरण इत्यादि। **''अभ्यस्तानामुसि''** (३। ५। ६) इति **नियमार्थ** स्यात्। 'अविदुः, अद्रिषुः' इत्यत्र च मा भूद् इति करोतेर्मिदेरित्यत्र च विकरणस्यानुवृत्तिरिष्यते, अन्यथा तनादिदैवादिकयोर्मध्ये गुणः कृञ्मिदोरेवेति नियमः स्यात्।। ६३५।

### [वि० प०]

अनि च०। विकरणे प्रतिषेधाभावात् पूर्वेणैव सिद्धे नियमार्थमित्याह—**अन्येव**

विकरण इति। पुषाणेति। आनेन्यादिनानो विकरणः **''हेरकारादहन्तेः''** (३।४।३३) इति हेर्लोपः।। ६३५।

## [बि० टी०]

अनि च०। विकरण इत्यादि। **''अभ्यस्तानामुसि''** (३।५।६) इति गुणविधानाद् विधिर्न स्यात्। अन्यथा **'यस्य स्थाने य आदेशास्ते तद्ग्रहणेन गृह्यन्ते'** (का० परि० ९१) इति न्यायादनेनैव गुणो भवतीति न देश्यम्, नियमार्थं भविष्यति अभ्यस्तद्वारेण य उसादेशस्तस्मिन्नेव गुणः, तेन विदादिद्वारेण य उसादेशस्तत्रानेनैव व्यावृत्यते। किञ्च करोतेर्मिदेरित्यत्र विकरणोऽनुवर्त्तिष्यते एव, अन्यथा विकरणाभावे नियमोऽपि सम्भवेत्। तनादिदैवादिकयोर्मध्ये कृञ्विदोरेव गुण इति।। ६३५।

## [समीक्षा]

'रोचते, वर्धते, भवति, नयति' आदि शब्दरूपों के सिद्ध्यर्थ 'रुच् – वृध्' धातुओं में उपधासंज्ञक उकार–ऋकार को तथा 'भवति, नयति' आदि में धात्वन्तवर्ती ऊकार – ईकार को गुणादेश करने की आवश्यकता होती है। इसकी पूर्ति कातन्त्रकार ने एक ही प्रकृत सूत्र से की है, परन्तु पाणिनि ने एतदर्थ दो सूत्र बनाए हैं – ''सार्वधातुकार्धधातुकयोः, पुगन्तलघूपधस्य च'' (अ० ७। ३। ८४, ८६)। इस प्रकार पाणिनीय प्रक्रिया में गौरव तथा कातन्त्रीय प्रक्रिया में लाघव स्पष्ट है।

## [विशेष वचन]

१. न ह्येकेन विधिर्नियमश्च युज्यते (दु० टी०)।
२. सिद्धे सत्यारम्भो विधिर्नियमार्थ इत्याह (दु० टी०)।
३. अनुग्रहणं नियमप्रतिपत्त्यर्थम् (दु० टी०)।
४. पूर्वेणैव सिद्धे नियमार्थम् (वि० प०)।

## [रूपसिद्धि]

**१. रोचते।** रुच् + अन् + ते। 'रुच दीप्तौ' (१।४७३) धातु से वर्तमानासंज्ञक आत्मनेपद– प्रथमपुरुष – एकवचन 'ते' प्रत्यय, ''अन् विकरणः कर्तरि'' (३।२।३२) से 'अन्' विकरण, 'न्' अनुबन्ध का प्रयोगाभाव तथा प्रकृत सूत्र से उपधाघटित उकार को गुणादेश।

**२. वर्धते।** वृध् + अन् + ते। 'वृधु वृद्धौ' (१।४८५) धातु से वर्तमानासंज्ञक आत्मनेपद प्रथमपुरुष–एकवचन 'ते' प्रत्यय, अन् विकरण तथा प्रकृत सूत्र द्वारा उपधासंज्ञक ऋकार को गुणादेश।

**३. भवति।** भू + अन् + ति। 'भू सत्तायाम्' (१।१) धातु से 'ति' प्रत्यय, 'अन्' विकरण, प्रकृत सूत्र से ऊकार को गुण ओकार तथा ''ओ अव्'' (१। २। १४) से ओकार को अवादेश।

**४. नयति।** नी + अन् + ति। 'णीञ् प्रापणे' (१। ६००) धातु से 'ति' प्रत्यय,

'अन्' विकरण, प्रकृत सूत्र से धातुघटित ईकार को गुण तथा ''ए अय्'' (१।२।१२) से एकार को अयादेश।। ६३५।

## ६३६. करोतेः [३।५।४]

### [सूत्रार्थ]

'उ' विकरण के परे रहते 'कृ' धातुघटित ऋकार को गुणादेश होता है।। ६३६।

### [दु० वृ०]

करोतेः स्वविकरणे गुणो भवत्येव। करोति, करोतु (अकरोत्)। तनाद्युपलक्षणं करोतेरिति **केचित्**। तेन समर्णोति।। ६३६।

### [दु० टी०]

करोतेः। **तिब्निर्देशः सुखपाठार्थः**। नियमस्यापवादोऽयमित्याह—गुणो भवत्येवेति। तनादीत्यादि। **'ऋणु गतौ, तृणु अदने, घृणु दीप्तौ'** (७। ४, ५, ६)। त्रय एवैते गुणविषयाः। ऋणादेरित्यत्राकुर्वन् करोतेरेव गुण इति **सूत्रकारः** साधयति।। ६३६।

### [वि० प०]

करोतेः। नियमस्यापवादोऽयमित्याह—गुणो भवत्येवेति। तनादीति। **'ऋणु गतौ, घृणु दीप्तौ, तृणु अदने'** (७।४, ६, ५) एते त्रय उपलक्ष्यन्ते। **केचिद् इत्यन्ये। शर्ववर्मणस्तु नोपलक्षणं सम्मत**मिति लक्ष्यते ऋण्वादेरित्यकरणात्।। ६३६।

### [बि० टी०]

करोतेः। मिदिकरोतिभ्यामिति सिद्धे पृथग्योगो **वैचित्र्यार्थः**।। ६३६।

### [समीक्षा]

'करोति, करोतु' इत्यादि शब्दरूपों के सिद्ध्यर्थ 'कृ' धातु से होने वाले 'उ' विकरण को गुण आदेश करने की आवश्यकता है, इसकी पूर्ति कातन्त्रकार ने स्वतन्त्र सूत्र बनाकर की है, परन्तु पाणिनि ने सामान्य सूत्र ''सार्वधातुकार्धधातुकयोः'' (अ० ७।३।८४) से ही गुणविधान किया है। पृथक् रूप में इस सूत्र को बनाने के दो कारण व्याख्याकारों ने बताए हैं — एक तो तनादिगणपठित अन्य धातुओं से भी होने वाला 'उ' विकरण का गुणविधान तथा दूसरा कारण है- विचित्रताप्रदर्शन।

### [विशेष वचन]

१. तिब्निर्देशः सुखपाठार्थः (दु० टी०)।
२. शर्ववर्मणस्तु नोपलक्षणं सम्मतम् (वि० प०)।
३. पृथग्योगो वैचित्र्यार्थः (बि० टी०)।

### [रूपसिद्धि]

**१. करोति।** कृ + उ + ति। 'डु कृञ् करणे' (७। ७) धातु से वर्तमानासंज्ञक परस्मैपद प्रथमपुरुष—एकवचन 'ति' प्रत्यय, ''तनादेरुः'' (३।२।३७) से 'उ' विकरण,

प्रकृत सूत्र से 'कृ' धातुघटित ऋकार को गुण आदेश—अर् तथा ''नाम्यन्तयोर्धातु-विकरणयोर्गुणः'' (३। ५। १) से 'उ' विकरण को गुण।

**२. करोतु।** कृ + उ + तु। 'डु कृञ् करणे' (७।७) धातु से पञ्चमीसञ्ज्ञक 'तु' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**३. अकरोत्।** अट् + कृ + उ + ह्यस्तनी—दि। 'डु कृञ् करणे' (७।७) धातु से ह्यस्तनीसंज्ञक प्रथमपुरुष—एकवचन 'दि' प्रत्यय, ''अड् धात्वादिर्ह्यस्तन्यद्यतनीक्रियाति-पत्तिषु'' (३।८।६) से धातुपूर्व अडागम, ''तनादेरुः'' (३।२।३७) से 'उ' विकरण, प्रकृत सूत्र द्वारा 'कृ' धातुगत 'ऋ' को गुण, ''नाम्यन्तयोर्धातुविकरणयोर्गुणः'' (३। ५। १) से 'उ' विकरण को गुण तथा 'दि' प्रत्ययगत इकारलोप—तकारादेश।। ६३६।

## ६३७. मिदेः [३। ५। ५]

### [सूत्रार्थ]

'यन्' विकरण के परे रहते 'मिद्' धातु को गुण होता है।। ६३७।

### [दु० वृ०]

मिदेः स्वविकरणे गुणो भवत्येव। मेद्यति। भौवादिकस्य मेदतेरनि सिद्ध एव।। ६३७।

### [दु० टी०]

मिदेः। **'ञि मिदा स्नेहने'** (३।७७) इति दिवादौ परस्मैपदी, भ्वादौ चात्मनेपदीति। मिदिकरोत्योरिति सिद्धे **पृथग् वचनं स्पष्टार्थम्**।। ६३७।

### [समीक्षा]

'मेद्यति' आदि यन्विकरणघटित प्रयोगों के सिद्ध्यर्थ उपधागत इकार को गुण आदेश करने की आवश्यकता होती है, इसकी पूर्ति दोनों ही व्याकरणों में की गई है। पाणिनि का सूत्र है — ''मिदेर्गुणः'' (अ० ७।३।८२)। इस प्रकार उभयत्र साम्य है।

### [विशेष वचन]

१. पृथग्वचनं स्पष्टार्थम् (दु० टी०)।

### [रूपसिद्धि]

**१. मेद्यति।** मिद् + यन् + ति। 'ञि मिदा स्नेहने' (३।७७) धातु से वर्तमानासंज्ञक प्रथमपुरुष—एकवचन 'ति' प्रत्यय, ''दिवादेर्यन्'' (३।२।३३) से 'यन्' विकरण तथा प्रकृत सूत्र से 'मिद्' धातुघटित इकार को गुण-एकार।।६३७।

## ६३८. अभ्यस्तानामुसि [३। ५। ६]

### [सूत्रार्थ]

अभ्यस्तनिमित्तक 'उस्' प्रत्यय के परे रहते अभ्यस्तधातुघटित नामिसंज्ञक इवर्ण, उवर्ण, ऋवर्ण का गुण होता है।। ६३८।

## [दु० वृ०]

अभ्यस्तानामुसि परे नामिनो गुणो भवति। **''द्वित्वबहुत्वयोश्च परस्मै''** (३। ५। १९) इति प्रतिषेधे प्राप्ते वचनम्। अबिभयुः, अजुहवुः, अबिभरुः, अजागरुः। अभ्यस्तानामुसीति किम्? जुहुवुः।।६३८।

## [दु० टी०]

अभ्य०। अभ्यस्तानामुसीति। अभ्यस्तमाश्रित्योत्पद्यते। **''अन उस् सिजभ्यस्त०''** (३।४।३१) इत्यादिना य उस् सोऽभ्यस्तानामुस्, श्रुतत्वादभ्यस्तानामेव गुणः। तेन परोक्षायामुसि न भवति। अथवा विकरण इति वर्तते। उसीति भूतपूर्वविकरण इत्यर्थः।।६३८।

## [वि० प०]

अभ्यस्त०। **'ञि भी भये, हु दाने, डु धाञ् डु भृञ् धारणपोषणयोः'** (२। ६८, ६७, ८५) इति सर्वत्र ह्यस्तन्यन्, जुहोत्यादित्वाद् द्विर्वचनम्। ''अन उस सिजभ्यस्त–विदादिभ्योऽभुवः'' (३।४।३१) इत्युस्। ''भृञ्हाड्माडामित्'' (३।३।२४) इति भृडोऽभ्यासस्येकारः, अभ्यस्तमाश्रित्य यो भवति सोऽभ्यस्तानामुस् इत्याह – अभ्यस्तानामित्यादि। तेन परोक्षाया उसि न भवति।। ६३८।

## [बि० टी०]

अभ्यस्ता०। नाम्युपधस्याभ्यस्तस्य चोपधायाः इत्यनेन निषेधः। अत एव नामिन इत्युक्तं **विवरणे**। ''अभ्यस्तानामुसि'' (३। ५। ६) इति अभ्यस्तसम्बन्धिनीत्यर्थः।। ६३८।

## [समीक्षा]

'अबिभयुः, अजुहवुः, अबिभरुः' आदि प्रयोगों के सिद्ध्यर्थ अभ्यस्तसंज्ञा के अन्त में विद्यमान 'ई–उ–ऋ' को गुण आदेश करने की अपेक्षा होती है। इसकी पूर्ति दोनों ही व्याकरणों में की गई है। पाणिनि का सूत्र है– ''जुसि च'' (अ० ७।३।८२)। इस प्रकार उभयत्र समानता ही कही जा सकती है।

## [विशेष वचन]

१. उसीति भूतपूर्वविकरणे इत्यर्थः (दु० टी०)।

२. अभ्यस्तानामुसीति अभ्यस्तसम्बन्धिनीत्यर्थः (बि० टी०)।

## [रूपसिद्धि]

**१. अबिभयुः।** अट् + भी + अन्लोप + अन्–उस्। 'ञि भी भये' (२। ६८) धातु से ह्यस्तनीविभक्तिसंज्ञक प्रथमपुरुष–बहुवचन 'अन्' प्रत्यय, ''अड् धात्वादि-र्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु'' (३। ८। १६) से धातुपूर्व अडागम, ''अन् विकरणः कर्तरि'' (३। २।३२) से अन् विकरण, उसका लुक्, ''जुहोत्यादीनां सार्वधातुके'' (३। ३। ८) से 'भी' धातु को द्विर्वचन, ''पूर्वोऽभ्यासः'' (३।३।४) से पूर्ववर्ती 'भी' की अभ्याससंज्ञा, दीर्घ ईकार को ह्रस्व, भ् को ब्, ''अन उस्०'' (३। ४। ३१) से अन्

को उस्, प्रकृत सूत्र से गुण, "ए अय्" (१। २। १२) से अयादेश तथा "रेफसोर्विसर्जनीयः" (२।३।६३) से सकार को विसर्गादेश।

२. **अजुहवुः**। अट् + हु + अन्लोप + अन्—उस्। 'हु दाने' (२। ६७) धातु से ह्यस्तनीसंज्ञक अन्प्रत्यय, अडागम, अन् विकरण, उसका लोप, धातु को द्विर्वचन, अभ्याससंज्ञादि, अन् को उस्, प्रकृत सूत्र से गुण, "ओ अव्" (१। २। १४) से ओकार को अव् आदेश तथा सकार को विसर्ग।

३. **अबिभरुः**। अट् + भृ + अन्लोप + अन्—उस्। 'डु भृञ् धारणपोषणयोः' (२।८५) धातु से अन् प्रत्यय, अडागम, अन्विकरण, उसका लोप, धातु को द्विर्वचन, अभ्याससंज्ञादि, प्रकृत सूत्र से ऋ को गुण-अर् तथा सकार को विसर्गादेश।।६३८।

## ६३९. न णकारानुबन्धचेक्रीयितयोः [३। ५। ७]

### [सूत्रार्थ]

णकारानुबन्ध वाले तथा चेक्रीयितसंज्ञक प्रत्यय के परे रहते नाम्यन्त एवं नाम्युपध धातुओं को गुण आदेश नहीं होता है।। ६३९।

### [दु० वृ०]

नाम्यन्तानां नाम्युपधानां च णकारानुबन्धे चेक्रीयिते च परे गुणो न भवति। अशिश्रियत्, अपुषत्, अघुक्षत्, नीयते, दुष्यते, नरीनृत्यते, लोलूयते।। ६३९।

### [दु० टी०]

न णकारा०। प्रतिषेधस्य प्राप्तिपूर्वकत्वान्नाम्यन्तानां नाम्युपधानां चेत्यवसीयते। वृत्तौ **मन्दधियां सुखार्थ**मित्युच्यते। णकारोऽनुबन्धो यस्येति णकारानुबन्धश्चेक्रीयितं चेत्यल्पस्वरस्यापि परनिपातो गमकत्वात्। **अनुबन्धग्रहणं च स्पष्टार्थम्**। न हि णकारः स्थितिमानस्ति। यणादीनामनुबन्धसामर्थ्याच्च। यदि चेक्रीयितस्यापि ण्य इति णकारानुबन्धः क्रियते तदा **चेक्रीयितग्रहणं** शक्यमकर्तुम्, किन्तु **सुखार्थं** तत्र **पूर्वाचार्यसंज्ञाश्रयणं** चेक्रीयितलुगन्तस्य **भाषायां** यथाविधानं गुणप्रतिषेधः — "**बोबुधीति न किञ्चिदप्यसौ**" इति।। ६३९।

### [वि० प०]

न णकारा०। प्रतिषेधस्य प्राप्तिपूर्वकत्वात् सर्वत्र भवतीत्याह-नाम्यन्तानामित्यादि अघुक्षदिति। गुहू संवरणे। "**सणनिटः शिडन्तात्**" (३।२।२५) इत्यादिना सण्, हो ढः, "**तृतीयादेर्घढधभान्तस्य**" (३। ६। १००) इत्यादिना आदिचतुर्थत्वम्, गकारस्य घकारः, "**षढोः कः से**" (३।८।४) इति कत्वम्। इह 'चण्, अण्, सण् यण्' एते णानुबन्धाः क्रमेणोदाहृताः।।६३९।

### [बि० टी०]

न ण०। ननु अनुबन्धग्रहणं किमर्थम्, णकारचेक्रीयितयोरित्याम्नानम्, न हि [illegible]

स्थितिमानस्ति। अर्थादनुबन्धोऽवगम्यते। न च वक्तव्यम्, णकारोपदेशाद् धातोश्चेक्रीयितान्तस्य धातोरगुणो भवतीत्यर्थः कथन्न स्यात्, यणादीनां णकारानुबन्धसामर्थ्यान्हि तस्य णकारानुबन्धेऽन्यत् फलमस्ति? सत्यम्। **सुखार्थ**मनुबन्धग्रहणम्। **वस्तुतस्तु** यणादौ णानुबन्धमन्तरेण **''यणाशिषोर्ये''** (३। ४। ७४; ६। १३) इति दुर्घटनीयं स्यात्। ननु यणानुबन्धयोरिति क्रियताम्, यकारादौ प्रत्यये णानुबन्धप्रत्यये च गुणो न भवतीत्यर्थः। एवं सति **''आशिषि च परस्मै सप्तम्यां च''** (३। ५। २२) इति न कृतं स्यात्, यकारादिद्वारेण सिद्धत्वात्। तर्हि घ्यणो यकारेऽपि अगुणत्वं स्याद् इति चेत्, न। इज्वद्भावकरणसामर्थ्यात्। न च वक्तव्यम्, भव्यमित्यत्र **''स्वराद् यः''** (४। २। १०) इति कृतेऽपि तत्रागुणत्वं स्यात्। क्यपः ककारकरणं किमर्थम्, कानुबन्धे गते सति यकारस्यानेनैवागुणत्वं सिद्धम्। तस्मात् ककारकरणेन बोधयति-कृद्यकाराणां मध्ये क्यपो यकारस्यैवागुणत्वम्, नान्ययकारस्य।

ननु यपि सति तोऽन्तो नास्ति, क्यपो द्व्यनुबन्धकत्वाद् इत्युक्तम्। **''हनस्त च''** (४।२।२२) इत्यत्र तदर्थं क्रियमाणं ककारग्रहणं कथं नियमार्थं भविष्यति चेदयुक्तम्, **''हनस्त च''** (४।२।२२) इत्यत्र तकारग्रहणं च न क्रियताम्, हन्धातोर्यबेव विधीयताम्, हन्धातोरपि पञ्चमलोपे पानुबन्धत्वात् तकारागमे सति प्रत्यय इति सिद्धं किं तकारग्रहणेन तस्मान्नियमार्थो भविष्यति, तर्हि अन्यत्र दूषणं स्यात्। **'तृणु दाने'** (७।५)। तृणुधातोः **''ऋदुपधाच्चाक्लृपिचृतेः''** (४।२।२४) इत्यनेन क्यपि कृते नकारलोपे तृण्यम्, एवं मन्धातोश्च 'मन्या' इति प्रयोगो न स्यात्, तस्माद् द्व्यनुबन्धार्थ एव ककारग्रहणम्। तस्मात् **''स्वराद् यः''** (४। २। १०) इति प्रत्ययेऽगुणत्वं स्यादिति चेक्रीयितग्रहणम्, तथापि व्यर्थम् **''ओदौद्भ्यां कृद् यः स्वरवत्''** (४। १। ३१) इति निर्देशात्। यदि यकारे परे गुणो न स्यात् तदा ओकारात् परो यकारो न विद्यते, तस्माद् ओकारकरणेन बोधयति यप्रत्ययस्य गुणित्वम्। किञ्च क्यपः कानुबन्धकरणं **नियमार्थ** भविष्यति।

एतदर्थे क्रियमाणमेतस्मिन्नेव प्रयोजनं भविष्यति? सत्यम्, **प्रतिपत्तिगौरवनिरासार्थमिति** चेक्रीयितग्रहणं सप्तम्यां चाशिषि च परस्मै इति च। ननु अनेनागुणो भवन् नाम्यन्तानां नाम्युपधानां च भवितुमुत्सहते प्रतिषेधस्य प्राप्तिपूर्वकत्वात् कृतः 'म्रस्यते' इत्यादावनुषङ्गलोपः? सत्यम्। **''अभ्यस्तस्य चोपधाया नामिनः स्वरे''** (३। ५। ८) इत्यत्र नामिग्रहणं नामिन एव गुणनिषेधार्थमिति वक्ष्यति। तेनोत्तरत्र 'अस्थात्' इत्यादौ नागुणत्वं तच्चैतत् सामान्यं ज्ञापयति, तथा च विशेषनामिग्रहणाद् 'जजनाति' इत्यलोपो न स्यादिति।।६३९।

## [समीक्षा]

'अपुषत्, नीयते, दुष्यते, नरीनृत्यते' आदि प्रयोगों के सिद्ध्यर्थ धातुओं में गुणनिषेध की आवश्यकता होती है, इसकी पूर्ति दोनों व्याकरणों में की गई है। पाणिनि का सूत्र है– ''क्ङिति च'' (१। १। ५)। तदनुसार अन्तर यह है कि पाणिनि ने प्रत्ययों में जहाँ 'क्–ङ्' अनुबन्ध लगाए हैं, उनके लिए कातन्त्रकार ने 'ण्' अनुबन्ध की योजना की है।

## [विशेष वचन]

१. मन्दधियां सुखार्थम् (दु० टी०)।
२. अनुबन्धग्रहणं च स्पष्टार्थम् (दु० टी०)।
३. न हि णकारः स्थितिमानस्ति - - - - - - - किन्तु सुखार्थम् (दु० टी०)।
४. पूर्वाचार्यसंज्ञाश्रयणं चेक्रीयितलुगन्तस्य भाषायाम्० (दु० टी०)।
५. सुखार्थमनुबन्धग्रहणम् (बि० टी०)।
६. प्रतिपत्तिगौरवनिरासार्थम् (बि० टी०)।

## [रूपसिद्धि]

**१. अशिश्रियत्।** अट् + श्रि + अण् + दि। 'श्रिञ् सेवायाम्' (१। ६००) धातु से अद्यतनीविभक्तिसंज्ञक परस्मैपद प्रथमपुरुष–एकवचन 'दि' प्रत्यय, ''अड् धात्वादि–र्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु'' (३। ८। १६) से धातुपूर्व अडागम, चण् प्रत्यय, धातु को द्विर्वचन, अभ्यासकार्य, प्रकृत सूत्र से गुण का निषेध, इकार को इयादेश, दिप्रत्ययगत इकार का लोप तथा दकार को तकार आदेश।

**२. अपुषत्।** अट् + पुष् + अण् + दि। 'पुष पुष्टौ'' (१।२२८) धातु से अद्यतनी विभक्तिसंज्ञक 'दि' प्रत्यय, अडागम, ''पुषादिद्युताद्यृलृकारानुबन्धार्तिशास्तिभ्यश्च परस्मै'' (३।२।२८) से अण् प्रत्यय, प्रकृत सूत्र से गुण का निषेध तथा दिप्रत्ययगत इकार का लोप।

**३. अघुक्षत्।** अट् + गुह् + सण् + दि। 'गुहू संवरणे' (१। ५९५) धातु से अद्यतनीविभक्तिसंज्ञक 'दि' प्रत्यय ''सणनिटः शिडन्तात्'' (३। २। २५) से सण् प्रत्यय, ''हो ढः'' (३। ६। ५६) से हकार को ढकार, ''तृतीयादेर्घढधभान्तस्य'' (३। ६। १००) से गकार को घकार, ''षढोः कः से'' (३। ८। ४) से ढकार को ककार, सकार को षकार, 'क् + ष्' संयोग से क्ष, प्रकृत सूत्र से गुण का निषेध तथा इकार का लोप।

**४. नीयते।** नी + यण् + ते। 'णीञ् प्रापणे' (१। ६००) धातु से कर्मवाच्य में आत्मनेपद प्रथमपुरुष–एकवचन 'ते' प्रत्यय, यण् प्रत्यय तथा प्रकृत सूत्र से गुण का निषेध।

**५. दुष्यते।** दुष् + यण् + ते। 'दुष वैकृत्ये' (३।२८) धातु से 'ते' प्रत्यय, यण् तथा प्रकृत सूत्र से गुण का निषेध।

**६. नरीनृत्यते।** नृत् + य + ते। 'नृती गात्रविक्षेपे' (३।७) धातु से क्रियासमभिहार अर्थ में चेक्रीयितसंज्ञक 'य' प्रत्यय, द्विर्वचन, अभ्यासकार्य, प्रकृत सूत्र से गुण का अभाव तथा 'नरीनृत्य' धातु से 'ते' प्रत्यय।

**७. लोलूयते।** लू + य + ते। 'लूञ् छेदने' (८।९) धातु से चेक्रीयितसंज्ञक 'य' प्रत्यय, द्विर्वचन, अभ्यासकार्य, 'लोलूय' की धातुसंज्ञा तथा 'ते' प्रत्यय।।६३९।

## ६४०. अभ्यस्तस्य चोपधाया नामिनः स्वरे गुणिनि सार्वधातुके [३। ५। ८]

### [सूत्रार्थ]

अभ्यस्तसंज्ञक धातु के अन्तर्गत उपधासंज्ञक तथा नामिसंज्ञकवर्ण को गुण आदेश नहीं होता है गुणी स्वरादि सार्वधातुकसंज्ञक प्रत्यय के परे रहते।। ६४०।

### [दु० वृ०]

अभ्यस्तस्य चोपधाया नामिनः स्वरादौ गुणिनि सार्वधातुके परे गुणो न भवति। नेनिजानि, अनेनिजम्, विशेषनामिग्रहणाद् 'जजनानि' इत्यलोपो न स्यात्। एवम् उत्तरत्रापि योज्यम्। गुणिनीति किम् ? गुणिन्यपि गुणो मा भूत् – अनेनिजुः।। ६४०।

### [दु० टी०]

अभ्यस्त०। अभ्यस्तस्येति किम् ? वेदानि। उपधाया इति किम् ? जुहवानि। किमर्थं पुनरिह नामिग्रहणम्, प्राप्तिपूर्वकत्वात् प्रतिषेधस्य नामिन एव भविष्यति। न हि अनामिनो गुणः संभवति यद्विशेषनामिग्रहणं तन्नामिद्वारेणैव गुणनिषेधार्थम्, अन्यथा यणादिवत् सामान्येनागुणकार्यं प्रसज्येत। ततश्च **''गमहनजन०''** (३। ६। ४३) इत्यादिना जनेरप्युपधालोपः स्यादिति भावः। एवमुत्तरत्रापि योज्यमिति। बिभ्यत्सतीति। **''सनि चानिटि''** (३। ५। ९) इति व्यधेः सम्प्रसारणं न भवति। अभङ्क्तेति। सिच्यात्मनेपदेऽनुषङ्गलोपो न भवति। गुणिनीत्यादि। अभ्यस्तानामुसीति। अनेन प्रतिषेधविषये आरभ्यमाणो गुणः प्रतिषिध्यते इति भावः।। ६४०।

### [वि० प०]

अभ्यस्त०। नेनिजानीति। **'निजिर् शौचपोषणयोः'** (२। ८१) जुहोत्यादिरयम्। **''निजिविजिविषां गुणः सार्वधातुके''** (३। ३। २३) इत्यभ्यासे गुणः। अथ नामिग्रहणं किमर्थम्, न ह्यनामिनो गुणः सम्भवति, अर्थान्नामिन एव गम्यते इत्याह-विशेषेत्यादि। नामिन इति यद् विशेषणं तन्नामिद्वारेणैव गुणप्रतिषेधार्थम्। अन्यथा यणादिवत् सामान्येनागुणकार्यं प्रसज्येत, ततो **''गमहनजनखन०''**(३। ६। ४३) इत्यादिना जनेरुपधालोपः स्यादित्यर्थः। एवमुत्तरत्रापि योज्यम् इति। बिभ्यत्सतीत्यगुणत्वमनिटः सनो न भवति नामिनोऽसम्भवाद् गुणित्वे सति सम्प्रसारणं न स्यात्। **'व्यध ताडने'** (३। २५), पूर्ववदादिचतुर्थत्वम् बकारस्य भकारः, तथा **''सिजाशिषोश्चात्मने''** (३। ५। १०) इत्यत्र अभङ्क्तेति भञ्जेरनुषङ्गलोपो न भवति। अथ गुणिग्रहणं किमर्थं न ह्यत्रागुणिनि गुणप्राप्तिरित्याह-गुणिन्यपीत्यादि। **''अभ्यस्तानामुसि''** (३। ५। ६) इति विशेषवचनेन यस्य गुणित्वमुक्तम्, तस्मिन्नपि गुणो मा भूदित्यर्थः। अन्यथा यथा **''द्वित्वबहुत्वयोश्च परस्मै''** (३। ५। १९) इति प्रतिषेधस्यायमपवादः। **एवमन्यत्रापि** स्यादिति भावः।। ६४०।

## [बि० टी०]

अभ्यस्तस्य०। गुणिन्यपीति। **''अभ्यस्तानामुसि''** (३। ५। ६) इति यथान्तभूतस्य नामिनो गुणस्तथोपधाभूतस्यापि स्यात्, **स्थितिपक्षे** अन्तभूतस्येति।। ६४०।

## [समीक्षा]

'नेनिजानि, अनेनिजम्' इत्यादि रूपों के सिद्ध्यर्थ धातुगत इकार के गुणनिषेध की अपेक्षा होती है, इसकी पूर्ति दोनों ही व्याकरणों में की गई है। पाणिनि का सूत्र है – ''नाभ्यस्तस्याचि पिति सार्वधातुके'' (अ० ७। ३। ८७)।

## [विशेष वचन]

१. विशेषनामिग्रहणाज्जजनानीत्यलोपो न स्यात् (दु० वृ०)।

२. किमर्थं पुनरिह नामिग्रहणं प्राप्तिपूर्वकत्वात् प्रतिषेधस्य नामिन एव भविष्यति, न ह्यनामिनो गुणः सम्भवति। यद् विशेषनामिग्रहणं तन्नामिद्वारेणैव गुणनिषेधार्थम्। अन्यथा यणादिवत् सामान्येनागुणकार्यं प्रसज्येत, ततश्च गमहनजनेत्यादिना जने– रप्युपधालोपः स्यादिति भावः (दु० टी०)।

## [रूपसिद्धि]

**१. नेनिजानि।** निज् + अन्लुक् + आनि। 'णिजिर् शौचपोषणयोः' (२। ८१) धातु से पञ्चमीविभक्तिसंज्ञक परस्मैपद-उत्तमपुरुष – एकवचन 'आनि' प्रत्यय, ''अन् विकरणः कर्तरि'' (३। २। ३२) से अन् विकरण, ''अदादेर्लुग् विकरणस्य'' (३। ४। ९२) से उसका लुक्, धातु को द्विर्वचन, अभ्याससंज्ञादि तथा प्रकृत सूत्र से गुण का निषेध।

**२. अनेनिजम्।** अट् + निज् + अन्लुक् + ह्यस्तनी – अम्। 'णिजिर् शौचपोषणयोः' (२। ८१) धातु से ह्यस्तनीविभक्तिसंज्ञक परस्मैपद प्रथमपुरुष – एकवचन 'अम्' प्रत्यय, अडागम, अन्विकरण, उसका लुक्, धातु को द्विर्वचन, अभ्याससंज्ञादि तथा प्रकृत सूत्र द्वारा गुण का निषेध।। ६४०।

# ६४१. सनि चानिटि [३। ५। ९]

## [सूत्रार्थ]

धातुघटित उपधासंज्ञक तथा नामिसंज्ञक वर्ण को गु॰ का निषेध होता है यदि अनिट् सन् प्रत्यय पर में हो तो।। ६४१।

## [दु० वृ०]

नामिन उपधाया अनिटि सनि गुणो न भवति। बिभित्सति, दित्सा, बुभुक्षते, जिघृक्षति। चकारादनामिनोऽपि क्वचित्। तेन धीप्सतीति नलोपः स्यात्। अनिटीति किम् ? चुकोषिषति।। ६४१।

## [दु० टी०]

सनि। बिभित्सतीति। **'भिदिर् विदारणे'** (६। २)। दित्सति। **'डु दाञ् दाने'** (२।

८४)। अभ्यस्ताधिकारेऽपि न दोषः। यद्यपि सनः सकारेण सह द्विर्वचनम्, तथापि अभ्यस्तस्यैकदेशोऽप्यभ्यस्तमिहोच्यते। **''द्वयमभ्यस्तम्''** (३। ३। ५) इत्यत्र समुदायो निर्दिश्यते, न व्यक्तिः। 'द्वे' इत्यकरणात् कुतः सन्युपधाया गुण इति। जिघृक्षतीति। **'ग्रह उपादाने'** (८। १४)। **''ग्रहिस्वपिप्रच्छां सनि''** (३। ४। ९) इति सम्प्रसारणम्। चकारादित्यादि। नामिशब्देन सह चकारः सम्बन्धनीयः। अनामिनश्चेति। क्वचिदित्यनेनेष्टविषयतां दर्शयति। गतानुगतिकन्यायेन व्याख्येयम्, **युक्तिस्तु** तत्राभ्यासलोपविधौ निरनुषङ्गं पठित्वा दन्भेरनुषङ्गलोपं बोधयति।। ६४१।

## [वि० प०]

सनि०। बिभित्सतीति। **'भिदिर् विदारणे'** (६। २)। दित्सति। **'डु दाञ् दाने'** (२। ८४)। सनि द्विर्वचनम्। ''सनि मिमी०'' (३। ३। ३९) इत्यादिना स्वरस्येस्, अभ्यासलोपश्च। ''सस्य सेऽसार्वधातुके तः'' (३। ६। ९३)। **''शंसिप्रत्ययादः''** (४। ५। ८०), **''स्त्रियामादा''** (२। ४। ४९)। एवं **'भुज पालनाभ्यवहारयोः'** (६। १४), **''ग्रह उपादाने''** (८। १४), **''ग्रहिस्वपिप्रच्छां सनि''** (३। ४। ९) इति सम्प्रसारणे **''हो ढः''** (३। ६। ५६) इति कृते पूर्ववदादिचतुर्थत्वं घकारः, **''ग्रहगुहोः सनि''** (३। ७। ३१) इत्यनिट्। चकारा- दित्यादि। अधिकृतेन नामिग्रहणेन चकारः सम्बध्यते, तेन नामिनोऽन्यस्य चेत्यर्थः। क्वचिदिति इष्टविषयतां दर्शयति, तेन दन्भेर्नकारलोपो भवति। दम्भितुच्छतीति सन्। **''इवन्तर्द्ध०''** (३। ७। ३३) इत्यादिना पक्षे इडागमः। **''दन्भेरिच्च''** (३। ३। ४१) इतीकारोऽभ्यासलोपश्च, आदिचतुर्थत्वम्, पूर्ववद् दकारस्य धकारः।। ६४१।

## [बि० टी०]

सनि०। ननु **''भृजादीनां षः''** (३। ६। ५९) इत्यत्र कथं 'बिभर्क्षति' इत्यत्र गुणत्वे **''सनि चानिटि''** (३। ५। ९) इति गुणनिषेधात् तत्राह-टीकालाक्षणिकत्वान्निषेधः। तर्हि यथा 'बिभर्क्षति' इत्यत्र लाक्षणिकत्वाद् गुणप्रतिषेधाभावस्तथा दित्सतीत्यत्र गुणप्रतिषेधाभावे गुणः स्यात्। अत्र सिद्धान्त एव नास्तीति **केचित्**। अत्राह **कश्चित्** **''नाम्युपध०''** (४। २। ५१) इति धातोर्विशेषणं धातुः समुदायो लाक्षणिकोऽपि विद्यते। यत्र समुदायो लाक्षणिकस्तत्र **'लक्षणप्रतिपदोक्तयो०'** (का० परि० ७५) इत्यादिना गुणप्रतिषेधाभावः। अयमेव लाक्षणिकप्रतिषेधोऽपि अत एव टीकास्वरसात्। **पण्डित**स्त्वेवमाह — **अङ्गीकारवादो**ऽयं 'बिभर्क्षति' इत्यत्र कथं गुण इत्यनेन किमाक्षिप्यते लाक्षणित्वादिह गुणः, यदि दित्सेत्यत्र कथन्न गुण इत्युच्यते, तदा अन्यप्रकारेण साधयामि, तस्य प्रकारं किमिति चेदादेशस्य इकारकरणसामर्थ्यात्। अन्यथा एकार एव निर्देश्यो न हि इकारकरणस्यान्यत् प्रयोजनमस्तीति।। ६४१।

## [समीक्षा]

'दित्सा, बुभुक्षते, जिघृक्षति' इत्यादि शब्दरूपों के सिद्ध्यर्थ धातुघटित इकारादि वर्णों के गुणनिषेध की अपेक्षा होती है। इसकी पूर्ति दोनों व्याकरणों में की गई है। दोनों

में अन्तर यह है कि कातन्त्रकार ने साक्षात् गुण का निषेध किया है, जबकि पाणिनि दो सूत्रों द्वारा झलादि सन् को किद्भाव करके "क्ङिति च" (अ० १।१।५) से गुण का निषेध करते हैं। उनके कित्त्वविधायक सूत्र हैं – "इको झल्, हलन्ताच्च" (अ० १। २। ९, १०)। इस प्रकार पाणिनीय निर्देश में गौरव स्पष्ट है।

## [विशेष वचन]

१. चकारादनामिनोऽपि क्वचित्, तेन धीप्सतीति नलोपः स्यात् (दु० वृ०)।

२. नामिशब्देन सह चकारः सम्बन्धनीयः, अनामिनश्चेति। क्वचिदित्यनेन इष्टविषयतां दर्शयति (दु० टी०; वि० प०)।

३. अत्र सिद्धान्त एव नास्तीति केचित् (बि० टी०)।

४. पण्डितस्त्वेवमाह – अङ्गीकारवादोऽयम् (बि० टी०)।

## [रूपसिद्धि]

**१. बिभित्सति।** भिद् + सन् + ति। 'भिदिर् विदारणे' (६। २) धातु से "धातोर्वा तुमन्तादिच्छतिनैककर्तृकात्" (३। २। ४) से सन् प्रत्यय, "द्विर्वचनमनभ्यासस्यैक-स्वरस्याद्यस्य" (३। ३। १) से धातु को द्विर्वचन, "पूर्वोऽभ्यासः" (३। ३। ४) से पूर्ववर्ती 'भिद्' की अभ्याससंज्ञा, "अभ्यासस्यादिर्व्यञ्जनमवशेष्यम्" (३। ३। ९) से 'द्' का लोप, "द्वितीयचतुर्थयोः प्रथमतृतीयौ" (३। ३।११) से अभ्यासगत भकार को बकार, प्रकृत सूत्र से गुणनिषेध, दकार को तकार, "ते धातवः" (३। २। १६) से 'बिभित्स' की धातुसंज्ञा, वर्तमानासंज्ञक परस्मैपद-प्रथमपुरुष – एकवचन 'ति' प्रत्यय, "अन् विकरणः कर्तरि" (३। २। ३२) से 'अन्' विकरण तथा "अकारे लोपम्" (२। १। १७) से सन्-प्रत्ययघटित अकार वर्ण का लोप।

**२. दित्सा।** दा + सन् + अ + सि। 'डु दाञ् दाने' (२। ८४) धातु से इच्छार्थ में "धातोर्वा तुमन्तादिच्छतिनैककर्तृकात्" (३। २। ४) से 'सन्' प्रत्यय, अकारलोप, "स्त्रियामादा" (२। ४। ४९) से 'आ' प्रत्यय, दीर्घ – आकारलोप, सिप्रत्यय तथा उसका लोप।

**३. बुभुक्षते।** भुज् + सन् + ते। 'भुज पालनाभ्यवहारयोः' (६। १४) से इच्छार्थ में सन् प्रत्यय, द्विर्वचन, अभ्याससंज्ञादि, धातुसंज्ञा, ते-प्रत्यय आदि विभक्तिकार्य।

**४. जिघृक्षति।** ग्रह + सन् + ति। 'ग्रह उपादाने' (८। १४) धातु से इच्छार्थक 'सन्' प्रत्यय, द्विर्वचन, अभ्याससंज्ञादि, धातुसंज्ञा, वर्तमानासंज्ञक प्रथमपुरुष – एकवचन 'ति' प्रत्यय तथा अकारलोप।। ६४१।

## ६४२. सिजाशिषोश्चात्मने [३। ५। १०]

## [सूत्रार्थ]

धातुगत उपधा – नामिसंज्ञक वर्ण को गुण का निषेध होता है आत्मनेपदविषयक अनिट् सिच् प्रत्यय तथा आशीर्विभक्तिक आत्मनेपदसंज्ञक प्रत्यय के परे रहने पर।। ६४२।

## [दु० वृ०]

नामिन उपधायां सिच्यात्मनेपदे आशिषि चानिटि गुणो न भवति। अभित्त, अच्छित्त, अभित्साताम्, अदुहवहि, अदुग्ध, अदुग्धाः। दुहदिहलिहगुहामात्मने वतवर्गे वा सणेव, तत्र व्यवस्थितवानुवृत्तेः। सिचोऽद्यतन्युपलक्षणत्वात् सिद्धम्। भित्सीष्ट, भुक्षीष्ट। अनिटीति किम् ? अवर्धिष्ट, वर्द्धिषीष्ट। इहात्मनेग्रहणं **गुणबाधिका वृद्धिरिति ज्ञापनार्थम्।** तेन न्यनुवीत्, न्यधुवीत्। कुटादित्वादगुणे वृद्धिर्न स्यात्।। ६४२।

## [दु० टी०]

सिजा०। आत्मनेपदे इत्येकापीयं सप्तमी अर्थवशाद् भिद्यते। सणेवेत्यादि। **'अपवादविषयं परित्यज्योत्सर्गः प्रवर्तते'** (का० परि० ५५) इति सिच् न भवति। सिचः सम्बन्धिन्यात्मनेपद इत्यर्थादद्यतन्युपलक्ष्यते। अदुहवहीत्यत्र दन्त्योष्ठ्योऽयं वकारः। सणि तु अधुक्षत, अधुक्षथाः, अधुक्षावहि। **''व्यञ्जनान्तानामनिटाम्''** (३। ६। ७) इति वृद्धेर्विषयत्वाद् **''आशिषि च परस्मै''** (३। ५। २२) इति गुणप्रतिषेधादात्मनेपदमेव गम्यते। तथा उत्तरत्रापि सूत्रे **''सिचि परस्मै स्वरान्तानाम्''** (३। ६। ६) इति वृद्धिरस्त्येवेत्याह– 'इहात्मने' इत्यादि। ननु कथं ज्ञापकम् अद्राक्षीदित्यत्र सृजिदृशोरागमो न प्राप्नोति, सिचोऽगुणत्वात् ? सत्यम्। वृद्धिस्थानमाश्रित्य भविष्यतीत्यदोषः। **'नु स्तवने, धू विधूनने'** (५। १०४, १०५) कुटादिषु परस्मैपदिनौ।। ६४२।

## [वि० प०]

सिजाशिषो०। अभित्तेति। **''धुटश्च धुटि''** (३। ६। ५१) इति सिचो लोपः। अदुहवहीति। वकारोऽयं दन्त्योष्ठ इति धुट्त्वाभावाद् दादेर्धो न भवति। अदुग्ध, अदुग्धा इति। **''दादेर्धः''** (३। ६। ५७) इति घकारे कृते **''घढधभेभ्यस्तथोर्धोऽधः''** (३। ८। ३) इति धकारः, **''धुटान्तृतीयश्चतुर्थेषु''** (२।३। ६०) इति घस्य गकारः। अथ कथमिदं सिद्धं यावता दुहादीनां शिडन्तत्वात् सणा भवितव्यमित्याह – दुहदिहेत्यादि। तत्र हि सण्विधौ **''उषविदजागृभ्यो वा''** (३। २। २०) इत्यतो वाशब्दोऽनुवर्तते। तेन दुहादीनामात्मनेपदे वकारे तवर्गे च विभाषया सणेव न सिज् इत्येवकारेण सूच्यते। उत्सर्गो ह्यपवादविषयं परिहरतीति सण्विनिर्मुक्तपक्षे सिजपि न भवतीति सणि **नित्ये** प्राप्ते दुहादेर्विकल्प इत्य**पवादविषयता**। यदि पुनरिह न सिच् प्रत्ययः कथन्तर्हि गुणनिषेध इत्याह – सिच इत्यादि। सिचः सम्बन्धिन्यात्मनेपदे इत्युक्तेऽर्थाद् अद्यतन्युपलक्ष्यते। एवं दिह–अदिह्वहि, अदिग्ध, अदिग्धा इत्यादावपीति। यदा तु सण् स्यात् तदा अधुक्षावहि, अधुक्षत, अधुक्षथा इत्यादि। आशिषि दर्शयति – भुक्षीष्ट, भित्सीष्टेति। अथ किमर्थमात्मनेपदग्रहणं सिचि परस्मैपदे **''व्यञ्जनान्तानामनिटाम्''** (३। ६। ७) इति वृद्धिरेवास्ति, यथा अभैत्सीदिति। तथा **''आशिषि च परस्मै''** (३। ५। २२) इति गुणप्रतिषेध इति अर्थादात्मनेपदमवगम्यते इति। तथोत्तरत्रापि न प्रयोजनम्, **''सिचि परस्मै स्वरान्तानाम्''** (३। ६। ६) इति वृत्तिविषयत्वादित्याह – इहेत्यादि। **'नु स्तवने,**

**धू विधूनने'** (५। १०४, १०५)। **''इटश्चेटि''** (३। ६। ५३) इति सिचो लोपः, **''कुटादेरनिनिचट्सु''** (३। ५। २७) इत्यगुणत्वादुवादेशो वृद्धिर्न स्यादिति **''सिचि परस्मै स्वरान्तानाम्''** (३। ६। ६) इत्यनेनेत्यर्थः॥ ६४२।

## [बि० टी०]

सिजा०। सिजाशिषोर्विषये यदात्मनेपदम्, तस्मिन् परत इत्यर्थः, न पुनरात्मनेपदविषययोः सिजाशिषोरिति। यस्मादाधारो हि व्यापकः, आधेयो हि व्याप्यः। आशीरित्युक्ते परस्मैपद इति सामान्यं व्यापकम् आत्मनेपदम् इति व्याप्यमित्यर्थः। एकापीयं सप्तमी अर्थवशाद् द्विधा भिद्यते इति **टीका**।

**अस्यार्थः—** आत्मनेपदविषये सिचीति। परस्मैपदविषये सिचि व्यावृत्तिः। अन्यच्च सिज्विषये चात्मनेपद इति। तेन सिचं विनापि 'अदुग्ध' इत्यादौ निषेधः सिद्धः। अतः सिचोऽद्यतन्युपलक्षणत्वाद् इति प्राप्तं विषयकल्पनादिहात्मनेपदग्रहणं गुणबाधिका वृद्धिरिति **ज्ञापनार्थमिति**। ननु कथं ज्ञापकम्, आत्मनेपदग्रहणमन्तरेण परस्मैपदविषये सिचि अगुणत्वं स्यात्। ततः 'अद्राक्षीत्' इत्यत्र **''सृजिदृशो०''** (३। ४। २५) इत्यादिनाऽकारागमो न स्यात्। यतो गुणप्रसङ्गेऽकारागमः स्यादिति न देश्यम्, वृद्धिप्रसङ्गाद् वृद्धिप्रसङ्गेऽकारागमः स्यात्। ननु कथम् 'औह्यते, ओप्यते' वहेर्वपेश्च यणि अगुणत्वात् सम्प्रसारणे **''स्वरादीनां वृद्धिरादेः''** (३। ८। १७) इत्यनेन वृद्धिरगुणप्रसङ्गात् ? सत्यम्, अनादेरयं विधिः क्रियते, नियमेनाप्यनादिरेव व्यावृत्यते।

ननु 'न्यनुवीत्, न्यधुवीत्' इत्यत्र वृद्ध्युवादेशयोः प्राप्तयोरन्तरङ्गत्वाद् उवादेश एव स्यात्। वृद्धेर्बहिरङ्गत्वं पुनर्वह्याश्रितत्वात्। किमनेन ? सत्यम्, 'आदीध्यकः, आवेव्यकः' इत्यत्र प्रयोजनं दीधीवेव्योश्चागुणे कृते वृणो णकारस्येज्वद्भावाद् **''अस्योपधायाः''** (३। ६। ५) इत्यादिना वृद्धिर्न भविष्यतीति प्रयोजनं भविष्यति। ननु यदि गुणबाधिका वृद्धिस्तर्हि **''उतो वृद्धिर्व्यञ्जनादौ''** (३। ६। ८४) इत्यत्र गुणिनि ग्रहणं किमर्थम्। अत एव ज्ञापकाद् अगुणो न भविष्यति ? सत्यम्, तत्र गुणिनिग्रहणं **सुखार्थम्**, यद् गुणिनीति किम् ? 'स्तुतः' इति **दुर्गवाक्यप्रबोधस्तत्** प्रथमकक्षातः। किञ्चानेनात्मनेपदविषये क्रियते इति **सादृश्यपक्षावलम्बनं** यदा क्रियते तदा दूषणं स्यादिति कृत्वा उक्तं **दुर्ग वाक्यप्रबोध** इति॥ ६४२।

## [समीक्षा]

'अभित्त, अच्छित्त, भित्सीष्ट, भुक्षीष्ट' आदि शब्दरूपों में गुणाभाव दोनों ही व्याकरणों में किया गया है। अन्तर यह है कि पाणिनि ''लिङ्सिचावात्मनेपदेषु'' (अ० १। २। ११) से आशीर्लिङ् लकार तथा लुङ्लकारविहित सिच् प्रत्यय को कित्भाव करके ''क्ङिति च'' (अ० १। १। ५) सूत्र से गुणादेश का निषेध करते हैं, जब कि कातन्त्रकार ने प्रकृत सूत्र द्वारा साक्षात् गुण का निषेध किया है।

## [विशेष वचन]

१. इहात्मनेग्रहणं गुणबाधिका वृद्धिरिति ज्ञापनार्थम् (दु० वृ०)।

२. आत्मनेपदे इत्येकापीयं सप्तमी अर्थवशाद् भिद्यते (दु० टी०)।

३. उत्सर्गो हि अपवादविषयं परिहरति (वि० प०; बि० टी०)।

४. तत्र गुणिनिग्रहणं सुखार्थम् (बि० टी०)।

## [रूपसिद्धि]

**१. अभित्त।** अट् + भिद् + त। 'भिदिर् विदारणे' (६। २) धातु से अद्यतनी विभक्तिसंज्ञक प्रथमपुरुष – एकवचन 'त' प्रत्यय, अडागम, सिच् प्रत्यय, ''अदितुदि०'' (३। ७। २१) से अनिट्, प्रकृत सूत्र से अगुण, ''धुटश्च धुटि'' (३। ६। ५१) से सिच् का लोप, तथा ''अघोषेष्वशिटाम्०'' (३। ८। ९) इत्यादि से धातुघटित दकार को तकारादेश।

**२. अच्छित्त।** अट् + छिद् + त। 'छिदिर् द्विधाकरणे' (६। ३) धातु से अद्यतनी-विभक्तिसंज्ञक 'त' प्रत्यय, अडागम, सिच् प्रत्यय, अनिट्, प्रकृत सूत्र से अगुण, सिच् – लोप, 'छ' को द्वित्व, पूर्ववर्ती छ् को च् तथा धातुघटित दकार का तकारादेश।

**३. अभित्साताम्।** अट् + भिद् + आताम्। 'भिदिर् विदारणे' (६। २) धातु से अद्यतनीविभक्तिसंज्ञक प्रथमपुरुष – द्विवचन 'आताम्' प्रत्यय, अडागम, सिच् प्रत्यय, अनिट्, प्रकृत सूत्र से अगुण तथा द् को त्।

**४. अदुह्वहि।** अट् + दुह् + वहि। 'दुह प्रपूरणे' (२। ६१) धातु से अद्यतनी-विभक्तिसंज्ञक उत्तमपुरुष – द्विवचन 'वहि' प्रत्यय, अडागम, सिच् प्रत्यय, अनिट्, प्रकृत सूत्र से अगुण तथा सिच् प्रत्यय का लोप।

**५. अदुग्ध।** अट् + दुह् + त। 'दुह प्रपूरणे' (२। ६१) धातु से अद्यतनी-विभक्तिसंज्ञक 'त' प्रत्यय, अडागम, सिच् प्रत्यय, प्रकृत सूत्र से अगुण, ह् को घ्, त् को ध्, सिच् – लोप तथा घ् को ग् आदेश।

**६. अदुग्धाः।** अट् + दुह् + थास्। दुह् धातु से थास् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**७. भित्सीष्ट।** भिद् + सीष्ट। 'भिदिर् विदारणे' (६। २) धातु से आशीर्विभक्तिसंज्ञक प्रथमपुरुष – एकवचन 'सीष्ट' प्रत्यय, अन्-विकरण का अभाव, प्रकृत सूत्र से गुण का अभाव तथा दकार को तकारादेश।

**८. भुक्षीष्ट।** भुज् + सीष्ट। 'भुज पालनाभ्यवहारयोः (६। १४) धातु से आशी-र्विभक्तिसंज्ञक 'सीष्ट' प्रत्यय, गुणाभाव, ज् को ग्, ग् को क्, स् को ष् तथा 'क्-ष्' के संयोग से क्ष्।। ६४२।

## ६४३. ॠदन्तानां च [३। ५। ११]

### [सूत्रार्थ]

अनिट् सिच्–विषयक आत्मनेपद तथा आशीर्विभक्तिक आत्मनेपद प्रत्यय के परे रहते ॠकारान्त धातु को गुणादेश नहीं होता है।। ६४३।

### [दु० वृ०]

ॠदन्तानां च धातूनां सिच्यात्मनेपदे आशिषि चानिटि गुणो न भवति। अकृत, अकृषाताम्, कृषीष्ट। अनिटीति किम् ? प्रावरिष्ट, प्रवरिषीष्ट। कथं तॄ – अतीर्ष्ट, तीर्षीष्ट। स्तॄ – अस्तीर्ष्ट, स्तीर्षीष्ट। पॄ – अपूर्ष्ट, पूर्षीष्ट। सिजाशिषोश्चात्मने इड्विकल्पेष्टिरिति, ॠकारस्योपलक्षणत्वात्।। ६४३।

### [दु० टी०]

ॠ०। अकृतेति। गुणप्रतिषेधे **''ह्रस्वाच्चानिटः''** (३।६।५२) इति सिचो लोपः। **तपरकरणमसन्देहार्थम्,** अन्यथा रन्तानामिति कृते किमयं ह्रस्वो दीर्घो रेफो वेति विप्रतिपद्येत। रेफान्तपक्षेऽप्यनिटीति नाभिसम्बध्यते। तकारे च स्थिते यथाश्रुतॠकारपरिग्रहणाद् दीर्घस्य न प्राप्नोति। **''अद्यतन्यां स्वरान्तश्च वा''** (३। २। ४२–५१) इति कर्मकर्तृस्थो रुचादिः। अतीर्ष्ट स्वयमेवेति। एवम् अपृष्ट स्वयमेवेत्यर्थात् स्वसम्बन्धः। स्तृत्रस्तु त्रकारानुबन्धत्वादुभयपदं भवति। विकल्पेष्टिरिति। **''ॠदृवृञ्वृडां सनीड् वा स्याद् आत्मने च सिजाशिषोः''** इति वक्ष्यतीति परिहारमाह – ॠकारस्येत्यादि। ॠकारः सन्निहितम् ॠकारमुपलक्षयतीत्यदोषः। **अन्य** आह – ॠदन्तानां चेति दीर्घोऽयं पाठः प्रश्लेषनिर्देशश्च **व्याख्यानतो**ऽवसीयते – ॠश्च ॠच्च ॠॄौ। **अपर** आह – ॠच्च अन्तश्च ॠदन्तौ, अन्तशब्दोऽत्र समीपवाची श्रुतत्वाद् ऋकारस्य समीपे ॠकारो येन विधिस्तदन्तस्येति भावः। ऋवर्ण इति न कृतं **वैचित्र्यार्थम्**। सूत्रकारमतन्तु सिजाशिषोरात्मने ॠतां नित्यम् इडागम इति लक्ष्यते।। ६४३।

### [वि० प०]

ॠद०। अकृतेति। **''ह्रस्वाच्चानिटः''** (३।६।५२) इति सिचो लोपः। कथमित्यादि। किरादिश्रन्थिग्रन्थिसनन्ताः कर्मकर्तृस्थाः इत्यनुवर्तमानेऽद्यतन्यां स्वरान्तश्च वेति रुचादित्वात् कर्मकर्तर्यात्मनेपदम्, तेन 'अतीर्ष्ट स्वयमेव' इति योज्यम्। स्तृणातेस्तु त्रनुबन्धत्वादु-भयपदमस्त्येव। एवम् अपूर्ष्ट स्वयमेवेति। आशिषि तु भावकर्मणोरात्मनेपदम्। सिजाशिषोरिति।

''ॠदृवृङ्वृञां सनीड् वा स्यादात्मने च सिजाशिषोः। संयोगादेर्ॠतो वाच्यः सुडसिद्धो बहिर्भवः'' इति वक्ष्यति। तेनेटो विकल्पेष्टिरित्यनिट्त्वं पक्षे। परिहारमाह – ॠकारस्येति। ॠकारः सन्निहितमेव सवर्णम् ॠकारमुपलक्षयतीति, **तेनागुणत्वात् ''ॠदन्तस्येरगुणे, उरोष्ठ्योपधस्य''** (३।५।४२) इति यथायोगं प्रवर्तते।। **६४३।**

## [समीक्षा]

'कृषीष्ट, अकृत' आदि के सिद्ध्यर्थ ऋकार को गुणनिषेध करना अपेक्षित होता है, इसकी पूर्ति दोनों व्याकरणों में की गई है। अन्तर यह है कि कातन्त्रकार ने साक्षात् गुणनिषेध प्रकृत सूत्र द्वारा किया है, जबकि पाणिनि ने ''उश्च'' (अ० १। २। १२) सूत्र द्वारा ऋवर्णान्तधातु से परवर्ती आशीर्लिङ् लकार तथा सिच् प्रत्यय को किद्भाव करके ''क्ङिति च'' से गुणनिषेध का निर्देश किया है। व्याख्याकारों ने सूत्रस्थ ऋ के ह्रस्व–दीर्घ दोनों ही पाठ माने हैं तथा ह्रस्व ऋकार से समीपवर्ती दीर्घ ऋकार का ग्रहण किया है।

## [विशेष वचन]

१. सिजाशिषोश्चात्मने इड्विकल्पेष्टिरिति, ऋकारस्योपलक्षणत्वात् (दु० वृ०)।
२. तपरकरणमसन्देहार्थम् (दु० टी०)।
३. अन्तशब्दोऽत्र समीपवाची (दु० टी०)।
४. ऋवर्ण इति न कृतम्, वैचित्र्यार्थम् (दु० टी०)।
५. सूत्रकारमतं तु सिजाशिषोरात्मने ऋतां नित्यमिडागम इति लक्ष्यते (दु० टी०)।
६. ऋकारः सन्निहितमेव सवर्णम् ऋकारमुपलक्षयति (वि० प०)।

## [रूपसिद्धि]

**१. अकृत।** अट् + कृ + सिच्–लोप + त। 'डु कृञ् करणे' (७।७) धातु से अद्यतनीविभक्तिसंज्ञक आत्मनेपद–प्रथमपुरुष–एकवचन 'त' प्रत्यय, ''अड् धात्वादेर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु'' (३। ८। १६) से धातुपूर्व अडागम, सिच् प्रत्यय, अनिट्, प्रकृत सूत्र से अगुण तथा ''ह्रस्वाच्चानिटः'' (३। ६। ५२) से सिच्प्रत्यय का लोप।

**२. अकृषाताम्।** अट् + कृ + सिच् + आताम्। 'डु कृञ् करणे' (७।७) धातु से अद्यतनीविभक्तिसंज्ञक 'आताम्' प्रत्यय, अडागम, अनिट्, गुणनिषेध, सिच् प्रत्यय तथा मूर्धन्य षकारादेश।

**३. कृषीष्ट।** कृ + सीष्ट। 'डु कृञ् करणे' (७। ७) धातु से आशीर्विभक्तिसंज्ञक आत्मनेपद प्रथमपुरुष–एकवचन 'सीष्ट' प्रत्यय, प्रकृत सूत्र से गुण का निषेध तथा मूर्धन्य षकारादेश।। ६४३।

# ६४४. स्थादोश्च [३। ५। १२]

## [सूत्रार्थ]

सिच्प्रत्ययविषयक आत्मनेपदसंज्ञक प्रत्यय के परे रहते 'स्था' तथा 'दा' धातु-सम्बन्धी नामी वर्ण को गुण नहीं होता है।। ६४४।

## [दु० वृ०]

स्थादासंज्ञकयोश्च नामिनः सिच्यात्मनेपदे गुणो न भवति। समस्थिषत, समस्थिषाताम्। अदित, अदिषाताम्। अधित, अधिषाताम्। नामिन इति किम् ? स्थासीष्ट, दासीष्ट।। ६४४।

## [दु० टी०]

स्थादो:। एवं **'दाण दाने'** (१।२६९) – व्यत्यदित, अदिषातां वस्त्रे। देङ् – अदित, अदिषातां मित्रे। दो–व्यत्यदित, अदिषातां दण्डौ। धेट् – व्यत्यधित, अधिषातां स्तनौ। स्थादोरिति किम् ? दाप्दैपो: – व्यत्यदास्त, अदासाताम!। नाम्यधिकारादेवाशिषो निवृत्तिरवसीयते आत्मनेपदमप्यत्र यदुच्यते **तन्मन्दधियां सुखार्थम्**। तथा अनिटीत्यधिकारोऽपि न प्रयोजयति व्यावृत्तेरभावात्। न च वक्तव्यम्, स्थादोरिकारविधानाद् गुणो न भविष्यति, अन्यथा एकारमेव विदध्यात्। नित्यत्वात् सिचो लोपो हि गुणेन बाध्यते इति। नैवम्, इह वचनं **लाघवार्थ**मपि स्यात्। स्थादोरिच्चेति कृते भुव: सिज्लुकीत्यत्र च इकारोऽपि वर्तते।। ६४४।

## [वि० प०]

स्थादो:। **''समवप्रविभ्य:''** (३।२।४२–१४) इति वचनात् सम्पूर्वस्तिष्ठती रुचादि:, इतरयोस्तु जनुबन्धत्वादुभयपदम्। **''स्थादोरिरद्यतन्यामात्मने''** (३।५।२९) इति वचनादित्वे कृते गुण: स्यादिति प्रतिषेध उच्यते। नन्विकारविधानादेव गुणो न भविष्यति, अन्यथा एकारमेव कुर्यात्। न चेकारविधानं ह्रस्वात् सिचो **लोपार्थ**मिति युक्तम्, यस्मात् सतोऽपीकारस्य नित्यत्वाद् गुणेन भवितव्यम् इति कथं सिचो लोपस्तस्मादिकारकरणमेव गुणं बाधिष्यते, तदयुक्तम्। इकारविधानं हि **लाघवार्थ**मपि स्यादिति गुण: प्रतिषिध्यते। नामिन: इत्यादि। यदि नामाधिकारो न स्यात् तदेहाप्यगुणत्वादाशिष्येकार इत्येत्त्वं स्यात् तस्मान्नाम्यधिकार एवाशिषं निवर्तयतीति।। ६४४।

## [बि० टी०]

स्थादो:। 'स्थादोरिच्च' कथन्न कृतम्, चकारादगुणश्च। ततश्च **''स्थादोरिरद्यतन्यामात्मने''** (३।५।२९) इति न कृतं स्यादिति चेत्, नैवम्। अविशेषे द्वयो: सिजाशिषोरनुवृत्ति: स्यात्। किञ्च सिज्लुकीत्यत्र इकारो वर्तते।। ६४४।

## [समीक्षा]

'समस्थिषत, अदित, अधित' आदि शब्दरूपों में वाञ्छित गुणनिषेध दोनों ही आचार्यों ने किया है। अन्तर यह है कि कातन्त्रकार ने साक्षात् ही गुणनिषेध किया है, जबकि पाणिनि ने ''स्थाघ्वोरिच्च'' (अ० १। २।१७) सूत्र से सिच् को किद्भाव तथा ''क्ङिति च'' (अ० १।१। ५) से उसके गुणनिषेध की प्रक्रिया अपनाई है। टीकाकार बिल्वेश्वर ने ''स्थादोरिच्च'' यह न्यासान्तर पूर्वपक्ष के रूप में उपन्यस्त करके उसका समाधान भी दर्शाया है कि अविशेष निर्देश से 'सिच्–आशी:' इन दोनों की ही अनुवृत्ति होने लग जाएगी, जो अभीष्ट नहीं है, अत: न्यासान्तर समीचीन नहीं है।

## [विशेष वचन]

१. आत्मनेपदमप्यत्र यदुच्यते तन्मन्दधियां सुखार्थम् (दु० टी०)।

२. इह वचनं लाघवार्थमपि स्यात् (दु० टी०)।

३. न चेकारविधानं सिचो लोपार्थमिति युक्तम् (वि० प०)।

४. इकारविधानं हि लाघवार्थमपि स्यात् (वि० प०)।

## [रूपसिद्धि]

**१. समस्थित।** सम् + अट् + स्था + सिच् + त। सम्–उपसर्गपूर्वक 'ष्ठा गति-निवृत्तौ' (१। २६७) धातु से "समवप्रविभ्यः स्थः" (३ । २। ४२–१४) सूत्र के नियमानुसार अद्यतनीविभक्तिसंज्ञक आत्मनेपद-प्रथमपुरुष–एकवचन 'त' प्रत्यय, अडागम, सिच् प्रत्यय, "स्थादोरिरद्यतन्यामात्मने" (३। ५। २९) से धातुगत आकार को इकार, प्रकृत सूत्र से अगुण तथा "ह्रस्वाच्चानिटः" (३। ६। ५२) से सिच् प्रत्यय का लोप।

**२. समस्थिषाताम्।** सम् + अट् + स्था + सिच् + आताम्। सम्–उपसर्गपूर्वक 'ष्ठा गतिनिवृत्तौ' (१। २६७) धातु से अद्यतनीसंज्ञक आताम्–प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**३. अदित।** अट् + दा + सिच् + त। 'डु दाञ् दाने' (२। ८४) धातु से अद्यतनी-संज्ञक 'त' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**४. अदिषाताम्।** अट् + दा + सिच् + आताम्। 'डु दाञ् दाने' (२। ८४) धातु से अद्यतनीसंज्ञक आताम्–प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**५. अधित।** अट् + धा + सिच् + त। 'डु धाञ् धारणपोषणयोः' (२। ८५) धातु से अद्यतनीविभक्तिसंज्ञक 'त' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**६. अधिषाताम्।** अट् + धा + सिच् + आताम्। 'डु धाञ् धारणपोषणयोः' (२। ८५) धातु से अद्यतनीविभक्तिसंज्ञक आताम्–प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ६४४।

# ६४५. भुवः सिज्लुकि [३। ५। १३]

## [सूत्रार्थ]

सिच् प्रत्यय का लुक् हो जाने पर 'भू' धातु को गुणादेश नहीं होता है।। ६४५।

## [दु० वृ०]

भुवो धातोः सिज्लुकि सति गुणो न भवति। अभूत्, अभूताम्, अभूवन्। भुव इति किम् ? अस्थात्। सिज्लुकीति वचनान्नामिनो निवृत्तिर्वेति शङ्क्यते।। ६४५।

## [दु० टी०]

भुवः। ननु लुञ्चनं **लुक्**, सम्पदादित्वाद् भावे क्विपि कृते लुचीति भवितव्यम्, कथं लुकीति ? सत्यम्, **लुक्शब्दोऽव्युत्पन्नोऽप्यस्तीति**। सिजिति किमर्थम् ? बोभवीति। अथ सिचीत्यर्थवशात् षष्ठ्यन्तं सम्बध्यते। **प्रतिपत्तिरियं गरीयसी स्यात्**।। ६४५।

## [वि० प०]

भुवः। **अभूदिति। "इण्स्था०"** (३।४।९३) इत्यादिना सिचो लुक्। अस्थाद् इत्यादि। यद्यत्रागुणत्वं स्यात् तदा **"दामागायति०"** (३।४।२९) इत्यादिना ईत्त्वं प्रसज्येत।

ननु च नामिन इति वर्तते, तत्कथमत्र प्रसङ्गः, येनैतदर्थं भूग्रहणमिति ? सत्यम्, एवं मन्यते, सिज्लुकीति सामान्यवचनाद् यावतो धातोः सिचो लुक्, तावत एव तस्मिन् सति गुणो न भवतीति **व्याप्तिः** प्रतिपद्येत, ततश्च नामिनो निवृत्तिरिति सर्वत्र स्यादित्याह — सिज्लुकीत्यादि। वाशब्देन प्रवृत्तिरपि कथ्यते। दृष्टानुवृत्तिकस्य नामिग्रहणस्य शङ्क्यमानेन वचनस्य व्यापकत्वेन निवृत्तेरयोगात् ततो भूग्रहणं **निःसन्देहार्थ**मित्यर्थः।। ६४५।

## [बि० टी०]

भुवः। ननु लुञ्चनं **लुक्**, सम्पदादित्वात् क्विपि कृते लुचीति भवितव्यम्, कथं लुकीति ? सत्यम्, **लुक्शब्दोऽव्युत्पन्नोऽस्ति**। ननु सिच इति किमर्थं लुकीत्यास्ताम्। न च वक्तव्यम् — चेक्रीयितलोपेऽपि स्यात् सिचीत्यर्थवशात् षष्ठ्यन्तः संबध्यते, भुवः सम्बन्धद्वारक एव लुकीत्यर्थः ? सत्यम्। **प्रतिपत्तिरियं गरीयसीति**। अस्धातोरादेशस्यापि ग्रहणमिति **हेमः**।। ६४५।

## [समीक्षा]

'**अभूत्**, अभूवन्, अभूवम्' आदि शब्दरूपों के सिद्ध्यर्थ 'भू' धातुगत ऊकार के **गुणाभाव की** अपेक्षा होती है, जिसकी पूर्ति दोनों व्याकरणों में की गई है। पाणिनीय **व्याकरण का** सूत्र है — ''भूसुवोस्तिङि'' (अ० ७। ३। ८८)। इस प्रकार उभयत्र साम्य **है।**

## [विशेष वचन]

१. सिज्लुकीति वचनान्नामिनो निवृत्तिर्वेति शङ्क्यते (दु० वृ०)।

२. लुक्शब्दोऽव्युत्पन्नोऽप्यस्ति (दु० टी०; बि० टी०)।

३. प्रतिपत्तिरियं गरीयसी स्यात् (दु० टी०; बि० टी०)।

४. भूग्रहणं निःसन्देहार्थम् (वि० प०)।

## [रूपसिद्धि]

**१. अभूत्।** अट् + भू + दि। 'भू सत्तायाम्' (१। १) धातु से भूतकालिक अद्यतनीविभक्तिसंज्ञक प्रथमपुरुष—एकवचन 'दि' प्रत्यय, अडागम, सिच् प्रत्यय, उसका लुक्, प्राप्त गुण का प्रकृत सूत्र द्वारा निषेध, दिप्रत्ययस्थ इकार का लोप तथा दकार को तकारादेश।

**२. अभूताम्।** अट् + भू + ताम्। 'भू सत्तायाम्' (१। १) धातु से 'आताम्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**३. अभूवन्।** अट् + भू + अन्। **'भू सत्तायाम्' (१।१) धातु से प्रथमपुरुष—बहुवचन** अन् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ६४५।

## ६४६. सूतेः पञ्चम्याम् [३। ५। १४]

### [सूत्रार्थ]

पञ्चमीविभक्ति–उत्तमपुरुषसंज्ञक प्रत्यय के पर में रहने पर 'सु' धातु को गुण नहीं होता है।। ६४६।

### [दु० वृ०]

सूतेः पञ्चम्युत्तमे गुणो न भवति। सूङ्–सुवै, सुवावहै, सुवामहै।। ६४६।

### [दु० टी०]

सूतेः। **तिब्निर्देशः स्वरूपग्राहक** एव, तेन चेक्रीयितलुगन्तस्य गुणो भवत्येव – सोषवाणि, सोषवाव। **यस्तु चेक्रीयितलुगन्तं भाषायां** नाभिधीयते इति मन्यते, **तन्मते विस्पष्टार्थ** एव। सूयति–सुवत्योर्विकरणेन व्यवधानात् **''सर्वेषामात्मने सार्वधातुकेऽनुत्तमे पञ्चम्याः''** (३। ५। १८) इति गुणप्रतिषेधाद् वचनम्।। ६४६।

### [वि० प०]

सूतेः। ''सर्वेषामात्मने सार्वधातुके'' (३। ५। १८) इति गुणनिषेधविधौ पञ्चम्युत्तमे प्रतिषेधाभावात् परिशिष्ट इहोत्तमपुरुषो गम्यते इत्याह – पञ्चम्युत्तम इति। 'षूङ् प्राणिगर्भविमोचने' (२। ५४) इत्यादावगुणत्वादुवादेशो भवति।। ६४६।

### [समीक्षा]

'सुवै' इत्यादि रूपों के सिद्ध्यर्थ जो गुणनिषेध की अपेक्षा होती है, उसकी पूर्ति दोनों ही व्याकरणों में की गई है। पाणिनि का सूत्र है – ''भूसुवोस्तिङि'' (अ० ७। ३। ८८)। अतः उभयत्र साम्य है।

### [विशेष वचन]

१. तिब्निर्देशः स्वरूपग्राहक एव (दु० टी०)।

२. यस्तु चेक्रीयितलुगन्तं भाषायां नाभिधीयते इति मन्यते तन्मते विस्पष्टार्थ एव (दु० टी०)।

### [रूपसिद्धि]

**१. सुवै।** सू + ऐ। 'षूङ् प्राणिगर्भविमोचने' (२। ५४) धातु से पञ्चमीविभक्तिसंज्ञक उत्तमपुरुष–एकवचन 'ऐ' प्रत्यय, ''धात्वादेः षः सः'' (३। ८। २४) सू मूर्धन्य षकार को दन्त्य सकारादेश, ''अन् विकरणः सार्वधातुके'' (३।२।३२) से अन् विकरण, उसका लोप, प्रकृत सूत्र से गुण का निषेध तथा 'सू' धातुगत उकार को उवादेश।

**२. सुवावहै।** सू + आवहै। 'षूङ् प्राणिगर्भविमोचने' (२। ५४) धातु से पञ्चमी–उत्तमपुरुष–द्विवचन 'आवहै' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**३. सुवामहै।** सू + आमहै। 'षूङ् प्राणिगर्भविमोचने' (२। ५४) धातु से पञ्चमी-विभक्तिसंज्ञक 'आमहै' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ६४६।

## ६४७. दीधीवेव्योश्च [३। ५। १५]

### [सूत्रार्थ]

'दीधीङ् दीप्तिदेवनयोः' (२। ५७) तथा 'वेवीङ् वेतिना तुल्ये' (२। ५८) धातु को गुण नहीं होता है।। ६४७।

### [दु० वृ०]

**छान्दसावेतौ** धातू **इत्येके**। पञ्चम्यामिति नेहानुवृत्तिः पृथग्योगात्। दीधीवेव्योश्च गुणो न भवति। आदीध्यै, आवेव्यै। आदीध्यनम्, आवेव्यनम्। आदीध्यकः, आवेव्यकः।। ६४७।

### [दु० टी०]

दीधी०। गुणबाधिका वृद्धिरिति आदीध्यकः, आवेव्यकः इत्यनेकाक्षरत्वाद् यत्त्वं भवति।। ६४७।

### [वि० प०]

दीधी०। छान्दसावित्यादि। **शर्ववर्मणस्तु वचनाद् भाषायामप्यवसीयते, न ह्यसौ छान्दसान् व्युत्पादयति शब्दानिति**। सर्वत्र "य इवर्णस्य०" (३। ४। ५८) इत्यादिना यत्वम्। न च वक्तव्यम् 'आदीध्यकः, आवेव्यकः' इत्यत्र गुणो नाम न भवतु, बुद्धिस्तु वुण्प्रत्यये कथन्न स्यादिति। गुणबाधिका वृद्धिरिति **"सिजाशिषोश्चात्मने"** (३। ५। १०) इत्यत्रात्मनेग्रहणेन ज्ञापितत्वात्।। ६४७।

### [समीक्षा]

'आदीध्यनम्, आवेव्यनम्' आदि शब्दरूपों के सिद्ध्यर्थ 'दीधी-वेवी' धातुओं के गुणनिषेध की अपेक्षा होती है, इसकी पूर्ति दोनों व्याकरणों में की गई है। पाणिनि का सूत्र है– "दीधीवेवीटाम्" (अ० १। १। ६)। अतः उभयत्र समानता है।

### [विशेष वचन]

१. छान्दसावेतौ धातू इत्येके (दु० वृ०)।

२. शर्ववर्मणस्तु वचनाद् भाषायामप्यवसीयते (वि० प०)।

### [रूपसिद्धि]

**१. आदीध्यै**। आ + दीधी + ऐ। 'आङ्' उपसर्गपूर्वक 'दीधीङ् दीप्तिदेवनयोः' (२। ५७) धातु से पञ्चमीविभक्ति–उत्तमपुरुष–एकवचन 'ऐ' प्रत्यय, "अन् विकरणः कर्तरि" (३।२।३२) से अन् विकरण, "अदादेर्लुग् विकरणस्य" (३।४।९२) से उसका लुक् तथा "य इवर्णस्यासंयोगपूर्वस्यानेकाक्षरस्य" (३। ४। ५८) से धात्वन्तवर्ती ईकार को यकारादेश।

**२. आवेव्यै**। आ + वेवी + ऐ। 'आङ्' उपसर्गपूर्वक 'वेवीङ् वेतिना तुल्ये' (२। ५८) धातु से पञ्चमीविभक्तिसंज्ञक 'ऐ' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**३. आदीध्यनम्।** आ + दीधी + युट् + सि। आङ् उपसर्गपूर्वक 'दीधीङ् दीप्ति-देवनयोः' (२। ५७) धातु से "युट् च" (४। ५। ९४) सूत्र द्वारा युट् प्रत्यय, ट् अनुबन्ध का प्रयोगाभाव, "युवुझामनाकान्ताः" (४। ६। ५४) से 'यु' को 'अन' आदेश, प्रकृत सूत्र से गुणाभाव, "य इवर्णस्या०" (३। ४। ५८) से ईकार को यकार, "धातुविभक्तिवर्जमर्थ-वल्लिङ्गम्" (२। १। १) से 'आदीध्यन' की लिङ्गसंज्ञा, सि—प्रत्यय, "अकारादसंबुद्धौ मुश्च" (२। २। ७) से 'मु' का आगम तथा 'सि' प्रत्यय का लोप।

**४. आवेव्यनम्।** आ + वेवी + युट् + सि। आङ् उपसर्गपूर्वक 'वेवीङ् वेतिना तुल्ये' (२। ५८) से युट् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

**५. आदीध्यकः।** आ + दीधी + वुण् + सि। आङ्-उपसर्गपूर्वक 'दीधीङ् दीप्तिदेवनयोः' (२। ५७) धातु से "वुण्तृचौ" (४। २। ४७) सूत्र द्वारा 'वुण्' प्रत्यय, युवुझामनाकान्ताः" (४। ६। ५४) से 'वु' को 'अक' आदेश, प्रकृत सूत्र से गुणाभाव, "य इवर्णस्या०" (३। ४। ५८) से ईकार को यकार, लिङ्गसंज्ञा तथा विभक्तिकार्य।

**६. आवेव्यकः।** आ + वेवीङ् + वुण् + सि। 'आङ्' उपसर्गपूर्वक 'वेवीङ् वेतिना तुल्ये' (२। ५८) धातु से 'वुण्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्॥ ६४७।

## ६४८. रुदविदमुषां सनि [३। ५। १६]

### [सूत्रार्थ]

'सन्' प्रत्यय के परे रहते 'रुदिर् अश्रुविमोचने' (२। ३१), 'विद ज्ञाने' (२। २७) तथा 'मुष स्तेये' (८। ४९) धातु का गुणादेश नहीं होता है॥ ६४८।

### [दु० वृ०]

एषां गुणो न भवति सनि परे। रुरुदिषति, विविदिषति, मुमुषिषति। पारिशेष्याद् विदिर्ज्ञानार्थः। सनि व्यञ्जनादेर्व्युपधत्वाद् विकल्पेष्टौ नित्यार्थं वचनम्॥ ६४८।

### [दु० टी०]

रुद०। पारिशेष्यादिति। अन्ये हि विदोऽनिटः **"सनि चानिटि"** (३।५।९) इत्यने-नैव तेषां सिद्धत्वात्। सनीति **"व्यञ्जनादेर्व्युपधस्यावो वा"** (४। १। ११) इत्यत्र **"संश्च"** इति वक्ष्यतीति भावः॥ ६४८।

### [वि० प०]

रुद०। पारिशेष्यादिति। अन्येषां विदामनिट्त्वात् **"सनि चानिटि"** (३। ५। ९) इत्यनेनैव सिद्धे गुणनिषेध इत्यर्थः। सनीत्यादि। **"व्यञ्जनादेर्व्युपधस्यावो वा"** (४। १। ११) इत्यतः संश्चेति वक्तव्यमिति वक्ष्यति। ततो यथा लिलिखिषति, लिलेखिषतीत्यत्र विकल्पः, तथाऽत्रापि स्यादिति भावः॥ ६४८।

### [समीक्षा]

'रुरुदिषति, विदित्वा, मुषित्वा' **इत्यादि** शब्दरूपों के सिद्ध्यर्थ अपेक्षित गुण-निषेध दोनों ही व्याकरणों में किया गया **है। पाणिनि** का सूत्र है — "रुदविदमुषग्रहिस्वपिप्रच्छः

संश्च'' (अ० १। २। ८)। यहाँ अन्तर यह है कि पाणिनि 'सन् – क्त्वा' प्रत्ययों का किद्भाव करके ''क्ङिति च'' (अ० १। १। ५) सूत्र द्वारा गुणनिषेध करते हैं और कातन्त्रकार शर्ववर्मा ने किद्भाव विना ही किए साक्षात् गुणनिषेध किया है। इस प्रकार कातन्त्रकार का लाघव सुनिश्चित है।

## [विशेष वचन]

१. पारिशेष्याद् विदिर्ज्ञानार्थः (दु० वृ०)।

२. अन्ये हि विदोऽनिटः, सनि चानिटीत्यनेनैव तेषां सिद्धत्वात् (दु० टी०; वि० प०)।

## [रूपसिद्धि]

**१. रुरुदिषति।** रुद + सन् + अन् + ति। 'रोदितुमिच्छति' इस अर्थ में 'रुदिर् अश्रुविमोचने' (२। ३१) धातु से ''धातोर्वा तुमन्तादिच्छतिनैककर्तृकात्'' (३। २। ४) से सन् प्रत्यय, ''चण्परोक्षाचेक्रीयितसनन्तेषु'' (३। ३। ७) से धातु को द्वित्व पूर्ववर्ती रूप की ''पूर्वोऽभ्यासः'' (३। ३। ४) से अभ्याससंज्ञा, ''अभ्यासस्यादिर्व्यञ्जनमवशेष्यम्'' (३। ३। ९) से 'द्' का लोप, ''इडागमोऽसार्वधातुकस्यादिर्व्यञ्जनादेरयकारादेः'' (३। ७। १) से इडागम, प्रकृत सूत्र से गुणाभाव, ''निमित्तात् प्रत्ययविकारागमस्थः सः षत्वम्'' (३। ८। २६) से सन् प्रत्ययस्थ सकार को षकार, ''ते धातवः'' (३। २। १६) से 'रुरुदिष' की धातुसंज्ञा, वर्तमानासंज्ञक – प्रथमपुरुष 'ति' प्रत्यय, अन् विकरण तथा ''अकारे लोपम्'' (२। १। १७) से पूर्ववर्ती अकार का लोप।

**२. विविदिषति।** विद् + सन् + इट् + ति। 'विद ज्ञाने' (२। २७) धातु से 'वेदितुमिच्छति' इस अर्थ में सन् प्रत्यय आदि प्रक्रिया पूर्ववत्।

**३. मुमुषिषति।** मुष् + सन् + इट् + ति। 'मोषितुमिच्छति' इस अर्थ में 'मुष स्तेये' (८। ४९) धातु से सन् प्रत्यय आदि प्रक्रिया पूर्ववत्।। ६४८।

## ६४९. नाम्यन्तानामनिटाम् [३। ५। १७]

## [सूत्रार्थ]

सन् प्रत्यय के परे रहते नाम्यन्त अनिट् धातुओं में गुण आदेश नहीं होता है।। ६४९।

## [दु० वृ०]

नाम्यन्तानां धातूनामनिटां सनि गुणो न भवति। चिचीषति, निनीषति, नुनूषति, तुष्टूषति, लुलूषति, चिकीर्षति। अनिटामिति किम् ? शिश्रयिषति। ज्ञीप्सतीति नित्यत्वात् कारितलोपः स्यात्।

**दीर्घाणां च कुतो दीर्घो गुणं बाधेत चेत् तदा।**
**दीर्घजाविरुरौ नाम इनो लोपस्तु दुर्लभः।। ६४९।**

## [दु० टी०]

नाम्य०। नामी अन्ते येषामिति विग्रहः। अन्तग्रहणं **स्पष्टार्थम्**। येन विधिस्तदन्तस्येति

सिद्धेः। न विद्यते इड् येभ्यो धातुभ्य इति सामानाधिकरण्यं **सुखार्थम्**। अन्यथा न विद्यते इड् यस्य सन इति विग्रहे **लाघवम**पि स्यात्। ननु किमर्थमिदं प्राप्ते हि गुणे **''स्वरान्तानां सनि''** (३। ८। १२) इति दीर्घ आरभ्यते स तस्य बाधको भविष्यतीति, अन्यथा दीर्घवचनमनर्थकं स्यात्। अथ 'चुकूषते' इति कुटादित्वाद् गुणप्रतिषेधे वचनमर्थवदिति। नैतदेवम्, **न ह्येकमुदाहरणं प्रति योगारम्भं प्रयोजयति**, अन्यथोकारमेव विदध्यात्। **अन्य** आह – **'कुङ् शब्दे'** (१। ४५८; ५। १०९) इति कुटादौ दीर्घ एव पठ्यते। तथाहि 'आकूतमस्याः प्रतिभाति रम्यम्' इति लोके प्रयोगो दृश्यते इति, तर्हि स्वरान्तानां दीर्घसामर्थ्याद् गुणो न भविष्यतीति। दीर्घाणान्तु प्रसज्येत। नैवम्, गुणबाधनाय दीर्घाणामपि दीर्घः क्रियते। यथा भुक्तवतामपि पुनर्भोजनं भोजनविशेषाय। यद्येवम्, इरुरोरपि बाधा स्यात्। नैवम्, **'यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते, यस्य तु विधे- र्निमित्तमस्ति नासौ विधिर्बाध्यते'** (का० परि० ५०), ऋकारस्य दीर्घत्वे हि इरुरोः प्राप्तिरिति दीर्घत्वं निमित्तमेव। 'तितीर्षति, मुमूर्षति' इति गुणबाधनार्थं दीर्घत्वं कर्तव्यमेव। यद्येवम्, असत्यगुणत्वेऽनवकाशत्वाद् दीर्घत्वेन यथा गुणस्य बाधा, तथा कारितलोपस्यापि बाधा स्यात्। अगुणत्वे तु सति सावकाशत्वात्। तथाहि नित्यत्वात् कारितलोप एव स्यादिति मनसि कृत्वाह – दीर्घाणां चेत्यादि। चकारो ह्रस्वसंसूचकः। चेद् यद्यर्थे, दीर्घाज्जातौ दीर्घजौ, नामाव्ययमभ्युपगमे प्राकाश्ये वा॥ ६४९।

## [वि० प०]

नाम्य०। शिश्रयिषतीति। **''इवन्तर्ध०''** (३। ७। ३३) इत्यादिना पक्षे इट्। अथ किमर्थमिदं यावता गुणे हि प्राप्ते **''स्वरान्तानां सनि''** (३। ८। १२) इति दीर्घो विधीयमानस्तस्य बाधको भविष्यति। अन्यथा दीर्घविधानमेवानर्थकं स्यादिति। अथ **'कुङ् शब्दे'** (१। ४५८; ५। १०९) इत्यस्य कुटादित्वाद् गुणनिषेधे 'चुकूषते' इत्यत्र दीर्घवचन- मर्थवदिति चेत् तदयुक्तम्। **न ह्येकमुदाहरणं प्रति योगारम्भं प्रयोजयति**। तथा च सति उकारमेव विदध्यात्, न च स्वरान्तानामिति। तर्हि चिचीषतीत्यादिषु ह्रस्वानां दीर्घसामर्थ्याद् गुणो न भवति, निनीषतीत्यादौ तु दीर्घाणां गुणः स्यादेव, न हि तेषां दीर्घत्वमुपलभ्यते स्वभावे दीर्घत्वात्। तदप्ययुक्तम्, गुणबाधनार्थं दीर्घाणामपि दीर्घः करिष्यते, यथा भुक्तवतामपि पुनर्भोजनं भोजनविशेषार्थमिति। एवन्तर्हि यथा गुणं बाधते चिकीर्षतीत्यादौ इरुरोरपि बाधेत ? नैवम्, इरुरौ हि दीर्घाज्जायमानौ कथं दीर्घेण बाधितुं शक्येते, यतः **'यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते, यस्य तु विधेर्निमित्तमस्ति नासौ विधिर्बाध्यते'** (का० परि० ५०), गुणं प्रति दीर्घस्योपदेशोऽनर्थक इत्यसौ बाध्यते। इरुरोः पुनर्दीर्घत्वमेव निमित्तम्, तेन विना तयोरभावात् कथम् **इरुरौ दीर्घत्वेन बाध्येते**। **नहि** निमित्तं नैमित्तिकस्य बाधकम्, तस्य निमित्तत्वाप्रसङ्गात्।

न च **वक्तव्यम् अगुणविधानेन** विना कथम् इरुराविति दीर्घस्य **ज्ञापकत्वाद्** गुणस्यैव सनि गुणाभावो ज्ञापित इति यस्माद् गुणो यस्मिन्नास्ति असा**वगुण इति कथं**

सन् गुणी स्यात् ? किञ्च ज्ञापकमपि लक्षणं भवति कथमगुणविधानं नास्तीति तस्मान्नेदं कर्तव्यमिति तदसत्, ज्ञीप्सतीत्यत्र कारितलोपार्थं कर्तव्यमेव, अन्यथा ह्यसत्यगुणत्वेऽनवकाशत्वाद् दीर्घत्वेन यथा गुणो बाध्यते, तथा कारितलोपोऽपि बाध्यते। सति पुनरगुणत्वे यत्र चिचीषतीत्यादिषु गुणो न भवति तत्र सावकाशं दीर्घत्वं बाधित्वा ज्ञीप्सतीत्यत्र नित्यत्वात् कारितलोप एव प्रवर्तते, यदि पुनरगुणत्वं सनो न स्यात् तदा अनवकाशत्वाद् दीर्घत्वमिति नित्यामपि परिभाषां बाधित्वा तदेव स्यात्, अनवकाशं हि वचनप्रामाण्यान्नित्यादिकं बाधते। यथोक्तम् **'परान्नित्यं नित्यादन्तरङ्गम्, अन्तरङ्गाच्चानवकाशं बलीयः'** (का० परि० ५१) इत्याह – दीर्घाणां चेति। चकारान्न केवलं ह्रस्वानां दीर्घाणां चेति सम्बन्धः। 'चेत्' शब्दो यद्यर्थे। यद्येवं मन्यसे ह्रस्वानां दीर्घाणां च कृतो दीर्घो गुणं बाधेत गुणबाधां सम्भावयेत्, तदा इरुरावपि बाधेतेति।

**सोपस्कारमक्षरयोजना कर्तव्या**। नाम शब्दोऽयमव्ययोऽभ्युपगमे वर्तते, यस्माद् दीर्घजाविरुरौ, तस्मात् तौ भविष्यतः इत्यभ्युपगच्छति प्रतिजानीते इत्यर्थः। अमर्षे वा परपक्षमसहमानः प्राह-इरुरौ दीर्घजाविति। ज्ञीप्सतीति। **'ज्ञा अवबोधने'** (८। ३१), हेताविन्, **''अर्तिह्री०''** (३। ६। २२) इत्यादिना पकारागमः। **'मारणतोषणनिशामनेषु ज्ञाः'** (१। ५२५) इति मानुबन्धत्वाद् ह्रस्वः। ऋधिज्ञप्योरीरीतौ वक्तव्याविति वचनादीकारः कारितलोपश्च।। ६४९।

## [बि० टी०]

नाम्यन्ता०। नन्वेतत्सूत्राभावे शिश्रयिषतीत्यादौ **''स्वरान्तानां सनि''** (३। ८। १२) इति दीर्घः कथन्न स्यात्। तत्राह **रमापतिः** – अस्मिन् सूत्राभावेऽनिटामिति कर्तव्यम्, तदा सेटि न स्यात्। **पत्राङ्कुर** आह – यथा ज्ञीप्सतीति दूषणं स्यात् तथाऽत्रापि। तत्र **हेमकरो**ऽप्याह – अत्र सकारे व्यक्तिराश्रयिष्यते इष्टत्वादिति शेषः। **पण्डित**स्त्वाह – तत्र हि द्विसकारः पठितव्यः। सकारादौ सनीत्यर्थः। **वासुदेवसेन**महोदयस्त्वाह – **''उवर्णस्य जान्तस्था०''** (३। ३। २७) इत्यत्र वर्णग्रहणं सेटि सनि गुणात् प्राग् द्विर्वचनार्थम्। तथा च वर्णग्रहणं बोधयति सेटि सनि दीर्घो न स्यात्। **'यं विधिम्०'** (का० परि० ५०) इत्यादि तत्र परिभाषायां **वृत्तिकार** आह – सुपीः, सुतूरित्यत्र **'यं विधिं प्रत्युपेदेशोऽनर्थकः'** (का० परि० ५०), उपदिश्यतेऽनेनेति **उपदेशो**ऽनर्थकः स विधिर्बाध्यते बाधितो भवति। अर्थाच्छिष्यादिभिः स योगो न कर्तव्य इत्यर्थः। यस्य तु विधेर्निमित्तमस्ति प्रयोजनमस्ति शब्दस्वरूपं नासौ विधिर्बाध्यते बाधितो न भवतीत्यर्थः।

ननु अस्मिन्नेवार्थे सति अत्रापि चिचीषतीत्यादौ 'यं विधिं प्रत्युपदेशोऽनर्थको दीर्घविधायकयोगोऽनर्थकः स विधिर्बाध्यते बाधितो भवतीत्यर्थः स्यात्। कथमुक्तम् 'यं गुणविधिं प्रति' इति **पञ्जिकायाम्**। अत्राह **रमापतिः**— 'यं विधिं प्रत्युपदेशोऽनर्थकः' **इति सूक्ष्मार्थ** एव। तदुक्तं तत्र **पञ्जीकृता** – 'यं गुणविधिं प्रति तत्साध्यक्षतिर्नास्तीति **पञ्जीकृतोक्तम्**।

**वासुदेवसेन**महोदयस्तु इदमाह – यं विधिं प्रत्युपदेशोऽनर्थको दीर्घोपदेशोऽनर्थकः स गुणविधिर्दीर्घविधिना बाध्यते इत्यर्थ एवात्र। न च वक्तव्यं **परिभाषावृत्त्या** सह विरोधः। यतो योऽर्थ उक्तस्तत्र भिन्नार्थोऽपि दृश्यते। यथा **'प्रत्ययलोपे प्रत्ययलक्षणम्'** (का० परि० ५२) इत्यत्र प्रत्यये परे प्रकृतेर्यत् कार्यं प्रत्ययलोपेऽपि तत् कार्यं भवतीति **परिभाषावृत्तिः** कथम् **''अन उस् सिजभ्यस्त०''** (३। ४। ३१) इत्यत्र अदुरित्युदाहरणम् प्रत्ययलोपलक्षणन्यायेन प्रत्ययस्य उसादेशः, तस्मात् **परिभाषावृतौ** यदुक्तं तदेव भवतीत्यकिञ्चित्करमेव।। ६४९।

## [समीक्षा]

'निनीषति, तुष्टूषति' इत्यादि शब्दरूपों के सिद्ध्यर्थ अपेक्षित गुणनिषेध दोनों ही व्याकरणों में निर्दिष्ट है। पाणिनि का सूत्र है – ''इको झल्'' (अ० १। २। ९)। यहाँ पाणिनि ने 'इक्' प्रत्याहार का प्रयोग किया है, जिसमें 'इ – उ – ऋ – ऌ' वर्ण समाविष्ट हैं। कातन्त्रकार ने प्रत्याहारों का प्रयोग नहीं किया है, उन्होंने समानसंज्ञक १० वर्णों में से अवर्ण को छोड़कर ८ वर्णों की 'नामी' संज्ञा की है – ''स्वरोऽवर्णवर्जो नामी'' (१। १। ७)। अतः उसी नामी संज्ञा का यहाँ प्रकृत सूत्र में प्रयोग किया गया है। टीकाकार बिल्वेश्वर ने 'हेमकर – रमापति – वासुदेवसेन – पण्डित' आदि आचार्यों के विविध पक्ष प्रस्तुत किए हैं।

## [विशेष वचन]

१. अन्तग्रहणं स्पष्टार्थम् (दु० टी०)।
२. सामानाधिकरण्यं सुखार्थम् (दु० टी०)।
३. न ह्येकमुदाहरणं प्रति योगारम्भं प्रयोजयति (दु० टी०; वि० प०)।
४. भुक्तवतामपि पुनर्भोजनं भोजनविशेषाय (दु० टी० वि० प०)
५. नामशब्दोऽयमव्ययोऽभ्युपगमे वर्तते (वि० प०)।
६. परिभाषावृत्तौ यदुक्तं तदेव भवतीत्यकिञ्चित्करमेव (बि० टी०)।

## [रूपसिद्धि]

**१. चिचीषति।** चि + सन् + अन् + ति। 'चिञ् चयने' (४। ५) धातु से ''धातोर्वा तुमन्तादिच्छतिनैककर्तृकात्'' (३। २। ४) सूत्र द्वारा इच्छार्थ में सन् प्रत्यय, द्वित्वादि, ''ते धातवः'' (३। २। १६) से 'चिचीष' की धातुसंज्ञा, वर्तमानाविभक्तिसंज्ञक प्रथमपुरुष – एकवचन 'ति' प्रत्यय, ''अन् विकरणः कर्तरि'' (३। २। ३२) से 'अन्' विकरण तथा ''अकारे लोपम्'' (२। १। १७) से अकार का लोप।

**२. निनीषति।** नि + सन् + अन् + ति। 'णीञ् प्रापणे' (१। ६००) धातु से इच्छार्थक सन् प्रत्यय, ''ते धातवः'' (३। २। १६) से 'निनीष' की धातुसंज्ञा तथा अन्य प्रक्रिया पूर्ववत्।

**३. नुनूषति।** नु + सन् + अन् + ति। 'णु स्तुतौ' (२। ७) धातु से इच्छार्थ में 'सन्' प्रत्यय, 'नुनूष' की धातुसंज्ञा तथा अन्य प्रक्रिया पूर्ववत्।

**४. तुष्टूषति।** स्तु + सन् + अन् + ति। 'ष्टुञ् स्तुतौ' (२। ६५) धातु से इच्छार्थक 'सन्' प्रत्यय, 'तुष्टूष' की धातुसंज्ञा तथा अन्य प्रक्रिया पूर्ववत्।

**५. लुलूषति।** लू + सन् + अन् + ति। 'लूञ् छेदने' (८। ९) धातु से सन् प्रत्यय, द्वित्वादि, 'लुलूष' की धातुसंज्ञा तथा अन्य प्रक्रिया पूर्ववत्।

**६. चिकीर्षति।** कृ + सन् + अन् + ति। 'डु कृञ् करणे' (७। ७) धातु से सन् प्रत्यय, द्वित्वादि, 'चिकीर्ष' की धातुसंज्ञा तथा अन्य प्रक्रिया पूर्ववत्।

**७. बुभूर्षति।** भृ + सन् + अन् + ति। 'डु भृञ् धारणपोषणयोः' (२। ८५) धातु से इच्छार्थक सन् प्रत्यय, द्वित्वादि, 'बुभूर्ष' की धातुसंज्ञा तथा अन्य प्रक्रिया पूर्ववत्।। ६४९।

## ६५०. सर्वेषामात्मने सार्वधातुकेऽनुत्तमे पञ्चम्याः [३। ५। १८]

### [सूत्रार्थ]

पञ्चमीविभक्ति में उत्तमपुरुष से भिन्न सार्वधातुकसंज्ञक आत्मनेपद प्रत्ययों के परे रहते सभी नाम्यन्त – नाम्युपध धातुओं तथा विकरण को गुण नहीं होता है।। ६५०।

### [दु० वृ०]

सर्वेषां धातूनां विकरणानां च नामिन उपधाया नाम्यन्तस्य च सार्वधातुके पञ्चम्युत्तमवर्जिते आत्मनेपदे गुणो न भवति। दुग्धे, स्तुते, चिनुते, कुरुते। सार्वधातुके इति किम् ? धोक्ष्यते, स्तोष्यते। अनुत्तमे पञ्चम्या इति किम् ? स्तवै, करवै।। ६५०।

### [दु० टी०]

सर्वेषाम्०। एवं दुहीत, दुग्धाम्, अदुग्ध। स्तुवीत, स्तुताम्, अस्तुत इति। दुहः कर्मकर्तृस्थो रुचादिः। सर्वेषामिति वचनं नाम्यन्तानामित्यस्य निवृत्त्यर्थम्। **''द्वित्वबहुत्वयोश्च परस्मै''** (३। ५। १९) इति द्वित्वबहुत्वयोरेव नियमेनात्मनेपदग्रहणमिह **सुखार्थमेव** स्यात्।। ६५०।

### [वि० प०]

सर्वेषाम्०। दुग्ध इति। **'दुह प्रपूरणे'** (२। ६१), **''दादेर्धः''** (३। ६। ५७), ततो **''घढधभेभ्यस्तथोर्धोऽधः''** (३। ८। ३) इति तस्य धत्वम्। धोक्ष्यते इति। **''तृतीयादेर्घढधभान्तस्य''** (३। ६। १००) इत्यादिना दकारस्य **धत्वम्**।। ६५०।

### [बि० टी०]

सर्वे०। ननु 'नामिन उपधाया **नाम्यन्तस्य च**' इत्युक्तं कथं **वृत्तिकृता**। अनन्तरत्वान्नाम्यन्त एवानुवर्तते **इति। न च वक्तव्यं सर्वेषां** ग्रहणबलान्नाम्यन्तनाम्युपधे च **प्राप्येते सर्वेषाम्** – ग्रहणसामर्थ्यात्। **यद् विकरणविधानं** तदेव **फलम्**, अन्यथा धातुरेव

वर्तिष्यते न विकरण इति ? सत्यम्। यदि अनन्तरत्वान्नाम्यन्त **एव वर्तते तदा सार्वधातुके** परे यो नाम्यन्तस्तस्य गुणः स्यात्, व्याप्तिन्यायाद् विकरणस्य च **स्यात्, किं सर्वग्रहणेन।** ननु किमर्थमात्मनेपदग्रहणं **''द्वित्वबहुत्वयोश्च परस्मै''** (३। ५। १९) **इति** नियमेनात्मनेपदग्रहणं प्राप्तम् ? सत्यम्, **सुखार्थम्**।। ६५०।।

## [समीक्षा]

'दुग्धे, स्तुते, चिनुते, कुरुते' इत्यादि शब्दरूपों के सिद्ध्यर्थ गुण के निषेध की अपेक्षा होती है, जिसकी पूर्ति दोनों व्याकरणों में की गई है। पाणिनि का सूत्र है – ''लिङ्सिचावात्मनेपदेषु, उश्च'' (अ० १। २। ११, १२), अन्तर यह है कि पाणिनि ने लिङ् – सिच् को किद्भाव करके ''क्ङिति च'' (अ० १। १। ५) से गुण का निषेध किया है और कातन्त्र में साक्षात् ही गुणनिषेध का विधान है।

## [विशेष वचन]

१. नियमेनात्मनेपदग्रहणमिह सुखार्थमेव स्यात् (दु० टी०; बि० टी०)।

## [रूपसिद्धि]

१. **दुग्धे**। दुह् + अन्लुक् + ते। 'दुह प्रपूरणे' (२। ६१) धातु के वर्तमानाविभक्तिसंज्ञक प्रथमपुरुष-आत्मनेपद 'ते' प्रत्यय, अन् विकरण, उसका लुक्, ह् को ग् तथा त् को ध् आदेश।

२. **स्तुते**। स्तु + अन्लुक् + ते। 'ष्टुञ् स्तुतौ' (२। ६५) धातु से आत्मनेपदसंज्ञक 'ते' प्रत्यय, अन् विकरण तथा उसका लुक्।

३. **चिनुते**। चि + नु + ते। 'चिञ् चयने' (४। ५) धातु से 'ते' प्रत्यय तथा ''नुः ष्वादेः'' (३। २। ३४) से 'नु' विकरण।

४. **कुरुते**। कृ + उ + ते। 'डु कृञ् करणे' (७। ७) धातु से वर्तमानासंज्ञक आत्मनेपद – प्रथमपुरुष – एकवचन 'ते' प्रत्यय, ''तनादेरुः'' (३। २। ३७) से उ – विकरण, ''उरोष्ठ्योपधस्य च'' (३। ५। ४३) से ऋ को उर् आदेश।। ६५०।

# ६५१. द्वित्वबहुत्वयोश्च परस्मै [३। ५। १९]

## [सूत्रार्थ]

पञ्चमी विभक्ति में उत्तमपुरुष को छोड़कर सार्वधातुकसंज्ञक परस्मैपद द्विवचन तथा बहुवचन के परे रहते सभी धातुओं तथा विकरणों को गुण नहीं होता है।। ६५१।

## [दु० वृ०]

सर्वेषां धातूनां विकरणानां च सार्वधातुके पञ्चम्युत्तमवर्जिते द्वित्वबहुत्वयोश्च परस्मैपदे गुणो न भवति। दुग्धः, दुहन्ति। स्तुतः, स्तुवन्ति। कुरुतः कुर्वन्ति। चिनुतः चिन्वन्ति। द्वित्वबहुत्वयोरिति किम् ? दोग्धि, स्तौति, चिनोति, करोति। अनुत्तमे पञ्चम्या इति किम् ? दोहाव, दोहाम। चिनवाव, चिनवाम।। ६५१।

## [दु० टी०]

द्वित्वबहुत्वयोः पौर्वापर्यं नास्तीति द्वित्वबहुत्वयोर्वर्तमाने परस्मैपदे परतः इति गम्यते। इहाप्यर्थात् परस्मैपद इति विज्ञायमाने **प्रतिपत्तिगौरवं** स्यात्।। ६५१।

## [वि० प०]

द्वित्व०। चिन्वन्तीति। **''नोर्वकारो विकरणस्य''** (३। ४। ६०) इति वकारः। स्तौतीति। **''उतो वृद्धिर्व्यञ्जनादौ''** (३। ६। ८४) इति गुणबाधिका वृद्धिः।। ६५१।

## [बि० टी०]

द्वित्व०। पूर्वसूत्रे आत्मनेपदग्रहणादिह परस्मैपदं प्राप्तम्, किञ्चोत्तरत्रात्मनेपदग्रहणात्, अन्यथा तस्मादेवात्मनेपदेऽनुवर्तमाने सिध्यति तस्मादत्र नानुवर्तते ? सत्यम्, **सुखार्थं** परस्मैपदग्रहणम्, किञ्च परस्मैपदग्रहणम् एकत्वेऽपि क्वचि**दगुणार्थम्**, तेन 'किं करोमि कथं कुर्मि' इत्यत्रास्योकारः प्रवर्तते इति **कश्चित्**।। ६५१।

## [समीक्षा]

'दुग्धः दुहन्ति, कुरुतः, कुर्वन्ति' इत्यादि शब्दरूपों के सिद्ध्यर्थ गुणनिषेध की अपेक्षा होती है, इसकी पूर्ति दोनों ही व्याकरणों में की गई है। पाणिनि का सूत्र है – ''सार्वधातुकमपित्'' (अ० १। २। ४)। अन्तर यह है कि पाणिनि 'तस् – झि' प्रत्ययों को प्रकृत सूत्र से डिद्वद्भाव करके तब ''ङिति च'' (१। १। ५) से गुणनिषेध का निर्देश करते हैं, जबकि कातन्त्रकार ने साक्षात् ही गुण का प्रतिषेध किया है।

## [विशेष वचन]

१. परस्मैपद इति विज्ञायमाने प्रतिपत्तिगौरवं स्यात् (दु० टी०)।

२. सुखार्थं परस्मैपदग्रहणम्, - - - क्वचिदगुणार्थम् (बि० टी०)।

## [रूपसिद्धि]

१. **दुग्धः**। दुह् + तस्। 'दुह प्रपूरणे' (२। ६१) धातु से वर्तमानासंज्ञक परस्मैपद – प्रथमपुरुष – द्विवचन 'तस्' प्रत्यय, ''अन् विकरणः कर्तरि'' (३। २। ३२) से अन् विकरण, ''अदादेर्लुग् विकरणस्य'' (३। ४। ९२) से उसका लुक्, ''दादेर्घः'' (३। ६। ५७) से हकार को घकार, ''घढधभेभ्यस्तथोर्धोऽधः'' (३। ८। ३) से तकार को धकार, ''द्वितीयचतुर्थयोः प्रथमतृतीयौ'' (३। ३। ११) से घकार को गकार तथा ''रेफसोर्विसर्जनीयः'' (२। ३। ६३) से सकार को विसर्गादेश।

२. **दुहन्ति**। दुह् + अन्लुक् + अन्ति। 'दुह प्रपूरणे' (२। ६१) धातु से वर्तमानासंज्ञक परस्मैपद-प्रथमपुरुष – बहुवचन 'अन्ति' प्रत्यय, अन् विकरण, उसका लुक् तथा गुणनिषेध।

३. **स्तुतः**। स्तु + अन्लुक् + तस्। **'ष्टुञ् स्तुतौ'** (२। ६५) धातु से तस् प्रत्यय तथा प्रकृत सूत्र से गुणनिषेध।

ककार को चकार तथा "अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिचट्सु" (३। ६। ५) से कृधातुगत ऋ को वृद्धि–आर्।। ६५८।

## ६५९. कुटादेरनिनिचट्सु [३। ५। २७]

### [सूत्रार्थ]

'इन्–इच्–अट्' प्रत्ययों से भिन्न प्रत्ययों के परे रहते कुटादिगणपठित धातुओं को गुण आदेश नहीं होता है।। ६५९।

### [दु० वृ०]

कुटादेर्गणस्येनिचटो वर्जयित्वाऽन्येषु प्रत्ययेषु गुणो न भवति। उत्कुटिता, उत्कुटितुम्, उत्कुटिष्यति, उत्कुटितव्यम्। उत्पुटिता, उत्पुटितुम्, उत्पुटिष्यति, उत्पुटितव्यम्। कुटादेरिति किम् ? लेखनीयम्। अनिनिचट्स्विति किम् ? उत्कोटयति, उदकोटि, उच्चुकोट। कथं पृच्छनीयम् ? **रूढित्वात्**।। ६५९।

### [दु० टी०]

कुटा०। **'कुङ् शब्दे'** (१। ४५८; ५। १०९) इति यावत् कुटादिस्तावद् **वृत्करणात्**। उच्चुकुटिषतीति। सनि सेट्यप्यनेन प्रतिषिध्यते। **केचिद्** अत्र कुटस्यादिः **कुटादि**रिति तत्पुरुषार्थं कुटादिशब्दमावर्णयन्ति, तेषां मते लिखेरपि गुणप्रतिषेधः, तदप्रमाणमित्याह– कुटादेरित्यादि। इन् च इच्च अट् च इनिचटः। अनिनिचटः इति **पर्युदासो**ऽयं नञ्। कथमित्यादि। प्रच्छेरनीय इ**त्येके**। संप्रसारणं **रूढ**मित्यर्थः। यथा **पञ्जि**केति। 'पचि विस्तारवचने' (९। ७२) इत्यस्य चकारस्य जत्वं दृश्यते, तथायमपीत्यर्थः।। ६५९।

### [वि० प०]

कुटादेः। कुट एवादिर्यस्यासौ **कुटादिः**। **केचित्** कुटादिशब्दस्यावृत्त्या कुटस्यादिः **कुटादि**रिति तत्पुरुषं वर्णयन्ति, तेन लिखेरपि प्रतिषेधः सिद्धो भवति, तदिहा**प्रमाण**मिति प्रत्युदाहरणेन दर्शयन्नाह–कुटादेरित्यादि। उदकोटीति। **"भावकर्मणोश्च"** (३। २। ३०) इतीचि कृते इचस्तलोपः। कथमित्यादि। प्रच्छेः कुटादित्वाभावादगुणे विधीयमानं संप्रसारणम् अनीयप्रत्यये न स्यादित्यर्थः।। ६५९।

### [समीक्षा]

'उत्कुटिता, उत्कुटितुम्' आदि शब्दरूपों में अपेक्षित गुण का अभाव दोनों ही व्याकरणों में निर्दिष्ट है। कुटादिगण उभयत्र स्वीकृत है और उन धातुओं से कुछ प्रत्ययों के परे रहते गुण किसी को भी अभीष्ट नहीं है। 'इन–इच्–अट्' प्रत्ययों के परवर्ती होने पर गुणादेश प्रवृत्त हो जाता है, अतः निषेधविधि में इन्हें छोड़ दिया गया है। पाणिनि ने ञित्–णित् प्रत्ययों से भिन्न प्रत्ययों में कुटादिगणपठित धातुओं को डिद्वद्भाव किया है, जिसके कारण **"ङिति च"** (अ० १। १। ५) सूत्र से गुणनिषेध होता है। डिद्वत् करने वाला सूत्र है– **"गाङ्कुटादिभ्योऽञ्णिन्ङित्"** (अ० १। २। १)।

## [समीक्षा]

'दुदुहतुः, दुदुहुः, निन्यतुः, निन्युः' इत्यादि शब्दरूपों के सिद्ध्यर्थ गुणनिषेध की जो अपेक्षा होती है, उसकी पूर्ति दोनों ही व्याकरणों में की गई है। पाणिनि का सूत्र है – ''असंयोगाल्लिट् कित्'' (अ० १।२। ५)। अन्तर यह है कि पाणिनि लिट् प्रत्ययों का किद्वद्भाव तथा ''क्ङिति च'' (१। १। ५) से गुण का निषेध करते है, परन्तु कातन्त्रकार ने साक्षात् ही गुणनिषेध का निर्देश प्रकृत सूत्र द्वारा किया है।

## [विशेष वचन]

१. पृथग्योगः स्पष्टार्थः (दु० टी०; बि० टी०)।

## [रूपसिद्धि]

१. **दुदुहतुः**। दुह् + परोक्षा- अतुस्। 'दुह प्रपूरणे' (२। ६१) धातु से परोक्षाविभक्तिसंज्ञक प्रथमपुरुष–द्विवचन 'अतुस्' प्रत्यय, धातु को द्वित्व, अभ्याससंज्ञादि, गुणाभाव तथा सकार को विसर्गादेश।

२. **दुदुहुः**। दुह + परोक्षा–उस्। 'दुह प्रपूरणे' (२। ६१) धातु से परोक्षाविभक्तिसंज्ञक 'उस्' प्रत्यय तथा धातु को द्विर्वचनादि–गुणाभाव।

३. **विव्यतुः**। अज् + परोक्षा–अतुस्। 'अज गतिक्षेपणयोः' (१। ६४) धातु से परोक्षाविभक्तिसंज्ञक 'अतुस्' प्रत्यय, 'अज' को 'वी' आदेश, धातु को द्विर्वचनादि–गुणाभाव।

४. **विव्युः**। अज् + परोक्षा–उस्। 'अज गतिक्षेपणयोः' (१। ६४) धातु से 'उस्' प्रत्यय, 'अज' को 'वी' आदेश तथा धातु को द्विर्वचनादि–गुणाभाव।

५. **निन्यतुः**। नी + परोक्षा–अतुस्। 'णीञ् प्रापणे' (१। ६००) धातु से परोक्षा-विभक्तिसंज्ञक प्रथमपुरुष–द्विवचन 'अतुस्' प्रत्यय, धातु को द्विर्वचनादि तथा गुणाभाव।

६. **निन्युः**। नी + परोक्षा–उस्। 'णीञ् प्रापणे' (१। ६००) धातु से 'उस्' प्रत्यय, धातु को द्विर्वचनादि तथा गुणाभाव।। ६५२।

## ६५३. सर्वत्रात्मने [३। ५। २१]

## [सूत्रार्थ]

परोक्षाविभक्ति–आत्मनेपदसंज्ञक प्रत्ययों के परवर्ती होने पर धातु को गुणादेश का निषेध होता है।।६५३।

## [दु० वृ०]

सर्वेषां धातूनां परोक्षायां च सर्वस्मिन्नात्मनेपदे गुणो न भवति। दुदुहे, दुदुहाते, दुदुहिरे। चक्रे, चक्राते, चक्रिरे।। ६५३।

## [दु० टी०]

सर्व०। 'परोक्षायां च सर्वत्र' इत्यास्ताम्, किमात्मनेपदग्रहणेन, परस्मैपदग्रहणमपि न सम्बध्यते, उत्तरत्र परस्मैपदग्रहणात् ? सत्यम्, **प्रतिपत्तिगौरवं स्यात्**।। ६५३।

## [बि० टी०]

सर्व०। परोक्षायां सर्वत्रेत्युच्यताम्, किमात्मनेपदग्रहणेन। न च वक्तव्यम्—परस्मैपद-मनुवर्तते, उत्तरत्र परस्मैपदग्रहणात् ? सत्यम्, **प्रतिपत्तिगौरवं स्यात्**।। ६५३।

## [समीक्षा]

'दुदुहे, दुदुहाते' आदि शब्दरूपों के सिद्ध्यर्थ धातु के गुणनिषेध की जो अपेक्षा होती है, उसकी पूर्ति दोनों ही व्याकरणों में की गई है। पाणिनि का सूत्र है — ''सार्वधातुकमपित्, क्ङिति च'' (अ० १। २। ४; १। ५)।

## [विशेष वचन]

१. प्रतिपत्तिगौरवं स्यात् (दु० टी०; बि० टी०)।

## [रूपसिद्धि]

१. **दुदुहे**। दुह + परोक्षा—ए। 'दुह प्रपूरणे' (२। ६१) धातु से परोक्षाविभक्तिसंज्ञक आत्मनेपद—प्रथमपुरुष 'ए' प्रत्यय, धातुद्विर्वचनादि तथा गुणाभाव।

२. **दुदुहाते**। दुह् + परोक्षा—आते। 'दुह प्रपूरणे' (२। ६१) धातु से परोक्षाविभक्तिसंज्ञक 'आते' प्रत्यय, धातु को द्विर्वचनादि तथा गुणाभाव।

३. **दुदुहिरे**। दुह् + परोक्षा—इरे। 'दुह प्रपूरणे' (२। ६१) धातु से 'इरे' प्रत्यय, धातु को द्विर्वचनादि तथा गुणाभाव।

४. **चक्रे**। कृ + परोक्षा—ए। 'डु कृञ् करणे' (७।७) धातु से परोक्षाविभक्तिसंज्ञक आत्मनेपद-प्रथमपुरुष—एकवचन 'ए' प्रत्यय, धातु को द्विर्वचन, अभ्यासादि कार्य, ऋ को र् आदेश तथा प्रकृत सूत्र से गुण का निषेध।

५. **चक्राते**। कृ + परोक्षा—आते। 'डु कृञ् करणे' (७।७) धातु से परोक्षाविभक्तिसंज्ञक 'आते' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

६. **चक्रिरे**। कृ + परोक्षा—इरे। 'डु कृञ् करणे' (७।७) धातु से परोक्षासंज्ञक 'इरे' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ६५३।

## ६५४. आशिषि च परस्मै [३। ५। २२]

## [सूत्रार्थ]

आशीर्विभक्तिसंज्ञक परस्मैपद प्रत्यय के परे रहते धातु को गुण आदेश का निषेध होता है।। ६५४।

## [दु० वृ०]

सर्वेषां धातूनां सर्वत्राशिषि च परस्मैपदे गुणो न भवति। चीयात्, चीयास्ताम्। दुह्यात्, दुह्यास्ताम्। परस्मा इति किम् ? चेषीष्ट, धोषीष्ट।। ६५४।

## [दु० टी०]

आशि०। 'आशिषि ये' इति सिद्धे परस्मा इति **स्पष्टार्थम्**। 'धोषीष्ट' इति धुनोते रूपमिदम्।। ६५४।

## [दु० वृ०]

स्थादासंज्ञकयोरद्यतन्यामात्मनेपदे इर्भवति। समस्थित, समस्थिषाताम्। अदित, अदिषाताम्। अधित, अधिषाताम्। आत्मन इति किम् ? अस्थात्, अदात्, अधात्।। ६६१।

## [दु० टी०]

स्थादो०। अद्यतन्यामात्मन इति **विषयसप्तमीयम्**। तेन सिज्व्यवधानेऽपि स्यात्। अस्थायि, उपास्थायिषाताम् इति इचि इटि इज्वद्भावे च परत्वदायिरेवेति। स्थादोरिः सिच्यात्मने इति विदध्यात्। **विचित्रा हि सूत्रस्य कृतिरिति**।। ६६१।

## [समीक्षा]

'समस्थित, समस्थिषाताम्' आदि प्रयोगों के सिद्ध्यर्थ धातुगत आकार को इकारादेश दोनों ही व्याकरणों में किया गया है। पाणिनि का सूत्र है – ''स्थाघ्वोरिच्च'' (अ० १।२।१७)। पाणिनि ''दाधा घ्वदाप्'' (अ० १।१।२०) सूत्र से जिन धातुओं की 'घु' संज्ञा करते हैं, उनकी कातन्त्रकार ने ''अदाब् दाधौ दा'' (३।१।८) से 'दा' संज्ञा की है। तदनुसार ही यहाँ सूत्रों में 'घु–दा' का प्रयोग किया गया है। टीकाकार दुर्गसिंह प्रकृत सूत्र के स्थान में ''स्थादोरिः सिच्यात्मने'' पाठ अधिक उचित मानते हैं, लेकिन शर्ववर्मा ने जो ऐसा नहीं किया, उसमें सूत्ररचना को विचित्र कहकर उसकी ग्राह्यता सिद्ध करते हैं – ''विचित्रा हि सूत्रस्य कृतिः''।

## [रूपसिद्धि]

१. **समस्थित**। सम् + अट् + स्था + सिच् + त। 'सम्' उपसर्गपूर्वक 'ष्ठा गति–निवृत्तौ' (१। २६७) धातु से अद्यतनीविभक्तिसंज्ञक आत्मनेपद–प्रथमपुरुष–एकवचन 'त' प्रत्यय, ''अड् धात्वादिर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु'' (३। ८। १६) से धातुपूर्व अडागम, प्रकृत सूत्र से आकार को इकार, ''सिजद्यतन्याम्'' (३। २। २४) से सिच् प्रत्यय तथा ''ह्रस्वाच्चानिटः'' (३। ६। ५२) से उसका लोप।

२. **समस्थिषाताम्**। सम् + अट् + स्था + सिच् + आताम्। 'सम्' उपसर्गपूर्वक 'ष्ठा गतिनिवृत्तौ' (१।२६७) धातु से अद्यतनीसंज्ञक द्विवचन 'आताम्' प्रत्यय, अडागम, सिच् प्रत्यय, प्रकृत सूत्र से आकार को इकार आदेश तथा ''नामिकरपरः प्रत्यय–विकारागमस्थः सिः षं नुविसर्जनीयषान्तरोऽपि'' (२। ४। ४७) से सकार को मूर्धन्यादेश।

३. **अदित**। अट् + दा + सिच् + त। 'डु दाञ् दाने' (२। ८४) से अद्यतनीसंज्ञक 'त' प्रत्यय, अडागम, सिच् प्रत्यय, इकारादेश तथा सिच् का लोप।

४. **अदिषाताम्**। अट् + दा + सिच् + आताम्। 'दा' धातु से अद्यतनीसंज्ञक 'आताम्' प्रत्यय, अडागम, सिच् प्रत्यय, इकार तथा षकारादेश।

५. **अधित**। अट् + धा + सिच् + त। 'डु धाञ् धारणपोषणयोः' (२। ८५) धातु

से अद्यतनीसंज्ञक 'त' प्रत्यय, अडागम, सिच् प्रत्यय, इकारादेश तथा सिच् प्रत्यय का लोप।

६. **अधिषाताम्**। अट् + धा + सिच् + आताम्। 'धा' धातु से अद्यतनीसंज्ञक 'आताम्' प्रत्यय, अडागम, सिच् प्रत्यय तथा इकारादेश।। ६६१।

## ६६२. मुचादेरागमो नकारः स्वरादनि विकरणे [३। ५। ३०]

### [सूत्रार्थ]

'अन्' विकरण के परे रहते मुचादिगणस्थ धातुओं के स्वर से परवर्ती नकारागम होता है।। ६६२।

### [दु० वृ०]

मुचादेर्गणस्य स्वरात् परो नकारागमो भवति अनि विकरणे परे। मुञ्चति, लुम्पति। विकरण इति किम् ? अमुचन्।। ६६२।

### [दु० टी०]

मुच०। मुचादयस्तुदादौ पठ्यन्ते, ते च **वृत्करणादष्टौ** भवन्ति, ननु स्वरादेरिति वचनादागमोऽनुमीयते, आदेशे हि तदन्तविधिनैव सिद्धत्वात्। न च प्रकृत्यन्तःपातिनः प्रत्ययत्वं युक्तम्, प्रत्ययाधिकाराभावाद् उत्तरत्र च 'नष्टः, नष्टवान्' इत्यनुषङ्गलोपो न दुष्यति ? सत्यम्। **आगमग्रहणं सुखार्थम्**। स्वरादित्यन्तावयवत्वनिरासार्थं परयोग–लक्षणैषा पञ्चमी, सप्तम्यन्तत्वादनः सन्निहितदेशं त्यक्त्वा स्वरात् परस्यादेशस्य ग्रहणे कारणाभावात्। विकरण इत्यादि। ननु परनिमित्तादेशोऽपि पूर्वस्मिन् स एवावसीयते **''अस्य तौ तल्लोपश्च''** इति वचनात् ? सत्यम्। अन्मात्रमत्र प्रतिपद्येत।। ६६२।

### [वि० प०]

मुचादेः। अमुचन्निति। **'मुच्लृ मोक्षणे'** (५। ७), लृदनुबन्धत्वाद् अन्, असन्ध्य–क्षरविधिः।। ६६२।

### [समीक्षा]

'मुञ्चति, लुम्पति' आदि प्रयोगों की सिद्ध्यर्थ मुचादि धातुओं में नकारागम दोनों व्याकरणों में किया गया है। पाणिनि ने एतदर्थ 'नुम्' आगम कहा है। उन्होंने मित् आगम के लिए नियम बनाया है कि वे अन्तिम अच् के बाद में होंगे – ''मिदचोऽन्त्यात् परः'' (अ० १।१। ४७)। नुमागमविधायक सूत्र है – ''शे मुचादीनाम्'' (अ० ७।१। ५९)। कातन्त्रकार ने प्रकृत सूत्र में 'न्' आगम को मुचादिधातुगत अन्तिम स्वर के बाद प्रवृत्त होने का निर्देश किया है। पाणिनि के 'शप्' विकरण के लिए कातन्त्र में 'अन्' विकरण की व्यवस्था की गई है। दोनों ही व्याकरणों में मुचादिगणपठित धातुओं की संख्या आठ बताई गई है।

## [बि० टी०]

हौ च। ननु आङः परस्येण्धातोरगुणत्वं प्रतिषिध्यते इति **परः**। तन्मतेऽगुणत्वात् कथम् एहीति पदमित्याह—आङ एत्वम् इति। तर्हि **'तामुपैहि महाराज! शरणं परमेश्वरीम्'** (दु० स० १३। ४) इति कथम् आङादिष्टत्वात् तामुपेहीति स्यात् ? सत्यम्। **परमता**वलम्बनेन तत्प्रयोगः, **ऋषिवचनाद्** वा। **वस्तुतस्तु आर्षप्रयोग** उपसर्गप्रतिरूपकेणाङा साधुरिति **गोपीनाथः**। यह्वोरिति कृते आशिषि च परस्मै, सप्तम्यां च, हौ चेति सूत्रत्रयं व्यर्थं स्यादिति चेत् कृद्यकारेऽप्यगुणत्वं कथन्न स्यात्, नैवम्। हिप्रत्ययस्य विभक्तेः साहचर्याद् यकारोऽपि विभक्तेर्ग्राह्यः। एवं चेत् **स्पष्टार्थम्**।। ६५६।

## [समीक्षा]

'नुहि, प्राप्नुहि' आदि शब्दरूपों के सिद्ध्यर्थ धातु—विकरण के गुणाभाव का निर्देश दोनों व्याकरणों में किया गया है। पाणिनि के सूत्र हैं — ''सेर्ह्यपिच्च, सार्वधातुकमपित्, क्ङिति च'' (अ० ३। ४। ८७; १। २। ४; १। ५)। यह ज्ञातव्य है कि कातन्त्रकार ने तो साक्षात् गुण का निषेध किया है, जबकि पाणिनि डिद्वद्भाव तथा उस आधार पर गुण का निषेध करते हैं।

## [विशेष वचन]

१. परमतावलम्बनेन तत्प्रयोगः ऋषिवचनाद् वा (बि० टी०)।

२. वस्तुतस्तु आर्षप्रयोग उपसर्गप्रतिरूपकेणाङा साधुरिति गोपीनाथः (बि० टी०)।

३. एवं चेत् स्पष्टार्थम् (बि० टी०)।

## [रूपसिद्धि]

१. **नुहि**। नु + हि। 'णु स्तुतौ' (२।७) धातु से पञ्चमीविभक्तिसंज्ञक 'हि' प्रत्यय, अन्—विकरण का लुक् तथा प्रकृत सूत्र द्वारा गुण का निषेध।

२. **दुग्धि**। दुह् + हि। 'दुह प्रपूरणे' (२। ६१) धातु से पञ्चमीसंज्ञक 'हि' प्रत्यय, ''दादेर्हस्य गः'' (२।३।४७) से ह् को ग्, ''हुश्नुड्भ्यां हेर्धिः'' (३। ५। ३५) से हि को धि तथा प्रकृत सूत्र से गुणाभाव।

३. **प्राप्नुहि**। प्र + आप् + नु + हि। 'प्र' उपसर्गपूर्वक 'आप्लृ व्याप्तौ' (४। १४) धातु से 'हि' प्रत्यय, नु—विकरण, समानदीर्घ तथा प्रकृत सूत्र से गुणाभाव।

४. **चिनु**। चि + नु + हि। 'चिञ् चयने' (४। ५) धातु से 'हि' प्रत्यय, 'हि' का लोप तथा गुणाभाव।

५. **सुनु**। सु + नु + हि। 'षुञ् अभिषवे' (४। १) धातु से 'हि' प्रत्यय, नु—विकरण, 'हि' का लोप तथा गुणाभाव।। ६५६।

## ६५७. तुदादेरनि [३। ५। २५]

### [सूत्रार्थ]

अन् विकरण के परे रहते तुदादिगणपठित धातुओं में गुण आदेश नहीं होता है।। ६५७।

### [दु० वृ०]

तुदादेरनि परे गुणो न भवति। तुदति, नुदति।। ६५७।

### [दु० टी०]

तुदा०। तुदादेरन्यस्यानोऽसम्भवाद् विकरण एव प्रतीयते। नुदति, नुदतीति। यद्यपि नुदिरुभयपदी, तथापि **भाषायाम्** आत्मनेपदं नाभिधीयते। परस्मैपदिषु **केचित्** पठन्ति।। ६५७।

### [वि० प०]

तुदादेः। तुदति, नुदतीति। **'तुद व्यथने, नुद प्रेरणे'** (५। १, २) उभयपदिनोऽप्यस्य **भाषायां** परस्मैपदमेवाभिधीयते।। ६५७।

### [बि० टी०]

तुदा०। ननु 'दि-ताम्-अन्' इत्यस्य ग्रहणं कथन्न स्यादिति चेत् न, **''द्वित्वबहुत्वयोश्च''** (३। ५। ३९) इत्यादिना प्रतिषेधात्।। ६५७।

### [समीक्षा]

'तुदति, नुदति' आदि शब्दरूपों की सिद्धि में धातुगुण के निषेध की आवश्यकता होती है, इसका निर्देश दोनों ही व्याकरणों में किया गया है। पाणिनि का सूत्र है – ''सार्वधातुकमपित्, क्ङिति च'' (अ० १। २। ४; १। ५)। पाणिनीय प्रक्रिया के अनुसार 'तुद' आदि धातुओं से होने वाले 'श' विकरण को ङिद्वद्भाव तथा उस आधार पर गुण का निषेध प्रवृत्त होता है। इसके विपरीत कातन्त्रकार सीधे ही गुणनिषेध करते हैं।

### [विशेष वचन]

१. यद्यपि नुदिरुभयपदी, तथापि भाषायामात्मनेपदं नाभिधीयते। परस्मैपदिषु केचित् पठन्ति (दु० टी०)।

२. नुद प्रेरणे। उभयपदिनोऽप्यस्य भाषायां परस्मैपदमेवाभिधीयते (वि० प०)।

### [रूपसिद्धि]

१. **तुदति**। तुद् + अन् + ति। 'तुद व्यथने' (५।१) धातु से वर्तमानाविभक्तिसंज्ञक प्रथमपुरुष–एकवचन 'ति' प्रत्यय, ''अन् विकरणः कर्तरि'' (३।२।३२) से 'अन्' विकरण तथा प्रकृत सूत्र से गुण का निषेध।

२. **नुदति**। नुद् + अन् + ति। 'णुद प्रेरणे' (५।२) धातु से वर्तमानासंज्ञक 'ति' प्रत्यय, अन् विकरण तथा गुण का प्रतिषेध।। ६५७।

नुमागम तथा कातन्त्रीय व्यवस्था के अनुसार नकारागम किया गया है। कातन्त्रव्याकरण में लोकप्रसिद्धि के आधार पर जिन वर्णों की 'स्वर' संज्ञा की गई है, पाणिनि ने उन्हें 'अच्' प्रत्याहार में परिगणित किया है। इसी के अनुरूप पाणिनि का सूत्र है –''रधिजभोरचि'' (अ० ७। १। ६१)। कातन्त्रटीकाकार ने ''जभेः स्वरे, रधेश्च'' इस प्रकार के दो सूत्र बनाने का जो पूर्वपक्ष प्रस्तुत किया है, उसे 'वरमक्षराधिक्यं न पुनर्योगविभागः' इस न्याय के आधार पर छोड़ दिया गया है। अर्थात् दो सूत्रों की रचना को समीचीन नहीं माना गया है।

## [रूपसिद्धि]

१. **रन्धयति**। रध् + इन् + ति। 'रन्धानं प्रयुङ्क्ते' इस विग्रह में 'रध हिंसायां च' (३।३७) धातु से ''धातोश्च हेतौ'' (३। २। १०) सूत्र द्वारा 'इन्' प्रत्यय, 'न्' अनुबन्ध का प्रयोगाभाव, ''रधिजभोः स्वरे'' (३। ५। ३२) से नकारागम, ''ते धातवः'' (३।२। १६) से 'रन्धि' की धातुसंज्ञा, वर्तमानासंज्ञक परस्मैपद–प्रथमपुरुष–एकवचन 'ति' प्रत्यय, 'अन्' विकरण ''मनोरनुस्वारो घुटि'' (२।४।४४) से 'न्' को अनुस्वार, ''वर्गे वर्गान्तः'' (२।४।४५) से अनुस्वार को नकार, ''नाम्यन्तयोर्धातुविकरणयोर्गुणः'' (३। ५। १) से इकार को गुण, तथा ''ए अय्'' (१।२। १२) से एकार को अयादेश।

२. **अरन्धि**। अट् + रध् + अद्यतनी–त। 'रध हिंसायां च' (३।३७) धातु से अद्यतनीविभक्तिसंज्ञक आत्मनेपद–प्रथमपुरुष–एकवचन 'त' प्रत्यय, अडागम, सिच् को बाधकर ''भावकर्मणोश्च'' (३।२।३०) से इच् प्रत्यय, प्रकृत सूत्र से नकारागम तथा ''इचस्तलोपः'' (३।४।३१) से 'त' प्रत्यय का लोप।

३. **जम्भयति**। जभ् + इन् + अन् + ति। 'जभमानं प्रयुङ्क्ते' इस विग्रह में 'जभ जृभि गात्रविनामे' (१।३९३) धातु से 'इन्' प्रत्यय, नकारागम, अनुस्वार, मकारादेश, 'जम्भि' की धातुसंज्ञा, वर्तमानासंज्ञक 'ति' प्रत्यय, अन् विकरण, इकार को गुण तथा अयादेश।

४. अजम्भि। अट् + जभ् + अद्यतनी–त। 'जभ' धातु से अद्यतनीसंज्ञक 'त' प्रत्यय, अडागम, इच् प्रत्यय, नकारागम तथा 'त' प्रत्यय का लोप।। ६६४।

## ६६५. नेटि रधेरपरोक्षायाम् [३। ५। ३३]

## [सूत्रार्थ]

परोक्षाविभक्ति से भिन्न प्रत्यय में इडागम होने पर 'रध' धातु को नकारागम नहीं होता है।। ६६५।

## [दु० वृ०]

रधेर्नकारागमो न भवति इटि परेऽपरोक्षायाम्। रधिता, रधिष्यति, रधितव्यम्। अपरोक्षायामिति किम् ? ररन्धिव ररन्धिम।। ६६५।।

ककार को चकार तथा ''अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिचट्सु'' (३। ६। ५) से कृधातुगत ऋ को वृद्धि—आर्।। ६५८।

## ६५९. कुटादेरनिनिचट्सु [३। ५। २७]

### [सूत्रार्थ]

'इन्—इच्—अट्' प्रत्ययों से भिन्न प्रत्ययों के परे रहते कुटादिगणपठित धातुओं को गुण आदेश नहीं होता है।। ६५९।

### [दु० वृ०]

कुटादेर्गणस्येनिचटो वर्जयित्वाऽन्येषु प्रत्ययेषु गुणो न भवति। उत्कुटिता, उत्कुटितुम्, उत्कुटिष्यति, उत्कुटितव्यम्। उत्पुटिता, उत्पुटितुम्, उत्पुटिष्यति, उत्पुटितव्यम्। कुटादेरिति किम् ? लेखनीयम्। अनिनिचट्स्विति किम् ? उत्कोटयति, उदकोटि, उच्चुकोट। कथं पृच्छनीयम् ? **रूढित्वात्**।। ६५९।

### [दु० टी०]

कुटा०। **'कुङ् शब्दे'** (१। ४५८; ५। १०९) इति यावत् कुटादिस्तावद् **वृत्करणात्**। उच्चुकुटिषतीति। सनि सेट्त्वप्यनेन प्रतिषिध्यते। **केचिद्** अत्र कुटस्यादिः **कुटादि**रिति तत्पुरुषार्थं कुटादिशब्दमावर्णयन्ति, तेषां मते लिखेरपि गुणप्रतिषेधः, तदप्रमाणमित्याह—कुटादेरित्यादि। इन् च इच्च अट् च इनिचटः। अनिनिचटः इति **पर्युदासो**ऽयं नञ्। कथमित्यादि। प्रच्छेरनीय इत्**येके**। संप्रसारणं **रूढ**मित्यर्थः। यथा **पञ्जि**केति। 'पचि विस्तारवचने' (९। ७२) इत्यस्य चकारस्य जत्वं दृश्यते, तथायमपीत्यर्थः।। ६५९।

### [वि० प०]

कुटादेः। कुट एवादिर्यस्यासौ **कुटादिः**। **केचित्** कुटादिशब्दस्यावृत्त्या कुटस्यादिः **कुटादि**रिति तत्पुरुषं वर्णयन्ति, तेन लिखेरपि प्रतिषेधः सिद्धो भवति, तदिहा**प्रमाण**मिति प्रत्युदाहरणेन दर्शयन्नाह—कुटादेरित्यादि। उदकोटीति। **''भावकर्मणोश्च''** (३। २। ३०) इतीचि कृते इचस्तलोपः। कथमित्यादि। प्रच्छेः कुटादित्वाभावादगुणे विधीयमानं संप्रसारणम् अनीयप्रत्यये न स्यादित्यर्थः।। ६५९।

### [समीक्षा]

'उत्कुटिता, उत्कुटितुम्' आदि शब्दरूपों में अपेक्षित गुण का अभाव दोनों ही व्याकरणों में निर्दिष्ट है। कुटादिगण उभयत्र स्वीकृत है और उन धातुओं से कुछ प्रत्ययों के परे रहने गुण किसी को भी अभीष्ट नहीं है। 'इन—इच्—अट्' प्रत्ययों के परवर्ती होने पर गुणादेश प्रवृत्त हो जाता है, अतः निषेधविधि में इन्हें छोड़ दिया गया है। पाणिनि ने त्रित्—णित् प्रत्ययों से भिन्न प्रत्ययों में कुटादिगणपठित धातुओं को डिद्वद्भाव किया है, जिसके कारण **''क्ङिति च''** (अ० १। १। ५) सूत्र से गुणनिषेध होता है। डिद्वत् करने वाला सूत्र है— ''गाङ्कुटादिभ्योऽञ्णिन्ङित्'' (अ० १। २। १)।

## [विशेष वचन]

१. कुङ् - शब्दे इति यावत् कुटादिस्तावत्, वृत्करणात् (दु० टी०)।

२. प्रच्छेरनीय इत्येके। सम्प्रसारणं रूढमित्यर्थः। यथा 'पञ्जिका' इति, पचि विस्तारवचने इत्यस्य चकारस्य जत्वं दृश्यते, तथायमपीत्यर्थः (दु० टी०; द्र०—वि०प०)।

## [रूपसिद्धि]

१. **उत्कुटिता**। उद् + कुट् + इट् + ता। 'उद्' उपसर्गपूर्वक 'कुट कौटिल्ये' (५। ८३) धातु से 'ता' प्रत्यय, इट् का आगम, द् को त् तथा प्रकृत सूत्र से गुण का अभाव।

२. **उत्कुटितुम्**। उद् + कुट् + इट् + तुम् + सि। 'कुट' धातु से तुम् प्रत्यय, इट् का आगम तथा प्रकृत सूत्र से गुणनिषेध।

३. **उत्कुटिष्यति**। उद् + कुट् + इ + स्यति। 'कुट्' धातु से भविष्यन्तीसंज्ञक 'स्यति' प्रत्यय, इडागम तथा गुणाभाव।

४. **उत्कुटितव्यम्**। उद् + कुट् + इट् + तव्य + सि। 'कुट्' धातु से 'तव्य' प्रत्यय, इडागम, गुणनिषेध, लिङ्गसंज्ञा, सि—प्रत्यय तथा अमादेश।

५. **उत्पुटिता**। उद् + पुट् + इट् + ता। 'उद्' उपसर्गपूर्वक 'पुट संश्लेषणे' (५। ८४) धातु से 'ता' प्रत्यय, अन्य प्रक्रिया सं०—१ की तरह।

६. **उत्पुटितुम्**। उद् + पुट् + इट् + तुम् + सि। रूपसिद्धि सं०—२ की तरह।

७. **उत्पुटिष्यति**। उद् + पुट् + इट् + स्यति। रूपसिद्धि सं०—३ की तरह।

८. **उत्पुटितव्यम्**। उद् + पुट् + इट् + तव्य + सि। रूपसिद्धि सं०—४ की तरह।। ६५९।

# ६६०. विजेरिटि [३। ५। २८]

## [सूत्रार्थ]

इडागम के रहने पर 'ओ विजी भयचलनयोः' (५। ११; ६। १९) धातु को गुण नहीं होता है।। ६६०।

## [दु० वृ०]

विजेरिटि परे गुणो न भवति। **'ओ विजी'** (५। ११५; ६। १९) — उद्विजिता, उद्विजितुम्, उद्विजिष्यते। कथम् उद्वेजिता ? इना सिद्धम्।। ६६०।

## [दु० टी०]

विजेः। **'विजिर् पृथग्भावे'** (२। ८२) इत्यस्य न ग्रहणम्, इडागमेनासंबन्धा—दित्याह— ओ विजीति। **'ओ विजी भयचलनयोः'** (५। ११५; ६। १९) इत्यस्य ग्रहणम् इत्यर्थः।। ६६०।

## [वि० प०]

विजेः। **'विजिर् पृथग्भावे'** (२। ८२) इत्यस्य न ग्रहणम् **''युजिरुजि०''** (३। ७। २०) इत्यादिनाऽनिट् स्यात्। अतः **'ओ विजी भयचलनयोः'** (५। ११५, ६। १९) इत्ययमेव तौदादिक आत्मनेपदी गृह्यते इत्याह – ओ विजीत्यादि। कथमित्यादि। हेत्विनन्ताष्ठायामिडागमे **''निष्ठेटीनः''** (४। १। ३६) इति कारितलोपः।। ६६०।

## [समीक्षा]

'उद्विजिता, उद्विजितुम्' इत्यादि शब्दरूपों के सिद्ध्यर्थ 'ओ विजी भयचलनयोः' (५। ११५; ६। १९) धातुगत इकार के गुणनिषेध की अपेक्षा होती है, जिसकी पूर्ति दोनों व्याकरणों में की गई है। पाणिनि का सूत्र है – ''विज इट्'' (अ० १।२।२)। इस सूत्र से इडादिप्रत्यय को डिद्वद्भाव होता है, जिसके फलस्वरूप ''क्ङिति च'' (अ० १। १। ५) से गुणनिषेध होने पर उक्त रूप सिद्ध होते हैं। कातन्त्रकार इस पारम्परिक प्रक्रिया को न अपनाकर साक्षात् ही गुण का प्रतिषेध करते हैं। व्याख्याकारों के अनुसार यहाँ 'विजिर् पृथग्भावे' (२।८२) धातु का ग्रहण नहीं होता, क्योंकि उसमें ''युजिरुचिरुन्जिभुजिभजिभन्जिसन्जित्यजिभ्रस्जियजिमस्जिसृजिनिजिविजिस्वन्जेर्जात्'' (३।७।२०) सूत्र द्वारा इडागम प्रवृत्त न होने से गुणनिषेध नहीं होगा।

## [रूपसिद्धि]

१. **उद्विजिता**। उद् + विजी + इट् + ता। 'उद्' उपसर्गपूर्वक ओ 'विजी भयचलनयोः' (५। ११५) धातु से श्वस्तनीसंज्ञक प्रथमपुरुष –एकवचन 'ता' प्रत्यय, ''इडागमोऽसार्वधातुकस्यादिर्व्यञ्जनादेरयकारादेः'' (३। ७। १) से इडागम तथा प्रकृत सूत्र से गुणादेश का निषेध।

२. **उद्विजितुम्**। उद् + विजी + इट् + तुम्। 'उद्' उपसर्गपूर्वक 'ओ विजी भयचलनयोः' (५। ११५) धातु से ''वुण्तुमौ क्रियायां क्रियार्थायाम्'' (४।४।६९) सूत्र द्वारा 'तुम्' प्रत्यय, इडागम, गुणनिषेध, लिङ्गसंज्ञा, 'सि' प्रत्यय, अव्ययसंज्ञा तथा ''अव्ययाच्च'' (२।४।४) से 'सि' प्रत्यय का लुक्।

३. **उद्विजिष्यते**। उद् + विजी + इट् + स्यते। 'उद्' उपसर्गपूर्वक 'ओ विजी भयचलनयोः' (५। ११५) धातु से भविष्यन्तीसंज्ञक 'स्यते' प्रत्यय, इडागम, मूर्धन्यादेश तथा प्रकृत सूत्र से गुणनिषेध।। ६६०।

# ६६१. स्थादोरिरद्यतन्यामात्मने [३। ५। २९]

## [सूत्रार्थ]

अद्यतनीविभक्तिसंज्ञक आत्मनेपद प्रत्ययों के परे रहते 'स्था' धातु तथा 'दा'–संज्ञक धातुओं के अन्तिम आकार को इकारादेश होता है।। ६६१।।

## [दु० वृ०]

स्थादासंज्ञकयोरद्यतन्यामात्मनेपदे इर्भवति। समस्थित, समस्थिषाताम्। अदित, अदिषाताम्। अधित, अधिषाताम्। आत्मन इति किम् ? अस्थात्, अदात्, अधात्।। ६६१।

## [दु० टी०]

स्थादो०। अद्यतन्यामात्मन इति **विषयसप्तमीयम्**। तेन सिज्व्यवधानेऽपि स्यात्। अस्थायि, उपास्थायिषाताम् इति इचि इटि इज्वद्भावे च परत्वदायिरेवेति। स्थादोरिः सिच्यात्मने इति विदध्यात्। **विचित्रा हि सूत्रस्य कृतिरिति**।। ६६१।

## [समीक्षा]

'समस्थित, समस्थिषाताम्' आदि प्रयोगों के सिद्ध्यर्थ धातुगत आकार को इकारादेश दोनों ही व्याकरणों में किया गया है। पाणिनि का सूत्र है – ''स्थाघ्वोरिच्च'' (अ० १।२।१७)। पाणिनि ''दाधा घ्वदाप्'' (अ० १।१।२०) सूत्र से जिन धातुओं की 'घु' संज्ञा करते हैं, उनकी कातन्त्रकार ने ''अदाब् दाधौ दा'' (३।१।८) से 'दा' संज्ञा की है। तदनुसार ही यहाँ सूत्रों में 'घु–दा' का प्रयोग किया गया है। टीकाकार दुर्गसिंह प्रकृत सूत्र के स्थान में ''स्थादोरिः सिच्यात्मने'' पाठ अधिक उचित मानते हैं, लेकिन शर्ववर्मा ने जो ऐसा नहीं किया, उसमें सूत्ररचना को विचित्र कहकर उसकी ग्राह्यता सिद्ध करते हैं – 'विचित्रा हि सूत्रस्य कृतिः''।

## [रूपसिद्धि]

१. **समस्थित**। सम् + अट् + स्था + सिच् + त। 'सम्' उपसर्गपूर्वक 'ष्ठा गति–निवृत्तौ' (१। २६७) धातु से अद्यतनीविभक्तिसंज्ञक आत्मनेपद–प्रथमपुरुष–एकवचन 'त' प्रत्यय, ''अड् धात्वादिर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु'' (३। ८। १६) से धातुपूर्व अडागम, प्रकृत सूत्र से आकार को इकार, ''सिजद्यतन्याम्'' (३। २। २४) से सिच् प्रत्यय तथा ''ह्रस्वाच्चानिटः'' (३। ६। ५२) से उसका लोप।

२. **समस्थिषाताम्**। सम् + अट् + स्था + सिच् + आताम्। 'सम्' उपसर्गपूर्वक 'ष्ठा गतिनिवृत्तौ' (१।२६७) धातु से अद्यतनीसंज्ञक द्विवचन 'आताम्' प्रत्यय, अडागम, सिच् प्रत्यय, प्रकृत सूत्र से आकार को इकार आदेश तथा ''नामिकरपरः प्रत्यय–विकारागमस्थः सिः षं नुविसर्जनीयषान्तरोऽपि'' (२। ४। ४७) से सकार को मूर्धन्यादेश।

३. **अदित**। अट् + दा + सिच् + त। 'डु दाञ् दाने' (२। ८४) से अद्यतनीसंज्ञक 'त' प्रत्यय, अडागम, सिच् प्रत्यय, इकारादेश तथा सिच् का लोप।

४. **अदिषाताम्**। अट् + दा + सिच् + आताम्। 'दा' धातु से अद्यतनीसंज्ञक 'आताम्' प्रत्यय, अडागम, सिच् प्रत्यय, इकार तथा षकारादेश।

५. **अधित**। अट् + धा + सिच् + त। 'डु धाञ् धारणपोषणयोः' (२। ८५) धातु

से अद्यतनीसंज्ञक 'त' प्रत्यय, अडागम, सिच् प्रत्यय, इकारादेश तथा सिच् प्रत्यय का लोप।

६. **अधिषाताम्**। अट् + धा + सिच् + आताम्। 'धा' धातु से अद्यतनीसंज्ञक 'आताम्' प्रत्यय, अडागम, सिच् प्रत्यय तथा इकारादेश।। ६६१।

## ६६२. मुचादेरागमो नकारः स्वरादनि विकरणे [३। ५। ३०]

### [सूत्रार्थ]

'अन्' विकरण के परे रहते मुचादिगणस्थ धातुओं के स्वर से परवर्ती नकारागम होता है।। ६६२।

### [दु० वृ०]

मुचादेर्गणस्य स्वरात् परो नकारागमो भवति अनि विकरणे परे। मुञ्चति, लुम्पति। विकरण इति किम् ? अमुचन्।। ६६२।

### [दु० टी०]

मुच०। मुचादयस्तुदादौ पठ्यन्ते, ते च **वृत्करणादष्टौ** भवन्ति, ननु स्वरादेरिति वचनादागमोऽनुमीयते, आदेशे हि तदन्तविधिनैव सिद्धत्वात्। न च प्रकृत्यन्तःपातिनः प्रत्ययत्वं युक्तम्, प्रत्ययाधिकाराभावाद् उत्तरत्र च 'नष्टः, नष्टवान्' इत्यनुषङ्गलोपो न दुष्यति ? सत्यम्। **आगमग्रहणं सुखार्थम्**। स्वरादित्यन्तावयवत्वनिरासार्थं परयोग–लक्षणैषा पञ्चमी, सप्तम्यन्तत्वादनः सन्निहितदेशं त्यक्त्वा स्वरात् परस्यादेशस्य ग्रहणे कारणाभावात्। विकरण इत्यादि। ननु परनिमित्तादेशोऽपि पूर्वस्मिन् स एवावसीयते **''अस्य तौ तल्लोपश्च''** इति वचनात् ? सत्यम्। अन्मात्रमत्र प्रतिपद्येत।। ६६२।

### [वि० प०]

मुचादेः। अमुचन्निति। **'मुच्लृ मोक्षणे'** (५। ७), लृदनुबन्धत्वाद् अन्, असन्ध्य–क्षरविधिः।। ६६२।

### [समीक्षा]

'मुञ्चति, लुम्पति' आदि प्रयोगों सिद्ध्यर्थ मुचादि धातुओं में नकारागम दोनों व्याकरणों में किया गया है। पाणिनि एतदर्थ 'नुम्' आगम कहा है। उन्होंने मित् आगम के लिए नियम बनाया है कि वे अन्तिम अच् के बाद में होंगे – ''मिदचोऽन्त्यात् परः'' (अ० १।१। ४७)। नुमागमविधायक सूत्र है – ''शे मुचादीनाम्'' (अ० ७।१। ५९)। कातन्त्रकार ने प्रकृत सूत्र में 'न्' आगम को मुचादिधातुगत अन्तिम स्वर के बाद प्रवृत्त होने का निर्देश किया है। पाणिनि के 'शप्' विकरण के लिए कातन्त्र में 'अन्' विकरण की व्यवस्था की गई है। दोनों ही व्याकरणों में मुचादिगणपठित धातुओं की संख्या आठ बताई गई है।

## [विशेष वचन]

१. आगमग्रहणं सुखार्थम् (दु० टी०)।

## [रूपसिद्धि]

१. **मुञ्चति**। मुच्लृ + अन् + ति। 'मुच्लृ मोक्षणे' (५। ७) धातु से वर्तमानासंज्ञक परस्मैपद–प्रथमपुरुष 'ति' प्रत्यय, "अन् विकरणः कर्तरि" (३।२।३२) से 'अन्' विकरण, 'न्' अनुबन्ध का प्रयोगाभाव, प्रकृत सूत्र से 'मुच्' धातुघटित उकार के बाद नकारागम, "मनोरनुस्वारो धुटि" (२।४।४४) से नकार को अनुस्वार तथा "वर्गे वर्गान्तः" (२।४।४५) से उसको चवर्गीय पञ्चम वर्ण 'ञ्' आदेश।

२. **लुम्पति**। लुप् + अन् + ति। 'लुप्लृ छेदने' (५। ८) धातु से वर्तमानासंज्ञक परस्मैपद–प्रथमपुरुष–एकवचन 'ति' प्रत्यय, अन्–विकरण, नकारागम, अनुस्वार तथा वर्गीय पञ्चम वर्ण आदेश।। ६६२।

## ६६३. मस्जिनशोर्धुटि [३। ५। ३१]

## [सूत्रार्थ]

धुट्संज्ञक वर्णों के परे रहते 'मस्ज्–नश्' धातुघटित अन्तिम स्वर के बाद नकारागम होता है।। ६६३।

## [दु० वृ०]

मस्जिनशोः स्वरात् परो नकारागमो भवति धुटि परे। मङ्क्ता, मङ्क्ष्यति। नंष्टा, नङ्क्ष्यति।। ६६३।

## [दु० टी०]

मस्जि०। मङ्क्तेति। "**व्रश्चिमस्जोर्धुटि**" (३।६।३५) इत्यन्तलोपे "**चवर्गस्य किरसवर्णे**" (३।६।५५) इति कित्वम्। 'मग्नः, मग्नवान्' इति प्रागन्तरङ्गत्वान्नकारागमेऽ–न्तरङ्गत्वाच्चान्त्यलोपे सति पश्चादनुषङ्गलोपस्ततो गत्वम्। "**ल्वाद्योदनुबन्धाच्च**" (४। ६। १०४) इति निष्ठातकारस्य नकारः।। ६६३।

## [वि० प०]

मस्जि०। 'मङ्क्ता, मङ्क्ष्यति' इत्यन्तरङ्गत्वान्नकारागमे ततः "**धुटां तृतीयः**" (२।३।६०) इति सकारस्य दकारः। "**तवर्गश्चटवर्गयोगे चटवर्गौ**" (२। ४। ४६) इति कृते "**वृश्चिमस्जोर्धुटि**" (३। ६। ३५) इत्यन्तलोपे, "**चवर्गस्य किरसवर्णे**" (३। ६। ५५) इति ककारेऽनुस्वारस्य वर्गे वर्गान्तत्वे च रूपमिदम्। 'नंष्टा, नंक्ष्यति' इत्यन्तरङ्गत्वान्नकारागमः "**छशोश्च**" (३। ६। ६०) इति षत्वे सति एकत्र षाट्टवर्गत्वम्, अन्यत्र "**षढोः कः से**" (३। ८। ४) इति कत्वम्।। ६६३।

## [समीक्षा]

'मङ्क्ता, मङ्क्ष्यति' आदि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में

नकारागम किया गया है। पाणिनि ने जिन वर्णों के अवबोधार्थ 'झल्' प्रत्याहार का व्यवहार किया है, उनके लिए कातन्त्रकार ने 'धुट्' संज्ञा की है – ''धुड् व्यञ्जन–मनन्तःस्थानुनासिकम्'' (२।१।१३)। अतः इन दोनों शब्दों का उल्लेख पृथक् रूप में हुआ है। पाणिनि का सूत्र है – ''झषस्तथोर्धोऽधः'' (अ० ८।२।४०)।

## [रूपसिद्धि]

१. **मङ्क्ता**। मस्ज् + ता। 'टु मस्जो शुद्धौ' (५।५१) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय, ''युजिरुजिरञ्जिभुजिभजि०'' (३।७।२०) से अनिट्, प्रकृत सूत्र से नकारागम, ''धुटां तृतीयः'' (२।३।६०) से सकार को दकार, ''तवर्गश्चटवर्गयोगे चटवर्गौ'' (२।४।४६) से द् को ज्, ''व्रश्चिभस्जोर्धुटि'' (३।६।३५) से 'मस्ज्' धातुगत ज् का लोप, ''चवर्गस्य किरसवर्णे'' (३।६।५५) से ज् को क्, ''मनोरनुस्वारो धुटि'' (२।४।४४) से न् को अनुस्वार तथा ''वर्गे वर्गान्तः'' (२।४।४५) से कवर्गीय अन्त्य वर्ण–ङ्।

२. **मङ्क्ष्यति**। मस्ज् + स्यति। 'टु मस्जो शुद्धौ' (५।५१) धातु से भविष्यन्ती–विभक्तिसंज्ञक 'स्यति' प्रत्यय, अनिट्, नकारागम, स् को द्, द् को ज्, धातु के अन्तिम वर्ण ज् का लोप, ज् को क्, षत्व, अनुस्वार तथा कवर्गान्त ङ्–आदेश।। ६६३।

## ६६४. रधिजभोः स्वरे [३।५।३२]

## [सूत्रार्थ]

स्वर वर्ण के परे रहते 'रध्–जभ्' धातुओं में स्वर के बाद नकारागम होता है।। ६६४।

## [दु० वृ०]

रधिजभोः स्वरात् परो नकारागमो भवति स्वरे परे। रन्धयति, अरन्धि। जम्भयति, अजम्भि।। ६६४।

## [दु० टी०]

रधि०। रन्धयतीत्यादि। अकृत एव नकारागमेऽस्योपधाया दीर्घः कथन्न स्यात्, परत्वात् ? सत्यम्। नित्यत्वान्नकारागमेन बाध्यते प्रतिपदविधानाच्च। 'आगमादेशयोरागम–विधिर्बलवान्' (का० परि० ४०) इति वा। स्वर इति किम् ? रद्धा। जभ्यम्। पवर्गान्ताद् यप्रत्ययः। जभ्यते इति प्रत्युदाहरणं न भवति, अनुषङ्गलोपेनैव सिद्धत्वात्। यदि त्विह जभेः स्वरे रधेश्चेति योगो विभज्यते, उत्तरत्र रधिग्रहणं न कर्तव्यं स्यात्, किन्तु 'वरमक्षराधिक्यं न पुनर्योगविभागः' इति।। ६६४।

## [समीक्षा]

'रन्धयति, रन्धकः, जम्भयति, जम्भकः' इत्यादि प्रयोगों के सिद्ध्यर्थ दोनों ही व्याकरणों में नकारागम की व्यवस्था की गई है। पाणिनीय व्यवस्था के अनुसार

नुमागम तथा कातन्त्रीय व्यवस्था के अनुसार नकारागम किया गया है। कातन्त्रव्याकरण में लोकप्रसिद्धि के आधार पर जिन वर्णों की 'स्वर' संज्ञा की गई है, पाणिनि ने उन्हें 'अच्' प्रत्याहार में परिगणित किया है। इसी के अनुरूप पाणिनि का सूत्र है –''रधिजभोरचि'' (अ० ७। १। ६१)। कातन्त्रटीकाकार ने ''जभेः स्वरे, रधेश्च'' इस प्रकार के दो सूत्र बनाने का जो पूर्वपक्ष प्रस्तुत किया है, उसे 'वरमक्षराधिक्यं न पुनर्योगविभागः' इस न्याय के आधार पर छोड़ दिया गया है। अर्थात् दो सूत्रों की रचना को समीचीन नहीं माना गया है।

## [रूपसिद्धि]

१. **रन्धयति**। रध् + इन् + ति। 'रन्धानं प्रयुङ्क्ते' इस विग्रह में 'रध हिंसायां च' (३।३७) धातु से ''धातोश्च हेतौ'' (३। २। १०) सूत्र द्वारा 'इन्' प्रत्यय, 'न्' अनुबन्ध का प्रयोगाभाव, ''रधिजभोः स्वरे'' (३। ५। ३२) से नकारागम, ''ने धातवः'' (३।२। १६) से 'रन्धि' की धातुसंज्ञा, वर्तमानासंज्ञक परस्मैपद–प्रथमपुरुष–एकवचन 'ति' प्रत्यय, 'अन्' विकरण ''मनोरनुस्वारो घुटि'' (२।४।४४) से 'न्' को अनुस्वार, ''वर्गे वर्गान्तः'' (२।४।४५) से अनुस्वार को नकार, ''नाम्यन्तयोर्धातुविकरणयोर्गुणः'' (३। ५। १) से इकार को गुण, तथा ''ए अय्'' (१।२। १२) से एकार को अयादेश।

२. **अरन्धि**। अट् + रध् + अद्यतनी–त। 'रध हिंसायां च' (३।३७) धातु से अद्यतनीविभक्तिसंज्ञक आत्मनेपद–प्रथमपुरुष–एकवचन 'त' प्रत्यय, अडागम, सिच् को बाधकर ''भावकर्मणोश्च'' (३।२।३०) से इच् प्रत्यय, प्रकृत सूत्र से नकारागम तथा ''इचस्तलोपः'' (३।४।३१) से 'त' प्रत्यय का लोप।

३. **जम्भयति**। जभ् + इन् + अन् + ति। 'जभमानं प्रयुङ्क्ते' इस विग्रह में 'जभ जृभि गात्रविनामे' (१।३९३) धातु से 'इन्' प्रत्यय, नकारागम, अनुस्वार, मकारादेश, 'जम्भि' की धातुसंज्ञा, वर्तमानासंज्ञक 'ति' प्रत्यय, अन् विकरण, इकार को गुण तथा अयादेश।

४. अजम्भि। अट् + जभ् + अद्यतनी–त। 'जभ' धातु से अद्यतनीसंज्ञक 'त' प्रत्यय, अडागम, इच् प्रत्यय, नकारागम तथा 'त' प्रत्यय का लोप।। ६६४।

# ६६५. नेटि रधेरपरोक्षायाम् [३। ५। ३३]

## [सूत्रार्थ]

परोक्षाविभक्ति से भिन्न प्रत्यय में इडागम होने पर 'रध' धातु को नकारागम नहीं होता है।। ६६५।

## [दु० वृ०]

रधेर्नकारागमो न भवति इटि परेऽपरोक्षायाम्। रधिता, रधिष्यति, रधितव्यम्। अपरोक्षायामिति किम् ? ररन्धिव ररन्धिम।। ६६५।।

## [दु० टी०]

नेटि०। कथं रेधिवान् इति। कृतयोरेत्वाभ्यासलोपयोर्वन्सावेकस्वरादिटि कृतेऽनिदनुबन्धानामगुणेऽनुषङ्गलोपः। ननु नियम एवास्तां किं प्रतिषेधेन परोक्षायामेवेटि नान्यस्मिन्निडादावित्यर्थः ? सत्यम्, विपरीतनियमोऽपि सम्भाव्येत – परोक्षायामिट्येवेति। ततश्च 'ररन्ध' इत्यत्र न स्यात्, रधितेत्यादौ स्यादेव। रधादिपाठात् पक्षे इट्।। ६६५।

## [वि० प]

नेटि०। रधितेत्यादि। ''रधादिभ्यश्च'' (४। ६। ८२) इति पक्षे इट्। ररन्धिवेति। स्नादिनियमान्नित्यमिट्।। ६६५।

## [समीक्षा]

'रधिता, रधिष्यति' इत्यादि प्रयोगों के सिद्ध्यर्थ उभयत्र नकारागम का निषेध किया गया है। पाणिनि ने जिन परोक्षकालिक प्रत्ययों के अवबोधार्थ सांङ्केतिक 'लिट्' लकार का प्रयोग किया है, तदर्थ कातन्त्रकार ने लोकप्रसिद्ध 'परोक्षा' संज्ञा की है। अतः तदनुसार शब्दों का प्रयोग सूत्रों में हुआ है। पाणिनि का सूत्र है– ''नेट्यलिटि रधेः'' (अ० ७। १। ६२)। टीकाकार ने कहा है कि यहाँ यदि यह नियम ही मान लिया जाए कि परोक्षाविषयक इडागम में ही नकारागम प्रवृत्त होगा, अन्यविषयक इडागम में नहीं, तो इस प्रकार प्रतिषेध की कोई आवश्यकता नहीं रह जाती है। लेकिन विपरीत नियम की भी सम्भावना हो सकती है– 'परोक्षाविभक्ति में इडागम होने पर ही नकारागम हो, इडागम के अभाव में नकारागम न हो। इस प्रकार 'ररन्ध' में तो नकारागम नहीं होना चाहिए और 'रधिता' में हो जाना चाहिए–इस अनिष्ट की आशङ्का से नियम न बनाकर प्रतिषेध किया गया है।

## [विशेष वचन]

१. विपरीतनियमोऽपि सम्भाव्यते, परोक्षायामिट्येवेति (दु० टी०)।

## [रूपसिद्धि]

१. **रधिता**। रध् + इट् + ता। 'रध हिंसायां च' (३। ३७) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय, ''इडागमोऽसार्वधातुकस्यादिर्व्यञ्जनादेरयकारादेः'' (३। ७। १) से इडागम तथा प्रकृत सूत्र से नकारागम का निषेध।

२. **रधिष्यति**। रध् + इट् + स्यति। 'रध्' धातु से भविष्यन्तीसंज्ञक परस्मैपद– प्रथमपुरुष – एकवचन 'स्यति' प्रत्यय, इडागम, मूर्धन्य आदेश तथा प्रकृत सूत्र से नकारागम का निषेध।

३. **रधितव्यम्**। रध् + इट् + तव्य + सि। 'रध्' धातु से ''तव्यानीयौ'' (३। २। ९) सूत्र द्वारा 'तव्य' प्रत्यय, इडागम, नकारागम का निषेध, 'रधितव्य' की लिङ्गसंज्ञा, 'सि' प्रत्यय, ''अकारादमम्बुद्धौ मुश्च'' (२। २। ७) से 'मु' का आगम तथा 'सि' प्रत्यय का लोप।। ६६५।

## ६६६. रभिलभोरविकरणपरोक्षयोः [३। ५। ३४]

### [सूत्रार्थ]

विकरण तथा परोक्षाविभक्ति से भिन्न स्वरादि प्रत्यय के परे रहने पर 'रभ्–लभ्' धातुओं में नकारागम होता है।। ६६६।

### [दु० वृ०]

रभिलभोः स्वरात् परो नकारागमो भवति अविकरण – परोक्षयोः स्वरे परे। आरम्भयति, आरम्भि, आरम्भो वर्तते। आलम्भयति, आलम्भि, आलम्भो वर्तते। अविकरणपरोक्षयोरिति किम् ? आरभते, आलभते, रेभे, लेभे।। ६६६।

### [दु० टी०]

रभि०। विकरणश्च परोक्षा चेति द्वन्द्वे पश्चान्नञ्समासः। विकरणपरोक्षाभ्यामन्यत्र स्वरे भवतीति **पर्युदासादा**ख्यातिक एव स्यात् ? सत्यम्। नात्र प्रकरणमाश्रीयते प्रसज्य–प्रतिषेधेऽपि, तथा आख्यातिके स्वरे भवति विकरणपरोक्षयोर्न भवतीति यस्मादा**श्रयणं पुरुषायत्तमि**ति। रभिलभिभ्यां सम्बन्धस्याविवक्षितत्वान्न यथासङ्ख्यं रभेर्विकरणे लभेश्च परोक्षायां न भवति। अननपरोक्षयोरिति सिद्धे **विकरणग्रहणं स्पष्टार्थम्**। **चेक्रीयितलुगन्तस्य भाषायामप्रयोगे** ह्यस्तन्यामनि 'अरारम्भुः, अलालम्भुः' इति स्थानिवद्भावाद् विकरणग्रहणस्य न परिहारः। णमिचोर्लभेरनुपसर्गस्य वेति वाच्यम्। लाभं लाभम्, लम्भं लम्भम् मोदते। अलाभि, अलम्भि। तथा च **'अलिभिरलाभि सदङ्गनागणस्य'** इति **माघे**। अनुपसर्गस्येत्येव – 'उपलम्भम् उपलम्भम्, उपालम्भि'। नित्यं स्यात्, तदेतन्न वक्तव्यम्। **'लाभ प्रेरणे'** (९। २४५) इत्यनेन चौरादिकेन सिद्धत्वात्।। ६६६।

### [वि० प०]

रभि०। इह नेटीति न वर्तते, प्राप्तेरभावात्। 'रेभे, लेभे' इति। अस्यैक–व्यञ्जनमध्ये इत्यनेनैत्वम् अभ्यासलोपश्च, रभिलभिभ्यां सम्बन्धस्याविवक्षितत्वाद् इह विकरणपरोक्षयोर्यथासंख्यं न भवतीति। विकरणे परोक्षायां च प्रत्येकं रभिलभोः प्रत्युदाहृतम्, अन्यथा रभेर्विकरणे लभेश्च परोक्षायां न भवतीति स्यात्।। ६६६।

### [बि० टी०]

रभि०। ननु रभिलभोः स्वरात् परो रेफो भवतीत्यर्थः कथं न स्यात्, 'र' इति लुप्तप्रथमैकवचनम्। नैवम्, तदा हि **निःसंदेहार्थं प्रथमैकवचनं कुर्यात्**।। ६६६।

### [समीक्षा]

'आरम्भयति, आलम्भयति' आदि शब्दरूपों के सिद्ध्यर्थ दोनों व्याकरणों में नकारागम की व्यवस्था की गई है। 'लिट् – परोक्षा' तथा 'शप्–विकरण' शब्दों का प्रयोग अपने – अपने व्याकरण की पारिभाषिक शब्दावली के अनुसार किया गया है। पाणिनि का सूत्र है– ''रभेरशब्लिटोः, लभेश्च'' (अ० ७। १। ६३, ६४)। पाणिनि ने ''लभेश्च'' इस सूत्र का पृथक् पाठ उत्तरार्थ किया है।

## [विशेष वचन]

१. अनन्परोक्षयोरिति सिद्धे विकरणग्रहणं स्पष्टार्थम् (दु० टी०)।

२. चेक्रीयितलुगन्तस्य भाषायामप्रयोगे (दु० टी०)।

३. तदा हि निःसन्देहार्थं प्रथमैकवचनं कुर्यात् (बि० टी०)।

## [रूपसिद्धि]

१. **आरम्भयति।** आ + रभ् + इन् + ति। 'आङ्' उपसर्गपूर्वक 'रभ राभस्ये' (१। ४७१) धातु से "धातोश्च हेतौ" (३। २। १०) सूत्र द्वारा 'इन्' प्रत्यय, प्रकृत सूत्र से नकारागम, नकार को अनुस्वार, उसको मकार, 'आरम्भि' की धातुसंज्ञा, वर्तमानासंज्ञक 'ति' प्रत्यय, अन् विकरण, इकार को गुण तथा अयादेश।

२. **आरम्भि।** आ + रभ् + इच् + त। आङ् उपसर्गपूर्वक 'रभ्' धातु से अद्यतनीसंज्ञक 'त' प्रत्यय, सिच् को बाधकर 'इच्' प्रत्यय, प्रकृत सूत्र से नकारागम, अनुस्वार, मकारादेश तथा तलोप।

३. **आरम्भः।** आ + रभ् + अच्। आङ् उपसर्गपूर्वक 'रभ राभस्ये' (१। ४७१) धातु से "अच् पचादिभ्यश्च" (४। २। ४८) सूत्र द्वारा 'अच्' प्रत्यय, प्रकृत सूत्र से नकारागम, अनुस्वार तथा मकारादेश।

४. **आलम्भयति।** आ + लभ + इन् + ति। 'आङ्' उपसर्गपूर्वक 'डु लभष् प्राप्तौ' (१। ४७२) धातु से इन् प्रत्यय, नकारागम, अनुस्वार, मकारादेश, धातुसंज्ञा, 'ति' प्रत्यय, अन् विकरण, गुण तथा अयादेश।

५. **आलम्भि।** आ + लभ् + इच् + त। 'आङ्' उपसर्गपूर्वक 'डु लभष्' धातु से अद्यतनीसंज्ञक 'त' प्रत्यय, इच् प्रत्यय, नकारागम, अनुस्वार, मकारादेश तथा त—लोप।

६. **आलम्भः।** आ + लभ् + अच् + सि। आङ् उपसर्गपूर्वक 'लभ्' धातु से 'अच्' प्रत्यय, नकारागम, अनुस्वार, मकारादेश, लिङ्गसंज्ञा, 'सि' प्रत्यय तथा "रेफसोर्विसर्जनीयः" (२। ३। ६३) से सकार को विसर्गादेश।। ६६६।

# ६६७. हुधुड्भ्यां हेर्धिः [३। ५। ३५)

## [सूत्रार्थ]

'हु' धातु तथा 'धुट्' संज्ञक व्यञ्जन के बाद आने वाले 'हि' प्रत्यय के स्थान में 'धि' आदेश होता है।। ६६७।

## [दु० वृ०]

हुधुड्भ्यां परस्य हेर्धिर्भवति। जुहुधि, चकाद्धि, भिन्द्धि, छिन्द्धि। भिन्तात्, छिन्तात्। परत्वात् तातण्। भिन्धकि, छिन्धकि। पश्चादक्। कथं रुदिहि, स्वपिहि ? सेट्कत्वात्।। ६६७।

## [दु० टी०]

हुधु०। धुटो जातिप्रधानत्वाद् द्विवचनम्। भिन्नाद् इत्यादि। वक्तव्यवादिनो मतेन **'पूर्वपरयोः परो विधिर्बलवान्'** (कलाप० २२८। ७०) इति सम्बध्यते। येषां तुह्योरर्थे निपाता एवेदृशा इति दर्शनम्, तेषां मतमादायैव न दोषः। भिन्धकीत्यादि। अन्तरङ्गत्वादकि कृते सकि एव हेर्धित्वम्, कथमकः श्रवणं स्यात् ? सत्यम्। **'यावत्सम्भवस्तावद्विधिः'** (का० परि० ५४) इति पुनरग् भविष्यति तत्र वाशब्दस्य बहुलार्थत्वाद् वेति मनसि कृत्वाह – पश्चादगिति। कथमित्यादि। शब्दान्तरस्य प्राप्तयोरुभयोरनित्ययोः परत्वाद् इति कृते आगमस्य तद्ग्रहणेन ग्रहणात् सेटोऽपि धित्वं प्राप्नोतीत्याह – सेट्कत्वादिति। नेटि रधेरपरोक्षायाम् इत्यतो नेटीति वर्तते इटि सति न स्यात्। रभिलभोरनिट्त्वात् पूर्वसूत्रेण सम्बध्यते इति भावः।

**अन्य** आह – वन्सेर्वशब्दस्योत्वमिति सेड्ग्रहणाभावे सेट्कस्यापि न ग्रहणम्, तदसत्। तत्रैव सेट्कस्यापि वर्णितं प्रयोजनम्। अथवा **'निर्दिश्यमानस्यादेशा न भवन्ति'** इति य एवोच्चार्यते शब्दस्तस्यादेशः सागमस्त्वागमानाम् अव्यभिचारित्वाच्छब्दान्तरे श्रूयमाणे प्रतीयमाने चोच्चार्यते **'पञ्चम्या निर्दिष्टे परस्य'** (का० परि० २२) इतीटो व्यवधानान्न भवति। अथवा हेरिति कृते हकारमात्रं वा कार्यत्वेन निर्दिश्यते धकारमात्रं च आदेशत्वेन। **इकारस्तूच्चारणार्थ** एव, तदा 'जुहुतात्' इत्यादौ तातणादेशवादिनो मते नाप्रसङ्ग इति।। ६६७।

## [वि० प०]

हुधुड्भ्याम्० जुहुधीति। जुहोत्यादित्वाद् द्विर्वचनम्। चकार्द्धीति। **'चकासृ दीप्तौ'** (२। ३८)। हेर्धिभावे कृते **''धुटां तृतीयश्चतुर्थेषु''** (३। ८। ८) इति सकारस्य दकारः। छिदिभिदो रुधादित्वान्नशब्दः। रुधादेर्विकरणान्तस्य लोपः परत्वादिति। परत्वात् तातणि आशिषि ''तुह्योस्तातण् वा वक्तव्यः'' इत्यस्य वक्ष्यमाणत्वात् परत्वमित्यर्थः। ननु च **''आख्यातस्य च''** इति वचनाद्धेरन्त्यस्वरात् पूर्वोऽग् भवन् तद्ग्रहणेनैव गृह्यते। ततः साक एव हेर्धिरिति कथमक्श्रवणं स्यात् ? सत्यम्। तत्र बहुलत्वात् पश्चाद् भविष्यतीत्याह– भिन्धकीत्यादि दर्शितम्। भिन्धकीत्यादि। कुत्सितं भिन्धीत्यक्। कथमित्यादि। इह परत्वाद् रुदादेः सार्वधातुक इति कृतस्येटस्तदग्रहणेन ग्रहणात् सेटोऽपि हेर्धित्वं प्राप्नोतीति परिहारमाह–सेट्कत्वादिति। **''नेटि रधेरपरोक्षायाम्''** (३।५।३३) इत्यतो नेटीति वर्तते, तत इटि सति न भवतीति पूर्वसूत्रेण सम्बध्यते रभिलभोरनिट्त्वात्।। ६६७।

## [बि० टी०]

हुधु०। ननु धिरयं सविसर्गान्तो निर्विसर्गान्तो वा। तत्र **पञ्जीकारस्य** मते निर्विसर्गान्त एव। एकस्थाने विधिर्भवन् अनेकवर्णः सर्वस्येति न्यायात् समुदायस्य स्यादित्युक्तत्वात्। **टीकाकारस्य** मते सविसर्गान्त एव पाठः। हेरिति हकारमात्रं कार्यित्वेन निर्दिश्यते इत्युक्तत्वात्। तस्मात् सविवाद एव पक्षः। तत्राहुः **केचित्** – सविसर्गपक्षे टीका,

निर्विसर्गान्तपक्षे **पञ्जी**। तच्चिन्त्यम्। सूत्रे विसर्गः स्थाप्यो न वेति किमायातमिति। तत्राह **पण्डितः** — सविसर्गान्तपक्षे इकारोक्तः सविभक्तिकः।

**अस्यायमर्थः** — इकारेण करणभूतेन लक्षितो य उक्तः स इकारोक्तः, स किंविशिष्टः? सविभक्तिकः। यद्यपि सविभक्तिक—इकारोक्तपदेन धकार उच्यते तथापि समुदायस्य धिशब्दस्य विशेषणम्। **'इकारोक्तः सविभक्तिरादेशोऽस्वरः'** (का० परि० ५८) इति न्यायाद् इकार उच्चारणार्थः कार्यार्थो वा ? कार्यार्थपक्षे **पञ्जी,** उच्चारणार्थपक्षे टीका। ननु कथमिदमुक्तं यावता इकारोक्तः सविभक्तिरादेशोऽस्वरः इत्यस्य विषयत्वात् ? सत्यम्, यत्र तस्य विषयस्तत्र स प्रवर्तते। यथा **''जस्शसोः शिः''** (२।२।१०) इति, तत्र 'इकारोक्तः सविभक्तिरादेशोऽस्वरः' इति न्यायः कथन्न प्रवर्तते। यद् वा न्यायादरपक्षे **टीका,** अनादरपक्षे **पञ्जी**। साकों हेर्धिरित्यादि। **'आगमादेशयोरागमविधिर्बलवान्'** (का० परि० ४०) इति अकि भूते सतीत्यर्थः।

ननु कथमिदमुक्तं यावता **'आगमात् सर्वादेशो विधिर्बलवान्'** (का० परि० ४१) इति न्यायादादौ धिभावे प्राप्ते पश्चादग् भविष्यति। कथमिदमुक्तमितीदमपि सिद्धान्तान्तरमेवेति **कश्चित्,** तच्चिन्त्यम्। एतत्सिद्धान्ते सति यद् बहुलार्थत्वमित्युक्तं **पञ्जिकायाम्,** तत्राहुर्गुरवः। यावता **'आगमात् सर्वादेशः'** (का० परि० ४१) इत्यादि परिभाषा। **'आगमादेशयोरागमो विधिर्बलवान्'** (का० परि० ४०) इति बलाबलः। ततो बलाबलेन परिभाषा बाध्यते इति न्यायाद् धिभाव एवादौ प्राप्तः इति हृदि कृत्वाह — साक इत्यादि।। ६६७।

## [समीक्षा]

'जुहुधि, भिन्धि, छिन्द्धि' इत्यादि शब्दरूपों के सिद्ध्यर्थ हि प्रत्यय के स्थान में 'धि' आदेश का विधान दोनों ही व्याकरणों में किया गया है। जिन वर्णों के अवबोधार्थ पाणिनि ने 'झल्' प्रत्याहार का व्यवहार किया है, तदर्थ कातन्त्रकार की 'धुट्' संज्ञा है। इसलिए ''हुझल्भ्यो हेर्धिः'' (अ० ६। ४। १०१) इस पाणिनीय सूत्र में 'झल्' प्रत्याहार का पाठ है। व्याख्याकारों ने प्रसङ्गतः विविध आचार्यों के मत का उल्लेख किया है।

## [रूपसिद्धि]

१. **जुहुधि।** हु + पञ्चमी—हि। 'हु दाने' (२। ६७) धातु से पञ्चमीविभक्तिसंज्ञक परस्मैपद—मध्यमपुरुष—एकवचन 'हि' प्रत्यय, अन् विकरण का लुक्, ''जुहोत्यादीनां सार्वधातुके'' (३।३।८) से धातु को द्विर्वचन, ''पूर्वोऽभ्यासः'' (३।३।४) से पूर्ववर्ती 'हु' की अभ्यासंज्ञा, ''हो जः'' (३।३।१२) से हकार को जकार तथा प्रकृत सूत्र से 'हि' को 'धि' आदेश।

२. **चकाद्धि।** चकास् + पञ्चमी—हि। 'चकासृ दीप्तौ' (२।३८) धातु से पञ्चमीविभक्तिसंज्ञक 'हि' प्रत्यय, स् को द्, प्रकृतसूत्र से 'हि' को 'धि' तथा 'द्' को 'त्' आदेश।

३. **भिन्द्धि।** भिद् + पञ्चमी–हि। 'भिदिर् विदारणे' (६।२) धातु से 'हि' प्रत्यय, ''स्वराद् रुधादेः परो नशब्दः'' (३।२।३६) से धातुगत इकार के बाद 'न' विकरण, प्रकृत सूत्र से 'हि' को 'धि' तथा ''रुधादेर्विकरणान्तस्य लोपः'' (३। ४। ४०) से 'न' विकरणगत अकार का लोप।

४. **छिन्द्धि।** छिद् + पञ्चमी –हि। 'छिदिर् द्विधाकरणे' (६।३) धातु से 'हि' प्रत्यय, 'न' विकरण, 'हि' को 'धि' आदेश तथा अकार का लोप।

५–६. **भिन्द्धकि।** भिन्द्धि+अक्। **छिन्द्धकि।** छिन्द्धि + अक्। 'भिन्द्धि–छिन्द्धि' प्रयोगों से ''अव्ययसर्वनाम्नः स्वरादन्यात् पूर्वोऽक् कः'' (२। ४। ६४) (विभक्तेश्च पूर्व इष्यते) से अन्तिम इकार से पूर्व 'अक्' प्रत्यय।। ६६७।

## ६६८. अस्तेः [३। ५। ३६]

### [सूत्रार्थ]

'अस्' धातु से परवर्ती 'हि' को 'धि' आदेश होता है।। ६६८।

### [दु० वृ०]

अस्तेः परस्य हेर्धिर्भवति। अस्–एधि। नित्यत्वाद् अन्तरङ्गत्वाच्च एत्वे सति वचनम्।। ६६८।

### [दु० टी०]

अस्तेः। सत्यपि धुडन्तत्वे **''दाऽस्त्योरेऽभ्यासलोपश्च''** (३।४।५०) इत्यनेन एत्वे सति धित्वं न प्राप्नोतीत्याह–नित्यत्वादिति। **तिबुनिर्देशः सुखार्थ एव।** अस्यतेर्विकरणेन व्यवहितत्वात्।। ६६८।

### [वि० प०]

अस्तेः। एधीति। ''अस्तेरादेः'' (३।४।४१) इत्यकारलोपः, **''दाऽस्त्योरेऽभ्यास–लोपश्च''** (३।४।५०) इति सकारस्यैत्वे धुटोऽसम्भवात् पूर्वेण न सिध्यतीति वचनमुच्यते। न च परत्वाद् धिभावे कृते पश्चाद् एत्वं युज्यते इत्याह – नित्यत्वादिति।। ६६८।

### [समीक्षा]

'अस्' धातु से पञ्चमी–मध्यमपुरुष–एकवचन 'हि' प्रत्ययान्त शब्दरूप के सिद्ध्यर्थ 'धि' आदेश के विधानार्थ दोनों व्याकरणों में व्यवस्था की गई है। पाणिनि का सूत्र है – ''हुझल्भ्यो हेर्धिः'' (अ० ६। ४। १०१)। कातन्त्र में एतदर्थ जो पृथक् सूत्र बनाया गया है, उसके कारण का स्पष्टीकरण करते हुए टीकाकार ने कहा है कि ''दास्त्योरेऽभ्यासलोपश्च'' (३। ४। ५०) से सकार को एकारादेश हो जाने पर

''हुधुड्भ्यां हेर्धिः'' (३।५।३५) से 'धि' आदेश नहीं हो सकता है। अतः उसके विधानार्थ प्रकृत सूत्र की व्यवस्था की गई है। परविधि होने के कारण 'धि' आदेश का विधान पहले नहीं किया जा सकता, क्योंकि नित्य तथा अन्तरङ्ग होने से एकारादेश ही पहले प्रवृत्त हो जाएगा।

## [विशेष वचन]

१. नित्यत्वादन्तरङ्गत्वाच्च एत्वे सति वचनम् (दु० वृ०)।

२. तिब्निर्देशः सुखार्थ एव (दु० टी०)।

## [रूपसिद्धि]

१. **एधि।** अस् + अन्लुक् + हि। 'अस् भुवि' (२।२८) धातु से पञ्चमी-विभक्तिसंज्ञक परस्मैपद–मध्यमपुरुष–एकवचन 'हि' प्रत्यय, नित्य तथा अन्तरङ्ग होने के कारण ''दास्त्योरेऽभ्यासलोपश्च'' (३।४।५०) से स् को एत्व, ''अस्तेरादेः'' (३।४।४१) से अकारलोप तथा प्रकृत सूत्र से 'हि' को 'धि' आदेश।। ६६८।

# ६६९. शा शास्तेश्च [३। ५। ३७]

## [सूत्रार्थ]

'शास्' धातु से परवर्ती 'हि' प्रत्यय के स्थान में 'धि' आदेश तथा 'शास्' को 'शा' आदेश प्रवृत्त होता है।। ६६९।

## [दु० वृ०]

शास्तेः परस्य हेर्धिर्भवति, शास्तेश्च शादेशो भवति। शाधि। अच्चेति कृते इत्वं स्यात्।। ६६९।

## [दु० टी०]

शा०। धुडन्तत्वादेव धित्वं सिद्धम्, शादेश इह साध्यः। ततश्च परेण शादेशेन बाधितो हेर्धिर्न स्यादित्याह–हेर्धिरित्यादि। धिस्तावद् भवति शास्तेः शादेशश्चेति धित्वबोधनाय चकार उच्यते। अथ शादेश एव नोच्यताम् इति मतम्। धकारे तु धातुसकारस्य लोपोपसंख्यानादिति। नैवम्, तृतीयत्वमेव तत्र वर्णयिष्यामः, ततश्च शास्तेरच्चेति कृते दीर्घाद् दकारस्य लोपो भविष्यति अन्तरङ्गत्वात्। **''शासेरिदुपधायाः''** (३।४।४८) इत्यस्य बहिरङ्गत्वात् ? सत्यम्। **'वार्णात् प्राकृतं बलीयः'** (का० परि० ८१) इति लोपोऽपि वा कृते शकारस्येत्वं स्यात्, एकदेशविकृतस्यानन्यवद्भावात्। **अन्य** आह – शग्रहणमनेकवर्णार्थम्, **भाषायामपि चेक्रीयितलुगन्तस्याभिधानार्थम्।** शाधीति तिब्निर्देशोऽत्र न चेक्रीयितलुगन्तनिवृत्त्यर्थः, किन्तर्हि **पाठसुखार्थः**।। ६६९।

## [वि० प०]

शा शा०। शाधीति। यद्यपि धुडन्तात् पूर्वेणैव धिभावः सिध्यति, तथापि परेण

शादेशेन तस्य बाधा स्यादिति चकार उच्यते, धिस्तावद् भवति शास्तेश्च शादेश इत्याह–हेर्धिरित्यादि। ननु 'शास्तेरच्च' इति कृतेऽदादेशस्यैकवर्णत्वादन्तस्य सकारस्य भविष्यतीति तकारस्योच्चारणार्थत्वात्। ततो दीर्घात् परलोपे सिद्धं शाधीति किं शादेशेन ? न च दीर्घात् परलोपं बाधित्वा शासेरिदुपधाया इतीत्वं भवितुमर्हतीति बहिरङ्गत्वात्। परलोपविधिश्च वार्णत्वादन्तरङ्गत्वम् इति स एव भविष्यतीति। तदयुक्तम्, **'वार्णात् प्राकृतं बलीयः'** (का० परि० ८१) इतीत्वमेव स्यात्, अस्तु वा परलोपस्तथाप्येकदेशस्यानन्यवद्भावात् शासेरवायमुपधाभूतस्य शकारस्येत्वं स्यादित्याह – अच्चेत्यादि। **सिद्धान्ते** तु शादेशविधानादेव न भवति, अन्यथा साध्यमेव विदध्यादिति भावः।। ६६९।

## [बि० टी०]

शा शा०। ननु शास्तेः परस्य हेर्धिर्भवति शा च भवति। कुत्रापि धिः कुत्रापि शा इति क्रमेण कथं न स्यादिति चेत्, न। शा च शास्तेरित्यकरणात्। अन्यथा आदेशस्य समीपे चकारं दत्त्वा पठितव्यम्। न च वक्तव्यं हेः स्थाने आदेशः स्यात्। धातोर्धिरादेशः स्यात्। हेः स्थाने दृष्टो धिभावः कथं धातोः स्यात्।। ६६९।

## [समीक्षा]

'शाधि, प्रशाधि' इत्यादि शब्दरूपों के सिद्ध्यर्थ 'धि' तथा 'शा' आदेश का विधान दोनों ही व्याकरणों में किया गया है। अन्तर यह है कि पाणिनि केवल शास् को 'शा' आदेश "शा हौ" (अ० ६।४।३५) सूत्र द्वारा करते हैं तथा 'धि' आदेश के लिए उनका सूत्र है – "हुझल्भ्यो हेर्धिः" (अ० ६। ४। १०१)। परन्तु कातन्त्र में प्रकृत सूत्र द्वारा दोनों ही कार्य किए जाते हैं।

## [विशेष वचन]

१. अच्चेति कृते इत्वं स्यात् (दु० वृ०)।

२. शाग्रहणमनेकवर्णार्थं भाषायामपि चेक्रीयितलुगन्तस्याभिधानार्थम् (दु० टी०)।

३. शाधीति तिब्निर्देशोऽत्र न चेक्रीयितलुगन्तनिवृत्त्यर्थः, किं तर्हि पाठसुखार्थः (दु० टी०)।

४. तकारस्योच्चारणार्थत्वात् (वि० प०)।

## [रूपसिद्धि]

१. **शाधि**। शास् + पञ्चमी–हि। 'शासु अनुशिष्टौ' (२।३९) धातु से पञ्चमीविभक्तिसंज्ञक परस्मैपद–मध्यमपुरुष–एकवचन 'हि' प्रत्यय, अन्-विकरण का लुक्, प्रकृत सूत्र द्वारा 'हि' को 'धि' तथा शास् को 'शा' आदेश।। ६६९।

## ६७०. लोपोऽभ्यस्तादन्तिनः [३। ५। ३८]

## [सूत्रार्थ]

अभ्यस्तसंज्ञा से परवर्ती 'अन्त्' के नकार का लोप होता है।। ६७०।

## [दु० वृ०]

अभ्यस्तात् परस्यान्तेर्नकारस्य लोपो भवति। ददति, ददतु, जाग्रति, जाग्रतु। नलोपः साध्य इति अन् न कृतः।। ६७०।

## [दु० टी०]

लोपो०। अन्तेरिकार उच्चारणार्थो न विशेषार्थः **''आत्मने चानकारात्''** (३। ५। ३९) इति सम्बन्धस्यानुपपत्तेरिति। ननु अभ्यस्तादन्तिरदिति कथं न कृतवान् इत्याह—नलोप इत्यादि। साध्य एव विधेयः सुखहेतुः, **प्रक्रियागौरवहे**तुत्वादिति भावः। अन्तेरिति किमर्थम्—ददानि, दधानि। परस्मैपदार्थमिदं वचनम्।।६७०।

## [वि० प०]

लोपे०। **''द्वयमभ्यस्तम्, जक्षादिश्च''** (३। ३। ५, ६) इत्यभ्यस्तसंज्ञा विहितैवेति क्रमेण दर्शयन्नाह — ददतीत्यादि। **''अभ्यस्तानामाकारस्य''** (३।४।४२) इत्याकारलोपः। अन्तेरिकार उच्चारणार्थो न विशेषणार्थः। **''आत्मने चानकारात्''** (३। ५। ३९) इत्यत्र वक्ष्यमाणेऽन्तिन इति सम्बन्धस्यानुपपत्तिप्रसङ्गात्। न हि आत्मनेपदेऽन्तिरस्ति, तेन अन्तेरपि नलोपो न भवति। तथा अभ्यस्तादन्तिरदिति कथं न कृतम्। अर्थान्नलोपो गम्यते इत्याह — नलोप इत्यादि। न हि साध्यमन्यव्याजेन विधातुमुचितमिति भावः।। ६७०।

## [समीक्षा]

'ददति, ददतु' इत्यादि शब्दरूपों के सिद्ध्यर्थ पाणिनीय व्याकरण में 'दा' धातु से आने वाले 'झि' प्रत्यय के अन्तर्गत 'झ्' को 'अत्' आदेश होता है — ''अदभ्यस्तात्'' (अ० ७।१।४), परन्तु कातन्त्रकार 'अन्ति—अन्तु' प्रत्यय पढ़ते हैं, अतः वहाँ 'दा' धातु को द्वित्वादि होने के बाद नलोप का विधान करना पड़ता है। जिसे प्रकृत सूत्र में कहा गया है। अतः उभयत्र समानता है।

## [विशेष वचन]

१. नलोपः साध्य इत्यन्न कृतः (दु० वृ०)।
२. अन्तेरिकार उच्चारणार्थो न विशेषार्थः (दु० टी०)।
३. साध्य एव विधेयः सुखहेतुः, प्रक्रियागौरवहेतुत्वादिति भावः (दु० टी०)।
४. परस्मैपदार्थमिदं वचनम् (दु० टी०)।
५. अन्तेरिकार उच्चारणार्थो न विशेषणार्थः (वि० प०)।

## [रूपसिद्धि]

१. **ददति।** दा + अन्ति। 'डु दाञ् दाने' (२।८४) धातु से वर्तमानासंज्ञक प्रथमपुरुष—बहुवचन 'अन्ति' प्रत्यय, 'अन्' विकरण का लोप, द्वित्वनादि तथा प्रकृत सूत्र द्वारा 'अन्ति' प्रत्ययगत नकार का लोप

२. **ददतु।** दा + अन्तु। 'डु दाञ् दाने' (२। ८४) धातु से पञ्चमीविभक्तिसंज्ञक

परस्मैपद–प्रथमपुरुष – बहुवचन 'अन्तु' प्रत्यय, अन् विकरण का लुक्, धातु को द्विर्वचन, अभ्यस्तसंज्ञा तथा प्रकृत सूत्र से नकारलोप।

३. **जाग्रति।** जागृ + अन्ति। 'जागृ निद्राक्षये' (२। ३६) धातु से वर्तमानासंज्ञक 'अन्ति' प्रत्यय, ''जक्षादिश्च'' (३। ३। ६) से 'जागृ' की अभ्यस्तसंज्ञा, प्रकृत सूत्र से नलोप तथा ''रम् ऋवर्णः'' (१। २। १०) से ऋकार को रकारादेश।

४. **जाग्रतु।** जागृ + अन्तु। 'जागृ निद्राक्षये' (२। ३६) धातु से पञ्चमीविभक्ति–संज्ञक प्रथमपुरुष – बहुवचन 'अन्तु' प्रत्यय, अभ्यस्तसंज्ञा, नलोप तथा ऋकार को रकारादेश।। ६७०।

## ६७१. आत्मने चानकारात् [३। ५। ३९]

### [सूत्रार्थ]

अकारभिन्न आत्मनेपदसंज्ञक प्रत्यय के परवर्ती होने पर 'अन्ति' के नकार का लोप होता है।। ६७१।

### [दु० वृ०]

अनकाराच्चात्मनेपदेऽन्तेर्नकारस्य लोपो भवति। कुर्वते, कुर्वताम्। लुनते, लुनताम्। व्यतिलाते, व्यतिलाताम्। अनकारादिति किम् ? पचन्ते, पठ्यन्ते।। ६७१।

### [दु० टी०]

आत्मने०। अनभ्यस्तार्थोऽयमारम्भः। अनकारादिति पर्युदासादकारादन्यस्माद् वर्णमात्राद् भवति। न नकारोऽनकार इति न प्रतिपत्तव्यम् – 'आघ्नतः' इत्यादि न सिध्येत्। यदि तदन्तविशेषणमुच्यते प्रकृतत्वाद् धातोरेवेति चेक्रीयित – सन् – कण्डूयादीनामेव प्रतिषेधः स्यात्। न च न विद्यतेऽकारो यस्य धातोरिति बहुव्रीहिः। अन्यथा चक्षिङादीनामेव प्रतिषेधः स्यात्, तदेतद् **विशेषणविशेष्यभावस्य प्रयोक्तुरायत्तत्वादिति** भावः। **''असन्ध्यक्षरयोरस्य तौ तल्लोपश्च''** (३। ६। ४०) इति कृतेऽकारलोपोऽन्तिरनकारादिति उच्यते। धातुनिमित्तत्वोपघातार्थमवयवेऽपि समुदायवृद्धिं प्रागेव वा प्रतिषेधः।। ६७१।

### [वि० प०]

आत्मने०। न अकारोऽनकारः इति **''स्वरेऽक्षरविपर्ययः''** (२। ५। २३) इति। लुनते इति। **''क्र्यादीनां विकरणस्य''** (३। ४। ४३) इत्याकारलोपः। व्यतिलाते इति। **''अनियमे चागतिहिंसाशब्दार्थहसः''** (३। २। ४२–६६) इति रुचादित्वादात्मनेपदम्। 'पचन्ते, पठ्यन्ते' इति। **''असन्ध्यक्षरयोरस्य तौ तल्लोपश्च''** (३। ६। ४०) इति वर्णविधावन्तरङ्गे कृते कथमकारादन्तिरिति ? न चोद्यम् इह वचनात् प्रागेव प्रतिषेध–स्ततोऽसन्ध्यक्षरविधिः।। ६७१।

### [बि० टी०]

आत्मने०। ननु अनकाराद् धातोरित्यर्थः कथन्न स्यात्। तदा हि चेक्रीयित – सन्

– कण्डूयादीनामेव प्रतिषेधः स्यात्। 'पच्यन्ते' इत्यादिषु विधिः, नैवं सम्यन्ते इति ज्ञापकात्। 'पचन्ते' इत्यादौ नलोपो मा भूदिति। अत्र **पञ्जी ''असन्ध्यक्षरयोरस्य तौ''** (३।६।४०) इति वर्णविधावन्तरङ्गे कृतेऽकारादेवायं न भवतीत्यत्र सिद्धान्तितम्, वचनबलादनकारग्रहणात् प्राक् नलोपः स्यात्। ननु कथमिदमुक्तं यावता **''असन्ध्यक्षरयोरस्य०''** (३।६।४०) इत्यत्र अलोपश्चेति सिद्धे पच्यन्ते–नलोपो मा भूदिति वृत्तिः कथं संगच्छते ? सत्यम्। **'परनिमित्तादेशः पूर्वस्मिन् स एव'** (का० परि० ४४) इति न्यायादकारे कृतेऽपि अकारादयमन्तिर्न भवतीति ग्रन्थः। ततः कथमनकारग्रहणस्य व्यावृत्तिः ? सत्यम्। तत्राह – वचनबलादिति।। ६७१।

## [समीक्षा]

'कुर्वते, चिन्वते, लुनते' इत्यादि शब्दरूपों में प्रत्ययगत नकार के निषेधार्थ दोनों व्याकरणों में विधान किया गया है। पाणिनि ने आत्मनेपद में 'झ' प्रत्यय किया है, और उसको अन्त आदेश न करके 'अत्' आदेश के द्वारा नकार को नहीं आने दिया है– ''आत्मनेपदेष्वनतः'' (अ० ७।१।५)। कातन्त्रकार 'अन्त' प्रत्यय मानते हैं, अतः उनको प्रकृत सूत्र द्वारा नकारलोप करने की आवश्यकता होती है।

## [विशेष वचन]

१. अनभ्यस्तार्थोऽयमारम्भः (दु० टी०)।

२. विशेष्यविशेषणभावस्य प्रयोक्तुरायत्तत्वात् (दु० टी०)।

## [रूपसिद्धि]

१. **कुर्वते।** कृ + अन्ते। 'डु कृञ् करणे' (७। ७) धातु से वर्तमानासंज्ञक आत्मनेपद–प्रथमपुरुष – बहुवचन 'अन्ते' प्रत्यय, ''तनादेरुः'' (३। २। ३७) से 'उ' विकरण, ''उरोष्ठ्योपधस्य च'' (३। ५। ४३) से 'ऋ' को 'उर्' ''वमुवर्णः'' (१। २। ९) से उकार को वकार तथा प्रकृत सूत्र से नकारलोप।

२. **कुर्वताम्।** कृ + अन्ताम्। 'डु कृञ् करणे' (७। ७) धातु से पञ्चमीविभक्तिसंज्ञक प्रथमपुरुष – बहुवचन 'अन्ताम्' प्रत्यय, 'उ' विकरण, उरादेश, उकार को वकार तथा प्रकृत सूत्र से नकारलोप।

३. **लुनते।** लू + अन्ते। 'लूञ् छेदने' (८। ९) धातु से वर्तमानासंज्ञक 'अन्ते' प्रत्यय, ''ना क्र्यादेः'' (३। २। ३८) से 'ना' विकरण, ''ष्वादीनां ह्रस्वः'' (३। ६। ८३) से 'लू' धातु को ह्रस्व, ''क्र्यादीनां विकरणस्य'' (३। ४। ४३) से 'ना' विकरणगत आकार का लोप तथा प्रकृत सूत्र से नलोप।

४. **लुनताम्।** लू + अन्ताम्। 'लूञ् छेदने' (८। ९) धातु से पञ्चमीविभक्तिसंज्ञक 'अन्ताम्' प्रत्यय, 'ना' विकरण, ह्रस्व, आकार तथा नकार का लोप।

५. **व्यतिलाते।** वि + अति + ला + अन्ते। 'वि – अति' उपसर्गपूर्वक 'ला दाने' (२। २२) धातु से वर्तमानासंज्ञक 'अन्ते' प्रत्यय, अन्–विकरण का लुक्, समानदीर्घ–अकारलोप तथा प्रकृत सूत्र से नकारलोप।

६. **व्यतिलाताम्।** वि + अति + ला + अन्ताम्। 'वि + अति' उपसर्गपूर्वक 'ला' (२। २२) धातु से पञ्चमीसंज्ञक 'अन्ताम्' प्रत्यय, अद्-विकरण का लुक् तथा प्रकृत सूत्र से नकारलोप।। ६७१।

## ६७२. शेते रिरन्तेरादिः [३। ५। ४०]

### [सूत्रार्थ]

'शीङ्' धातु से परवर्ती 'अन्ते' प्रत्यय से पूर्व 'रि' आगम होता है।। ६७२।

### [दु० वृ०]

शेतेः परस्यान्तेरादिरिर्भवति। शेरते, शेरताम्, अशेरत। अन्तिग्रहणम् अन्तिनो रिरादिर्मा भूत्। **वेत्तेर्वा वक्तव्यम्** – संविदते, संविद्रते।। ६७२।

### [दु० टी०]

शेते०। इकार **उच्चारणार्थः**। अत्रापि शीङो रिरन्त इति पूर्वोक्ते रेफे नित्ये **''शीङः सार्वधातुके''** (३। ६। १८) इति गुणो न स्यात् **''स्थानेऽन्तरतमः''** (का० परि० १६) इति न्यायाद् एकवर्ण एकारोऽन्तो भवति 'शेते' इत्यादौ, तस्मात् परादित्वमुच्यते। अवयवावयवः समुदायावयवो भवतीति शीङः सार्वधातुके गुणो न भवति। शयिष्यन्ते इति। स्येन त्यदाद्युत्पत्त्यनुयायिना व्यवधानं पूर्वसूत्रेऽन्तेरिति पृथगेव पदमास्तामिह तदेवानुवर्त्तिष्यते ? सत्यम्, नकारस्येति सम्बध्येत, ततश्च नकारस्य रिरादिः प्रसज्येत इत्याह – अस्तीत्यादि, आदिग्रहण**मागमार्थम्** अन्यथा आदेशः स्यात्। 'वेत्तेर्वा वक्तव्यम्' इति, **अयं** तु नेच्छेत्येव। **केचिद्** इच्छन्तीति भावः।। ६७२।

### [वि० प०]

शेते०। शेतेः परस्य विसर्जनीयस्य घोषवत्स्वरपर इति रेफे कृते **''रो रे लोपं स्वरश्च पूर्वो दीर्घः''** (१। ५। १७) इति। रीति इकार **उच्चारणार्थः**। शेरते इति। रिरयं परादिरतस्तद्ग्रहणेन गृह्यते इति **''शीङः सार्वधातुके''** (३। ६। १८) इति गुणो भवति। अशेरत इति। ह्यस्तनी – अन्त। अथान्तेरिति किमर्थम् ? अन्तेर्न इति पूर्वसूत्रे पृथगेव पदमास्ताम्, इह तदेवानुवर्तिष्यते, तदयुक्तम्। एकयोगनिर्दिष्टत्वान्नेत्यपि वर्तते, ततो नकारस्यैव रिरादिः स्यादित्याह-अन्तिग्रहणमित्यादि। वेत्तेरिति। **''समो गमृच्छि–प्रच्छिस्वृश्रुवेत्त्यर्त्तिदृशः''** (३। २। ४२–२०) इति रुचादित्वादात्मनेपदम् **''सर्वत्रात्मनेचानकारात्''** (३। ५। २१) इति नलोपः। वक्तव्यं व्याख्येयम्, **कश्चिदि**च्छति, **कश्चिन्ने**च्छतीत्यर्थः।। ६७२।

### [बि० टी०]

शेते०। 'रि' आगमे सन्धौ 'र्य' इत्यर्थे रीति नाशङ्क्यते, 'रीदित्यकरणात्। निःसन्देहेन तकारोच्चारणं कृत्वा दद्यादित्यर्थः। ननु शेतेरित् तकारो रेफमात्रवर्णस्वरूपे भवति, तेन रीति शङ्का न स्यात्। ततो रिदन्तोऽन्ताविति कथं न कृतम्, अनुशब्द

आगमार्थः। शेतेः परो रित् भवतीति आगमस्वरूपः, अन्तौ परे 'र' आगमस्वरूपः, ततः परगमने सति सिद्धम्। न च वक्तव्यम्, अत्र पक्षे इकारशङ्का कथं न स्यात् 'र्य' इत्यकरणात्। इकारे कृतेऽन्ते रित्वं स्यादेव, तदेव कृतं स्यात् ? सत्यम्, वर्णागमे कृते सार्वधातुकस्य व्यवधानात् **''शीङः सार्वधातुके''** (३। ६। १८) इति गुणो न स्यात्।। ६७२।

## [समीक्षा]

'शीङ्' धातु से सिद्ध होने वाले 'शेरते, शेरताम्, अशेरत' इत्यादि शब्दों में रेफ की जो उपस्थिति अनिवार्य होती है, उसका अवबोध पाणिनि ने ''शीङो रुट्'' (अ० ७।१। ६) सूत्र द्वारा 'रुट्' आगम से कराया है और कातन्त्रकार ने प्रत्ययावयव अकार से पूर्व रकारागम से। अतः उभयत्र साम्य है।

## [विशेष वचन]

१. इकार उच्चारणार्थः (दु० टी०;वि० प०)।

२. अवयवावयवः समुदायावयवो भवति (दु० टी०)।

३. आदिग्रहणम् आगमार्थम्, अन्यथा आदेशः स्यात् (दु० टी०)।

४. वक्तव्यमिति। अयं तु नेच्छत्येव, केचिदिच्छन्तीति भावः (दु० टी०; वि० प०)

## [रूपसिद्धि]

१. **शेरते।** शी + अन्ते। 'शीङ् स्वप्ने' (२। ५५) धातु से वर्तमानाविभक्तिसंज्ञक आत्मनेपद-प्रथमपुरुष – बहुवचन 'अन्ते' प्रत्यय, 'अन्' विकरण का लोप, ''शीङः सार्वधातुके'' (३। ६। १८) से 'शी' धातुघटित ईकार को गुण एकार, प्रकृत सूत्र द्वारा प्रत्यय से पूर्व 'र्' का आगम तथा ''आत्मने चानकारात्'' (३। ५। ३९) से नकारलोप।

२. **शेरताम्।** शी + अन्ताम्। 'शीङ् स्वप्ने' (२। ५५) धातु से पञ्चमीसंज्ञक प्रथम पुरुष – बहुवचन 'अन्ताम्' प्रत्यय, गुण, रकारागम तथा नकारलोप।

३. **अशेरत।** अट् + शी + ह्यस्तनी – अन्त। 'शीङ् स्वप्ने' (२। ५५) धातु से ह्यस्तनीविभक्तिसंज्ञक प्रथमपुरुष – बहुवचन 'अन्त' प्रत्यय, ''अड् धात्वादि–र्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु'' (३। ८। १६) से धातुपूर्व अडागम, अन्-विकरण का लोप, गुण, रकारागम तथा नकारलोप।। ६७२।

## ६७३. अकारादट औ [३। ५। ४१]

## [सूत्रार्थ]

धातुघटित आकार से परवर्ती 'अट्' प्रत्यय के स्थान में औकार आदेश होता है।। ६७३।

## [दु० वृ०]

आकारात् परस्याट और्भवति। पपौ, तस्थौ। आशिषि तुह्योस्तातण् वा वक्तव्यः। जीवतु, जीवतात्, जीव त्वम्। नन्दतु, नन्दतात्, नन्द त्वम्। एवं कुरुतात्, भिन्तात्, छिन्तात्। नकारोऽगुणार्थः।। ६७३।

## [दु० टी०]

आकारा०। अट इति परोक्षायाः प्रथमोत्तमपुरुषयोरेकवचनस्य ग्रहणम्। अटोऽन्तरङ्गमपि दीर्घात् परलोपं बाधित्वा वचनादौत्वम्। ततः स्वरविधिः स्वरे द्विर्वचननिमित्ते कृते द्विर्वचने **''सन्ध्यक्षरे च''** (३। ६। ३८) इत्याकारलोपः। आशिषीत्यादि। आशिषि यौ विहितौ तुही, तयोरित्यर्थः। णकारोऽगुणार्थ इति। तुशब्दस्य गुणित्वात् तदादेशो गुणी मा भूत्। न च वक्तव्यम्, एवंभूता अव्यया इति।। ६७३।

## [वि० प०]

आकारात्। दीर्घात् परलोपमन्तरङ्गमपि बाधित्वा अतो वचनादट औकारस्ततः कृते द्विर्वचने स्वरविधिरिति **''सन्ध्यक्षरे च''** (३। ६। ३८) इत्याकारलोपः। आशिषीत्यादि। **''समर्थनाशिषोश्च''** (३। १। १९) इति वचनाद् आशिषि यौ विहितौ तुही इति, तयोरित्यर्थः। वक्तव्यमिति। **मतान्तरमु**क्तम्-अस्य तु **मते** दर्शनम् अव्यया एवम्भूता इति।। ६७३।

## [बि० टी०]

आका०। नन्विह ओकार एव विधीयताम्, **''सन्ध्यक्षरे च''** (३। ६। ३८) इत्यत्र सन्ध्यक्षरग्रहणम् अपनीय एति चेति विदध्यात्, तत्रापि लाघवमस्ति। अत्र च गुरुकरणस्याभावो **लाघवम्,** ततः **''आकारादट औ''** (३। ५। ४१) इति कृते सिध्यति 'ययौ' इति। नैवम्, ''अट औ'' इति कृते सन्धौ द्विर्वचनं न स्यात्, निमित्ताभावात्। न च वाच्यम्, **''स्वरविधिः स्वरे''** (३। ८। ३०) इत्यादिना कृते द्विर्वचने पश्चात् स्वरस्य स्थानेऽनेन विधिर्भविष्यति, तन्तु स्वरविधौ न सन्धिलक्षणमुपतिष्ठते, अतो 'ययौ' इति न सिध्यति। अथाकारेण ''अट औ'' इत्यपि कृते **''सन्ध्यक्षरे च''** (३। ६। ३८) इत्यत्र एति चेति कृते सिध्यति, इदं तु आख्यातविधित्वात्। किन्तु स्वरे परे यः स्वरविधिर्द्विर्वचनविधिश्च, तत्र प्रवर्तते। 'स्वरविधिः स्वरे' इति वचनम्, तत्र स्वरस्य स्थाने विधिः स्वरविधित्वान्न प्रवर्तते।। ६७३।

## [समीक्षा]

'पपौ, ययौ, तस्थौ' आदि शब्दरूपों के सिद्ध्यर्थ 'अट्' या 'णल्' प्रत्यय को औकारादेश दोनों ही व्याकरणों में किया गया है। पाणिनीय व्याकरण में तिप् – तस् आदि परस्मैपदसंज्ञक ९ प्रत्ययों के स्थान में 'णल् – अतुस्' आदि आदेश किए गए हैं। तदनुसार 'णल्' को 'औ' आदेश निर्दिष्ट है– ''आत औ णलः''

(अ० ७। १। ३४)। कातन्त्रकार अट् प्रत्यय मानते हैं। अतः उन्होंने प्रकृत सूत्र में उसका पाठ किया है। इस प्रकार पाणिनि ने 'तिप्' को 'णल्' तथा उसको 'औ' आदेश करके गौरव उपस्थित किया है, जब कि कातन्त्रकार ने 'अट्' प्रत्यय को औकार आदेश करके लाघव का परिचय दिया है।

## [विशेष वचन]

१. णकारोऽगुणार्थः (दु० वृ०)।

२. वक्तव्यमिति मतान्तरमुक्तम्, अस्य तु मते दर्शनम् – अव्यया एवंभूता इति (वि० प०)।

३. अत्र च गुरुकरणस्याभावो लाघवम् (बि० टी०)।

४. स्वरविधौ न सन्धिलक्षणमुपतिष्ठते (बि० टी०)।

## [रूपसिद्धि]

१. **पपौ**। पा + अट् – औ। 'पा पाने' (१। २६४) धातु से परोक्षाविभक्तिसंज्ञक प्रथमपुरुष – एकवचन 'अट्' प्रत्यय, ''चण्परोक्षाचेक्रीयितसनन्तेषु'' (३। ३। ७) से 'पा' धातु को द्विर्वचन, ''पूर्वोऽभ्यासः'' (३। ३। ७) से पूर्ववर्ती 'वा' की अभ्याससंज्ञा, ''ह्रस्वः'' (३। ३। १५) से उसको ह्रस्व, प्रकृत सूत्र से 'अट्' को औ आदेश तथा ''ओकारे औ औकारे च'' (१। २। ७) से आकार को औकार-औकारलोप।

२. **तस्थौ**। स्था + अट् – औ। 'ष्ठा गतिनिवृत्तौ' (१। २६७) धातु से परोक्षासंज्ञक 'अट्' प्रत्यय, द्वित्वादि कार्य, प्रकृत सूत्र से 'अट्' को 'औ' आदेश तथा 'आ' को औ – औकारलोप।। ६७३।

## ६७४. ऋदन्तस्येरगुणे [३। ५। ४२]

## [सूत्रार्थ]

अगुण प्रत्यय के परे रहते ऋकारान्त धातुघटित ऋकार को 'ईर्' आदेश होता है।। ६७४।

## [दु० वृ०]

ऋदन्तस्य धातोः श्रुतस्य स्थानिनोऽन्तरतमोऽगुणे प्रत्यये परे ईर् भवति। चिकीर्षति, जिहीर्षति, तितीर्षति। ऋदन्तस्येति किम् ? चक्रतुः। **''कीर्त्तीषोः क्तिः''** (४। ५। ८६) इति निर्देशात् कीर्त्तयति।। ६७४।

## [दु० टी०]

ऋद०। ऋदन्तो येषामिति बहुव्रीहावपि ऋकारस्यैवायमादेशोऽनेकवर्णोऽपि न समुदायस्येत्याह – श्रुतस्येति। यस्मान्निर्दिश्यमानानामादेशिनामादेशा इति **''ऋवर्णटवर्गरषाः मूर्धन्याः'** (कात० शि० सू० ३) इति ऋवर्णस्य मूर्धन्यस्येरित्येकदेशेनान्तरतमोऽस्तीति। ऋच्चासावन्तश्चेति किं कर्मधारयेण कृतविशेष्यपूर्वपदेन, यद्येवं किमन्तग्रहणेन ? सत्यम्,

अन्तग्रहणं **गणपठितार्थम्,** अन्यथा कृरिवाचरतीति आयिलोपे कृते यणि सति 'कृयते' इत्यत्रापि स्यात्। ऋकार एवान्ते यस्य दृष्टस्तस्य भवतीति अत्राप्याय्यन्तस्येत्यर्थः। अन्यथा लक्षणप्रतिपदोक्तयोरिति **परिभाषाबाधनार्थम्,** अन्यथा **'कॄ विक्षेपे'** (५। २१) इत्येवमादीनामेव स्यात् न कृतदीर्घाणाम्। **तपरकरणमसन्देहार्थमिति,** अन्यथा हि रन्तस्येत्युच्यमाने 'पूरी, पूर्णः' इत्यत्रापि स्यात्। वक्ष्यमाणे च सूत्रे ओष्ठ्यौपधमात्रस्य च उरादेशः सम्भाव्येत। गिरतेरिति च ज्ञापकं **प्रतिपत्तिगौरवं** स्यात्। कीर्त्तीत्यादि। **'कॄत संशब्दने'** (९। ७४), चुरादित्वादिन्।

ननु **'कीर्त्त संशब्दने'** इति कथं न पठितम्, न चान्य ऋकारोपधः संभवति ? सत्यम्, क्वचिदिरादेश एव नास्तीति बोधयति तेन 'अचीकृतत्' इति सिद्धम्। **शर्ववर्मणस्तु मतं लोकोपचारादेव** कृतेर्ऋत ईर् भवति। अगुण इति किम् ? तरति, तरीता। परत्वाद् गुणं बाधते।। ६७४।

## [वि० प०]

ऋदन्त०। श्रुतस्य स्थानिन इति ऋदन्तो यस्य स **ऋदन्तो** धातुरिति बहुव्रीहावनेक–वर्णोऽप्ययमादेशो न सर्वस्य, अपि तु **'श्रुतानुमितयोः श्रुतसम्बन्धो विधिर्बलवान्'** (का० परि० ९२) इति ऋकारस्यैव न धातोरश्रुतत्वात्। न हि कृप्रभृतयो धातवः श्रुताः किन्तर्हि समासगम्या इति **अन्तरतम इत्यनेन** स्थानेऽन्तरतमन्यायाद् वेति सूचितम्। **'ऋवर्णटवर्गरषाः मूर्धन्याः'** (कात० शि० सू० ३) इत्येकदेशान्तरतमत्वमस्तीति। चिकीर्षतीति। **'डु कृञ् करणे'** (७। ७), **''स्वरान्तानां सनि''** (३। ८। १२) इति दीर्घत्वे सति ईर् भवति। **''नामिनो र्वोः''** (३। ८। १४) इत्यादिना दीर्घः। इह लक्षणप्रतिपदोक्तयोरिति नाशङ्कनीयम् भवति, अन्तग्रहणस्य व्याप्त्यर्थत्वात्, अन्यथा **'येन विधिस्तदन्तस्य'** (का० परि० ३) इति सिद्धमेवेति भावः।। ६७४।

## [बि० टी०]

ऋद०। ऋदन्तस्येति किमिति रन्तस्येत्यास्ताम्। न च वक्तव्यं रन्तस्येत्युक्ते रेफस्य स्यात्। **'पूरी आप्यायने'** 'पूर्णः' इत्यत्र **''गिरतेश्चेक्रीयिते''** (३। ६। ९८) इति ज्ञापकात् तर्हि ह्रस्वस्य स्याद् इत्याह – चक्रतुरिति। तर्हि **''किरो धान्ये''** (४। ५। २०) इति निर्देशाद् ह्रस्वस्य न स्यादिति चेत्, नैवम्। तदा **सुखार्थं** भविष्यति। नन्विकारो भवतीत्यर्थः कथं न स्यात्, नैवम्। अत्रापि **ज्ञापकमन्वेतव्यम्** – गिरतेरिति।। ६७४।

## [समीक्षा]

'चिकीर्षति, तितीर्षति' इत्यादि शब्दरूपों में ऋकार को ईर् आदेश की अपेक्षा होती है, जिसका निर्देश दोनों ही व्याकरणों में किया गया है। पाणिनि का सूत्र है– ''ऋत इद् धातोः'' (अ० ७। १। १००)। तदनुसार पाणिनि ऋ को 'इत्त्व – रपर – दीर्घ' करके उक्त अपेक्षा की पूर्ति करते हैं, जबकि कातन्त्रकार 'ईर्' आदेश के निर्देश से लाघव का बोध कराते हैं।

## [विशेष वचन]

१. तपरकरणमसन्देहार्थम् (दु० टी०)।

२. गिरतेरिति च ज्ञापकं प्रतिपत्तिगौरवं स्यात् (दु० टी०)।

३. शर्ववर्मणस्तु मतम् – लोकोपचारादेव कृतेर्ऋत ईर् भवति (दु० टी०)।

४. इह लक्षणप्रतिपदोक्तयोरिति नाशङ्कनीयम् भवति, अन्तग्रहणस्य व्याप्त्यर्थत्वात्।

५. 'किरो धान्ये' इति निर्देशाद् ह्रस्वस्य न स्यादिति चेत्, नैवम्। तदा सुखार्थं भविष्यति।

## [रूपसिद्धि]

१. **चिकीर्षति।** कृ + सन् + ति। 'कर्तुमिच्छति' इस अर्थ में 'डु कृञ् करणे' (७। ७) धातु से इच्छार्थक ''धातोर्वा तुमन्तादिच्छतिनैककर्तृकात्'' (३। २। ४) से 'सन्' प्रत्यय, ''चण्परोक्षाचेक्रीयितसनन्तेषु'' (३। ३। ७) से धातु को द्विर्वचन, अभ्याससंज्ञा, ''ऋवर्णस्याकारः'' (३। ३।१६) से अभ्यासघटित ऋ को अ, ''सन्यवर्णस्य'' (३। ३। २६) से उसको इत्त्व, ''कवर्गस्य चवर्गः'' (३। ३। १३) से क् को च्, प्रकृत सूत्र से धातुघटित ऋकार को ईर्, ''नामिकरपरः प्रत्ययविकारागमस्थः सिः षं नुविसर्जनीयषान्तरोऽपि'' (२। ४। ४७) से सकार को षकार, 'चिकीर्ष' की ''ते धातवः'' (३। २। १६) से धातुसंज्ञा, वर्तमानासंज्ञक परस्मैपद-प्रथमपुरुष – एकवचन 'ति' प्रत्यय, अन् विकरण तथा अकारलोप।

२. **जिहीर्षति।** हृ + सन् + ति। हर्तुमिच्छति' इस अर्थ में 'हृञ् हरणे' (१। ५९१) धातु से सन् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

३. **तितीर्षति।** तॄ + सन् + ति। 'तर्तुमिच्छति' इस अर्थ में 'तॄ प्लवनतरणयोः' (१। २८३) धातु से सन् प्रत्यय आदि प्रक्रिया पूर्ववत्।। ६७४।

## ६७५. उरोष्ठ्योपधस्य च [३। ५। ४३]

## [सूत्रार्थ]

ऋकारान्त तथा उपधा में ओष्ठस्थानीय वर्णों वाली धातु के अन्त में स्थित ऋ को 'उर्' आदेश होता है, अगुण प्रत्यय के परे रहते।। ३७५।

## [दु० वृ०]

ओष्ठ्यौपधस्य धातोर्ऋदन्तस्य उर् भवति अगुणे प्रत्यये परे। पुपूर्षति, बुभूर्षति, मुमूर्षति, बोभूर्य्यते। दन्त्योष्ठ्यादपि – प्रावुवूर्षति, संवुवूर्षते। धातोरोष्ठ्यौपधस्येति किम् ? **'ऋ गतौ'** (८। २४)- समीर्णः।। ६७५।

## [दु० टी०]

उरो०। पूर्वस्यापवादोऽयम्। ओष्ठ्यर्भवः ओष्ठ्यः। देहावयवाद् यत्प्रत्ययं कृत्वा व्युत्पादयन्त्यन्ये। ओष्ठ्य उपधा यस्य धातोरिति विग्रहः। पुपूर्षतीत्यादि। **'पॄ पालने'**

(२। ७०), सन्। **'भृ भर्त्सने'** (८। १८), चेक्रीयितम् उरादेशे कृते द्विर्वचनम्, वृञ्वृङोर्वकारस्य दन्त्योष्ठ्यत्वात् कथमुरिति ? सत्यम्। उभयोः स्थाने य उत्पद्यते स लभतेऽन्यतरव्यपदेशम्। यथा देवदत्तयोः पुत्रः, देवदत्तस्य पुत्रः इति। अथवा पवर्गाच्चेति ऋतो विशेषणे अर्थात् सिध्यति यदोष्ठ्योपधस्येति धातुविशेषणमाह। तद् दन्त्योष्ठ्यस्यापि **प्रतिपत्त्यर्थ**मिति मनसि कृत्वाह – दन्त्योष्ठ्यादपीति। न च पवर्गादित्युक्ते पवर्गात् परो धातुरिति संभाव्येत अनुष्टुप् तीर्यते त्रिष्टुप् शीर्ण इति धातोः श्रुतत्वात्।। ६७५।

## [वि० प०]

उरो०। पुपूर्षतीति। **'पॄ पालनपूरणयोः'** (२। ७०) इति। बोभूर्यते इति। **'भृ भर्त्सने'** (८।१८), चेक्रीयिते उरादेशे कृते द्विर्वचनम्। वृञ्वृङोर्वकारस्य दन्त्यौष्ठ्यत्वाद् ओष्ठ्यौपध ऋकारो न भवति, अतः कथम् उरिति ? सत्यम्, उभयोः स्थाने यो निष्पद्यते स लभतेऽन्यतरव्यपदेशम्। यथा देवदत्तयोः पुत्रो देवदत्तस्य पुत्रोऽयमिति ब्रवीति दन्तोष्ठजन्मापि वकार ओष्ठ्य उच्यते इत्याह – दन्त्यौष्ठ्यादपीति।। ६७५।

## [समीक्षा]

'बुभूर्षति, मुमूर्षति' आदि शब्दरूपों के सिद्ध्यर्थ धातुगत ऋवर्ण को 'उर्' आदेश दोनों ही व्याकरणों में किया गया है। कातन्त्रकार ने एक ही सूत्र में 'उर्' आदेश का उल्लेख किया है, जब कि पाणिनि ने उकारादेश ही माना है, परन्तु उनकी प्रक्रिया के अनुसार ऋवर्ण के स्थान में होने वाले अण् आदेश में रपर भी होता है – ''उरण् रपरः'' (अ० १। १। ५१)। उकारादेशविधायक पाणिनि का सूत्र है – ''उदोष्ठ्यपूर्वस्य'' (अ० ७। १। १०२)।

## [रूपसिद्धि]

१. **पुपूर्षति।** पॄ + सन् + ति। 'पूरितुमिच्छति' इस अर्थ में 'पॄ पालनपूरणयोः' (२। ७०) धातु से 'सन्' प्रत्यय, अगुण, धातुघटित ऋकार को उर्, द्विर्वचनादि, उकार को दीर्घ, मूर्धन्यादेश, 'पुपूर्ष' की धातुसंज्ञा, वर्तमानासंज्ञक 'ति' प्रत्यय, अन्-विकरण तथा अकारलोप।

२. **बुभूर्षति।** ॠ + सन् + ति। 'भरितुमिच्छति' इस अर्थ में 'भृ भर्त्सने' (८। १८) धातु से सन्, उर्, द्विर्वचनादि, 'बुभूर्ष' की धातुसंज्ञा तथा 'ति' विभक्तिकार्य।

३. **मुमूर्षति।** मॄ + सन् + ति। 'मरितुमिच्छति' इस अर्थ में 'मृङ् प्राणत्यागे' (५। १११) धातु से सन्, उर्, द्विर्वचनादि, धातुसंज्ञा तथा विभक्तिकार्य।

४. **बोभूर्यते।** भृ + य + ते। 'भृशं भृणाति' इस अर्थ में 'भृ भर्त्सने' (८। १८) धातु से 'य' प्रत्यय, अगुण, ॠ को उर्, द्विर्वचनादि, अभ्यासघटित उकार को गुण, उकार को दीर्घ, धातुसंज्ञा तथा विभक्तिकार्य।

५. **प्रावुवूर्षति।** प्र + आ + वृञ् + सन् + ति। 'प्रावरितुमिच्छति' इस अर्थ में

'प्र + आङ्' उपसर्गपूर्वक 'वृञ् वरणे' (४। ८) धातु से सन्, अगुण ऋकार को उर्, द्विर्वचनादि, उकार को दीर्घ, धातुसंज्ञा तथा विभक्तिकार्य।

६. **संवुवूर्षते।** सम् + वृङ् + सन् + ते। 'संवरितुमिच्छति' इस अर्थ में 'सम्' उपसर्गपूर्वक 'वृङ् संभक्तौ' (८। ५१) धातु से सन्, अगुण, उर्, द्विर्वचनादि, दीर्घ, मूर्धन्यादेश, धातुसंज्ञा तथा विभक्तिकार्य।। ६७५।

## ६७६. इन्यसमानलोपोपधाया ह्रस्वश्चणि [३। ५। ४४]

### [सूत्रार्थ]

इन् के बाद चण् प्रत्यय के परे रहते ऐसे उपधासंज्ञक वर्ण को ह्रस्व आदेश होता है, जिससे परवर्ती समानसंज्ञक वर्ण का लोप न हुआ हो।। ६७६।

### [दु० वृ०]

अविद्यमानसमानलोपोपधाया ह्रस्वो भवति इनि चण्परे। अचीकरत्,अजीजपत्, अलीलवत्। इन्ग्रहणम् **इन्सामान्यार्थम्।** तेन वादितवन्तं प्रयोजितवान् 'अवीवदद् वीणां परिवादकेन' इति असमानलोपतैव। असमानलोपोपधाया इति किम् ? अससामत्। उपधाया इति किम् ? अचकाङ्क्षत्। कथं गोनावमाख्यातवान् – अजुगोनत् ? ओतः स्थानिवद्भावात्।। ६७६।

### [दु० टी०]

इन्य०। समानस्य लोपः **समानलोपः,** अविद्यमानः समानलोपो यस्य सोऽ**समानलोपः,** तस्योपधा **असमानलोपोपधा,** तस्या इत्याह–अविद्यमानेत्यादि। चण् परो यस्मादिनः स चण्परः, कृजिलूभ्यो हेताविन्। द्विर्वचनह्रस्वयोः प्राप्तयोः परत्वाद् ह्रस्वस्ततो द्विर्वचनम्। इनि कृतं स्थानिवदिति कृजिलूधातुरूपमेवाभिधत्ते। इन्ग्रहणं किमर्थम् – 'अलीलवत्, अपीपचत्' इत्यत्रोकारस्य ह्रस्वत्वम् मा भूत्, विषयविज्ञानाद् वृद्धिरिह बाधिका चेत् कृतायां वृद्धावौकारस्य प्रसज्येत। तत्राप्यन्तरङ्गत्वाद् आवादेशश्चेत्, नैवम्। प्रागेव वृद्धेरावादेशाच्च चणि ह्रस्वभाविन्युपधा, तस्मादन्तरङ्गाणामनवकाशेन प्रतिबन्धकत्वाद् ऊकारावस्थायामेव ह्रस्वः प्रसज्येत इतीन्ग्रहणम्।

अस्तु, उकारावस्थायामेव ह्रस्वः, **'यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते'** (का० परि० ४७) इति ह्रस्वो वृद्धिमेव बाधते, न तु गुणम्। गुणे कृतेऽवादेशे च सिद्धम् – अलीलवत् इति, तर्हि 'अदीदपत्, अदिधपद्' इत्यत्र पकारागममन्तरङ्गं बाधित्वा ह्रस्वः, तत्र निमित्ताभावात्। पकारागमो न सिध्यति। **अन्य** आह – वृद्ध्यावादेशयोः कृतयोरिनो लोपे कृते चणि परे ह्रस्वभाविन्युपधा भवतीति इनो लोपस्य स्थानिवत्त्वाद् व्यवधानं स्यात्, अत्र प्रतिषिध्यते स्थानिवद्भावः। चण्परनिर्देशेनेति। अस्य वचनस्येदं प्रयोजनम् 'अवीवदद् वीणां परिवादकेन' इत्यत्र ह्रस्वत्वं यथा स्यात्। किमर्थं चण्परग्रहणम् इन्ग्रहणमेवास्ताम्-कारयति, हारयति। मानुबन्धानां ह्रस्ववचनादिह न स्यात्। 'अचीकरत्, अजीहरत्' इत्यत्र स्यादिति दुर्ज्ञानम्। उपधेत्यादि। उपधाग्रहणमन्तरेणान्तस्य मा भूत्।

ननु इन् इति स्थिते पूर्ववद् वृद्ध्यादिव्याख्यानं किमत्र युक्तम्, वचनादन्त्यस्यानन्त्यस्य वा। तत्रानन्त्यपक्षे **'सप्तम्या निर्दिष्टे पूर्वस्य'** (का० परि २१) इत्यस्य बाधा स्यात्। अन्त्यपक्षेऽपि वृद्ध्यावादेशयोर्बाधा स्यात् ? सत्यम्, उभयसम्भवे विशेषणविशेष्यभावं प्रति **कामचार:** इत्यनन्त्यस्वरस्य ह्रस्व: स्याद् इत्येवं विज्ञायमाने 'अचकाङ्क्षत्' इत्यत्रापि स्यादिति भाव:। नन्वेकेन वर्णेन व्यवधानमाश्रीयते न त्वनेकेन। **''न शास्वृदनु–बन्धानाम्''** (३। ५। ४५) इति लिङ्गाच्च। तर्हि **उत्तरार्थं ''लोप: पिबतेरिच्चाभ्यासस्य''** (३। ५। ४६) इत्युपधास्थाकारस्य लोपो यथा स्यात्, अन्त्यस्य मा भूत्। ननु च ह्रस्वापवादो लोप:, उत्सर्गादेशे चापवादेन भवितव्यमिति। यत्रैव ह्रस्वप्रसङ्गस्तत्रैव लोप: स्यात्, न स्वरोपस्थानाद् वृद्धिसामर्थ्याच्च। ह्रस्वविधेरनन्त्यस्य लोपविधिस्तदन्तस्यैव स्यात्। सत्यपि सम्भवे बाधकं भवतीति **तस्मादुत्तरार्थं** क्रियमाणमिहापि **सुखप्रतिपत्त्यर्थमु–**पधाग्रहणम् इति।

गोनावमाख्यातवान् इति। **''इन् कारितं धात्वर्थे''** (३।२।९) इतीन्, इन्यौकारस्य लोपे **'स्वरादेश: परनिमित्तक: पूर्वविधिं प्रति स्थानिवद् भवति'** (का० परि० ९) इत्यनुपधाया ह्रस्वो न स्यादित्यर्थ:। यद्येवम्, असमानलोपग्रहणेनापि नार्थ:। साम आख्यत् **अससामत्।** मालामाख्यत् **अममालद्** इति। स्थानिवद्भावात् सिध्यति? सत्यम्, ह्रस्वविधिं प्रति स्थानिवद्भावो नास्ति, तदर्थं मनसिकृत्य प्रत्युदाहृतम् – सामान्याख्यद् **अससामत्** इति। एवं स्वामिनमाख्यद् **असस्वामत्।** तथा गोमिनमाख्यद् **अजुगोमत्।** स्वरव्यञ्जनयोरयमादेश: समुदायस्य तात्पर्येण निवृत्तौ व्याख्यायमानायां समुदाय एव निवर्तते नावयव इति। नास्त्यवयवकृतस्थानिवद्भाव:, स्थानिवद्भावादादेशो विशिष्यते स्वरस्यादेश: **स्वरादेश:** स्थानिवद्भवतीति। **अन्य** आह – अवयवार्थकत्वात् समुदायस्य समुदाये स्थानिनि अवयवानामपि स्थानित्वम्। अनेकस्थानिसम्बन्धेऽपि चाश्रीयमाणस्य व्यापारात् स्वरस्यादेश इति व्यपदेशस्तदाऽसमानलोपग्रहणं **स्थानिवद्भावार्थम्,** तेन 'अजुगोनत्' इत्यादि सिद्धं भवति। **पूर्वपक्षवादिनो** मतेन यद्यपि समानश्चान्यश्च लुप्यते तथापि तदाश्रयप्रतिषेधो भविष्यति असमानलोपश्रुतेरकृतार्थत्वादिति।। ६७६।

## [वि० प०]

इन्य०। समानस्य लोप: **समानलोप:,** न विद्यते समानलोपो यस्य स: **असमानलोप:** शब्द:, तस्योपधा **असमानलोपोपधा** तस्या इत्याह अविद्यमानेत्यादि। कृजिलूभ्यो हेताविन्, जयते: **''स्मिजिक्रीञामिनि''** (३।४।२४) इत्यादिनात्त्वे, **''अर्तिह्री०''** (३।६।२२) इत्यादिना पकारागम:, इतरत्र वृद्धिरेव, अद्यतन्याम् – दि, चण्, द्विर्वचनह्रस्वयो: प्राप्तयो: परत्वाद् ह्रस्व:, ततो द्विर्वचनम्, इनि कृतस्य स्थानिवद्भावात् 'कृ–जि–लू' इत्येतेषां द्विर्वचनं भवति, अलोपे समानस्य सन्वल्लघुनीनि चण्पर इति सन्वद्भाव:। **''करोते:, सन्यवर्णस्य''** (३। ५। ४; ३। २६) इतीत्त्वम्। लुनातेस्तु **''उवर्णस्य जान्तस्थापवर्गपरस्य''** (३।३।२७) इत्यादिनाऽभ्यासे इत्त्वम्, सर्वत्र **''दीर्घो लघो:**

(३।३।३६) इति दीर्घः। अथ इन्ग्रहणं किमर्थम्, न हीनमन्तरेण चणः सम्भवोऽस्तीति 'अलीलवत्' इत्यादावन्तरङ्गत्वादिनि वृद्ध्यावादेशयोः कृतयोः कारितलोपे सति चण्निमित्ते उपधाया ह्रस्वो भविष्यति।

न च वक्तव्यम् इनो लुप्तस्य स्थानिवद्भावाद् उपधाया व्यवहितत्वात् कथं ह्रस्व इति, यस्माद् **'येन नाव्यवधानं तेन व्यवहितेऽपि स्यात्'** (व्या० परि० ३९) इति वचनप्रामाण्याद् इना व्यवधानेऽपि चणि ह्रस्वो भविष्यतीत्याह – इन्ग्रहणम् **इन्सामान्यार्थम्** इति। सामान्यस्यैकत्वान्नित्यत्वाच्च व्यवधानं समानलोपता च न संभवतीति ह्रस्वः प्रवर्तते। ननु सन्वद्भावविधौ इनीति **जातिनिर्देशा**देवायमर्थः शक्यते समर्थयितुम्। न हि ह्रस्वाभावेऽभ्यासे सन्वद्भावः उपपद्यते लघुनीत्यस्य व्यावृत्तेर्विषयत्वात्। नैवमेतस्मिन् सति तच्छक्यते वक्तुम्, अन्यथा तदप्यसङ्गतमेव मन्यते।

अवीवदद् इति वदेर्हेताविन्, वादितवन्तं प्रयोजितवान् इति पुनरिनि कृते पूर्वस्येनो लोपश्चणादिकं च पूर्ववत्। 'अससामत्' इति। सामान्याख्यातवान् इति **''इन् कारितं धात्वर्थे''** (३।२।९) इतीन्, **''इनि लिङ्गस्य''** (३। २। १२) इत्यादिना अन्–भागस्य लोपः, स्वरादेशो हि स्थानिवद्भावो भवति न तु स्वरव्यञ्जनानामादेश इति प्रतिषेध उच्यते। इह यदि उपधाग्रहणं न स्यात्, वर्णान्तस्य विधिरिति न्यायात्। लूप्रभृतेर्धातोरन्तस्योकारस्यैव ह्रस्वः स्यात्। अथान्तरङ्गत्वाद् वृद्ध्यावादेशाभ्यामत्र भवितव्यम्, अतोऽन्तेऽकृतार्थत्वाद् अनन्ते भविष्यतीति चेत्, न। एवं सति 'अचकाङ्क्षत्' **इत्यत्रापि** स्यादित्याह – उपधेत्यादि। ननु चान्ते वचनस्याकृतार्थत्वान्मा भूद् आनर्थक्यमिति **वचनप्रामाण्या**देकेन वर्णेन व्यवधानमाश्रीयते। न त्वनेकेनेति न्यायान्नात्र ह्रस्वो भविष्यति किमुपधाग्रहणेन ? सत्यमेतत्। किन्तु **''लोपः पिबतेरीच्चाभ्यासस्य''** (३। ५। ४६) इत्यत्रानुवर्तनार्थम् उपधाग्रहणम्, तेनोपधाभूतस्याकारस्य लोपो यथा स्यात्, अन्यथा ह्रस्वो नामात्र स्वरस्य स्थाने भवन्नन्तस्यासम्भवाद् अनन्तस्य भविष्यति, किन्तु लोपः पुनस्तत्रान्तस्यैव स्यात् तस्मा**दुत्तरार्थं** क्रियमाणम् इहापि **सुखार्थं** भवतीति।

गोनावमाख्यातवान् **गोनौः,** गोनौ। गोसहिता नौर्गोनौरिति वा, न तु गौश्च नौश्चेति द्वन्द्वः, तदा समाहारे नपुंसकत्वाद् ह्रस्वः स्यात्, इतरेतरयोगे च द्विवचनमिति। इह धात्वर्थे इनि कृते सति औकारस्यासमानलोपत्वाद् ह्रस्वः प्राप्तः औकारस्य स्थानिवद्भावेन इनो व्यवधानान्न भवति।। ६७६।

## [बि० टी०]

इन्य०। उभयोः सावकाशत्वे परत्वम्, तच्च 'पपाच' इत्यादौ द्विर्वचनस्यावकाशः। अपुपुत्रीयदित्यादौ ह्रस्वस्यावकाशः। नामधातोरित्यादिना आद्यस्य द्विर्वचने द्वितीयस्य ह्रस्वः। ननु **''काम्य च''** (३। २। ६) इत्यत्र **''अ च''** इति प्रश्लेषव्याख्याने अदधनीयदितिवद् अत्रापि ह्रस्वो न स्यादिति आयिप्रत्यये 'अपुपुत्रायते' इत्यत्र **सावकाशत्वं** ज्ञातव्यम्। पय इवाचरतीति आयिः 'अपपयायत' इत्यत्र वा अपीपचद् इत्यत्र ह्रस्वः स्यात्।

ननु ओणेर्ऋदनुबन्धो **ज्ञापयति** – नित्यमपि द्विर्वचनं ह्रस्वत्वेन बाध्यते इति **''न शास्वृदनुबन्धानाम्''** (३।५।४५) इति सूत्रे ज्ञापयितव्यम्, ततस्तेन न्यायेन सिद्धं कथं परत्वादित्युक्तम् ? न देश्यम्, ओण्धातोस्तावत् स्वरादित्वाद् दृष्टान्तानुवृत्तिकतया स्वरादिधातोरेव ज्ञाप्यते न व्यञ्जनादिधातोरिति **हेमकरः**। ननु **'स्वरविधिः स्वरे'** इत्यादिना द्विर्वचनमादौ पश्चात् स्वरविधिर्भविष्यति। कथमुक्तं परत्वम्, तदयुक्तम्। यत्र हि द्विर्वचनं नोक्तम्, यत्र आयौ कृते स्वरविधौ द्विर्वचनं न प्राप्नोति तत्रैवेयं परिभाषा। यथा 'निनाय' इत्यादौ वृद्धौ कृतायां सत्यां नायभागस्य द्विर्वचनम्। आदौ नीशब्दस्य द्विर्वचने कृते सति 'निनाय' इति न सिध्यति, अतस्तत्रैवेयं परिभाषा। एवं चक्रतुरित्यादौ रेफे कृते पश्चाद् द्विर्वचनम् एकस्वरत्वविरहादसिद्धम्। आदौ द्विर्वचने कृते सिध्यत्येव, अत एवात्र प्रवर्तते। अचीकरदित्यादौ ह्रस्वे कृते इनि यत्र कृतं तत् सर्वं स्थानिवदिति न्यायात् कृशब्दस्य द्विर्वचनम्, अकृते ह्रस्वेऽपि कृशब्दस्य, ततोऽत्र न तस्यावसर इति **हेमकरेणोक्तम्**।

ननु यदि तस्यानवसरस्तदा कथम् 'अतिष्ठिपत्, अजिघ्रिपत्' इत्यत्र इनि कृतस्य स्थानिवद्भावात् कृतेऽपीत्त्वे स्थाशब्दस्य द्विर्वचनम्, अकृतेऽपि तदेव इनि कृतस्य स्थानिवद्भावात्। तन्न, इनि चणि निमित्ते कृतस्येत्त्वस्य कथं स्थानिवद्भावः। किञ्च एतज्ज्ञापकम् अजान्तस्थापवर्गपरस्यावर्णे इत्युक्तम्, ततः कृते इत्त्वेऽवर्णाभावात् कथं स्थानिवद्भावः। अत्र **हेमकरस्य** पक्षपातो भवतीति कृत्वा **हेमकरस्य** पक्षं जना वदन्ति। **'स्वरविधिः स्वरे'** इत्यादौ द्विर्वचने कृते पश्चात् **''तिष्ठतेरित्''** (३। ५। ४७) इत्यनेन इकारे कृते सन्वद्भावे सतीत्त्वं स्यादेव। अतः 'अतिष्ठिपत्' इत्यादि सिद्धम्, तदप्यसङ्गतम्। आदौ द्विर्वचने पश्चादित्त्वे सति सन्वद्भावो न स्याद् योऽनादिष्टात् स्वरात् इत्यादिना स्थानिवद्भावाद् आकारस्य ततो लघुधात्वक्षरत्वाभावात् कथं स्यात् ? अत्र सर्वे **हेमकर**पक्षां महतीं लज्जां प्रापुः, तं प्रति विशेषोऽप्युक्तो **हेमकरेण** कथमयं सिद्धान्तो दत्त इति कृत्वा **पण्डित**स्वयमेवमाह – अचीकरद् इत्यादौ **'स्वरविधिः स्वरे'** इत्यस्यावतारो नास्त्येव, तस्यार्थाज्ञानात्। तथाहि तत्र स्वरे स्वरादौ प्रत्यये किंविशिष्टे द्विर्वचननिमित्ते द्विर्वचने कृते पश्चात् स्वरविधिरिति। यस्मिन् प्रत्यये द्विर्वचनं श्रुतत्वात् तस्मिन्नेव प्रत्यये यत्र विधिस्तत्र कृते द्विर्वचने पश्चात् स्वरविधिस्तत्र द्विर्वचनस्य निमित्तं चण्, स्वरविधे–र्निमित्तम् इन्, चणि कथमस्या**वतारः**। ननु यदि श्रुतव्याख्याश्रिता तर्हि कथम् अपीप्यद् इत्यत्र द्विर्वचनं चणि परतः इहाभ्यासलोपश्च इनि चणि निमित्ते तस्मादादौ लोपः स्यात्, कृते लोपे एकस्वरसहितव्यञ्जनत्वाभावाद् द्विर्वचनमेव न प्राप्नोति ? सत्यम्, अत्राभ्यासग्रहणादादौ द्विर्वचनं न स्वरविधिः। तर्हि कथं द्विर्वचने कृते पश्चाद् उपधा–भूतस्याकारस्य लोपः स्वरविधित्वादित्युक्तम्। **''लोपः पिबेतरीच्चाभ्यासस्य''** (३। ५। ४६) इत्यत्र **पञ्जिकायां** 'स्वरविधिः स्वरे' इत्यनर्थकम् अभ्यासग्रहणसामर्थ्यादेव युज्यते वक्तुम् ? सत्यम्, जवाकुसुमसन्निधाने काचादेरिवात्रापि चण्सन्निधानादिनोऽपि चण्त्वमुप–चरितम्, तद्गुणाध्यारोपात्। न च वाच्यं तद्गुणाध्यारोपेऽन्यत्रापि स्यात्। ईच्चाभ्यास–ग्रहणादुपचरितम्, अन्यथा सन्न स्यात्। अन्यत्र कथमिति **केचिदा**चक्षते। **अन्य** आह – अभ्यासग्रहणसामर्थ्यादत्र प्रवर्तते स्वरविधिः स्वरे इति।

**वस्तुतस्तु** एवं युज्यते **पञ्जी** – द्विर्वचने कृते पश्चादुपधालोपः। ननु कथमादौ द्विर्वचनम् पश्चादुपधालोप एव प्राप्नोति ? तत्राह – स्वरविधित्वाद् द्विर्वचनमेव **प्राक्**। एतदुक्तं भवति द्विर्वचनमेव प्राप्नोति स्वरत्वाभावादत्रादौ द्विर्वचनम्, द्विर्वचनस्य स्वरत्वात् स्वरस्य सत्तायामेव द्विर्वचनमिति भावः। एतेन ओणेर्ऋदनुबन्धस्य ज्ञापकं सर्वोद्दिष्टमिति **दूषणम्**। ननु तथापि कथमिदमुच्यते ह्रस्वस्य पश्चाद्भवेन पूर्वभवेन वा यः साध्यस्तस्य क्षतिर्न स्यात्, किमनेन यत्नेन, नैवम्। प्राग् द्विर्वचने पश्चाद् ह्रस्वे स्थानिवद्भावादाकारस्य लघूपधत्वाभावे सन्वद्भावो न स्यात्। यदि च प्राग् ह्रस्वस्तदा **''योऽनादिष्टाद्''** (का० परि० ११) इत्यनेन स्थानिवद्भावो न स्यात्, अनादिष्टादभ्यासत्वे परत्वात्। पूर्वस्मिन् काले यः स्वरविधिस्तं प्रति न स्थानिवत् परस्मिन् यो विधिस्ततः स्थानिवद्भावो भवत्येव। ननु कथम् अपीपटत्, ओतः स्थानिवद्भावात्। यथा 'अजुगोनत्' इति, न च वक्तव्यमेव **''अस्योपधायाः''** (३। ६। ५) इत्यत्र नामिग्रहणं लिङ्गार्थम्, तद्बलान्न स्थानिवद्भावः। अलीलवद् इति तस्य कृतार्थत्वात् ? सत्यम्, यस्य मतेऽनेकवर्ण–व्यवधानेऽपि स्यात्, तन्मतमवलम्ब्योदाहरणम्।। ६७६।

## [समीक्षा]

'अचीकरत्, अलीलवत्' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में ह्रस्वादेश किया गया है। पाणिनीय 'णिच्' के लिए कातन्त्रकार ने 'इन्' प्रत्यय तथा पाणिनीय 'चङ्' के लिए कातन्त्रकार ने 'चण्' प्रत्यय किया है। तदनुसार ही उभयत्र शब्दभेद है। पाणिनि का सूत्र है – ''णौ चङ्युपधाया ह्रस्वः'' (अ० ७। ४। १)। यह ज्ञातव्य है कि 'णिच्–इन्' में केवल 'इ' तथा 'चङ्–चण्' में केवल 'अ' शेष रह जाता है, अन्य वर्ण अनुबन्ध हैं। इस प्रकार उभयत्र प्रायः समानता है।

## [विशेष वचन]

१. इन्ग्रहणम् इन्सामान्यार्थम् (दु० वृ०; वि० प०)।

२. उभयसम्भवे विशेषणविशेष्यभावं प्रति कामचारः (दु० टी०)।

३. उत्तरार्थं क्रियमाणमिहापि सुखप्रतिपत्त्यर्थमुपधाग्रहणमिति (दु० टी०; वि० प०)।

४. समुदायस्य तात्पर्येण निवृत्तौ व्याख्यायमानायां समुदाय एव निवर्तते **नावयवः** (दु० टी०)।

५. एकेन वर्णेन व्यवधानमाश्रीयते न त्वनेकेन (वि० प०)।

६. नित्यमपि द्विर्वचनं ह्रस्वत्वेन बाध्यते (बि० टी०)।

७. जपाकुसुमसन्निधाने काचादेरिवात्रापि चण्सन्निधानादिनोऽपि चण्त्वम् उपचरितम्, तद्गुणाध्यारोपात् (बि० टी०)।

## [रूपसिद्धि]

१. **अचीकरत्**। अट् + कृ + इन् = कारि + चण् + दि। 'कुर्वन्तं प्रायुक्त' इस अर्थ में 'डु कृञ् करणे' (७। ७) धातु से अद्यतनीसंज्ञक प्रथमपुरुष–एकवचन 'दि' प्रत्यय,

''अङ् धात्वादिर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु'' (३। ८। १६) से धातुपूर्व अडागम, चण् प्रत्यय, 'च–ण्' अनुबन्धों का प्रयोगाभाव, प्रकृत सूत्र से ह्रस्व, तथा द्विर्वचनादि।

२. **अजीजपत्**। अट् + जप + इन् + चण् + दि। 'जपन्तं प्रायुक्त' इस अर्थ में इन्प्रत्ययान्त जप (= जापि) धातु से अद्यतनी–दि प्रत्यय, अट्, चण्, ह्रस्व तथा द्विर्वचनादि।

३. **अलीलवत्**। अट् + लावि + चण् + दि। 'लुनन्तं प्रायुक्त' इस अर्थ में इन्प्रत्ययान्त लूञ् (=लावि) धातु से अद्यतनी–दि प्रत्यय, अट्, चण्, ह्रस्व तथा द्विर्वचनादि।

४. **अवीवदत्**। अट् + वादि + इन् + चण् + दि। 'वदन्तं प्रयोजितवान्' इस अर्थ में 'वद व्यक्तायां वाचि' (१। ६१५) धातु से ''धातोश्च हेतौ'' (३। २। १०) से 'इन्' प्रत्यय, उपधादीर्घ=वादि। 'वादितवन्तं प्रयोजितवान्' इस अर्थ में 'वादि' धातु से पुनः ''धातोश्च हेतौ'' (३। २। १०) से इन् प्रत्यय, ''कारितस्या०'' (३। ६। ४४) से पूर्ववर्ती कारित = इन् प्रत्यय का लोप, उससे अद्यतनीसंज्ञक 'दि' प्रत्यय, अट् आगम, चण् प्रत्यय, ह्रस्व तथा द्विर्वचनादि।। ६७६।

## ६७७. न शास्वृदनुबन्धानाम् [३। ५। ४५]

### [सूत्रार्थ]

'चण्–इन्' प्रत्ययों के परे रहते 'शासु' धातु तथा 'ऋ' अनुबन्धवाली धातुओं में उपधा को ह्रस्वादेश नहीं होता है।। ६७७।

### [दु० वृ०]

शासोर्ऋदनुबन्धानां चोपधाया ह्रस्वो न भवति इनि चण्परे। अशशासत्, अडुढौकत्, अतुत्रौकत्। शासोरिति किम् ? आङः शास इच्छायाम् – आशीशसत्। ओर्णेर्ऋदनुबन्धो ज्ञापनार्थः। नित्यमपि द्विर्वचनं ह्रस्वत्वेन बाध्यते। तेन 'मा भवान् अटिठत्। भ्राजृ भासृ एव ऋदनुबन्धो नाद्रियते। भ्राज–अबिभ्रजत्। भास् – अबीभसत्। भाष–अबीभषत्। दीप–अदीदिपत्। जीव्–अजीजिवत्। मील–अमीमिलत्। पीड–अपीपिडत्। कण्–अचीकणत्। रण्–अरीरणत्। वण्–अवीवणत्। भण्–अबीभणत्। श्रण्–अशिश्रणत्। हेठ–अजीहिठत्। लुलृ–अलूलुपत्। भ्राजनं **भ्राज**स्तमचीकरत्–अबभ्राजत्। समानलोपत्वात् सन्वद्भावो न स्यात्, तेन भ्राजादीनां वेति न वक्तव्यम्।। ६७७।

### [दु० टी०]

न शा०। पूर्वेण प्राप्तस्य प्रतिषेधः। शासोरित्यादि। उदनुबन्धग्रहणं **'शासु अनुशिष्टौ'** (२।३९) इत्यस्य ग्रहणार्थम्। **'आङः शास इच्छायाम्'** (२। ४६) इत्यस्य मा भूत्। शासोर्ऋदनुबन्धत्वं क्रियतां तत ऋदनुबन्धत्वेनापि सिद्धम्। अशशासदिति। नैवम्, **''उदनुबन्धपूक्लिशां क्ति''** (४।६।८४) इति वेट्प्रतिपत्त्यर्थम्। उभे क्रियेताम्। **'उ शासृ अनुशिष्टौ'** इति, यथा **'उ तृदिर्'** (६।९) इति। क्लिष्टपाठोऽक्षराधिक्यादपि गरीयान्।

**अन्य** आह–स्वरूपग्रहणं **चेक्रीयितलुग्**निवृत्त्यर्थम्–अशशासत्। ओणेरित्यादि। ऋश्चा–सावनुबन्धश्चेति ज्ञापनमेवार्थः प्रयोजनमस्येति **'ओणृ अपनयने'** (१।१४७) इत्युपलक्षणम्, तथा **'ओखृ राखृ एजृ कम्पने'** (१।३६, ७०, ३४७) इति–मा भवान् ओणिणत्, मा भवान् ओचिखत्, मा भवान् एजिजत्। **''स्वरादेर्द्वितीयस्य''** (३।३।२) इति द्विर्वचने कृते ह्रस्वस्याप्राप्तिरेवोपधात्वाभावात्। यदेषामृदनुबन्धत्वं नास्ति, तज्ज्ञापयति – नित्यमपि द्विर्वचनं ह्रस्वत्वेन परेणापि बाध्यते इत्याह–तेनेत्यादि। मा भवान् अटिटद् इति, अत्र त्रीणि कार्याणि प्राप्नुवन्ति–द्विर्वचनं ह्रस्वः कारितलोपश्च। तत्र **'लोपस्वरादेशयोः स्वरादेशयोर्विधिर्बलवान्'** (का० परि० ३५) इति पूर्वं ह्रस्त्वम्, ततो द्विर्वचनम्, ततः कारितलोपः।

ननु च **'परानित्यम्, नित्यादन्तरङ्गम्, अन्तरङ्गाच्चानवकाशं बलीयः'** (का० परि० ५१) इति ह्रस्वत्वमन्तरङ्गं वर्णाश्रयत्वात् किं ज्ञापकेनेति ? सत्यम्, **'वार्णात् प्राकृतं बलीयः'** (का० परि० ८१) इत्युच्यते, न समानलोपश्च। **''शास्वृदनुबन्धानाम्''** (३।५।४५) इति कृते धात्वधिकारात् शासादेरिनि पूर्वस्याधातुत्वान्न प्राप्नोति ऋदनुबन्ध–साहचर्यात्। अथ समानलोपवचनसामर्थ्याच्छब्द एवावसीयते इति **प्रतिपत्तिगौरवं** स्यात्। भ्राज–भास–भाष–दीप–जीव–मील–पीड–कण–रण–भण–श्रण–हेठ-लुपीनां त्रयोदशानां **विभाषा** न वक्तव्या एवेत्याह-भ्राज इत्यादि। अनयोर्धात्वोर्ऋदनुबन्धो नादरणीय इत्यर्थः। तथा च **'टु भ्राज दु भ्राशृ दु भ्लाशृ दीप्तौ** (१।५४०), **भास दीप्तौ'** (१।४४०) इति पठ्यते। 'भाष व्यक्तायां वाचि, दीपी दीप्तौ, जीव बलप्राणधारणयोः, मील स्मील क्ष्मील निमेषणे, पीड अवगाहने, अण रण वण भण मण कण क्वण ष्टन वन ध्वन शब्दार्थाः, चण श्रण दाने, हेठ विबाधायाम्, लुप्लृ छेदने (१।४३४; ३।९५; १।१९२, १६६; ९।१२; १।१४६, ३६०, ५।८,५१५)। लुपिर्लुचिरित्**येके** वदन्ति, हेठमपि न पठन्ति। सर्वत्र हेताविन् वक्तव्यमन्तरेणापि द्वैरूप्यं सिध्यतीत्याह –भ्राजनमित्यादि। घञन्तादिन् कारितं धात्वर्थे इतीन्, ततो हेताविन्। समानलोपत्वाद् ह्रस्वो न स्यात्। एवम् 'अबभाषत्, अबभासत्, अदिदीपत्, अजिजीवत्, अमिमीलत्, अपिपीडत्, अचकाणत्, अरराणत्, अबभाणत्, अशश्राणत्, अजिहेठत्, अलुलोपत्' इति साध्यस्यात्र विवक्षितत्वात्।। ६७७।

## [वि० प०]

न शास्वृ०। अथ किमर्थम् **'ओणृ अपनयने'** (१।१४७) इत्यस्य ऋदनुबन्ध उच्यते। औणिणदित्यत्र ह्रस्वप्रतिषेधार्थमिति चेत्, तदयुक्तम्। इह सत्यसति वा ह्रस्वत्वे नास्ति विशेषः। यतः **''स्वरादीनां वृद्धिरादेः''** (३।८।१७) इति वृद्ध्या भवितव्यं यत्र, तर्हि न वृद्धिस्तदर्थं **''न मामास्मयोगे''** (३।८।२१) इति निषेधान्मा भवान् ओणिणद् इति ओकारस्य ह्रस्वो मा भूद्, नैतदेवम्। इह ह्रस्वत्वे कृते अकृतेऽपि **''स्वरादेर्द्वितीयस्य''** (३।३।२) इत्यनेन द्विर्वचनेन भवितव्यम्। द्विर्वचने कृते ह्रस्वो नास्ति अनुपधत्वात्, अतो नित्यत्वाद् द्विर्वचने सति ह्रस्वस्य न प्राप्तिरिति तन्निषेधार्थम् ऋदनुबन्धकरणमनर्थकम् इत्याह – ओणेरित्यादि। अन्यथा अटेरित्युपधाया दीर्घत्वे नित्यत्वाद् द्विर्वचने कृते कथं ह्रस्वः स्यादिति भावः। तत्रापि केवलस्यावर्णस्याकार इति कृते विशेषाभावान्मायोगे दर्शितम्। न च वक्तव्यं वर्णाश्रयत्वाद् ह्रस्वत्वमन्तरङ्गं नित्याद् द्विर्वचनात् प्रागेव भविष्यति

किं ज्ञापकेनेति। यस्माद् **'वार्णात् प्राकृतं बलीयः'** (का० परि० ८१) इति द्विर्वचनमेव स्यादिति। भ्राजृ इत्यादि। ऋदनुबन्धस्य ह्रस्वप्रतिषेधः प्रयोजनम्, भ्राजभासोश्च विकल्पनया ह्रस्वप्रयोजनं नास्तीति नानयोर्ऋदनुबन्ध आदरणीय इत्यर्थः। तथा च **'टु भ्राज–टु भ्राशृ–टु भ्लासृ दीप्तौ, भास दीप्तौ'** (१। ५४०, ४४०) इति गणे पठ्यते। हेठलुपोरे–कारौकारयोरिदुतौ ह्रस्वौ। विकल्पस्तर्हि कथमित्याह–भ्राजनमित्यादि। **इहाभिधानात् ''चजोः कगौ''** (४।६।५६) इति न भवत्यनभिधानात्। घञन्ताद् धात्वर्थे इनि कृते पुनर्हेत्वर्थ–विवक्षायामिन्। घञोऽकारलोपे समानलोपत्वाद् ह्रस्वो न भवति। एवम् अबभ्राजत्, अबभ्राशत्, अबभासत्, अबभाषत्, अदिदीपत्, अजिजीवत्, अमिमीलत्, अपिपीडत्, अचकाणत्, अरराणत्, अबभाणत्, अशश्राणत्, अजिहेठत्, अलुलोपदिति। तेन भ्राज-भास-भाष-दीप-जीव-मील-पीड-कण-रण-भण-श्रण-हेठ-लुपादीनां त्रयोदशानां विकल्पो न वक्तव्यो भवति। तस्योक्तेन न्यायेन सिद्धत्वात्, न चैवमर्थोऽपि भिद्यते इति।। ६७७।

## [बि० टी०]

न शास्वृ०। यस्माद् **'वार्णात् प्राकृतं बलीयः'** (का० परि० ८१) इति। ननु ह्रस्वस्यापि प्राकृतत्वमस्त्येव, तदा कथं ह्रस्वो न स्यात्, द्विर्वचनमेव स्यात् **पञ्जिकायाम्।** अत्राह **दुर्गादित्यः** – तत्र ह्रस्वस्य प्राकृतत्वं नावलम्ब्यते। **गुरवस्त्वेवमाहुः** – ह्रस्वस्य न प्राकृतत्वम्। यतः **''इन्यसमान०''** (३। ५। ४४) इत्यत्र न विद्यते समानलोपो यत्र सोऽ**समानलोपः**। ततः शब्दावलम्बने ह्रस्वः। शब्दत्वं पुनः सर्वेषामेव प्रत्ययस्य प्रकृतेश्च। अतो ह्रस्वत्वं प्रति न प्राकृतत्वम्।। ६७७।

## [समीक्षा]

'अशशासत्, अडुढौकत्' इत्यादि शब्दरूपों में ह्रस्वविधि का निषेध उभयत्र किया गया है। पाणिनि का सूत्र है – ''नाग्लोपिशास्वृदिताम्'' (अ० ७।४।२)। पाणिनीय 'इत्' संज्ञा के लिए कातन्त्रकार ने अनुबन्धसंज्ञा की है। पाणिनि ने 'अग्लोपी' के पाठ से जिन धातुओं में ह्रस्व का निषेध किया है, कातन्त्र में तदर्थ अनेक व्याख्यानवचन उपलब्ध होते हैं, क्योंकि उसका पाठ सूत्र में उपलब्ध नहीं है।

## [विशेष वचन]

१. ओणेर्ऋदनुबन्धो ज्ञापनार्थः, नित्यमपि द्विर्वचनं ह्रस्वत्वेन बाध्यते (दु० वृ०)।

२. क्लिष्टपाठोऽक्षराधिक्यादपि गरीयान् (दु० टी०)।

३. स्वरूपग्रहणं चेक्रीयितलुग्निवृत्त्यर्थम् (दु० टी०)।

४. अथ समानलोपवचनसामर्थ्याच्छब्द एवावसीयते इति प्रतिपत्तिगौरवं स्यात् (दु० टी०)।

५. इहाभिधानात् ''चजोः कगौ'' इति न भवति, अनभिधानात् (वि० प०)।

६. शब्दत्वं पुनः सर्वेषामेव प्रत्ययस्य प्रकृतेश्च। अतो ह्रस्वत्वं प्रति न प्राकृतत्वम् (बि० टी०)।

## [रूपसिद्धि]

१. **अशशासत्**। अट् +शास+इन् + चण् + दि। 'शासन्नं प्रायुक्त' इस अर्थ में 'शासु अनुशिष्टौ' (२।३९) धातु से ''धातोश्च हेतौ'' (३। २। १०) से 'इन्' प्रत्यय,

अद्यतनीसंज्ञक 'दि' प्रत्यय, "अड् धात्वादिर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु" (३।८।१६) से धातुपूर्व अडागम, "श्रिद्रुस्रुकमिकारितान्तेभ्यश्चण् कर्तरि" (३।२।२६) से 'चण्' प्रत्यय, अनुबन्धों का प्रयोगाभाव, द्विर्वचनादि, प्रकृत सूत्र से ह्रस्वनिषेध तथा "कारितस्यानामिड्विकरणे" (३। ६। ४४) से कारितसंज्ञक 'इन्' प्रत्यय का लोप।

२. **अडुढौकत्**। अट् + ढौक + इन् + चण् + दि। 'ढौकन्तं प्रायुक्त' इस अर्थ में 'ढौकृ शब्दे' (१।३३२) धातु से 'इन्' प्रत्यय धातुसंज्ञा, 'दि' प्रत्यय, अडागम, चण् प्रत्यय, द्विर्वचनादि, ह्रस्वनिषेध, इन्लोप, "ह्रस्वः" (३। ३।१५) से अभ्यासगत औकार को उकार तथा "द्वितीयचतुर्थयोः प्रथमतृतीयौ" (३। ३।११) से ढकार को डकारादेश।

३. **अतुत्रौकत्**। अट् + त्रौकृ + इन् + चण् + दि। 'त्रौकृ गत्यर्थः' (१। ३३१) धातु से 'इन्' प्रत्यय, धातुसंज्ञा, अद्यतनीसंज्ञक 'दि' प्रत्यय, अडागम, चण् प्रत्यय, ह्रस्व का निषेध, द्विर्वचनादि तथा औकार को ह्रस्व उकार।। ६७७।

## ६७८. लोपः पिबतेरीच्चाभ्यासस्य [३। ५। ४६]

### [सूत्रार्थ]

चण् प्रत्यय से परवर्ती इन् के होने पर 'पा' धातु की उपधा का लोप तथा अभ्यासघटित अकार को ईकार आदेश होता है।। ६७८।

### [दु० वृ०]

पिबतेरुपधाया लोपो भवति अभ्यासस्येच्च भवति इनि चण्परे। अपीप्यत्। पिबतेरिति किम् ? पैं ओ वैं – अपीपयत्। पा रक्षणे–अपीपलत्।। ६७८।

### [दु० टी०]

लोपः। अपीप्यदित्यादि। **"शाच्छासाह्वाव्यावेपामिनि"** (३। ६। २१) इत्यायिरादेशः, ह्रस्वापवादो लोपः प्रवर्तमानोऽपि द्विर्वचनमपेक्षते। **'स्वरविधिः स्वरे द्विर्वचननिमित्ते'** कृते द्विर्वचन इति। अभ्यासस्येति किमर्थम् उपधाया एव पक्षे ईकारादेशः स्यादिति। न च भिन्नविभक्तिनिर्देशोऽन्यथा बोधयति–तदन्तविधिना यकारस्यापि स्यादिति। 'लोपः पिबतेरीदतः' इत्युक्तेऽन्यत्राकारो नास्तीत्यभ्यास एव प्रतीयते, उत्तरत्राप्यतः संबन्धो नास्तीति तिष्ठनिजिघ्रत्योर्ह्रस्वापवाद ईकारो द्विर्वचनात् प्रागेव ? सत्यम्। **अभ्यासग्रहणं प्रतिपत्ति–गौरवनिरासार्थम्**। 'पिबतेः पीप्यः' इत्यास्ताम्, अनेकवर्णत्वादभ्यासस्य भविष्यतीति न चोद्यम्, उपधाया इति वर्तते, तस्या एव प्रसज्येतेति।। ६७८।

### [वि० प०]

लोपः०। अपीप्यदिति। **'धेट् पा पाने'** (१।२६४), हेतौ णिच्, **"शाच्छासाह्वाव्या–वेपामिनि"** (३। ६। २१) इत्यादिना आयिरादेशः, द्विर्वचने कृते पश्चादुपधाभूतस्याकारस्य लोपः स्वरविधित्वात्, ततः संयोगे परे गुरुत्वाद् **"दीर्घो लघोः"** (३।३।३६) स्यादितीकार उच्यते। अपीपलदिति। **"पातेर्लोऽन्तः"** (३। ६। २३)।। ६७८।

### [बि० टी०]

लोपः। ननु 'लोपः पिबतेरीदतः' इति कृते सिध्यति, अभ्यासग्रहणं किमर्थम्।

**अस्यार्थः—** पिबतेरुपधालोपः, अकारस्य ईत्त्वं भविष्यति, अन्यत्राकारो नास्तीति। न च वक्तव्यम् – अडागमे कृते तस्यापि स्याद् **'वर्णान्तस्य विधिः'** (का० परि० ५) इति न्यायाद् अभ्यासान्तस्य भविष्यति। उत्तरत्र सम्बन्धो नास्तीति उपधाह्रस्वस्य बाधक ईकारः। अतो द्विर्वचनात् प्राक् प्रवर्तते ? सत्यम्। **प्रतिपत्तिगौरवं** स्यात्। तर्हि पिबतेरपि 'पीप्यः' इत्यास्ताम्, अनेकवर्णत्वादभ्यासस्य भविष्यति। न चोद्यम् उपधेति प्रवर्तते, तस्या एव प्रयुज्यत इति। ननूपधाया ईत्त्वम् अभ्यासलोपश्च इत्यर्थः कथन्न स्यात् ? नैवम्, ई पिबतेर्लोपोऽभ्यासस्येत्यकरणात् तस्माद् यस्य समीपे यस्य पाठस्तेन सार्द्धं तस्य सम्बन्धः।।६७८।

।। इति बिल्वेश्वरटीकायामाख्याताध्याये तृतीये पञ्चमो गुणपादः समाप्तः।।

●

## [समीक्षा]

'अपीप्यत्, अपीप्यन्' आदि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में उपधालोप तथा ईकारादेश की व्यवस्था की गई है। पाणिनि का समान सूत्र है– ''लोपः पिबतेरीच्चाभ्यासस्य'' (अ० ७। ४। ४)। अतः उभयत्र समानता है।

## [विशेष वचन]

१. अभ्यासग्रहणं प्रतिपत्तिगौरवनिरासार्थम् (दु० टी०; बि० टी०)।

२. यस्य समीपे यस्य पाठस्तेन सार्द्धं तस्य सम्बन्धः (बि० टी०)।

## [रूपसिद्धि]

१. **अपीप्यत्**। अट् + पा + इन् + चण् + दि। 'पा पाने' (१। २६४) धातु से ''धातोश्च हेतौ'' (३। २। १०) से 'इन्' प्रत्यय, ''शाच्छासाह्वाव्यावेपामिनि'' (३। ६। २१) से 'आय्' आदेश, ''ते धातवः'' (३। २। १६) से 'पायि' की धातुसंज्ञा, अद्यतनीसंज्ञक परस्मैपद–प्रथमपुरुष–एकवचन 'दि' प्रत्यय, ''श्रिद्रुस्रुकमिकारि–तान्तेभ्यश्चण् कर्तरि'' (३।२।२६) से 'चण्' प्रत्यय, 'च्–ण्' अनुबन्धों का प्रयोगाभाव, ''चण्परोक्षाचेक्रीयितसनन्तेषु'' (३। ३। ७) से धातु को द्विर्वचन, ''पूर्वोऽभ्यासः'' (३। ३। ४) से अभ्याससंज्ञा, ''अभ्यासस्यादिर्व्यञ्जनमवशेष्यम्'' (३। ३। ९) से अभ्यासघटित यकार का लोप, ''ह्रस्वः'' (३। ३। १५) से अभ्यासघटित आकार को ह्रस्व, प्रकृत सूत्र द्वारा अभ्यासस्थ अकार को ईकारउपधालोप तथा ''कारितस्याना–मिड्विकरणे'' (३। ६। ४४) से कारितसंज्ञक 'इन्' प्रत्यय का लोप।। ६७८।

## ६७९. तिष्ठतेरित् [३। ५। ४७]

## [सूत्रार्थ]

चण्परवर्ती इन् प्रत्यय के परे होने पर 'स्था' धातु की उपधा को इत्त्व होता है।। ६७९।

## [दु० वृ०]

ह्रस्व इकारोऽभ्यासस्येह। तिष्ठतेरुपधाया इट् भवति इनि चण्परे। अतिष्ठिपत्।। ६७९।

## [दु० टी०]

तिष्ठ०। **तकार उच्चारणार्थ** एव। ह्रस्व इत्यादि। ह्रस्वापवादोऽयं योगः। द्विर्वचनस्य च भावित्वाद् ईकारोऽपि न सम्बध्यते इत्यर्थः। अथ **''मान्वध्दान्शान्भ्यो दीर्घश्चाभ्यासस्य''** (३।२।३) यथा भवति वचनात् तथात्रापीति। तदसत्, **''ईच्चाभ्यासस्य''** इति प्राक् चरितार्थत्वात् **'अधिकाराणां च प्रवृत्तिनिवृत्ती इष्टतः'** इति भावः। **तिब्निर्देशः पाठसुखार्थः। अन्य** आह – **चेक्रीयितलुङ्निवृत्त्यर्थम्**, 'अतस्थेपत्' इति च न **भाषायां** दृश्यते।। ६७९।

## [वि० प०]

तिष्ठतेः। ह्रस्व इत्यादि। एतेन एकगणत्वाद् **''इच्चाभ्यासस्य''** इत्यादि नाधिक्रियते अनिष्टत्वादिति दर्शितम्, ''अर्त्तिह्री०'' (३। ६। २२) इत्यादिना पकारागमः।। ६७९।

**।। इति श्रीमत्रिलोचनदासकृतायां कातन्त्रवृत्तिपञ्जिकायां तृतीये आख्याताध्याये पञ्चमो गुणपादः समाप्तः।।**

●

## [समीक्षा]

'अतिष्ठिपत्' शब्दरूप के सिद्ध्यर्थ दोनों ही व्याकरणों में समान सूत्र द्वारा आकार को इकारादेश किया गया है। पाणिनि का सूत्र है – ''तिष्ठतेरित्'' (अ० ७। ४। ५)। अतः उभयत्र समानता है।

## [विशेष वचन]

१. तकार उच्चारणार्थ एव (दु० टी०)।

२. अधिकाराणां प्रवृत्तिनिवृत्ती इष्टतः इति भाव (दु० टी०)।

३. तिब्निर्देशः पाठसुखार्थः। अन्य आह—चेक्रीयितलुङ्निवृत्त्यर्थम् (दु० टी०)।

## [रूपसिद्धि]

१. **अतिष्ठिपत्**। अट् + स्था + इन् + चण् + दि। 'ष्ठा गतिनिवृत्तौ' (१।२६७) धातु से 'इन्' प्रत्यय, ''अर्त्तिह्रीब्लीरीक्नूयीक्ष्माय्यादन्तानामन्तः पो यलोपो गुणश्च नामिनाम्'' (३।६।२२) से पकारागम, धातुसंज्ञा, अद्यतनीसंज्ञक 'दि' प्रत्यय, अडागम, चण्, प्रकृत सूत्र से आकार को इकार, द्विर्वचनादि, इन्लोप, सकार को षकार तथा थकार को ठकारादेश।। ६७९।

# ६८०. जिघ्रतेर्वा [३। ५। ४८]

## [सूत्रार्थ]

चण्परवर्ती 'इन्' प्रत्यय के परे रहते 'घ्रा' धातु की उपधा को वैकल्पिक इकारादेश प्रवृत्त होता है।। ६८०।

## [दु० वृ०]

जिघ्रतेरुपधाया इद् भवति वा इनि चणपरे। अजिघ्रिपत्, अजिघ्रपत्। कथम् अवीवृधत्, अववर्धत्। अमीमृजत्, अममार्जत्। अचीक्लृपत्, अचकल्पत्। अचीकृतत्, अचिकीर्तत्। इनि चणि ऋवर्णस्य ऋद्गुणस्य **संज्ञापूर्वकत्वात् ''कीर्तीषोः क्तिः''** (४। ५। ८६) इति **ज्ञापकस्यानित्यत्वात्** सिद्धम्।। ६८०।

**।। इति दौर्गसिंह्यां वृत्तावाख्याते पञ्चमः पादः समाप्तः।।**

●

## [दु० टी०]

जिघ्र०। पूर्ववदिहापि व्याख्यानं पृथग्योग इह विकल्पार्थत्वात्।। ६८०।

**।। इति दुर्गसिंहकृतटीकायामाख्याताध्याये पञ्चमो गुणपादः समाप्तः।।**

●

## [समीक्षा]

'अजिघ्रिपत्—अजिघ्रिपन्' आदि शब्दरूपों के सिद्ध्यर्थ 'घ्राप्' धातु की उपधा आकार को वैकल्पिक इकारादेश दोनों ही व्याकरणों में किया गया है। पाणिनि का सूत्र है — ''जिघ्रतेर्वा'' (अ० ७।४।६)। वृत्तिकार दुर्गसिंह ने 'अवीवृधत्, अचीकृतत्' आदि प्रयोगों की सिद्धि व्याख्यानबल से दिखाई है, जब कि पाणिनि ने तदर्थ ''उर्ऋत्'' (अ० ७।४।७) सूत्र बनाया है।

## [विशेष वचन]

१. ऋवर्णस्य ऋद्गुणस्य संज्ञापूर्वकत्वात्, ''कीर्त्तीषोः क्तिः'' (४। ५। ८६) इति ज्ञापकस्यानित्यत्वात् सिद्धम् (दु० वृ०)।

## [रूपसिद्धि]

१. **अजिघ्रिपत्, अजिघ्रपत्**। अट् + घ्रा + इन् + चण् + दि। 'घ्रा गन्धोपादाने' (१।२६५) धातु से 'इन्' प्रत्यय, पकारागम, धातुसंज्ञा, अद्यतनी — 'दि' प्रत्यय, अडागम, चण् प्रत्यय, प्रकृत सूत्र से धातुघटित आकार को वैकल्पिक इकार, द्विर्वचनादि, घ् को ग् तथा ग् को ज्। पक्ष में इकारादेश के अभाव से 'अजिघ्रपत्' रूप बनेगा।। ६८०।

**।। इति कातन्त्रे तृतीये आख्याताध्याये समीक्षात्मकः पञ्चमो गुणपादः समाप्तः।।**

●

# अथ तृतीये आख्याताध्याये षष्ठोऽनुषङ्गलोपादिपादः

## ६८१. अनिदनुबन्धानामगुणेऽनुषङ्गलोपः [३। ६। १]

### [सूत्रार्थ]

इकार से भिन्न अनुबन्धवाली धातुओं में अनुषङ्ग (नकार) का लोप होता है अगुण प्रत्यय के परे रहते।। ६८१।

### [दु० वृ०]

अनिदनुबन्धानां धातूनामगुणे प्रत्यये परेऽनुषङ्गस्य लोपो भवति। स्रस्यते, ध्वस्यते, नष्टः, नष्टवान्। अनिदनुबन्धानामिति किम् ? शङ्क्यते, वङ्क्यते। अत एव वर्जनादिदनुबन्धानां नोऽस्तीति। तथा च बृंहणमिति स्वरान्तरत्वाण्णत्वं स्यात्। नञा निर्दिष्टस्यानित्यत्वात् लङ्निकम्प्योरुपतापशरीरविकारयोः स्यात्—विलगितः, विकपितः। तृन्फादीनां शुन्भान्तानामनि च न लुप्यते। **'तृफ तृन्फ तृप्तौ'** (५।३१), तृन्फतीत्यादि।। ६८१।

### [दु० टी०]

अनि०। न विद्यते इदनुबन्धो येषां धातूनामिति। न विद्यते गुणो यस्मिन् प्रत्यये इति **विग्रहः**। स्रस्यते, ध्वस्यते इति। नाम्यन्तानां नाम्युपधानां च गुणो यस्मिन् न विद्यते स इह **रूढो** गृह्यते। तेन **''गुणोऽर्तिसंयोगाद्योः''** (३। ४। ७५) इत्यनेन यण् गुणी नोच्यते। 'नष्टः, नष्टवान्' इति **''मस्जिनशोर्धुटि''** (३। ५। ३१) इति नकारागमः, स च लुप्यते। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणं नास्तीत्यनिदनुबन्धानामिति प्रतिषेधलिङ्गात्। अत एवेत्यादि। अनिदनुबन्धानामिति प्रतिषेधेन इदनुबन्धानां व्यञ्जनात् पूर्वो नकारागमो भवतीति भावः। धातुप्रकृतित्वमनिदनुबन्धानां प्रतिपाद्यागुणसम्बन्धं कुर्वन् प्रत्यासत्त्या तदगुण एवेदनुबन्धानामनुषङ्गोऽस्तीति चोद्यं निरस्यतीति। अन्यथाऽगुणेऽनिदनुबन्धानामिति ब्रूयात्। अतो निर्निमित्तत्वादुपदेशावस्थायामेवानुषङ्गो ज्ञाप्यते। **'तृह हिंसि हिंसायाम्'** (६। १५) इति गणवचनाच्च। अन्यथा कथं **''गुरोश्च निष्ठासेटः''** (४। ५। ८१) इत्यप्रत्ययः स्यात्। इरशब्दस्य समुदायस्यानुबन्धत्वं नावयवस्येति। तथाहि 'इरनुबन्धाद् वा' इत्युच्यते सण्विधावदृश इति वर्जनाच्च **'उ बुन्दिर् निशामने'** (१। ५८३) इति सानुषङ्गपाठाच्च। इच्चासावनुबन्धश्चेति, तेन तदनुविशेषणाद् वा।

**अन्ये** त्वाहुः — इदनुबन्धा इह सानुषङ्गा एव पठ्यन्ते। **अन्यः** कश्चिदाह — इदनुबन्धानामन्त्यात् स्वरात् पूर्वो नुर्वक्तव्य इति णत्वविधौ नुग्रहण**मनुस्वारोपलक्षणार्थम्**, सत्यपि नौ णत्वं न भवति। 'प्रेन्वम्, प्रेन्वनीयम्' इति, तदसत्। णत्वविधावित्युक्तमेवेति मनसि कृत्वाह — तथा चेति। अनुस्वारस्यापि स्वरत्वमपि प्रतिपादितम्, किन्त्वत्र नुग्रहणाधिकारेणेति भावः। लङ्गीत्यादि। **उपतापः** पीडा, विलगित इति, कश्चित् कष्टप्राप्त

इत्युच्यते। विकपित इति। शरीरविकार इह न स्थौल्यादिरुच्यते, न ह्यसौ कम्पेर्विषयभूतः संभवति, लङ्गतेश्च गतार्थत्वात्। कम्पतेश्चाकर्मकत्वात् कर्तरीयं निष्ठा, अन्यत्र विलङ्गितो विकम्पित इत्यादि। तृन्फादीनामित्यादि। तुदादिषु तृन्फादयो मुचादिभ्योऽन्यत्र पठ्यन्ते। तत्र य ऋदुपधस्तस्य 'तर्फिता, तृफितः, तृफति' इति प्रयोग इष्यते। सानुषङ्गस्यापि 'तृम्फिता, तृम्फितः तृम्फति' इति प्रयोग इष्यते। तुदादित्वादगुणेऽनि विकरणेऽनुषङ्गलोपः प्राप्नोति। नकारोपदेशोऽपि गुणिनि चरितार्थः, तस्मात् तृन्फादीनामनि प्रतिषेधो वक्तव्यः।

यदि पुनरिदनुबन्धा इमे पठ्यन्ते निष्ठादिषु नकारश्रवणं स्यात्, तथा द्विनकार-पाठेऽप्येकस्यापि श्रवणं स्यात्। **प्रयोगानुसरणाश्रयणमपि** न युक्तमिति। **अन्य** आह — मुचादिष्वनुषङ्गिणां पाठः एषामिति न वक्तव्यम्। युक्तिः पुनरत्र **''जिघ्रतेर्वा''** (३।५।४८) इत्यतो वाग्रहणं **व्यवस्थितविभाषार्थत्वेनानुवर्तते**, तेन तृन्फादीनामनि विकरणेऽनुषङ्गलोपो न भवति। 'तृन्फ–तुन्फ–तुम्प–ऋन्फ–दृन्फ–गुन्फ–उन्भ–शुन्भ' इत्यष्टौ भवन्ति। भ्वादौ 'तुन्फ तुम्प'–पाठो न युक्त एव, तुदादिपाठादेव रूपद्वयस्य सिद्धत्वात्। 'तुन्फति, तुफति, तुम्पति, तुपति' इति। शुन्भ भाषणे च, हिंसायां चेत्यर्थः। भ्वादावर्थभेदात् पठन्ति। व्यवस्थितविभाषाबलादेवान्चेः पूजायां न भवति—अञ्चिता गुरवः, पूजिता इत्यर्थः। अन्चेः पूजायामिटं वक्ष्यति। अन्यत्र उदक्तम् उदकं कूपादिति, उद्धृतमित्यर्थः।। ६८१।

## [वि० प०]

अनिदनु०। नष्ट इति। नशेः **''मस्जिनशोर्धुटि''** (३।५।३१) इति कृतनकारस्य लोपः। न चेह **'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्'** (का० परि० ७५) इति परिभाषावतारोऽस्ति अनिदनुबन्धानामिति प्रतिषेधलिङ्गात्। अत एवेत्यादि। अन्यथा प्रतिषेधो व्यर्थः स्यादिति भावः। न चायं नकारो धातूनामुपदेशावस्थायामनपेक्षितनिमित्त एव ज्ञाप्यते, न तु प्रत्यासत्त्याऽगुण एव प्रत्यय इति **'हिसि हिंसायाम्'** (६। १५) इति निर्देशात्, अन्यथा गुरुमत्त्वाभावात् पूर्वं कथं **''गुरोश्च निष्ठासेटः''** (४। ५। ८१) इति 'अ' प्रत्ययो भवतीति। ननु च इदनुबन्धानाम् अनुषङ्गस्याभावाद् अनर्थकः प्रतिषेधो मा भूदित्यनेनानुषङ्गमात्रं ज्ञाप्यते न तु नुरागमः। ततश्च बृंहणम् इत्यादौ णत्वं स्यात्। तत्र हि नुरिति वर्तते, तेन तत्सम्भवस्यानुस्वारस्योपलक्षणत्वाद् इदं सिध्यति नान्यथा, तदयुक्तम्। अनुस्वारस्य स्वरत्वं प्रतिपादितमेव, अतः स्वरान्तरत्वादेव णत्वं स्यात्। अत एव णत्वविधौ नोरधिकारो न कृत एव। तथा च तत्रोक्तम्—स्वरत्वादनुस्वारविसृष्टाभ्यामपीति, एतदेवाह—तथा चेत्यादि। तस्मात् किं नोर्विधानेनेति भावः।

लङ्गीत्यादि। **उपतापः** पीडा, **शरीरविकारश्च** देहविकृतिः, न तु **स्थौल्यादि**रुच्यते, **कम्पेरविषयत्वात्**। विगलित इत्यादि। प्राप्तपीडः उच्यते। विकपित इति। कम्पेनाहितदेह-विकृतिरुच्यते। अन्यत्र विलङ्गितो विकम्पित इत्येव भवति। तृन्फादीनामित्यादि। एषां तुदादित्वादनि विकरणेऽगुणेऽनुषङ्गलोपः प्राप्तः प्रतिषिध्यते, तत् पुनः **''जिघ्रतेर्वा''** (३।५।४८) इत्यत्र वाशब्दस्य **व्यवस्थित**विभाषार्थत्वान्मन्तव्यमिति।। ६८१।

## [बि० टी०]

अनि०। ननु यदि इकारानुबन्धस्य धातोर्नकारस्यानुषङ्गः स्यात् तदा इरनुबन्धेऽपि इकारानुबन्धोऽस्त्येव, तत्र कथन्न भवति। न च वक्तव्यम्–इतस्तकारः स्वरूपार्थस्तेन इकारमात्रोऽनुबन्धो यस्य तस्य नकारागमः। यतः **'टु नदि समृद्धौ'** (१।२५) इत्यत्र ट्वनुबन्धः इदनुबन्धश्च तत्रोभयानुबन्धेन **'नन्दनः'** इत्यादौ यथा नकारस्तद्वद् इरनु–बन्धेऽपि स्यात्। तथा चाधिकं प्रविष्टं न च तद्धानिः। सत्यम्, **''सणनिटः शिडन्तान्नाम्युपधा''** (३।२।२५) इत्यत्र 'अदृशः' इति वर्जनाद् इरनुबन्धस्य न स्याद् अन्यथा नकारागमे सति नाम्युपधत्वाभावात् सण् न भविष्यति किं प्रतिषेधेनेति। यथा **'उ बुन्दिर् निशामने'** (१।५८३) इत्यनुषङ्गपाठसामर्थ्याच्च। अन्यथा इरनुबन्धानां नकारागमो भविष्यति किं नकारकरणेन। अत इकारमात्रमनुबन्धो यस्य तस्यानुषङ्गनकारोऽनेन ज्ञाप्यते। अनुषङ्गश्चान्त्यवर्णस्य पूर्वो नकारः, तर्हि **'तत्रि कुटुम्बधारणे'** (९। १०१) इत्यत्र नकारागमः कथं वर्णद्वयत्वात्। अत्र **कश्चिद्** आह – इदनुबन्धकरणसामर्थ्याद् वेकत्र प्राग् अभावात् परस्ताद् धुड् जातित्वाददोष इत्**यन्ये**। **वयं** तु पश्यामः – **'काक्षि वाक्षि माक्षि काङ्क्षायाम्'** (१।२१३) इति निर्देशात् कुत्रापि वर्णद्वयव्यवधानेऽपि भवति।। ६८१।

## [समीक्षा]

'स्रस्यते, ध्वस्यते, नष्टः, सनीस्रस्यते' आदि शब्दरूपों के सिद्ध्यर्थ नकारलोप का विधान दोनों ही व्याकरणों में किया गया है। पाणिनि का सूत्र है – ''अनिदितां हल उपधायाः क्ङिति'' (अ० ६।४।२४)। यह ज्ञातव्य है कि पाणिनीय 'इत्' संज्ञा के लिए कातन्त्र में 'अनुबन्ध' संज्ञा की गई है। पाणिनि 'कित्–ङित्' प्रत्ययों में गुण–वृद्धि का निषेध करते हैं, परन्तु कातन्त्रकार ने एतदर्थ अगुण' शब्द का प्रयोग किया है। यह भी ज्ञातव्य है कि कातन्त्र में व्यञ्जन वर्ण से पूर्ववर्ती नकार की 'अनुषङ्ग' संज्ञा की गई है – ''व्यञ्जनान्नोऽनुषङ्गः'' (२।१।१२)। यहाँ इसी प्रकार के नकार का लोप अभीष्ट होने से 'अनुषङ्ग' संज्ञा का प्रयोग किया गया है। 'स्रन्स्, ध्वन्स्, नन्श्' आदि धातुओं में यह अनुषङ्गसंज्ञक नकार द्रष्टव्य है। 'नञा निर्दिष्टमनित्यम्' इस न्याय के अनुसार प्रकृत नलोपविधि कहीं अर्थविशेष में प्रवृत्त होती है तो कहीं इसका अभाव भी देखा जाता है।

## [विशेष वचन]

१. अत एव वर्जनादनुबन्धानां नोऽस्तीति (दु० वृ०)।
२. नञा निर्दिष्टस्यानित्यत्वाल्लङ्निकम्प्योरुपतापशरीरविकारयोः स्यात् (दु० वृ०)।
३. तृन्फादीनां शुन्भान्तानामनि च न लुप्यते (दु० वृ०)।
४. इरशब्दस्य समुदायस्यानुबन्धत्वं नावयवस्येति (दु० टी०)।
५. अनुस्वारस्य स्वरत्वमपि प्रतिपादितम् (दु० टी०)।
६. शरीरविकार इह न स्थौल्यादिरुच्यते (दु० टी०; वि० प०)।

७. वयं तु पश्याम: – काक्षि वाक्षि माक्षि काङ्क्षायामिति निर्देशात् क्वचिद् वर्णद्वयव्यवधानेऽपि भवति (बि० टी०)।

## [रूपसिद्धि]

१. **स्रस्यते**। स्रन्स् + यण् + ते। 'स्रन्सु अवस्रंसने' (१।४८१) धातु से कर्मवाच्य में वर्तमानासंज्ञक आत्मनेपद-प्रथमपुरुष–एकवचन 'ते' प्रत्यय, यण् प्रत्यय तथा प्रकृत सूत्र से नकार का लोप।

२. **ध्वस्यते**। ध्वन्स् + यण् + ते। 'ध्वन्सु गतौ च' (१।४८२) धातु से कर्मवाच्य में 'ते' प्रत्यय, यण् तथा प्रकृत सूत्र से नलोप।

३. **नष्ट:**। नश् + क्त + सि। 'णश् अदर्शने' (३।४१) धातु से कर्म अर्थ में 'क्त' प्रत्यय, ''रधादिभ्यश्च'' (४।६।८२) से अनिट्, ''के यण्वच्च योक्तवर्जम्'' (४।१।७) से यण्वद्भाव, ''न णकारानुबन्धचेक्रीवितयो:'' (३।५।७) से अगुण, ''मस्जिनशोर्धुटि'' (३।५।३१) से नकारागम, प्रकृत सूत्र से नलोप, ''छशोश्च'' (३।६।६०) से 'श्' को 'ष्' तथा ''तवर्गस्य षाट्टवर्गाट्टवर्ग:'' (३।८।५) से तकार को टकारादेश एवं विभक्तिकार्य।

४. **नष्टवान्**। नश् + क्तवन्तु + सि। 'णश अदर्शने' (३।४१) धातु से कर्ता अर्थ में 'क्तवन्तु' प्रत्यय, अनुबन्धों का प्रयोगाभाव, षकार–टकारादेश, लिङ्गसंज्ञा, सि–प्रत्यय, दीर्घ, सिलोप तथा नलोप।। ६८१।

## ६८२. नशब्दाच्च विकरणात् [३। ६। २]

## [सूत्रार्थ]

गुणविधायक–गुणनिषेधक प्रत्ययों के परे रहते इदनुबन्ध–अनिदनुबन्ध वाली धातुओं में रहने वाले तथा विकरण 'न' के बाद आने वाले नकार का लोप होता है।। ६८२।

## [दु० वृ०]

अनिदनुबन्धानां चकारेण योग:, 'परेऽगुणे' इति सामान्यम्। इदनुबन्धानामनिदनुबन्धानां च धातूनां गुणिन्यगुणे च नशब्दाच्च विकरणादनुषङ्गस्य लोपो भवति। भनक्ति, भङ्क्त:, भञ्जन्ति। हिनस्ति, हिंस्त:, हिंसन्ति।।६८२।

## [दु० टी०]

नश०। यदि पुनरिह पञ्चम्यन्तस्य चकारेण योग: स्यात् तदा नशब्दादनशब्दाच्चेति प्राग् वचन**मनर्थकं** स्याद् इत्यधिकृतस्यैव चकारेण योग इति भाव:। परे परस्मिन् योगे अगुण इत्यगुणाधिकारो न भवतीति सामान्यं न विशेष: इत्याह – इदनुबन्धानामित्यादि। तर्हि शब्दग्रहण**मनर्थकम्**, नाद् विकरणाद् इत्यास्ताम् ? सत्यम्। एवमपि स्वरादेव नकारात् प्रसज्येत। उत्तरत्रागुणग्रहणादकार उच्चारणार्थो न भविष्यति। शब्दग्रहणे तु **''स्वराद् रुधादे: परो नशब्द:''** (३।२।३६) इति लभ्यते। विकरणग्रहणेऽप्यक्रियमाणे

'नन्द्यते' इत्यत्रापि स्यात्। विकरणादित्युच्यमानेऽपि नशब्दादेव भविष्यति। न ह्यन्यतो विकरणाद् धातोरनुषङ्गः सम्भवतीति नशब्दग्रहणम् **मन्दधियां सुखप्रतिपत्त्यर्थम्**।। ६८२।

## [वि० प०]

नशब्द०। अनिदनुबन्धानामित्यादि। यदि पुनः श्रुतत्वादिह नशब्दादित्यनेनैव चकारः संबध्यते, तदा नशब्दादनशब्दाच्चेति वाक्यार्थः स्यात्। एवं च सति तदा प्रागनुषङ्गलोप–विधानमनर्थकमेव स्यात्, अनेनैव सिद्धत्वादिति भावः। परे परस्मिन् सूत्रेऽगुणग्रहणं यस्माद् विद्यते तस्मादत्र सामान्यं न विशेषः। अन्यथाऽगुणाधिकारेणैव सिद्धत्वात् किं पुनस्तत्रागुणग्रहणेनेति भावः। एवं च स्थिते यादृशः सूत्रार्थः सम्पद्यते तथा दर्शयन्नाह– इदनुबन्धानामित्यादि। **'भञ्जो आमर्दने, हिसि हिंसायाम्'** (६।१३, १५), रुधादित्वान्नशब्दः, अगुणे रुधादेर्विकरणान्तस्येत्यकारलोपः।। ६८२।

## [बि० टी०]

नशब्द०। ननु दन्शिसञ्जीत्यनन्तरं सूत्रमिदं पठ्यतां परोक्षायामित्यादिसूत्रेऽगुणग्रहण–मपनेयं स्यात्, चकारोऽपि न कृतः स्यात्, तत्र सामान्येन सिद्धत्वात्। न च वक्तव्यं **'विशेषातिदिष्टः प्रकृतं न बाधते'** (का० परि० ३९) इति न्यायादगुणानुवृत्तिः स्यात्। ''परोक्षायामिन्धि०'' (३। ६। ३) इत्यनन्तराकरणात्? सत्यम्। **प्रतिपत्तिरियं गरीयसीति**। एवं सति प्रागनुषङ्गलोपविधान**मनर्थकम्**, अनेनैव सिद्धत्वादिति **पञ्जी**। ननु कथमनर्थकं यतोऽगुणे तस्य वर्तनाद् गुणेऽनुषङ्गलोपाभावः। तथाह घत्वे सति इत्यादि। यथा 'स्रंसते' इत्यादि। अकृते तत्सूत्रे कथमेतत्प्रयोगः स्यात्, किन्तु इदं वक्तुं युज्यते **''नशब्दाच्च''** (३। ६। २) इत्युक्ते व्यावृत्तिस्थानं न विद्यते, यतोऽनशब्दादगुणे पूर्वेण लोपः प्राप्तो गुणे तस्य व्यावृत्त्या लोपो न भविष्यति। किमुक्तं प्रागविधानमनर्थकम्, **अभिप्रायापरिज्ञानात्**। यदि नशब्दादनशब्दाद् भविष्यति, तदैकविधानमेव कुर्वीत, पूर्वं विधानं व्यर्थमित्यर्थः।

अनिदनुबन्धानामागुणे नशब्दाद् विकरणादनुषङ्गलोप इति सूत्रं कर्तव्यमित्यर्थः। न च वक्तव्यम् – नशब्दादित्यत्रागुणे संबन्धो भविष्यति नशब्दविकरणसामर्थ्यात्। अन्यथा सामान्येनागुणद्वारेण नशब्दादपि लोपो भविष्यति। यद् वा परत्रागुणग्रहणादिह गुणिन्यपि तत्रानिदनुबन्धसान्निध्येऽगुण इति पठितत्वादगुणे भविष्यति। नशब्दाच्च सामान्येनेदमनर्थकमिति वाच्यम्, यथा तत्सूत्रं तथैव तेन सहैकयोगत्वात्। (ननु विकरणादित्युच्यमाने नशब्दाद् विकरणादेव भविष्यति, नैवम्। न ह्यन्यतो विकरणाद् धातोरनुषङ्गः सम्भवति चेत् तदा नशब्दग्रहणं **सुखार्थम्**। ननु गुणेऽकारलोपे तस्य विकरणं नास्तीत्येतदर्थं विकरणग्रहणं कथं सुखार्थमुच्यते ? सत्यम्। यदा विकरणावयवोऽपि विकरण उच्यते तदा **सुखार्थम्**। न च एकदेशविकृतमनन्यवद् इति **नाम्वशब्दोक्त्वाद्** इति निषेधात् कथं स्यादिति। अत एव यणि दृष्टत्वाद् गुणेऽनुषङ्गलोपश्चेति तत्रैव लिखितम्)।। ६८२।

## [समीक्षा]

'भनक्ति, हिनस्ति' आदि शब्दरूपों के सिद्ध्यर्थ रुधादिविकरण के बाद वाले

नकार का लोप दोनों व्याकरणों में किया गया है। पाणिनि का सूत्र है। ''श्नान्नलोपः'' (अ० ६।४।२३)। ज्ञातव्य है कि रुधादिगणपठित धातुओं में पाणिनि 'श्नम्' विकरण करते हैं, जबकि कातन्त्रकार ने अनुबन्धरहित 'न' विकरण ही किया है। तदनुसार सूत्रों में उन शब्दों का प्रयोग हुआ है।

## [विशेष वचन]

१. नशब्दग्रहणं मन्दधियां सुखप्रतिपत्त्यर्थम् (दु० टी०)।

२. प्रतिपत्तिरियं गरीयसी (बि० टी०)।

## [रूपसिद्धि]

१. **भनक्ति**। भञ्ज् + न + ति। 'भन्जो आमर्दने' (६।१३) धातु से वर्तमानाविभक्ति–संज्ञक परस्मैपद–प्रथमपुरुष–एकवचन 'ति' प्रत्यय, ''स्वराद् रुधादेः परो नशब्दः'' (३।२।३६) से भकारोत्तरवर्ती अकार के बाद 'न' विकरण, प्रकृत सूत्र से धातुपठित नकार का लोप तथा ''चवर्गस्य किरसवर्णे'' (३।६।५५) से जकार को ककारादेश।

२. **भङ्क्तः**। भन्ज् + न + तस्। 'भन्जो आमर्दने' (६।१३) धातु से 'तस्' प्रत्यय, 'न' विकरण, नलोप, ''रुधादेर्विकरणान्तस्य लोपः'' (३।४।४०) से अकारलोप, ज् को क्, न् को अनुस्वार तथा पञ्चम वर्ण आदेश।

३. **भञ्जन्ति**। भन्ज् + न + अन्ति। 'भन्ज्' धातु से वर्तमानासंज्ञक 'अन्ति' प्रत्यय, 'न' विकरण, नलोप, अकारलोप, न् को अनुस्वार तथा पञ्चम वर्ण आदेश।

४. **हिनस्ति**। हिन्स् + न + ति। 'हिसि हिंसायाम्' (६।१५) धातु से वर्तमानासंज्ञक 'ति' प्रत्यय, 'न' विकरण तथा नलोप।

५. **हिंस्तः**। हिन्स् + न + तस्। 'हिसि' धातु से 'तस्' प्रत्यय, 'न' विकरण, नलोप, अकारलोप, अनुस्वार तथा सकार को विसर्गादेश।

६. **हिंसन्ति**। हिन्स् + न + अन्ति। 'हिसि' धातु से 'अन्ति' प्रत्यय, 'न' विकरण, नलोप, अलोप तथा नकार को अनुस्वार।। ६८२।

# ६८३. परोक्षायामिन्धि–श्रन्थि–ग्रन्थि–दन्भीनामगुणे [३। ६। ३]

## [सूत्रार्थ]

अगुण परोक्षाविभक्ति के परे रहते 'इन्ध्' आदि धातुओं में ही अनुषङ्ग का लोप होता है।। ६८३।

## [दु० वृ०]

परोक्षायामगुणे परतः इन्ध्यादीनामेवानुषङ्गस्य लोपो भवति। समीधे, समीधाते, समीधिरे। वचनादाम् नास्ति। श्रेथतुः, ग्रेथतुः, देभतुः। इन्ध्यादीनामेवेति नियमात् – सस्रंसे, बभञ्जतुः।। ६८३।

## [दु० टी०]

परोक्षा०। 'सम्' पूर्वस्येन्धेः परोक्षायां **भाषायामपि प्रयोगोऽस्तीत्याह** – वचनादित्यादि।

अन्यथा कथमिह परोक्षायामुपश्लेषो **''नाम्यादेर्गुरुमतोऽनृच्छः''** (३। २।१९) इत्यामोऽनुप्रयोगे च व्यवधानादिति भावः। न च वक्तव्यम् 'अनेकवर्णव्यवधानेऽप्यनुषङ्गलोपो भविष्यतीति अत्रामो विषयत्वाद् आम एव बाधानन्तर्यस्येति **'सविकल्पान्यपि ज्ञापकानि भवन्ति'** इत्याम्प्रत्ययोऽपि। समिन्धाञ्चक्रे। आम्प्रत्ययविधौ व्यवस्थितवाधिकारो वा, **पदकारसम्मतमेतत्**। **भाष्यकारः** पुनराह – इन्धेर्लिटि किद्वचनानर्थक्यं **छान्दसत्वादिति**।

सिद्धे सत्यारम्भो विधिर्नियमार्थः स च प्रत्ययनियम एव। अगुणे परोक्षायाम् इन्धादीनामेवेति प्रकृतिनियमे हि परोक्षायामेवेति पूर्वं न विदध्यात्। तेन 'इध्यते, श्रथ्यते' इत्यनुषङ्गलोपः स्यादेव। परोक्षायां विभक्तावगुणे इति भिन्नाधिकरणतेत्याह – इन्ध्यादीनामेवेति। स्वन्जेरपीत्येके। परिषस्वजे, परिषस्वजाते। स्वन्जेरात्मनेपदित्वादगुणे एव सम्भवति, तदप्रमाणम्। **भाष्यकारस्तु** श्रन्थिग्रन्थिदम्भीनामपि न मन्यते, **पदकार**स्त्विच्छति। **एके** दर्शनद्वयमाश्रित्य **''जिघ्रतेर्वा''** (३।५।४८) इत्यतो वाग्रहणमनुवर्तयन्ति। 'शश्रन्थतुः, जग्रन्थतुः, ददम्भतुः' इत्यपि भवति। ''थलि च'' इति सूत्र**मपरे** पठन्ति। 'श्रेथिथ, ग्रेथिथ, देभिथ, शश्रन्थिथ, जग्रन्थिथ, ददम्भिथ' इति लुप्तानुषङ्गाणामेत्वमभ्यासलोपश्चेति मतं तत्र वर्णितम्, अन्येषामनुषङ्गिणामनुषङ्गलोपो न स्यात्। परोक्षायामिति। वाग्रहणादेव प्रतिपत्तव्यम्, नैतत् **सूत्रकारमतम्** बहुप्रतिविधेयत्वादिति।। ६८३।

## [वि० प०]

परोक्षायाम्०। 'सम्' पूर्वः **'ञि इन्धी दीप्तौ'** (६।२२), ए। यदि पुनरिह **''नाम्यादे–गुरुमतोऽनृच्छः''** (३।२।१९) इत्याम्प्रत्ययः स्यात् तदा तेन तदनुविधायिना चानुप्रयोगेण व्यवधानात् परोक्षायामनुषङ्गलोपो नास्तीति इन्धिग्रहणमनर्थकमेव स्यादित्याह – वचनादाम् नास्तीति। इह **'सविकल्पकान्यपि ज्ञापकानि** भवन्तीति। तेन 'समिन्धाञ्चक्रे' इत्यपि भवति। श्रेथतुरित्यादौ **''तृफलभजत्रप०''** (३।४।५३) इत्यादिना एत्वम् अभ्यासलोपश्चा–निदनुबन्धत्वादगुणे पूर्वेणैव सिद्धे नियमार्थमित्याह – इन्ध्यादीनामेवेत्यादि। परोक्षायामे–वेन्ध्यादीनामिति, प्रकृतिनियमस्तु न भवति, यतः कार्यी निमित्तं कार्यमित्येष निर्देशक्रम इति न्यायात् प्रत्ययस्य पश्चान्निर्देशे प्राप्ते यदादौ प्रत्ययनिर्देशः स प्रत्ययनियमा–वधारणार्थस्तेन प्रकृतेरनियमत्वात् 'इध्यते, श्रथ्यते' इत्यनुषङ्गलोपः स्यादेव।। ६८३।

## [समीक्षा]

'समीधे, समीध्यते, श्रेथतुः, देभतुः' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में नकारलोप की व्यवस्था की गई है। पाणिनि का सूत्र है – अनिदितां हल उपधायाः क्ङिति'' (अ० ६। ४। २४)। 'लिट्–परोक्षा, क्ङित्–अगुण' शब्दों का प्रयोग अपने–अपने व्याकरणों की रचनापद्धति के अनुसार हुआ है। व्याख्याकारों ने प्रसङ्गतः पदकार–भाष्यकार आदि के भी मतों का उल्लेख किया है। किसी टीकाकार के मत को दुर्गसिंह आदि ने अप्रामाणिक माना है।

## [विशेष वचन]

१. इन्ध्यादीनामेवेति नियमात्–सस्रंसे, बभञ्जतुः (दु० वृ०)।

२. सम्–पूर्वस्येन्धेः परोक्षायां भाषायामपि प्रयोगोऽस्ति (दु० टी०)।

३. आम्प्रत्ययविधौ व्यवस्थितवाधिकारो वा, पदकारसम्मतमेतत् (दु० टी०)।

४. भाष्यकारः पुनराह–इन्धेर्लिटि किद्वचनानर्थक्यम्, छान्दसत्वात् (दु० टी०)।

५. भाष्यकारस्तु श्रन्थि – ग्रन्थि – दम्भीनामपि न मन्यते, पदकारस्त्विच्छति (दु० टी०)।

६. नैतत् सूत्रकारमतम् बहुप्रतिविधेयत्वात् (दु० टी०)।

७. प्रत्ययस्य पश्चान्निर्देशे प्राप्ते यदादौ प्रत्ययनिर्देशः स प्रत्ययनियमावधारणार्थः (वि० प०)।

## [रूपसिद्धि]

१. **समीधे**। सम् + इन्ध् + परोक्षा–ए। 'सम्' उपसर्गपूर्वक 'ञि इन्धी दीप्तौ' (६।२२) धातु से परोक्षाविभक्तिसंज्ञक आत्मनेपद-प्रथमपुरुष–एकवचन 'ए' प्रत्यय, ''चण्परोक्षाचेक्रीयितसनन्तेषु'' (३। ३। ७) से धातु को द्विर्वचन, अभ्याससंज्ञादि (सम् + इ + इन्ध् + ए), ''सर्वत्रात्मने'' (३। ५। २१) से अगुण, प्रकृत सूत्र से 'न्' का लोप तथा ''समानः सवर्णे दीर्घीभवति परश्च लोपम्'' (१। २। १) से समानदीर्घ–इकारलोप।

२. **समीधाते**। सम् + इन्ध् + परोक्षा–ए 'सम्' उपसर्गपूर्वक 'ञि इन्धी दीप्तौ' (६।२२) धातु से परोक्षासंज्ञक 'आते' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

३. **समीधिरे**। सम् + इन्ध् + परोक्षा–इरे। 'सम्' उपसर्गपूर्वक 'ञि इन्धी दीप्तौ' (६।२२) धातु से परोक्षासंज्ञक 'इरे' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

४. **श्रेथतुः**। श्रन्थ् + परोक्षा–अतुस्। 'श्रन्थ मोचनप्रतिहर्षणयोः'' (८।३३) धातु से परोक्षाविभक्तिसंज्ञक परस्मैपद–प्रथमपुरुष–द्विवचन 'अतुस्' प्रत्यय, द्विर्वचन, अभ्याससंज्ञादि, ''परोक्षायां च'' (३। ५। २०) से अगुण, ''तृफलभजत्रप०'' (३। ४। ५३) इत्यादि से एत्व–अभ्यासलोप तथा प्रकृत सूत्र से नकार का लोप।

५. **ग्रेथतुः**। ग्रन्थ् + परोक्षा–अतुस्। 'ग्रन्थ सन्दर्भे' (८।३५) धातु से परोक्षासंज्ञक 'अतुस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

६. **देभतुः**। दम्भ् + परोक्षा–अतुस्। 'दम्भु दम्भे' (८। १९) धातु से परोक्षासंज्ञक 'अतुस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ६८३।

## ६८४. दन्शि–सञ्जि–स्वञ्जि–रञ्जीनामनि [३। ६। ४]

## [सूत्रार्थ]

'अन्' विकरण के परे रहते 'दन्श्' आदि धातुओं में अनुषङ्गसंज्ञक नकार का लोप होता है।। ६८४।

## [दु० वृ०]

दन्श्यादीनामनि विकरणेऽनुषङ्गस्य लोपो भवति। दशति, सजति, परिष्वजते,

रजति। कथं परिष्वजेते, अन्तरङ्गत्वात् स्थानिवद्भावाच्च। 'दन्श् दशने' इति निर्देशात् – दशनम्। कथम् अभञ्जि, अभाजि ? भजेरिचि भञ्जनेऽपि **वृत्तिः**।। ६८४।

## [दु० टी०]

दन्शि०। गुण्यर्थमिदम्। 'परिष्वजेते' इति अन्विकरणे कृते **'आते–आथे इति च'** (३।६।६३) इतीत्त्वम्, **''अवर्ण इवर्णे ए''** (१।२।२) इति एत्त्वे परलोपे सति **''परनिमित्तादेशः पूर्वस्मिन् स एव''** (का० परि० ४४) इति अन्विकरण एव नास्तीत्याह – अन्तरङ्गत्वादिति। इत्त्वादयो हि बहिरङ्गा इति **'अन्तरङ्गबहिरङ्गयोरन्तरङ्गविधिर्बलवान्'** (का० परि० ५०) इत्यनुषङ्गलोपो भवति अन्विकरणमात्रे।

अथ मन्यते **'वर्णाश्रयो विधिरन्तरङ्गः'** (का० परि० ८०) इति, तथापि **'वार्णात् प्राकृतं बलीयः'** (का० परि० ८१) इति न चेद् वचनमिदं मन्यते तथापि न दोषः। **'स्वरादेशः परनिमित्तकः पूर्वविधिं प्रति स्थानिवत्'** (का० परि० ९) इति परनिमित्तादेश इत्यस्य 'शाले एते, माले इमे' इत्यादिविषयत्वात्। दन्शेरिति। 'याशब्दस्य च सप्तम्या' इत्यवर्णाश्रयत्वाच्चोद्यमत्र नास्तीति। दन्शेर्लुटि न वक्तव्यमित्याह – 'दन्श् दशने' इति। भावनिदर्शनमिदमुपलक्षणम्। दश्यतेऽनेनेति **दशनो** दन्तः। करणेऽपि भवति रूढित्वाद् वा। कथमित्यादि। भन्जेरिचि वा वक्तव्यम्। अप्राप्तत्वान्नेत्याह – भन्जेरित्यादि। **'भज सेवायाम्'** (१। ६०४) इत्यस्य धातोरिचि विषये भञ्जनेऽपि वृत्तिरभिधीयते। अपिशब्दात् सेवायामपीत्यर्थः। न केवलम् अभञ्जि इति भवितव्यम्, अभाजि इति च।। ६८४।

## [वि० प०]

दन्शि०। 'परिष्वजेते' इति अन्विकरणे कृते **''आते आथे इति च''** (३। ६। ६३) इतीत्त्वम्। **''अवर्ण इवर्णे ए''** (१।२।२) इत्येत्त्वे परलोपे च सति **''परनिमित्तादेशः पूर्वस्मिन् स एव''** (का० परि० ४४) इति पर एव। न तु 'पूर्वोऽन्विकरणः' इति कथमनुषङ्गलोप इत्याह – अन्तरङ्गत्वादिति। इत्त्वादयो हि बहिरङ्गा इत्यन्तरङ्गबहिरङ्गयोरन्तरङ्गो विधिर्बलवान् इति प्रागेवानुषङ्ग एव लुप्यते। अथवा वार्णत्वादित्यादिकमप्यन्तरङ्गम्, तथापि **'वार्णात् प्राकृतं बलीयः'** (का० परि० ८१) इति भविष्यति। अथैतद् वचनं नाद्रियते। अस्तु तर्हि वार्णो विधिरन्तरङ्गस्तथापि अदोष इत्याह-स्थानिवद्भावाच्चेति। **'स्वरादेशः परनिमित्तकः पूर्वविधिं प्रति न स्थानिवत्'** (का० परि० ९) इत्यर्थः। **'परनिमित्तादेशः पूर्वस्मिन् स एव'** (का० परि० ४४) इति पुनरस्याः 'शाले एते, माले इमे' इत्यादिविषयत्वादिति दन्शेर्युट्यनुषङ्गलोपो न वक्तव्यः। **'दन्श् दशने'** (१।२९०) इति गणपाठादेव सिद्धे इत्याह – दन्श दशन इत्यादि भावे युट्, एतदुपलक्षणम् दश्यतेऽनेनेति **दशनो** दन्त इति करणेऽपि भवति **रूढित्वाद्** वा। कथम् इत्यादि। एतेन भन्जेरिचि वेति न वक्तव्यम्, धात्वन्तरेणैव विकल्पस्य सिद्धत्वाद् इति दर्शितम्। भञ्जनेऽपीति, न केवलं सेवायामित्यपिशब्दार्थः।। ६८४।

## [बि० टी०]

दन्शि०। ननु किमर्थमिदम्, तुदादौ पठ्यताम्, ततोऽगुणत्वात् पूर्वेणैवानुषङ्गलोपः सिध्यति। न च वाच्यम्—तुदादौ पठिते **''तुदभादिभ्य ईकारे''** (२।२।३१) इत्यनेन एभ्यः परस्यास्तेर्नकारलोपः स्यात् तत्र तुदधातोरेवादिशब्देन सम्बन्धात् ? सत्यम्, **प्रतिपत्तिगौरवनिरासार्थमिति**।। ६८४।

## [समीक्षा]

'दशति, परिष्वजते' इत्यादि शब्दरूपों में दोनों ही आचार्यों ने धातुगत नकार के लोप का विधान किया है। पाणिनि का सूत्र है – ''दंशसञ्जस्वञ्जां शपि'' (अ० ६।४।२५)। यहाँ 'रन्ज्' धातु में नलोप का निर्देश वार्त्तिककार ने किया है, जबकि कातन्त्रकार ने उसका समावेश सूत्रपाठ में ही कर दिया है। पाणिनीय 'शप्' के लिए कातन्त्र में 'अन्' विकरण माना गया है, तदनुसार ही सूत्रों में इसका पाठ है। 'दशन' शब्द की सिद्धि भाव–करण अर्थों में युट् प्रत्यय से अथवा रूढि के बल पर की गई है।

## [विशेष वचन]

१. भावनिदर्शनमिदमुपलक्षणम्। दश्यतेऽनेनेति दशनो दन्तः, करणेऽपि भवति, रूढित्वाद् वा (दु० टी०; वि० प०)।

२. भज सेवायामित्यस्य धातोरिचि विषये भञ्जनेऽपि वृत्तिरभिधीयते, अपिशब्दात् सेवायामपीत्यर्थः (दु० टी०)।

३. दन्श् दशने इत्यादि भावे युट्, एतदुपलक्षणम् (वि० प०)।

## [रूपसिद्धि]

१. **दशति**। दन्श् + अन् + ति। 'दन्श दशने' (१।२९०) धातु से वर्तमानासंज्ञक परस्मैपद–प्रथमपुरुष–एकवचन 'ति' प्रत्यय, ''अन् विकरणः कर्तरि'' (३।२।३२) से 'अन्' विकरण तथा प्रकृत सूत्र से नलोप।

२. **सजति**। सन्ज् + अन् + ति। 'षन्ज सङ्गे' (१।२८८) धातु से 'ति' प्रत्यय, अन् विकरण तथा नलोप।

३. **परिष्वजते**। परि + स्वन्ज + अन् + ते। 'परि' उपसर्गपूर्वक 'स्वन्ज परिष्वङ्गे' (१।३४९) धातु से 'ते' प्रत्यय, अन्-विकरण, नलोप तथा सकार को षकारादेश।

४. **रजति**। रन्ज् + अन् + ति। 'रन्ज् रागे' (१। ६०५) धातु से 'ति' प्रत्यय, अन् विकरण तथा नकारलोप।। ६८४।

# ६८५. अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिचट्सु [३। ६। ५]

## [सूत्रार्थ]

'इन्–इच्–अट्' प्रत्यय के परे रहते धातु की उपधा अकार को दीर्घ तथा **नामिसंज्ञक** की वृद्धि होती है।। ६८५।

## [दु० वृ०]

धातोरुपधाया अस्य दीर्घो भवति, नामिनां च वृद्धिर्भवति 'इन्–इच्–अट्' एषु परतः। पाचयति, अपाचि, पपाच, नाययति, अनायि, निनाय, लावयति, अलावि, लुलाव, कारयति, अकारि, चकार। धातोरिति किम् ? त्वचयति। कथं पटुमाख्यातवान् **अपीपटत्** ? वृद्धौ सन्ध्यक्षरलोपः। धातोर्नामिनो गुणे सत्युपधाया दीर्घः सिद्धः, नामिग्रहणं **लिङ्गार्थमेव**, बहुवचनं वा। कथम् अचकलत्, अजहलत् ? **संज्ञापूर्वकत्वाद् वृद्धिरनित्येति** समानलोपत्वात् सन्वद्भावो न स्यात्। तथा अट्युत्तमे वा–अहं पपच, अहं पपाच। अहं निनय, अहं निनाय। अहं लुलव, अहं लुलाव। अहं चकर, अहं चकार।। ६८५।

## [दु० टी०]

अस्य०। अदन्ताः **'कथ वाक्यप्रबन्धे'** (९।१७४) इत्यादयः, तेनोपधाभूतत्वाभावाद् दीर्घो न भवति – कथयति। **'गण संख्याने'** (९।१७६), गणयति। अस्य च लोपे कृते दीर्घविधिं प्रति न स्थानिवद् इत्यपि नोपतिष्ठते अकारोपदेशसामर्थ्यात्। 'कथमित्यादि। इनि लिङ्गस्यान्त्यस्वरलोपे समानलोपत्वात् सन्वद्भावो न प्राप्नोतीति परिहारमाह – धातोरित्यादि। गुणे सति अयादीनां भवितव्यम्, ततश्चोपधाभूतोऽकारोऽस्तीति भावः। यत्र गुणो नास्ति तदर्थं नामिग्रहणमित्यर्थः।

**जातिपक्ष**मवलम्ब्याह – समुदायस्य लाक्षणिकत्वेनावयवोऽपि **लाक्षणिक** इति मतमाशङ्क्याह – बहुवचनं वेति। नामिना धातुर्विशिष्यते विशेषणेन च तदन्तविधिरिति नाम्यन्तस्य धातोर्भविष्यति यन्नामिनामिति बहुवचनम्, तद्व्याप्त्यर्थम्। तेनाप्रस्तुतस्यापि लिङ्गस्य नामिनां तदन्तविधिर्भविष्यति। कथमित्यादि। हलिकल्योरप्यसमानलोपत्वात् सन्वद्भावः प्राप्नोति। 'अजीहलत्, अचीकलत्' इत्यादि। परिहारमाह – संज्ञापूर्वकत्वादिति व्यवस्थितवाधिकाराद् वा। हलकलयोस्तत्समानार्थयोर्वा सिद्धम्। हलिकलिप्रकृत्यन्तरन्तु 'हलिमग्रहीत्, कलिमग्रहीत्' इति वाक्यमेव कारितस्य**ानभिधानात्**। **व्यक्तिपक्ष**मवलम्ब्याह – यस्य तु अवयवार्थकत्वात् समुदायस्य लाक्षणिकत्वेऽवयवस्यापि लाक्षणिकत्वमिति **दर्शनम्**। क्वचिज्**जातिनिर्देशः** क्वचिद् **व्यक्तिनिर्देश** इति बहुवचनं च युज्यते। तन्मते च धातोरेव नामिनां वृद्धिरिति अचकलत्, अजहलत्, अपपटत्, अललघद् इत्येव भवति, समानलोपत्वादेतच्च बहु प्रतिक्षिप्तम् 'हलिकल्योरद् वक्तव्यम्' इति। उपधाग्रहणं किमर्थम् 'कथयति, गणयति' इत्यम्याकारस्य दीर्घत्वे पकारागमः प्रसज्येतेति। तथा च 'पापचिषते' इत्यस्य च लोप इत्यत्र परसप्तमी चेति भिन्नविभक्तिनिर्देशादिह वाक्यार्थद्वयम्। तेन

---

१. ननु कथमन्यथा अचकथदित्यादौ सन्वद्भावो न स्यात् समानलोपाभावात् ? सत्यम्। तदा हि कथ इत्यादि क्रादनुबन्धमेव विदध्यादिति भावः। तथा च सति अनेन दीर्घे पश्चाच्चणि "न शाम्वृः" (३।५।५४) इत्यादिना ह्रस्वनिषेधे च धात्वक्षरस्य गुरुत्वात् सन्वद्भावस्य प्राप्तिरेव नास्तीति। सिद्धान्तान्तरमप्यस्ति। तथाहि – अयं तु पठितानां भामादीनां दीर्घोपदेशादेव न स्थानिवन्निषेधः, अन्यथा तेषामनेनैव दीर्घः सिद्ध इति **केचिदिति रमानाथटिप्पणी**।

नामिनामित्यनेन सहोपधा न सम्बध्यते। 'आ' इति सिद्धे दीर्घग्रहणं **संज्ञापूर्वकत्वाद–नित्यार्थमेव**। अथ वाग्रहणं **व्यवस्थितविभाषात्वेन** वर्तिष्यते ? तदा **स्पष्टार्थम्**।। ६८५।

## [वि० प०]

अस्योपधाया:। इह भिन्नविभक्तिनिर्देशाद् वाक्यार्थद्वयम्। अतो नामिनामित्यने–नोपधा न सम्बध्यते इत्याह – नामिनां च वृद्धिरिति, नाम्यन्तानामित्यर्थ:। **त्वचयतीति**। त्वचं गृह्णातीति विगृह्य इन्, कथमित्यादि। पटुशब्दस्य लिङ्गत्वात् **''इनि लिङ्गस्य''** (३।२। १२) इत्यादिना उकारस्य समानस्य लोपे सन्वद्भावो न स्यादिति **पूर्वपक्षार्थ:**। **सिद्धान्तवादी** तु मन्यते – लिङ्गस्यापि नामिनां वृद्धिरिति। अत औकारस्यासमानलोपे सन्वद्भाव: स्यादेव। अथ **महाधात्वधिकारात्** प्रकरणत्वाच्च धातोरेव स्यात्, न तु लिङ्गस्येति। लिङ्गार्थं प्रति युक्तिमाह – धातोरित्यादि। गुणे सत्यवादेशोऽस्त्येवेति उपधाभूतस्याकारस्य दीर्घो भविष्यतीति भाव:। न च वक्तव्यम् अकारस्य लाक्षणिकत्वाद् दीर्घो न स्यादिति। **समुदायो लाक्षणिको न त्ववयव:**। समुदायावयवयोरन्यत्वात्, तस्माद् यत्र गुणो नास्ति तदर्थं नामिग्रहणं भवत् लिङ्गार्थमेव परिशिष्यते। अत्रावयवा–वयविनोरभेददर्शने तु समुदायस्य लाक्षणिकत्वादवयवोऽपि **लाक्षणिक** इति **परपक्षमा**–श्रित्याहबहुवचनं वेति। बहुवचनस्य व्याप्त्यवधारणत्वादप्रस्तुतस्यापि लिङ्गस्य भवति। **'येन विधिस्तदन्तस्य'** (का० परि० ३) इति वचनाच्च नाम्यन्तस्यैव। कथमित्यादि। 'कलिमग्रहीत्, हलिमग्रहीत्' इति इनि कृतेऽनयोरपि वृद्धावसमानलोपत्वात् सन्वद्भाव: प्राप्नोति। ततो वृद्धेरपवादो हलिकल्योरद् वक्तव्य: इति नेत्याह – मज्ञेत्यादि। अयं **परिहार: सुगम:**। तथेत्यनित्यवशादित्यर्थ:।। ६८५।

## [बि० टी०]

अस्य०। ननु अदन्तस्य धातोरुपधाया दीर्घो भवतीत्यर्थ: कथन्न स्यात्। असम्भवादिति चेत्, न। 'कथयति' इत्यत्र अस्य च लोपे उपधैव विद्यते। न च वाच्यम् अकारस्य स्थानिवद्भावाद् उपधाभाव: **''न पदान्त०''** (का० परि० १०) इत्यादिना निषेधात् ? सत्यम्। अदन्तपाठसामर्थ्यान्न दीर्घ:। ननु अकारकरणं सन्वद्भावनिरासार्थम्। तथा च तत्रोक्तम् असमानलोप इति किम् – अचकथद् इति चेत्, नैवम्। दीर्घे कृते प्राप्तेरभावात् लघुनीत्यस्य व्यावृत्तिविषयत्वात्। ननु **''इन्यसमान०''** (३। ५। ४४) इत्यादिना ह्रस्वे प्राप्ते च प्रतिषेध: समानलोपत्वात्। न चैतदेव प्रयोजनम्, अन्यथा अत्रापि स्यात्। यद्येतदेव प्रयोजनम्, तदा ऋतमनुबध्नीयात् **'कथ वाक्यप्रबन्धे'** (९। १७४) इति। तस्मादकारकरणसामर्थ्यादेव न दीर्घ:।। ६८५।

## [समीक्षा]

'पाचयति, पपाच, निनाय, कारयति, चकार' आदि शब्दरूपों के सिद्ध्यर्थ उपधाघटित अकार को आकार तथा धात्वन्तघटित नामिसंज्ञक वर्णों के स्थान में वृद्धि–विधान दोनों ही व्याकरणों में किया गया है। पाणिनि के दो सूत्र हैं – ''अचो ञ्णिति,

अत उपधायाः'' (अ० ७।२। ११५, ११६)। यह ज्ञातव्य है कि पाणिनि धातु में उपधासंज्ञक अकार को तथा अजन्त अङ्गरूप धातु के अन्त में विद्यमान इकारादि को वृद्धिविधान ही करते हैं, जबकि कातन्त्रकार ने उपधागत अकार को दीर्घ तथा नामिसंज्ञक को वृद्धिविधान एक ही प्रकृत सूत्र द्वारा किया है। वस्तुतः ह्रस्व अकार के स्थान में दीर्घ आकार लाने के लिए दीर्घविधान ही समीचीन है, अतः कातन्त्रकार का निर्देश अधिक सङ्गत कहा जाएगा। एक सूत्र द्वारा दो कार्यों का निर्देश भी कातन्त्रकार का लाघवबोधक है।

## [विशेष वचन]

१. संज्ञापूर्वकत्वाद् वृद्धिरनित्येति समानलोपत्वात् सन्वद्भावो न स्यात् (दु० वृ०)।

२. यत्र गुणो नास्ति तदर्थं नामिग्रहणमित्यर्थः (दु० टी०)।

३. समुदायस्य लाक्षणिकत्वेनावयवोऽपि लाक्षणिकः (दु० टी०)।

४. नामिना धातुर्विशिष्यते विशेषणेन च तदन्तविधिरिति नाम्यन्तस्य धातोर्भविष्यति, यन्नामिनामिति बहुवचनं तद् व्याप्त्यर्थम् (दु० टी०)।

५. भिन्नविभक्तिनिर्देशादिह वाक्यार्थद्वयम्, तेन नामिनामित्यनेन सहोपधा न सम्बध्यते (दु० टी०; वि० प०)।

६. 'आ' इति सिद्धे दीर्घग्रहणं संज्ञापूर्वकत्वादनित्यार्थमेव (दु० टी०)।

७. अथ 'वा' ग्रहणं व्यवस्थितविभाषात्वेन वर्त्स्यते ? तदा स्पष्टार्थम् (दु० टी०)।

८. नामिनां च वृद्धिरिति, नाम्यन्तानामित्यर्थः (वि० प०)।

## [रूपसिद्धि]

१. **पाचयति**। पच् + इन् + ति। 'डु पचष् पाके' (१। ६०३) धातु से हेत्वर्थ में ''धातोश्च हेतौ'' (३।२। १०) से 'इन्' प्रत्यय, प्रकृत सूत्र से उपधासंज्ञक अकार को दीर्घ, ''ते धातवः'' (३।२। १६) से 'पाचि' की धातुसंज्ञा, वर्तमानासंज्ञक परस्मैपद–प्रथमपुरुष–एकवचन 'ति' प्रत्यय, ''अन् विकरणः कर्तरि'' (३।२।३२) से 'अन्' विकरण, इकार को गुण तथा एकार को अयादेश।

२. **अपाचि**। अट् + पच् + त–इच्। 'डु पचष् पाके' (१। ६०३) धातु से अद्यतनीसंज्ञक आत्मनेपद–प्रथमपुरुष–एकवचन 'त' प्रत्यय, अडागम, इच् आदेश तथा प्रकृत सूत्र से उपधासंज्ञक अकार को दीर्घ।

३. **पपाच**। पच् + परोक्षा–अट्। 'डु पचष् पाके' (१। ६०३) धातु से परोक्षासंज्ञक परस्मैपद–प्रथमपुरुष–एकवचन – 'अट्' प्रत्यय, द्विर्वचनादि तथा प्रकृत सूत्र से धातु की उपधा को दीर्घ।

४. **नाययति**। नी + इन् + ति। 'णीञ् प्रापणे' (१। ६००) धातु से 'इन्' प्रत्यय, प्रकृत सूत्र से ईकार को वृद्धि, आय् आदेश, धातुसंज्ञा, 'ति' प्रत्यय, अन् विकरण, इकार को गुण-एकार तथा अयादेश।

५. **अनायि**। अट् + नी + इच् –त। 'णीञ् प्रापणे' (१।६००) धातु से अद्यतनी आत्मनेपद–प्रथमपुरुष–एकवचन 'त' प्रत्यय, अडागम, इच्, प्रकृत सूत्र से ईकार को वृद्धि 'ऐ' तथा आय् आदेश।

६. **निनाय**। नी + अट्। 'णीञ् प्रापणे' (१।६००) धातु से परोक्षासंज्ञक परस्मैपद–प्रथमपुरुष–एकवचन 'अट्' प्रत्यय, द्विर्वचनादि, प्रकृत सूत्र से ईकार को वृद्धि–ऐकार तथा ऐकार को आय् आदेश।

७. **लावयति**। लू + इन् + अन् + ति। 'लूञ् छेदने' (८।९) धातु से इन्, प्रकृत सूत्र से ऊकार को वृद्धि–औकार, आव् आदेश, धातुसंज्ञा, 'ति' प्रत्यय, 'अन्' विकरण, इकार को गुण–एकार तथा उसको अयादेश।

८. **अलावि**। अट् + लू + इच्–त्। 'लूञ् छेदने' (८।९) धातु से अद्यतनीसंज्ञक 'त' प्रत्यय, अडागम, इच्, प्रकृत सूत्र से वृद्धि तथा औकार को 'आव्' आदेश।

९. **लुलाव**। लू + परोक्षा–अट्। 'लूञ् छेदने' (८।९) धातु से परोक्षासंज्ञक 'अट्' प्रत्यय, द्विर्वचनादि, प्रकृत सूत्र से ऊकार को वृद्धि-औकार तथा उसको 'आव्' आदेश।

१०. **कारयति**। कृ + इन् + अन् + ति। 'डु कृञ् करणे' (७।७) धातु से इन् प्रत्यय, प्रकृत सूत्र से ऋकार को वृद्धि-आर्, 'कारि' की धातुसंज्ञा, 'ति' प्रत्यय, अन् विकरण, इकार को गुण–एकार तथा उसको अयादेश।

११. **अकारि**। अट् + कृ + इच्–त। 'डु कृञ् करणे' (७।७) धातु से अद्यतनी–संज्ञक 'त' प्रत्यय, अडागम, इच् प्रत्यय तथा वृद्धि–आर्।

१२. **चकार**। कृ + परोक्षा–अट्। 'डु कृञ् करणे' (७।७) धातु से परोक्षासंज्ञक परस्मैपद–प्रथमपुरुष–एकवचन 'अट्' प्रत्यय, द्विर्वचनादि तथा प्रकृत सूत्र से 'ऋ' को वृद्धि–आर्।। ६८५।

## ६८६. सिचि परस्मै स्वरान्तानाम् [३। ६। ६]

### [सूत्रार्थ]

परस्मैपदनिमित्तक 'सिच्' प्रत्यय के परे रहते स्वरान्त धातु के अन्तिम नामिसंज्ञक स्वर को वृद्धि–आदेश होता है।। ६८६।

### [दु० वृ०]

परस्मैपदे सिचि परतः स्वरान्तानां धातूनां वृद्धिर्भवति नामिन एव। अरावीत्, अलावीत्, अचैषीत्, अनैषीत्। अर्थात् **स्वरान्तग्रहणमुपदेशार्थम्**, तेन उदवोढाम्। सिचीति किम् ? नवाव। परस्मा इति किम् ? अन्योष्ट। ऊर्णोतेर्वा वक्तव्यम्–प्रौर्णावीत्, प्रौर्णवीत्।। ६८६।

### [दु० टी०]

सिचि०। स्वर एवान्तो येषामिति **विग्रहः**। नामिन एवेत्यादि। **''अस्योपधाया दीर्घो वृद्धिर्नामिनाम्''** (३। ६। ५) इति सत्यपि द्वयमनन्तरं तथापि नामिन **एवानुवृत्तिः**।

नहि स्वरान्तस्य धातोरुपधा अकारः सम्भवति। अन्तरङ्गस्यापि येन नाप्राप्तिन्यायेन गुणबाधिका वृद्धिरिति, तर्हि नाम्यधिकारेण किम् ? अचिकार्षीदिति। परत्वादस्य च लोपो भविष्यति। अयासीदिति। **''यमिरमिनम्यादन्तानां सिरन्तश्च''** (३। ७। १०) इति कृते कुतः एकदेशकण्ठ्यमाश्रित्य वृद्धिः (आर्) प्रसज्येतेति। सत्यम्, अमुमेव पक्षमाश्रित्य नामिन एवोच्यते, तर्हि स्वरग्रहणं किमर्थम्, इह व्यञ्जनान्तस्य मा भूत् – अभैत्सीदिति। व्यञ्जनान्तलक्षणा वृद्धिः सामान्यविशेषभावेन बाधिका भविष्यति, **'स्थानेऽन्तरतमः'** (का० परि० १६) इति न्यायाच्च न भविष्यति, तर्हि अकार्षीदित्यत्र मूर्धन्यस्य षकारस्य प्रसज्येत। अनिटामिति प्रतिषेधस्य श्रुतया वृद्ध्या अभिसम्बन्धात्। अथ नेटीति प्रतिषेधो योगः पृथक् क्रियते, स च सामान्येन विज्ञास्यते इति मनसि कृत्वाह – अर्थादिति। स्वरग्रहणेन विनाऽन्तग्रहणेन तु नैतदुपपद्यते।

'उद्, वह्, सिच्, ताम्' इति स्थिते प्रकृतिविभागे **''हो ढः''** (३। ६। ५६) इति ढत्वे सति **''सहिवहोरोदवर्णस्य''** (३। ८। ७) इति प्रत्ययलोपे प्रत्ययलक्षणमिति सिज्लोपेऽपि वृद्धिः प्राप्नोति, तथा गौरिवाचारीत् – अगावीत्। **व्यक्तिवादी** तु नाम्यधिकारमिच्छति विधानादस्य च लोपं बाधित्वा वृद्धिरेव प्राप्नोति। ननु 'न्यनुवीत्, न्यधुवीत्' इत्यन्तरङ्गत्वादुवादेशे सति **''व्यञ्जनान्तानामनिटाम्''** (३। ६। ७) इति वृद्धिप्रतिषेधो भविष्यति, किं **''सिजाशिषोश्चात्मने''** (३। ५। १०) इत्यात्मनेपदग्रहणं गुणबाधिका वृद्धिरिति **ज्ञापनार्थ**मित्युक्तेन ? सत्यम्, गुणं यथा बाधते, तथा उवादेशमपि कथं न बाधेत ? किञ्च 'आदीध्यकः, आवेव्यकः' इत्यगुणविषयत्वाद् वृद्धिरपि न भवति, यतः स्वरान्तानां धातूनाम् अस्योपधाया दीर्घो भवति नामिनां च वृद्धिरिति वचनाद् गुणे सति अयवादेशयोः कृतयोरस्य दीर्घता, तदा **'चिरि जिरि हिंसायाम्'** (४। १७), 'अचिरायीत्, अजिरायीत्' इति यकारान्तलक्षणः प्रतिषेधः स्यात्। अथ श्वयतेः पुनर्गुणवचनं **गुणरूपावधारणार्थम्**। तज्ज्ञापयति–गुणे कृते यकारान्तप्रतिषेधो नास्ति, तदसत्। चिरिजिर्यो - - -त्यादिवद्विशिष्टविषयः प्रयोगोऽत्र नास्तीति **स्मृतिशास्त्र**त्वात् श्वयतिग्रहण**मनर्थकमेव** स्यादित्ययमेव **पक्षः शिष्टसम्मतः** इत्यर्थः।। ६८६।

## [वि० प०]

सिचि। यद्यपि पूर्वसूत्रत्वात् **''अस्योपधाया दीर्घो नामिनां च वृद्धिः''** (३। ६। ५) इति द्वयमनन्तरम्, तथापि नामिनां वृद्धिरित्येवानुवर्तते स्वरान्तानां धातूनामकारस्योपधा–भूतस्याभावादित्याह–नामिन एवेति। अरावीदित्यादि। आद्ययोरुदाहरणयोः **''इटश्चेटि''** (३। ६। ५३) इति सिचो लोपः। सर्वत्र **''सिचः''** (३। ६। ९०) इतीट्। अथ स्वरान्त–ग्रहणं किमर्थम् 'अभैत्सीत्' इत्यत्र व्यञ्जनान्तस्य मा भूदिति चेत्, न। व्यञ्जनान्तानामनिटाम् इत्यस्य बाधकत्वात्। न च वक्तव्यम्–व्यञ्जनान्तलक्षणा वृद्धिरुपधाया भवति, कथमन्त्यवर्णविषयां वृद्धिं बाधते भिन्नविषयत्वादिति। यतो धातुसामान्यविशेषभावेन बाधकत्वं भविष्यति, किञ्च आन्तरतम्याभावाच्च न भविष्यति। अथ 'अकोषीत्' इत्यत्र मूर्धन्यषकारस्यैकदेशेनान्तरतमत्वाद् आय् स्यादिति। अनिटामिति प्रतिषेधस्य श्रुतत्वाद्

व्यञ्जनान्तलक्षणयैव वृद्ध्याभिसम्बन्धादिति। एवन्तर्हि नेटीति प्रतिषेधः पृथगेव क्रियतामिति। इटि सति व्यञ्जनान्तस्य च वृद्धिर्न भविष्यति। तेनान्तस्यानन्तस्य च प्राप्ता वृद्धिः सर्वत्रैव प्रतिषिध्यते इत्याह—अर्थादित्यादि। **उपदेशार्थः** पाठ उच्यते। तत्र यो धातुः स्वरान्तस्तदर्थमित्यर्थः।

न चैतद् **'औपदेशिकप्रायोगिकयोरौपदेशिकस्यैव ग्रहणम्'** (का० परि० ४२) इति निर्वोढुं पार्यते, स्वरान्तग्रहणमन्तरेण धातोर्भविष्यति। स चौपदेशिक एवेति। उपपूर्वो वह प्रापणे, अद्यतन्या द्विवचनम्—ताम्, धातोरादेरट्, सिच् **''धुटश्च धुटि''** (३। ६। ५१) इति सिचो लोपः, अस्य च दीर्घः, **''सहिवहोरोदवर्णस्य''** (३। ८। ७) इत्योत्त्वे, **''हो ढः''** (३। ६। ५६) इति हस्य ढत्वे कृते तस्य धत्वे, तवर्गस्य षाड्वर्गाट्टवर्गत्वे, **''ढे ढलोपो दीर्घश्चोपधायाः''** (३। ८। ६) इति कृते च सति लाक्षणिकोऽयमकारः स्वरः इति प्रत्ययलोपलक्षणेऽपि सिचि कार्यं न भवतीत्यर्थः। नवावेति। नु स्तुतौ, पञ्चम्या आव, अदादित्वाद् विकरणस्य लुक्, गुणावादेशौ, **''ऊर्णोतेर्वा''** (३। ६। ८५) इति **मतान्तरमा**वेदितमिह पूर्ववृद्धिरेव प्रमाणमित्यर्थः। स्वरादीनां वृद्धिरित्यौकारः॥ ६८६।

## [बि० टी०]

सिचि०। अर्थात् स्वरान्तग्रहणम् **उपदेशार्थमिति वृत्तिः**। ननु कथमिदमुक्तं यावता **''अस्योपधायाः''** (३। ६। ५) इत्यतोऽनन्तरत्वाद् उपधादीर्घानुवृत्तौ स्वरान्तग्रहणसामर्थ्यान्न वर्तते इत्युक्तत्वात्। तथा च **पञ्चमी**-नामिनां वृद्धिरित्येव वर्तते स्वरान्तानामुपधाया अभावादिति, सत्यम्। **अयमेवाशयः**— उपधादीर्घस्यानुवृत्तिरर्थान्न भविष्यतीति **हृदयम्**। तथाहि अकारादि—धातोरद्यतन्यामवर्णस्याकारः प्रवर्तते। अस्योपधायाः पुनरनिटामित्यस्य च दीर्घ एवास्ति, सेटां व्यञ्जनादीनामिति विकल्पबलाद् दीर्घ इति तद्भिन्नविषय एव नास्ति, तर्हि एवनु—बन्धादीनां नित्यं भवतु ? सत्यम्। अस्य च दीर्घ इत्यस्य व्यावृत्त्या न भविष्यति। अन्यथा अनिटि दीर्घे व्यावृत्तेरयोगाद् इत्याह — अर्थात् स्वरान्तग्रहणमित्यादि॥ ६८६।

## [समीक्षा]

'अलावीत्, अरावीत्, अचैषीत्, अनैषीत्' इत्यादि शब्दरूपों में धात्वन्तवर्ती इवर्ण—उवर्ण—ऋवर्ण को वृद्धि का विधान दोनों ही व्याकरणों में किया गया है। पाणिनि का सूत्र है— ''सिचि वृद्धिः परस्मैपदेषु'' (अ० ७। २। १)। ऋवर्ण के स्थान में पाणिनि के अनुसार 'आ' वृद्धि होने पर ''उरण् रपरः'' (अ० १।१। ५१) से रपर भी करना पड़ता है, जब कि कातन्त्रकार 'आर्' की ही वृद्धिसंज्ञा करते हैं।

## [रूपसिद्धि]

१. **अरावीत्**। अट् + रु + सिच् + अद्यतनी — दि। 'रु + शब्दे' (२। १०) धातु से अद्यतनीसंज्ञक प्रथमपुरुष — एकवचन 'दि' प्रत्यय, ''अड् धात्वादिर्ह्यस्तन्यद्यतनी—क्रियातिपत्तिषु'' (३। ८। १६) से धातुपूर्व अडागम, ''सिजद्यतन्याम्'' (३। २। २४) से 'सिच्' प्रत्यय, इडागम, प्रकृत सूत्र से धात्वन्तवर्ती 'उ' को वृद्धि — औ, ''सिचः''

(३। ६। ९०) से ईडागम, ''इटश्चेटि'' (३। ६। ५३) से सिच् का लोप तथा औकार को आव् आदेश।

२. **अलावीत्**। अट् + लू + सिच् + अद्यतनी–दि। 'लूञ् छेदने' (८। ९) धातु से 'दि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

३. **अचैषीत्**। अट् + चि + सिच् + दि। 'चिञ् चयने' (४। ५) धातु से अद्यतनीसंज्ञक 'दि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

४. **अनैषीत्**। अट् + नी + सिच् + अद्यतनी – दि। ' णीञ् प्रापणे' (१। ६००) धातु से अद्यतनीसंज्ञक 'दि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ६८६।

## ६८७. व्यञ्जनान्तानामनिटाम् [३। ५। ७]

### [सूत्रार्थ]

परस्मैपदनिमित्तक सिच् प्रत्यय के परे रहते व्यञ्जनान्त अनिट् धातु की उपधा में विद्यमान नामिसंज्ञक वर्ण को वृद्धि-आदेश होता है।। ६८७।

### [दु० वृ०]

परस्मैपदे सिचि परतो व्यञ्जनान्तानां धातूनामनिटां नामिनो वृद्धिर्भवति उपधाया एव। अभैत्सीत्, अरौत्सीत्, अतार्प्सीत्, अदार्प्सीत्। अनिटामिति किम् ? अकोषीत्।। ६८७।

### [दु० टी०]

व्यञ्जना०। अर्थादिह व्यञ्जनग्रहणमवसीयते यत् क्रियते तदिहोत्तरत्र च **सुख–प्रतिपत्त्यर्थम्**। योऽप्येकदेशं स्वरमनुवर्तयेत् तस्यापि नामिन एव स्यात्। 'उपधा' इत्यनुवर्तते। एकेन वर्णेन व्यवधानमाश्रीयते, न त्वनेकेनेत्याह-उपधाया एवेत्यादि। अन्तग्रहणं **स्पष्टार्थम्**, व्यञ्जनान्तानामपि स्थाने कदाचिद् वृद्धिः प्रतिपद्यते। **'भिदिर् विदारणे, नुद प्रेरेणे, तृप प्रीणने'** (६। २;५।२;३। ३५) ।। ६८७।

### [वि० प०]

व्यञ्जना०। 'उपधायाः इत्यनुवर्तते। अथ वचनादेकेन वर्णेन व्यवधानमाश्रीयते, न त्वनेकेनेति। तेन उपधोपधाया न भवतीत्याह– उपधाया एवेति।। ६८७।

### [समीक्षा]

'अभैत्सीत्, अरौत्सीत्, अतार्प्सीत्' इत्यादि शब्दरूपों के साधनार्थ दोनों ही व्याकरणों में वृद्धि का विधान किया गया है। पणिनि का सूत्र है– ''वदव्रजहलन्तस्याचः'' (अ०७। २। ३)। पाणिनीय 'हल्' प्रत्याहार के लिए कातन्त्र में 'व्यञ्जन' संज्ञा का प्रयोग किया गया है। पाणिनि 'आ' की वृद्धि संज्ञा करते हैं, जबकि कातन्त्र में 'आर्' की वृद्धिसंज्ञा की गई है। अतः पाणिनि को उपधाघटित अकार की भी वृद्धि करने के लिए प्रकृत सूत्र में 'वद् – व्रज्' धातुओं का पाठ करना पड़ा है, परन्तु कातन्त्रकार ने उपधासंज्ञक अकार को वृद्धि न करके दीर्घविधान किया है– ''अस्य च दीर्घः'' (३। ६। ८)। इस प्रकार कातन्त्रकार द्वारा लोकव्यवहार में प्रचलित 'व्यञ्जन' संज्ञा का

प्रयोग तथा अकार के स्थान में वृद्धि की अपेक्षा दीर्घ का विधान पाणिनीय व्याकरण की अपेक्षा उत्कर्षाधायक ही कहा जा सकता है।

## [विशेष वचन]

१. अर्थादिह व्यञ्जनग्रहणमवसीयते। यत् क्रियते तदिहोत्तरत्र च सुखप्रतिपत्त्यर्थम् (दु० टी०)।

२. एकेन वर्णेन व्यवधानमाश्रीयते, न त्वनेकेनेति। तेन उपधोपधाया न भवति (वि० प०; द्र० – दु० टी०)।

## [रूपसिद्धि]

१. **अभैत्सीत्**। अट् + भिद् + सिच् + दि। 'भिदिर् विदारणे' (६। २) धातु से अद्यतनीविभक्तिसंज्ञक परस्मैपद–प्रथमपुरुष–एकवचन 'दि' प्रत्यय, ''अड् धात्वादि–र्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु'' (३। ८। १६) से धातुपूर्व अडागम, ''सिजद्यतन्याम्'' (३। २। २४) से 'सिच्' प्रत्यय, 'इ–च्' अनुबन्धों का अप्रयोग, ''अदितुदिनुदिक्षुदिस्विद्यति–विद्यतिविन्दतिविनत्तिछिदिभिदिहांदेशदिसदिपदिस्कन्दिखिदेर्दात्'' (३। ७। २१) से अनिट्, प्रकृत सूत्र से धातूपधागत इकार को वृद्धि–ऐकार, ''सिचः'' (३। ६। ९०) से ईट् आगम तथा ''पदान्ते धुटां प्रथमः'' (३। ८। १) से दकार को तकारादेश।

२. **अरौत्सीत्**। अट् + रुध् + सिच् + दि। 'रुधिर् आवरणे' (६। १) धातु से अद्यतनीसंज्ञक 'दि' प्रत्यय, अडागम, सिच् प्रत्यय, अनिट्, वृद्धि, ईट् आगम तथा दकार को तकारादेश।

३. **अतार्प्सीत्**। अट् + तृप् + सिच् + दि। 'तृप प्रीणने' (३। ३५) धातु से अद्यतनीसंज्ञक 'दि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

४. **अदार्प्सीत्**। अट् + दृप् + सिच् + दि। 'दृप हर्षणमोचनयोः' (३। ३६) धातु से अद्यतनीसंज्ञक 'दि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ६८७।

## ६८८. अस्य च दीर्घः [३। ६। ८]

## [सूत्रार्थ]

परस्मैपदविषयक 'सिच्' प्रत्यय के परे रहते व्यञ्जनान्त अनिट् धातुओं के अकार को दीर्घ आदेश होता है।। ६८८।

## [दु० वृ०]

परस्मैपदे सिचि परतो व्यञ्जनान्तानामनिटां धातूनामस्य च दीर्घो भवति। अपाक्षीत्। **पृथग्योगाद्** अभाङ्क्षीत्।। ६८८।

## [दु० टी०]

अस्य। पृथग्योगादिति। 'व्यञ्जनान्तानामनिटामस्य च दीर्घः' इति सिद्धे चकारेण नामिनोऽनुवृत्तिः प्रधानस्य चकारस्योत्तरत्रापि संबन्धः स्यात्। ततः **पृथग्योगादिहोपधासम्बन्धो नास्तीति भावः**। एवं रञ्ज्–अराङ्क्षीत्। दन्श्–

अदाङ्क्षीत्। अनिटामिति किम् ? त्वक्षू–अत्वक्षीत्। अपिपठिषीत्। व्यञ्जनान्तानां धातूनामस्येति धातुभिर्विशिष्यमाणस्याकारस्य दीर्घो न भवतीत्यर्थः। अथवा व्यञ्जनान्तानामितीह व्यञ्जनं **जात्यर्थम्,** तेन संयोगान्तस्यापि भवति। **योगविभागः स्पष्टार्थ एव।** अन्य आह–व्यञ्जनग्रहणसामर्थ्यात् पूर्वसूत्रे व्यञ्जनजातौ च स्थितायामुपधा न वर्तते, अस्य दीर्घो नामिनां च वृद्धिरिति प्रतिपद्यते। सूत्रस्यास्य प्रयोजनमाह–व्यवस्थितवाधिकारमाश्रित्य व्यञ्जनादीनां सेटामनेदनुबन्धहम्यन्तक्षणश्वसां वेति। **'आ' इति सिद्धे दीर्घग्रहणं स्पष्टार्थम्**।। ६८८।

## [वि० प०]

अस्य०। पृथग्योगादिति। अन्यथा 'व्यञ्जनान्तानामनिटामस्य च दीर्घः' इत्येकयोगे कृते चकारेण नामिनां वृद्धिरनुकृष्यते। चानुकृष्टत्वान्नेदमुत्तरत्रानुवर्त्तिष्यते, किं तर्हि प्रधानत्वादस्येत्येतदेव तस्माद् योगविभागादिहोपधाभूतस्य सम्बन्धो नास्तीति। अनुपधाया अपि दीर्घो भवतीत्यर्थः।। ६८८।

## [समीक्षा]

द्र०–उक्त सूत्र सं० – ६८७

## [विशेष वचन]

१. पृथग्योगाद् अभाङ्क्षीत् (दु० वृ०)।
२. पृथग्योगादिहोपधासन्बन्धो नास्तीति भावः (दु० टी०)।
३. योगविभागः स्पष्टार्थ एव (दु० टी०)।
४. 'आ' इति सिद्धे दीर्घग्रहणं स्पष्टार्थम् (दु० टी०)।
५. योगविभागादिहोपधाभूतस्य संबन्धो नास्ति (वि० प०)।

## [रूपसिद्धि]

१. **अपाक्षीत्।** अट् + पच् + सिच् + ईट् + दि। 'डु पचष् पाके' (१। ६०३) धातु से अद्यतनीविभक्तिसंज्ञक परस्मैपद–प्रथमपुरुष–एकवचन 'दि' प्रत्यय, अडागम, सिच्, अनिट्, दीर्घ, ईट् आगम, ''चवर्गस्य किरसवर्णे'' (३। ६। ५५) से च् को क्, ''निमित्तात् प्रत्ययविकारागमस्थः सः षत्वम्'' (३। ८। २६) से स् को ष्, 'क् – ष्' संयोग से 'क्ष्' वर्ण।। ६८८।

## ६८९. वदव्रजरलन्तानाम् [३। ६। ९]

## [सूत्रार्थ]

परस्मैपदनिमित्तक 'सिच्' प्रत्यय के परे रहते 'वद् – व्रज्' तथा रलन्त धातुओं में आकार को दीर्घ आदेश होता है।। ६८८।

## [दु० वृ०]

परस्मैपदे सिचि परतो वदिव्रज्यो रलन्तानां च धातूनामस्य च दीर्घो भवति। अवादीत्. अव्राजीत्, अचारीत्, अचालीत्। कथम् अबभ्रीत्, अश्वल्लीत्। नाकारस्य

रलन्ततेति। व्यञ्जनादीनां सेटाम् अनेदनुबन्धहम्यन्तक्षणश्वसां वेति वक्तव्यम्– अरणीत्, अराणीत्। एदनुबन्धानां च, कगे–अकगीत्। ग्रह–अग्रहीत्। टु वम्–अवमीत्। व्यय – अव्ययीत्। क्षण् – अक्षणीत्। श्वस्–अश्वसीत्। अनिटामिति **नञा निर्दिष्टस्यानित्यत्वात्**।। ६८९।

## [दु० टी०]

वद०। अस्येति किम् ? न्यखेलीत्। कथमित्यादि। रश्च लश्च **रलम्,** ततः समीपवचनेनान्तशब्देन समानाधिकरणेन समासः। रलं च तदन्तं चेति **रलन्तम्**, **सामीप्यं** पुनरकारस्यैव। अकारविशिष्टाभ्यां रेफलकाराभ्यां पश्चाद् धातुसम्बन्धेन **तदन्तविधिः**। अतः समीपरेफलकारान्तस्य धातोरित्यकारस्य श्रुतत्वादकार एव दीर्घभाग् निर्दिष्टो वेदितव्यः। अथवा रलं च तदन्तं चेति कस्येति न तावदपेक्षते, यावद् रेफलकाराभ्यां धातोस्तदन्तविधिरासक्त इति, ततस्तेन विशिष्टेन धातुनाऽकारोऽभि–संबध्यते, रलन्तस्य धातोर्दीर्घो भवति। कस्य पुनरसौ रेफो लकारश्च समीप इत्यकारस्य दीर्घभाक्त्वेन श्रुतत्वादन्यस्य चासन्निधेः। युक्तं यत् तेनैव सम्बन्धः स्यात्। इह मा भूद् अबभ्रीत्, अश्वल्लीत्। अत्र हि योऽकारस्तत्समीपे यौ रेफलकारौ न तदन्तो धातु–रिति, रलन्तश्च धातुर्न तावद् अकारस्य समीप इति न भवति यदि पुनरिह **रलजातिर्**नाश्रीयते।

अनेकवर्णव्यवधानादेव न भविष्यति उपधाग्रहणं वाऽनुवर्तते, तदा**न्तग्रहणं स्पष्टार्थम्**। सेट्त्वादयमारम्भः। व्यञ्जनादीनामित्यादि। तथा गौरिवाचारीद् अगवीत्, अगावीत्। अवादेशे वा दीर्घो भवति, गुरोरस्यानेकवर्णव्यवधानादेव न भविष्यति 'अतक्षीत्'। एतन्तु न वक्तव्यमित्याह – अनिटामित्यादि। **नञा निर्दिष्टमनित्यमि**ति सेटोऽपि ग्रहणम् पक्षे भवतीति भावः। **केचिद्** दीर्घस्य भावम्, **केचिद्** अभावमिच्छन्ति। तदुभयमतं प्रमाणीकृत्य**ापरै**र्विभाषा कृता। **सूत्रकारमते** तु दीर्घमप्रमाणमितीव लक्ष्यते। **केचिद्** हकारमकारयकारान्तक्षणश्वसां चेक्रीयितलुगन्तानां प्रतिषेधमाहुः। अजाग्रहीत्, अवंवमीत्, अवाव्ययीत्, अचाक्षणीत्, अशाश्वसीत्। एकारानुबन्धानां प्रतिषेधः – 'हसे हसने' (१। २३५) अजाहासीत्। अत एव हम्यन्तादयोऽनेदनुबन्धाः क्रियन्ते।। ६८९।

## [वि० प०]

वद०। सेडर्थमिदम्। इहापि **''इटश्चेटि''** (३। ६। ५३) इति सिचो लोपः। कथमित्यादि। **'अभ्र–वभ्र–मभ्र'** (१। १८९) इत्यादि **दण्डको धातुः**। **'श्वल श्वल्ल 'आशु गतौ'** (१। १८४)। अयमपि लकारान्तो धातुरिति प्राप्नोतीति परिहारमाह–नाकारस्येति। रलन्ततेति। रश्च लश्च **रलमिति** समाहारद्वन्द्वः, ततोऽन्तशब्देन **सामीप्यार्थेन कर्मधारय**ः। रलं च तदन्तं चेति रलन्तम्। सामीप्यं पुना रेफलकारयोरधिकृतं कार्यिणमकारमपेक्ष्य वेदितव्यम्, ततोऽकारसमीपाभ्यां रेफलकाराभ्यां धातोस्तदन्त–विधिरिति अकारसमीपौ यौ रेफलकारौ तदन्तस्य धातोरिति। अत्र पुनरकारस्य रलन्तता नास्तीति रेफलकारयोः समीपत्वं नास्तीत्यर्थः। एकत्र भकारेण व्यवहितत्वादन्यत्र **यस्य समीपो** लकारः, नासौ लकारो धातो रन्तः, यश्च धातोरन्तो नासौ अकारस्य

समीप इति यदि पुनरुपधाग्रहणमनुवर्तते तदा देश्यमेव नास्तीति। व्यञ्जनादीनामित्यादि। हश्च मश्च यश्च **हम्यः**, ते अन्ते येषां ते **हम्यन्ताः**, एदनुबन्धाश्च हम्यन्ताश्च क्षण च श्वस चेति द्वन्द्वः, पश्चान्नञ्समासः, तदेतत् कथमित्याह—अनिटामित्यादि। **नञा निर्दिष्टस्यानित्यत्वात् ''अस्य च दीर्घः''** (३। ६। ८) इत्यनेन सेटामपि पक्षे दीर्घ इत्यर्थः।। ६८९।

## [बि० टी०]

वद०। कथम् 'अबभ्रीत्, अश्वल्लीत्' इति **वृत्तिः**, नन्वयमपि लान्तः कुतो न दीर्घः ? सत्यम्, मध्यपदलोपिसमासान्न दीर्घः। तथाहि रश्च लश्च **रलम्**, रलं च तदन्तं चेति **रलन्तम्**। रलन्तमन्ते येषाम्, ते तथोक्ता इति।। ६८९।

## [समीक्षा]

'अचारीत्, अचालीत्, अवादीत्, अव्राजीत्' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों आचार्यों ने अकार के आकार आदेश का विधान किया है। पाणिनि के दो सूत्र हैं— ''अतो ल्रन्तस्य, वदव्रजहलन्तस्याचः'' (अ० ७। २। २,३)। विशेषता यह है कि पाणिनि ने अकार के स्थान में वृद्धि आदेश तथा कातन्त्रकार ने दीर्घ आदेश माना है। इसका कारण यह हो सकता है कि पाणिनि ने 'आ' की वृद्धिसंज्ञा की है, जबकि कातन्त्रकार 'आर्' की वृद्धिसंज्ञा करते हैं। इस आधार पर पाणिनि का वृद्धिनिर्देश तथा कातन्त्रकार का दीर्घनिर्देश समीचीन कहा जा सकता है।

## [विशेष वचन]

१. अनिटामिति नञा निर्दिष्टस्यानित्यत्वात् (दु० वृ०)।

२. अनेकवर्णव्यवधानादेव न भविष्यति, उपधाग्रहणं वाऽनुवर्तते, तदा अन्तग्रहणं स्पष्टार्थम् (दु० टी०)।

३. नञा निर्दिष्टमनित्यमिति सेटोऽपि ग्रहणं पक्षे भवतीति भावः (दु० टी०; वि० प०)।

४. केचिद् दीर्घस्य भावं केचिदभावमिच्छन्ति, तदुभयमतं प्रमाणीकृत्य अपरैर्विभाषा कृता। सूत्रकारमते तु दीर्घमप्रमाणमितीव लक्ष्यते (दु० टी०)।

५. नन्वयमपि लान्तः कुतो न दीर्घः ? सत्यम्। मध्यपदलोपिसमासान्न दीर्घः (बि० टी०)।

## [रूपसिद्धि]

१. **अवादीत्।** अट् + वद् + सिच् + अद्यतनी—दि। 'वद व्यक्तायां वाचि' (१। ६१५) धातु से अद्यतनीविभक्तिसंज्ञक परस्मैपद—प्रथमपुरुष—एकवचन 'दि' प्रत्यय, ''अट् धात्वादिर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु'' (३। ८। १६) से धातुपूर्व अडागम, ''सिजद्यतन्याम्'' (३। २। २४) से 'सिच्' प्रत्यय, 'इ—च्' अनुबन्धों का प्रयोगाभाव, ''इडागमोऽसार्वधातुकस्यादिर्व्यञ्जनादेरयकारादेः'' (३। ७। १) से इडागम, ''सिचः''

(३। ६। ९०) से ईट् आगम, प्रकृत सूत्र से धातु की उपधा—अकार को दीर्घ, ''इटश्चेटि'' (३। ६। ५३) से सिच् का लोप, दीर्घ तथा ''पदान्ते धुटां प्रथमः'' (३। ८। १) से दकार को तकारादेश।

२. **अव्राजीत्।** अट् + व्रज् + सिच् + अद्यतनी—दि। 'व्रज गतौ' (१। ६३) धातु से अद्यतनीविभक्तिसंज्ञक 'दि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

३. **अचारीत्।** अट् + चर् + सिच् + अद्यतनी—दि। 'चर गतौ' (१। १८९) धातु से अद्यतनीविभक्तिसंज्ञक परस्मैपद—प्र० पु०—ए०व० 'दि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

४. **अचालीत्।** अट् + चल् + सिच् + अद्यतनी—दि। 'चल कम्पने' (१। ५४४) धातु से अद्यतनीसंज्ञक 'दि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ६८९।

## ६९०. श्विजाग्रोर्गुणः [३। ६। १०]

### [सूत्रार्थ]

परस्मैपदनिमित्तक 'सिच्' प्रत्यय के परे रहते 'श्वि – जागृ' धातुओं को गुणादेश होता है।। ६९०।

### [दु० वृ०]

परस्मैपदे सिचि परतः श्विजाग्रोर्गुणो भवति। अश्वयीत्, अजागरीत्। वृद्धेरपवादः।। ६९०।

### [दु० टी०]

श्विजा०। नेति सिद्धे गुणग्रहणमुत्तरार्थम्।। ६९०।

### [समीक्षा]

'अश्वयीत्, अजागरीत्' इत्यादि शब्दों के सिद्ध्यर्थ गुण का विधान दोनों ही आचार्यों ने किया है। पाणिनि का सूत्र है– ''जाग्रोऽविचिण्णल्ङित्सु'' (अ०७। ३। ८५)। कातन्त्रकार के इस विषय में दो सूत्र हैं। प्रकृत सूत्र तथा ''जागर्तेः कारिते'' (३। ६। १२)।

### [विशेष वचन]

१. नेति सिद्धे गुणग्रहणमुत्तरार्थम् (दु० टी०)।

### [रूपसिद्धि]

१. **अश्वयीत्।** अट् + श्वि + सिच् + दि। 'टु ओ श्वि गतिवृद्ध्योः' (१। ६१६) धातु से अद्यतनीविभक्तिसंज्ञक परस्मैपद—प्रथमपुरुष—एकवचन 'दि' प्रत्यय, अडागम, सिच्, इट्, ईट्, सिच् का लोप, गुण, अयादेश, दीर्घ तथा दकार को तकारादेश।

२. **अजागरीत्।** अट् + जागृ + सिच् + दि। 'जागृ निद्राक्षये' (२। ३६) धातु से अद्यतनीसंज्ञक 'दि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ६९०।

## ६९१. अर्त्तिसर्त्त्योरणि [३। ६। ११]

### [सूत्रार्थ]

'अण्' प्रत्यय के परे रहते 'ऋ–सृ' धातुओं को गुण आदेश होता है।। ६९१।

### [दु० वृ०]

अर्त्तिसर्त्त्योरणि परे गुणो भवति। मा भवान् अरत्, असरत्। कथमजरत्, अदर्शत् ? ऋवर्णस्योपलक्षणत्वात्।। ६९१।

### [दु० टी०]

अर्त्ति०। **तिब्निर्देशः पाठसुखार्थ एव**। कथमित्यादि। ''जृश्विस्तन्भु०'' इत्यादिना अणि कृते दृशश्चेरनुबन्धाद् वेति। परिहारमाह – ऋवर्णस्योपलक्षणत्वादिति। अर्त्तिसर्त्तिभ्याम् ऋवर्ण उपलक्ष्यते इति जृदृशोरपि भवति। **सूत्रकारमते** तु जृदृशिभ्यामणेव नास्तीति दर्शितम्। अन्यथा ऋवर्णदृशोरणीति विदध्याद् ऋवर्णेन तदन्तविधिरतेंश्च व्यपदेशिवद्–भावात्।। ६९१।

### [वि० प०]

अर्ति०। मायोगमन्तरेणार्तेः स्वरादित्वाद् वृद्ध्या भवितव्यम्, न मामास्मयोगे इति निषेधस्याविषयत्वात्, अतो मायोगे दर्शयति – मा भवान् अरदिति। पुषादिसूत्रेणोभयत्राप्यण्। कथमित्यादि। जृश्वीत्यादि वचनाज्जीर्यतेरण् दृशेश्च इरनुबन्धाद् वेति वचनादण्।। ६९१।

### [समीक्षा]

'असरत्, अदर्शत्, अरत्' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में गुण आदेश किया जाता है। पाणिनि का सूत्र है – ''ऋदृशोऽङि गुणः'' (अ० ७। ४। १६)। पाणिनीय सूत्र में 'ऋ' का अर्थ 'ऋवर्णान्त' किया जाता है और 'ऋ' धातु को ऋवर्ण का उपलक्षण माना जाता है। अतः उभयत्र समानता है।

### [विशेष वचन]

१. कथम् अजरत्, अदर्शत् ? ऋवर्णस्योपलक्षणत्वात् (दु० वृ०)।

२. तिब्निर्देशः पाठसुखार्थ एव (दु० टी०)।

३. सूत्रकारमते तु जृदृशिभ्यामणेव नास्तीति दर्शितम् (दु० टी०)।

### [रूपसिद्धि]

१. मा भवान् **अरत्**। मा + ऋ + अण् + दि। 'ऋ प्रापणे च' (१।२७५) धातु से अद्यतनीसंज्ञक प्र०पु० – ए० व० 'दि' प्रत्यय, ''न मामास्मयोगे'' (३।८।२१) से आदिवृद्धि का निषेध, ''पुषादिद्युताद्यृलृकारानुबन्धार्तिशास्तिभ्यश्च परस्मै'' (३।२।२८) से 'अण्' प्रत्यय, प्रकृत सूत्र से गुण-अर् तथा ''पदान्ते धुटां प्रथमः'' (३। ८। १) से पदान्तवर्ती दकार को तकारादेश।

२. **असरत्**। अट् + सृ + अण् + दि। 'सृ गतौ' (१।२७४) धातु से अद्यतनी-विभक्तिसंज्ञक 'दि' प्रत्यय, अडागम तथा अन्य प्रक्रिया पूर्ववत्।। ६९१।

## ६९२. जागर्तेः कारिते [३। ६। १२]

### [सूत्रार्थ]

कारितसंज्ञक 'इन्' प्रत्यय के परे रहते जागृधातुघटित ऋकार के स्थान में गुण आदेश होता है।। ६९२।

### [दु० वृ०]

जागर्तेः कारिते परे गुणो भवति। जागरयति।। ६९२।

### [दु० टी०]

जाग०। इनीति सिद्धे कारितग्रहणं **स्पष्टार्थम्। तिब्निर्देशोऽपि पाठसुखार्थ एव**।। ६९२।

### [समीक्षा]

सूत्र सं० ६९१ की समीक्षा द्रष्टव्य।

### [रूपसिद्धि]

१. **जागरयति**। जागृ + इन् + अन् + ति। 'जागृ निद्राक्षये' (२।३६) धातु से ''धातोश्च हेतौ'' (३। २। १०) सूत्र द्वारा 'इन्' प्रत्यय, 'न्' अनुबन्ध का प्रयोगाभाव, प्रकृत सूत्र से 'ऋ' को गुण–अर्, ''ते धातवः'' (३। २। १६) से 'जागरि' की धातुसंज्ञा, वर्तमानासंज्ञक परस्मैपद–प्र० पु०–ए० व० 'ति' प्रत्यय, ''अन् विकरणः कर्तरि'' (३।२।३२) से 'अन्' विकरण, ''नाम्यन्तयोर्धातुविकरणयोर्गुणः'' (३। ५। १) से इकार को गुण–एकार तथा ''ए अय्'' (१। २। १२) से एकार को अयादेश।। ६९२।

## ६९३. यणाशिषोर्ये [३। ६। १३]

### [सूत्रार्थ]

'यण्' तथा आशीर्लिङ्विभक्तिक प्रत्यय के यकार परे रहते 'जागृ' धातुघटित ऋकार को गुण आदेश होता है।। ६९३।

### [दु० वृ०]

जागर्तेर्यणाशिषोर्ये परे गुणो भवति। जागर्यते, जागर्यात्। ये इति किम् ? जागारिषीष्ट। इड् वेज्वच्चेति वृद्धिः स्यात्।। ६९३।

### [दु० टी०]

यणा०। यणो णकारानुबन्धत्वाद् ''**आशिषि च परस्मै**'' (३।५।२२) इति गुणप्रतिषेधे प्राप्ते **गुणार्थं** वचनम्। एकविभक्तिनिर्दिष्टत्वाद् यणो ये इति विशेषणम्। नहि यणो यकारादित्वं व्यभिचरति। आशिषि तु स्यसिजाशीःश्वस्तनीषु भावकर्मार्थिकासु च।

स्वरहनग्रहदृशामिङ् वेज्वच्चेति या वृद्धिः प्राप्ता तस्या अपि बाधा सम्भाव्येतेति आशिषि ये इति सिद्धे विशेषणमित्याह – य इति।। ६९३।

## [वि० प०]

यणा०। इङ् वेज्वच्चेति – स्यसिजाशीःश्वस्तनीषु भावकर्मार्थिकासु च। स्वरहनग्रहदृशामिङ् वेज्वच्चेत्यादि वक्ष्यति। तत इज्वद्भावाद् वृद्धिरित्यर्थः।। ६९३।

## [समीक्षा]

सूत्र सं०–६९१ की समीक्षा द्रष्टव्य।

## [रूपसिद्धि]

१. **जागर्य्यते**। जागृ + यण् + ते। 'जागृ निद्राक्षये' (२।३६) धातु से वर्तमानाविभक्तिसंज्ञक आत्मनेपद–प्र० पु०–ए०व० 'ते' प्रत्यय, ''सार्वधातुके यण्'' (३।२।३१) सूत्र से कर्म अर्थ मे 'यण्' प्रत्यय, 'ण्' अनुबन्ध का प्रयोगाभाव, प्रकृत सूत्र से जागृधातुघटित ऋकार को गुण–अर् तथा यकार को द्वित्व।

२. **जागर्य्यात्**। जागृ + यात्। 'जागृ निद्राक्षये' (२। ३६) धातु से आशीर्विभक्तिसंज्ञक – परस्मैपद–प्र० पु०–ए० व० 'यात्' प्रत्यय, प्रकृत सूत्र से 'ऋ' को गुण–अर् तथा यकार को द्विर्वचन।। ६९३।

# ६९४. परोक्षायामगुणे [३। ६। १४]

## [सूत्रार्थ]

अगुण परोक्षासंज्ञक प्रत्यय के परे रहते जागृधातुघटित ऋकार को गुण आदेश होता है।। ६९४।

## [दु० वृ०]

जागर्तेः परोक्षायामगुणे गुणो भवति। अजागरतुः, जजागरुः। अगुण इति किम् ? अजागार।। ६९४।

## [दु० टी०]

परो०। अगुण इत्यादि। नन्वटि गुणे कृतेऽस्योपधाया दीर्घो भविष्यति अगुणे गुणस्य कृतार्थत्वात्। नैवम्, यथा अगुणलक्षणं बाधते तथा वृद्धिलक्षणमपि बाधते। एवमिह वृद्धिर्बाधिता स्यात्, यदाऽस्योपधाया दीर्घो न स्यात्। **समुदायस्य लाक्षणिकत्वेऽवयवस्यापि लाक्षणिकत्व**मिति पक्षे चोद्यमेव नास्ति।। ६९४।

## [समीक्षा]

एतदर्थ पाणिनिसूत्र ''जाग्रोऽविचिण्णल्ङित्सु'' (अ० ७।३।८५) द्रष्टव्य है।

## [रूपसिद्धि]

१. **जजागरतुः**। जागृ + परोक्षा—अतुस्। 'जागृ निद्राक्षये' (२।३६) धातु से परोक्षाविभक्तिसंज्ञक परस्मैपद—प्र० पु०—द्विव० 'अतुस्' प्रत्यय, ''चण्परोक्षाचेक्रीयितसनन्तेषु'' (२।३।७) से धातु को द्विर्वचनादि, प्रकृत सूत्र से ऋकार को गुण—अर् तथा ''रेफसोर्विसर्जनीयः'' (२। ३। ६३) से सकार को विसर्गादेश।

२. **जजागरुः**। जागृ + परोक्षा—उस्। 'जागृ निद्राक्षये' (२।३६) धातु से परोक्षासंज्ञक प्र० पु०—ब० व० 'उस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ६९४।

## ६९५. ऋतश्च संयोगादेः [३। ६। १५]

## [सूत्रार्थ]

संयोगादि तथा ऋकारान्त धातु को अगुण परोक्षासंज्ञक प्रत्यय के परे रहते गुण आदेश होता है।। ६९५।

## [दु० वृ०]

संयोगादेर्धातोर्ऋतश्च परोक्षायामगुणे गुणो भवति। सस्मरतुः, सस्मरुः। कथं सञ्चस्करतुः, सञ्चस्करुः ? **'भसिद्धं बहिरङ्गमन्तरङ्गे'** (का० परि० ३३) इत्यनित्योऽयम्।। ६९५।

## [दु० टी०]

ऋत०। संयोग आदिरवयवो यस्येति विग्रहः। सस्वरतुरिति। **'स्वृ शब्दोपतापयोः'** (१।२७१)। कथं सञ्चस्करतुरिति। **साधनं हि क्रियां निर्वर्तयति, तामुपसर्गो विशिनष्टि**। न हि स्वरूपेणाभिनिर्वृत्तस्य विशेषाकाङ्क्षा भवति। उक्तञ्च — **'पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणेति'** (सीर० परि० १२८)। तस्मादुपसर्गसम्बन्धो बहिरङ्गस्तन्निमित्तः सुडपि बहिरङ्गो भवति। समानपदस्थत्वाद् गुणोऽन्तरङ्गः, **'असिद्धं बहिरङ्गमन्तरङ्गे'** (का० परि० ३३) इत्याह — अनित्योऽयमिति। 'संस्क्रियते' इत्यादिषु तु नित्यैवैषा **परिभाषेति**। समस्कार्षीदिति। सुटि कृते पश्चाद् अट्, तत्र धातुग्रहणसामर्थ्यात् **''ऋतश्च संयोगादेः''** (३। ६। १५) इति सिद्धे, संयोगात् परस्य ऋत इति भावः। यदिह धातुविशेषणमादिग्रहणं तत् **प्रायोगिकपरिग्रहार्थम्**। एवञ्च प्रायोगिकपरिग्राहकः स्याद् यदि द्विर्वचनात् प्राक् सुट् स्यात्। सर्वोद्दिष्टमिदं तेन 'सञ्चेस्क्रीयते, समचिस्करत्' इत्यपि सिद्धम्। यदि साधन—प्रयोगोऽन्तरङ्गः कथम् 'आस्यते, गुरुणा' इत्यात्मनेपदं भावे, 'अध्यास्यते गुरुणा' इति कर्मणि ? सत्यम्, **'अकर्मका अपि धातवः सोपसर्गाः सकर्मका भवन्ति'** इत्युपसर्गमभ्यन्तरं कृत्वात्मनेपदमभिधीयते भावेऽपि वचनात्।

**अपरस्त्वाह — 'पूर्वं धातुरुपसर्गेण युज्यते पश्चात् साधनेन'** इति। यदुक्तम् — धातुः पूर्वं साधनेन सम्बध्यते, किमसौ धात्वर्थो विद्यमानः स्वेन स्वेन भावेन साधनेन सम्बध्यते आहोस्विद् अविद्यमानो विषयः ? प्रथमे साधनसम्बन्धवैयर्थ्यं स्यात्, द्वितीये

शशविषाणः कस्मान्न सम्बध्यते। अथ सदर्थपरिहारेणान्या काचित् साधनसम्बन्धयोग्यावस्था आकलय्यते। तस्यामवस्थायां कथं विशेषणैरभिसंबन्धो न भवेत्। यच्चोक्तं बहिरङ्गत्वादिति, तदसत्। **सामान्ये हि विशेषा एवान्तरङ्गास्त**त्प्रविष्टत्वान्न बाह्यानि साधनानि। अपि च कथम् अप्रतिलब्धात्मभावस्य साधनसम्बन्धात् प्राग् धातुनाभिधानं कल्प्यते। धात्वर्थस्य चोपचारसत्तयेति चेत् तर्हि तामेवोपचारसत्तां परिगृह्य विशेषसम्बन्धोऽपि (लिङ्गादपि) कस्मान्नेष्यते तस्माद् विशिष्ट एव धात्वर्थः साधनैः सम्बध्यते इति सुडेवान्तरङ्गस्तस्मिन् दर्शने **'औपदेशिकप्रायोगिकयोरौपदेशिकस्यैव ग्रहणम्'** (का० परि० ४२) इत्यनित्योऽयं **न्यायः**। तेन ' सञ्चस्करुः' इति गुणः सिद्धो भवति।। ६९५।

## [वि० प०]

ऋतः। कथमित्यादि। यद्यपि **''सुङ् भूषणे सम्पर्युपात्''** (३।७।३८) इत्युभयपदाश्रितः सुडागमो **बहिरङ्गः**। एकपदाश्रितत्वाद् गुणोऽन्तरङ्गस्तथापि तत्र गुणे कर्तव्ये सुडसिद्धो न भवति, अनित्यत्वादस्य न्यायस्येत्यर्थः।। ६९५।

## [समीक्षा]

'सस्मरतुः, सस्मरुः, सस्वरतुः, सस्वरुः' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में गुणादेश की व्यवस्था की गई है। पाणिनि का सूत्र है – ''ऋतश्च संयोगादेर्गुणः'' (अ० ७। ४। १०)। अतः उभयत्र समानता है।

## [विशेष वचन]

१. 'असिद्धं बहिरङ्गमन्तरङ्गे' इत्यनित्येयम् (दु० वृ०)।
२. साधनं हि क्रियां निर्वर्तयति, तामुपसर्गो विशिनष्टि (दु० टी०)।
३. पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण (दु० टी०)।
४. यदिह धातुविशेषणमादिग्रहणम्, तत् प्रायोगिकपरिग्रहार्थम् (दु० टी०)।
५. अकर्मका अपि धातवः सोपसर्गाः सकर्मका भवन्ति (दु० टी०)।
६. पूर्वं धातुरुपसर्गेण युज्यते पश्चात् साधनेन (दु० टी०)।
७. सामान्ये हि विशेषा एवान्तरङ्गाः (दु० टी०)।
८. विशिष्ट एव धात्वर्थः साधनैः सम्बध्यते (दु० टी०)।

## [रूपसिद्धि]

१. **सस्मरतुः**। स्मृ + परोक्षा–अतुस्। 'स्मृ चिन्तायाम्, स्मृ आध्याने' (१।२७२, ५२१) धातु से परोक्षाविभक्तिसंज्ञक परस्मैपद–प्र० पु०–द्विव० 'अतुस्' प्रत्यय, ''चणपरोक्षाचेक्रीयितसनन्तेषु'' (३।३।७) से धातु को द्विर्वचन, ''पूर्वोऽभ्यासः'' (३।३।४) से पूर्ववर्ती 'स्मृ' की अभ्यासंज्ञा, ''अभ्यासस्यादिर्व्यञ्जनमवशेष्यम्'' (३।३।९) से आदि व्यञ्जन का शेष, प्रकृत सूत्र से धातुघटित ऋकार को गुण–अर् तथा ''रेफसोर्विसर्जनीयः'' (२।३।६३) से सकार को विसर्ग आदेश।

२. **सस्मरुः**। स्मृ + परोक्षा–उस्। 'स्मृ चिन्तायाम्, स्मृ आध्याने' (१।२७२, ५२१) धातु से परोक्षाविभक्तिसंज्ञक 'उस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ६९५।

## ६९६. ऋदन्तानां च [३। ६। १६]

### [सूत्रार्थ]

अगुण परोक्षासंज्ञक प्रत्यय के परे रहते दीर्घ ऋकारान्त धातु को गुण आदेश होता है।। ६९५।

### [दु० वृ०]

ऋदन्तानां च धातूनां परोक्षायामगुणे गुणो भवति। तेरतुः, तेरुः। विशशरतुः, विशशरुः। विददरतुः, विददरुः। निपपरतुः, निपपरुः। कथं विशश्रतुः, विशश्रुः। विदद्रतुः, विदद्रुः। निपप्रतुः, निपप्रुः ? शृदृप्रामर्थे श्रा–द्रा–प्राश्च वर्तन्ते।। ६९६।

### [दु० टी०]

ऋद०। ऋत् अन्ते येषामित्यन्तग्रहणं **स्पष्टार्थमेव, तपरकरणमसन्देहार्थम्**। अन्यथा रेफान्तानामित्यपि प्रतिपद्यते। कथमित्यादि। **'शृ हिंसायाम्, दृ विदारणे, पृ पालने'** (८। १५, १९, १६) एषामर्थे 'श्रा पाके, द्रा कुत्सायाम्, प्रा पूरणे' (२। २९, २०,२५) वर्तन्ते। वर्तनं पुनरिह यथासङ्ख्येन प्रतिपत्तव्यम्। **अनेकार्था हि धातवो भवन्ति,** ते पुनः परोक्षायामेवाभिधीयन्ते। ननु च **'शृदृप्रां ह्रस्वो वा'** (अ० ७। ४। १२) इति न वक्तव्यम्, दीर्घाश्रयस्य गुणस्य बाधनार्थं क्वन्सौ धात्वन्तराणामिटि चेत्याकारलोपे रेफश्रवणं स्यात्। शश्रृवान्, शिशीर्वान्। ददृवान्, दिदीर्वान्। पपृवान्, पुपूर्वान्। तन्न वक्तव्यम्। **छान्दसा ह्येते प्रयोगा इति**।। ६९६।

### [वि० प०]

ऋद०। 'तेरतुः, तेरुः' इति गुणे कृते **''तृफलभज०''** (३। ४। ५३) इत्यादिना एत्वम् अभ्यासलोपश्च। **'शृ सृ हिंसायाम्, दृ विदारणे, पृ पालनपूरणयोः'** (८। १५, १९, १६) इति दीर्घान्तत्वाद् एषां गुणस्य विषयो न तु **''रम् ऋवर्णः''** (१। २। १०) इत्यस्येति मत्वा चोदयन्नाह–कथं विशश्रतुरित्यादि। 'विशशरतुः' इत्यादय एव प्राप्नुवन्तीति परिहारमाह 'शृ–दृ–प्रामर्थे' इत्यादि। **'श्रा पाके, द्रा कुत्सायां गतौ, प्रा पूरणे'** (२। २९, २०, २५) इत्येते यथाक्रमम् एषामर्थेऽपि वर्तन्ते, **धातूनामनेकार्थत्वाद्** इत्यर्थः। तेनालोपोऽसार्वधातुक इत्याकारलोपे सिद्धम्। अतो दीर्घाश्रयस्य गुणस्य बाधनार्थं **''शृदृप्रां ह्रस्वो वा''** (अ० ७। ४। १२) इति न वक्तव्यमिति। अथानूच्यमानेऽस्मिन् क्वन्सौ दोषः स्यात्। अत्र किल धात्वन्तराणामेषां **''अर्त्तीण्घसैकस्वरातां''** (४। ६। ७६) इत्यादिना इटि कृते **''इटि च''** (३। ४। २८) इत्याकारलोपे रेफस्य श्रवणं स्यात्। ऋकारस्य च पक्षे ह्रस्वश्रवणम् इष्यते। यथा शश्रृवान्, शिशीर्वान्। ददृवान्, दिदीर्वान्। पपृवान्, पुपूर्वान् इति। तदयुक्तम्, **छान्दसा ह्येते प्रयोगा इति**।। ६९६।

## [समीक्षा]

'तेरतुः, विशशरुः, निचकरतुः' इत्यादि शब्दरूपों के सिद्ध्यर्थ गुणविधान की व्यवस्था दोनों ही आचार्यों ने की है। पाणिनि का सूत्र है– ''ऋच्छत्यृताम्'' (अ० ७। ४। ११)। पाणिनि ने 'ऋच्छ' धातु को इसी सूत्र में पढ़ दिया है, जबकि कातन्त्रकार उसे पृथक् सूत्र में रखते हैं।

## [विशेष वचन]

१. ऋत् अन्ते येषामित्यन्तग्रहणं स्पष्टार्थमेव, तपरकरणमसन्देहार्थम् (दु० टी०)
२. अनेकार्था हि धातवो भवन्ति, ते पुनः परोक्षायामेवाभिधीयन्ते (दु० टी०)।
३. छान्दसा ह्येते प्रयोगा इति (दु० टी०; वि० प०)।

## [रूपसिद्धि]

१. **तेरतुः**। तॄ + परोक्षा–अतुस्। 'तॄ प्लवनतरणयोः' (१। २८३) धातु से परोक्षाविभक्तिसंज्ञक परस्मैपद–प्र०पु०–द्विव० 'अतुस्' प्रत्यय, द्विर्वचनादि, प्रकृत सूत्र से गुण, ''तॄफलभजत्रपश्रन्थिग्रन्थिदम्भीनां च'' (३।४।५३) से एत्व–अभ्यासलोप तथा ''रेफसोर्विसर्जनीयः'' (२। ३। ६३) से विसर्गादेश।

२. **तेरुः**। तॄ + परोक्षा–उस्। 'तॄ प्लवनतरणयोः' (१। २८३) से परोक्षासंज्ञक 'उस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

३. **विशशरतुः**। वि + शॄ + परोक्षा–अतुस्। 'वि' उपसर्गपूर्वक 'शॄ हिंसायाम्' (८। १५) धातु से परोक्षाविभक्तिसंज्ञक 'अतुस्' प्रत्यय, द्विर्वचनादि, प्रकृत सूत्र से गुण तथा सकार को विसर्गादेश।

४. **विशशरुः**। वि + शॄ + परोक्षा–उस्। 'वि' उपसर्गपूर्वक 'शॄ हिंसायाम्' (८। १५) धातु से उस् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

५. **विददरतुः**। वि + दॄ + परोक्षा–अतुस्। 'वि' उपसर्गपूर्वक 'दॄ विदारणे' (८। १९) धातु से 'अतुस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

६. **विददरुः**। वि + दॄ + परोक्षा – उस्। 'वि' उपसर्गपूर्वक 'दॄ विदारणे' (८। १९) धातु से 'उस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

७. **निपपरतुः**। नि + पॄ + परोक्षा – अतुस्। 'नि' उपसर्गपूर्वक 'पॄ पालन-पूरणयोः' (८। १६) धातु से अतुस् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

८. **निपपरुः**। नि + पॄ + परोक्षा–उस्। 'नि' उपसर्गपूर्वक 'पॄ पालनपूरणयोः' (८। १६) धातु से 'उस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ६९६।

## ६९७. ऋच्छ ऋतः [३। ६। १७]

## [सूत्रार्थ]

गुणी तथा अगुण परोक्षासंज्ञक प्रत्यय के परे रहने 'ऋच्छ' धातुघटित–ऋकार को गुण आदेश होता है।। ६९७।

## [दु० वृ०]

पुनर्ऋद्ग्रहणं **गुण्यर्थम्।** ऋच्छ ऋतः स्थाने गुणिन्यगुणे च परोक्षायां गुणो भवति। आनर्च्छ, आनर्च्छतुः, आनर्च्छुः। कथमारतुः ? नित्यत्वान्निमित्ताभावाद् वा नागमविघातः स्यात्।। ६९७।

## [दु० टी०]

ऋ०। **''ऋतश्च संयोगादेः''** (३। ६। १५) इत्यतः ऋद्ग्रहणमनुवर्तते एवेति हृदि कृत्वाह–पुनरित्यादि। गुणिप्रत्यय एवार्थः प्रयोजनमस्येति **गुण्यर्थमिति**। अन्यथा अगुणाधिकाराद् अगुण एव स्यात्। कथमित्यादि। अर्तेर्गुणार्थो दीर्घः पठितव्यः। ऋच्छ ऋत इति। ऋश्च ऋच्छश्च ऋच्छ ऋत इति ऋच्छ ऋत इति वा अर्तेर्ऋच्छश्च ऋतो गुण इत्यर्थः। अन्यथा **''ऋकारे च''** (३। ३। २०) इति नकारागमः प्रसज्येत, तन्न वक्तव्यमित्याह–नित्यत्वादिति **'नित्यानित्ययोर्नित्यविधिर्बलवान्'** (का० परि० ४९) इति रत्वमेव न त्वनित्यो नागमः। निमित्ताभावाद् वेति अभ्युपगम्य पक्षान्तरमुच्यते **'निमित्ताभावे नैमित्तिकस्याप्यभावः'** (का परि० २७) इति नकारो निवर्तते। यदि पुनरिह पूर्वयोगः प्रश्लिष्यते **'ऋ गतौ'** (२। ७४) इत्यस्यैव ग्रहणं प्रतिपद्येत। तदन्तविशेषणमपि गरीयः स्यात्।। ६९७।

## [वि० प०]

ऋच्छ०। **''ऋतश्च संयोगादेः''** (३। ६। १५) इत्यतः ऋद्ग्रहणं वर्तत एवेत्याह–पुनरित्यादि। गुणी प्रत्यय एवार्थः प्रयोजनमस्येति **विग्रहः**। अन्यथा गुणाधिकारादिहाप्यगुण एव स्यात्। गुणे कृते **''अस्यादेः सर्वत्र''** (३। ३। १८) इति दीर्घः, **''तस्मान्नागमः परादिरन्तश्चेत् संयोगः''** (३। ३। १९) इति नकारागमः। कथमित्यादि। अर्तेरभ्यासस्य ऋवर्णस्याकारे कृते च पूर्ववद् दीर्घत्वे कृते **''ऋकारे च''** (३। ३। २०) इति नकारागमः प्राप्नोतीति। तत ऋकारस्याभावार्थम् अर्तेरपि गुणो वाच्यः, यथा ''ऋच्छ ऋतः'' (३। ६। १७) इति। ऋश्च ऋच्छश्च ऋच्छौ ततः 'ऋतः' इति अर्तेर्ऋच्छश्च ऋतो गुण इत्यर्थः। तन्न वक्तव्यमित्याह–नित्यत्वादिति। नकारागमे कृतेऽपि नित्यः **''रमृवर्णः''** (१। २। १०) इति रेफः, नागमः पुनरनित्य एव, रेफे ऋकारस्याभावात्। अतो **'नित्यानित्ययोर्नित्यविधिर्बलवान्'** (का० परि० ४९) इति रत्वमेव। अथ **'आगमादेशयोरागमो विधिर्बलवान्'** (का० परि० ४०) इति मन्यते चेत्, **तुष्यतु दुर्जन**स्तथापि **'निमित्ताभावे नैमित्तिकस्याप्यभावः'** (का० परि० २७) भविष्यतीत्याह–निमित्ताभावाद् वेति।। ६९७।

## [समीक्षा]

समीक्षा द्र०–सूत्रस० ६९६

## [रूपसिद्धि]

१. **आनर्च्छ**। ऋच्छ् + परोक्षा–अट्। 'ऋच्छ गतौ, ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु'

(१। २७९;५।२०) धातु से परोक्षाविभक्तिसंज्ञक परस्मैपद प्र० पु०—ए०व० 'अट्' प्रत्यय, गुण, द्विर्वचनादि तथा ''ऋकारे च'' (३। ३। २०) से नकारागम।

२. **आनर्च्छतुः**। ऋच्छ् + परोक्षा — अतुस्। 'ऋच्छ गतौ' (१। २७९) धातु से परोक्षाविभक्तिसंज्ञक 'अतुस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

३. **आनर्च्छुः**। ऋच्छ् + परोक्षा — उस्। 'ऋच्छ गतौ' (१। २७९) धातु से परोक्षाविभक्तिसंज्ञक 'उस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ६९७।

## ६९८. शीङः सार्वधातुके [३। ६। १८]

### [सूत्रार्थ]

अगुण सार्वधातुकसंज्ञक प्रत्यय के परे रहते शीङ्धातुघटित ईकार को गुणादेश होता है।। ६९८।

### [दु० वृ०]

शीङः सार्वधातुके परेऽगुणे गुणो भवति एकवर्णत्वाद् वर्णान्ते। शेते, शयीत, शेरताम्, अशेरत।। ६९८।

### [दु० टी०]

शीङः। एकवर्णत्वाद् वर्णान्ते इति। **'इवर्णचवर्गयशास्तालव्याः'** (कात० शि० सू०२) अत्रान्तरतम एकार एव, स च शकारस्य न भवति, यस्मादेकवर्णोऽन्ते निश्चितः, किञ्च व्यवधानादिति भावः। सानुबन्धनिर्देशा**च्चेक्रीयितलुकि** न भवति—'शेशीतः, शेश्यति' यदि **भाषायां** दृश्यते। शीङोऽन्लुकीति सिद्धे सार्वधातुकग्रहणं **स्पष्टार्थम्**।। ६९८।

### [वि० प०]

शीङः। एकवर्णत्वाद् वर्णान्ते इति। अन्यथा आन्तरतम्यादेकारस्तालव्यो गुणो भवन् शकारस्य स्थाने तालव्यः स्यादिति भावः। सर्वत्रादादित्वाद् विकरणस्य लुक्।। ६९८।

### [समीक्षा]

'शेते, शयाते, शेरताम्, अशेरत' इत्यादि प्रयोगों के सिद्ध्यर्थ 'शीङ्' धातु में गुणविधान दोनों ही आचार्यों ने किया है। पाणिनि का सूत्र है—''शीङः सार्वधातुके गुणः'' (अ० ७। ४। २१)। अतः उभयत्र साम्य है।

### [विशेष वचन]

१. एकवर्णत्वाद् वर्णान्ते (दु० वृ०)।

२. सानुबन्धनिर्देशाच्चेक्रीयितलुकि न भवति 'शेशीतः, शेश्यति' यदि भाषायां दृश्यते (दु० टी०)।

३. सार्वधातुकग्रहणं स्पष्टार्थम् (दु० टी०)।

## [रूपसिद्धि]

१. **शेते**। शी + ते। 'शीङ् स्वप्ने' (२। ५५) धातु से वर्तमानासंज्ञक आत्मनेपद-प्र० पु०—ए० व० 'ते' प्रत्यय, ''अन् विकरण: कर्तरि'' (३। २। ३२) से उसका लुक् तथा 'अन्' विकरण ''अदादेर्लुग् विकरणस्य'' (३। ४। ९२) से उसका लुक् तथा प्रकृत सूत्र से धातुघटित ईकार को गुण— एकार।

२. **शयीत**। शी + सप्तमी—ईत। 'शीङ् स्वप्ने' (२। ५५) धातु से सप्तमी-विभक्तिसंज्ञक आत्मनेपद—प्र०पु०—ए०व० 'ईत' प्रत्यय, अन्विकरण का लुक्, प्रकृत सूत्र से ईकार को गुण तथा ''ए अय्'' (१। २। १२) से एकार को अयादेश।

३. **शेरताम्**। शी + पञ्चमी—अन्ताम्। 'शीङ् स्वप्ने' (२। ५५) धातु से पञ्चमीविभक्तिसंज्ञक आत्मनेपद—प्र०पु०—ब०व० 'अन्ताम्' प्रत्यय, अन् विकरण का लुक्, प्रकृत सूत्र से गुण, ''शेतेरिरन्तेरादि:'' (३। ५। ४०) द्वारा 'अन्ताम्' प्रत्यय से पूर्व रकारागम तथा ''आत्मने चानकारात्'' (३। ५। ३९) से प्रत्ययगत नकार का लोप।

४. **अशेरत**। अट् + शी + ह्यस्तनी — अन्त। 'शीङ् स्वप्ने' (२। ५५) धातु से ह्यस्तनीविभक्तिसंज्ञक आत्मनेपद—प्र० पु०—ब०व० 'अन्त' प्रत्यय, ''अड् धात्वादि-र्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु'' (३। ८। १६) से धातुपूर्व अडागम, अन्विकरण का लुक्, प्रकृत सूत्र से धातुघटित ईकार को गुण—एकार, ''शेते रिरन्तेरादि:'' (३। ५। ४०) द्वारा 'अन्त' प्रत्यय से पूर्व रकारागम तथा ''आत्मने चानकारात्'' (३। ५। ३९) से नकार का लोप।। ६९८।

## ६९९. अयीर्ये [३। ६। १९]

### [सूत्रार्थ]

'य' प्रत्यय के परे रहते 'शीङ्' धातुघटित ईकार को अयादेश होता है।। ६९९।

### [दु० वृ०]

शीङ: ईकारोऽय् भवति ये परे। शय्यते, अधिशय्य गत:। कथं समुह्य गत: ? ऊहत्यर्थे वहिरिति। अगुणे ये तु सोपसर्गस्योहतेर्निवृत्ति**रभिधानात्**, तेन ह्रस्वो न वाच्य:।। ६९९।

### [दु० टी०]

अयीरिति ह्रस्व इकार **उच्चारणार्थ** इति **केचित्** पठन्ति, तदा 'शीङ:' इत्यवयवलक्षणा षष्ठी शकारस्य व्यवहितत्वान्न भवति, इकारोऽत्र नास्तीति, सवर्णं वा सूचयति 'अगुणे' इत्यत्र **सम्बन्धनीयम्**। **तेन 'शीङ: स्वराद् ये'** इति कृते न भवति—शेयम्। **शर्ववर्ममतमा**लम्ब्य **वृत्तौ** अगुण इति नोक्तम्। अनुबन्धनिर्देशा**च्चेक्रीयितलुकि** न भवति — संशेशीयते, यदि **भाषायां** दृश्यते। उपसर्गाद् ह्रस्व ऊहतेरगुणे ये न वक्तव्य इत्याह—समुह्यते इत्यादि।

**'वह प्रापणे'** (१। ६१०), **धातूनामनेकार्थत्वाद् वितर्केऽपि वर्तते** इति। आ + उह्यते ओह्यते इति ऊहिना वहिना च न विशेषः।। ६९९।

## [वि० प०]

अयीः। 'शय्यते' इति, **''सार्वधातुके यण्''** (३। २। ३१) – 'अधिशय्य गतः' इति अधिशयनं पूर्वमिति विग्रहे **''एककर्तृकयोः''** (४। ६। ३) इत्यादिना कृतस्य क्त्वाप्रत्ययस्य समासे भाविन्यनञः इति क्त्वो यप्। उपसर्गाद् ह्रस्व ऊहतेरिति न वक्तव्यम्। **अनेकार्थत्वाद् धातूनां** वहिनैव वितर्कार्थेन यजादित्वात् कृतसम्प्रसारणेनैव सिद्धत्वादित्याह–समुच्चय इति **सुगमम्**।। ६९९।

## [समीक्षा]

'शय्यते, शाशय्यते, अधिशय्य' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में अयादेश का विधान किया गया है। पाणिनि का सूत्र है– ''अयङ् यि क्ङिति'' (अ० ७। ४। २२) । पाणिनि ने 'अय्' आदेश के साथ 'अ–ङ्' अनुबन्ध भी लगाए हैं तथा 'कित्–ङित्' का भी प्रयोग किया है– गुणवृद्धि का निषेध सूचित करने के लिए। कातन्त्र में 'यण्–यप्' आदि प्रत्ययों में गुण – वृद्धि कार्य नहीं होता। अतः प्रायः उभयत्र साम्य ही है।

## [विशेष वचन]

१. अगुणे ये तु सोपसर्गस्योहतेर्निवृत्तिरभिधानात्, तेन ह्रस्वो न वाच्यः (दु० वृ०)

२. ह्रस्व इकार उच्चारणार्थः इति केचित् पठन्ति (दु० टी०)।

३. शर्ववर्ममतमालम्ब्य वृत्तावगुण इति नोक्तम् (दु० टी०)।

४. अनेकार्थत्वाद् धातूनां वहिनैव वितर्कार्थेन यजादित्वात् कृतसम्प्रसारणेनैव सिद्धत्वात् (वि० प०)।

## [रूपसिद्धि]

१. **शय्यते**। शी + यण् + ते। 'शीङ् स्वप्ने' (२। ५५) धातु से 'ते' प्रत्यय, भाव अर्थ में ''सार्वधातुकेयण्'' (३। २। ३१) से 'यण्' प्रत्यय तथा प्रकृत सूत्र से शीङ्-धातुघटित ईकार को अयादेश।

२. **अधिशय्य गतः**। 'अधि' उपसर्गपूर्वक 'शीङ् स्वप्ने' (२।५५) धातु से 'क्त्वा' प्रत्यय, समास, क्त्वा को यप् आदेश, प्रकृत सूत्र से ईकार को अयादेश, लिङ्गसंज्ञा, सि–प्रत्यय, अव्ययसंज्ञा तथा 'सि' का लुक्।। ६९९।

# ७००. आयिरिच्यादन्तानाम् [३। ६। २०]

## [सूत्रार्थ]

आकारान्त धातुओं में आकार के स्थान में 'आयि' आदेश होता है, 'इच्' प्रत्यय के परे रहते।। ७००।

## [दु० वृ०]

आदन्तानां धातूनामिचि परे आयिर्भवति। निर्दिष्टस्यातः स्थानिन एवान्तरतम्यात्। अस्थायि, अदायि, स्थायिष्यते, दायिष्यते, अस्थायिष्यत, अदायिष्यत, स्थायिषीष्ट, दायिषीष्ट, स्थायिता, दायिता। इड् वेज्वच्चेति।। ७००।

## [दु० टी०]

आयि०। **इकार उच्चारणार्थः**। आद् अन्तो येषामिति बहुव्रीहावपि न सर्वस्यायिरादेश इत्याह – निर्दिष्टस्यातः स्थानिन इति। तर्हि वक्ष्यमाणमन्तग्रहणमिहैव क्रियताम् ? सत्यम्, **प्रतिपत्तिगौरवं** स्यात्। यद्येवं किमन्तग्रहणेन **'येन विधिस्तदन्तस्य'** (का० परि० ३) इति भविष्यति ? सत्यम्, आयीति लाक्षणिकानामपि यथा स्यात्। इड् वेज्वच्चेति **''स्यसिजाशीःश्वस्तनीषु भावकर्मार्थिकासु च। स्वरहनग्रहदृशामिड् वेज्वच्च''** इत्यर्थः।। ७००।

## [वि० प०]

आयिः। 'अदायिषत' इति अद्यतन्याम् अन्त, सिच्, **''आत्मने चानकारात्''** (३। ५। ३९) इति नलोपः। इड् वेज्वच्चेति। **''स्यसिजाशीः''** इत्यादिना इज्वच्चेत्यर्थः'। ७००।

## [समीक्षा]

'अस्थायि, अदायि, स्थायिष्यते, स्थायिषीष्ट' इत्यादि शब्दरूपों के सिद्ध्यर्थ 'य्' – विधान की व्यवस्था उभयत्र की गई है। पाणिनि का सूत्र है – ''आतो युक् चिण्कृतोः'' (अ० ७।३।३३)। यह ज्ञातव्य है पाणिनि 'युक्' का आगम करके 'स्थायि' रूप प्रस्तुत करते हैं, जबकि कातन्त्रकार आकारान्त धातुघटित आकार के स्थान में 'आय्' आदेश करके 'स्थायि' बनाते हैं। इस प्रकार सामान्यतः उभयत्र साम्य ही है।

## [विशेष वचन]

१. इकार उच्चारणार्थः (दु० टी०)।
२. प्रतिपत्तिगौरवं स्यात् (दु० टी०)।
३. आयीति लाक्षणिकानामपि यथा स्यात् (दु० टी०)।

## [रूपसिद्धि]

१. **अस्थायि**। अट् + स्था + इच् + त। 'ष्ठा गतिनिवृत्तौ' (१।२६७) धातु से अद्यतनीसंज्ञक आत्मनेपद–प्र० पु० – ए० व० 'त' प्रत्यय, अडागम, इच् प्रत्यय, प्रकृत सूत्र से आकार को आय् तथा तलोप।

२. **अदायि**। अट् + दा + त। 'डु दाञ् दाने' (२। ८४) धातु से अद्यतनी-संज्ञक 'त' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

३. **स्थायिष्यते**। स्था + इट् + स्यते। 'ष्ठा गतिनिवृत्तौ' (१।२६७) धातु से

इच्विशिष्ट इट्, प्रकृत सूत्र से 'आय्' आदेश, धातुसंज्ञा, भविष्यन्तीसंज्ञक **'स्यते'** प्रत्यय तथा मूर्धन्यादेश।

४. **दायिष्यते**। दा + इट् + स्यते। 'डु दाञ् दाने' (२। ८४) धातु से **इच्विशिष्ट** इट् तथा अन्य प्रक्रिया पूर्ववत्।

५. **अस्थायिष्यत**। अट् + स्था + इट् + स्यत। 'ष्ठा गतिनिवृत्तौ' **(१।२६७) धातु** से क्रियातिपत्तिसंज्ञक 'स्यत' प्रत्यय, अडागम, इडागम, प्रकृत सूत्र से **आय् आदेश** तथा मूर्धन्यादेश।

६. **अदायिष्यत**। अट् + दा + इट् + स्यत। 'डु दाञ् दाने' (२। ८४) **धातु से** क्रियातिपत्तिसंज्ञक 'स्यत' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

७. **स्थायिषीष्ट**। स्था + इट् + आशी:—सीष्ट। 'स्था' धातु से **आशी:संज्ञक** 'सीष्ट' प्रत्यय, इट्, आय् आदेश तथा मूर्धन्यादेश।

८. **दायिषीष्ट**। दा + इट् + सीष्ट। 'दा' धातु से आशी:संज्ञक **'सीष्ट' प्रत्यय,** इडागम तथा आय् आदेश।

९. **स्थायिता**। स्था + इट् + ता। 'स्था' धातु से श्वस्तनीसंज्ञक **'ता' प्रत्यय,** इडागम तथा आय् आदेश।

१०. **दायिता**। दा + इट् + ता। 'दा' धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय, **इडागम** तथा आकार को आय् आदेश।। ७००।

## ७०१. शाच्छासाह्वाव्यावेपामिनि [३। ६। २१]

### [सूत्रार्थ]

'इन्' प्रत्यय के परे रहते 'शो—छो—सो—ह्वेञ्—वेञ्—व्येञ्' तथा 'पा' धातुघटित आकार को 'आयि' आदेश होता है।। ७०१।

### [दु० वृ०]

शाच्छासाह्वाव्यावेपामिनि परे आयिर्भवति। शो—शाययति। छो—छाययति। सो—साययति। ह्वेञ्—ह्वाययति। व्येञ्—व्याययति। वेञ्—वाययति। **'धेट् पा पाने, पै ओ वै'** (१।२६४, २६१) — पाययति।। ७०१।

### [दु० टी०]

शा०। वे इत्येकारान्तनिर्देशो वेञः संज्ञार्थः। अन्यथा **'पै ओ वै'** (१।२६१) इत्यस्य ग्रहणं स्यात्। ननु **'व्येञ् संवरणे, ह्वेञ् स्पर्धायाम्'** (१।६१२, ६१३) इत्याभ्यां सहचरितस्य वेञो ग्रहणं भविष्यति, न व्यवहितस्य ? सत्यम्। **प्रतिपत्तिगौरवं स्यात्। ''पातेर्लोऽन्तः''** (३। ६। २३) इत्याह — **'पा पाने'** (१। २६४) इति। **पकारागमाप-वादोऽयम्।।** ७०१।

## [वि० प०]

शाच्छा०। **'पा रक्षणे'** (२ । २१) इत्यस्य **''पातेर्लोऽन्तः''** (३। ६। २३) इत्यस्त्येवेत्याह – **'पा पाने, पै ओ वै शोषणे'** (१।२६४, २६१) वेति।। ७०१।

## [समीक्षा]

'शाययति, सायति, वाययति' इत्यादि इन्प्रत्ययघटित शब्दरूपों के सिद्ध्यर्थ यकार की व्यवस्था उभयत्र की गई है। पाणिनि का सूत्र है – ''शाच्छासाह्वाव्यावेपां युक्'' (अ० ७।३।३७)। यहाँ पाणिनि ने यकार की व्यवस्था 'युक्' आगम द्वारा तथा कातन्त्रकार ने आकार को 'आयि' आदेश द्वारा की है। पाणिनीय 'णिच्' प्रत्यय के लिए कातन्त्र में कारितसंज्ञक 'इन्' प्रत्यय का विधान है।

## [विशेष वचन]

१. 'वे' इत्येकारान्तनिर्देशो 'व्येञः परिग्रहार्थः, अन्यथा 'पै ओ वै' इत्यस्य ग्रहणं स्यात् (दु० टी०)।

२. प्रतिपत्तिगौरवं स्यात् (दु० टी०)।

## [रूपसिद्धि]

१. **शाययति**। शो + इन् + अन् + ति। 'स्यन्तं प्रयुङ्क्ते' इस विग्रह में 'शो तनूकरणे' (३। १९) धातु से ''धातोश्च हेतौ'' (३। २। १०) सूत्र द्वारा 'इन्' प्रत्यय, ''सन्ध्यक्षरान्तानामाकारोऽविकरणे'' (३।४।२०) से ओकार को आकार, प्रकृत सूत्र से आकार को 'आय्' आदेश, धातुसंज्ञा, 'ति' प्रत्यय, ''अन् विकरणः कर्तरि'' (३।२।३२) से अन् विकरण, ''नाम्यन्तयोर्धातुविकरणयोर्गुणः'' (३। ५। १) से इकार को गुण–एकार तथा ''ए अय्'' (१। २। १२) से एकार को अयादेश।

२. **छाययति**। छो + इन् + अन् + ति। 'छो छेदने' (३।२०) धातु से इन् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

३. **सायति**। सो + इन् + अन् + ति। 'षो अन्तकर्मणि' (३। २१) धातु से इन् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

४. **ह्वाययति**। ह्वेञ् + इन् + अन् + ति। 'ह्वेञ् स्पर्धायाम्' (१। ६१३) धातु से इन् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

५. **व्याययति**। व्येञ् + इन् + अन् + ति। 'व्येञ् संवरणे' (१। ६१२) धातु से इन् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

६. **वाययति**। वेञ् + इन् + अन् + ति। 'वेञ् तन्तुसन्ताने' (१। ६११) धातु से इन् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

७. **पाययति**। पा, पै + इन् + अन् + ति। 'पा रक्षणे, पै ओ वै शोषणे' (२।२१; १।२६१) धातु से इन् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ७०१।

## ७०२. अर्तिह्लीब्लीरीक्नूयीक्ष्माय्यादन्तानामन्तः पो यलोपो गुणश्च नामिनाम् [३। ६। २२]

### [सूत्रार्थ]

इन् प्रत्यय के परे रहते 'ऋ–ह्री–ब्ली–री–क्नूयी–क्ष्मायी' एवं आकारान्त धातु के अन्त में पकारागम होता है तथा प्राप्ति के अनुसार यलोप–गुण आदेश प्रवृत्त होते हैं।। ७०२।

### [दु० वृ०]

अर्त्यादीनाम् आदन्तानां च इनि परे पकारोऽन्तो भवति यथासम्भवं यलोपो गुणश्च नामिनाम्। **तिपा धातुरेव निर्दिश्यते**। अर्पयति, ह्रेपयति, ब्लेपयति। 'री रेषणे, रीङ् श्रवणे वा' (८।२५; ३।८६) रेपयति। **'क्नूयी शब्दे'** (१। ४११)–क्नोपयति, **'क्ष्मायी विधूनने'** (१। ४१२) – क्ष्मापयति। आदन्तानां च – स्थापयति, क्रापयति, अध्यापयति।। ७०२।

### [दु० टी०]

अर्त्ति०। **'ऋ प्रापणे, ऋ सृ गतौ'** (१।२७५; २। ७४) इति द्वयोरपि ग्रहणम-विकरणनिर्देशात्। **तिब्निर्देशस्तु तदन्तविधिनिरासार्थः**। ह्रीप्रभृतिभिः साहचर्यान्न तदन्त-विधिश्चेत् **प्रतिपत्तिगौरवनिरासार्थं** स्यादित्याह – तिपेत्यादि। **अन्य** आह – **चेक्रीयित-लुगन्तस्य निवृत्ति**रिति अरारयति, अरियारयति (अरी आरयति)। यत्वमत्र नेष्यते। 'री' इति सानुबन्धकस्यापि ग्रहणमित्याह–री इत्यादि। आदन्तानामित्यन्तग्रहणं **लाक्षणिकग्रहणार्थम् अपरमागमार्थम्** । 'प' इत्यकार **उच्चारणार्थः**। अथ किमर्थं यलोपग्रहणम् **''ग्वोर्व्यञ्जनेऽये''** (४। १। ३५) इति भविष्यति ? सत्यम्। अत्र प्रकरणप्रस्तावाद् व्यञ्जनादिप्रत्यय एव प्रतीयते। किञ्च न **तच्छर्ववर्मकृत**मिति।

अथ किमर्थं पकारागमः क्रियते। अर्तिह्लीब्लीरीक्नूयीक्ष्माय्यादन्तेभ्यः 'प' आदिरित्युच्यताम् अर्थाद् इन आदिरवसीयते गुणश्च नामिनामिति न कृतः स्यात् नाम्यन्तलक्षणो गुणो भविष्यति, यद्येवं वृद्धिः केन निवार्यते ? सत्यम्। येन नाप्राप्तिन्यायेन कारितस्य वृद्धिं प्रति निमित्ताभावे पकारं प्रति आगमित्वमुच्यते, विरुद्धश्च निमित्ताभाव **आगमित्वेन** सप्तम्या हि निमित्तत्वं षष्ठ्या वा आगमित्वमिति तद्वृद्धेर्बाधकत्वं भविष्यति कुतो वृद्धिप्रसङ्गः ? सत्यम्। आगमा यद्गुणीभूतास्ते तद्ग्रहणेन गृह्यन्ते इति। 'दाप्यते' इति कारितलोपे पकारागमनिवृत्तिः स्यात्, न च 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति पुनः पकारागमः स्ववयवत्वात्। अरीरिपदित्यत्र च रेपयतेरिनि चण्युपधाह्रस्वो यथा स्यात्।। ७०२।

### [वि० प०]

अर्त्तिह्री०। तिपेति। **'ऋ प्रापणे च, ऋ सृ गतौ'** (१।२७५; २।७४) इति

सामान्येन गृह्यते, न विशिष्टो धातुरिति विकरणनिर्देशादित्यर्थः। तिपमन्तरेण ऋकारान्तो धातुरित्यपि शङ्क्यते। ह्रीप्रभृतिभिः साहचर्यान्न तदन्तविधिरिति, तदयुक्तम्, प्रतिपत्तिगौरवात्। सर्वत्र हेताविन्। क्रापयति, अध्यापयतीति। ''स्मिजिक्रीडामिनि'' (३।४।२४) इत्यान्वम्, इह लाक्षणिकस्याप्याकारस्य ग्रहणम् आदन्तानामित्यन्नान्तग्रहणात्। अन्यथा 'यौ विधिस्त- दन्तस्य' (का० परि० ३) इति सिद्धमिति भावः॥ ७२।

## [समीक्षा]

'अर्पयति, ह्रेपयति, क्ष्मापयति, स्थापयति, अध्यापयति' इत्यादि शब्दरूपों की सिद्ध्यर्थ पुगागम, यलोप तथा गुणविधान का निर्देश पाणिनि तथा शर्ववर्मा दोनों ने ही किया है। एतदर्थ पाणिनि के तीन सूत्र हैं -- ''लोपो व्योर्वलि, अर्त्तिह्रीब्लीरीक्नूयीक्ष्माय्यातां पुङ् णौ, पुगन्तलघूपधस्य च'' (अ० ६।१। ६६; ७।३।३६, ८६)। इस प्रकार पाणिनि ने जो तीन कार्यों के लिए तीन सूत्र बनाए हैं तथा कातन्त्रकार ने केवल एक सूत्र, तदनुसार पाणिनीय व्याकरण का गौरव तथा कातन्त्रव्याकरण का लाघव स्पष्ट है। व्याख्याकारों ने 'अर्त्ति' पद से दोनों 'ऋ' धातुओं के ग्रहण का औचित्य सिद्ध किया है तथा यह भी कहा है कि 'अर्त्ति' में तिप्–निर्देश धातु के ही अवबोधार्थ जानना चाहिए।

## [विशेष वचन]

१. तिपा धातुरेव निर्दिश्यते (दु० वृ०)।

२. 'ऋ प्रापणे–ऋ सृ गतौ' इति द्वयोरपि, ग्रहणम् अविकरणनिर्देशात् (दु० टी०)।

३. तिप्–निर्देशस्तु तदन्तविधिनिरासार्थः। ह्रीप्रभृतिभिः साहचर्यान्न तदन्त-विधिश्चेत्, प्रतिपत्तिगौरवनिरासार्थं स्यात् (दु० टी०)।

४. आदन्तानामित्यन्तग्रहणं लाक्षणिकग्रहणार्थम् अपरभागमार्थम् (दु० टी०)।

५. 'प' इत्यकार उच्चारणार्थः (दु० टी०)।

६. अत्र प्रकरणप्रस्तावाद् व्यञ्जनादिप्रत्यय एव प्रतीयते, किञ्च न तच्छर्ववर्म-कृतमिति (दु० टी०)।

७. तिपमन्तरेण ऋकारान्तो धातुरित्यपि शङ्क्यते। ह्रीप्रभृतिभिः साहचर्यान्न तदन्तविधिरिति, तदयुक्तम्, प्रतिपत्तिगौरवात् (वि० प०)।

## [रूपसिद्धि]

१. **अर्पयति**। ऋ + प् + इन्, + अन् + ति। 'ऋ प्रापणे च, ऋ गतौ' (१।२७५; २।७४) धातु से ''धातोश्च हेतौ'' (३।२। १०) सूत्र द्वारा कारितसंज्ञक 'इन्' प्रत्यय, प्रकृत सूत्र से 'प्' का आगम–ऋकार को गुण अर्, ''ते धातवः'' (३।२। १६) से 'अर्पि' की धातुसंज्ञा, वर्तमानासंज्ञक परस्मैपद–प्र० पु०–ए०व० 'ति' प्रत्यय, ''अन्

विकरणः कर्तरि'' (३।२।३२) से 'अन्' विकरण, 'न्' अनुबन्ध का प्रयोगाभाव, ''नाम्यन्तयोर्धातुविकरणयोर्गुणः'' (३। ५। १) से इकार को गुण–एकार तथा ''ए अय्'' (१। २। १२) से उसको अयादेश।

२. **ह्रेपयति**। ह्री + प् + इन्, + अन् + ति। 'ह्री लज्जायाम्' (२। ६९) धातु से इन्, पकारागम, गुण, धातुसंज्ञा, 'ति' प्रत्यय, 'अन्' विकरण, गुण तथा अयादेश।

३. **ब्लेपयति**। ब्ली + प् + इन्, + अन् + ति। 'ब्ली वरणे' (८। १७) धातु से इन्, पकारागम तथा अन्य प्रक्रिया पूर्ववत्।

४. **रेपयति**। री + प् + इन्, + अन् + ति। 'री रेषणे, रीङ् श्रवणे' (८।२५; ३।८६) धातु से इन्, पकारागम आदि प्रक्रिया पूर्ववत्।

५. **क्नोपयति**। क्नूयी + प् + इन्, + अन् + ति। 'क्नूयी शब्दे' (१।४११) धातु से इन्, पकारागम, यकारलोप, गुण तथा अन्य प्रक्रिया पूर्ववत्।

६. **क्ष्मापयति**। क्ष्मायी + प् + इन्, + अन् + ति। 'क्ष्मायी विधूनने' (१। ४१२) धातु से इन्, पकारागम, यकारलोप तथा अन्य प्रक्रिया पूर्ववत्।

७. **स्थापयति**। स्था + प् + इन् + अन् + ति। 'ष्ठा गतिनिवृत्तौ' (१।२७०) धातु से इन्, पकारागम आदि प्रक्रिया पूर्ववत्।

८. **क्रापयति**। क्री + प् + इन्, + अन् + ति। 'डु क्रीञ् द्रव्यविनिमये' (८। १) धातु से इन्, पकारागम, ''स्मिजिक्रीङामिनि'' (३।४।२४) से ईकार को आकार तथा अन्य प्रक्रिया पूर्ववत्।

९. **अध्यापयति**। अधि + इङ् + प् + इन् + अन् + ति। 'इङ् अध्ययने' (२। ५६) धातु से इन् प्रत्यय, पकारागम, ''स्मिजिक्रीङामिनि'' (३।४।२४) से इकार को आकार तथा अन्य प्रक्रिया पूर्ववत्।। ७०२।

## ७०३. पातेर्लोऽन्तः [३। ६। २३]

### [सूत्रार्थ]

'इन्' प्रत्यय के परे रहते 'पा' धातु के अन्त में लकारागम होता है।। ७०३।

### [दु० वृ०]

पातेरिनि परेलकारोऽन्तो भवति। पालयति। **'पल रक्षणे'** (९। ५०) **चौरादिकोऽप्यस्ति**। पातेरायिः स्यादिति वचनम्। पुनरन्तग्रहणमादेशो वा स्यादिति।। **७०३।**

### [दु० टी०]

पातेः। **तिब्निर्देशो विशेषावगमाय** तदन्तविधिर्वा स्यात्। पकारान्तस्येति। पुनरन्त इत्यादि पूर्वसूत्रे ह्यादेशोऽपि दृष्टः, आगमोऽपि तस्मान्मन्दमतिरादेशमपि सम्भावयेदिति वाग्रहणेन सूच्यते।। ७०३।

### [वि० प०]

पातेः। पूर्वसूत्रादन्तग्रहणानुवृत्तेरेवागमत्वं भविष्यति किं पुनरन्तग्रहणेनेत्याह–पुनरित्यादि।

अत्र ह्यागमो विहितो यलोपो गुणश्चेति वचनाद् आदेशोऽपि भवति, तेन **तच्छङ्का–निरासार्थमन्तग्रहणम्** इत्यागमत्वमिति बोधयति।। ७०३।

## [समीक्षा]

'पालयति' आदि शब्दों के साधनार्थ दोनों व्याकरणों में 'पा' धातु के बाद लकारागम की व्यवस्था की गई है। कातन्त्रकार ने एतदर्थ प्रकृत स्वतन्त्र सूत्र की रचना की है, परन्तु पाणिनीय व्याकरण में महाभाष्यकार आदि व्याख्याकारों ने 'लुक्' आगम का निर्देश किया है। काशिकाकार का वचन इस प्रकार है – 'पा रक्षणे इत्यस्य लुग्विकरणत्वान्न भवति, लुगागमस्तु तस्य वक्तव्यः– पालयति' (का० वृ० ७।३।३७)।

## [विशेष वचन]

१. पुनरन्तग्रहणम् आदेशो वा स्यादिति (दु० वृ०)।

२. तिब्निर्देशो विशेषावगमाय तदन्तविधिर्वा स्यात् (दु० टी०)।

३. तस्मान्मन्दमतिरादेशमपि सम्भावयेदिति वाग्रहणेन सूच्यते (दु० टी०)।

४. पूर्वसूत्रादन्तग्रहणानुवृत्तेरेवागमत्वं भविष्यति (वि० प०)। तेन तच्छङ्कानिरासार्थमन्तग्रहणम् इत्यागमत्वमिति बोधयति (वि० प०)।

## [रूपसिद्धि]

१. **पालयति**। पा + ल् + इन् + अन् + ति। 'पा रक्षणे' (२।२१) धातु से 'इन्' प्रत्यय, प्रकृत सूत्र से लकारागम, धातुसंज्ञा, वर्तमानाविभक्तिसंज्ञक परस्मैपद–प्र० पु०–ए० व० 'ति' प्रत्यय, 'अन्' विकरण, इकार को गुण तथा एकार को अयादेश।। ७०३।

## ७०४. धूञ्प्रीणात्योर्नः [३। ६। २४]

## [सूत्रार्थ]

'इन्' प्रत्यय के परे रहते 'धू–प्री' धातुओं के अन्त में नकारागम होता है।। ७०४।

## [दु० वृ०]

धूञ्प्रीणात्योरिनि परे नकारोऽन्तो भवति। धूनयति, प्रीणयति। धूञ्प्रीणात्योरिति किम् ? धू विधूनने – विधावयति। प्रीङ् प्रीतौ – प्रायति। घृतं **विलीनयति**। विलीनं करोतीतीन्। घृतं विलालयति। ललते रूपम्। स्नेह द्रवीकरणे, लियः कारिते वृत्निर्वाऽस्ति, **अभिधानात्**। पक्षेणोपवाजयतीति। वजते रूपम्। वाधातोः कम्पने कारिते न वृत्तिः। सत्यार्थवेदानामन्त आप्नुकारित एव चुरादौ। सत्यापयति, अर्थापयति, वेदापयति। कथं कारापयति, वर्णापयति, शब्दापयति ? आपनमापः, कारस्यापः **कारापः** तं करोतीतीन्। हेतौ साधुश्चेद् वक्तव्यं वा।। ७०४।

## [दु० टी०]

धूञ्०। धूञिति क्रैयादिकस्य सौवादिकस्य च ग्रहणमिति **भर्तृहरिः**। तदसङ्गतम्। स्वादौ हि ह्रस्वः पठ्यते, अन्यथा कथं धुनोतीति। **'धू विधूनने, तृप प्रीणने'** (५।१०५; ३।३५) इति **गणनिपातनादनर्थक**मिदमित्ययुक्तम्। न ह्यत्र प्रमाणमस्ति, इन्येव निपातनं न युटीति। धूञ्प्रीञोरिति सिद्धे **तिबुनिर्देशः पाठसुखार्थ एव**। लीलोर्नलावन्तौ वा वक्तव्यौ। स्नेहद्रवे लियः कृतात्वस्य न स्याद् ईकारप्रश्लेषात्। घृतं विलीनयति, घृतं विलालयति, घृतं विलाययति, घृतं विलापयतीति। नलौ न वक्तव्यावित्याह — घृतमित्यादि। लीधातोर्भावे क्तस्य **''ल्वाद्योदनुबन्धाच्च''** (४। ६।१०४) इति नत्वम्, नामकास्तितान्ताच्च हेताविन्नस्त्येव। **'लल ईप्सायाम्'** (९। १०६) इति चुरादीनन्तादपि हेताविन्नास्तीति भावः। 'स्नेह द्रवीकरणे' लीलोर्धात्वोः कारिते वृत्तिर्वर्तनं तस्मान्नास्ति विभाषेति। तथाहि— **'उपसर्गेण धात्वर्थो बलादन्यत्र नीयते'** इति।

यद्येवम्, यथा 'अयो विलाययति' तथा 'अयो विलीनयति'। 'विलालयति' इत्यपि स्यात्। सत्यपि वक्तव्ये प्रयोगान्तरेणापि कथं न भवति विवक्षितप्रकृतेरन्यत्वात्। **अथान- भिधानम्** — तत् किमिह काकैर्भक्षितम्, तर्हि व्यलीललद् इत्यत्रादन्तत्वादिनि चणि ह्रस्वोपधत्वं स्यात्। घृतं व्यलीलिनद् इत्यत्र ह्रस्वो न स्यात्, समानलोपत्वात् ? सत्यम्, दीर्घोपधत्वमेवाभ्यासेऽप्यदीर्घत्वम् प्रकृत्यन्तर**विवक्षाया**ं यदा लीधातोः क्तेर्नत्वं निपातनात्। विलीनिमकार्षीदिति। इनि वृद्धौ कृतायामैकारस्यासमानत्वादुपधाया ह्रस्वत्वं स्यात् — घृतं व्यलीलिनदिति। ''वो विधूनने जोऽन्तः'' इत्यपि न वक्तव्यम्, वारूपास्त्रयः सम्भवन्ति—वाति, वयति, वायते इति। तत्र वेञ आयिरन्त इति। विधूनने कम्पनं तच्च वायतिनिवृत्त्यर्थम्—आवापयति केशान्। शोषयतीत्यर्थः। पकारागम एव। तस्माद् वातेर्ग्रहणं न वक्तव्यम् इत्याह — पक्षेणेत्यादि। एवं 'पुष्पाणि प्रवाजयति, उपावीवजत्'। **'वज व्रज गतौ'** (१।६३) इत्यनेनैव सिध्यतीति भावः। वाते रूपान्तरनिवृत्त्यर्थं चेदित्याह — वा-धातोरित्यादि। कारितविषये न वृत्ति**र्नाभिधानमि**त्यर्थः कथमित्यादि। **''इन् कारितं धात्वर्थे''** (३।२।९) इतीन्। ततो हेताविन् साधुश्चेदिति साधुः प्रयोगश्चेत्। यदि शिष्टप्रयोगो दृश्यते इति भावः। वक्तव्यं वेत्यर्थः।। ७०४।

## [वि० प०]

धूञ्प्री०। लीलोर्नलावन्तौ स्नेहद्रवीकरणे विभाषयेति न वक्तव्यौ। इह प्रकृत्यन्तर**विवक्षयैव** सिद्धत्वादित्याह — घृतमित्यादि। विपूर्वो **'लीङ् श्लेषणे'** (३। ८७), ततो भावे निष्ठेति कृतस्य क्तप्रत्ययस्य **''ल्वाद्योदनुबन्धाच्च''** (४। ६।१०४) इति नत्वम्। नामकारितान्तात् पुनर्हेत्वर्थ**विवक्षाया**मिन् 'ललते रूपम्' इति। **'लल ईप्सायाम्'** (९। १०६) चुरादाविनन्तादपि पुनर्हेताविन् विकल्पस्तर्हि कथमित्याह — **'स्नेह द्रवीकरणे'** (द्र०, ३।४०; ९।९)। लियः कारिते वृत्तिर्वेति। लिय इत्यु**पलक्षणम्** लातेरपीत्यर्थः। अतो वास्ति **विभाषा** सिद्धेति भावः। यथा 'घृतं विलाययति, घृतं

विलापयति' इति, **'उपसर्गेण धात्वर्थो बलादन्यत्र नीयते'** इत्यर्थोऽपि न भिद्यते। अर्थनियमाभावादर्थान्तरेऽपि कथं न भवति। यथा 'अयो विलीनयति, अयो विलालयति' इति।

ननु **मतान्तरेऽपि** प्रकृत्यन्तरेण कथं न भवति, वचनादिति चेत्। तदयुक्तम्, व्यावृत्तेरुपात्तप्रकृतिविशेषविषयत्वेन प्रकृत्यन्तरप्रयोगस्य निषेद्धुमशक्यत्वात्। अथ अनभिधानादिति चेत्, इहापि तदेवास्तु, किमतिदूरगमनेन। ननु व्यलीललदिति। ललतेरसमान– **लोपत्वात्** सन्वद्भावादिकार्यमस्तु, व्यलीलिनदित्यत्र पुनरभ्यासे **''दीर्घो लघोः''** (३।३।३६) इति दीर्घः, **''इन्यसमान०''** (३।५।४४) इत्यादिना उपधाया ह्रस्वत्वं च न **स्यात्, समानलोपत्वादिति** ? सत्यमेतत्। प्रकृत्यन्तर**विवक्षायां** व्यलीलिनदिति भवति। यदा तु **लीधातोः क्तेर्नत्वं** विलीनिमकार्षीदिति इनि वृद्धौ कृतायाम् ऐकारस्यासमानस्य लोपस्तदाऽभ्यासे **दीर्घत्वे** उपधाया ह्रस्वत्वे च कृते 'धृतं व्यलीलिनत्' इति भवत्येव। तथा **''वो विधूनने जोऽन्तः''** इत्यपि न वक्तव्यम्, धात्वन्तरेणैव सिद्धत्वादित्याह – पक्षेणेत्यादि। वजतेरपि गत्यर्थत्वात् कम्पनार्थो न भिद्यते। अतः पकारागमनिवृत्त्यर्थं जकारागमो वक्तव्यो नेत्याह – राधातोरित्यादि। **'वा गतिगन्धनयोः'** (२।१७) इत्यस्य विधूनने वृत्तिर्नास्ति, **अनभिधानादि**त्यर्थः। सत्येत्यादि। **''इन् कारितं धात्वर्थे''** (३।२।९) इतीनि कृते चुरादिवचनादावागम इत्यर्थः। कथमित्याह। नामकारितान्नात् पुनर्हेतावित्, साधुश्चेदिति। यदि **शिष्टप्रयोगो** दृश्यते तदैतद् वक्तव्यमिति वाशब्देन **शिष्टप्रयोगादर्शनान्न** वक्तव्यमेवेति सूचयति। **अन्ये** तु आपन**मापस्तं** करोतीति व्युत्पत्त्यर्थो न घटते, तदा वक्तव्यं वेति, कारादिभ्योऽप्य**भिधानादा**वागमो वेदितव्य इति प्रयोजयन्तीति।। ७०४।

## [समीक्षा]

'धूनयति, प्रीणयति' आदि प्रयोगों के सिद्ध्यर्थ दोनों ही व्याकरणों में नकारागम की व्यवस्था की गई है। कातन्त्रकार ने तो साक्षात् सूत्र में ही 'न्' आगम किया है। पाणिनीय व्याकरण में पाणिनि ने एतदर्थ सूत्र नहीं बनाया है, परन्तु महाभाष्यकारादि आचार्यों ने 'नुक्' आगमार्थ वार्त्तिक वचन दिए हैं। काशिकाकार ने कहा है – ''धूञ्प्रीञोर्नुग् वक्तव्यः – धूनयति, प्रीणयति। एते पूर्वान्ता एव क्रियन्ते'' (का० वृ० ७। ३। ३७)। 'नुक्' आगम यतः कित् है, अतः ''आद्यन्तौ टकितौ'' (अ० १। १। ४६) के नियमानुसार 'धू–प्री' के अन्त में ही प्रवृत्त होता है; कातन्त्र में एतदर्थ परिभाषासूत्र न होने के कारण सूत्र में ही 'अन्त' शब्द पढ़ा गया है – ''पातेर्लोऽन्तः'' (३।६।२३), इसकी अनुवृत्ति प्रकृत सूत्र में की जाती है।

## [विशेष वचन]

१. स्नेहद्रवीकरणे लियः कारिते वृत्तिर्वास्ति, अभिधानात् (दु० टी०)।

२. धूञिति क्रैयादिकस्य सौवादिकस्य च ग्रहणमिति भर्तृहरिः (दु० टी०)।

३. 'धू विधूनने, तृप प्रीणने' इति गणनिपातनादनर्थकमिदमित्युक्तम्। न ह्यत्र प्रमाणमस्ति इन्येव निपातनं न युटीति (दु० टी०)।

४. तिप्–निर्देशः पाठसुखार्थ एव (दु० टी०)।

५. कारितविषये न वृत्तिर्नाभिधानमित्यर्थः (दु० टी०)।

६. साधुः प्रयोगश्चेत्, यदि शिष्टप्रयोगो दृश्यते इति भावः (दु० टी०)।

७. ननु मतान्तरेऽपि प्रकृत्यन्तरेण कथन्न भवति, वचनादिति चेत्, तदयुक्तम् (वि० प०)।

८. वा गतिगन्धनयोरित्यस्य विधूनने वृत्तिर्नास्ति, अनभिधानादित्यर्थः (वि० प०)।

९. साधुश्चेदिति यदि शिष्टप्रयोगो दृश्यते तदैतद् वक्तव्यम् इति वाशब्देन शिष्टप्रयोगादर्शनान्न वक्तव्यमेवेति सूचयति (वि० प०)।

## [रूपसिद्धि]

१. **धूनयति।** धू + इन् + अन्+ ति। 'धूञ् कम्पने' (८।१३; ९।२९७) धातु से ''इन् कारितं धात्वर्थे'' (३।२।९) से 'इन्' प्रत्यय, प्रकृत सूत्र से नकारागम, ''ते धातवः'' (३। २। १६) से 'धूनि' की धातुसंज्ञा, वर्तमानासंज्ञक परस्मैपद–प्रथमपुरुष–एकवचन 'ति' प्रत्यय, ''अन् विकरणः कर्तरि'' (३।२।३२) से 'अन्' विकरण, 'न्' अनुबन्ध का प्रयोगाभाव, ''नाम्यन्तयोर्धातुविकरणयोर्गुणः'' (३। ५। १) से इकार को गुण–एकार तथा ''ए अय्'' (१। २। १२) से उसको अयादेश।

२. **प्रीणयति।** प्री + न + इन्, + अन् + ति। 'प्रीञ् तर्पणे कान्तौ च' (८।२) इस धातु से 'इन्' प्रत्यय, प्रकृत सूत्र से नकारागम, ''रषृवर्णेभ्यो नो णमनन्त्यः स्वरहयवकवर्गपवर्गान्तरोऽपि'' (२।४।४८) से नकार को णकार, धातुसंज्ञा, 'ति' प्रत्यय, 'अन्' विकरण, गुण तथा अयादेश।। ७०४।

## ७०५. स्फायेर्वादेशः [३। ६। २५]

## [सूत्रार्थ]

'इन्' प्रत्यय के परे रहते 'स्फायी' धातु के अन्तिम 'य्' वर्ण को 'व्' आदेश होता है।। ७०५।

## [दु० वृ०]

स्फायेरिनि परे वादेशो भवति। स्फावयति। **आगमः स्यादित्यादेश–वचनम्**।। ७०५।

## [दु० टी०]

स्फाये०। **'स्फायी ओ प्यायी वृद्धौ'** (१। ४१३)। वश्चासावादेशश्चेति। न तु वा विकल्पेनादेशो नकार एव युज्यते श्रुतेन कार्येण घटनाद् आगमत्वेन हि यकारस्थितिः स्याद् व्यञ्जनादौ प्रत्यये लोप उच्यते **वररुचिने**त्याह – आगमेत्यादि।। ७०५।

## [वि० प०]

स्फाये०। वश्चासावादेशश्चेति **वादेशः**। आगम इत्यादि। यदि पुनरयमागम एव

स्यात् तदा यकारस्य स्थितिरेव स्यात्। न च ''**य्वोर्व्यञ्जनेऽये**'' (४।१।३५) इति यलोप उपपद्यते, तत्र प्रत्ययव्यञ्जनस्यैव ग्रहणात्। किञ्च न च तच्छर्ववर्मणा कृतमिति।। ७०५।

## [बि० टी०]

**स्फाये**०। ननु वा इत्यादेशः कथं न स्यात्, न देश्यम्। तदा स्फायिर्वेति विदध्यात् किं **षष्ठीनिर्देशेन**। ननु स्फायेर्यो व इति कथन्न कृतम् ? सत्यम्। **विचित्रा हि सूत्रस्य कृतिरिति**।। ७०५।

## [समीक्षा]

'स्फावयति' इत्यादि शब्दरूपों के सिद्ध्यर्थ वकारादेश का विधान दोनों ही व्याकरणों में किया गया है। पाणिनि का सूत्र है – ''स्फायो वः'' (अ० ७।३।४१)। कातन्त्रीय सूत्ररचनाक्रम में यहाँ आगम प्रवृत्त होता, उसके निवारणार्थ सूत्र में ही 'आदेश' शब्द पढ़ा गया है। इस सूत्र में विविध आक्षेपों की उद्भावना वृत्तिकार वररुचि ने की थी। उनका समाधान टीकाकार आदि ने प्रस्तुत किया है। 'स्फायेर्यो वः' ऐसा सूत्र न करके ''स्फायेर्वादेशः'' ऐसा सूत्र बनाए जाने पर आचार्य बिल्वेश्वर ने अपनी प्रतिक्रिया व्यक्त करते हुए कहा है कि सूत्ररचना वस्तुतः विचित्र होती ही है।

## [विशेष वचन]

१. आगमः स्यादित्यादेशवचनम् (दु० वृ०)।

२. व्यञ्जनादौ प्रत्यये लोप उच्यते वररुचिना (दु० टी०)।

३. यदि पुनरयमागम एव स्यात् तदा यकारस्य स्थितिरेव स्यात् (वि० प०)।

४. ननु 'स्फायेर्यो वः' इति कथं न कृतम् ? सत्यम्, विचित्रा हि सूत्रस्य कृतिरिति (बि० टी०)।। ७०५।

## ७०६. शदेरगतौ तः [३।६।२६]

## [सूत्रार्थ]

'इन्' प्रत्यय के परे रहते गतिभिन्न अर्थ में 'शद्' धातु के अन्त्य वर्ण दकार को तकारादेश होता है।। ७०६।

## [दु० वृ०]

शदेरगत्यर्थस्य इनि परे तादेशो भवति। फलानि शातयति। अगताविति किम् ? गाः शादयति, गमयतीत्यर्थः। रुह्यर्थे रुपिरिति व्रीहीन् रोपयति, कार्यमध्यारोपयति, अर्थं समारोपयति। रुहेस्तु रोहयति, आरोहयति हस्ती हस्तिपकम्।। ७०६।

## [दु० टी०]

शदे०। ननु किमर्थमिदम् **'शद्लृ शातने'** (१।५६३) इत्यत्र निपातनात् तकारो भविष्यति। अगताविति वचनाद् गतौ मा भूदिति चेत्, न। अगतावेव शातनशब्दस्य

**रूढित्वात्** शादयति **संशयनिवृत्त्यर्थम्** तर्हि किं युट्येव तकार उत अन्यत्रापीति—गाः शातयति। गमयति चालयति गोपालको दण्डेन। रुहेः पो वेति वक्तव्यम्, नेत्याह — रुह्यर्थे रुपिरित्यादि। **'रुप लुप विमोहने'** (३।७२) दिवादौ, सोऽपि प्रादुर्भावार्थो भविष्यति न विमोहनार्थः — **अनेकार्थत्वाद् धातूनाम्** इति मनसि कृत्वाह — कार्यमित्यादि। किञ्च रुहेः पत्वे संशय एव किं **मोहनार्थो**ऽयम्, आहोस्वित् **प्रादुर्भावार्थ** इति। तत्र सामान्यशब्दत्वाद् विशेषार्थं प्रकरणम्, विशेषणं वा परमपेक्षणीयं स्यात्।। ७०६।

## [वि० प०]

शदे०। रुहेरित्यादिना विकल्पं साधयति, ततो रुहेः पो वेति न वक्तव्यमित्यर्थः।। ७०६।

## [समीक्षा]

'शातयति' आदि शब्दरूपों के सिद्ध्यर्थ दोनों ही आचार्यों ने 'शद्' धातुघटित दकार को तकारादेश किया है। दोनों के सूत्र भी समान हैं — ''शदेरगतौ तः'' (अ० ७।३।४२)। गत्यर्थ में तकारादेश के प्रवृत्त न होने से 'गाः शादयति' प्रयोग सिद्ध होता है। शादयति = गमयति।

## [विशेष वचन]

१. रुह्यर्थे रुपिरिति। व्रीहीन् रोपयति, कार्यमध्यारोपयति, अर्थं समारोपयति (दु० वृ०)।

२. अगतावेव शातनशब्दस्य रूढित्वात् (दु० टी०)।

३. रुप लुप विमोहने दिवादौ, सोऽपि प्रादुर्भावार्थो भविष्यति न विमोहनार्थः, अनेकार्थत्वाद् धातूनाम् (दु० टी०)।

४. 'रुहेस्तु' इत्यादिना विकल्पं साधयति, ततो 'रुहेः पो वा' इति न वक्तव्यम् (वि० प०)।

## [रूपसिद्धि]

१. **शातयति।** शद् + इन् + अन् + ति। 'शद्लृ विशरणगत्यवसादनेषु' (१। ५६३) 'शद्लृ शातने' (५। ५९) धातु से गतिभिन्न अर्थ में ''इन् कारितं धात्वर्थे'' (३।२।९) सूत्र द्वारा 'इन्' प्रत्यय, 'न्' अनुबन्ध का प्रयोगाभाव, प्रकृत सूत्र से धातुघटित दकार को तकार, ''अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिचट्सु'' (३। ६। ५) से धातु में उपधासंज्ञक अकार को दीर्घ आकार, ''ते धातवः'' (३।२।१६) से 'साति' की धातुसंज्ञा, वर्तमानासंज्ञक परस्मैपद — प्र० पु० — ए० व० 'ति' प्रत्यय, ''अन् विकरणः कर्तरि'' (३। २। ३२) से 'अन्' विकरण, 'न्' अनुबन्ध का प्रयोगाभाव, ''नाम्यन्तयोर्धातुविकरणयोर्गुणः'' (३। ५। १) से इकार को गुण—एकार तथा ''ए अय्'' (१। २। १२) से उसको अयादेश।। ७०६।

## ७०७. हन्तेस्तः [३। ६। २७]

### [सूत्रार्थ]

'इन्' प्रत्यय के परे रहते 'हन्' धातु के अन्तिम नकार को तकार आदेश होता है।। ७०७।

### [दु० वृ०]

हन्तेर्नकारस्य तादेशो भवति इनि परे। घातयति। **पुनस्तग्रहणं गत्यर्थम्,** तेन गां घातयति। गमयतीत्यर्थः।। ७०७।

### [दु० टी०]

हन्ते०। एकवर्णत्वादन्तस्य नकारस्य भविष्यति, तिब्निर्देशः **सुखार्थ** एव। जंघानयतीति हेताविन्, **चेक्रीयितलुगन्तस्य भाषायामप्रयोगात्**। एवमुत्तरत्र सूत्रेऽपि।। ७०७।

### [बि० टी०]

हन्ते०। पुनस्तग्रहणमिति। ननु तग्रहणं तथापि व्यर्थम्, तग्रहणाभावे यद्यगताविति प्रवर्त्तिष्यते, तदा एकयोगमेव कुर्यात्। तस्माद् भिन्नयोगसामर्थ्यादेव न वर्त्तिष्यते इति चेत्, न। एकयोगे हि अगतावित्यनेन सह धातुना सम्बध्यते न शद्धातुना। सिद्धपक्षे तु शदधातोरेव सूचितत्वात्। अगतिग्रहणसामर्थ्यादेव शद्धातुना सम्बध्यते, एकयोगेन धातोर्गत्यर्थत्वात् तेनैव सम्बध्यते। तकारोऽयं सस्वरः कथं न स्यात्, अनोऽनेकवर्णः सर्वस्येति न्यायात् समुदायस्य भवति। नैवम्, परसूत्रे हन्तेर्हस्य घविधानात्। यदि समुदायस्य भविष्यति, तदा इनि परतो हन्धातोर्घकाराभावः।। ७०७।

### [समीक्षा]

'घातयति' आदि शब्दरूपों के सिद्ध्यर्थ दोनों ही आचार्यों ने 'हन्' धातु के अन्तिम 'न्' वर्ण को 'त' आदेश किया है। पाणिनि का सूत्र है – ''हनस्तोऽचिण्णलोः'' (अ० ७।३।३२)।

### [विशेष वचन]

१. पुनस्तग्रहणं गत्यर्थम्, तेन 'गां' घातयति'। गमयतीत्यर्थः (दु० वृ०)।

२. तिब्निर्देशः सुखार्थ एव (दु० टी०)।

३. चेक्रीयितलुगन्तस्य भाषायामप्रयोगात् (दु० टी०)।

४. तकारोऽयं सस्वरः कथन्न स्यात्। अतः 'अनेकवर्णः सर्वस्य' इति न्यायात् समुदायस्य भवति (बि० टी०)।

### [रूपसिद्धि]

१. **घातयति।** हन् + इन् + अन् + ति। 'हन् हिंसागत्योः' (२।४) धातु से ''धातोश्च हेतौ'' (३।२।१०) से 'इन्' प्रत्यय, प्रकृत सूत्र से नकार को तकार, ''हस्य

हन्तेर्घिरिनिचोः'' (३। ६। २८) से हकार को घकार, ''अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिचट्सु'' (३। ६। ५), से उपधादीर्घ, ''ते धातवः'' (३। २। १६) से 'घाति' की धातुसंज्ञा, वर्तमानाविभक्तिसंज्ञक परस्मैपद – प्र० पु० –ए० व० 'ति' प्रत्यय, ''अन् विकरणः कर्तरि'' (३। २। ३२) से 'अन्' विकरण, ''नाम्यन्तयोर्धातुविकरणयोर्गुणः'' (३। ५। १) से इकार को गुण–एकार तथा ''ए अय्'' (१। २। १२) से उसको अयादेश।। ७०७।

## ७०८. हस्य हन्तेर्घिरिनिचोः [३। ६। २८]

### [सूत्रार्थ]

'इन्' तथा 'इच्' प्रत्यय के परे रहते 'हन्' धातुघटित हकार को 'घि' आदेश होता है।। ७०८।

### [दु० वृ०]

हन्तेर्हस्य घिर्भवति इनिचोः परयोः। घातयत्ति, अघानि। हान्तस्य धातोर्विशेषणं स्याद् इति पुनर्हन्तिग्रहणम्, तेन बृंहयति।। ७०८।

### [दु० टी०]

हस्य०। हन्तिरपीह श्रूयते हकारश्च, तत्र प्राधान्यान्निमित्तेन हकार एवाभिसम्बध्यते गुणीभूतो हन्तिरित्याह – हन्तेर्हस्येत्यादि। घातयति, अघानीति। सत्यपि **'सप्तम्या निर्दिष्टे पूर्वस्य'** (का० परि० २१) इति वचनप्रामाण्यादनशब्दव्यवधानेऽपि भवति, यद्येवं 'हननीयकः' इति अनीयेनापि वुणि व्यवहिते प्राप्नोति लोप इन इहेति। नैवम्, **'सप्तम्या निर्दिष्टे पूर्वस्य'** (का० परि० २१) इति शब्दान्तरव्यवधाननिवृत्त्यर्थं भविष्यति, अथवा प्रधानस्योपकारविशेषसम्पादनायानपेक्षितप्रधानसम्बन्धस्य हन्तेरिनिच्प्रत्ययाभ्यां सम्बन्धः स्यात्। ततः प्राप्तस्वार्थेन प्रधानस्य हन्तेरिनिच्परस्य घिरिति **''इचि च''** (३।४।६६) इति सिद्धे चकारेणाधिकृतः इननुकृष्यते। किन्नाम लाघवम् – उक्तसमुच्चयं वा चकारं मन्यते **बालः**।। ७०८।

### [समीक्षा]

'घातयति, घातकः, घ्नन्ति' इत्यादि शब्दों में हकार को घकार आदेश दोनों ही आचार्यों ने किया है। कातन्त्रकार ने साक्षात् ही घकार का उल्लेख किया है, जबकि पाणिनि कवर्गादेश से घकारादेश करते हैं – ''हो हन्तेर्ञ्णिन्नेषु'' (अ० ७। ३। ५४)। पाणिनि तथा शर्ववर्मा दोनों ने भिन्न–भिन्न दशाओं में घकारादेश के लिए तीन–तीन सूत्र बनाए हैं।

### [विशेष वचन]

१. हान्तस्य धातोर्विशेषणं स्यादिति पुनर्हन्तिग्रहणम् (दु० वृ०)।

२. किन्नाम लाघवम्, उक्तसमुच्चयं वा चकारं मन्यते बालः (दु० टी०)।

## [रूपसिद्धि]

१. **घातयति**। हन् + इन् + अन् + ति। 'हन् हिंसागत्योः' (२।४) धातु से इन् प्रत्यय तथा अग्रिम समस्त प्रक्रिया के लिए द्रष्टव्य—रूपसिद्धि, सूत्र—सं० ७०७।

२. **अघानि**। अट् + हन् + इच् + त। 'हन हिंसागत्योः' (२।४) धातु से अद्यतनीविभक्तिसंज्ञक आत्मनेपद—प्र० पु०—ए० व० — 'त' प्रत्यय, "अड् धात्वादेर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु" (३। ८। १६) से धातुपूर्व अडागम, "भावकर्मणोश्च" (३। २। ३०) से 'इच्' प्रत्यय, प्रकृत सूत्र से हकार को घकार, "अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिचट्सु" (३। ६। ५) से उपधा—अकार को दीर्घ तथा "इचस्तलोपः" (३। ४। ३२) से 'त' प्रत्यय का लोप॥ ७०८।

## ७०९. लुप्तोपधस्य च [३। ६। २९]

## [सूत्रार्थ]

'हन्' धातु की उपधा का लोप होने पर हकार को घकार आदेश होता है॥ ७०९।

## [दु० वृ०]

हन्तेर्लुप्तोपधस्य च हस्य घिर्भवति। घ्नन्ति, आघ्नते। लुप्तोपधस्येति किम् ? क्लेशापहः, तमोऽपहः॥ ७०९।

## [दु० टी०]

लुप्तो०। **"अपात् क्लेशतमसोः"** (४। ३। ५१) इति 'ड' प्रत्ययेऽन्त्यस्वरादिलोपः। अथ समुदायलोपेऽवयवस्यापि लोप इति चेत् तदा अलोपस्येति विदध्यात्॥ ७०९।

## [वि० प०]

लुप्तो०। आघ्नते इत्यादि। **"आङो यमहनौ स्वाङ्गकर्मकौ च"** (३।२।४२—२२) इति रुचादित्वादात्मनेपदम्। **"आत्मने चानकारात्"** (३। ५। ३९) इति नलोपः, **"गमहन०"** (३।६।४३) इत्यादिनोपधालोपः, **"लुप्तोपधस्य"** (३। ६।२९) इत्यादि, **"अपात् क्लेशतमसोः"** (४।३।५१) इति 'ड' प्रत्यये कृते डानुबन्धेऽन्त्यस्वरादिलोपः, न तूपधाया इत्यर्थः। अथ समुदायस्य लोपेऽवयवस्यापि लोपः प्राप्नोतीति ? नैवम्, तदा 'लुप्तातः इति विदध्यात्। लुप्तोऽत् यस्येत्युक्तेऽर्थादुपधालोपो भविष्यति, तस्मान्नूपधा—मात्रस्यैव लोपे यथा स्यादित्यदोषः॥ ७०९।

## [समीक्षा]

'घ्नन्ति, घ्नन्तु, आघ्नते' इत्यादि शब्दरूपों के सिद्ध्यर्थ हकार को घकारादेश दोनों ही व्याकरणों में किया गया है। पाणिनि का सूत्र है — "हो हन्तेर्ञ्णिन्नेषु" (अ० ७।३।५४)। 'हन्' धातु में तीन वर्ण हैं — ह् + अ + न्। 'ह्' के बाद 'न्' तभी रह सकता है, जब उपधासंज्ञक 'अ' का लोप हो जाए। कातन्त्रकार ने 'उपधालोप' का ही

उल्लेख किया है, परन्तु पाणिनि ने 'ह्' के बाद 'न्' को निमित्त माना है। इस प्रकार दोनों के तात्पर्य में समानता होने के कारण किसी में लाघव–गौरव नहीं कहा जा सकता।

## [विशेष वचन]

१. समुदायलोपेऽवयवस्यापि लोप इति चेत् तदा अलोपस्येति विदध्यात् (दु० टी०)।

२. अथ समुदायस्य लोपेऽवयवस्यापि लोपः प्राप्नोतीति ? नैवम्, तदा 'लुप्तातः' इति विदध्यात् (वि० प०)।

## [रूपसिद्धि]

१. **घ्नन्ति**। हन् + अन्लुक् + अन्ति। 'हन् हिंसागत्योः' (२।४) धातु से वर्तमानाविभक्तिसंज्ञक परस्मैपद–प्र० पु०–ब० व० 'अन्ति' प्रत्यय "अन् विकरणः कर्तरि" (३।२।३२) से 'अन्' विकरण, "अदादेर्लुग् विकरणस्य" (३।४।९२) से उसका लुक्, "गमहनजनखनघसामुपधायाः स्वरादावनण्यगुणे" (३। ६। ४३) से 'हन्' धातु में उपधासंज्ञक अकार का लोप तथा प्रकृत सूत्र से हकार को घकार आदेश।

२. **आघ्नते**। आ + हन् + अन्ते। 'आङ्' उपसर्गपूर्वक 'हन् हिंसागत्योः' (२।४) धातु से वर्तमानासंज्ञक आत्मनेपद–प्र० पु०–ब०व० 'अन्ते' प्रत्यय, अन् विकरण का लुक्, उपधालोप, प्रकृत सूत्र से हकार को घकार तथा 'अन्ते' प्रत्ययघटित नकार का लोप।। ७०९।

# ७१०. अभ्यासाच्च [३। ६। ३०]

## [सूत्रार्थ]

अभ्यास से परवर्ती 'हन्' धातु के हकार को घकार आदेश होता है।। ७०१।

## [दु० वृ०]

हन्तेरभ्यासाच्च परस्य हस्य घिर्भवति। **जघान**, जङ्घन्यते, जिघांसति। हन्तेरभ्यासादिति किम् ? हननीयितुमिच्छति **जिहननीयिषति**। हेरचणीति वक्तव्यम् – जिघीषति, प्रहायितुमिच्छति **प्रजिघायियिषति**। अचणीति वचनात् प्राजीहयत्।। ७१०।

## [दु० टी०]

अभ्या०। हन्तेरभ्यासादिति। **यद्यपि** हन्तिना हकारो विशिष्यते तथापि श्रुतत्वादभ्यासोऽवयवोऽपि हन्तेरेव गृह्यते **इति भावः**। जिहननीयिषतीति। हन्तेर्युट्, युडन्ताद् यिन्, यिनन्तात् सन्, सनन्तस्याभ्यासस्यावयवोऽयं कुतः प्रसङ्गः। **अन्य** आह–हन्तिनाऽभ्यासो विशिष्यते हन्तेरभ्यासादिति। **इतर** आह – हन्तेस्तावद् द्विर्वचनम् एतद् यस्य च द्विर्वचनं तस्य द्विरुक्तस्य यः पूर्वः सोऽभ्यासस्तत्र। हन्तेरिति। **तिङ्निर्देशः स्वरूपग्राहक** इति मनसि कृत्वाह – हन्तेरभ्यासादिति। **अपर** आह – **यद्यपि चाभ्याससंज्ञायां** प्रत्ययस्याव्यापारस्तथापि योऽसौ द्विरुक्तपूर्वस्तं प्रत्यस्ति निमित्तभावः, स चाभ्यास **इति**

तस्मिन् प्रत्ययेऽनन्तरोऽनुमीयते इति। अत्रापि गव्यूतिं जङ्घन्यते, कुटिलं गच्छतीति। गत्यर्थात् **कौटिल्ये** एवेति यशब्दः। हेरचणीति। **'हि गतौ'** (४।११) इत्यस्य योऽभ्यासस्तत उत्तरस्य हस्याभ्यासनिमित्ते प्रत्यये भवति। यद्येवम्, अचणीति किमर्थम्, इना व्यवहितत्वान्न भविष्यति लुप्तस्यापि स्थानिवद्भावात्, तर्हि ज्ञापयति – कारितस्यापि प्रकृतिग्रहणेन ग्रहणमित्याह – हेरचणीति वचनादिति। **वक्तव्यं व्याख्येयम्।** हिनोत्यर्थे घिधातुरस्ति, द्विर्वचननिमित्ते हिनोतेश्चाप्रयोगोऽ**भिधानाद**त्रेति।।७१०।

## [वि० प०]

अभ्यासात्०। हन्तेरभ्यासादित्यादि। यद्यपि हन्तेरित्येकेयं षष्ठी हन्तेर्हस्येति चरितार्था, तथापि श्रुतत्वाद् हन्तेरेवाभ्यासात् परस्य स्यादिति। इह तु हन्तेर्युडन्ताद् यिनन्तात् सन्, ततः सनन्तस्य धात्वन्तरस्य योऽभ्यास इति कुतः प्रसङ्गः। हेरित्यादि। **'हि गतौ'** (४। ११) इत्यस्य योऽभ्यासस्तत उत्तरस्य हकारस्याभ्यासनिमित्ते प्रत्यये चण्वर्जिते परे घो भवति। इह चणो वर्जनाद् इना व्यवहितेऽपि द्विर्वचननिमित्ते प्रत्यये भवति। प्रजिघाययिषतीति। अन्यथा हि इनमन्तरेण चण् नास्तीति व्यवहितत्वान्न भविष्यतीति लुप्तस्यापीनः स्थानिवद्भावात् किं निषेधेनेति। प्राजीहयदिति। पूर्ववद् **''इन्यसमानलोपोपधाया ह्रस्वश्चणि''** (३।५।४४) इत्यादिना ह्रस्वादिकं कार्यम्। वक्तव्यमिति। **वक्तव्यं व्याख्येयम्।** इह हिनोत्यर्थे घिरिति धात्वन्तरमेवेति वेदितव्यम्, द्विर्वचननिमित्तप्रत्यये हिनोतेश्चाप्रयोगोऽ**नभिधानादि**ति।। ७१०।

## [समीक्षा]

'जघान्, जिघांसति, जङ्घन्यते' शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में हकार को घकारादेश किया गया है। पाणिनि का सूत्र है – ''अभ्यासाच्च'' (अ० ७।३।५५)। इसमें ''चजोः कु घिण्ण्यतोः'' (अ० ७।३।५२) द्वारा 'कु' की अनुवृत्ति होने से 'हन्' धातु के हकार को कवर्गादेश प्रवृत्त होता है। कु = कवर्ग में यतः ५ वर्ण है, अतः 'क्–ख्–ग्–ङ्' इन चार वर्णों की निवृत्ति तथा 'घ्' की प्रवृत्ति के लिए 'स्थान–प्रयत्न' मिलाने का जो व्यायाम करना पड़ता है, उसकी तुलना में कातन्त्रीय विधान सरल तथा लाघव का बोधक कहा जा सकता है।

## [विशेष वचन]

१. तिङ्निर्देशः स्वरूपग्राहकः (दु० टी०)

२. गव्यूतिं जङ्घन्यते। कुटिलं गच्छतीति गत्यर्थात् कौटिल्ये एवेति यशब्दः (दु० टी०)।

३. वक्तव्यं व्याख्येयम्। हिनोत्यर्थे घिधातुरस्ति द्विर्वचननिमित्ते हिनोतेश्चाप्रयोगोऽ–भिधानादत्र (दु० टी०)।

४. इह हिनोत्यर्थे घिरिति धात्वन्तरमेवेति वेदितव्यम्, द्विर्वचननिमित्तप्रत्यये हिनोतेश्चाप्रयोगोऽनभिधानादिति (वि० प०)।

## [रूपसिद्धि]

१. **जघान।** हन् + अन्लुक् + परोक्षा – अट्। 'हन् हिंसागत्योः' (२।४) धातु से परोक्षाविभक्तिसंज्ञक परस्मैपद–प्रथमपुरुष–एकवचन 'अट्' प्रत्यय, "अन् विकरणः कर्तरि" (३।२।३२) से 'अन्' विकरण, "अदादेर्लुग् विकरणस्य" (३।४।९२) से उसका लुक्, "चण्परोक्षाचेक्रीयितसनन्तेषु" (३।३।७) से धातु का द्विर्वचन, अभ्याससंज्ञा, "अभ्यासस्यादिर्व्यञ्जनमवशेष्यम्" (३।३।९) से 'न्' का लोप, "हो जः" (३। ३। १२) से अभ्यासस्थ हकार को जकार, प्रकृत सूत्र से हन्धातुघटित हकार को घकार तथा "अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिचट्सु" (३। ६। ५) से उपधासंज्ञक अकार को दीर्घ आदेश।

२. **जङ्घन्यते।** हन् + चेक्रीयित–य + ते। 'हन् हिंसागत्योः' (२।४) से पुनः पुनरतिशयेन वा हन्ति–इस अर्थ की विवक्षा में "धातोर्यशब्दश्चेक्रीयितं क्रियासमभिहारे" (३। २। १४) से चेक्रीयितसंज्ञक 'य' प्रत्यय, "चण्परोक्षाचेक्रीयितसनन्तेषु" (३।३।७) से धातु को द्विर्वचन, अभ्याससंज्ञा, नलोप, हकार को जकार, "अतोऽन्तोऽनुस्वारोऽनुनासिकान्तस्य" (३।३।३१) से अभ्यासस्थ अकार के बाद अनुस्वार का आगम, प्रकृत सूत्र से हकार को घकार, अनुस्वार को परसवर्ण ङकार, "ते धातवः" (३।२। १६) से 'जङ्घन्य' की धातुसंज्ञा तथा वर्तमानाविभक्तिसंज्ञक आत्मनेपद – प्र० पु० – ए० व० 'ते' प्रत्यय।

३. **जिघांसति।** हन् + सन् + ति। 'हन् हिंसागत्योः' (२। ४) धातु से 'हन्तुमिच्छति' अर्थ में "धातोर्वा तुमन्तादिच्छतिनैककर्तृकात्" (३। २। ४) से 'सन्' प्रत्यय, द्विर्वचन, ह् को ज्, "सन्यवर्णस्य" (३।३।२६) से जकारोत्तरवर्ती अकार को इकार, ह् को घ्, उपधादीर्घ, नकार को अनुस्वार, धातुसंज्ञा तथा 'ति' प्रत्यय ।। ७१०।

## ७११. जेर्गिः सन्परोक्षयोः [३। ६। ३१]

## [सूत्रार्थ]

'सन्' प्रत्यय तथा परोक्षासंज्ञक प्रत्यय के परे रहते 'जि' धातुगत जकार को गकारादेश होता है।। ७११।

## [दु० वृ०]

जयतेः सन्परोक्षयोर्गिर्भवति। जिगीषति, जिगाय, विजिग्ये। जिनातेर्लक्षणिकत्वात् जिधातुः।। ७११।

## [दु० टी०]

जेः। जिनातेरित्यादि। ग्रह्यादिसूत्रेण सम्प्रसारणे सति प्राप्नोतीति भावः। ननु **"तद् दीर्घमन्त्यम्"** (४।१।५२) इति दीर्घत्वे कृते जीशब्दोऽयम् ? सत्यम्, एकदेशविकृतस्यानन्यत्वाज्जिशब्द एवायम्। अथवा रूपप्रधानोऽयं निर्देशो जेरिति। यत्र ङसिङसोरलोपः

सम्भवतीति। ननु चात्राकारलोपेन भवितव्यम्, कुतः स्वरत्वम् ? सत्यम्। आकारलोपो द्विर्वचनमपेक्षते स्वरविधित्वात्। अयं पुनः प्रागेव प्राप्नोति। ननु **''अभ्यासाच्च''** (३। ६। ३०) इति वर्तयिष्यामस्तर्हि **प्रतिपत्तिगौरवं** स्यात्।। ७११।

## [वि० प०]

जेर्गि०। विजिग्ये इति। **''विपरिभ्यां जिः''** (३।२।४२—३) इति रुचादिवचना—दात्मनेपदम्। जिज्यतुरिति। **'ज्या वयोहानौ'** (८।३३), अतुस्। अत्राकारलोपः स्वर—विधित्वाद् द्विर्वचनमपेक्षते। सम्प्रसारणं तु निरपेक्षमिति ग्रह्यादिवचनात् तदेव भवति, **तस्मिन्** कृते जिशब्दस्य प्राप्नोतीति लाक्षणिकत्वादित्युच्यते। अथ **''तद् दीर्घमन्त्यम्''** (४।१।५२) इति दीर्घत्वे सति जीशब्दोऽयं वर्तते। तथाप्येकदेशविकृतस्यानन्यवद्भावादिति **स्यात्, द्विर्वचने** कृते **''य इवर्णस्या०''** (३। ४। ५८) इत्यादिना यत्वम्।। ७११।

## [समीक्षा]

'जिगाय, जिगीषति, विजिग्ये' इत्यादि शब्दरूपों के सिद्ध्यर्थ जकार को गकारादेश दोनों ही आचार्य करते हैं। पाणिनि का सूत्र है – ''सन्लिटोर्जेः'' (अ० ७। ३। ५७)। कातन्त्रकार ने साक्षात् 'ज्' को 'ग्' आदेश किया है, जब कि पाणिनि ने कवर्गादेश। कवर्ग के अन्य चार वर्णों के निरासार्थ स्थान – प्रयत्नों की एकरूपता का पाणिनीय व्याकरण में जो अतिरिक्त उद्यम करना पड़ता है, उससे उसका गौरव सुनिश्चित हो जाता है।

## [विशेष वचन]

१. जिनातेर्लाक्षणिकत्वाद् 'जिज्यतुः' (दु० वृ०)।

२. ननु अभ्यासाच्चेति वर्तयिष्यामस्तर्हि प्रतिपत्तिगौरवं स्यात् (दु० टी०)।

## [रूपसिद्धि]

१. **जिगीषति।** जि + सन् + ति। जेतुमिच्छति। 'जि जये' (१। १९१) धातु से इच्छार्थ में ''धातोर्वा तुमन्तादिच्छतिनैककर्तृकात्'' (३।२।४) से 'सन्' प्रत्यय, प्रकृत सूत्र से जकार को गकार, ''चण्परोक्षाचेक्रीयितसन्तेषु'' (३।३।७) से धातु को द्वित्व, अभ्याससंज्ञा, गकार को जकार, ''स्वरान्तानां सनि'' (३। ८। १२) से धातुगत इकार को दीर्घ तथा ''नामिकरपरः प्रत्ययविकारागमस्थः सिः षं नुविसर्जनीयषान्तरोऽपि'' (२।४।४७) से सकार को षकारादेश।

२. **जिगाय।** जि + परोक्षा—अट्। 'जि जये' (१। १९१) धातु से परोक्षाविभक्ति—संज्ञक परस्मैपद—प्र० पु० — ए० व० 'अट्' प्रत्यय, प्रकृत सूत्र से जकार को गकार, धातु को द्वित्व, अभ्याससंज्ञा, 'ग्' को 'ज्' ''अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिचट्सु'' (३। ६। ५) से इकार को वृद्धि—ऐकार तथा ''ऐ आय्'' (१। २। १३) से ऐकार को 'आय्' आदेश।

३. **विजिग्ये।** वि + जि + परोक्षा—ए। 'वि' उपसर्गपूर्वक 'जि जये' (१। १९१)

धातु से परोक्षासंज्ञक 'ए' प्रत्यय, प्रकृत सूत्र से जकार को गकार, द्विर्वचन, अभ्याससंज्ञा, तथा ''इवर्णो यमसवर्णे न च परो लोप्यः'' (१। २। ८) से इकार को यकारादेश।। ७११।

## ७१२. चेः कि वा [३। ६। ३२]

### [सूत्रार्थ]

'सन्' प्रत्यय तथा परोक्षाविभक्तिसंज्ञक प्रत्यय के परे रहते 'चि' धातुगत चकार को ककार आदेश होता है।। ७१२।

### [दु० वृ०]

चित्रः सन्परोक्षयोः परतः किर्भवति वा। चिकीषति, चिचीषति। चिकाय, चिचाय। चिक्ये, चिच्ये। 'कि कित ज्ञाने' परस्मैपदीति वचनम्।। ७१२।

### [दु० टी०]

चेः। उत्तरत्र सूत्रे वाशब्दो न वर्तते, **अधिकारस्येष्टत्वात्**।। ७१२।

### [समीक्षा]

'चिकीषति, चिचीषति' आदि प्रयोगों के साधनार्थ चकार को ककारादेश दोनों ही शाब्दिक आचार्यों ने किया है। पाणिनि का सूत्र है—''विभाषा चेः'' (अ० ७। ३। ५८)। उक्त सूत्रों की समीक्षा के अनुसार यहाँ भी यह ज्ञातव्य है कि कातन्त्रकार ने तो च् को क् आदेश ही किया है, परन्तु पाणिनि ने कवर्गादेश। जिसमें कवर्गीय अन्य ४ वर्णों के निरासार्थ स्थान—प्रयत्न की समानताहेतु एक अतिरिक्त उद्यम करना पड़ता है। प्रकृत सूत्रपठित 'चा' शब्द का अधिकार उत्तरवर्ती सूत्र में नहीं जाता है, क्योंकि कोई भी अधिकार ग्रन्थकार के तात्पर्य के अनुसार ही प्रवृत्त होता है—'अधिकार स्येष्टत्वात्' (दु० टी०)।

### [रूपसिद्धि]

१. **चिकीषति, चिचीषति।** चि + सन् + ति। चेतुमिच्छति। 'चिञ् चयने' (४। ५) धातु से इच्छार्थ में सन् प्रत्यय, प्रकृत सूत्र से चकार को वैकल्पिक ककार आदेश, द्वित्व, अभ्याससंज्ञा, ककार को चकार, धातुगत इकार को दीर्घ, मूर्धन्यादेश, धातुसंज्ञा तथा वर्तमानासंज्ञक 'ति' प्रत्यय। ककारादेश के अभाव में 'चिचीषति' रूप साधु माना जाता है।

२. **चिकाय, चिचाय।** चि + परोक्षा—अट्। 'चि' धातु से परोक्षाविभक्तिसंज्ञक 'अट्' प्रत्यय, चकार को वैकल्पिक ककार, द्विर्वचन, अभ्याससंज्ञा, 'क्' को 'च्', इकार की वृद्धि तथा ऐकार का आय् आदेश। ककारादेश के अभाव में 'चिचाय' रूप साधु माना जाता है।

३. **चिक्ये, चिच्ये।** चि + परोक्षा ए। 'चि' धातु से परोक्षासंज्ञक 'ए' प्रत्यय, चकार को ककारादेश, द्विर्वचन, क् को च् तथा धातुगत इकार को यकारादेश। ककारादेश के अभाव में 'चिच्ये' रूप बनता है।। ७१२।

## ७१३. सणोऽलोपः स्वरेऽबहुत्वे [३। ६। ३३]

### [सूत्रार्थ]

बहुवचन से भिन्न प्रत्ययस्य स्वर के परे रहते 'सण्' प्रत्यय के अकार का लोप होता है।। ७१३।

### [दु० वृ०]

सणोऽकारस्याबहुत्वे स्वरे लोपो भवति। अधुक्षाताम्, अधुक्षाथाम्, अधुक्षि। स्वर इति किम् ? अधुक्षत। अबहुत्व इति किम् ? अधुक्षन्त। अकारान्तत्वान्नलोपे न स्यात्।। ७१३।

### [दु० टी०]

सणो०। लोपः सणश्चेत् कथमकारस्य वर्णान्तस्य विधिरिति चेत्, न। प्रत्ययस्य सर्वापहारी लोप इत्याह—अकारस्येति। सणःअलोपः **सणोऽलोपः** इत्यकारप्रश्लेषात् 'अधुक्षाताम्, अधुक्षाथाम्' इति सणोऽकारलोपे **''आदातामाथामादेः''** (३। ६। ६२) इतीत्त्वं न स्यात्। अधुक्षीति। इवर्णे एत्वं न स्यात्। अधुक्षन्तेति। **''असन्ध्यक्षरयोरस्य तौ तल्लोपश्च''** (३। ६। ४०) इति निमित्ताकारालोप इत्याह—अकारान्तत्वादिति। दुहदिहलिहगुहां तवर्गवकारयोरात्मनेपदे वा सणो लोपो क्तव्यः। अदुग्ध, अधुक्षत, अदुग्धाः, अधुक्षथाः, अदुग्ध्वम्, अधुक्षध्वम्, अदुह्वहि, अधुक्षावहि। एवम् अदिग्ध, अधिक्षत, अदिह्वहि, अधिक्षावहि, अलीढ, अलिक्षत, अलिह्वहि, अलिक्षावहि। अगूढ, अघुक्षत, अगुह्वहि, अघुक्षावहि। तन्न वक्तव्यम्, सणोऽलोप इत्येकयोगो व्यवस्थितवाधिकाराद् दर्शितविषय एव भविष्यति। ततः स्वरेऽबहुत्वेऽत्र 'सणः' इत्यवयव—सम्बन्धे षष्ठी प्रतिपत्तव्या। सणोऽवयवस्य स्वरेऽनन्तरे लोपो भवति, अर्थादकारस्यैव नित्यं **'प्रत्ययलोपे प्रत्ययलक्षणम्'** (का० परि० ५२) इति णकारानुबन्धत्वाद् गुणो न भवति। मतमन्यत्। **''अद्यतन्याशिषोश्चात्मने''** इति पठन्ति **एके।** 'आत्मनेपदे' इति विषयसप्तमी। दुहदिहलिहगुहामात्मने वतवर्गयोः पक्षे सण्, सिजपि न भवति, तत्र व्यवस्थितवाधिकारात्।। ७१३।

### [वि० प०]

सणः। अधुक्षाताम्, अधुक्षाथाम् इति। दुहः शिडन्तात् सण्, **''दादेर्घः''** (३। ६। ५७) इति हकारस्य घत्वम्। **''तृतीयादेर्ढधभान्तस्य''** (३। ६। १००) इत्यादिना दकारस्य धत्वम्। अधुक्षीति। उत्तमपुरुषस्यैकवचनमिति सणोऽकारलोपे **''आदातामाथामादेः''** (३। ६। ६२) इतीत्त्वम्, **''अवर्ण इवर्णे ए''** (१। २। २) इत्येत्त्वं न स्यात्। नलोपो न स्यादिति **''आत्मने चानकारात्''** (३। ५। ३९) इत्यनेन यः प्राप्त इत्यर्थः।। ७१३।

### [बि० टी०]

सणः। ननु समुदायस्य सणो लोपः कथन्न स्यादिति न देश्यम्, तदा 'सण् लोप्यः' इति कुर्यात्, तर्हि अबहुत्वे कि प्रमाणम्, बहुत्वे स्वरे भवतीत्यर्थः कथन्न

स्यादिति चेत्, न। सण्निमित्तको बहुत्वस्वरोऽद्यतन्याः प्रथपुरुषस्य बहुवचनम् अन्, आत्मनेपदस्य प्रथमपुरुषस्य बहुवचनम्– 'अन्त'। तत्रानेन प्रयोजनाभावः, असन्ध्यक्षर–विषयत्वादेव न भविष्यति, किन्तेन प्रयोजनमस्ति। कृतेऽनेनाकारलोपे **''आत्मने चानकारात्''** (३। ५। ३९) इति लोपः स्यात्। असन्ध्यक्षरविधौ नकारलोपाभावः। तदा 'अन्ते' इति विदध्यात्, किं बहुत्वे इति व्याप्तिवचनेन तस्माद् बहुवचनेन बोधयति–अबहुत्वे इति। तस्मान्निमित्तसाहचर्यादित्यर्थः। साहचर्याद् वाऽलोप इति **प्रश्लेषः**।। ७१३।

## [समीक्षा]

'अधुक्षाताम्, अधुक्षाथाम्' इत्यादि शब्दरूपों के सिद्ध्यर्थ अद्यतनीविभक्ति के प्रत्यय 'स' में अकार का लोप दोनों व्याकरणों में किया गया है। पाणिनि का सूत्र है– ''क्सस्याचि'' (अ० ७। ३। ७२)। यह ज्ञातव्य है कि पाणिनीय 'अच्' के लिए कातन्त्र में 'स्वर' संज्ञा का तथा पाणिनीय 'क्स' प्रत्यय के लिए कातन्त्र में 'सण्' प्रत्यय का व्यवहार उपलब्ध है। 'क्स' और 'सण्' में क्–ण् अनुबन्धों की योजना अपने अपने व्याकरण में निर्धारित नियम के अनुसार है। पाणिनि 'क्' अनुबन्ध में गुण–वृद्धि का निषेध करते हैं तो कातन्त्रकार को 'ण्' अनुबन्ध में उक्त कार्य अभीष्ट है। अस्तु 'क्स' तथा 'सण्' में क्–ण् अनुबन्धों के अतिरिक्त जो स् + अ = 'स' शेष रह जाता है, उसी के अकार का लोप होता है।

## [विशेष वचन]

१. अकारान्नत्वान्तलोपो न स्यात् (दु० वृ०)।
२. प्रत्ययस्य सर्वापहारी लोपः (दु० टी०)
३. णकारानुबन्धत्वाद् गुणो न भवति (दु० टी०)।

## [रूपसिद्धि]

१. **अधुक्षाताम्।** अट् + दुह् + सण् + आताम्। 'दुह प्रपूरणे' (२। ६१) इस धातु से अद्यतनीविभक्तिसंज्ञक आत्मनेपद–प्र० पु०–द्विव० 'आताम्' प्रत्यय, 'अड् धात्वादिर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु'' (३। ८। १६) से धातुपूर्व अडागम, ''सणनिटः शिडन्तान्नाम्युपधाददृशः'' (३। २। २५) से 'सण्' प्रत्यय, णकार अनुबन्ध का प्रयोगाभाव, ''न णकारानुबन्धचेक्रीयितयोः'' (३। ५। ७) से अगुण, ''दहिदिहिदुहिमिहि–रिहिरुहिलिहिलुहिनहिवहेर्हात्'' (३। ७। ३०) से अनिट्, प्रकृत सूत्र से अकारलोप, ''दादेर्घः'' (३। ६। ५७) से दुह्धातुघटित हकार को घकार, ''तृतीयादेर्घ– ढधभान्तस्य धातोरादिचतुर्थत्वं सध्वोः'' (३। ६। १००) से द् को ध्, ''अघोषेष्वाशिटां प्रथमः'' (३। ८। ९) से घ् को क्, ''नामिकरपरः प्रत्ययविकारागमस्थः सिः षं नुविसर्जनीयषान्तरोऽपि'' (२। ४। ४७) से स् को ष्, 'क् + ष्' वर्णों के संयोग से 'क्ष्' वर्ण।

२. **अधुक्षाथाम्।** अट् + दुह + सण् + आथाम्। 'दुह प्रपूरणे' (२। ६१) धातु से अद्यतनीविभक्तिसंज्ञक 'आथाम्' प्रत्यय, तथा अन्य प्रक्रिया पूर्ववत्।

३. **अधुक्षि।** अट् + दुह् + सण् + इ। 'दुह प्रपूरणे' (२। ६१) धातु से अद्यतनी-विभक्तिसंज्ञक उत्तमपुरुष–ए० व० 'इ' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ७१३।

## ७१४. दरिद्रातेरसार्वधातुके [३। ६। ३४]

### [सूत्रार्थ]

सार्वधातुकभिन्न प्रत्यय के परे रहते 'दरिद्रा' धातु के अन्तिम आकार का लोप होता है।। ७१४।

### [दु० वृ०]

**तिपा धातुरेव निर्दिश्यते**। दरिद्रातेरसार्वधातुकमात्रेऽन्तस्य लोपो भवति। दरिद्रयति, अदरिद्रि, दरिद्रो वर्तते, दरिद्र्यते, दरिद्र्यात्। कथं दरिद्रेयम् ? **''आत्खनोरिच्च''** (४। २। १२) इति यः, परत्वात्। वेति **मण्डूकप्लुत्या** युवोरनिटि सनि च न स्यात्–दरिद्राणम्, दरिद्रायकः, दिदरिद्रासति।। ७१४।

### [दु० टी०]

दरि०। लोपमात्रमत्र सम्बध्यतेऽकारस्यासम्भवात्। स च **'वर्णान्तस्य विधिः'** (का० परि० ५) इत्यन्तस्य भवति। तिपेत्यादि। नान्यत् फलमस्ति, **पाठसुखार्थं** इति भावः। असार्वधातुकमात्र इत्यनन्तरः स्वराधिकारो न प्रयोजयति। दिदरिद्रासतीति प्रयोजनं चेत्, व्यवस्थितवाधिकारात् सिध्यति। **यो**ऽप्याह–वेटामनेकस्वराणामपि निष्ठायामिट्–प्रतिषेधम्, तस्यापि निष्ठायां दरिद्राणमिति आकारलोपो नाभिधीयते, किमुक्तेन **व्यवस्थितविभाषायां** प्रविशतीति। **विषयसप्तम्या** अत्र न प्रयोजनम्। दरिद्रातीति **दरिद्रः**। व्यध्यतीणस्यातां चेति णे अचि वा विशेषाद् अकर्मकत्वादेवातोऽनुपसर्गात् को नास्ति। **''आतश्चोपसर्गे, गुरोश्च निष्ठासेटः''** (४। ५। ८४, ८१) इत्यङ्प्रत्यये, **''आदृभ्यो ग्यदरिद्राते:''** (४। ५। १०४) इत्यत्र दरिद्रातिग्रहणं न कर्तव्यं स्यात्, **प्रतिपत्तिगौरवं च**। किन्न पश्यति दरिद्रेयमिति प्रत्ययान्तरमिष्यते। दरिद्रयतीत्यपि परत्वात् पक्षागमं बाधते। कथम् अदरिद्रायि। व्यवस्थितवाधिकारादेवाद्यतन्यां विभाषा। यथा अदरिद्रीत्, अदरिद्रासीत्। युव्वोरित्युत्सृष्टानुबन्धयोर्ग्रहणम्।। ७१४।

### [वि० प०]

दरिद्रातेः। तिपेत्यादि। नान्यत् किञ्चित् फलमस्ति धातुस्वरूपमेव तिपा **सुखार्थं निर्दिष्टमित्यर्थः**। असार्वधातुकमात्र इति पूर्वसूत्रात् स्वराधिकारो न स्मर्यते इति भावः। दिदरिद्रासतीति। **''इवन्तर्द्ध०''** (३। ७। ३३) इत्यादिना पक्षेऽनिट्।। ७१४।

### [समीक्षा]

'दरिद्रयति, अदरिद्रि, दरिद्रितः, दरिद्रिमः' इत्यादि शब्दरूपों के साधनार्थ 'दरिद्रा' धातुघटित आकारलोप की आवश्यकता होती है। कातन्त्रकार ने इसको पूर्ति स्वतन्त्र

सूत्र द्वारा की है, परन्तु पाणिनीय व्याकरण में एतदर्थ स्वतन्त्र सूत्र नहीं है। महाभाष्यकार आदि व्याख्याकार 'दरिद्रातेरार्धधातुके लोपो वक्तव्यः' (म० भा० ६। ४। ११०) इस वचन को पढ़कर प्रकृत अपेक्षा की पूर्ति करते हैं।

## [विशेष वचन]

१. तिपेत्यादि। नान्यत् फलमस्ति, पाठसुखार्थ इति भावः (दु० टी०)।

२. आद्भ्यो ग्वदरिद्रातेरित्यत्र दरिद्रातिग्रहणं न कर्तव्यं स्यात्, प्रतिपत्तिगौरवं च (दु० टी०)।

३. नान्यत् किञ्चित् फलमस्ति, धातुस्वरूपमेव तिपा सुखार्थं निर्दिष्टमित्यर्थः (वि० प०)

## [रूपसिद्धि]

१. **दरिद्रयति**। दरिद्रा + इन् + ति। 'दरिद्रा दुर्गतौ' (२। ३७) धातु से इन् प्रत्यय, प्रकृत सूत्र से आकार का लोप, धातुसंज्ञा, वर्तमानासंज्ञक 'ति' प्रत्यय, अन् विकरण, इकार को गुण—एकार तथा आयादेश।

२. **अदरिद्रि**। अट् + दरिद्रा + इच् + त। 'दरिद्रा दुर्गतौ' (२। ३६) धातु से अद्यतनीविभक्तिसंज्ञक 'त' प्रत्यय, अडागम, प्रकृत सूत्र से आकार लोप, इच् प्रत्यय तथा तलोप।

३. **दरिद्रः**। दरिद्रा + अच्। दरिद्राति। 'दरिद्रा' धातु से ''अच् पचादिभ्यश्च'' (४। २। ४८) सूत्र द्वारा कर्ता अर्थ में 'अच्' प्रत्यय तथा प्रकृत सूत्र से आकार का लोप।

४. **दरिद्राते**। दरिद्रा + यण् + ते। 'दरिद्रा' धातु से कर्मार्थक वर्तमानासंज्ञक आत्मनेपद—प्र० पु०—ए० व० 'ते' प्रत्यय, ''सार्वधातुके यण्'' (३। २। ३१) से 'यण्' प्रत्यय तथा प्रकृत सूत्र से आकारलोप।

५. **दरिद्र्यात्**। दरिद्रा + यात्। 'दरिद्रा' धातु से आशीर्विभक्तिसंज्ञक 'यात्' प्रत्यय तथा प्रकृत सूत्र से आकार का लोप।। ७१४।

## ७१५. व्रश्चिमस्जोर्धुटि [३। ६। ३५]

## [सूत्रार्थ]

धुट्संज्ञक वर्ण के परे रहते 'व्रश्च्—मस्ज्' धातुओं के अन्तिम वर्ण का लोप होता है।। ७१५।

## [दु० वृ०]

व्रश्चिमस्जोर्धुटि परेऽन्तस्य लोपो भवति। व्रष्टा, व्रक्ष्यति। मङ्क्ता, मङ्क्ष्यति। नागमेऽन्तरङ्गत्वात् सस्य तृतीये सति पश्चाल्लोपः। धुटीति किम् ? वृश्च्यते।। ७१५।

## [दु० टी०]

व्रश्चि०। व्रश्चिरिह शोपधो न सोपध इत्यस्यान्तलोप उच्यते। मस्जेश्च स्वरात् परो **नकारागम** इति मध्यस्य सकारस्य लोपो न प्राप्नोति। मग्नः, मग्नवानिति। **अनुषङ्गलोपो** न स्यादित्यन्तलोपः। **''स्कोः संयोगाद्योरन्ते च''** (३। ६। ५४) इत्यत्र संयोगादिग्रहणम् **उपलक्षणार्थं** मध्यस्यापि लोप इत्यगतिकानां गतिरियम्।। ७१५।

## [वि० प०]

व्रश्चि०। व्रश्चेरिह शोपधत्वात् संयोगादिलोपो नास्तीत्यन्तलोप उच्यते। तथा मस्जेरन्तरङ्गत्वाद् **''मस्जिनशोर्धुटि''** ( ३। ५। ३१) इति नकारागमे कृते सकारस्यानादित्वात् **''स्कोः संयोगाद्योरन्ते च''** (३। ६। ५४) इति लोपो नास्ति। अतोऽन्तरङ्गत्वादेव **''धुटां तृतीयः''** (२। ३। ६०) इति सस्य दत्वम्। **''तवर्गश्चटवर्गयोगे चटवर्गौ''** (२। ४। ४६) इति कृते जलोप इत्येतदेवाह—नागम इत्यादि।। ७१५।

## [बि० टी०]

व्रश्चि०। व्रष्टा, व्रक्ष्यतीति **वृत्तिः**। नन्वत्रान्तलोपे **''प्रत्ययलुकां चानाम्''** (४। १। ४) इति प्रतिषेधः कथन्न स्यादिति चेत्, निषेधोऽपि भृजादिपाठान्न स्यात्, तर्हि मङ्क्तेति न सिध्यति ? सत्यम्, धातुश्रुतकार्यं तेन निषिध्यते, यथा गुणो दीर्घश्च। तर्हि दीर्घादिकृते धातोः **श्रुतिः** तथा **''चवर्गस्य किः''** (३। ६। ५५) इत्यनेनापि स्यात्। तर्हि वर्गग्रहणं व्यक्त्यवधारणार्थं भविष्यतीति **कश्चित्**।। ७१५।

## [समीक्षा]

'व्रष्टा, व्रक्ष्यति' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों व्याकरणों में भिन्न प्रक्रिया का आश्रय लिया गया है। कातन्त्रकार 'व्रश्च् + ता' इस स्थिति में चलोप, तकार को टकार तथा शकार को षकारादेश करके 'व्रष्टा' शब्द सिद्ध करते हैं। जब कि पाणिनि के अनुसार ''स्कोः संयोगाद्योरन्ते च'' (अ० ८। २। २९) से सलोप, ''व्रश्चभ्रस्ज–सृजमृजयजराजभ्राजच्छशां षः'' (अ० ८। २। ३६) से चकार को षकार तथा ''ष्टुना ष्टुः'' (अ० ८। ४। ४१) से तकार को टकारादेश करने पर यह शब्द सिद्ध होगा। इससे पाणिनि के अनुसार 'व्रस्च्' धातु को सोपध कहा जाएगा। **माधवीय धातुवृत्तिकार** ने कहा है–

''तत्रेडभावे झल्परत्वात् ''स्कोः'' (अ० ८। २। २९) इति सलोपे, व्रश्चादिना षत्वे, ष्टुत्वम्–व्रष्टा, व्रक्ष्यति। व्रश्चिता, वृश्चिष्यति'' (मा० धा० वृ०, तु० १४ – ओ व्रश्चू छेदने)। इस प्रकार प्रक्रियाभेद होने पर भी कार्यों की दृष्टि से समानता ही है।

## [विशेष वचन]

१. नागमेऽन्तरङ्गत्वात् सस्य तृतीये सति पश्चाल्लोपः (दु० टी०)।

२. वृश्चिरिह शोपधो न सोपध इत्यस्यान्तलोप उच्यते (दु० टी०)।

३. ''स्कोः संयोगाद्योरन्ते च'' इत्यत्र संयोगादिग्रहणमुपलक्षणार्थम्। मध्यस्यापि लोप इत्यगतिकानां गतिरियम् (दु० टी०)।

४. व्रश्चेरिह शोपधत्वात् संयोगादिलोपो नास्तीत्यन्तलोप उच्यते (वि० प०)।

५. वर्गग्रहणं व्यक्त्यवधारणार्थं भविष्यतीति कश्चित् (बि० टी०)।

## [रूपसिद्धि]

१. **व्रष्टा**। व्रश्च् + ता। 'व्रश्चू छेदने' (५।१९) धातु से श्वस्तनीविभक्तिसंज्ञक परस्मैपद– प्र० पु०–ए० व० 'ता' प्रत्यय, प्रकृत सूत्र से चकारलोप, ''छशोश्च'' (३। ६। ६०) से शकार को षकार तथा ''तवर्गस्य षटवर्गाट्टवर्गः'' (३। ८। ५) से तकार को टकारादेश।

२. **व्रक्ष्यति**। व्रश्च् + स्यति। 'व्रश्चू छेदने' (५। १९) धातु से भविष्यन्तीसंज्ञक परस्मैपद–प्र० पु० – ए० व० 'स्यति' प्रत्यय, प्रकृत सूत्र से चकारलोप, शकार को षकार, ''षढोः कः से'' (३। ८। ४) से षकार को ककार, ''निमित्तात् प्रत्ययविकारागमस्थः सः षत्वम्'' (३। ८। २६) से सकार को षकार तथा 'क–ष्' संयोग से क्षकार।

३. **मङ्क्ता**। मस्ज् + ता। 'टु मस्जो शुद्धौ' (५। ५१) धातु से श्वस्तनीसंज्ञक प० प० – प्र० पु० – ए० व० 'ता' प्रत्यय, ''मस्जिनशोर्धुटि'' (३। ५। ३१) से नकारागम, ''धुटां तृतीयः'' (२। ३। ६०) से सकार को दकार, ''तवर्गश्चटवर्गयोगे चटवर्गौ'' (२। ४। ४६) से दकार को जकार प्रकृत सूत्र से जकार का लोप, ''चवर्गस्य किरसवर्णे'' (३। ६। ५५) से जकार को ककार, ''मनोरनुस्वारो घुटि'' (२। ४। ४४) से नकार को अनुस्वार तथा ''वर्गे वर्गान्तः'' (२। ४। ४५) से अनुस्वार को ङकारादेश।

४. **मङ्क्ष्यति**। मस्ज् + स्यति। 'टु मस्जो शुद्धौ' (५। ५१) धातु से भविष्यन्ती–विभक्तिसंज्ञक – प० प० – प्र० पु० – ए० व० 'स्यति' प्रत्यय, नकारागम, स् को द्, द् को ज्, प्रकृत सूत्र से जकारलोप, ज् को क्, स् को ष्, 'क् + ष्' मिलकर 'क्ष्' वर्ण, न् को अनुस्वार तथा अनुस्वार को वर्गान्त ङकार आदेश।। ७१५।

## ७१६. यन्योकारस्य [३। ६। ३६]

## [सूत्रार्थ]

'यन्' विकरण के परे रहते धातु के ओकार का लोप होता है।। ७१६।

## [दु० वृ०]

धातोरोकारस्य यनि परे लोपो भवति। द्यति, स्यति। यनीति किम् ? उपोयते। पर्रानमित्तादेशः पूर्वस्मिन् स एव।। ७१६।

## [दु० टी०]

यन्यो०। नकारग्रहणं **''दिवादेर्यन्''** (३। २। ३३) इत्यस्यैव परिग्रहार्थ– मित्याह– यनीत्यादि। उपपूर्वस्य वेञो यजादित्वात् **सम्प्रसारणम्**।। ७१६।

## [वि० प०]

यन्यो०। 'उपोयते' इति उपपूर्वो **'वेञ् तन्तुसन्ताने'** (१। ६११) यजादित्वाद् यणि **सम्प्रसारण**मुकारः। ततः **''उवर्णे ओ''** (१। २। ३) इत्योत्वे परलोपे कृते च धातोरोकारो न भवति, तत् कथमिह प्राप्तिरित्याह – परनिमित्तेत्यादि।। ७१६।

## [समीक्षा]

'द्यति, स्यति' आदि शब्दरूप धातुघटित ओकार का लोप करने के बाद ही सिद्ध होते हैं। दोनों ही व्याकरणों में इस अभीष्ट ओकारलोप की व्यवस्था की गई है। पाणिनि का सूत्र है–''ओतः श्यनि'' (अ० ७। ३। ७१)।

## [विशेष वचन]

१. परनिमित्तादेशः पूर्वस्मिन् स एव (दु० वृ०)।

२. नकारग्रहणं दिवादेर्यन् इत्यस्यैव परिग्रहार्थम् (दु० टी०)।

## [रूपसिद्धि]

१. **द्यति**। दो + यन् + ति। 'दो अवखण्डने' (३। २२) धातु से वर्तमानाविभक्तिसंज्ञक **परस्मैपद** – प्र० पु० – ए० व० 'ति' प्रत्यय, ''दिवादेर्यन्'' (३। २। ३३) से 'यन्' विकरण तथा प्रकृत सूत्र से ओकार का लोप।

२. **स्यति**। सो + यन् + ति। 'षो अन्तकर्मणि' (३। २१) धातु से वर्तमानासंज्ञक 'ति' प्रत्यय, ''धात्वादेः षः सः'' (३। ८। २४) से धातुगत षकार को सकार, 'यन्' विकरण तथा ओकार का लोप।। ७१६।

## ७१७. आकारस्योसि [३। ६। ३७]

## [सूत्रार्थ]

'उस्' प्रत्यय के परे रहते धातु के आकार का लोप होता है।। ७१७।

## [दु० वृ०]

धातोराकारस्य लोपो भवति उसि परे। उदगुः, अदुः, अरुः, अलुः।। ७१७।

## [दु० टी०]

आकार०। 'अचकासुः, अशासुः' इत्यत्र न भवति, व्यवहितत्वादाकारस्येति। आकारेण धातुर्विशिष्यते। **'विशेषणेन च तदन्तविधिः'** (का० परि० ३) इत्याकारान्तस्य धातोरिति परोक्षायामुसि सिद्धत्वादुसादेश इह गृह्यते।। ७१७।

## [वि० प०]

आकारस्य०। 'उदगुः, अदुः' इति अद्यतन्यन्, इणो गाः, ''इण्स्था०' (३। ४। ९३) इत्यादिना सिचो लोपः। 'अरुः, अलुः' इति ह्यस्तन्यन्, अदादित्वाद् अनो

लुक्। सर्वत्र **''अन उस् सिजभ्यस्तविदादिभ्योऽभुवः''** (३। ४। ३१) इत्यन उसादेशेऽ–नेनाकारलोपः।। ७१७।

## [समीक्षा]

'अदुः, पपुः, तस्थुः, अरुः' आदि शब्दरूपों में आकारलोप का विधान दोनों ही व्याकरणों में किया गया है। पाणिनि का सूत्र है– ''आतो लोप इटि च'' (अ० ६। ४। ६४)। कातन्त्रकार ने सन्ध्यक्षरसंज्ञक वर्णों के परे रहते ''सन्ध्यक्षरे च'' (३। ६। ३८) यह अग्रिम सूत्र बनाया है, परन्तु पाणिनि के उक्त सूत्र (६। ४। ६४) से ही कार्य सम्पन्न हो जाता है। शब्दलाघव और अर्थलाघव की दृष्टि से इन सूत्रों की रचना समीचीन ही कही जाएगी।

## [रूपसिद्धि]

१. **उद्गुः**। उद् + अट् + इण् + अद्यतनी–अन्–उस्। 'उद्' उपसर्गपूर्वक 'इण् गतौ' (२। १३) धातु से अद्यतनीविभक्तिसंज्ञक प० प०–प्र० पु०–ब० व० 'अन्' प्रत्यय, ''इणो गा'' (३। ४। ८४) से 'इण्' को 'गा' आदेश, अडागम, अन् को उसादेश, सिच्, सिच् का लोप, प्रकृत सूत्र से आकार का लोप तथा सकार को विसर्गादेश।

२. **अदुः**। अट् + दा + अद्यतनी–अन्–उस्। 'डु दाञ् दाने' (२। ८४) धातु से अद्यतनीसंज्ञक 'अन्' प्रत्यय, अडागम, अन् को उस् आदेश, आकारलोप, सिच्, उसका लोप तथा सकार को विसर्गादेश।

३. **अरुः**। अट् + रा + ह्यस्तनी–अन्–उस्। 'रा दाने' (२। २२) धातु से ह्यस्तनीसंज्ञक– प० प०–प्र० पु०–ब० व० 'अन्' प्रत्यय, अडागम, अन् को उस् आदेश, अन्लुक्, आकारलोप तथा सकार को विसर्गादेश।। ७१७।

४. अलुः। अट् + ला + ह्यस्तनी – अन् – उस्। 'ला दाने' (२।२२) धातु से ह्यस्तनीसंज्ञक प० प०–प्र० पु० – ब० व० 'अन्' प्रत्यय, अडागम, अन् को उस् आदेश, अन्लुक्, आकारलोप तथा सकार को विसर्गादेश।। ७१७।

# ७१८. सन्ध्यक्षरे च [३। ६। ३८]

## [सूत्रार्थ]

सन्ध्यक्षरसंज्ञक वर्ण के परे रहते धातु के आकार का लोप होता है।। ७१८।

## [दु० वृ०]

धातोराकारस्य लोपो भवति सन्ध्यक्षरे च परतः। व्यतिरे, व्यतिले।। ७१८।

## [दु० टी०]

सन्ध्य०। एदैतोरिति सिद्धे **सन्ध्यक्षरग्रहणं सुखपाठार्थम्**।। ७१८।

## [वि० प०]

सन्ध्य०। व्यतिरे इत्यादि। व्यतिपूर्वो 'रा ला दाने' (२। २२), **''अनियमे चागतिहिंसाशब्दार्थहसः''** (३। २। ४२—६६) इति रुचादित्वादात्मनेपदम्, वर्तमानाया उत्तमपुरुषस्यैकवचनम्, पूर्ववद् **विकरणस्य** लुक्।। ७१८।

## [समीक्षा]

द्रष्टव्य, पूर्वसूत्र ७१७.

## [विशेष वचन]

१. एदैतोरिति सिद्धे सन्ध्यक्षरग्रहणं सुखपाठार्थम् (दु० टी०)।

## [रूपसिद्धि]

१. **व्यतिरे**। वि + अति + रा + ए। 'वि – अति' उपसर्गपूर्वक 'रा दाने' (२। २२) धातु से वर्तमानासंज्ञक उत्तमपुरुष–एकवचन 'ए' प्रत्यय, अन् विकरण का लुक् तथा प्रकृत सूत्र से धातुघटित आकार का लोप।

२. **व्यतिले**। वि + अति + ला + ए। 'वि – अति' उपसर्गपूर्वक 'ला दाने' (२। २२) धातु से वर्तमानासंज्ञक उ० पु० – ए० व० 'ए' प्रत्यय, अन् विकरण का लुक् तथा प्रकृत सूत्र से आकार का लोप।। ७१८।

# ७१९. अस्तेः सौ [३। ६। ३९]

## [सूत्रार्थ]

'सि' प्रत्यय के परे रहते 'अस्' धातु के अन्तिम वर्ण 'स्' का लोप होता है।। ७१९।

## [दु० वृ०]

अस्तेः सौ परेऽन्तस्य लोपो भवति। असि। कथम् आसीः, लाक्षणिकत्वात्। 'आद्ध्वम्, आशाद्ध्वम्' इति सस्य तृतीयेऽपि ध्वे उच्चारणस्याभेदात्। ह एकारे वक्तव्यः – व्यतिहे। कथम् ईहामासे ? **तिपा धातुस्वरूपनिर्देशात्**।। ७१९।

## [दु० टी०]

अस्तेः। सावितीकार **इहोच्चारणार्थः** प्रतिपत्तव्यः। तेन 'व्यतिसे' अकारसकारलोपे 'से' इति प्रत्ययमात्रं पदम्। कथमित्यादि। अस्तेर्ह्यस्तन्यां सावावश्यमीटा भवितव्यम्, ततश्च व्यवधानमित्याह–लाक्षणिकत्वादिति। नैतत् **सूत्रकारस्य मतम् पाठसुखार्थमेव।** तर्हि **उच्चारणार्थं** विदध्यान्न त्विकारं सन्दिग्धत्वात्। तस्माद् अस्तेः क्रियाविनिमये सत्यात्मनेपदे नास्ति सलोप इति। **अन्य** आह – आत्मनेपदमेव नाभिधीयते इतीकारमन्तरेण पारिशेष्यात् सिरेव प्रतीयते इतीकारः **सुखप्रतिपत्त्यर्थः**। 'आद्ध्वम्, आशाद्ध्वम्' इति **'आस उपवेशने, आङः शासु इच्छायाम्'** (२।४५, ४६), ह्यस्तन्या ध्वम् ? सत्यम्। **(पूर्वपक्षवादी** आह–यद् वृत्तौ **सिद्धान्तो** दत्तस्तद् 'आद्ध्वम्, आशाद्ध्वम्' इत्यादौ

सत्यमेवेति)। धातोः सस्यापि धकारे लोपो वक्तव्य एव चकाधीति सिद्धये, तदसत्। चकाद्धीति भवितव्यम्। **अन्यस्तु** चकाधीति प्रमाणयन् सिचो धकार इति द्विसकारं पठति, धातुसकारस्य सिचश्चेति। **भाष्यकारोऽप्याह** –

**धे सकारसिचो लोपश्चकाधीति प्रयोजनम्।**
**आशाध्वं तु कथं जश्त्वं सकारस्य भविष्यति।।**
**सर्वमत्र प्रसिद्धं स्यात् श्रुतिश्चात्र न भिद्यते।**
**लुङश्चापि न मूर्धन्ये ग्रहणं सेटि दुष्यति।।**

जश्त्वं तृतीयत्वं लुङोऽद्यतन्याश्चापि मूर्धन्ये ढत्वे ग्रहणं न कर्तव्यम् ? सत्यम्। सेटि दुष्यतीति अलविढ्वमिति। इदमसमीक्षितमिव दृश्यते यदि लुङ्ग्रहणं न स्यात्। अकृढ्वमिति। केन ढत्वं स्यात्। अथ **''ह्स्वाच्चानिटः''** (३। ६। ५२) इति नोच्यते। 'अकृत, अकृथाः' इति केन सिध्यति। ह इत्यादि। हकारः एकारे वक्तव्य एवेत्यर्थः। अस्तेः सस्य **छन्दसि** दृश्यते न **भाषायामिति**।। ७१९।

## [वि० प०]

अस्तेः। सावितीकार **उच्चारणार्थः**, तेन व्यतीहारविषयादस्तेरात्मनेपदे से परे 'व्यतिसे' इत्यपि भवति। इह अकारसकारयोर्लोपे कृते 'से' इति प्रत्ययमात्रं पदम्। इदं तर्हि न सिध्यतीत्याह – कथमित्यादि। **''अस्तेर्दिस्योः''** (३। ६। ८७) इति ह्यस्तन्याः सावितीट्, तेन व्यवधानाल्लोपो न भवति। अथ इटस्तद्ग्रहणेन ग्रहणान्नास्ति व्यवधानता। एवन्तर्हि लाक्षणिकत्वम् **'आगमा यद्गुणीभूतास्ते तद्ग्रहणेन गृह्यन्ते'** (का० परि० १४) इत्यनेन लक्षणेन सेरीसरूपस्य तद्रूपोपादानादेतेन **परमत**मादर्शितम्। इह पुनरिकारः कार्यार्थ एव। अन्यथा **उच्चारणार्थमकारमेव** कुर्याद् असन्दिग्धार्थत्वात्, तस्माद् वर्तमानाया एव सिरवशिष्यते, कुतोऽन्यत्र प्राप्तिः। अत एव आत्मनेपदे 'व्यतिसे' इतीह भवितव्यम्।

**अन्य**स्तु मन्यते **क्रियाविनिमयेऽर्थे**ऽस्तेरात्मनेपदमेव नाभिधीयते, तदा पारिशेष्यादेव सिरवगम्यते इती**कारः सुखार्थो** भवतीति। 'आद्ध्वम्, आशाद्ध्वम्' इति। 'आस उपवेशने, **आङः शास इच्छायाम्**' (२।४५, ४६) ह्यस्तन्या ध्वम्, **''धुटां तृतीयश्चतुर्थेषु''** (३। ८। ८) इति सकारस्य दकारः, तेन धातुसकारस्य धकारे लोपो न वक्तव्यः। इति यदपि चकाधीति प्रयोजनम्, तदप्यसङ्गतम्। इह चकाद्धीति भवितव्यम्। अत **एव ''हुधुड्भ्यां हेर्धिः''** (३।५।३५) इत्यत्र **वृत्तिकृता** 'जुहुधि, चकाद्धि' इत्युदाहृतम्। इहेत्यादि। अत्रापि पूर्ववदात्मनेपदमेव। कथमित्यादि। **''नाम्यादेर्गुरुमतोऽनृच्छः''** (३।२। १९) इत्याम्। ततः **''अस्भुवौ च परस्मै''** (३।२।२३) इत्यस्, द्विर्वचनम्, **''अस्यादेः सर्वत्र''** (३।३।१८) इति दीर्घत्वे विरूपोऽयं वर्तते इत्याह–तिपेत्यादि। तदेतन्न वक्तव्यम्, **छान्दसत्वात्**।। ७१९।

## [बि० टी०]

अस्तेः। सावितिइकार उच्चारणार्थः इति। ननु किमुक्तम्, किं सकारादौ प्रत्यये, उदस्वित् सकारोऽवयवो यस्य तस्मिन् प्रत्यये न वा सकारान्तप्रत्यये तत्र यदि सकारादौ प्रत्यये इति वक्तव्यं तदा आसीरित्यत्र प्राप्तिरेव नास्तीति ईटि सति ईकारादित्वात्। कथमुक्तं लाक्षणिकत्वादिति। यदि सकारोऽवयवो यस्येति गृह्यते तदा वस्थसोः परयोरेव प्राप्तिः स्यात्। यदि सकारान्ते प्रत्यये इति तथापि पूर्वदोष एव स्यात्। तस्मादत्र सर्वे लालायिताः। तत्राह **पण्डितः**— युष्मत्कर्तृकग्रहणेन वासा व्यावृत्यते। युष्मत्कर्तृक एकवचनप्रतिपादकः सकारश्च गृह्यते। अत एव आसीरित्यत्रापि स्यात्। तत्राह — लाक्षणिकत्वादिति।। ७१९।

## [समीक्षा]

'असि, व्यतिसे' इत्यादि शब्दरूपों के सिद्ध्यर्थ अस्धातुगत सकार का लोप दोनों ही व्याकरणों में किया गया है। पाणिनि का सूत्र है — ''तासस्त्योर्लोपः'' (अ० ७।४।५०)। अतः उभयत्र समानता है। कातन्त्रव्याख्याकारों ने विविध आचार्यों के मतों का उल्लेख किया है।

## [विशेष वचन]

१. तिपा धातुस्वरूपनिर्देशात् (दु० वृ०)।
२. सावितीकार इहोच्चारणार्थः प्रतिपत्तव्यः (दु० टी०; वि० प०; बि० टी०)।
३. नैतत् सूत्रकारस्य मतम् पाठसुखार्थमेव (दु० टी०)।
४. इकारः सुखप्रतिपत्त्यर्थः (दु० टी०)।
५. अस्तेः सस्य छन्दसि दृश्यते न भाषायामिति (दु० टी०)।
६. एतेन परमतमादर्शितम् (वि० प०)।
७. अन्यस्तु मन्यते क्रियाविनिमयेऽर्थेऽस्तेरात्मनेपदमेव नाभिधीयते तदा पारिशेष्यादेव सिरवगम्यते इतीकारः सुखार्थो भवतीति (वि० प०)।

## [रूपसिद्धि]

१. **असि**। अस् + अन्लुक् + सि। 'अस भुवि' (२।२८) धातु से वर्तमानाविभक्तिसंज्ञक परस्मैपद — म० पु० — ए० व० 'सि' प्रत्यय, ''अन् विकरणः कर्तरि'' (३।२।३२) से 'अन्' विकरण, ''अदादेर्लुग् विकरणस्य'' (३।४।९२) से उसका लुक् तथा प्रकृत सूत्र से सकार का लोप।। ७१९।

## ७२०. असन्ध्यक्षरयोरस्य तौ तल्लोपश्च [३। ६। ४०]

## [सूत्रार्थ]

यहाँ धातुप्रकरण में अकार—सन्ध्यक्षर वर्ण के परे रहते पूर्ववर्ती अकार के स्थान में अकार अथवा सन्ध्यक्षर वर्ण आदेश तथा परवर्ती अकार—सन्ध्यक्षर वर्ण का लोप भी होता है।। ७२०।

## [दु० वृ०]

इह धातुप्रस्तावेऽकारसन्ध्यक्षरयोर्वर्णयोः परयोरकारस्य स्थाने तावकारसन्ध्यक्षरे वर्णौ भवतः, यथासंख्यं तयोश्च निमित्तभूतयोर्लोपो भवति। चिकीर्षति, दीव्यन्ति, पचन्ते, पचे। अस्येति किम् ? यान्ति। असन्ध्यक्षरयोरिति किम् ? पचति। अस्य लोप इति सिद्धे तौ तल्लोपश्चेति किम् ? पच्यन्ते। नलोपो मा भूत्।। ७२०।

## [दु० टी०]

असन्ध्य०। इह धातुप्रस्तावे इत्यादि। **''अकारे लोपम्''** (२।१।१७) इत्यनेन न सिध्यति, समानलक्षणो दीर्घः स्यात्, एकारेऽप्यैत्वमिति भावः।। ७२०।

## [वि० प०]

असन्ध्य०। ननु चकारे लोपमिति वचनादकारे परेऽकार एव न विद्यते तत् कथमस्याकारः क्रियते। तदयुक्तम्। लिङ्गविषयत्वात्तस्येति आह – इहेति। तेन समानलक्षणस्य दीर्घस्यैकारेऽप्यैत्वमस्यापवादोऽयमारभ्यते। ताविति तच्छब्दोऽकारसन्ध्यक्षरे नपुंसके परामृशन्नपि पुंल्लिङ्गनिर्दिष्टौ वर्णावित्यध्याहाराद् इति दर्शयन्नाह –अकारसन्ध्यक्षरे वर्णाविति। अस्य लोप इत्यादि। सूत्रं पुनः असन्ध्यक्षरयोरस्य लोप इति। नलोपो मा भूदिति। **''आत्मने चानकारात्''** (३।५।३९) इत्यनेनेत्यर्थः।। ७२०।

## [बि० टी०]

असन्ध्य०। द्वन्द्वे स्वपदप्रधानत्वाद् विभक्त्या सह यस्य लिङ्गं भजतेऽत्र विभक्त्या सह सन्ध्यक्षरपदस्य सन्निधानत्वम्। अतस्तस्या विशेषणे नपुंसकत्वं प्राप्नोतीति तत्राह – वर्णा इत्यध्याहारात्। तर्हि द्वन्द्वैकत्वम् इत्यत्र कथम् 'अश्ववडवौ, अश्ववडवाः'। अश्वश्च वडवा चाश्ववडवे, अश्ववडवा इति स्यात्, स्त्रीलिङ्गत्वात्। तत्राह **टीकाकारः** – केचित् पूर्वपदस्य लिङ्गं भजन्ते इति तौ तल्लोपश्चेति ज्ञापकात्। अकारसन्ध्यक्षरयोः कृते समासे एकपदस्य लिङ्गं गृहीतमित्यर्थः। यदि वर्णशब्दाध्याहारस्तदा कथमिदं संगच्छते ? सत्यम्, वर्णशब्देनाध्याहार्यपक्षमाश्रित्योक्तम्। अस्येति किमिति **वृत्तिः**। अवर्णादित्यास्तामिति **केचित्**। यद् वा तकारस्तदभावे सवर्णस्येति **न्यायो** मन्यते। अवर्ण इत्यत्र वर्णग्रहणात्, यद्येवं **न्यायो** मन्यते तदा यान्तीत्यत्र स्यात्। असन्ध्यक्षरयोरिति किमिति **वृत्तिः**। असन्ध्यक्षरग्रहणाभावे तस्य विशेषणं पदमप्यायातम्। अस्य परस्तल्लोपश्चेति कुर्यादिति **हेमकरोमापतिसेनावा**हतुः।

**पण्डित**स्त्वाह – सूत्रं खण्डयित्वा भिन्नयोगं करोमीत्यत्र प्रमाणाभावः। ''अस्य तौ तल्लोपश्च'' इत्यास्ताम्। **अस्यार्थः** – अस्य तौ भवतो ययोः प्रत्ययययोरनुभूतप्रयोगे तल्लोपश्चेति तयोरनुभूतयोर्लोप इत्यर्थः। तर्हि अनुभूते किं प्रमाणम्, तिशब्दे परे भवतु इत्याह – पचतीत्यादि। अलोप इति सिद्धे इत्यादि। ननु कथमिदमुक्तं यावता **''आत्मने चानकारात्''** (३।५।३९) इत्यत्रानकारग्रहणसामर्थ्यादेकारलोपात् प्राक् प्रतिषेधस्ततोऽ–सन्ध्यक्षरविधिरित्युक्तम्।

**पञ्जीकृता** अनो लोप इत्यास्ताम्, किं तौ तल्लोपश्चेति वचनेन, तर्हि यथा वचनात् 'पचन्ते' इत्यादौ प्राक् प्रतिषेधस्तथा 'आघ्नते' इत्यत्रापि अन्लोपात् प्राक् नकारलोपस्य प्रतिषेधः कथं न स्यात्। तस्माद् वचनात् प्राक् प्रतिषेध इति यदुक्तं **तस्यायमाशय** इति असन्ध्यक्षरेत्यादिनाऽकारलोपेऽकारात् परोऽन्तिर्न भवतीति तौ तल्लोपग्रहणात्, किन्तु अन्तिरेव न भवति अकारलोपात्। तत्राह – वचनात् प्राक् प्रतिषेध इति। इदं तु तौ तल्लोपग्रहणस्थितावेव। ननु सन्ध्यक्षरविधित्वे सति अकारलोपात् परः अन्तिरेव न भवति, अनेनैव न्यायेन नकारलोपो न भविष्यति किं नकारादिति वचनेन ? सत्यम्। **'एकदेशविकृतमनन्यवत्'** (का० परि० १) इति न्यायेनान्तिरेव। तर्हि वचनात् प्राक् प्रतिषेध इति किमुक्तम् एकदेशविकृतमिति न्यायो नास्त्येव ? सत्यम्, तत्र विभक्तिग्रहणे दूषणं स्यात्। अत्र च **जातिपक्षे दूषणं** स्यात्।। ७२०।

## [समीक्षा]

'चिकीर्षति, पचन्ति, पचन्ते, यजे' आदि शब्दरूपों के सिद्ध्यर्थ 'अ + अ' या 'अ + ए' इस स्थिति में एक अकार को बनाए रखने तथा दूसरे अकार के लोप की अपेक्षा होती है। इसकी अपेक्षा कातन्त्रकार ने पूर्ववर्ती अकार के स्थान में 'अकार–एकार' आदेश तथा परवर्ती अकार–एकार का लोप किया है, परन्तु पाणिनि ने पूर्व–पर के स्थान में पररूप एकादेश करके उक्त रूप सिद्ध किए हैं। पाणिनि का सूत्र है– ''अतो गुणे'' (अ० ६। १। ९७)।

व्याख्याकारों ने कहा है कि यहाँ धातुओं का प्रकरण होने के कारण ''अकारे लोपम्'' (२। १। १७) सूत्र से कार्य सिद्ध नहीं हो सकता। फलतः समानलक्षण दीर्घ तथा एकार को ऐकार न हो, अतः इस सूत्र को बनाने की आवश्यकता हुई। प्रसङ्गतः 'हेमकर–उमापतिसेन–पण्डित' आदि आचार्यों के अभिमत भी दिखाए गए हैं।

## [विशेष वचन]

१. 'अस्य लोपः' इति सिद्धे तौ तल्लोपश्चेति किम् ? पच्यन्ते, नलोपो मा भूत् (दु० वृ०)।

२. इह धातुप्रस्तावे इत्यादि अकारे लोपम् इत्यनेन न सिध्यति, समानलक्षणो दीर्घः स्यात्, एकारेऽप्यैत्वमिति भावः (दु० टी०)।

३. वर्णशब्देनाध्याहार्य्यपक्षमाश्रित्योक्तम् (बि० टी०)।

४. पण्डितस्त्वाह–सूत्रं खण्डयित्वा भिन्नयोगं करोमीत्यत्र प्रमाणाभावः, अस्य तौ तल्लोपश्चेत्यास्ताम् (बि० टी०)।

५. तत्र विभक्तिग्रहणे दूषणं स्यात्। अत्र च जातिपक्षे दूषणं स्यात् (बि० टी०)।

## [रूपसिद्धि]

१. **चिकीर्षति।** कृ + सन् + अन् + ति। कर्तुमिच्छति। सन्प्रत्ययान्त 'चिकीर्ष' धातु से वर्तमानाविभक्तिसंज्ञक परस्मैपद–प्र० पु०–ए० व० 'ति' प्रत्यय, ''अन् विकरणः कर्तरि'' (३। २। ३२) से 'अन्' विकरण, प्रकृत सूत्र से सन्प्रत्ययस्थ अकार को अकारादेश तथा 'अन्' विकरण वाले अकार का लोप।

२. **दीव्यन्ति।** दिव् + यन् + अन्ति। 'दिवु क्रीडाविजिगीषाव्यवहार–द्युतिस्तुतिकान्तिगतिषु' (३। १) धातु से वर्तमानाविभक्तिसंज्ञक प० प०–प्र०पु०–ब० व० 'अन्ति' प्रत्यय, ''दिवादेर्यन्'' (३। २। ३३) से 'यन्' विकरण, 'न्' अनुबन्ध का प्रयोगाभाव, ''नामिनो र्वोरकुर्छुरोर्व्यञ्जने'' (३। ८। १४) से धातुगत वकार की उपधा इकार को दीर्घ, 'दीव्य + अ + अन्ति' इस अवस्था में ''अकारे लोपम्'' (२। १। १७) से यन्-विकरणघटित अकार का लोप, प्रकृत सूत्र द्वारा 'अन्' विकरण वाले अकार को अकारादेश तथा परवर्ती 'अन्ति' प्रत्ययघटित अकार का लोप।

३. **पचन्ते।** पच् + अ + अन्ते। 'डु पचष् पाके' (१। ६०३) धातु से वर्तमानासंज्ञक 'अन्ते' प्रत्यय, 'अन्' विकरण, प्रकृत सूत्र से अन्विकरणवाले अकार को अकारादेश तथा परवर्ती अकार का लोप।

४. **पचे।** पच् + अ + ए। 'डु पचष् पाके' (१। ६०३) धातु से वर्तमानासंज्ञक उ० पु०–ए०व० 'ए' प्रत्यय, 'अन्' विकरण, प्रकृत सूत्र से अन्विकरण वाले अकार को एकारादेश तथा परवर्ती एकार का लोप।। ७२०।

## ७२१. दीधीवेव्योरिवर्णयकारयोः [३। ६। ४१]

## [सूत्रार्थ]

इवर्ण तथा यकार के परे रहते 'दीधी–वेवी' धातुओं के अन्तिम ईकार का लोप होता है।। ७२१।

## [दु० वृ०]

दीधीवेव्योरिवर्णयकारयोः परयोरन्तस्य लोपो भवति। आदीधिता, आवेविता। आदीधीत, आवेवीत। आदीध्यते, आवेव्यते। इवर्णयकारयोरिति किम् ? आदीध्यकः, आवेव्यकः। आदीध्यनम्, आवेव्यनम्। न यथासङ्ख्यमिहेति, न तु प्रत्येकं धातवो द्विवचनात्।। ७२१।

## [दु० टी०]

दीधी०। न यथासङ्ख्यमिहेति। **इवर्णौ** हि ह्रस्वदीर्घत्वेन वर्णद्वयम्। समुदायमपेक्ष्य च द्विवचनमिति **विवक्षया** न **यथासंख्यमित्यर्थः**। शब्दापेक्षया न भवति, अनित्यत्वा–भ्युपगमात्। न त्वित्यादि। **'दीङ् क्षये, धीङ् अनादरे, वेञ् तन्तुसन्ताने, वी प्रजने'**

(३। ८३, ८४; २। १४; १। ६१२)। एवं विज्ञायमाने बहुवचनं प्रसज्येत, **भाषायामपि दृष्टयोर्दीधीवेव्योर्ग्रहणमित्यर्थः।।** ७२१।

## [वि० प०]

**दीधी०।** न यथासङ्ख्यमिहेति। इवर्णो हि ह्रस्वदीर्घतया भिद्यते, ततस्त्रीणि च निमित्तानीति वैषम्यान्न यथासङ्ख्यमित्यर्थः। द्विवचनं तु समुदायविवक्षायाम्। न त्वित्यादि। **'दीङ् क्षये, धीङ् अनादरे, वेञ् तन्तुसन्ताने, वी प्रजने'** (३। ८३, ८४; २। १४; १। ६१२)। यद्येते चत्वारो धातवः स्युस्तदा बहुवचनं भवतीति भावः।। ७२१।

## [समीक्षा]

'आदीधिता, आवेवीत, आदीध्यते' इत्यादि शब्दरूपों के सिद्ध्यर्थ 'दीधी–वेवी' धातुओं के अन्तिम ईकार के लोप की व्यवस्था दोनों ही व्याकरणों में की गई है। पाणिनि का सूत्र है– ''यीवर्णयोर्दीधीवेव्योः'' (अ० ७। ४। ५३)। कातन्त्रकार का 'इवर्णयकारयोः' यह निर्देश जितना स्पष्टावबोधक है उतना 'यीवर्णयोः' यह पाणिनीय निर्देश नहीं है। कुछ आचार्य 'दीधी–वेवी' धातुओं का प्रयोग केवल वेद में ही मानते हैं, परन्तु आचार्य शर्ववर्मा के अनुसार उनका प्रयोग भाषा = लौकिक संस्कृत में भी होता है। अतः उनके ईकारलोप - हेतु सूत्र बनाया गया है। इस विषय में ज्ञातव्य है कि शर्ववर्मा ने वैदिक शब्दों के साधनार्थ सूत्र नहीं बनाए हैं।

## [विशेष वचन]

१. न यथासंख्यमिहेति, न तु प्रत्येकं धातवः, द्विवचनात् (दु० वृ०)।

२. इवर्णो हि ह्रस्वदीर्घत्वेन वर्णद्वयम्, समुदायमपेक्ष्य च द्विवचनमिति विवक्षया न यथासङ्ख्यमित्यर्थः (दु० टी०)।

३. भाषायामपि दृष्टयोर्दीधीवेव्योर्ग्रहणमित्यर्थः (दु० टी०)।

## [रूपसिद्धि]

१. **आदीधिता।** आङ् + दीधी + ता। 'आङ्' उपसर्गपूर्वक 'दीधीङ्' 'दीप्तिदेवनयोः' (२। ५७) धातु से श्वस्तनीसंज्ञक प्र० पु०–ए० व० 'ता' प्रत्यय, ''इडागमोऽसार्वधातुकस्यादिर्व्यञ्जनादेरयकारादेः'' (३। ७। १) से इडागम तथा प्रकृत सूत्र से धातु के अन्तिम ईकार का लोप।

२. **आवेविता।** आङ् + वेवी + ता। 'आङ्' उपसर्गपूर्वक 'वेवीङ् वेतिना तुल्ये' (२। ५८) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय, इडागम तथा ईकार का लोप।

३. **आदीधीत।** आङ् + दीधी + ईत। 'आङ्' उपसर्गपूर्वक 'दीधीङ् दीप्तिदेवनयोः' (२। ५७) धातु से सप्तमीसंज्ञक प्र० पु० – एकवचन 'ईत' प्रत्यय तथा प्रकृत सूत्र से ईकार का लोप।

४. **आवेवीत।** आङ् + वेवीङ् + ईत। 'आङ्' उपसर्गपूर्वक 'वेवीङ् वेतिना

तुल्ये' (२। ५८) धातु से सप्तमीसंज्ञक प्र० पु० – ए० व० 'ईत' प्रत्यय तथा प्रकृत सूत्र से ईकार का लोप।

५. **आदीध्यते।** आङ् + दीधीङ् + यण् + ते। **'आङ्' उपसर्गपूर्वक** 'दीधीङ् दीप्तिदेवनयोः' (२। ५७) धातु से वर्तमानासंज्ञक प्र० पु० – ए० व० 'ते' प्रत्यय, ''सार्वधातुके यण्'' (३। २। ३१) से 'यण्' प्रत्यय तथा **प्रकृत** सूत्र से ईकारलोप।

६. **आवेव्यते।** आङ् + वेवी + य + ते। 'आङ्' उपसर्गपूर्वक 'वेवीङ् वेतिना तुल्ये' (२। ५८) धातु से वर्तमानासंज्ञक भावकर्मार्थक प्र०पु०–ए०व० 'ते' प्रत्यय, यण् प्रत्यय तथा ईकारलोप।। ७२१।

## ७२२. नामिव्यञ्जनान्ताद् आयेरादेः [३। ६। ४२]

### [सूत्रार्थ]

नाम्यन्त तथा व्यञ्जनान्त शब्दों से होने वाले 'आयि' प्रत्यय के आकार का लोप होता है।। ७२२।

### [दु० वृ०]

**नाम्यन्ताद्** व्यञ्जनान्ताच्चायेरादेर्लोपो भवति। अग्नीयते, रैयते, **विद्वस्यते, अनडुह्यते। ब्राह्मणीवाचरति**–ब्राह्मणायते। नित्यत्वात् पुंवद्भावः। सन्निपातलक्षणं **स्यादिति** नामिग्रहणम्।। ७२२।

### [दु० टी०]

नामि०। नामी च व्यञ्जनं च ते अन्ते यस्येति द्वन्द्वात् परं यत् श्रूयते तल्लभते प्रत्येकमभिसम्बन्धमिति सिद्धविभागोऽवसीयते इत्याह–नाम्यन्ताद् व्यञ्जनान्ताच्चेति। **'प्रत्ययस्य सर्वापहारी लोपः'** (का० परि० २५) इत्यादिग्रहणम्। अथ किमर्थं नामिग्रहणं यत्त्वादिषु कृतेषु व्यञ्जनान्तत्वात् सिध्यति **'निमित्ताभावे नैमित्तिकस्याप्यभावः'** (का० परि० २७) इति पुनर्नामिग्रहणं स्यादिति भावः। तदयुक्तमित्याह–सन्निपातेत्यादि। **'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य'** (का० परि० ३१) इति वर्णग्रहणे निमित्तत्वाद् इत्यपि नोच्यते, यत आदिशब्दोऽनिर्दिष्ट इति।। ७२२।

### [वि० प०]

नामि०। पुंवद्भाव इति। **''भाषितपुंस्कं पुंवदायौ''** (३। ६। ६१) इत्यनेनेत्यर्थः। अथ नामिग्रहणं किमर्थम् ? यत्त्वादौ कृते व्यञ्जनान्तत्वादेवाकारलोपे **'निमित्ताभावे नैमित्तिकस्याप्यभावः'** (का० परि० २७) इति पुनर्नामिनः प्रत्यावृत्तौ सिद्धम्। यत् साध्यं तदयुक्तमित्याह–सन्निपातेत्यादि। न च वर्णग्रहणे निमित्तत्वादिति युज्यते वक्तुम्, वर्णकार्यस्यादिग्रहणेन दूषितत्वात्। न चान्तरेण आदिग्रहणं निर्वाहोऽस्ति **'प्रत्ययस्य सर्वापहारी लोपः'** (का० परि० २५) इति सर्वस्य लोपप्रसङ्गात्। अथ 'आतः' इत्युच्यताम्, तदा **प्रतिपत्तिगौरवं** स्यादिति।। ७२२।

## [बि० टी०]

नामि०। विद्वस्यते इति। अत्र **''अघुट्स्वरादौ०''** (२। २। ४६) इत्यादिना उत्त्वं न भवति। तत्र **टीकाकारेण** प्रकरणमाश्रितम्। विदुषीवाचरति इत्यायि:, ब्राह्मणीवाचरतीति **वृत्ति:**। ननु नाम्यन्तत्वादाकारलोपे सति पश्चात् पुंवद्भावे सति 'ब्राह्मणायते' इति स्यादित्याह—ब्राह्मणायते इत्यादि। तर्हि कृते आकारलोपे पुंवद्भावे सति निमित्ताभावन्यायेन आकारे आगते 'ब्राह्मणाय' इति सिद्धम् इति चेत्, न। इदमपि **सिद्धान्तान्तरम्**, सन्निपातलक्षणपरिभाषाया: **ज्ञापकमे**तदेव नामिग्रहणमिति हृदि कृत्वाह—सन्निपातलक्षणम् इति। ननु वर्णग्रहणे निमित्तत्वादिति ज्ञापितम् **''अकारो दीर्घं घोषवति''** (२। १। १४) इत्यत्र घोषवद्ग्रहणेन, तच्चान्तरेण सन्निपातलक्षणपरिभाषया न सिध्यतीत्याह—न चेति। एतेन तस्य विषयो न भवतीत्यर्थ:, आदिग्रहणेन शब्दमात्रत्वात्।

अधुना अन्या **फक्किका** क्रियते इत्याह—न चान्तरेत्यादि। **सुखार्थमादिग्रहण**मित्यर्थ:। **केचित्तु** समुदायेन एकामेव पङ्क्तिं कृत्वा नामिग्रहणं **सुखार्थं** कुर्वन्ति। तन्मते **परिभाषावृत्तिर्न** लगति। ननु नित्यत्वादिति कथं सङ्गच्छते यावता पुंवद्भावस्य विषयत्वात् तथा जातेरिति निषेध: स्यात्। अत्र **केचित्** – तत्र जातिशब्दोऽयं कठबहृवृचादिजातिर्गृह्यते तत्र **कुलचन्द्रप्रभृतय:** विद्वस्यते ब्राह्मणीति प्रत्युदाहृतम्, एतदपि विषयीकरोति। **अन्यस्तु** ब्राह्मणस्य भार्या **ब्राह्मणी**ति पुंयोगादज्येष्ठादिपालकादिति ईप्रत्यय:। तथा च ब्रह्म वेत्तीति **ब्राह्मण:**, तस्य भार्येत्युच्यते, तन्न, **व्यक्तिपक्षे ''जातेरस्त्र्याख्यत्वादनजादे:''** (कात० परि०—स्त्री० १३) इत्यस्य व्यक्तौ व्यावृत्त्या ईर्न स्यात्। 'ब्रह्म वेत्ति' इत्यत्रापि **''वृद्धिनिमित्तस्य''** इत्यादेर्विषयत्वादिति चेत्, **''जातेरस्त्र्याख्यत्वादनजादे:''** (कात० परि० स्त्री० १३) इत्यस्य जातौ व्यावृत्ति:। यथा **'शूद्री शूद्रस्य भार्या स्याच्छूद्रा तज्जातिरेव च' इत्यमर:**। अत: पुंयोगाद् ईप्रत्यय: स्यादेव। अत: पुंवदिति **सम्प्रदाय:**। अथ जातेरस्त्र्याख्यत्वादनजादेरित्यस्य पुंयोगभिन्नव्यक्तौ (पुंयोगाद् भिन्नविभक्तौ) व्यावृत्तिरिति **केचित्**। यत्त्वादौ कृते व्यञ्जनान्तत्वादाकारलोप इति **पञ्जी** कथं संगच्छते, नाम्यन्तानाम् इति दीर्घस्यान्तरङ्गनित्यत्वाभ्यां बाधकत्वात् ? सत्यम्। अत्र **'ये'** इति विशेषणादाकारलोपे सत्येव विषय इत्याहु:।। ७२२।

## [समीक्षा]

'अग्नीयते, हंसायते, श्येनायते, विद्वस्यते' आदि शब्दों के सिद्ध्यर्थ पाणिनि 'क्यङ्—क्यष्' प्रत्यय—दीर्घ आदेश करते हैं, परन्तु शर्ववर्मा ने आयि प्रत्यय—आकारलोप किया है। पाणिनि का प्रमुख सूत्र है— ''कर्तु: क्यङ् सलोपश्च'' (अ० ३। १। ११)। इसके अतिरिक्त भी ७ सूत्र द्रष्टव्य हैं। व्याख्याकारों ने कुलचन्द्र—अमरसिंह आदि के भी मतों का उल्लेख किया है।

## [विशेष वचन]

१. सन्निपातलक्षणं स्यादिति नामिग्रहणम् (दु० वृ०)।

२. अथ 'आतः' इत्युच्यताम्, तदा प्रतिपत्तिगौरवं स्यादिति (वि० प०)।

३. इदमपि सिद्धान्तान्तरम्, सन्निपातलक्षणपरिभाषाया ज्ञापकमेतदेव नामिग्रहणम् (बि० टी०)।

४. सुखार्थमादिग्रहणम् (बि० टी०)।

५. नामिग्रहणं सुखार्थं कुर्वन्ति (बि० टी०)।

६. अत्र केचित् – तत्र जातिशब्दोऽयं कठबह्वृचादिजातिर्गृह्यते (बि० टी०)।। ७२२।

## [रूपसिद्धि]

१. **अग्नीयते।** अग्नि + आयि + अन् + ते। अग्निरिवाचरति। 'अग्नि' शब्द से आचारार्थ में "कर्तुरायिः सलोपश्च" (३। २। ८) से 'आयि' प्रत्यय, प्रकृत सूत्र से प्रत्यय के आदि आकार का लोपः, "नाम्यन्तानां यणायियिन्ना–शीश्च्वचेक्रीयितेषु ये दीर्घः" (३। ४। ७०) से 'अग्नि' शब्द के अन्त में नामिसंज्ञक इकार को दीर्घ, "ते धातवः" (३। २। १६) से 'अग्नीय्' की धातुसंज्ञा, वर्तमानासंज्ञक आत्मनेपद – प्र० पु० – ए० व० 'ते' प्रत्यय तथा "अन् विकरणः कर्तरि" (३। २। ३२) से 'अन्' विकरण।

२. **रैयते।** रै + आयि + अन् + ते। रा इवाचरति। 'रै' शब्द से 'आयि' प्रत्यय, प्रकृत सूत्र से आकारलोप, धातुसंज्ञा, 'ते' प्रत्यय तथा 'अन्' विकरण।

३. **विद्वस्यते।** विद्वन्स् + आयि + अन् + ते। 'विद्वन्स्' शब्द से 'विद्वान् इवाचरति' इस आचार अर्थ में 'आयि' प्रत्यय, आकारलोप, नलोप, धातुसंज्ञा, 'ते' प्रत्यय तथा 'अन्' विकरण।

४. **अनडुह्यते।** अनड्वाह् + आयि + अन् + ते। अनड्वानिवाचरति। 'अनड्वाह्' शब्द से 'आयि' प्रत्यय, आकारलोप, 'वा' को सम्प्रसारण, 'अनडुह्' की धातुसंज्ञा, 'ते' प्रत्यय तथा 'अन्' विकरण।। ७२२।

## ७२३. गमहनजनखनघसामुपधायाः स्वरादावनण्यगुणे [३। ६। ४३]

## [सूत्रार्थ]

अण्भिन्न स्वरादि अगुण प्रत्यय के परे रहते गम्, हन्, जन्, खन् तथा घस् धातु की उपधा का लोप होता है।। ७२३।

## [दु० वृ०]

गमादीनामुपधायाः स्वरादावण्वर्जितेऽगुणे प्रत्यये परे लोपो भवति। जग्मतुः, जग्मुः। जघ्नतुः, जघ्नुः। जनी, जन–जज्ञे, जज्ञतुः, जज्ञुः। चख्नतुः, चख्नुः। जक्षतुः, जक्षुः। स्वरादाविति किम् ? गम्यते। अनणीति किम् ? अगमत्, अघसत्। अगुण इति किम् ? गमिष्यति।। ७२३।

## [दु० टी०]

गम०। 'जनी प्रादुर्भावे, जन जनने' (१। ५३१;२। ८०) अस्याकर्मकत्वाद् भावे आत्मनेपदमूह्यम्। **छान्दसोऽयम् इत्याहुरन्ये**। चक्षतुरिति। **''अदेर्घस्लृ वा परोक्षायाम्''** (३। ४। ८०), ''अघोषेष्वशिटां प्रथमः'' (३। ८। ९), निमित्तात् षत्वम्। अलोप इति कृतेऽप्यभ्यासस्याकारस्य न भविष्यति, स्वरादाविति सप्तमीनिर्देशात्। **उपधाग्रहणं स्पष्टार्थमेव** तथादिग्रहणं च। व्यपदेशिवद्भावाद् आत्वमस्तीति अनणीत्युच्यते।। ७२३।

## [वि० प०]

गम०। चक्षतुरिति। **''वा परोक्षायाम्''** (३। ४। ८०) इत्यदेर्घस्लृ-आदेशे उपधालोपे **''अघोषेष्वशिटां प्रथमः''** (३। ८। ९), **''शासिवसिघसीनां च''** (३। ८। २७) इति षत्वम्।। ७२३।

## [बि० टी०]

गम०। ननु 'जघ्नतुः, चख्नतुः' इत्यत्र **''धुटां तृतीयः''** (२। ३। ६०; ३। ८। ८) इति तृतीयः कथन्न स्यात्। न च वक्तव्यम् **''धुटां तृतीयश्चतुर्थेषु''** (३। ८। ८) इति नियमान्न भविष्यति, प्रत्ययचतुर्थेष्विति विधानात्। अन्यथा भृज्जतीत्यत्र कथं तृतीयत्वम्। न च वाच्यम्, स्थानिवद्भावादकारस्य कथं तृतीयत्वम्। तृतीयविधौ **'न पदान्त०'** (का० परि० १०) इत्यादिना प्रतिषेधात् ? सत्यम्। तृतीयेऽपि क्वचित् स्थानिवदित्युक्तं **टीकायाम्** **''धुटां तृतीयः''** (२। ३। ६०) इत्यत्रापि।। ७२३।

## [समीक्षा]

'जग्मतुः, जघ्नतुः, जक्षिरे, चख्नतुः, जक्षतुः' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में 'गम्' आदि धातुओं की उपधा का लोप किया गया है। पाणिनि का सूत्र है– ''गमहनजनखनघसां लोपः क्ङित्यनङि'' (अ० ६। ४। ९८)। 'जन जनने' (२। ८०) धातु का प्रयोग कुछ आचार्य केवल वेद में ही मानते हैं। सूत्र में 'उपधा–आदि' शब्दों का उपादान स्पष्टावबोधार्थ किया गया है।

## [विशेष वचन]

१. उपधाग्रहणं स्पष्टार्थमेव तथादिग्रहणं च (दु० टी०)।

२. व्यपदेशिवद्भावादात्वमस्तीति अनणीत्युच्यते (दु० टी०)।

३. तृतीयेऽपि क्वचित् स्थानिवदित्युक्तं टीकायाम् (बि० टी०)।

## [रूपसिद्धि]

१. **जग्मतुः।** गम् + परोक्षा – अतुस्। 'गम्लृ गतौ' (१। २७९) धातु से परोक्षा–विभक्तिसंज्ञक परस्मैपद – प्र० पु० – द्विव० 'अतुस्' प्रत्यय, ''चण्परोक्षाचेक्रीयित–सनन्तेषु'' (३। ३। ७) से धातु को द्विर्वचन, ''पूर्वोऽभ्यासः'' (३। ३। ४) से पूर्ववर्ती

'गम्' की अभ्याससंज्ञा, ''अभ्यासस्यादिर्व्यञ्जनमवशेष्यम्'' (३। ३। ९) से 'म्' का लोप ''कवर्गस्य चवर्गः'' (३। ३। १३) से अभ्यासस्थ 'ग्' को 'ज्', प्रकृत सूत्र से धातु की उपधा अकार का लोप तथा सकार को विसर्गादेश।

२. **जग्मुः**। गम् + परोक्षा – उस्। 'गम्लृ गतौ' (१। २७९) धातु से परोक्षाविभक्तिसंज्ञक 'उस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

३. **जघ्नतुः**। हन् + परोक्षा – अतुस्। 'हन् हिंसागत्योः' (२। ४) धातु से 'अतुस्' प्रत्यय, धातु को द्विर्वचनादि, उपधा का लोप, ''अभ्यासाच्च'' (३। ३। ३०) से हकार को घकार तथा सकार को विसर्गादेश।

४. **जघ्नुः**। हन् + परोक्षा – उस्। 'हन् हिंसागत्योः' (२। ४) से 'उस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

५. **जज्ञे**। जन + ए। 'जनी प्रादुर्भावे, जन जनने' (१। ५। ३१; २। ८०) धातु से परोक्षाविभक्तिसंज्ञक आत्मनेपद – प्र० पु० – ए० व० 'ए' प्रत्यय, द्विर्वचनादि उपधालोप, ''तवर्गश्चटवर्गयोगे चटवर्गौ'' (२। ४। ४६) से नकार को ञकार, 'ज् - ञ्' संयोग से 'ञ्' वर्ण।

६. **जज्ञतुः**। जन् + परोक्षा – अतुस्। 'जनी प्रादुर्भावे, जन जनने' (१। ५३१; २। ८०) धातु से परोक्षासंज्ञक 'अतुस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

७. **जज्ञुः**। जन् + परोक्षा – उस्। 'जन्' धातु से 'उस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

८. **चख्नतुः**। खन् + परोक्षा – अतुस्। 'खनु अवदारणे' (१। ५८४) धातु से परोक्षासंज्ञक 'अतुस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

९. **चख्नुः**। खन् + परोक्षा – उस्। 'खनु अवदारणे' (१। ५८४) धातु से परोक्षासंज्ञक 'उस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

१०. **जक्षतुः**। अद् + परोक्षा – अतुस्। 'अद भक्षणे' (२। १) धातु से 'अतुस्' प्रत्यय, ''वा परोक्षायाम्'' (३। ४। ८०) से 'अद्' को 'घस्लृ' आदेश, 'लृ' अनुबन्ध का प्रयोगाभाव, द्विर्वचनादि, उपधालोप, घ् को क्, स् को ष् 'क्–ष्' संयोग से क्ष् तथा सकार को विसर्गादेश।

११. **जक्षुः**। अद् + परोक्षा – उस्। 'अद अक्षणे' (२। १) धातु से परोक्षासंज्ञक 'उस्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ७२३।

## ७२४. कारितस्यानामिड्विकरणे [३। ६। ४४]

### [सूत्रार्थ]

आम् – इट् – विकरण से भिन्न प्रत्यय के परे रहते कारितसंज्ञक 'इन्' प्रत्यय का लोप होता है।। ७२४।

## [दु० वृ०]

आमिङ्विकरणादन्यस्मिन् प्रत्यये परे कारितस्य लोपो भवति। अचीकरत्, अचीकमत, अररक्षत्, कार्यते, कारणा, उदपादि, समपादि। परत्वात् यत्त्वादयो बाध्यन्ते। अनामिङ्विकरण इति किम् ? कारयामास, कारयिता, कारयति, अहं कारये। तद्भावादन्तरङ्गत्वाच्च गुणः।। ७२४।

## [दु० टी०]

कारि०। अनामिङ्विकरण **इनि** समाहारद्वन्द्वः। **पर्युदासोऽयं** नञ् असार्वधातुकविषये भवतीत्यर्थः। अचीकमतेति। कमेरिनङ्, चणि **''य इवर्णस्य०''** (३। ४। ५८) इत्यादिना यत्वं प्राप्तम् अररक्षदिति। **''स्वरादौ''** (३। ४। ५५) इत्यादिना इय् प्राप्तः। कार्यते इति। **''नाम्यन्तानां यणायि०''** (३। ४। ७०) इत्यादिना दीर्घः प्राप्तः। कारणेति। कारयतेः स्त्रियां यौ गुणः प्राप्तः। उदपादीति। पादयतेरिचि वृद्धिः प्राप्तेत्याह—यत्वादयो बाध्यन्ते इति। ननु कथं **'येन नाप्राप्तौ यो विधिरारभ्यते स तस्य बाधकः'** (व्या० परि० ४२) इत्यस्यान्यत्र विषयत्वात्। याजयतेर्याष्टिः, राधयतेः राद्धिः, **''घोषवत्योश्च कृति''** (४। ६। ८०) इट्प्रतिषेधः ? सत्यम्, **क्तितिकौ न शर्ववर्मकृतौ**, अनामिङ्विकरणे इति प्रतिषेधाच्च। **'पूर्वपरयोः परो विधिर्बलवान्'** (कलाप०, पृ० २२१। ५०) इति वा। अहमित्यादि। कारयतेरेकारे विकरणस्य सन्ध्यक्षरादेशो हि विकरण एवेत्याह—तद्भावादिति।। ७२४।

## [वि० प०]

कारित०। अचीकमतेति। कमेरिनङ् कारितं च, चणादि पूर्ववत्। अत्र **''य इवर्णस्य०''** (३। ४। ५८) इत्यादिना यत्वं प्राप्तम्, अररक्षदिति। **''स्वरादाविवर्णो—वर्णान्तस्य''** (३। ४। ५५) इत्यादिना इय् प्राप्तः। कार्यते इति। **''नाम्यन्तानां यणायि०''** (३। ४। ७०) इत्यादिना दीर्घः प्राप्तः। कारणेति। **''ईषिथ्रन्थि०''** (४। ५। ८५) इत्यादिना युप्रत्यये गुणः प्राप्तः। उदपादीति। उत्पूर्वस्य पादयतेः **''भावकर्मणोश्च''** (३। २। ३०) इति इचि कृते वृद्धिः प्राप्नोतीत्याह—यत्वादयो बाध्यन्ते इति। येन नाप्राप्तिन्यायेन परत्वेन वा लोपः प्रवर्तते इति भावः। अहमित्यादि। यदि नित्यत्वाद—सन्ध्यक्षरविधिः स्यात् तदा स्वरादेशस्य स्थानिवद्भावाद् एकारस्यापि विकरणत्त्वाल्लोपाभावः। अन्तरङ्गत्वाच्चेति। **'अन्तरङ्गबहिरङ्गयोरन्तरङ्गविधिर्बलवान्'** (का० परि० ५०) इति प्रागेव गुण इत्यर्थः।। ७२४।

## [बि० टी०]

कारि०। तद्भावादिति। स्थानिवद्भावादित्यर्थः। ननु लोपविधौ **''न पदान्त०''** (का० परि० १०) इत्यादिना निषेधात् कथं स्थानिवद्भाव इत्याह—अन्तरङ्गत्वादिति। येन नाप्राप्तिन्यायादिति। ननु कथमुक्तं यावता याजयतेर्याष्टिः, धारयतेर्धार्त्तिः। यज्धातोरिनि

कृते ततः क्तिप्रत्यये **''घोषवत्योश्च''** (४। ६। ८०) इत्यनिट्। अत्र किञ्चिदपि न प्राप्नोति, अतोऽत्रास्याविषयत्वात् कथं येन नाप्राप्तिन्यायस्य विषयः इति हृदि कृत्वाह—परत्वादिति। तेषां तत्र तत्र सावकाशतेति इनोऽन्यत्र सावकाशता याजयतेर्याष्टिरित्यत्र। न च वक्तव्यं तिक्कृतौ संज्ञायां समन्वितत्वादित्युक्तं **कुलचन्द्रेण**।। ७२४।

## [समीक्षा]

'अररक्षत्, अचीकमत, कार्यते, कारणा' इत्यादि शब्दरूपों के साधनार्थ इन् प्रत्यय (पाणिनीय णिच्) का लोप दोनों ही व्याकरणों में किया गया है। पाणिनीय 'णिच्' प्रत्यय के लिए कातन्त्र में 'इन्' प्रत्यय का विधान हुआ है और उसकी कारितसंज्ञा भी की गई है। अतः तदनुसार शब्दों का प्रयोग सूत्रों में द्रष्टव्य है। पाणिनि का सूत्र है— ''णेरनिटि'' (अ० ६। ४। ५१)।

## [विशेष वचन]

१. तद्भावादन्तरङ्गत्वाच्च गुणः (दु० वृ०)।

२. क्तितिकौ न शर्ववर्मकृतौ (दु० टी०)।

## [रूपसिद्धि]

१. **अचीकरत्।** अट् + कृ + इन् + अद्यतनी—दि। 'डु कृञ् करणे' (७। ७) धातु से ''धातोश्च हेतौ'' (३। २। १०) से 'इन्' प्रत्यय, नकार अनुबन्ध का प्रयोगाभाव, ''अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिचट्सु'' (३। ६। ५) से 'ऋ' को वृद्धि, 'कारि' की ''ते धातवः'' (३। २। १६) से धातुसंज्ञा, अद्यतनीविभक्तिसंज्ञक परस्मैपद—प्र०पु०-ए० व० 'दि' प्रत्यय, ''अड् धात्वादिर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु'' (३। ८। १६) से धातुपूर्व अडागम, ''श्रिद्रुस्रुकमिकारितान्तेभ्यश्चण् कर्तरि'' (३। २। २६) से चण् प्रत्यय, ''चण्परोक्षाचेक्रीयितसनन्तेषु'' (३। ३। ७) से धातु को द्विर्वचन, ''पूर्वोऽभ्यासः'' (३। ३। ४) से अभ्याससंज्ञा, ''अभ्यास्यादिर्व्यञ्जनमवशेष्यम्'' (३। ३। ९) से 'का' भाग शेष, ''ह्रस्वः'' (३। ३। १५) से दीर्घ को ह्रस्व, ''कवर्गस्य चवर्गः'' (३। ३। १३) से ककार को चकार, ''अलोपे समानस्य सन्वल्लघुनीनि चण्परे'' (३। ३। ३५) से सन्वद्भाव, ''सन्यवर्णस्य'' (३। ३। २६) से अकार को इकार, ''दीर्घो लघोः'' (३। ३। ३६) से इकार को ईकार, ''इन्यसमानलोपोपधाया ह्रस्वश्चणि'' (३। ५। ४४) से धातु की उपधा को ह्रस्व, प्रकृत सूत्र से इन् प्रत्यय का लोप तथा दकार को तकारादेश।

२. **अचीकमत।** अट् + कम + इनङ् + चण् + त। 'कमु कान्तौ' (१। ४०५) धातु से इनङ् प्रत्यय, उपधादीर्घ, धातुसंज्ञा, 'त' प्रत्यय, अडागम, चण् प्रत्यय, द्विर्वचनादि तथा प्रकृत सूत्र से 'इन्' प्रत्यय का लोप।

३. **अररक्षत्।** अट् + रक्ष् + इन् + अद्यतनी – दि। 'रक्ष पालने' (१। २०२) धातु से इन्, धातुसंज्ञा, 'दि' प्रत्यय, अडागम, चण् प्रत्यय, द्विर्वचनादि तथा प्रकृत सूत्र से 'इन्' प्रत्यय का लोप।

४. **कार्यते।** कृ + इन् + ते। 'डु कृञ् करणे ' (७। ७) धातु से इन् प्रत्यय, ऋकार को वृद्धि, धातुसंज्ञा, वर्तमानासंज्ञक 'ते' प्रत्यय, यण् प्रत्यय तथा प्रकृत सूत्र से इन् प्रत्यय का लोप।

५. **कारणा।** कृ + इन् + यु + आ + सि। 'डु कृञ् करणे' (७। ७) धातु से इन् प्रत्यय, ऋकार को वृद्धि, धातुसंज्ञा, ''ईषिश्रन्थ्यासिवन्दिविदिकारितान्तेभ्यो युः'' (४। ५। ८५) से 'यु' प्रत्यय, ''युवुझामनाकान्ताः'' (४। ६। ५४) से 'अन' आदेश, प्रकृत सूत्र से इन् का लोप, णकारादेश, ''शंसिप्रत्ययाद् अः'' (४। ५। ८०) से 'अ' प्रत्यय, स्त्रीप्रत्यय 'आ', समानदीर्घ, लिङ्गसंज्ञा, 'सि' प्रत्यय तथा उसका ''श्रद्धायाः सिर्लोपम्'' (२। १। ३७) से लोप।

६. **उदपादि।** उद् + अट् + पद् + इन् + त। 'उद्' उपसर्गपूर्वक 'पद गतौ' (३। १०७) धातु से 'इन्' प्रत्यय, उपधादीर्घ, धातुसंज्ञा, अद्यतनीसंज्ञक 'त' प्रत्यय, अडागम, इच् प्रत्यय, प्रकृत सूत्र से इन् का लोप तथा ''इचस्तलोपः'' (३। ४। ३२) से 'त' प्रत्यय का लोप।

७. **समपादि।** सम् + अट् + पद् + इन् + त। 'सम्' अपसर्गपूर्वक 'पद गतौ' (३। १०७) धातु से इन् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ७२४।

## ७२५. यस्यापत्यप्रत्ययस्यास्वरपूर्वस्य यिन्नायिषु [३। ६। ४५]

### [सूत्रार्थ]

यिन्, आयि, आकारभिन्न स्वरादि तद्धित प्रत्यय, च्वि तथा स्त्रीलिङ्गबोधक 'ई' प्रत्यय के परे रहते अपत्यार्थक 'य' प्रत्यय का लोप होता है, यदि उस 'य' से पूर्व स्वरवर्ण न हो तो।। ७२५।

### [दु० वृ०]

यिन्नायी द्वौ, बहुवचनं **गणार्थम्।** यस्येत्यकार **उच्चारणार्थः**। अपत्यप्रत्यय–सम्बन्धिनो यस्यास्वरपूर्वस्य यिन्नायितद्धितानात्स्वरच्विस्त्रीकारेषु परतो लोपो भवति। गार्गीयति, गार्गायते। गार्ग्ये साधु**गार्ग्यः** इति श्रुतेरभेदात्। कुरोर्नकारादेश्च रूढादपत्यमात्रे गर्गादित्वाण्ण्यः। कौरव्यस्यापत्यमितीण् **कौरविः**, एवं **नैषधिः**। गार्ग्यस्यायं **गार्गीयः**। गार्ग्याणां समूहो **गार्गकम्**। समूहे अकण्। कथं राजन्यकम् ? **गणकृतमनित्यमिति।** गार्गी-स्यात्। **गार्गी** स्त्री। गणे अनात्स्वर इति किम् ? गार्ग्यायणः। यिन्नायिष्विति किम् ? गार्ग्यमाचष्टे **गार्ग्ययति**। यिन्नायीष्विति न्याय्यः पाठः, **तद्धितानामाकृतिप्रधानत्वात्**। तथा च सोमो देवता अस्या इति **सौमी** ऋक् च दृश्यते। अस्वरपूर्वस्येति किम् ? आत्रेयीयति, आत्रेयायते, आत्रेयी स्यात्। आत्रेयी स्त्री।

**मत्स्यस्य यस्य स्त्रीकार ईये चागस्त्यसूर्ययोः।**
**तिष्यपुष्ययोर्नक्षत्रे अणि यस्य विभञ्जनात्।।**

मत्स्यस्य स्त्री **मत्सी**। अगस्त्यस्यापत्यमित्यण्। आगस्त्यस्यायम् **आगस्तीयः**। आगस्त्यस्येयम् **आगस्ती**। सूर्यस्यायं **सौर्यः**, तत्र भवः **सौरीयः**। सूर्यस्येयं **सौरी** दिक्। तैषमहः, तैषी रात्रिः। पौषमहः, पौषी रात्रिः। गणात् पृथगयि**रुत्तरार्थः**।। ७२५।

## [दु० टी०]

यस्या०। अपत्यार्थविहितत्वादपत्यमित्युच्यते। न विद्यते स्वरः पूर्वो यस्मादिति बहुव्रीहिः। तद्धितानात्स्वर इति तद्धितस्याकारवर्जिते स्वर इत्यर्थः। ईये चेति चकारेण ईकारोऽनुकृष्यते। विभञ्जनादिति यस्येति योगविभागादित्यर्थः।। ७२५।

## [वि० प०]

यस्यापत्य०। तद्धितानात् स्वर इति आकारवर्जिते तद्धितस्वरे इत्यर्थः। श्रुतेरभेदादिति। तेन तद्धितयकारे यलोपो न वक्तव्यः इति भावः। समूहे अकण्णिति, तमादित्वात्। यिन्नित्यादि। यिंश्च आयिश्च ईश्चेति बहुत्वाद् बहुवचनम्। ईकारः पुनः स्त्रियां विहितश्चिवप्रत्ययनिमित्तश्च गृह्यते। ननु यद्ययं न्याय्यः पाठः कथन्तर्हि तद्धितानात् स्वरे लोप इत्याह– तद्धितानामाकृतिप्रधानत्वादिति। एतदेवाह – तथा चेति। कथमन्यथा सोमशब्दाद् देवतार्थे विहितस्य यणो यकारस्य लोपः स्यादिति भावः। तत्र प्रकीर्तितग्रहणाद् देवतार्थे सोमशब्दाद् यण्। तथा समग्रस्य भावः कर्म वा **सामग्री**, उचितस्य भावः कर्म वा **औचिती** इत्यादावपि यलोपो दृश्यते इति भावः। यणन्तस्तु स्त्रियामपि नदादौ दृश्यते।

ननु चायं न्याय्योऽपि पाठस्तर्हि कथन्न कृत इति चेत् ? सत्यम्, अनेन **वृत्तिकारेण परमतमा**वेदितमिति। अस्वरेत्यादि। **''स्त्र्यत्र्यादेरेयण्''** (२। ६। ४), एकारः स्वरः पूर्वोऽस्य यकारस्येति। **''ईये च''** (२। ६। १०) इति चकारात् स्त्रीकारे चेत्यर्थः। तदेतत् कथमित्याह– यस्य विभञ्जनादिति। योगविभागादित्यर्थः। मत्सीति। नदादित्वाद् ईः। आगस्तीयः इति। तथा स्वराणामादावाद् वृद्धिमतः शेषेऽर्थे ईयः स्यादिति वचनाद् ईयः। अण्प्रत्ययान्तश्च नदादौ पठ्यते तिष्यपुष्ययोर्नक्षत्रयोगादणिति। ननु यिन एवैकस्माद् बहुवचनं भवद् गणार्थं भविष्यति, आयिप्रत्ययस्तु गण एव निक्षिप्यतामित्याह– गणादित्यादि।। ७२५।

## [बि० टी०]

यस्या०। अपत्यपदेनापत्यप्रत्यय उच्यते, उपचारात्, तथापि व्यधिकरणम् अयमपत्यप्रत्ययस्य यकारः सस्वरलोपनीयो यकारोऽस्वरत्वाद् इति वक्ष्यामः। अपत्यप्रत्ययसम्बन्धिन इति। [यिन्नायी द्वाविति। यद्यपि यिन्नायी द्वावपि भिन्नौ तथापि यिन्नायी इति योज्यम्, अन्यथा घटौ द्वाविवद् दूषणं स्यात्]। बहुवचनं तु गणार्थं प्रकृतेर्द्वित्वार्थत्वाद् द्विवचनमेव युज्यते कथं बहुवचनम्, तस्माद् बहुवचनं

बोधयति– प्रकृतेरपि बहुत्वं 'विद्यते, अत एव गणः प्राप्तः। यस्येति। ननु सस्वरयकारलोपे किं दूषणम्, अकारेण वा किं प्रमाणम् ? सत्यम्। सस्वरयकारलोपे गार्गीयतीति न स्यात्, यिनि यकारलोपे **''यिन्यवर्णस्य''** (३। ४। ७८) इतीत्त्वं न स्याद् अकारान्तत्वाभावात्। कारणं तु पूर्वपरयोरेकवर्णलोपात्। **परो** हि साध्वर्थे विहितयकारादेर्नकारोऽपि रूढादन्यश्च रूढात् स्याद् अकाराद् गणस्यैव भवति, अकारद्वारेण प्राप्ते निषेधमाह– नन्वित्यादि। अप्राप्तौ विधिमाह–नकारादेरिति। गर्गाणां समूह इत्यत्र बहुत्वे ''रूढानां बहुत्वेऽविधिमाह– नकारादेरिति। गर्गाणां समूह इत्यत्र बहुत्वे **''रूढानां बहुत्वेऽस्त्रियाम्''** (२। ४५) इत्यादिना यलोपस्ततः समूहेऽकण् युक्तार्थवद्भाव इत्यादिना सहैकवाक्येऽर्थवद्भावे **'निमित्ताभावे नैमित्तिकस्याप्यभावः'** (का० परि० २७) इति यकारागमे सति लोपः। मत्स्यस्य यस्येत्यादि। **ये** तु गणार्थं मन्यन्ते, तेषान्तु मते कर्तव्य एव। योगविभाग एवापत्यप्रत्ययाभावात्। **ये** तु न्याय्यं पाठं मन्यन्ते तेषां मते योगविभागः। मत्सीत्यत्र तद्धितत्वाभावाद् अगस्त्यशब्दस्य ईकारलोपार्थो योगविभागः। ईकारादौ तद्धितानामाकृतिप्रधानत्वात् सिद्धं यदुक्तम्, तदेतदपि विषयीकरोतीत्युक्तम्। यद् वा आकृतिप्रधानत्वात् सिध्यति यदुक्तम्, तन्नियमार्थं तिष्यपुष्ययोर्यलोपोऽणि नक्षत्रेऽण्येव नान्यतद्धितप्रत्यये परे इति। ये तु तद्धितानामाकृतिप्रधानत्वं मन्यन्ते, तेषां मते सर्वत्रैव प्रयोजनम्। **अस्माकं** तु **मते** 'सौमी ऋक्' इत्यत्र योगविभागद्वारेण यलोपः। न्याय्यपाठमते त्वत्र यकारप्रत्ययः, किन्तु अपत्यार्थमारोप्यान्यत्र तद्धितप्रत्ययाभावः इति भेदः। अत उक्तम् – **तद्धितानामाकृतिप्रधानत्वात्**।। ७२५।

## [समीक्षा]

'गार्गी, गार्गीयति, गार्गकम्' आदि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में यलोप का विधान किया गया है। पाणिनि के एतदर्थ चार सूत्र हैं– ''सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः, हलस्तद्धितस्य, आपत्यस्य च तद्धितेऽनाति, क्यच्व्योश्च'' (अ० ६। ४। १४९, १५०, १५१, १५२)। इस प्रकार पाणिनि की रचना में गौरव स्पष्ट है। 'यिन्–आयि' दो ही प्रत्ययों का उल्लेख होने पर भी 'यिन्नायिषु' इस बहुवचन का प्रयोग 'गण' का बोध कराता है, जिससे 'च्वि–ई' आदि प्रत्ययों का भी ग्रहण होता है। व्याख्याकारों ने तद्धितान्त शब्दों को आकृतिप्रधान बताया है। 'यस्य' पद से अभीष्ट 'य' प्रत्यय में अकार उच्चारणार्थक है।

## [विशेष वचन]

१. यिन्नायीष्विति न्याय्यः पाठस्तद्धितानामाकृतिप्रधानत्वात् (दु० वृ०)।

२. गणात् पृथगायिरुत्तरार्थः (दु० वृ०)।

३. अपत्यार्थविहितत्वादपत्यमित्युच्यते (दु० टी०)।

४. अनेन वृत्तिकारेण परमतमावेदितम् (वि० प०)।

५. ननु यिन एवैकस्माद् बहुवचनं भवद् गणार्थं भविष्यति आयिप्रत्ययस्तु गणे एव निक्षिप्यताम् इत्याह– गणादित्यादि (वि० प०)।

६. योगविभाग एवापत्यप्रत्ययाभावात् (बि० टी०)।

७. ये तु न्याय्यं पाठं मन्यन्ते तेषां मते योगविभागः (बि० टी०)।

८. ये तु तद्धितानामाकृतिप्रधानत्वं मन्यन्ते तेषां मते सर्वत्रैव प्रयोजनम् (बि० टी०)।

## [रूपसिद्धि]

१. **गार्गीयति।** गर्ग + ण्य + यिन् + ति। गर्गस्यापत्यम्। 'गर्ग' शब्द से "ण्य गर्गादेः" (२। ६। २) सूत्र द्वारा 'ण्य' प्रत्यय, "वृद्धिरादौ सणे" (२। ६। ४९) से आदिवृद्धि, गार्ग्यमिच्छति। 'गार्ग्य' शब्द से "नाम्न आत्मेच्छायां यिन्" (३। २। ५) सूत्र द्वारा 'यिन्' प्रत्यय, प्रकृत सूत्र से यलोप, "यिन्यवर्णस्य" (३। ४। ७८) से अकार को ईकार, 'गार्गीय्' की धातुसंज्ञा, 'ति' प्रत्यय तथा 'अन्' विकरण।

२. **गार्गायते।** गार्ग्य + आयि + अन् + ते। गार्ग्य इवाचरति। 'गार्ग्य' शब्द से "कर्तुरायिः सलोपश्च" (३। २। ८) सूत्र द्वारा 'आयि' प्रत्यय, प्रकृत सूत्र से यलोप, धातुसंज्ञा, 'ते' प्रत्यय तथा 'अन्' विकरण।

३. **गार्ग्यः।** गार्ग्य + य + सि। गार्ग्ये साधुः। 'गार्ग्य' शब्द से "तत्र साधौ यः" (२। ६। ९) से 'य' प्रत्यय, प्रकृत सूत्र से यलोप, 'गार्ग्य' शब्द की लिङ्गसंज्ञा, सि–प्रत्यय तथा सकार को विसर्गादेश।

४. **कौरविः।** कौरव्य + इण् + सि। कौरव्यस्यापत्यम्। 'कौरव्य' शब्द से "इणतः" (२। ६। ५) सूत्र द्वारा 'इण्' प्रत्यय, प्रकृत सूत्र से यलोप, लिङ्गसंज्ञा, सि–प्रत्यय तथा सकार को विसर्गादेश।

५. **नैषधिः।** नैषध्य + इण् + सि। नैषध्यस्यापत्यम्। 'नैषध्य' शब्द से "इणतः" (२। ६। ५) सूत्र द्वारा 'इण्' प्रत्यय, प्रकृत सूत्र से यलोप, लिङ्गसंज्ञा, 'सि' प्रत्यय तथा सकार को बिसर्गादेश।

६. **गार्गीयः।** गार्ग्य + अण् + सि। गार्ग्यस्यायम्, गार्ग्याय हितः। 'गार्ग्य' शब्द से "ईयस्तु हिते" (२। ६। १०) सूत्र द्वारा 'ईय' प्रत्यय, प्रकृत सूत्र से यलोप, लिङ्गसंज्ञा, सि – प्रत्यय तथा सकार को विसर्गादेश।

७. **गार्गकम्।** गार्ग्य + अकण् + सि। गार्ग्याणां समूहः। 'समूह' अर्थ में गार्ग्य शब्द से 'अकण्' प्रत्यय, प्रकृत सूत्र से यलोप, लिङ्गसंज्ञा, सि–प्रत्यय तथा "अकारादसम्बुद्धौ मुश्च" (२। २। ७) से 'मु' आगम-सिप्रत्ययलोप।

८. **गार्गीस्यात्।** गार्ग्य + च्वि + स्यात्। अगार्ग्यो गार्ग्यः स्यात्। 'गार्ग्य' शब्द से 'च्वि' प्रत्यय, प्रकृत सूत्र से यलोप तथा दीर्घ।

९. **गार्गी स्त्री।** गर्ग + ण्य + ई + सि। गर्गस्यापत्यं स्त्री। 'गर्ग' शब्द से 'ण्य'

प्रत्यय, 'ई' प्रत्यय, प्रकृत सूत्र से यकारलोप, लिङ्गसंज्ञा, सि—प्रत्यय तथा उसका लोप।। ७२५।

## ७२६. नलोपश्च [३। ६। ४६]

### [सूत्रार्थ]

'यिन्—आयि' प्रत्ययों के परे रहते शब्दगत नकार का लोप होता है। नियमसूत्र के अनुसार 'यिन्—आयि' प्रत्ययों के परे रहते केवल नलोप ही होता है।। ७२६।

### [दु० वृ०]

नकारो लुप्यते येन स नलोपो योगः। अर्थाद् यिन्नाय्योर्नलोप एव करणीयः। विद्वस्यति, विद्वस्यते। एवं राजीयति, पथीयति, पुंस्यतीत्यपि नियमः किम् ? दीव्यतीत्यपि। कथं चतुर्यति, अनडुह्यति, गीर्य्यति, धूर्य्यति। शब्दाश्रयत्वाद् विनियमः। सर्पिष्यति, धनुष्यतीति यत्वं स्यादेव। गोमत्यतीति क्विप्। कथं गोमान्, पचन्, पुमान् ? यिन्नाय्योर्घुटि **प्रत्ययलोपलक्षणस्यानित्यत्वात्**। उदनुबन्धशन्तृङ्पुंसामेवेति।। ७२६।

### [दु० टी०]

**नलोप**ः। लुप्यते इति **लोपः**। कर्मणि ञ्। लोपनं लोपः, भिन्नाधिकरणो वा **बहुव्रीहिरिति** मनसि कृत्वाह – नकार इत्यादि। योगोऽभिधीयमानो व्यञ्जनमेव **सन्निधापयतीतरस्य** च निवृत्तिरित्याह—अर्थादिति। यदि पुर्ननस्य लोपः इति तत्पुरुष उच्यते **विधिरयं** स्यान्न नियमः, ततश्च 'अग्नीयति, धनीयति' इति नलोपः प्रसज्येत, बहुव्रीह्यर्थमेव पुनर्लोपग्रहणम्, अन्यथा नस्येति विदध्यात्। पुंस्यतीत्यपि इति। अत्रानशब्दग्रहणसामर्थ्याद् अकारस्यापि लोपो भवतीत्यर्थः। दिव्यतीत्यादि। आदिग्रहणेन **''विरामव्यञ्जनादिष्वनडुन्नहिवन्सीनाम्''** (२। ३। ४४) इति प्रभृतय आख्यायन्ते। कथमित्यादि। नकारो हि वर्णस्तदपेक्षया वर्णकार्यस्य निवृत्तिरिति भावः। सर्पिष्यतीत्यादि। **नलोपो** हि व्यञ्जननिमित्तको व्यञ्जनाश्रितमेव कार्यं व्यावर्तयति। तेन **''इसुस्दोषां घोषवति र:''** (२। ३। ५९) इति रत्वं न भवतीत्यर्थः। **अन्य** आह— अपिशब्दस्य बहुलार्थत्वाद् **यत्वमेवेति**। कथमित्यादि। एवं पचन्तमिच्छति, पुमांसमिच्छतीति यिन्, ततः क्विप्। **यिन्नाय्योरित्यादि**। **''य्वोर्व्यञ्जनेऽये''** (४।१। ३५) इति यलोपे घुङ्विषये न प्रत्ययलोपे प्रत्ययलक्षणम् इत्यर्थः। उदनुबन्धशन्तृङ्पुंसामेवेति एवग्रहणेन पथीयते:, मथीयतेः क्विप्— पथ्यौ, मथ्यौ।। ७२६।

### [वि० प०]

नलोपः। नकारो लुप्यते येनेति नलोपयोगे च प्रायेण व्यञ्जनमेव निमित्तमित्यत्रापि तदेवेत्यन्यस्य निवृत्तिरित्याह— अर्थादित्यादि। तर्हि च्विप्रत्ययेऽपि व्यञ्जने स्यादिति ? सत्यम्। एतदर्थमेव गणात् पृथग् आयिरित्युक्तम् इति चेत्, अर्थायत्तत्वाद् योगो ह्यभिधीयमानो व्यञ्जनमेव निमित्तं सन्निधापयति, तत्र नलोपस्य प्रायेण तन्निमित्तत्वादिति। ननु बहुव्रीहिणा य एव योगोऽभिधीयते तेनैव लोपः सिद्धः, किमर्थमिदम् ? सत्यम्,

नियमार्थमित्याह – यिन्नाय्योर्नलोप एवेति। यदि पुनर्नस्य लोपो **नलोपः** इति तत्पुरुषः स्यात् तदा विधिरयं स्यात्, न नियमः। ततश्च 'अग्नीयति, धनीयति' इत्यादावपि नलोपः प्रसज्येत। अत एव बहुव्रीह्यर्थमेव पुनर्लोपग्रहणम्, अन्यथा नस्य चेति विदध्यात्, अनुवर्तते एव हि लोप इति। 'विद्वांसमिच्छति, विद्वानिवाचरति' इति विगृह्य यिन्नायी **''अनुषङ्गश्चाक्रुश्चेत्''** (२। २। ३९) लिङ्गान्तनकारस्य **''व्यञ्जने चैषां निः''** (२। २। ३८) इत्येतेषामुदाहरणं दर्शितम्। पुंस्यतीत्यपीति। **''पुंसोऽनूशब्दलोपः''** (२। २। ४०) इत्यत्रानूशब्दलोपग्रहणसामर्थ्यादकारस्यापि लोप इति, अन्यथा अनुषङ्गलोपस्य सिद्धत्वात् पुंसोऽलोप इति कृते सिध्यतीति भावः। नियमः किमिति। अन्यथा दिवमिच्छतीति यिनि कृते **''दिव उद् व्यञ्जने''** (२। २। २५) इति वकारस्योत्वं स्यात्। आदिग्रहणेन 'विद्वस्यति' इत्यादौ ''विरामव्यञ्जनादिष्वनडुन्नहि०'' (२। ३। ४४) इत्यादिना दत्वादिकञ्च न स्याद् इति दर्शितम्।

**कथमित्यादि**। नकारोऽयं वर्णस्तदपेक्षया वर्णाश्रयमेव कार्यं नियमेन व्यावर्त्यते इति **भावः**। 'सर्पिष्यति, धनुष्यति' इत्यादि। नलोपो हि व्यञ्जननिमित्तकः सन्निधानाद् व्यञ्जनाश्रितमेव कार्यं व्यावर्त्तयितुमर्हतीति, तेन **''इसुस्दोषां षोषवति रः''** (२। ३। ५९) इति रत्वं न भवति। यत्वं पुनरपेक्षितपरनिमित्तं पूर्वं नामिनमाश्रित्य स्यादेव। गोमन्तमिच्छति, पचन्तमिच्छति, पुमांसमिच्छतीति यिन्, ततो नलोपे सति क्विप् **''य्वोर्व्यञ्जनेऽये''** (४। १। ३५) इति यिनो यकारलोपः, ततो भूतपूर्वा **प्रकृति**रिहानिदनुबन्धानाम् इति पर्युदासाश्रयणाद् गणपरिपठितानामेषामेवानुषङ्गलोपः क्विपि नास्ति, प्रत्ययलोपलक्षणेन यिनि पुनः प्राप्नोतीति चेद् दर्शयन्नाह– कथमित्यादि। यिन्नाय्योर्घुङ्विषये परिभाषेय– मनित्येत्यर्थः। उदनुबन्धशन्तृङ्पुंसामेवेति। अन्यत्र प्रत्ययलोपलक्षणं स्यादेव। यथा पन्थानमिच्छति, पन्था इवाचरतीति पूर्ववद् यिन्यायौ च कृते पथ्यौ, मथ्याविति। ननु गोमानिति कथमिह दीर्घो भवति, धातुत्वात् ? सत्यम्। **''अन्त्वसन्तस्य चाधातोः सौ''** (२। २। २०) इति, तत्रान्तग्रहणमौपदेशिकधातुप्रतिपादनार्थम् अयं चोपदेशावस्थायाम– धातुरेव। **''ते धातवः''** (३। २। १६) इत्यनेन यिनन्तस्य धातुत्वात्। तथा पुमानित्यत्रापि ''सान्तमहतोर्नोपधायाः'' (२।२। १८) इति दीर्घो न विहन्यते।। ७२६।।

## [बि० टी०]

नलोपः। **[पाठान्तरम्** – राजीयति, पथीयतीति। ननु **''यिन्यवर्णस्य, नाम्यन्तानाम्''** (३। ४। ७८, ७०) इत्यादिना यिनि ईत्त्वं दीर्घत्वं च न स्यात्। नलोपश्चेति वचनं चतुष्टयप्रकरणकार्यं विदधाति, व्यावृत्तिस्तु तत्प्रकरणीयकार्ये कर्तव्ये स्यात्, नान्यस्मिन् प्रकरणीये इति **केचित्**। यथा नलोपो हि व्यञ्जनकार्यम्, अन्यथा व्यञ्जनकार्ये कर्तव्ये व्यावृत्तिः स्यात्। अत्र तु स्वरस्य कार्यमिति, तदसत्। यावता **ज्ञापकस्य** सर्वोद्दिष्टत्वाद् यावन्ति कार्याणि प्राप्नुवन्ति तावन्त्येव नियमेन व्यावर्त्यन्ते, तत् कथं चतुष्टय– प्रकरणविहितस्यैव व्यावर्तनमिति निश्चितम्। **वस्तुतस्तु** राजीयतीत्यत्र **''यिन्यवर्णस्य''**

(३।४।७८) इति सूत्रबलात् पथीयतीत्यत्र नाम्यन्तानाम् इत्यत्र यिन उपादानाद् ईत्त्वं दीर्घत्वं च स्यात्। अन्यथा यिनि यस्य व्यावृत्तिबलात् तयोर्विषय एव नास्तीति]।

नकारो लुप्यते येनेत्यनेन बहुव्रीहेरर्थकथनवाक्यं दर्शितम्। लोपे इति यदा कर्मणि घञ्, तदा नकारो लोपो येन समानाधिकरणोऽयं बहुव्रीहिः, यदा भावे घञ् तदा नकारस्य लोपो येनेति भिन्नाधिकरणोऽयं बहुव्रीहिः। पुंस्यतीत्यपीति। नियमद्वारेण अकारलोपो न प्राप्नोतीति शब्दकार्यत्वाल्लोपः प्राप्तः। तर्हि यदि शब्दकार्यत्वादेव सिद्धस्तदा चतुर्यतीत्यादिषु कथं न पठितः ? सत्यम्। 'चतुर्य्यति' इत्यत्र नियम सामर्थ्यान्न प्राप्नोतीति अत्र विधिः, अत्र नियमो घटते, नकारलोपे विधिः अकारलोपे नियम इति तेषां मध्ये न पठितः। अकारलोपस्तु **''पुंसोऽन्शब्दलोपः''** (२।२।४०) इत्यत्र नकारकरणसामर्थ्यादित्यर्थः। अन्यथा अलोप इत्यास्ताम् **''अनुषङ्गश्चाक्रुञ्चेत्''** (२।२।३९) इत्यनेन नकारलोपः सिद्ध एव।। ७२६।

## [समीक्षा]

कातन्त्रीय व्याख्याकारों के अनुसार प्रकृत सूत्र नियमसूत्र है, विधिसूत्र नहीं। अतः 'यिन्—आयि' प्रत्ययों के परे रहते केवल नलोप ही होता है, अन्य कार्य नहीं। पाणिनि ने इस प्रकार का नियम नहीं बनाया है। उनके नलोपविधायक सूत्र हैं — ''अनिदितां हल उपधायाः क्ङिति, ''अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति (अ० ६।४।२४, ३७)।

## [विशेष वचन]

१. कथं 'गोमान्, पचन्, पुमान्' ? यिन्नाय्योर्घुटि प्रत्ययलोपलक्षणस्यानित्यत्वात् (दु० वृ०)।

२. योगोऽभिधीयमानो व्यञ्जनमेव सन्निधापयतीतरस्य च निवृत्तिरित्याह—अर्थादिति (दु० टी०)।

३. नकारो हि वर्णस्तदपेक्षया वर्णकार्यस्य निवृत्तिरिति भावः (दु० टी०)।

४. नलोपो हि व्यञ्जननिमित्तको व्यञ्जनाश्रितमेव कार्यं व्यावर्तयति (दु० टी०)।

५. एतदर्थमेव गणात् पृथगायिरित्युक्तम्, सौत्रयोरेव यिन्नाय्योरनुवर्तनार्थम् (वि० प०)।

६. अत एव बहुव्रीह्यर्थमेव पुनर्लोपग्रहणम् (वि० प०)।

७. नकारोऽयं वर्णस्तदपेक्षया वर्णाश्रयमेव कार्यं नियमेन व्यावर्त्यते इति भावः (वि० प०)।

८. साहचर्यान्नलोपश्चेति वचनं चतुष्टयप्रकरणविहितमेव कार्यं विदधाति (बि० टी०)।

९. ज्ञापकस्य सर्वोद्दिष्टत्वाद् यावन्ति कार्याणि प्राप्नुवन्ति तावन्त्येव नियमेन व्यावर्त्यन्ते (बि० टी०)।

## [रूपसिद्धि]

१. **विद्वस्यति।** विद्वन्स् + यिन् + अन् + ति। विद्वांसमिच्छति। 'विद्वन्स्' शब्द से "नाम्न आत्मेच्छायां यिन्" (३।२।५) सूत्र द्वारा 'यिन्' प्रत्यय, समास, विभक्तिलोप, "व्यञ्जनान्तस्य यत् सुभोः" (२।५।४) से अतिदेश, "अनुषङ्गश्चाक्रुञ्चेत्" (२। २। ३९) से नलोप "ते धातवः" (३। २। १६) से 'विद्वस्य' की धातुसंज्ञा, वर्तमाना–विभक्तिसंज्ञक प्र० पु० – ए० व० 'ति' प्रत्यय, "अन् विकरणः कर्तरि" (३।२।३२) से 'अन्' विकरण तथा 'न्' अनुबन्ध का प्रयोगाभाव। यहाँ केवल नलोप ही हुआ है "विरामव्यञ्जनादिष्वनडुन्नहिवन्सीनां च" (२।३।४४) से स् को द् आदेश नहीं।

२. **विद्वस्यते।** विद्वन्स् + आयि + अन् + ते। विद्वानिवाचरति। 'विद्वन्स्' शब्द से "कर्तुरायिः सलोपश्च" (३।२।८) से 'आयि' प्रत्यय, नलोप, "नामिव्यञ्जनान्तादायेरादेः" (३।६।४२) से 'आयि' प्रत्यय के आकार का लोप, इकार उच्चारणार्थ, 'विद्वस्य' की धातुसंज्ञा, 'ते' प्रत्यय तथा 'अन्' विकरण।

३. **राजीयति।** राजन् + यिन् + अन् + ति। राजानमिच्छति। 'राजन्' शब्द से 'यिन्' प्रत्यय, नलोप "यिन्यवर्णस्य" (३। ४। ७८) से अकार को ईकार, 'राजीय्' की धातुसंज्ञा, 'ति' प्रत्यय तथा 'अन्' विकरण।

४. **पथीयति।** पथिन् + यिन् + अन् + ति। पन्थानमिच्छति। 'पथिन्' शब्द से 'यिन्' प्रत्यय, नलोप, दीर्घ, 'पथीय्' की धातुसंज्ञा, 'ति' प्रत्यय, 'अन्' विकरण तथा 'न्' अनुबन्ध का प्रयोगाभाव।

५. **पुंस्यति।** पुमन्स् + यिन् + अन् + ति। पुमांसमिच्छति। 'पुमन्स्' शब्द से 'यिन्' प्रत्यय, "पुंसोऽन्शब्दलोपः" (२। २। ४०) से 'अन्' का लोप, 'म्' को अनुस्वार, 'पुंस्य्' की धातुसंज्ञा, 'ति' प्रत्यय, 'अन्' विकरण तथा 'न्' अनुबन्ध का प्रयोगाभाव।। ७२६।

## ७२७. व्यञ्जनाद् दिस्योः [३। ६। ४७]

## [सूत्रार्थ]

व्यञ्जनान्त धातु से परे 'दि–सि' प्रत्ययों का लोप होता है।। ७२७।

## [दु० वृ०]

धातोर्व्यञ्जनाद् दिस्योर्लोपो भवति। अधोक्, अलेट्। कथं हंसि ? साहचर्यात्।। ७२७।

## [दु० टी०]

व्यञ्ज०। कथमित्यादि। दिसहचरितः सिः सानुबन्धो गृह्यते इत्यर्थः। केचिद् व्यञ्जनेन धातुं न विशेषयन्ति। **'आगमशासनमनित्यम्'** (का० परि० २१) इतीटोऽभावे सिचः सेर्लोपो भवति।

**मा भैः शशाङ्क! मम सीधुनि नास्ति राहुः खे रोहिणी वसति कातर किं बिभेषि।**
**प्रायो विदग्धवनितानवसङ्गमेषु पुंसां मनो विचलतीति किमत्र चित्रम्।।**

अत्रालंकारसौन्दर्यादपप्रयोगोऽपि प्रसिद्धिमुपगतो न पुनरेवमागमः इति।। ७२७।

## [समीक्षा]

'अधोक्, अलेट्' आदि शब्दों के सिद्ध्यर्थ 'दि–सि' प्रत्ययों के लोप की व्यवस्था दोनों ही व्याकरणों में की गई है। पाणिनि का सूत्र है – ''हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्'' (अ० ६।१।६८)। यह ज्ञातव्य है कि ह्यस्तनी–अद्यतनी–प्र० पु० – ए० व० में कातन्त्रकार ने 'दि' प्रत्यय किया है, परन्तु पाणिनि तदर्थ 'तिप्' प्रत्यय करते हैं। तदनुसार ही सूत्रों में उनका उल्लेख हुआ है। पाणिनि ने 'ह्यस्तनी – अद्यतनी' के लिए 'लङ्–लुङ्' लकारों का प्रयोग किया है।

## [विशेष वचन]

१. कथं हंसि ? साहचर्यात् (दु० वृ०)।

२. दिसहचरितः सिः सानुबन्धो गृह्यते इत्यर्थः (दु० टी०)।

३. साहचर्यादिति सानुबन्धेन दिना सहचरितः सिरपि सानुबन्धो गृह्यते न निरनुबन्धो वर्तमानाया इत्यर्थः (वि० प०)।

## [रूपसिद्धि]

१. **अधोक्।** अट् + दुह् + दि, सि। 'दुह प्रपूरणे' (२।६१) धातु से ह्यस्तनी–विभक्तिसंज्ञक परस्मैपद – प्र० पु० – म० पु० – ए० व० 'दि–सि' प्रत्यय, ''अड् धात्वादिर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु'' (३।८।१६) से धातुपूर्व अडागम, 'अन्' विकरण का लुक्, ''दादेर्घः'' (३।६।५७) से धातुघटित हकार को घकार, ''नामिनश्चोपधाया लघोः'' (३।५।२) से उपधा–नामि उकार को गुण, प्रकृत सूत्र से दि–सिलोप, ''लोपे च दिस्योः'' (३।६।१०१) से दकार को धकार, तथा पदान्ते धुटां प्रथमः'' (३।८।१) से घकार को ककारादेश।

२. **अलेट्।** अट् + लिह् + ह्यस्तनी –दि, सि। 'लिह आस्वादने' (२।६३) से ह्यस्तनीसंज्ञक परस्मैपद – प्र० पु० – म० पु० – ए० व० 'दि–सि' प्रत्यय, अडागम, अन्लुक्, उपधागुण, ''हो ढः'' (३।६।५६) से हकार को ढकार, प्रकृत सूत्र से 'दि–सि' प्रत्ययों का लोप तथा ''पदान्ते धुटां प्रथमः'' (३।८।१) से ढकार को टकार आदेश।। ७२७।

# ७२८. यस्याननि [३।६।४८]

## [सूत्रार्थ]

अन्भिन्न प्रत्यय के परे रहते व्यञ्जनवर्ण से परवर्ती धात्ववयव यकार का लोप होता है।। ७२८।

## [दु० वृ०]

यस्येत्यकार **उच्चारणार्थः**। व्यञ्जनात् परस्य धातोर्यस्यानि प्रत्यये परे लोपो

भवति। बेभिदिता। दृशदमिच्छति आचरति वा दृशदिता। भिषज्यधातुः कण्ड्वादौ – भिषजिता। यिन्नाय्योर्नेच्छन्त्येके, तेनोभयप्रमाणत्वाद् विकल्प इति। वक्ष्यमाणलोपोक्ते– र्द्वियकारपाठाद् वा मव्यादीनामदोषः। मव्यिता, सूर्क्षियता, ईर्ष्यिता, शुच्यिता। व्यञ्जनादिष्विति किम् ? लोलूयिता। इनो लोपेऽयादेशे च–मोमूत्रिता, शाशयिता। धातोर्यस्येति किम् ? पच्यते। अननीति किम् ? पापच्यते।। ७२८।

## [दु० टी०]

यस्या०। बेभिदितेति। नहि यलोपेनाकारलोपस्य बाधा धातुपरत्वाद् अस्य च लोपे यलोप इति। कण्ड्वादयोऽत्रादन्ता एव **धातवः**। यिन्नाय्योरित्यादि। पक्षे समिध्यिता, समिध्यिषीष्ट, दृशद्यिता, दृशद्यिषीष्ट। अस्य च लोप इत्यत्र पुनर्लोपग्रहणं पूर्वलोपस्या**नित्यत्वार्थम्**। **अनित्यत्वं** च लक्ष्यते इति। द्वियकारपाठाद् वेति। वाग्रहणं **पूर्वपक्षार्थम्**। **'मव्य, मव बन्धने, सूर्क्ष्य ईर्क्ष्य ईर्ष्य ईर्ष्यार्थाः'** (१।१६२, २१२) इति द्वियकारा एव पठ्यन्ते यलोपे पुनर्लोपो न भवति, व्यक्तावपि द्वियकारपाठबलात्, अन्यथा द्वियकारपाठोऽनर्थकः स्यात् श्रुतेरभेदात्। यकारः सस्वर इह गृह्यते **इत्येके**। आत्मेच्छायां यन् कर्तुराय इति साकारः पठितव्यः।

ननु 'दृशदिता, दृशद्यिता' इति विकल्पेऽस्य च लोपस्य बाधा स्यात् तत्प्राप्तावार– ब्धत्वात् ? सत्यम्, अस्य च लोपो व्यक्तौ भविष्यति मव्यादीनामस्वरस्य कुतः प्रसङ्गः ? इनो लोपेऽयादेशे चेति **'मूत्र प्रस्रवणे'** (९। २२२) इति चौरादिकः **''कारितस्यानाम् इड्विकरणे''** (३। ६। ४४) इति कारितलोपे **''अयीर्ये''** (३। ६। १९) इत्ययादेशे च व्यञ्जनात् परो यकारो भवतीत्यर्थः। एवं **'सूच पैशुन्ये'** (९। १९१) सोसूचिता, **'सूत्र अवमोचने'** (९।२२१)- सोसूत्रिता। 'पापच्यते' इति। न विद्यतेऽन् यस्मिन्निति बहुव्रीहौ न अन् **'अनन्'** इति तत्पुरुषेऽपि प्राप्नोतीति भावः। अथ विषयसप्तम्या एव भविष्यति **प्रतिपत्तिरियं गरीयसी स्यात्**। यदि व्यञ्जनान्ताद् धातोरिति विशिष्यते तदा **चेक्रीयितस्यैव** स्यात्, तस्माद् धातोर्यस्येति युक्तम्।। ७२८।

## [वि० प०]

यस्या०। बेभिदितेति। भिदेश्च**ेक्रीयितम्**, इह परत्वाद् अस्य च लोपे यलोप इति। यिन्नाय्योरित्यादि। पक्षे दृशदितेति विकल्पोऽपि वक्ष्यमाणेन पुनर्लोपग्रहणेन पूर्वलोप– स्यानित्यत्वादेव भवति। मव्यादीनामिति। **'मव्य मव बन्धने, सूर्क्ष्य ईर्क्ष्य ईर्ष्य ईर्ष्यार्थाः, शुच्यी चुच्यी अभिषवे'** (१। १६२, २१२, १६४) इति मव्यादयः। **'मूत्र प्रस्रवणे'** (९। २२। २) चुरादित्वादिन्। 'शीङ् स्वप्ने' (२। ५५), स्वरान्तत्वात् कथं चेक्रीयितस्य लोप इत्याह – इनो लोपे अयादेशे चेति। कारितस्य लोपे **''अयीर्ये''** (३। ६। १९) इत्ययादेशे च व्यञ्जनात् परो यकार इति भावः।। ७२८।

## [समीक्षा]

'बेभिदिता, दृशदिता' इत्यादि शब्दों के सिद्ध्यर्थ यकारलोप का विधान दोनों व्याकरणों में किया गया है। पाणिनि के सूत्र हैं – ''यस्य हलः, क्यस्य विभाषा'' (अ० ६। ४। ४९, ५०)। कातन्त्रवृत्तिकार दुर्गसिंह ने विकल्प के लिए पृथक् सूत्र बनाने की आवश्यकता नहीं समझी है, किन्तु उन्होंने प्रमाणवचन के बल पर वैकल्पिक विधान सिद्ध किया है।

## [विशेष वचन]

१. यिन्नाय्योर्नेच्छन्त्येके, तेनोभयप्रमाणत्वाद् विकल्प इति (दु० वृ०)।
२. वक्ष्यमाणलोपोक्तेर्द्वियकारपाठाद् वा मव्यादीनामदोषः (दु० वृ०)।
३. पुनर्लोपग्रहणं पूर्वलोपस्यानित्यत्वार्थम् (दु० टी०)।
४. द्वियकारपाठाद् वेति वाग्रहणं पूर्वपक्षार्थम् (दु० टी०)।
५. प्रतिपत्तिरियं गरीयसी स्यात् (दु० टी०)।
६. विकल्पोऽपि वक्ष्यमाणेन पुनर्लोपग्रहणेन पूर्वलोपस्यानित्यत्वादेव भवति (वि० प०)।

## [रूपसिद्धि]

१. **बेभिदिता।** भिद् + य, + इट् + ता। 'भिदिर् विदारणे' (६।२) धातु से ''धातोर्यशब्दश्चेक्रीयितं क्रियासमभिहारे'' (३। २। १४) सूत्र द्वारा 'पुनः पुनर्भेत्ता' इस अर्थ में चेक्रीयितसंज्ञक 'य' प्रत्यय, ''चण्परोक्षाचेक्रीयितसनन्तेषु'' (३।३।७) से धातु को द्वित्व, ''पूर्वोऽभ्यासः'' (३।३।४) से पूर्ववर्ती 'भिद्' की अभ्याससंज्ञा, ''अभ्यासस्यादिर्व्यञ्जनमवशेष्यम्'' (३। ३। ९) से 'द्' का लोप, ''गुणश्चेक्रीयिते'' (३।३।२८) से अभ्यासघटित इकार को गुण–एकार, ''ते धातवः'' (३। २। १६) से 'बेभिद्य' की धातुसंज्ञा, श्वस्तनीसंज्ञक प्र० पु० – ए० व० 'ता' प्रत्यय, ''इडागमोऽसार्व–धातुकस्यादिर्व्यञ्जनादेरयकारादेः'' (३। ७। १) से इडागम तथा प्रकृत सूत्र से यलोप।

२. **दृशदिता, दृशद्यिता।** दृशद् + यिन् + इट् + ता। दृशदमिच्छति आचरति वा। 'दृशद्' शब्द से इच्छा या आचार अर्थ में ''नाम्न आत्मेच्छायां यिन्'' (३। २। ५) सूत्र द्वारा 'यिन्' प्रत्यय, ''ते धातवः'' (३। २। १६) से 'दृशद्य' की धातुसंज्ञा, श्वस्तनीसंज्ञक 'ता' प्रत्यय, इडागम तथा विकल्प से यकारलोप।

३. **भिषजिता।** भिषज् + इट् + श्वस्तनी–ता। कण्ड्वादिगणपंठित 'भिषज्य चिकित्सायाम्' (१७) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय, इडागम तथा प्रकृत सूत्र से यकारलोप।। ७२८।

## ७२९. अस्य च लोपः [३। ६। ४९]

## [सूत्रार्थ]

'अन्' से भिन्न प्रत्यय के परे रहते धातु के अकार का लोप होता है।। ७२९।

## [दु० वृ०]

धातोरकारस्याननि प्रत्यये परे लोपो भवति। चिकीर्षिता। कुसुभं मगधं कर्ता कुसुभिता, मगधिता। विषयसप्तम्यपि। कण्डूः, लोलूः, यायावरः। तेनास्य च लोपे यलोपः स्यात्।। ७२९।

## [दु० टी०]

अस्य०। कुसुभं मगधं कर्तेति कुसुभ्यमगध्ययो**रन्वाख्यानम्**। अथ धातोरित्यधिकारः किमर्थः, धातोरनवयवस्य मा भूत् – अधुक्षदिति ? नैवम्, उपदेशसामर्थ्यात् **''सणोऽलोपः स्वरेऽबहुत्वे''** (३। ६। ३३) इति वचनाच्च अपुषदित्यणस्तर्हि प्राप्नोति प्रत्ययलोपे प्रत्ययलक्षणम् इति गुणप्रतिषेधः फलम्, णानुबन्धत्वात्। सिज्बाधाच्चणोऽपि द्विर्वचनम् अदुद्रुवदिति। व्यञ्जनादिति न सम्बध्यते, व्यावृत्तेरभावात्। विषयेत्यादि। यदि पुनरत्र परसप्तमी स्यात् तदा स्वरादेशस्य स्थानिवद्भावाद् यलोपो न स्यात्। अपिशब्देन परसप्तमी च कथ्यते, तेन 'अर्थान् प्रतीषिषति' इति **''स्वरादेर्द्वितीयस्य''** (३।३।२) इति द्विर्वचनं स्यात्। कार्यानुरोधादेकापीयं सप्तमी द्विधा वर्तते इति।। ७२९।

## [वि० प०]

अस्य च। कुसुभं मगधं कर्तेति कुसुभ्यमगध्ययोः कण्डूयादिपठितयोरन्वाख्यानमिदम्। विषयेत्यादि। यदि निमित्तसप्तमीयं स्यात् तदा **'स्वरादेशः परनिमित्तकः पूर्वविधिं प्रति स्थानिवत्'** (का० परि० ९) इति लुप्तस्याकारस्य स्थानिवद्भावात् **''य्वोर्व्यञ्जनेऽये''** (४। १। ३५) इति यलोपो न स्यात्। विषयसप्तम्यां तु नायं परनिमित्तकः इति न स्थानिवद् भवति। अपिशब्दात् परसप्तमी च। तेनार्थान् प्रतीषिषतीति सिद्धम्। अन्यथा पूर्वमकारस्य लोपे ''स्वरादेर्द्वितीयस्य'' (३।३।२) इति द्विर्वचनं स्यात्, अस्वरत्वात्। **यायावर** इति ततो यातेर्वरः।। ७२९।

## [समीक्षा]

'चिकीर्षिता, चिकीर्षितुम्, धिनुतः, कुसुभिता' इत्यादि शब्दों के सिद्ध्यर्थ अकारलोप का विधान दोनों व्याकरणों में किया गया है। पाणिनि का सूत्र है – ''अतो लोपः'' (अ० ६।४।४८)। अतः उभयत्र समानता ही है।

## [विशेष वचन]

१. विषयसप्तम्यपि – कण्डूः, लोलूः, यायावरः। तेनास्य च लोपे यलोपः स्यात् (दु० वृ०)।

२. व्यञ्जनादिति न सम्बध्यते व्यावृत्तेरभावात् (दु० टी०)।

३. कार्यानुरोधादेकापीयं सप्तमी द्विधा वर्तते इति (दु० टी०)।

४. अपिशब्दात् परसप्तमी च (वि० प०)।

## [रूपसिद्धि]

१. **चिकीर्षिता।** कृ + सन् + इट् + ता। 'डु कृञ् करणे' (७। ७) धातु से ''धातोर्वा तुमन्तादिच्छतिनैककर्तृकात्'' (३।२।४) सूत्र द्वारा 'सन्' प्रत्यय, ''चण्परोक्षा–चेक्रीयितसनन्तेषु'' (३।३।७) से धातु को द्वित्व, पूर्ववर्ती 'कृ' की अभ्याससंज्ञा, ''ऋवर्णस्याकारः'' (३। ३। १६) से अभ्यासघटित ऋकार को अकार, ''सन्यवर्णस्य'' (३।३।२६) से अकार को इकार, ''कवर्गस्य चवर्गः'' (३। ३। १३) से क् को च्, ''स्वरान्तानां सनि'' (३। ८। १२) से 'कृ' धातुगत 'ऋ' को दीर्घ, ''सनि चानिटि'' (३। ५। ९) से अगुण, ''ऋदन्तस्येरगुणे'' (३। ५। ४२) से 'ऋ' को 'इर्' ''नामिनो र्वोरकुर्छुरोर्व्यञ्जने'' (३। ८। १४) से इकार को ईकार, ''निमित्तात् प्रत्ययविकारागमस्थः सः षत्वम्'' (३।८।२६) से 'स्' को 'ष्', ''ते धातवः'' (३।२। १६) से 'चिकीर्ष' की धातुसंज्ञा, श्वस्तनीसंज्ञक 'ता' प्रत्यय, इडागम तथा प्रकृत सूत्र से अकार का लोप। बङ्ग-भाष्यकारों ने 'कृ' धातु से 'सन्' प्रत्यय होने पर 'ऋ' को 'इर्' आदेश करके 'किर्' को द्वित्व किया है।

२. **कुसुभिता।** कुसुभ्य + इ + ता। 'कुसुभ्य क्षेपे' (कण्ड्वादि० ११) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय, इडागम तथा अकार का लोप।

३. **मगधिता।** मगध्य + इ + ता। 'मगध्य परिवेष्टने' (कण्ड्वा० १२) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय, इडागम तथा प्रकृत सूत्र यकारगत अकार का लोप।। ७२९।

## ७३०. सिचो धकारे [३। ६। ५०]

## [सूत्रार्थ]

धकार के परे रहने पर सिच् प्रत्यय का लोप होता है।। ७३०।

## [दु० वृ०]

धकारे परे सिचो लोपो भवति। अलविढ्वम्, अच्योढ्वम्। अयं ध्वमिति सस्य तृतीयेऽपि ध्व–उच्चारणस्याभेदात्।। ७३०।

## [दु० टी०]

सिचः। अयं ध्वमिति। **'यम उपरमे'** (१। १५८), अत्र सिचो लोपो न प्राप्नोति। अन्यार्थं क्रियमाणमिहापि लक्षणमस्तीति प्रवर्तते।। ७३०।

## [वि० प०]

सिचो०। **''नाम्यन्ताद् धातोः०''** (३। ८। २२) इत्यादिना धस्य दत्वम्। अयं ध्वमिति **'यम उपरमे'** (१। १५८) इति साध्यभेदो नास्ति। यदि लक्षणमस्तीति तदा लोपः प्रवर्तते, न च काचिद् **वस्तुक्षतिरिति**।। ७३०।

## [समीक्षा]

'अलविढ्वम्, अपविढ्वम्, अच्योढ्वम्' आदि शब्दों के साधनार्थ 'सिच्' प्रत्यय के सकार का लोप दोनों ही व्याकरणों में किया गया है। पाणिनि का सूत्र है – ''धि च'' (अ० ८।२।२५)। यह ज्ञातव्य है कि पाणिनि सकारलोप (रात् सस्य – अ० ८।२।२४) का निर्देश करते हैं, जबकि कातन्त्रकार ने 'सिच्' शब्द का पाठ किया है, जो स्पष्टता का अवबोधक है। पाणिनि का सकारनिर्देश भ्रामक ही कहा जाएगा, क्योंकि यहाँ तात्पर्य सिच्–लोप से ही है।

## [विशेष वचन]

१. अन्यार्थं क्रियमाणमिहापि लक्षणमस्तीति प्रवर्तते (दु० टी०)।

## [रूपसिद्धि]

१. **अलविढ्वम्।** अट् + लू + इट् + ध्वम्। 'लूञ् छेदने' (८।९) धातु से अद्यतनी संज्ञक मध्यम पुरुष–ब० व० 'ध्वम्' प्रत्यय, अडागम, ''सिजद्यतन्याम्'' (३।२।२४) से 'सिच्' प्रत्यय, इडागम, प्रकृत सूत्र से सिच् का लोप, धातुघटित उकार को गुण–ओकार, अवादेश तथा ''नाम्यन्ताद् धातोराशीरद्यतनीपरोक्षासु धो ढः'' (३।८।२२) से धकार को ढकार आदेश्।

२. **अच्योढ्वम्।** अट् + च्यु + सिच् + ध्वम् । 'च्युङ् गतौ' (१।४५९) धातु से अद्यतनीसंज्ञक आत्मनेपद–म० पु०–ब० व० 'ध्वम्' प्रत्यय, अडागम, सिच्–प्रत्यय, ''उतोऽयुरुणुस्नुक्षुक्ष्णुवः'' (३।७।१५) से अनिट्, गुण, प्रकृत सूत्र से 'सिच्' का लोप तथा धकार को ढकार आदेश।। ७३०।

# ७३१. धुटश्च धुटि [३। ६। ५१]

## [सूत्रार्थ]

धुट्संज्ञक वर्ण से परवर्ती सिच् प्रत्यय का लोप होता है, यदि धुट्संज्ञक वर्ण पर में हो तो।। ७३१।

## [दु० वृ०]

धुटः परस्य सिचो लोपो भवति धुटि परे। अभित्त, अभित्थाः। धुट इति किम् ? अमंस्त। धुटीति किम् ? अभित्साताम्।। ७३१।

## [दु० टी०]

धुटः। एवम् अभैत्तम्, अभैत्त। प्रत्ययलोपे प्रत्ययलक्षणमिति ''**व्यञ्जनान्तानाम–निटाम्**'' (३। ६। ७) इति नित्या वृद्धिः स्यात्। कथम् 'अवारिष्टाम्, व्यद्योतिष्ट' इति, सिज्ग्रहणेनेटो ग्रहणाल्लोपः प्रसज्येत ? सत्यम्, इह धुड्मात्रं गृह्यते न धुडन्तो धातुरयम् इकारात् परः सिज् इति न दुष्यति। यदीह सिज्लोपविधौ तदन्तविधिना धातुरुच्यते, तदा ''**ह्रस्वाच्चानिटः**'' (३। ६। ५२) इत्यनिड्ग्रहणमनर्थकं स्यात्। **अन्य** आह- '**निर्दिश्यमान–**

**स्यादेशः'** (का० परि० ७) इति न सेटः प्राप्तिः। **''ह्रस्वाच्चानिटः''** (३। ६। ५२) इत्यनिड्ग्रहणं स्वरूपविशेषणं **मन्दमतिबोधनार्थमिति** वक्ष्यति। नेटः परस्य वेति **सुखार्थम्**, वाशब्द इह **पक्षद्वयान्वयार्थः**।। ७३१।

## [समीक्षा]

'अभित्त, अभित्थाः, अवात्ताम्, अच्छित्त' इत्यादि शब्दरूपों के साधनार्थ सिच् प्रत्यय का लोप दोनों व्याकरणों में किया गया है। पाणिनि का सूत्र है – ''झलो झलि'' (अ० ८।२।२६)। ज्ञातव्य है कि पाणिनीय झल् प्रत्याहार में वर्गीय प्रथम, द्वितीय, तृतीय, चतुर्थ वर्णों का तथा ऊष्मसंज्ञक 'श् ष् स् ह्' कुल = २४ वर्णों का समावेश किया गया है। कातन्त्रकार ने इन्हीं वर्णों की ''धुड् व्यञ्जनमनन्तःस्थानुनासिकम्'' (२। १। १३) सूत्र द्वारा 'धुट्' संज्ञा की है। तदनुसार ही यहाँ सूत्रों में उन शब्दों का प्रयोग किया गया है।

## [विशेष वचन]

१. ह्रस्वाच्चानिट इत्यनिड्ग्रहणं स्वरूपविशेषणं मन्दमतिबोधनार्थम् (दु० टी०)।

२. नेटः परस्य वेति सुखार्थम् (दु० टी०)।

३. वाशब्द इह पक्षद्वयान्वयार्थः (दु० टी०)।

## [रूपसिद्धि]

१. **अभित्त**। अट् + भिद् + सिच् + त। 'भिदिर् विदारणे' (६।२) धातु से अद्यतनीविभक्ति– संज्ञक आत्मनेपद – प्र० पु० – ए० व० 'त' प्रत्यय, अडागम, सिच् प्रत्यय, प्रकृत सूत्र से सिच् का लोप तथा दकार को तकार।

२. **अभित्थाः**। अट् + भिद् + सिच् + थास् । 'भिदिर् विदारणे' (६।२) धातु से अद्यतनीसंज्ञक – म० पु० – ए० व० 'थास्' प्रत्यय, अडागम, सिच् प्रत्यय, प्रकृत सूत्र से उसका लोप, द् को त् तथा ''रसकारयोर्विसृष्टः'' (३। ८। २) से सकार को विसर्गादेश।। ७३१।

## ७३२. ह्रस्वाच्चानिटः [३। ६। ५२]

## [सूत्रार्थ]

धुट्संज्ञक वर्ण के परे रहते ह्रस्व से परवर्ती अनिट् सिच् का लोप होता है।। ७३२।

## [दु० वृ०]

ह्रस्वात् परस्यानिटः सिचो लोपो भवति धुटि परे। अकृत, अकृथाः। समस्थित, आहत। ह्रस्वादिति किम् ? अच्योष्ट। नेटः परस्य वेति **सुखार्थम्**। तेन अवारिष्टाम्, व्यद्योतिष्ट।। ७३२।

## [वि० प०]

ह्रस्वात्०। समस्थितेति। **''समवप्रविभ्यः''** (३।२।४२–१४) इति रुचादित्वाद् आत्मनेपदम्। **''स्थादोरिरद्यतन्यामात्मने''** (३। ५। २९) इतीकारः। आहतेति। **''आडो यमहनौ स्वाङ्गकर्मकौ च''** (३।२।४२–२२) इत्यनेनात्मनेपदम्। 'हनेः सिच्यात्मने दृष्टः' इति वचनात् पञ्चमलोपः। अथ 'अवारिष्टाम्' इति नित्यत्वादन्तरङ्गत्वाच्च वृद्धौ कृतायां धातोर्ह्रस्वान्तत्वाभावादेवेटः परस्य सिचो लोपो न भवति, किमनिड्ग्रहणेन ? सत्यम्, अनिड्ग्रहणं ज्ञापयति, नात्र सिचो लोपविधौ तदन्तविधिरस्तीति। तेन 'अवारिष्टाम्, व्यद्योतिष्ट' इति सिद्धम्। अन्यथा धुडन्तत्वाद् धातोरिटस्तद्ग्रहणे ग्रहणात् सेटोऽपि सिचः पूर्वेणैव लोपः प्राप्नोति। **सिद्धान्ते** तु नायं धुटः परः सिच्, किन्तर्हि इकारात् स्वरादिति। यदि पुनः **'निर्दिश्यमानानामादेशिनामादेशाः'** (का० परि० ७) इत्युच्यते, न तदा सेटः सिचः प्राप्तिरिति अनिड्ग्रहणं स्वरूपविशेषणं **सुखार्थ**मिति। **पक्षद्वय**मालोच्याह – नेटः परस्य वेति।। ७३२।

## [बि० टी०]

ह्रस्वात्०। इहानिड्ग्रहणं किमर्थमित्याह – नेटः परस्येति। अनिड्ग्रहणाभावे इटः परस्य सिचो लोपो भवतीत्यर्थः। ननु कथमिदमुक्तम् अनिड्ग्रहणाभावे सेटि सिचि लोपः स्यादिति वक्तुं युज्यते, नहि सिज्लोपे प्राप्ते इटमन्तरेण प्राप्नोतीतीटस्तद्ग्रहणेन ग्रहणात्। अत्र **केचिद्** आचक्षते–अत्र चकारोऽध्याहर्तव्यः। इटो लोपो न भवति, परस्य च लोपो न भवतीति। परं तु इटमपेक्ष्य वेदितव्यम्। 'व्यद्योतिष्ट' इत्येकवर्णः **पञ्जीकृता** दत्तः। किञ्च धुड्ग्रहणेन धुड्मात्रं गृह्यते, तत्साहचर्यात् सिचोऽपि वर्णमात्रं गृह्यते इति इदं तु वर्णद्वयम्।। ७३२।

## [समीक्षा]

'अकृत, अकृथाः, समस्थित, आहत' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों व्याकरणों में सिच् का लोप किया गया है। पाणिनि का सूत्र है – ''ह्रस्वादङ्गात्'' (अ० ८।२।२७)। पाणिनीय रचनाक्रम के अनुसार सकार का लोप होता है, क्योंकि ''रात् सस्य'' (अ० ८।२।२४) सूत्रस्थ 'सस्य' की अनुवृत्ति यहाँ होती है। 'सिच्' के अभीष्ट होने पर केवल सकार का प्रयोग अभीष्ट अर्थ का स्पष्ट अवबोध नहीं कराता, व्याख्यान से ही उसका निर्धारण सम्भव होता है। कातन्त्रकार ने 'सिच्' का ही स्पष्ट उल्लेख किया है ''सिचो धकारे'' (३। ६। ५०) सूत्र में, उसी की अनुवृत्ति प्रकृत सूत्र में होने से तात्पर्यबोध सुगमता से हो जाता है।

## [विशेष वचन]

१. नेटः परस्य वेति सुखार्थम्, तेन अवारिष्टात्, व्यद्योतिष्ट (दु० वृ०)।

२. अनिड्ग्रहणं ज्ञापयति नात्र सिचो लोपविधौ तदन्तविधिरस्तीति (दु० टी०)।

३. अनिड्ग्रहणं स्वरूपविशेषणं सुखार्थमिति (दु० टी०)।

## [रूपसिद्धि]

१. **अकृत।** अट् + कृ + सिच् + त। 'डु कृञ् करणे' (७। ७) धातु से अद्यतनी-विभक्तिसंज्ञक आत्मनेपद–प्र० पु०–ए० व० 'त' प्रत्यय, अडागम, ''सिजद्यतन्याम्'' (३। २। २४) से सिच् प्रत्यय, ''ऋतोऽवृङ्वृञः'' (३। ७। १६) से अनिट् तथा प्रकृत सूत्र से उसका लोप।

२. **अकृथाः।** अट् + कृ + सिच् + थास्। 'डु कृञ करणे' (७। ७) धातु से अद्यतनीसंज्ञक म० पु० – ए० व० 'थास्' प्रत्यय, सिच्, अनिट् तथा सिच् का लोप।

३. **समस्थित।** सम् + अट् + स्था + सिच् + त। 'सम्' उपसर्गपूर्वक 'ष्ठा गतिनिवृत्तौ' (१। २६७) धातु से अद्यतनीसंज्ञक 'त' प्रत्यय, अडागम, सिच् प्रत्यय, अनिट्, आकार को इकार तथा सिच् का लोप।

४. **आहत** । आ + हन् + सिच् + त। 'आङ्' उपसर्गपूर्वक 'हन् हिंसागत्योः (२। ४) से अद्यतनीसंज्ञक आत्मनेपद – प्र० पु० – ए० व० 'त' प्रत्यय, अडागम, सिच् प्रत्यय, अनिट्, सिच्–लोप तथा नलोप।। ७३२।

## ७३३. इटश्चेटि [३। ६। ५३]

## [सूत्रार्थ]

इट् से परवर्ती सिच् प्रत्यय का लोप होता है यदि ईट् पर में हो तो।। ७३३।

## [दु० वृ०]

इटः परस्य सिचो लोपो भवति ईटि परे। अरावीत्, अलावीत्, अकोषीत्। इट इति किम् ? अभैत्सीत्। ईटीति किम् ? अकणिषम्।। ७३३।

## [समीक्षा]

'अरावीत्, अलावीत्, अकोषीत्, अमोषीत्' आदि शब्दों के सिद्ध्यर्थ दोनों ही व्याकरणों में सिच् प्रत्यय का लोप किया गया है। पाणिनि का सूत्र है– ''इट ईटि'' (अ० ८। २। २८)। सिच्–सकार के निर्देशार्थ उक्त सूत्र की समीक्षा द्रष्टव्य है।

## [रूपसिद्धि]

१. **अरावीत्।** अट् + रु + अद्यतनी –दि। 'रु शब्दे' (२। १०) धातु से अद्यतनी-विभक्तिसंज्ञक परस्मैपद–प्र० पु० – ए० व० 'दि' प्रत्यय, अडागम, सिच्, इडागम, ईडागम, ''सिचि परस्मै स्वरान्तानाम्'' (३। ६। ६) से धातुघटित उकार को वृद्धि, प्रकृत सूत्र से 'सिच्' का लोप तथा ''पदान्ते धुटां प्रथमः'' (३। ८। १) से दकार को तकारादेश।

२. **अलावीत्।** अट् + लू + अद्यतनी + दि। 'लूञ् छेदने' (८। ९) धातु से

अद्यतनीसंज्ञक 'दि' प्रत्यय, अडागम, सिच्, इट्, ईट्, वृद्धि, सिच् का लोप, आव् आदेश तथा दकार को तकार आदेश।

३. **अकोषीत्**। अट् + कुष् + अद्यतनी–दि। 'कुष निष्कर्षे' (८। ४०) धातु से 'दि' प्रत्यय तथा अन्य प्रक्रिया प्रायः पूर्ववत्।। ७३३।

## ७३४. स्कोः संयोगाद्योरन्ते च [३। ६। ५४]

### [सूत्रार्थ]

धुट् तथा विराम के परे रहते संयागादि धातु के आदि में स्थित 'स्' तथा 'क्' का लोप होता है।। ७३४।

### [दु० वृ०]

धातोः संयोगाद्योः सकारककारयोर्लोपो भवति। धुट्यन्ते च। आरिप्सते, आलिप्सते। चक्षिङ्– आचष्टे। भ्रष्टा, भ्रक्ष्यति। त्वक्षू–त्वष्टिः। क्तौ नेट्। अन्ते चेत्युत्तरार्थम्। **भाषायामपि चेक्रीयितलुगन्तमित्येके**–अवाव्रट्। स्कोरिति किम् ? अकार्ष्टाम्। मृज् – अमार्ट्। धुट्यन्त इति किम् ? भृज्ज्यते, आचक्ष्महे।। ७३४।

### [दु० टी०]

स्कोः। आदिशब्दोऽय**मवयवार्थः**। अन्तशब्दश्च विरामार्थ इति।। ७३४।

### [वि० प०]

स्कोः। आरिप्सते इति। आङ्पूर्वः **'रभ राभस्ये'** (१। ४७१), **''सनि मिमी०''** (३। ३। ३९) इत्यादिना स्वरस्येस् अभ्यासलोपश्च। भ्रष्टा, भ्रक्ष्यतीति। भृजादित्वात् षत्वम्। क्तौ नेडिति। **''घोषवत्योश्च कृति''** (४। ६। ८०) इत्यनेनेत्यर्थः। अबाभ्रडिति। **मतान्तरेण ''तस्य लुगचि''** (४। ४। ४५) इति **योगविभागा**च्चेक्रीयितस्य लोपेऽत्राप्यन्त–ग्रहणस्य फलमित्यर्थः। ह्यस्तनीयम्। स्कोरित्यादि कृषेर्मृजेश्च **''व्यञ्जनान्तानामनिटाम्''** (३। ६। ७) इति वृद्धौ कृतायां **''मर्जो मार्जिः''** (३। ८। २३) इति कृते रेफोऽयं संयोगादिरित्यर्थः। मृजेश्च षत्वं भृजादित्वात्।। ७३४।

### [समीक्षा]

'आरिप्सते, आलिप्सते, लग्नः, आचष्टे, भ्रष्टा, त्वष्टिः' इत्यादि शब्दों के सिद्ध्यर्थ दोनों ही व्याकरणों में सकार–ककारलोप का विधान किया गया है। पाणिनि का सूत्र है– ''स्कोः संयोगाद्योरन्ते च'' (अ० ८। २। २९)।

### [विशेष वचन]

१. अन्ते चेत्युत्तरार्थम् (दु० **वृ**०)।
२. भाषायामपि चेक्रीयितलुगन्तमित्येके (दु० वृ०)।
३. आदिशब्दोऽयमत्रावयव**वार्थः** (**दु० टी**०)।
४. अन्तशब्दश्च विरामार्थः **इति** (दु० टी०)।

## [रूपसिद्धि]

१. **आरिप्सते**। आङ् + रभ् + सन् + अन् + ते। आरब्धुमिच्छति। 'आङ्' उपसर्गपूर्वक 'रभ राभस्ये' (१। ४७१) धातु से ''धातोर्वा तुमन्तादिच्छतिनैककर्तृकात्' (३। २। ४) सूत्र द्वारा 'सन्' प्रत्यय, द्वित्वादि, ''सनि मिमीमादारभलभशकपतपदामिस् स्वरस्य'' (३। ३। ३९) से अभ्यासलोप– रभ्धातुगत अकार को इस् आदेश, प्रकृत सूत्र से सकार का लोप, ''अघोषेष्वशिटां प्रथमः'' (३। ८। ९) से भकार को पकार, ''ते धातवः'' (३। २। १६) से 'आरिप्स' की धातुसंज्ञा, 'ते' प्रत्यय, अन्–विकरण तथा अकार का लोप।

२. **आलिप्सते**। आङ् + लभ् + स + अन् + ते। 'आङ्' उपसर्गपूर्वक 'डु लभष् प्राप्तौ' (१। ४७२) धातु से सन् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

३. **आचष्टे**। आङ् + चक्षिङ् + ते। 'आङ्' उपसर्गपूर्वक 'चक्षिङ् व्यक्तायां वाचि' (२। ४१) धातु से वर्तमानासंज्ञक 'ते' प्रत्यय, अन्–विकरण का लोप, प्रकृत सूत्र से ककार–लोप तथा ''तवर्गस्य षटवर्गाट्टवर्गः'' (३। ८। ५) से 'त्' को 'ट्' आदेश।

४. **भ्रष्टा**। भ्रस्ज् + ता। 'भ्रस्ज् पाके' (५। ४) धातु से श्वस्तनीसंज्ञक प० प० – प्र० पु० – ए० व० 'ता' प्रत्यय, प्रकृत सूत्र से सकार का लोप, ''भृजादीनां षः'' (३। ६। ५९) से जकार को षकार तथा 'तवर्गस्य षटवर्गाट् टवर्गः'' (३। ८। ५) से तकार को टकार आदेश।

५. **भ्रक्ष्यति**। भ्रस्ज् + स्यति। 'भ्रस्ज् पाके' (५। ४) धातु से भविष्यन्तीसंज्ञक 'स्यति' प्रत्यय, सकारलोप, जकार को षकार, ''षढोः कः से'' (३। ८। ४) से षकार को ककार तथा ''निमित्तात् प्रत्ययविकारागमस्थः सः षत्वम्'' (३। ८। २६) से सकार को षकार, 'क्–ष्' संयोग से क्ष्।

६. **त्वष्टिः**। त्वक्ष् + क्ति + सि। 'त्वक्षू तनूकरणे' (१। २०६) धातु से ''स्त्रियां क्तिः'' (४। ५। ७२) से 'क्ति' प्रत्यय, 'क्' अनुबन्ध का प्रयोगाभाव, प्रकृत सूत्र से ककारलोप तथा ''तवर्गस्य षटवर्गाट्टवर्गः'' (३। ८। ५) से तकार को टकारादेश।। ७३४।

## ७३५. चवर्गस्य किरसवर्णे [३। ६। ५५]

## [सूत्रार्थ]

असवर्ण, धुट् तथा विराम के परे रहते चवर्ग को 'कि' आदेश होता है।। ७३५।

## [दु० वृ०]

चवर्गस्य किर्भवति असवर्णे धुट्यन्ते च। वक्ता, योक्ता, अनेनेक्, अवेवेक्। असवर्ण इति किम् ? उञ्छति, उञ्झति।। ७३५।

## [दु० टी०]

चवर्ग०। सजातिः सवर्ण इह **लौकिक** एव सम्भवति, ततोऽन्योऽसवर्ण इति धातुविशेषणे ह्यसवर्णग्रहणं शक्यमकर्तुम्, किन्तु वर्णप्रस्तावान्**मन्दधीः** संशेते इत्यसवर्णग्रहणम्। पूर्वत्र सूत्रे धातुकथनमर्थादायातम्। **अन्ये** तु **'वर्णग्रहणे तदभावात्'** इति परिभाषां पठन्ति। वर्णग्रहणे **'येन विधिस्तदन्तस्य'** (का० परि० ३) इत्यस्याः परिभाषाया अभावादित्यर्थः **''अनिडेकस्वरादातः''** (३। ७। १३) इत्यसमानाधिकरणात् पञ्चमी मन्यते।। ७३५।

## [वि० प०]

चवर्ग०। 'अवेवेक्, अनेनेक्' इति जुहोत्यादित्वात् सार्वधातुके द्विर्वचने कृते **''निजिविजिविषां गुणः''** (३। ३। २३) इत्यभ्यासे गुणः।। ७३५।

## [समीक्षा]

'वक्तुम्, वाक्, अनेनेक्, वक्तव्यम्' इत्यादि शब्दरूपों के सिद्ध्यर्थ चवर्ग को कवर्गादेश का विधान दोनों ही व्याकरणों में किया गया है। पाणिनि का सूत्र है– ''चोः कुः'' (अ० ८। २। ३०)। यह ज्ञातव्य है कि कातन्त्रकार ने 'कवर्ग–चवर्ग–टवर्ग–तवर्ग पवर्ग' ये पाँच वर्ग गिनाए हैं। अर्थात् वर्गसंज्ञा की है– ''ते वर्गाः पञ्च पञ्च पञ्च'' (१। १। १०)। पाणिनि ने न तो वर्गसंज्ञा ही की है और न ही 'कु–चु–टु–तु–पु' संज्ञाएँ। ''अणुदित्सवर्णस्य चाप्रत्ययः'' (अ० १। १। ६९) इस सूत्र की व्याख्या में भट्टोजिदीक्षित आदि का उल्लेख है कि उदित् 'कु' आदि कवर्गादि के बोधक हैं– ''कु–चु–टु–तु–पु' एते उदितः'' आदि। अतः पाणिनि का 'कु–चु' प्रयोग पूर्ववर्ती व्याकरणों पर आधारित कहा जा सकता है, जो विशेष व्याख्यागम्य ही हो सकता है। जबकि इसके विपरीत कातन्त्रकार ने वर्गसंज्ञा करके तदनुसार ही प्रकृत सूत्र में शब्दों का प्रयोग किया है, जो सरलता तथा स्पष्टता का परिचायक है।

## [विशेष वचन]

१. सजातिः सवर्ण इह लौकिक एव सम्भवति ततोऽन्योऽसवर्ण इति (दु० टी०)।

२. अन्ये तु वर्णग्रहणे तदभावादिति परिभाषां पठन्ति (दु० टी०)।

## [रूपसिद्धि]

१. **वक्ता।** वच् + श्वस्तनी–ता। 'वच भाषणे' (२। ३०) धातु से श्वस्तनीविभक्तिसंज्ञक प० प०–प्र० पु०–ए०व० 'ता' प्रत्यय तथा प्रकृत सूत्र से 'च्' को 'क्'।

२. **योक्ता।** युज् + ता। 'युजिर् योगे' (६। ७) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय, उपधागुण, ज् को ग् तथा ''अघोषेष्वशिटां प्रथमः'' (३। ८। ९) से 'ग्' को 'क्' आदेश।

३. **अनेनेक्।** अट् + निज् + ह्यस्तनी–दि। 'णिजिर् शौचपोषणयोः' (२। ८१) धातु से ह्यस्तनीसंज्ञक प्र० पु०–ए०व० 'दि' प्रत्यय, अडागम, अन्विकरण का लुक्, ''जुहोत्यादीनां सार्वधातुके'' (३। ३। ८) से धातु को द्विर्वचन, अभ्याससंज्ञा, ज् का लोप, अभ्यासस्थ तथा धातुघटित इकार को गुण, प्रकृत सूत्र से ज् को ग्, ग् को क् तथा ''व्यञ्जनाद् दिस्योः'' (३। ६। ४७) से 'दि' प्रत्यय का लोप।

४. **अवेवेक्।** अट् + विज् + ह्यस्तनी–दि। 'विजिर् पृथग्भावे' (२। ८२) धातु से ह्यस्तनीसंज्ञक 'दि' प्रत्यय, अडागम, अन्लुक तथा द्विर्वचनादि पूर्ववत्।। ७३५।

## ७३६. हो ढः [३। ६। ५६]

### [सूत्रार्थ]

धुट् अथवा विराम के परे रहते धातुघटित हकार को ढकार आदेश होता है।। ७३६।

### [दु० वृ०]

धातोर्हकारस्य ढकारो भवति धुट्यन्ते च। लेढा, लेक्ष्यति, अलेट्।। ७३६।

### [समीक्षा]

'लेढा, सोढा, वोढा, वोढुम्, तुराषाट्' आदि शब्दों के सिद्ध्यर्थ हकार को ढकारादेश का विधान दोनों ही व्याकरणों में उपलब्ध है। पाणिनि का सूत्र है – ''हो ढः'' (अ० ८।२।३१)। यहाँ उभयत्र समानता ही है।

### [रूपसिद्धि]

१. **लेढा।** लिह् + श्वस्तनी–ता। 'लिह आस्वादने' (२। ६३) धातु से श्वस्तनी-विभक्तिसंज्ञक 'ता' प्रत्यय, उपधागुण, प्रकृत सूत्र से धातुगत हकार को ढकार, ''घढधभेभ्यस्तथोर्धोऽधः'' (३। ८। ३) से तकार को धकार, ''तवर्गस्य षटवर्गाट्टवर्गः'' (३। ८। ५) से धकार को ढकार तथा ''ढे ढलोपो दीर्घश्चोपधायाः'' (३। ८। ६) से पूर्ववर्ती ढकार का लोप।

२. **लेक्ष्यति।** लिह् + स्यति। 'लिह आस्वादने' (२। ६३) धातु से भविष्यन्तीसंज्ञक 'स्यति' प्रत्यय, प्रकृत सूत्र से ह् को ढ्, ''षढोः कः से'' (३। ८। ४) से ढ् को क्, उपधागुण, स् को ष् तथा 'क्–ष्' संयोग से क्ष्।

३. **अलेट्।** अट् + लिह् + दि। 'लिह आस्वादने' (२। ६३) धातु से ह्यस्तनीसंज्ञक 'दि' प्रत्यय, अडागम, अन्लुक्, प्रकृत सूत्र से ह् को ढ्, ढ् को ट्, उपधागुण तथा 'दि' प्रत्यय का लोप।। ७३६।

## ७३७. दादेर्घः [३। ६। ५७]

### [सूत्रार्थ]

धुट् तथा विराम के परे रहते दकारादि धातु के हकार को घकार आदेश होता है।। ७३७।

## [दु० वृ०]

धातोरवयवस्य घो भवति धुट्यन्ते च। अधोक्ष्यत्, अधोक्। कथं दोग्धा ? आद्यन्तवद्भावात्।। ७३७।

## [दु० टी०]

दादेः। द एवादिर्यस्यावयवस्येति विग्रहे नित्यत्वादडागमेऽपि कृते स्याद् व्यपदेशिवद्भावेन दुहप्रयोगरूपेषु 'दोग्धि–दोग्धव्य:' इति यो दृष्टस्तस्यायं दुहिर्दादिरवयवो भवतीत्याह – दोग्धेत्यादि। द्रुहमुहष्णुहष्णिहां कथमिह विभाषेति ? सत्यम्। **''मुहादीनां वा''** (२।३।४९) इत्यत्र वाशब्दो बहुलार्थो मन्तव्यः। तेनालिङ्गानामपि धुट्येव घो भवति – द्रोग्धा, द्रोढा। मोग्धा, मोढा। स्नोग्धा, स्नोढा। स्नेग्धा, स्नेढा।। ७३७।

## [वि० प०]

दादेः। यदि दादेरिति धातोर्विशेषणं स्यात् तदा नित्यत्वादन्तरङ्गत्वाच्च पूर्वमडागमे कृते धातोः स्वरादित्वाद् दादित्वं न स्यात्, अवयवावयवविशेषणमित्याह – दादेरित्यादि। द एवादिर्यस्यावयवस्य स दादिरवयवो हकार इति। एकत्र **''तृतीयादेर्घढधभान्तस्य०''** (३। ६। १००) इत्यादिना अन्यत्र **''लोपे च दिस्योः''** (३। ६। १०१) इति दस्य धत्वम्। यद्येवं दोग्धेति न सिध्यति अवयवावयविव्यवहारस्याभावादित्याह – आद्यन्तवद्भावादिति। अत्र मुहद्रुहष्णुहष्णिहां विभाषा दृश्यते – मोग्धा, मोढा। द्रोग्धा, द्रोढा। स्नोग्धा, स्नोढा। स्नेग्धा, स्नेढा।। ७३७।

## [बि० टी०]

दादे०। द एवादिर्यस्य स दादिरवयवो हकारः इति। तर्हि दोग्धेति आद्यन्तवद्भाव इत्युक्तम्। अनेनैव न्यायेन सिध्यति चेत्, न, **अभिप्रायापरिज्ञानात्**। अत एव द एवादिर्यस्येति। आदिशब्दः समीपवचनः, दकारात् समीपो यदीत्यर्थ इति। किन्तु यस्यावयवस्य यस्माद् धातोरवयवस्य समुदायार्थमाह स दादिरवयवः।। ७३७।

## [समीक्षा]

'अधोक्, अधोक्ष्यत्, दग्धा, दोग्धा' इत्यादि शब्दरूपों के सिद्ध्यर्थ दकारादि धातुओं के हकार को घकारादेश दोनों व्याकरणों में किया गया है। पाणिनि का सूत्र है – ''दादेर्धातोर्घः'' (अ० ८।२।३२)। अतः उभयत्र समानता है।

## [विशेष वचन]

१. कथं दोग्धा ? आद्यन्तवद्भावात् (दु० वृ०)।

२. ''मुहादीनां वा'' इत्यत्र वाशब्दो बहुलार्थो मन्तव्यः (दु० टी०)।

३. यद्येवं दोग्धेति न सिध्यति अवयवावयविव्यवहारस्याभावात् (वि० प०)।

४. आदिशब्दः समीपवचनः (बि० टी०)।

## [रूपसिद्धि]

१. **अधोक्ष्यत्।** अट् + दुह् + क्रियातिपत्ति—स्यत्। 'दुह प्रपूरणे' (२। ६१) धातु से क्रियातिपत्तिसंज्ञक प० प० — प्र० पु०—ए० व० 'स्यत्' प्रत्यय, अडागम, प्रकृत सूत्र से ह् को घ्, द् को ध्, घ् को क्, उपधागुण, स् को ष्, 'क—ष्' संयाग से क्ष् वर्ण।

२. **अधोक्।** अट् + दुह् + ह्यस्तनी—दि। 'दुह प्रपूरणे' (२। ६१) से ह्यस्तनी—संज्ञक प०प० — प्र० पु० — ए० व० 'दि' प्रत्यय, अडागम, ह् को घ्, द् को ध्, उपधागुण, घ् को क् तथा 'दि' प्रत्यय का लोप।। ७३७।

## ७३८. नहेर्धः [३। ६। ५८]

## [सूत्रार्थ]

धुट् तथा विराम के परे रहते 'नह्' धातु के हकार को धकारादेश होता है।। ७३८।

## [दु० वृ०]

नहेर्हकारस्य धो भवति धुट्यन्ते च। नद्धा, नत्स्यति, अनानत्।। ७३८।

## [दु० टी०]

नहेः। अयमपि ढस्यापवादः।। ७३८।

## [वि० प०]

नहेः। अनानदिति पूर्ववच्चेक्रीयितलुगिति **मतान्तरेणो**दाहृतम्।। ७३८।

## [समीक्षा]

'नद्धम्, नद्धुम्, नद्धा, नत्स्यति, उपानत्' आदि शब्दों के सिद्ध्यर्थ 'नह्' धातु के हकार को धकारादेश दोनों ही शाब्दिक आचार्यों ने किया है। पाणिनि का सूत्र है — ''नहो धः'' (अ० ८।२।३४)। धातुओं के निर्देश यतः इक्—अ—श्तिप्प्रत्ययान्त करने की आचार्यपरम्परा है, तदनुसार कातन्त्रकार ने इक्प्रत्ययान्त तथा पाणिनि ने अप्रत्ययान्त पाठ किया है।

## [रूपसिद्धि]

१. **नद्धा।** नह् + ता। 'नह बन्धने' (३। १२०) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय, ''दहिदिहिदुहिमिहिरिहिरुहिलिहिलुहिनहिवहेर्हात्'' (३। ७। ३०) से अनिट्, प्रकृत सूत्र से ह् को ध्, त् को ध् तथा ''धुटां तृतीयश्चतुर्थेषु'' (३।८।८) से पूर्ववर्ती ध् को द्।

२. **नत्स्यति।** नह् + स्यति। 'नह बन्धने' (३।१२०) से भविष्यन्तीसंज्ञक 'स्यति' प्रत्यय, प्रकृत सूत्र से हकार को धकार तथा ''अघोषेष्वशिटां प्रथमः'' (३। ८। ९) से धकार को तकारादेश।

३. **अनानत्**। अट् + नानह् + दि। 'नह बन्धने' (३। १२०) धातु से "धातोर्यशब्दश्चेक्रीयितं क्रियासमभिहारे" (३। २। १४) सूत्र द्वारा 'य' प्रत्यय, द्विर्वचनादि, "तस्य लुगचि" (४।४।४५) से यलोप, "ते धातवः" (३। २। १६) से 'नानह्' की धातुसंज्ञा, ह्यस्तनीसंज्ञक 'दि' प्रत्यय, अडागम, अनुलोप, दिलोप, ह् को ध् तथा ध् को त् आदेश।। ७३८।

## ७३९. भृजादीनां षः [३। ६। ५९]

### [सूत्रार्थ]

धुट् तथा विराम के परे रहते भृजादिगणपठित धातुओं के अन्तिम वर्ण को 'ष्' आदेश होता है।। ७३९।

### [दु० वृ०]

भृजादीनामन्तः षो भवति धुट्यन्ते च। भ्रष्टा, भ्रक्ष्यति। व्रष्टा, व्रक्ष्यति। स्रष्टा, स्रक्ष्यति। मार्ष्टा, मार्क्ष्यति, अमार्ट्। यज् – यष्टा। राजृ–राष्टिः। भ्राजृ–भ्राष्टिः। भ्रस्जेर्भृजिरिहोपलक्षणम्। **निपातनस्येष्टविषयत्वात्** सम्प्रसारणादन्यत्र विभाषा–**भ्रष्टा**, भर्ष्टा। भ्रज्जनम्, भर्जनम्। सम्प्रसारणे तु–भृज्जति, भृज्ज्यते।। ७३९।

### [दु० टी०]

भृजा०। असार्वधातुकमात्रे 'भ्रस्जेर्भृज् वा वक्तव्यम्' इत्यस्य संग्रहमाह – भ्रस्जेर्भृजिरिहेति व्यवस्थावाचित्वादादिशब्दस्य – 'भ्रस्ज्, व्रश्च्, सृज्, मृज्, यज्, राज्, भ्राज्' एते सप्त गृह्यन्ते। अस्मादेव सूत्रनिपातनाद् भ्रस्जेर्भृजादेशोऽनुमीयते। उपलक्षणमिति न तत्परमित्यर्थः। तेन भ्रस्ज्रूपस्यापि षत्वमित्यर्थः। **निपातनस्येष्ट–विषयत्वादि**त्यादिना विकल्पं साधयति। सम्प्रसारणविषये तु नैव भृजादेश इत्यर्थः। अथवा मुख्यं सम्प्रसारणं सूत्रोपात्तमुपदेशावस्थायामपि भवति, तद्विषयपरिहारेणैव प्रवर्तते। 'भृष्टः, भृष्टवान्' इत्यगुणे धुटि नास्ति विशेषः। बभर्ज्जतुः, बभर्ज्जुः बभ्रज्जतुः बभ्रज्जुरिति नत्रा निर्दिष्टस्यानित्यत्वान्न गुणप्रतिषेधः। बिभर्क्षति, बिभ्रक्षति। बिभर्जिषति, बिभ्रज्जिषति। भर्क्षीष्ट, भ्रक्षीष्ट। अभर्क्षत, अभ्रक्षत इति सनि चानिटि **"सिजाशिषोश्चात्मने"** (३। ५। १०) इति प्रतिपदोक्तस्य गुणप्रतिषेधात्। 'भर्गम्, भ्रग्यम्, भर्गः' इति। 'भृजी भर्जने' (१।३४६) इति धात्वन्तरेण भौवादिकेन आत्मनेपदिना सिध्यति। एवं 'बाभ्रज्यते, बरीभ्रज्यते' इति रूपद्वयं केन निवार्यते। **'भ्रस्ज् पाके'** (५।४) इत्युभयपदी, सिजाशिषोरस्ति विशेषः इति।। ७३९।

### [वि० प०]

भृजादीनाम्०। भृजादीनामित्युक्ते कथं भ्रस्जादीनामित्याह–**भ्रस्जेर्भृजिरिहोपलक्षणम्** इति। तेन भ्रस्ज्रूपस्यापि षत्वमित्यर्थः। अत एव सूत्रनिपातनाद् भ्रस्जेर्भृजादेशोऽनुमीयते। तेनासार्वधातुकमात्रेऽस्य विभाषया भृजादेशो न वक्तव्यः। **विकल्पस्तर्हि** कथमित्याह –

निपातनस्येत्यादि। सम्प्रसारणादन्यत्रेति। सम्प्रसारणविषयादित्यर्थः। एवं बभर्ज्जतुः, बभर्ज्जुः। बभ्रज्जतुः, बभ्रज्जुः। ननु गुणिनि गुणे सति भर्ज्जरूपमस्ति तत् कथं गुणः स्यात् ? सत्यम्। नञा निर्दिष्टस्यानित्यत्वाद् गुणप्रतिषेधो नास्ति, एवमन्यत्रागुणे गुणिनि ज्ञेयम्। ननु व्रश्चेरिह शोपधत्वाद् **''व्रश्चिमस्जोर्धुटि''** (३। ६। ३५) इत्यन्तलोपे **''छशोश्च''** (३। ६। ६०) इति षत्वं सिद्धम्। तत् किमिह व्रश्चेरुपादानेन ? सत्यम्। **अन्यैः सोपधोऽयमिति मन्यमानैः** पठितस्तत्प्रसङ्गादनेनापि पठ्यते। न खलु अन्यथा **परसूत्रे लाघवम्** अस्तीति।। ७३९।

## [बि० टी०]

भृजा०। असार्वधातुकमात्रे भ्रस्जेर्भृजि वा वक्तव्यमिति **परः**। तन्नेत्याह—भ्रस्जेरिति। बिभर्क्षतीति। **''सनि चानिटि''** (३। ५। ९) इत्यगुणत्वम्, लाक्षणिकत्वादेकदेशलाक्षणिके पुनरगुणो भवत्येवेति। दिदृक्षतीत्यादौ अगुणत्वं स्यात्। तथा च टीका **''सनि चानिटि''** (३। ५। ९) इति **''सिजाशिषोश्चात्मने''** (३। ५। १०) इति च प्रतिपदोक्तस्यैव प्रतिषेध इति।। ७३९।

## [समीक्षा]

'यष्टा, स्रष्टा, विराट्' आदि शब्दों के सिद्ध्यर्थ दोनों ही व्याकरणों में 'यज्, राज्' आदि सात धातुओं के अन्तिम वर्ण को षकारादेश किया गया है। पाणिनि का सूत्र है — ''व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः'' (अ० ८।२।३६)। दोनों की रचनाशैली में अन्तर स्पष्ट है। पाणिनि ने जिन सात धातुओं का पाठ सूत्र में किया है, कातन्त्रकार ने उन्हें 'भृजादि' गण में पढ़ा है।

## [विशेष वचन]

१. भ्रस्जेर्भृजिरिहोपलक्षणम् (दु० टी०)।

२. निपातनस्येष्टविषयत्वात् सम्प्रसारणादन्यत्र विभाषा (दु० वृ०)।

३. उपलक्षणमिति न तत्परमित्यर्थः (दु० टी०)।

४. निपातनस्येष्टविषयत्वादित्यादिना विकल्पं साधयति (दु० टी०)।

५. अथवा मुख्यं सम्प्रसारणं सूत्रोपात्तमुपदेशावस्थायामपि भवति (दु० टी०)।

६. नञा निर्दिष्टस्यानित्यत्वाद् गुणप्रतिषेधो नास्ति (वि० प०)।

७. अन्यैः सोपधोऽयमिति मन्यमानैः पठितस्तत्प्रसङ्गादनेनापि पठ्यते, न खलु अन्यथा परसूत्रे लाघवमस्तीति (वि० प०)।

## [रूपसिद्धि]

१. **भ्रष्टा, भर्ष्टा।** भ्रस्ज् + ता। 'भ्रस्ज पाके' (५।४) धातु से श्वस्तनीविभक्ति-संज्ञक प० प० — प्र० पु० — ए० व० 'ता' प्रत्यय, प्रकृत सूत्र से जकार को षकार, ''स्कोः संयोगाद्योरन्ते च'' (३।६।५४) से सकार का लोप तथा ''तवर्गस्य षटवर्गाट्टवर्गः''

(३।८।५) से तकार को टकारादेश। 'भृज्' आदेशपक्ष में जकार को षकार तथा ऋकार को गुण आदेश—अर्।

२. **भ्रक्ष्यति।** भ्रस्ज् + स्यति। 'भ्रस्ज् पाके' (५। ४) धातु से भविष्यन्तीसंज्ञक 'स्यति' प्रत्यय, ज् को ष्, सलोप, ष् को क् तथा स् को ष्।

३. **व्रष्टा।** व्रश्च् + ता। 'व्रश्चू छेदने' (५। १९) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय, प्रकृत सूत्र से चकार को षकार, सोपधपक्ष में सकारलोप तथा तकार को टकार आदेश।

४. **व्रक्ष्यति।** व्रस्च् + स्यति। 'व्रश्चू छेदने' (५। १९) धातु से भविष्यन्तीसंज्ञक 'स्यति' प्रत्यय, प्रकृत सूत्र से चकार को षकार, सकार का लोप, ष् को क् तथा स् को ष् आदेश।

५. **स्रष्टा।** सृज् + ता। 'सृज विसर्गे' (३। ११६) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय, "सृजिदृशोरागमोऽकारः स्वरात् परो धुटि गुणवृद्धिस्थाने" (३।४।२५) से धातु—घटित ऋकार के पश्चात् अकारागम, प्रकृत सूत्र से जकार को षकार, "रमृवर्णः" (१।२। १०) से ऋकार को रकार तथा तकार को टकार आदेश।

६. **स्रक्ष्यति।** सृज् + स्यति। 'सृज विसर्गे' (३। ११६) धातु से भविष्यन्तीसंज्ञक 'स्यति' प्रत्यय, प्रकृत सूत्र से ज् को ष्, अकारागम, ऋ को र्, ष् को क् तथा सकार को षकार आदेश।

७. **मार्ष्टा।** मृज् + ता। 'मृजू शुद्धौ' (२। २९) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय, गुण, "मर्जो मार्जिः" (३।८।२३) से मार्ज् आदेश, प्रकृत सूत्र से जकार को षकार तथा तकार को षकारादेश।

८. **मार्क्ष्यति।** मृज् + स्यति। 'मृजू शुद्धौ' (२।२९) धातु से भविष्यन्तीसंज्ञक 'स्यति' प्रत्यय, गुण, मार्ज् आदेश, ज् को ष्, ष् को क् तथा स् को ष्।

९. **अमार्ट्।** अट् + मृज् + दि। 'मृजू शुद्धौ' (२।२९) धातु से ह्यस्तनीसंज्ञक 'दि' प्रत्यय, अडागम, गुण, मार्ज आदेश, ज् को ष्, "अघोषेष्वशिटां प्रथमः" (३।८।९) से ष् को ट् तथा 'दि' का लोप।

१०. **यष्टा।** यज् + ता। 'यज देवपूजासङ्गतिकरणदानेषु' (१। ६०८) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

११. **राष्टिः।** राज् + क्ति + सि। 'राजृ दीप्तौ' (१। ५३९) धातु से "स्त्रियां क्तिः" (४। ५। ७२) से 'क्ति' प्रत्यय, ज् को ष्, त् को ट्, 'राष्टि' की लिङ्गसंज्ञा, सिप्रत्यय तथा "रसकारयोर्विसृष्टः" (३।८।२) से सकार को विसर्गादेश।

११. **भ्राष्टिः।** भ्राज् + क्ति + सि। 'भ्राजृ दीप्तौ' (१।३४७, ५४०) धातु से 'क्ति' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ७३९।

## ७४०. छशोश्च [३। ६। ६०]

### [सूत्रार्थ]

धुट् तथा विराम के परे रहते 'छ्–श्' को ष् आदेश होता है।। ७४०।

### [दु० वृ०]

छशोश्च षो भवति धुट्यन्ते च। प्रष्टा, प्रक्ष्यति। क्रोष्टा, क्रोक्ष्यति, अचोक्रोट्। निमित्ताभावाद् द्विर्वा पाठः।। ७४०।

### [दु० टी०]

छशोः। **उपदेश** एव छकारो द्विर्भावमापद्यते। ततश्चकारस्य स्थितिः स्यादित्याशङ्क्याह–निमित्ताभावादिति। **'निमित्ताभावे नैमित्तिकस्याप्यभावः'** (का० परि० २७) इति। द्विर्वा पाठ इति, कृतद्विर्भाव एव पठ्यते इत्यर्थः।। ७४०।

### [वि० प०]

छशोः। अचोक्रोडिति। चेक्रीयितलुगन्तस्य पूर्ववदुदाहरणम्। उपदेशावस्थायामेव स्वरात् परश्छकारो द्विर्भावमापद्यते। ततः प्रच्छेरन्तस्य छकारस्य षत्वे चकारस्य स्थितिरेव प्राप्नोतीत्याह – निमित्ताभावादिति। निमित्ताभावे नैमित्तकस्याप्यभाव इत्यर्थः। द्विर्वा पाठ इति। अथवा सूत्रे कृतद्विर्भाव एव च्छकारः पठ्यते इति भावः।। ७४०।

### [समीक्षा]

'प्रष्टा, प्रष्टुम्, वेष्टा, वेष्टुम्' आदि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में 'छ्–श्' को 'ष्' आदेश किया गया है। पाणिनि का सूत्र है – ''व्रश्चभ्रस्जसृजमृजयज–राजभ्राजच्छशां षः'' (अ० ८।२।३६)। कातन्त्रकार ने 'भ्रस्ज्' आदि सात धातुओं के लिए तथा 'छ्–श्' के लिए स्वतन्त्र दो सूत्र बनाए हैं, परन्तु पाणिनि ने एक ही सूत्र में सभी का संग्रह करके सूत्रलाघव दिखाया है। कातन्त्रकार ने स्पष्टावबोध के लिए उक्त प्रक्रिया अपनायी है।

### [विशेष वचन]

१. निमित्ताभावाद् द्विर्वा पाठः (दु० वृ०)।

२. उपदेशावस्थायामेव स्वरात् परश्छकारो द्विर्भावमापद्यते (वि० प०; दु० टी०)।

३. अथवा सूत्रे कृतद्विर्भाव एव च्छकारः पठ्यते इति भावः (वि० प०)।

### [रूपसिद्धि]

१. **प्रष्टा।** प्रच्छ् + ता। 'प्रछ ज्ञीप्सायाम्' (५। ४९) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय, प्रकृत सूत्र से षकारादेश तथा तकार को टकार।

२. **प्रक्ष्यति। प्रच्छ्** + स्यति। 'प्रछ ज्ञीप्सायाम्' (५। ४९) धातु से भविष्यन्ती–संज्ञक 'स्यति' प्रत्यय, छ् को ष्, ष् को क् तथा स् को ष्।

३. **क्रोष्टा**। क्रुश् + ता। 'क्रुश् आह्वाने' (१। ५६४) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

४. **क्रोक्ष्यति**। क्रुश् + स्यति। 'क्रुश् आह्वाने' (१। ५६४) धातु से भविष्यन्तीसंज्ञक 'स्यति' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

५. **अचोक्रोट्**। अट् + क्रुश् + चेक्रीयितलुक् + दि। 'क्रुश् आह्वाने' (१। ५६४) धातु से चेक्रीयितसंज्ञक 'य' प्रत्यय, द्विर्वचनादि, 'य' प्रत्यय का लुक्, धातुसंज्ञा, अडागम, श् को ष्, ष् को ट् तथा 'दि' का लोप।। ७४०।

## ७४१. भाषितपुंस्कं पुंवदायौ [३। ६। ६१]

### [सूत्रार्थ]

'आयि' प्रत्यय के परे रहते भाषितपुंस्क शब्द को पुंवद्भाव होता है।। ७४१।

### [दु० वृ०]

भाषितपुंस्कं पुंवद् भवति आयौ प्रत्यये परे। ब्राह्मणीवाचरति—**ब्राह्मणायते**। श्वेनी—श्वेतायते। एनी—एतायते। हरिणी—हरितायते। लोहिनी—लोहितायते। श्वेतैतहरितलोहितेभ्यस्तो न इति नदादौ। च्व्यर्थे तु न भवति गौणत्वात्। अलोहिनी लोहिनी भवति **लोहिनीयते** इत्यन्ये। पुमानिव **पुंवत्** स्त्रीति **लोकत**: सिद्धम्। तत्राधिकारबलादमुख्यमपि नपुंसकं पुंवदिति। तेन अतिनूयते। भाषित: पुमान् यस्मिन्नर्थे इति समासात् – द्रोणीयते। कथं श्वश्रूयते ? श्वशुरस्य श्वश्रूरूङन्तो निपातनान्नाप्तिभाषत्वं श्वशुरत्वम् अपि तु विशिष्टमेव **रूढम्**। कथं गर्भीयते शालि:, अन्तर्वर्तित्वमात्र–विवक्षयेति।। ७४१।

### [दु० टी०]

भाषित०। येषां डाज्लोहितादिभ्यश्च्व्यर्थे आयिरिति वक्तव्यम्, ते परिहारमाहुश्च्व्यर्थे त्वित्यादि। **'लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्'** (का० परि० १७) इति लोहिनी–शब्दादप्यायिरिति भाव:। स्वोत्प्रेक्षैषा, न च **भाष्यादौ निदर्शनम**स्ति तस्यानित्यत्वाभ्युपगमात्। इह **अन्ये एके** इति। पुमानिवेत्यादि। 'भाषितपुंस्कं पुंवद् वा' इत्यत्र सूत्रे नपुंसकाधि–करणादित्यर्थ:। कथमित्यादि। नात्र शावशेराप्तावित्युरप्रत्ययो व्युत्पाद्यते।। ७४१।

### [वि० प०]

भाषित०। च्व्यर्थ इत्यादि। **येषां** मते 'डाज्लोहितादिभ्यश्च्व्यर्थे इति **सूत्रमस्ति** तेषां **'लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्'** (का० परि० १७) इति न्यायात् लोहिनीशब्दादप्यायौ कृते न भवतीत्यर्थ:, गौणत्वात्। गौणत्वं पुनरलोहिनीप्रकृतित्वा–ल्लोहिनीशब्दस्य वेदितव्यम्। इह पुन: पुंवद्भाव एव, **भाष्येऽपि नैतद् दर्शितम्**। अनित्यत्वाभ्युपगमाद् **गौणमुख्यपरिभाषाया** इत्याह – **अन्य इति**। अमुख्यमपीति। तत् पुन**र्लोकप्रसिद्धे**रभावात् तेनेति। नावमतिक्रान्तं कुलमिति **अतिनु**, तदिवाचरतीत्यायौ कृते

नपुंसकस्य पुंवद्भावो न भवति। यदि पुनरिह पुंवद्भावः स्यात् तदा नपुंसकलक्षणह्रस्वनिवृत्तौ अतिनाव्यते इति स्यात्। भाषित इत्यादि। **द्रोण**शब्दः पुंसि चतुराढकपरिमाणे वर्तते, स्त्रियां तु जलक्षेपण इति नार्थो भाषितपुंस्क इत्यर्थः। कथमित्यादि। शुपूर्वाद् 'अशू व्याप्तौ' (४।२२) इत्यस्मादाप्तिभावेऽर्थे उरप्रत्यये **'श्वशुरः'** इत्यौणादिको निपातः। तस्य च स्त्रियां श्वश्रूरिति ऊङन्तो नदादौ **निपातो** दृश्यते, तत आप्तिभावलक्षणस्य भाषितपुंस्कार्थस्य विद्यमानत्वान् समानायामाकृतौ पुंवद्भावे सति 'श्वशुरायते' इति भवितव्यम् इति **पूर्वपक्षार्थः**।

परिहारमाह — नाप्तिभावत्वमिति। न खलु शावशेराप्ताविति वचनमत्रादृतम्, तद्विपर्ययेऽपि श्वशुरशब्दस्य प्रवृत्तेः, अतो नाप्तिभावत्वं प्रवृत्तिनिमित्तं भाषितपुंस्कमित्यर्थः। ननु विशिष्टमपि श्वशुरत्वं भवत् तदपत्योद्वहनसम्बन्धकृतमेव भवितुमर्हति, तच्च न केवलं पुंसि स्थितं किन्तर्हि स्त्रियामपि। यदाह तत्रभवान् **दुर्गसिंहः** — एवं श्वशुर इति तदपत्योद्वहनसम्बन्धनिबन्धनो व्यपदेशः श्वश्वामपिः स्थित एवेति। (अधुना तु एवं **दुर्गोक्तिः** कुत्रापि न दृश्यते)। तथा च सत्येकमेव प्रवृत्तिनिमित्तमिति पुंवद्भावः स्यादेव? सत्यम्। तथाप्यपत्योद्वहनसम्बन्धस्य पुंस्त्रीभेदेन विवक्षितत्वान्नैकं **प्रवृत्तिनिमित्त**मिति न दोषः। कथं गर्भीयते इति। गर्भोऽस्यास्तीति **गर्भी** शालिः, अवयवभूतेन गर्भेण सह सम्बन्धात्। गर्भिणी स्त्रीति। अनवयवभूतेन गर्भेण सह सम्बन्धात्। अतोऽवयवान—वयवभेदात् पुंस्त्रियोर्गर्भिशब्दो वर्तमानो नैकं प्रवृत्तिनिमित्तमुपादाय प्रवर्तते, ततो भिन्नाकृतित्वान्न पुंवद्भावं प्राप्नोतीति, नैतदेवम्। इहावयवानवयवकृतं भेदमुत्सृज्यान्त—र्वर्त्तित्वमात्रमेकं **प्रवृत्तिनिमित्तं** विवक्षितमित्याह—अन्तर्वर्त्तित्वमात्रविवक्षयेति।। ७४१।

## [बि० टी०]

भाषित०। भाषितः पुमान् यस्मिन् पुंशब्दादेकार्थान्नित्यं कप्रत्ययः, तर्हि सुपुंश्चरतीत्यत्र कथं न कप्रत्ययः, न च तत्र विकल्पोऽस्ति नित्यग्रहणबलादिति न देश्यम्। एकार्थाद् एकाधिकरणादित्यर्थो न गृह्यते, किन्तु पुंशब्दात् किंविशिष्टात्, एकार्थात्। एकोऽर्थो यस्य तस्मात्, पुंशब्दो यदि द्वित्वे बहुत्वे वा वर्तते तदा कप्रत्ययो न भवतीत्यर्थः। अत एव शोभनाः पुमांसो यस्मिन् इति बहुत्वे दर्शितम्। ननु भाषितपुंस्केत्यत्र संयोगान्तलोपः कथन्न स्यात्, पुंसोऽशिट्यघोषविषये संयोगान्तलोपस्यानित्यत्वात्। तर्हि पुमांश्चरतीत्यत्र पुंसोऽशिट्यघोषविषये संयोगान्तलोपस्यानित्यत्वात् कथं संयोगान्तलोपः। न च वाच्यं पुमानिति साधिते पश्चाच्चरतिशब्देन सार्धं योगः, तदा सुपुंश्चरतीत्यादिषु दूषणं स्यात्? सत्यम्। तत्रैकार्थीभावे संयोगान्तलोपस्य नित्यत्वमिति बोद्धव्यम्।

ननु 'ब्राह्मणायते' इत्यत्र कथं पुंवद्भावः, यावता कार्यातिदेशोऽयं शास्त्रातिदेशोऽयं वोभयोः पक्षयोर्यच्छास्त्रं तत् कार्यं वाऽतिदिश्यते। अत्र जातेरिति जातौ निषेधात् कथं पुंवद्भावः। **तत्र केचिद्** आचक्षते। अत्र जातिमाश्रित्य ईप्रत्ययो न भवति, किन्तु पुंयोगे ईप्रत्ययः — **ब्राह्मणस्य भार्या ब्राह्मणी, यथा आचार्यानी** तु पुंयोग इति। तदसत्। अत्र जातेरन्यब्राह्मणीशब्दो विद्यते, **अन्यथा ब्राह्मणेन वृषलीविवाहे** सति तस्यामपि ब्राह्मणशब्दो वर्तते, किञ्च चरणत्वाज्जातिरेव। यथा कठायते इति कठाध्ययनयोगात् कठ इति।

**अपर**स्त्वाह–अत्र संस्थानव्यङ्ग्या जातिर्गृह्यते, न तु आचारार्थमिति। अत एव न निषेधः। (तन्न) टीकाकारेणापि 'लिङ्गानां च न सर्वभाक्' इत्यस्योदाहरणं ब्राह्मणीति वक्ष्यते। तत्राह **उमापतिसेनः** – 'जातिस्तु पुंवत् क्वचिदायियोगे' इति। **पण्डितस्त्वाह** – येन तत्र संस्थानव्यङ्ग्या जातिर्गृह्यते तन्मतमाश्रित्योक्तमुदाहरणम्, एतेनाक्षेपो दत्तः **कुलचन्द्रेण**। नास्माकं मतमित्यर्थः। तत्राधिकारबलादमुख्यमपीति।

ननु तत्र नपुंसकादिति किं कल्याण्यै इति प्रत्युदाहरणं दत्तं युज्यते। न च वक्तव्यं नपुंसकाधिकारमन्तरेणापि नपुंसकत्वं प्राप्तं स्त्रीति **लोकतः** सिद्धत्वात् ? सत्यम्। यत् स्त्रीति **लोकतः सिद्ध**मिदमुक्तं तद् विभक्तिविषयादन्यत्रैव बोध्यम्। नाप्तिभावत्वं श्वशुरत्वमिति। ननु भवनं **भाव** इति भावशब्देन भाव उक्तः। भावत्वशब्देन भावस्य भाव उच्यते कथं नाप्तिभावत्वं श्वशुरत्वमिति सामानाधिकरण्यम्। तत्रा**होमापतिसेनः** भाव इति कर्मणि घञ् (आप्तौ) पूजायाम् (भूयते) व्याप्यते यः स **आप्तिभावः**, तस्य भावः **आप्तिभावत्वं** श्वशुरत्वमितिं। ततः सामानाधिकरण्यमस्त्येव। भाषितः पुमान् यस्मिन्नर्थे इति समानायामाकृताविति **परः**।

**अस्यार्थः**- आङ्पूर्वकृधातुर्जनने वर्तते। आक्रियेते जन्येते बुद्धिशब्दाविति **आकृतिः** प्रवृत्तिनिमित्तम्, तेन 'द्रोणीयते' इत्यत्र न भवति, भिन्नप्रवृत्तिनिमित्तत्वात्, **भवन्मते** कथम् ? सत्यम्, भाषितः पुमान् यस्मिन्नर्थे इति समासादेकप्रवृत्तिनिमित्तत्वम्। एतदुक्तं भवति – भाषित उक्तः पुमान् यस्मिन्नर्थे अर्थाच्छब्देन। शब्दस्यार्थे प्रवृत्तिनिमित्ते वर्तमानः स्त्रीलिङ्गशब्दः पुंवद् भवति। अथ समानार्थप्रतिपादितं सममिति **परे**। तर्हि 'तटीयते' इत्यत्र कथं न पुंवद्भावः। **'तटं त्रिषु'** इति **अमर**वचनादेकप्रवृत्तिनिमित्ते पुंवद् - भाषितत्वात्? सत्यम्। **पण्डितः**-भाषितः इत्यतीते क्तप्रत्ययः, पुरा पुंस्त्वमुक्तम्, न पुंवद्भावसमये पुंस्त्वं विद्यते इति। पुंस्त्रीभेदेनास्याप्यय**माशयः** – योऽपत्ययोर्जाया–पत्योरुद्वाहः। श्वशुरत्वमिति सामान्यम्, तत्तु जामातरमपेक्ष्य जामातुः पितरि कन्यायाः श्वशुरत्वं विद्यते इति। एवं कन्यामपेक्ष्य कन्यायाः पितरि जामातुः श्वशुरत्वं विद्यते। न च वाच्यम्, एकस्य श्वशुरत्वमपेक्ष्य पुंवद्भावः सामान्यपुंवद्विध्युक्तो न भवितुं पार्यते एव। उक्तन्यायाद् विशेषविवक्षायां तु आयिरेव न प्राप्नोति सापेक्षत्वादिति मनसिकृत्याह- कथं गर्भीयते इति। ननु शालिरवयवभूतेनेति कथमवयवत्वम् अनारम्भकत्वादिति ? सत्यम्। यस्मिन् समये गर्भस्तस्मिन्नेव समये आरम्भको भवति, तर्हि शालिपक्षे कथमवयवभूतो गर्भो भवति। स्त्रीपक्षेऽनवयवो वा गर्भः कथम् ? सत्यम्। अवयवनाशे समुदायस्य नाशो भवति यथा घटावयवनाशे घटनाशो भवति। अस्यावयवो गर्भस्तन्नाशे समुदायस्य नाश इत्यवयवभूतो भवत्येव। तथा **चामरः** – **'ओषध्यः फलपाकान्ताः'** इति स्त्रियां गर्भे प्रसूतेऽपि न नाशः, अत एवानवयवभूत इत्युक्तम्। अन्तर्वर्त्तित्वमात्रं विवक्षितमिति अन्तर्वर्त्तित्वं गर्भत्वं विवक्षितं न त्वावयवत्वम्। ननु अवयवत्वं कथन्न विवक्षितमिति चेद् उच्यते – गर्भोऽस्यास्तीति **'गर्भी'** इति सामान्यमवलम्ब्य इन् प्रत्ययः। विशेषापेक्षया इन् प्रत्ययो न भवति, सापेक्षत्वात्। अत एवान्तर्वर्त्तित्वं विवक्षितमिति न विशेष इत्यर्थः।। ७४१।

## [समीक्षा]

'ब्राह्मणायते, हरितायते, लोहितायते' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में पुंवद्भाव किया गया है। पाणिनि का सूत्र है – ''क्यङ्मानिनोश्च'' (अ० ६।३।३६)। यह ज्ञातव्य है कि पाणिनि का पुंवद्भावप्रकरण पर्याप्त विस्तृत है, जिसमें ९ सूत्र हैं – (अ० ६।३।३४–४२)। कातन्त्रव्याख्याकारों ने प्रकरण के अनुसार अपेक्षाओं की पूर्ति व्याख्यानबल से की है।

## [विशेष वचन]

१. च्व्यर्थे तु न भवति गौणत्वात्। ..... लोहिनीयते इत्यन्ये (दु० वृ०)।

२. पुमानिव पुंवत् स्त्रीति लोकतः सिद्धम् (दु० वृ०)।

३. श्वशुरस्य श्वश्रूरूङन्तो निपातनान्नाप्तिभावत्वं श्वशुरत्वम्, अपि तु विशिष्टमेव रूढम् (दु० वृ०)।

४. स्वोत्प्रेक्षैषा, न च भाष्यादौ निदर्शनमस्ति (दु० टी०)।

५. द्रोणशब्दः पुंसि चतुराढकपरिमाणे वर्तते स्त्रियां तु जलक्षेपणे इति नार्थो भाषितपुंस्कः (वि० प०)।

६. इहावयवानवयवकृतं भेदमुत्सृज्यान्तर्वर्त्तित्वमात्रमेकं प्रवृत्तिनिमित्तं विवक्षितम् (वि० प०)।

७. चरणत्वाज्जातिरेव। यथा कठायते इति कठाध्ययनयोगात् कठ इति (बि० टी०)।

८. अत्र संस्थानव्यङ्ग्या जातिर्गृह्यते, न तु आचारार्थम् (बि० टी०)।

९. टीकाकारेणापि 'लिङ्गानां च न सर्वभाक्' इत्यस्योदाहरणं ब्राह्मणीति वक्ष्यते (बि० टी०)।

१०. जातिस्तु पुंवत् क्वचिदायियोगे (बि० टी०)।

११. आङ्पूर्वकृधातुर्जनने वर्तते (बि० टी०)।

१२. अवयवनाशे समुदायस्य नाशो भवति, यथा घटावयवनाशे घटनाशो भवति (बि० टी०)

## [रूपसिद्धि]

१. **ब्राह्मणायते।** ब्राह्मणी + आयि + अन् + ते। ब्राह्मणीवाचरति।. 'ब्राह्मणी' शब्द से ''कर्तुरायिः सलोपश्च'' (३।२।८) सूत्र द्वारा 'आयि' प्रत्यय, प्रकृत सूत्र से 'ब्राह्मणी' शब्द का पुंवद्भाव, ''ते धातवः'' (३।२।१६) से 'ब्राह्मणाय्' की धातुसंज्ञा, वर्तमानासंज्ञक 'ते' प्रत्यय तथा ''अन् विकरणः कर्तरि'' (३।२।३२) से 'अन्' विकरण।

२. **श्वेतायते।** श्वेनी + आयि + अन् + ते। श्वेनीवाचरति। 'श्वेनी' शब्द से 'आयि' प्रत्यय, पुंवद्भाव, धातुसंज्ञा, 'ते' प्रत्यय तथा 'अन्' विकरण।

३. **एतायते।** एनी + आयि + अन् + ते। एनीवाचरति। 'एनी' शब्द से 'आयि' प्रत्यय, पुंवद्भाव, धातुसंज्ञा, 'ते' प्रत्यय तथा 'अन्' विकरण।

४. **हरितायते**। हरिणी + आयि + अन् + ते। हरिणीवाचरति। 'हरिणी' शब्द से 'आयि' प्रत्यय, पुंवद्भाव, धातुसंज्ञा, 'ते' प्रत्यय तथा 'अन्' विकरण।। ७४१।

## ७४२. आदातामाथामादेरिः [३। ६। ६२]

### [सूत्रार्थ]

अकार से परवर्ती 'आताम्—आथाम्' प्रत्ययों के आदि वर्ण आकार को इकार आदेश होता है।। ७४२।

### [दु० वृ०]

अकारात् परयोरातामाथामित्येतयोरादेरिर्भवति। पचेताम्, पचेथाम्। अकारादिति किम् ? व्यत्यपाताम्।। ७४२।

### [दु० टी०]

आदा०। आदातामाथामादेरिति षष्ठीसमासः एकविभक्तियुक्तोऽप्यादिशब्दोऽयं वक्ष्यमाणे वर्तते। षष्ठीलोपं कृत्वा वा निर्देशः। परस्यादेरिति परिभाषा नास्तीत्यादिग्रहणम्।। ७४२।

### [समीक्षा]

'पचेताम्, पचेथाम्, यजेताम्, यजेथाम्' इत्यादि शब्दरूपों के सिद्ध्यर्थ 'आताम्—आथाम्' प्रत्ययों के आकार को इकारादेश की अपेक्षा होती है, जिसकी पूर्ति कातन्त्रकार ने इकारादेश तथा पाणिनि ने इयादेश से की है। पाणिनि का सूत्र है — ''आतो ङितः'' (अ० ७।२।८१)। कातन्त्रव्याकरण में पाणिनि की तरह ''आदेः परस्य'' (अ० १। १।२४) परिभाषा मान्य नहीं है, अतः सूत्र में 'आदेः' शब्द पढ़ा गया है। परस्यादेरिति परिभाषा नास्तीत्यादिग्रहणम् (दु० टी०)। पाणिनि ने 'तिप्—सिप्—मिप्' प्रत्यय पकारानुबन्धविशिष्ट किए हैं, 'पित् प्रत्यय ङित् नहीं होते तथा ङित् प्रत्यय पित् नहीं माने जाते' इत्यादि व्याख्याएँ प्रयोजनविशेष के सिद्ध्यर्थ की गई हैं। कातन्त्र में इस प्रकार की व्यवस्था न होने से 'ङितः' पद पढ़ने की कोई आवश्यकता नहीं रह जाती है।

### [रूपसिद्धि]

१. **पचेताम्**। पच् + पञ्चमी—आताम्। 'डु पचष् पाके' (१। ६०३) धातु से पञ्चमीविभक्तिसंज्ञक प्र० पु०—द्विव० 'आताम्' प्रत्यय, अन् विकरण, प्रकृत सूत्र से 'आ' को 'इ' ''अवर्ण इवर्णे ए'' (१।२।२) से अकार को एकार तथा इकार का लोप।

२. **पचेथाम्**। पच् + पञ्चमी — आथाम्। 'डु पचष् पाके' (१। ६०३) धातु से पञ्चमीसंज्ञक आत्मनेपद—म० पु०—द्विव० 'आथाम्' प्रत्यय, अन् विकरण। प्रकृत सूत्र से आकार को इकार तथा अन्य प्रक्रिया पूर्ववत्।। ७४२।

## ७४३. आते आथे इति च [३। ६। ६३]

### [सूत्रार्थ]

अकार से परवर्ती वर्तमानासंज्ञक 'आते—आथे' प्रत्ययों के आदि अवयव आकार को इकार आदेश होता है।। ७४३।

## [दु० वृ०]

अकारात् परयोराते—आथे इत्येतयोरादिरिर्भवति। पचेते, पचेथे। अविकृतनिर्देशात् स्वरे विकृतिर्नास्तीति। इति च एवम्प्रकारो द्रष्टव्यः। तेन पचावहे आवाम् इति, इह स्वरे **विकृतिर्न** स्यात्।। ७४३।

## [दु० टी०]

आते०। **षष्ठीलोपं** कृत्वा निर्देश इत्याह — अकारादिति। एवम् इत्यादि। आख्यातिकद्विवचनस्य प्रकृतिभावः साधित इत्यर्थः।। ७४३।

## [वि० प०]

आते०। अविकृतेत्यादि। तेनैकारान्तस्याख्यातिकस्य द्विवचनस्य प्रकृतिः साधितेति भावः।। ७४३।

## [समीक्षा]

'पचेते, पचेथे' आदि के सिद्ध्यर्थ दोनों ही व्याकरणों में आकार को इकारादेश किया गया है। पाणिनि का सूत्र है — ''आतो डित्तः'' (अ० ७।२।८१)। सूत्र में कातन्त्रकार ने आख्यातिक द्विवचन 'आते—आथे' प्रत्ययों में प्रकृतिभाव का प्रयोग अविकृतिप्रदर्शनार्थ किया है — अविकृतनिर्देशात् स्वरे विकृतिर्नास्तीति (दु० वृ०), एकारान्तस्याख्यातिकस्य द्विवचनस्य प्रकृतिः साधितेति (वि० प०)।

## [रूपसिद्धि]

१. **पचेते**। पच् + अन् + आते। 'डु पचष् पाके' (१। ६०३) धातु से वर्तमानासंज्ञक आत्मनेपद — प्र० पु० — द्विव० 'आते' प्रत्यय, 'अन्' विकरण, प्रकृतसूत्र से आकार को इकार, अकार को एकार तथा इकार का लोप।

२. **पचेथे**। पच् + अन् + आथाम्। 'डु पचष् पाके' (१। ६०३) धातु से वर्तमानासंज्ञक 'आथे' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ७४३।

# ७४४. याशब्दस्य च सप्तम्याः [३। ६। ६४]

## [सूत्रार्थ]

अकार से परवर्ती सप्तमीविभक्तिसंज्ञक 'या' शब्द को 'इ' आदेश होता है।। ७४४।

## [दु० वृ०]

अकारात् परस्य याशब्दस्य च सप्तम्या इर्भवति। पचेत्, पचेताम्, पचेः। अकारादिति किम् ? अद्यात्।। ७४४।

## [दु० टी०]

याश०। शब्दग्रहणं **निर्देशसुखप्रतिपत्त्यर्थम्**। अथ किमर्थं सप्तमीग्रहणम्। आशिषि चिकीर्ष्यादित्यस्य च लोपेनाघ्रातत्वात्। परादपि नित्यो विधिर्बलीयानिति ? सत्यम्, **मन्दमतिबोधार्थमेव**।। ७४४।

## [समीक्षा]

'पचेत्, पचेताम्, पचेः' इत्यादि शब्दों के सिद्ध्यर्थ सप्तमीविभक्तिसंज्ञक 'या' को 'इ' आदेश करने की अपेक्षा होती है। पाणिनि ने एतदर्थ 'इय्' आदेश किया है। उनका सूत्र है– ''अतो येयः'' (अ० ८। २। ८०) कातन्त्रकार ने प्रकृत सूत्र द्वारा केवल 'इ' आदेश ही किया है। यहाँ यह ज्ञातव्य है कि पाणिनीय प्रक्रिया के अनुसार 'या' आगम है, जब कि कातन्त्र में 'यात्' आदि प्रत्यय ही पढ़े गए हैं।

## [विशेष वचन]

१. शब्दग्रहणं निर्देशसुखप्रतिपत्त्यर्थम् (दु० टी०)।

२. मन्दमतिबोधार्थमेव (दु० टी०)।

## [रूपसिद्धि]

१. **पचेत्**। पच् + सप्तमी–यात्। 'डु पचष् पाके' (१। ६०३) धातु से सप्तमी–विभक्तिसंज्ञक परस्मैपद–प्र० पु०–ए० व० 'यात्' प्रत्यय, अन्विकरण, प्रकृत सूत्र से 'या' को 'इ' तथा ''अवर्ण इवर्णे ए'' (१। २। १) से अकार को एकार–इकारलोप।

२. **पचेताम्**। पच् + सप्तमी – याताम्। 'डु पचष् पाके' (१। ६०३) धातु से सप्तमीसंज्ञक प्र० पु० – द्विव० 'याताम्' प्रत्यय, अन्–विकरण, 'या' को 'इ' तथा अकार को एकार–इकारलोप।

३. **पचेः**। पच् + सप्तमी – यास्। 'डु पचष् पाके' (१। ६०३) धातु से सप्तमीसंज्ञक म० पु० – ए० व० 'यास्' प्रत्यय, अन् –विकरण, 'या' को 'इ' तथा सकार को विसर्गादेश।। ७४४।

## ७४५. याम्युसोरियमियुसौ [३। ६। ६५]

## [सूत्रार्थ]

अकार से परवर्ती 'याम्' को 'इयम्' तथा 'युस्' को 'इयुस्' आदेश होता है।। ७४५।

## [दु० वृ०]

अकारात् परयोर्याम्युसोः स्थाने इयमियुसौ भवतो यथासंख्यम्। पचेयम्, पचेयुः। कथम् – आह, आहतुः, आहुः, आत्थ, आहथुः ? ब्रुवस्त्यादिषु पञ्चसु निपाता वा। तथा विदेर्न वसुः – वेद, विदतुः, विदुः, वेत्थ, विदथुः, विद। वेद, विद्वः, विद्मः।। ७४५।

## [दु० टी०]

याम्०। ब्रुव आह च वा भवति। ति- तस्- अन्ति–सि–थसाम् अट्–अतुस्–उस्–थल्–अथुसो यथासंख्यमिति न वक्तव्यम्। तथा विदेर्वर्तमानायाः परोक्षेति। तथा हस्तकारस्थे न वक्तव्य इत्याह–आत्थेत्यादि। निपातशब्दः प्रत्येकमभिसम्बध्यते। **विभक्तिप्रतिरूपकाश्च निपाता** भवन्ति। यथा 'अस्ति–मन्ये' प्रभृतयः।। ७४५।

## [वि० प०]

याम्०। ब्रुव इत्यादि। 'ति–तस्–अन्ति–सि–थस्' एतेषु पञ्चसु 'अट्–अतुस्–उस्–थल–अथुस्' एते पञ्च यथासंख्यं भवन्ति। ब्रुवः स्थाने आह। थलि च हकारस्य तकारो निपात्यते। तथा 'विद ज्ञाने' (२। २७) इत्यस्माद् वर्तमानाया नवसु वचनेषु परोक्षाया नव वचनानि यथाक्रमं भवन्ति, तन्न वक्तव्यम्। एते हि **त्याद्यन्तप्रतिरूपका निपाता** इह वेदितव्याः। यथा 'अस्ति–मन्ये' प्रभृतयः इति। इह धातोस्तु 'ब्रवीति, वेत्ति' इत्यादय एव भवन्ति।। ७४५।

## [समीक्षा]

'पचेयम्, पचेयुः' इत्यादि शब्दों के सिद्ध्यर्थ 'या' को 'इ' आदेश की आवश्यकता होती है। पाणिनि ने एतदर्थ 'इय्' आदेश किया है– ''अतो येयः'' (अ० ७। २। ८०)। यह ज्ञातव्य है कि पाणिनि 'मिप्' को अम् आदेश तथा 'यास्' आगम को 'इय्' आदेश करके उक्त प्रयोग सिद्ध करते हैं, परन्तु कातन्त्रकार ने 'याम्–युस्' प्रत्ययों के स्थान में 'इयम्–इयुस्' आदेश से सिद्ध किए हैं। फलतः कातन्त्रकार का लाघव ही अधिक सङ्गत सिद्ध होता है।

## [विशेष वचन]

१. ब्रुवस्त्यादिषु पञ्चसु निपाता वा (दु० वृ०)।

२. विभक्तिप्रतिरूपकाश्च निपाता भवन्ति (दु० टी०)।

## [रूपसिद्धि]

१. **पचेयम्**। पच् + अन् + याम्। 'डु पचष् पाके' (१। ६०३) धातु से सप्तमी-विभक्तिसंज्ञक उ० पु०–ए० व० 'याम्' प्रत्यय, अन्–विकरण, प्रकृत सूत्र से 'याम्' को 'इयम्' आदेश तथा अकार को एकार–इकारलोप।

२. **पचेयुः**। पच् + अन् + युस्। 'डु पचष् पाके' (१। ६०३) धातु से सप्तमीविभक्तिसंज्ञक प्र० पु० – ब० व० 'युस्' प्रत्यय, अन्–विकरण, प्रकृत सूत्र से 'युस्' को 'इयुस्' आदेश, अकार को एकार–इकारलोप तथा ''रसकारयोर्विसृष्टः'' (३। ८। २) से सकार को विसर्गादेश।। ७४५।

## ७४६. शमादीनां दीर्घो यनि [३। ६। ६६]

## [सूत्रार्थ]

'यन्' प्रत्यय के परे रहते 'शम्' आदि धातुओं के अकार को दीर्घ आदेश होता है।। ७४६।

## [दु० वृ०]

शमादीनां दीर्घो भवति यनि परे। शाम्यति, दाम्यति। मदीपर्यन्तः शमादिः। यनीति किम् ? शम्यते।। ७४६।

## [दु० टी०]

शमा०। दीर्घो हि सजातीयं स्वरमपेक्षते। ह्रस्वप्रतियोगी च दीर्घ इत्याह– ह्रस्व इत्यादि। आदिशब्दस्य व्यवस्थावाचित्वादित्याह मदीपर्यन्त इत्यादि। 'शमु–दमु–तमु–श्रमु–भ्रमु–क्षमु–क्लमु–मदी' एते अष्टौ भवन्ति। ननु शमादीनष्टावधिकृत्य **वृद्ग्रहणं** किन्न कृतम् अनन्तरस्य विधि: प्रतिषेधो वेति शमादिसमाप्त्यर्थं भविष्यति, न पुषादिसमाप्त्यर्थम्। नैवम्, राश्यपेक्षयोभयमनन्तरं भवतीति व्यवस्थैवाश्रयणीया।। ७४६।

## [समीक्षा]

'शाम्यति, ताम्यति, भ्राम्यति' आदि शब्दरूपों के सिद्ध्यर्थ उपधासंज्ञक अकार के दीर्घ का विधान दोनों ही व्याकरणों में किया गया है। पाणिनि का सूत्र है– ''शमामष्टानां दीर्घ: श्यनि'' (अ० ७। ३। ७४)। यह ज्ञातव्य है कि दिवादिगणपठित धातुओं में पाणिनि के अनुसार 'श्यन्' विकरण तथा शर्ववर्मा के अनुसार 'यन्' विकरण होता है, अत: सूत्रों में उनका भिन्न रूप में उल्लेख द्रष्टव्य है। कातन्त्रकार ने 'शमादि' को एक धातुगण माना है, जबकि पाणिनि ने सूत्र में परिगणन किए विना ही उनकी ८ संख्या का उल्लेख किया है। ऐसी स्थिति में कातन्त्रकार का ही निर्देश अधिक सङ्गत है।

## [विशेष वचन]

१. आदिशब्दस्य व्यवस्थावाचित्वात् (दु० टी०)।

२. राश्यपेक्षया उभयमनन्तरं भवतीति व्यवस्थैवाश्रयणीया (दु० टी०)।

## [रूपसिद्धि]

१. **शाम्यति**। शम् + यन् + ति। 'शमु उपशमे' (३। ४२) धातु से वर्तमानाविभक्ति–संज्ञक परस्मैपद–प्र०पु० – ए० व० 'ति' प्रत्यय, ''दिवादेर्यन्'' (३। २। ३३) से 'यन्' विकरण, 'न्' अनुबन्ध का प्रयोगाभाव तथा प्रकृत सूत्र से धातु की उपधा अक्षर को दीर्घ आदेश।

२. **दाम्यति**। दम् + यन् + ति। 'दमु उपशमे' (३। ४२) धातु से 'ति' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।। ७४६।

## ७४७. ष्ठिवुक्लम्वाचमामनि [३। ६। ६७]

## [सूत्रार्थ]

'ष्ठिवु–क्लमु' तथा 'आङ्' उपसर्गपूर्वक 'चमु' धातु को दीर्घ होता है, 'अन्' विकरण के परे रहते।। ७४७।

## [दु० वृ०]

एषामनि विकरणे परे दीर्घो भवति। ष्ठीवति, क्लामति, आचामति। आङिति किम् ? विचमति, चमति।। ७४७।

## [दु० टी०]

ष्ठिवु०। अस्मादेव वचनात् क्लमेर्दैवादिकादपि पक्षेऽन्विकरणो विज्ञायते। ष्ठिवुरिति दैवादिकोऽप्यस्ति तस्य। "**नामिनो र्वो:**" (३। ८। १४) इत्यादिना दीर्घ: स्यात्। ष्ठीवतीति। भौवादिकस्यात्रोकार **उच्चारणार्थ:** क्लमेरिव।। ७४७।

## [वि० प०]

ष्ठिवु०। क्लामतीति। क्लमेर्दैवादिकादपि, अत एव **ज्ञापकात्** पक्षे अन्विकरणो ज्ञाप्यते।। ७४७।

## [समीक्षा]

'ष्ठीवति, क्लामति, आचामति' आदि शब्दरूपों के सिद्ध्यर्थ दोनों ही आचार्यों ने दीर्घविधान किया है। पाणिनि का सूत्र है– "ष्ठिवुक्लम्याचमां शिति" (अ० ७। ३। ७५)। पाणिनीय 'शित्' निर्देश की अपेक्षा कातन्त्र का 'अन्' निर्देश स्पष्टार्थावबोधक है।

## [विशेष वचन]

१. अत्रोकार: उच्चारणार्थ: क्लमेरिव (दु० टी०)।

२. क्लमेर्दैवादिकादपि, अत एव ज्ञापकात् पक्षेऽन्विकरणो ज्ञाप्यते (वि० प०)।

## [रूपसिद्धि]

१. **ष्ठीवति**। ष्ठिव् + अन् + ति। 'ष्ठिवु निरसने' (१। १९०;३। ४) धातु से वर्तमानासंज्ञक परस्मैपद – प्र० पु० – ए० व० 'ति' प्रत्यय, "अन् विकरण: कर्तरि" (३। २। ३२) से 'अन्' विकरण तथा प्रकृत सूत्र से दीर्घ आदेश।

२. **क्लामति**। क्लम् + अन् + ति। 'क्लमु ग्लानौ' (३। ४७) धातु से वर्तमाना-विभक्तिसंज्ञक परस्मैपद– प्र० पु० – ए० व० 'ति' प्रत्यय, 'अन्' विकरण तथा धातु की उपधा अकार को दीर्घ आदेश।

३. **आचामति**। आङ् + चमु + अन् + ति। 'आङ्' उपसर्गपूर्वक 'चमु अदने' (१। १५६) धातु से वर्तमानासंज्ञक 'ति' प्रत्यय, 'अन्' विकरण तथा धातु की उपधा अकार को दीर्घ आदेश।। ७४७।

## ७४८. क्रम: परस्मै [३। ६। ६८]

## [सूत्रार्थ]

परस्मैपदविषयक 'अन्' विकरण के परे रहते 'क्रम्' धातुघटित अकार को दीर्घ आदेश होता है।। ७४८।

## [दु० वृ०]

क्रम: परस्मैपदेऽनि दीर्घो भवति। क्रामति। कथं क्रम ? हेर्लोपात्। परस्मा इति किम् ? पराक्रमते, उपक्रमते।। ७४८।

## [दु० टी०]

क्रमः। हेर्लोपादिति। प्रत्ययलोपे प्रत्ययलक्षणमिति **कथमिह परस्मैपदेनानिति** विशिष्यते। परस्मैपदे योऽन्विकरण इति ? सत्यम्। **परस्मैपदेन विना दीर्घलक्षणं** न प्रवर्तते इति भवति प्रत्ययलोपलक्षणम्। अथवा परस्मैपद इति निमित्तत्वेन विशेषणं न परत्वेन परस्मैपदे निमित्ते योऽन्विकरण इति। परस्मैपदस्येति षष्ठी वा, परशब्दस्याप्रयुक्तत्वात्।। ७४८।

## [समीक्षा]

'क्रामति, क्रामतः, क्रामन्ति' इत्यादि शब्दरूपों के सिद्ध्यर्थ **क्रम्धातुगत अकार** को दीर्घ आदेश दोनों ही व्याकरणों में किया गया है। पाणिनि का **सूत्र है**– **''क्रमः परस्मैपदेषु''** (अ० ७। ३। ७६)।

## [रूपसिद्धि]

१. **क्रामति**। क्रम् + अन् + ति। 'क्रमु पादविक्षेपे' (१।१५७) धातु से **वर्तमानासंज्ञक** 'ति' प्रत्यय, 'अन्' विकरण तथा दीर्घ आदेश।। ७४८।

# ७४९. गमिष्यमां छः [३। ६। ६९]

## [सूत्रार्थ]

'अन्' विकरण के परे रहते 'गम्–इष्–यम्' धातुओं के अन्त को **'छ्'** आदेश होता है।। ७४९।

## [दु० वृ०]

सामान्यमनुवर्तते। एषामन्तस्य छो भवति अनि परे। गच्छति, संगच्छते, इच्छति, यच्छति, आयच्छते।। ७४९।

## [दु० टी०]

गमि०। इच्छतीति। 'इषु इच्छायाम्' (५। ७०) तौदादिकः। अनीति किम् ? **'इष** गतौ' (३। १६) इष्यति। **'इष आभीक्ष्ण्ये'** (८। ४५) क्रैयादिकः – इष्णाति।। ७४९।

## [वि० प०]

गमि०। सामान्यमनुवर्तते इति। **'विशेषातिदिष्टः प्रकृतं न बाधते'** (का० परि० ३९) इत्यर्थः। तेनात्मनेपदेऽप्यनि संगच्छते, आयच्छते इति। **''समो गमृच्छि०''** (३। २। ४२ –२०) इत्यादिना **''आङो यमहनौ''** (३। २। ४२ – २२) इत्यादिना रुचादित्वादात्मनेपदम्।। ७४९।

## [समीक्षा]

'इच्छति, गच्छति, यच्छति' आदि शब्दरूपों के सिद्ध्यर्थ दोनों व्याकरणों में छकारादेश किया गया है। पाणिनि का सूत्र है – ''इषुगमियमां छः'' (अ० ७। ३। ७७)। तीन धातुओं के पाठक्रम को छोड़कर समानता ही उभयत्र देखी जाती है।

## [रूपसिद्धि]

१. **गच्छति**। गम् + अन् + ति। 'गम्लृ गतौ' (१। २७९) धातु से वर्तमानाविभक्तिसंज्ञक परस्मैपद – प्र० पु० – ए० व० 'ति' प्रत्यय, ''अन् विकरण: कर्तरि'' (३। २। ३२) से 'अन्' विकरण, प्रकृत सूत्र से 'म्' को 'छ्' आदेश, 'छ्' को द्विर्वचन तथा पूर्ववर्ती छकार को चकारादेश।। ७४९।

२. **संगच्छते**। सम् + गम् + अन् + ते। 'सम्' उपसर्गपूर्वक 'गम्लृ गतौ' (१। २७९) धातु से वर्तमानासंज्ञक आत्मनेपद 'ते' प्रत्यय, 'अन्' विकरण, 'म्' को 'छ्' आदेश, द्वित्व तथा 'छ्' को 'च्' आदेश।

३. **इच्छति**। इष् + अन् + ति। 'इषु इच्छायाम्' (५। ७०) धातु से 'ति' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

४. **यच्छति**। यम् + अन् + ति। 'यम उपरमे' (१। १५८) धातु से 'ति' प्रत्यय, 'अन्' विकरण, 'म्' को 'छ्', द्विर्वचन, पूर्ववर्ती छकार को चकारादेश।

५. **आयच्छते**। आङ् + यम् + अन् + ते। 'आङ्' उपसर्गपूर्वक 'यम उपरमे' (१। १५८) धातु से 'ते' प्रत्यय, 'अन्' विकरण, छकार को द्विर्वचन तथा पूर्ववर्ती छकार को चकारादेश।। ७४९।

## ७५०. प: पिब: [३। ६। ७०]

## [सूत्रार्थ]

'अन्' विकरण के परे रहते 'पा' धातु को 'पिब' आदेश होता है।। ७५०।

## [दु० वृ०]

पाधातोरनि परे पिबादेशो भवति। पिबति। अदन्तो वा। अनि पारूपस्येति किम् ? 'पै ओ वै'– पायति।। ७५०।

## [दु० टी०]

प:। पिबतीत्यत्र कथमुपधालक्षणो गुणो न भवतीत्याह—अदन्तो वेति। नात्राकार **उच्चारणार्थ** इत्याशय:। पिबेत्यकारसामर्थ्यात् प्रकृतिवृत्तेर्वा पुनर्वृत्तावविधिरिति न भविष्यति लोप: पिबतेरिति निर्देशाच्च। पारूपस्येति। अनि परतो योऽसौ पारूपस्तस्येह ग्रहणम्। स पुन: पा पाने (१। २६४) इति प्रतिपदोक्तग्रहणाद् वा। **'पै ओ वै शोषणे'** (१। २६१) इत्यस्य न ग्रहणम्, **'पा रक्षणे'** (२। २१) पाति, नित्यत्वादनो लुकि लुग्लोपे न प्रत्यय-कृतम्।। ७५०।

## [वि० प०]

प:। अदन्तो वेति। नन्वकारान्तपक्षे लघूपधलक्षणो गुणो न सम्भवति, उपधोप–धत्वात्। व्यञ्जनान्तपक्षे तु स: कथं न स्यात्, तदयुक्तम्। एवं सति **प्रक्रियालाघवार्थं** गुणरूपमेव कुर्यादिति मन्यते। किञ्च **''लोप: पिबतेरीच्चाभ्यासस्य''** (३। ५। ४६) इति निर्देशाच्च पायतीति 'पै ओ वै शोषणे' (१। २६१), 'पा रक्षणे' (२। २१) इत्यस्य तु

पारूपमस्ति। केवलम् अदादित्वाद् अनो लुग् विद्यते। न च **'प्रत्ययलोपे प्रत्ययलक्षणम्'** (का० परि० ५२), **'लुग्लोपे न प्रत्ययकृतम्'** इति वचनात्।। ७५०।

## [समीक्षा]

'पा' धातु से 'पिबति' 'घ्रा' से 'जिघ्रति' आदि शब्दरूप सिद्ध करने के लिए दोनों ही व्याकरणों में 'पा' को 'पिब' आदि ११ आदेश किए गए हैं। पाणिनि का सूत्र है– ''पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौ–शीयसीदाः'' (अ० ७। ३। ७८)। पाणिनि ने इन ११ आदेशों को एक ही सूत्र में तथा कातन्त्रकार ने ११ सूत्रों में निबद्ध किया है। पृथक् योगविधान का कारण स्पष्ट करते हुए टीकाकार दुर्गसिंह ने कहा है कि ११ धातुओं के स्थान में ११ आदेशों की क्रमबद्धता जानने में मन्दबुद्धि व्यक्तियों को गौरव होता है, उस गौरव से मुक्ति के लिए पृथक् सूत्र बनाए गए हैं– ''पादीनां पिबादयो यथासंख्यमिति न कृतम्, मन्दधियां प्रतिपत्तिगौरवं स्यादिति'' (कात० वृ० टी० ३। ६। ७९)। इस प्रकार कातन्त्र में सूत्रसंख्याकृत गौरव होने पर भी अर्थावबोध की दृष्टि से लाघव ही माना जाएगा।

## [विशेष वचन]

१. नात्राकार उच्चारणार्थः (दु० टी०)।

२. प्रक्रियालाघवार्थं गुणरूपमेव कुर्यादिति मन्यते (वि० प०)।

## [रूपसिद्धि]

१. **पिबति**। पा + अन् + ति। 'पा पाने' (१। २६४) धातु से वर्तमानासंज्ञक परस्मैपद–प्र० पु० – ए० व० 'ति' प्रत्यय, ''अन् विकरणः कर्तरि'' (३। २। ३२) से अन् – विकरण, प्रकृत सूत्र से 'पा' को 'पिब' आदेश तथा ''असन्ध्यक्षरयोरस्य तौ तल्लोपश्च'' (३। ६। ४०) से अकारलोप।। ७५०।

## ७५१. घ्रो जिघ्रः [३। ६। ७१]

## [सूत्रार्थ]

'अन्' विकरण के परे रहते 'घ्रा' धातु को 'जिघ्र' आदेश होता है।। ७५१।

## [दु० वृ०]

घ्राधातोरनि परे जिघ्रादेशो भवति। जिघ्रति।। ७५१।

## [समीक्षा]

पूर्ववर्ती सूत्र- सं० ७५० की समीक्षा द्रष्टव्य है।। ७५१।

## [रूपसिद्धि]

१. **जिघ्रति**। घ्रा + अन् + ति। 'घ्रा गन्धोपादाने' (१। २६५) से वर्तमानासंज्ञक 'ति' प्रत्यय, 'अन्' विकरण तथा 'घ्रा' को 'जिघ्र' आदेश।। ७५१।

## ७५२. ध्मो धमः [३। ६। ७२]

### [सूत्रार्थ]

'अन्' विकरण के परे 'ध्मा' धातु को 'धम' आदेश होता है।। ७५२।

### [दु० वृ०]

ध्माधातोरनि परे धमादेशो भवति। धमति।। ७५२।

### [समीक्षा]

पूर्ववर्ती सूत्र– सं० ७५० की समीक्षा द्रष्टव्य है।

### [रूपसिद्धि]

१. धमति। ध्मा + अन् + ति। 'ध्मा शब्दाग्निसंयोगयोः' (१। २६६) धातु से 'ति' प्रत्यय, 'अन्' विकरण तथा 'ध्मा' को 'धम' आदेश।। ७५२।

## ७५३. स्थस्तिष्ठः [३। ६। ७३]

### [सूत्रार्थ]

'अन्' विकरण के परे रहते 'स्था' धातु को 'तिष्ठ' आदेश होता है।। ७५३।

### [दु० वृ०]

स्थाधातोरनि परे तिष्ठादेशो भवति। तिष्ठति।। ७५३।

### [दु० टी०]

स्थः। तिष्ठेति षत्वनिर्देशो ज्ञापयति – न विकारावयवस्य षत्वम्। तेन 'तिस्रः' इत्यादि सिद्धमित्येके। प्रकृतिप्रवृत्तेः पुनर्वृत्तावविधिरिति न चिन्त्यते।। ७५३।

### [बि० टी०]

स्थः। **हेमकरेण** विकारादेशयोर्भेदः कल्प्यते। एकदेशस्य यत् क्रियते स **विकारः**, समुदायस्य यत् क्रियते स **आदेशः** इत्युक्तं चतुष्टयप्रकरणे। अत एव षत्वनिर्देशाद् **दुर्गवाक्ये**नाप्युक्तमिदम्, तस्य चेत्यत्र समुदायस्य यत् क्रियते स आदेशः। अत एवैक–देशत्वाद् विकारो भवति, तेन षत्वं स्यात्। समुदायस्य आदेशं प्रति चिह्नं 'स्थस्तिष्ठः' इति षत्वनिर्देशात्। अन्यथा विकारद्वारेण षत्वं प्राप्तं कथं षत्वं निर्दिश्यते। इदं तु किञ्चिन्न लगत्येव, **टीका**विरोधात्। षत्वप्रकरणे **टीकाकार** इदमाह – ननु तिस्रादेशे सति विकारस्थत्वात् कथन्न षत्वमिति न देश्यम्, **आगम**स्तावदेकवर्णस्तत्साहचर्याद् विकारोऽपि यद्येकवर्णः स्यात् तदैव षत्वम्, तस्मादेकवर्णोऽपि **विकारो** भवति, नैवम्। टीकाकृता स्वमतपक्ष एवाक्तम्, तत्तु **दुर्गवाक्यहेमकराभ्यां परपक्ष**माश्रित्योक्तम्। अत एवात्र सूत्रे **दुर्गवाक्येऽन्यः** आह – तिस्रादेशोऽयमनेकवर्णत्वादित्युच्यते। वस्तुतस्त्वेवं भेदः, नित्यवादिनो मते शब्दस्य नित्यत्वम् अस्यैवादेशशब्दप्रसङ्गे न स्यात्; न ध्वंसं करोति। यथा **''आन् शस्''** (२। ३। ९) इति। **अनित्यवादिनो** मते विकारो भवति शब्दध्वंसकृतत्वात्

तेनैकदेशस्य यत् क्रियते स विकारस्तिस्रादेशश्च, समुदायस्य यत् क्रियते तदपि विकार आदेशश्च।। ७५३।

**।। इत्याचार्यबिल्वेश्वरटीकायामाख्याताध्याये तृतीयेऽनुषङ्गलोपपादः षष्ठः समाप्तः।।**

●

## [समीक्षा]

द्रष्टव्य पूर्व सूत्र-सं० ७५०

## [विशेष वचन]

१. हेमकरेण विकारादेशयोर्भेदः कल्प्यते (बि० टी०)।

२. एकदेशस्य यत् क्रियते स विकारः तिस्रादेशश्च समुदायस्य यत् क्रियते तदपि विकार आदेशश्च (बि० टी०)।

## [रूपसिद्धि]

१. **तिष्ठति**। स्था + अन् + ति। 'ष्ठा गतिनिवृतौ' (१। २६७) धातु से वर्तमानासंज्ञक 'ति' प्रत्यय, 'अन्' विकरण, प्रकृत सूत्र से 'स्था' को 'तिष्ठ' आदेश तथा अकारलोप। यह ज्ञातव्य है कि ''धात्वादेः षः सः'' (३। ८। २४) से धातुगत षकार को सकारादेश होने पर 'निमित्तापाये नैमित्तिकस्याप्यपायः' (का० परि० २७) परिभाषा के अनुसार 'ठ्' भी निवृत्त होकर 'थ्' रूप में उपस्थित होता है। अतः 'स्था' को धातुरूप मानकर सूत्र में 'स्थः' शब्द पढ़ा गया है।। ७५३।

## ७५४. म्नो मनः [३। ६। ७४]

## [सूत्रार्थ]

'अन्' विकरण के परे रहते 'म्ना' धातु को 'मन' आदेश होता है।। ७५४।

## [दु० वृ०]

म्नाधातोरनि परे मनादेशो भवति। मनति।। ७५४।

## [समीक्षा]

द्रष्टव्य पूर्व सूत्र–सं० ७५०।

## [रूपसिद्धि]

१. **मनति**। म्ना + अन् + ति। 'म्ना अभ्यासे' (१। २६८) धातु से वर्तमानाविभक्तिसंज्ञक परस्मैपद – प्र० पु० – ए० व० 'ति' प्रत्यय, 'अन्' विकरण, प्रकृत सूत्र से 'म्ना' को 'मन' आदेश तथा अकारलोप।। ७५४।

## ७५५. दाणो यच्छः [३। ६। ७५]

### [सूत्रार्थ]

'अन्' विकरण के परे रहते 'दाण्' धातु को 'यच्छ' आदेश होता है।। ७५५।

### [दु० वृ०]

दाण्धातोरनि परे यच्छादेशो भवति। यच्छति।। ७५५।

### [दु० टी०]

दाणो०। अथ किमर्थो णकारानुबन्धः ? **तदन्तविधिनिषेधार्थः**, तेन वदति।। ७५५।

### [समीक्षा]

द्रष्टव्य पूर्व सूत्र – सं० ७५०

### [विशेष वचन]

१. अथ किमर्थो णकारानुबन्धः ? तदन्तविधिनिषेधार्थः (दु० टी०)।

### [रूपसिद्धि]

१. **यच्छति**। दाण् + अन् + ति। 'दाण् दाने' (१। २६९) धातु से वर्तमाना-विभक्तिसंज्ञक परस्मैपद – प्र० पु० – ए० व० 'ति' प्रत्यय, 'अन्' विकरण, 'दाण्' धातु को 'यच्छ' आदेश तथा अकारलोप।। ७५५।

## ७५६. दृशेः पश्यः [३। ६। ७६]

### [सूत्रार्थ]

'अन्' विकरण के परे रहते 'दृश्' धातु को 'पश्य' आदेश होता है।। ७५६।

### [दु० वृ०]

दृशेरनि परे पश्यादेशो भवति। पश्यति।। ७५६।

### [समीक्षा]

द्रष्टव्यम् पूर्व सूत्र–सं० ७५०

### [रूपसिद्धि]

१. **पश्यति**। दृश् + अन् + ति। 'दृशिर् प्रेक्षणे' (१। २८९) धातु से वर्तमाना-विभक्तिसंज्ञक 'ति' प्रत्यय, 'अन्' विकरण, 'दृशिर्' धातु को 'पश्य' आदेश तथा अकारलोप।। ७५६।

## ७५७. अर्तेर्ऋच्छः [३। ६। ७७]

### [सूत्रार्थ]

'अन्' विकरण के परे रहते 'ऋ' धातु को 'ऋच्छ' आदेश होता है।। ७५७।

## [दु० टी०]

अर्त्तेरनि परे ऋच्छादेशो भवति। ऋच्छति। **तिब्निर्देशार्थ** एव।। ७५७।

## [दु० वृ०]

अर्तेः। ऋच्छ गतीत्यादिना धात्वन्तरेण सिद्धे वचनम्, अरतीति **प्रयोगनिषेधार्थम्**। तिब्निर्देशः **पाठसुखार्थः**।। ७५७।

## [वि० प०]

अर्त्तेः। तिपा निर्देशार्थ एवेति नान्यत् फलमस्ति **सुखार्थं** धातुस्वरूपमेवेति तिपा निर्दिष्टमिति भावः। न चान्तरेण तिपम् 'ऋ ऋच्छ' इति निर्देशे ऋकारान्तस्येति तदन्तविशेषणाशङ्का। प्रधानधातुप्रस्तावाद् 'ऋच्छ गतीन्द्रिय०' इत्यादिनापि सिद्धं साध्यं भवति। केवलम् अरतीति **प्रयोगनिवृत्त्यर्थं** वचनम्।। ७५७।

## [समीक्षा]

द्रष्टव्यम् पूर्व सूत्र – सं० ७५०

## [विशेष वचन]

१. अरतीति प्रयोगनिषेधार्थम् (सूत्रमिदम्) – (दु० टी०; वि० प०)।

२. तिब्निर्देशः पाठसुखार्थः (दु० टी०)।

३. सुखार्थं धातुस्वरूपमेवेति तिपा निर्दिष्टमिति भावः (वि० प०)।

## [रूपसिद्धि]

१. **ऋच्छति**। ऋ + अन् + ति। 'ऋ प्रापणे च' (१। २७५) धातु से वर्तमाना–विभक्तिसंज्ञक 'ति' प्रत्यय, 'अन्' विकरण, 'ऋ' को 'ऋच्छ' आदेश तथा अकार का लोप।। ७५७।

# ७५८. सर्तेर्धावः [३। ६। ७८]

## [सूत्रार्थ]

'अन्' विकरण के परे रहते 'सृ' धातु को 'धाव' आदेश होता है।। ७५८।

## [दु० वृ०]

सर्तेरनि परे धावादेशो भवति। धावति। ननु धावु गतावप्यस्ति ? **जवाभिधाने** यथा स्यादिति वचनम्, तेन प्रियामनुसरति।। ७५८।

## [दु० टी०]

सर्तेः। नन्वित्यादि। सरत्यादिवत्, जवाभिधानं **प्रतिपत्तिगौरव**मिति भावः।। ७५८।

## [वि० प०]

सर्तेः। नन्वित्यादि। गत्यर्थत्वादयं यदा जवे = वेगे वर्तते तदा सरतीति प्रयोगो मा भूद् इत्यर्थः।। ७५८।

## [समीक्षा]

द्रष्टव्य सूत्र सं०–७५० की समीक्षा। यह ज्ञातव्य है कि 'धावु गतिशुद्ध्योः' (१। ५७०) धातु से 'धावति' प्रयोग सिद्ध होता ही है, तो फिर प्रकृत सूत्र द्वारा 'सृ' धातु को 'धाव' आदेश करके 'धावति' प्रयोग सिद्ध करने की क्या आवश्यकता है, इसका उत्तर 'वृत्तिकार–टीकाकार–पञ्जिकाकार' ने देते हुए कहा है कि वेगगति विवक्षित होने पर 'धावति' प्रयोग हो तथा सामान्य गति विवक्षित होने पर 'सरति' प्रयोग – इस अभिप्राय से यहाँ 'सृ' को 'धाव' आदेश किया गया है। अतः 'प्रियामनुसरति' प्रयोग समीचीन माना जाता है, 'प्रियामनुधावति' नहीं। क्योंकि यहाँ सामान्य गति ही अभीष्ट होती है, वेग गति नहीं।

## [विशेष वचन]

१. ननु धावु गतावप्यस्ति ? जवाभिधाने यथा स्यादिति वचनम् (दु० वृ०)।

## [रूपसिद्धि]

१. **धावति**। सृ + अन् + ति। 'सृ गतौ' (१। २७४) धातु से वर्तमानासंज्ञक 'ति' प्रत्यय, 'अन्' विकरण तथा प्रकृत सूत्र से 'सृ' को 'धाव' आदेश।। ७५८।

# ७५९. शदेः शीयः [३। ६। ७९]

## [सूत्रार्थ]

'अन्' विकरण के परे रहते 'शद्' धातु को 'शीय' आदेश होता है।। ७५९।

## [दु० वृ०]

शदेरनि परे शीयादेशो भवति। शीयते।। ७५९।

## [दु० टी०]

शदेः। अथ शीयडिति। ञानुबन्धः कथं न कुर्यात्। शदिरनीति वचनं रुचादौ न कृतं स्यात् ? सत्यम्। किमयं डकारानुबन्धो न वेति शङ्क्यते। पादीनां पिबादयो यथासंख्यमिति न कृतम्, मन्दधियां **प्रतिपत्तिगौरवं** स्यादिति।। ७५९।

## [वि० प०]

शदेः। शदिरनीति रुचादित्वादात्मनेपदम्।। ७५९।

## [समीक्षा]

द्रष्टव्य समीक्षा सूत्र–सं० ७५०

## [रूपसिद्धि]

१. **शीयते**। शद् + अन् + ते। 'शद्लृ शातने' (१। ५६३;५। ५९) धातु से वर्तमानासंज्ञक आत्मनेपद 'ते' प्रत्यय, अन् विकरण तथा 'शद्' को 'शीय' आदेश।। ७५९।

## ७६०. सदेः सीदः [३। ६। ८०]

## [सूत्रार्थ]

'अन्' विकरण के परे रहते 'सद्' को 'सीद' आदेश होता है।। ७६०।

## [दु० वृ०]

सदेरनि परे सीदादेशो भवति। सीदति।। ७६०।

## [समीक्षा]

द्रष्टव्य समीक्षा सूत्र–सं० ७५०

## [रूपसिद्धि]

१. **सीदति**। सद् + अन् + ति। 'षद्लृ विशरणगत्यवसादनेषु' (१। ५६२; ५। ६०) धातु से वर्तमानासंज्ञक 'ति' प्रत्यय, 'अन्' विकरण तथा 'सद्' को 'सीद' आदेश।। ७६०।

## ७६१. जा जनेर्विकरणे [३। ६। ८१]

## [सूत्रार्थ]

विकरण के परे रहते 'जन्' धातु को 'जा' आदेश होता है।। ७६१।

## [दु० वृ०]

जनेर्विकरणे जादेशो भवति। जनी – जायते। यणि ते **''ये वा''** (४। १। ७२) स्यात् – जायते, जन्यते।। ७६१।

## [दु० टी०]

जा०। जनीत्यादि। **'जन जनने'** (२। ८०) इत्यस्यानः पुनर्लुका भवितव्यम्, नात्र चोद्यम् **''ये वा''** (४। १। ७२) इति **व्यवस्थितविभाषया** नित्यं भविष्यति, किमनेनेति भिन्नकर्तृकत्वात्।। ७६१।

## [समीक्षा]

'जायते' आदि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में 'जनी' धातु को

'जा' आदेश किया गया है। पाणिनि का सूत्र है– ''ज्ञाजनोर्जा'' (अ० ७। ३। ७९)। **वृत्तिकार**–टीकाकार ने कहा है कि भावार्थक यण् प्रत्यय के परे रहते ''ये वा'' (४। १। ७२) सूत्र से वैकल्पिक 'जा' आदेश होने के कारण 'जायते–जन्यते' दो रूप बनते हैं। टीकाकार के अनुसार उक्त सूत्र में व्यवस्थितविभाषा मान लेने से 'जा' आदेश नित्य ही प्रवृत्त होगा, फिर इस सूत्र को बनाने की क्या आवश्यकता है, इसका समाधान किया गया है कि प्रकृत सूत्र के रचयिता शर्ववर्मा हैं, जबकि ''ये वा'' (४। १। ७२) सूत्र कृत्प्रकरण का है, जिसकी रचना वररुचि ने की है। इस प्रकार कर्ता के भेद से व्यवस्थितविभाषा नहीं हो सकेगी। फलतः सूत्र बनाना सार्थक ही है– 'नात्र चोद्यम्' ''ये वा'' (४। १। ७२) इति व्यवस्थितविभाषया नित्यं भविष्यति किमनेनेति, भिन्नकर्तृकत्वात्।। ७६१।

## [रूपसिद्धि]

१. **जायते**। जनी + यन् + ते। 'जनी प्रादुर्भावे' (३। ९४) धातु से वर्तमानासंज्ञक आत्मनेपद – प्र० पु० – ए० व० 'ते' प्रत्यय, ''दिवादेर्यन्'' (३। २। ३३) से 'यन्' विकरण तथा प्रकृत सूत्र से 'जनी' को 'जा' आदेश।। ७६१।

## ७६२. ज्ञश्च [३। ६। ८२]

## [सूत्रार्थ]

विकरण के परे रहते 'ज्ञा' धातु को 'जा' आदेश होता है।। ७६२।

## [दु० वृ०]

ज्ञाधातोर्विकरणे जादेशो भवति। जानाति।। ७६२।

## [समीक्षा]

'जानाति' आदि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में 'ज्ञा' धातु को 'जा' आदेश किया गया है। पाणिनि का सूत्र है– ''ज्ञाजनोर्जा'' (अ० ७। ३। ७९) पाणिनि ने 'ज्ञा – जन' दोनों के स्थान में जादेशविधानार्थ एक ही सूत्र बनाया है, परन्तु कातन्त्रकार ने स्पष्टावबोधार्थ दो सूत्र किए हैं।

## [रूपसिद्धि]

१. **जानाति**। ज्ञा + ना + ति। 'ज्ञा अवबोधने' (८। ३१) धातु से वर्तमानासंज्ञक परस्मैपद – प्र० पु० – ए० व० 'ति' प्रत्यय, ''ना क्र्यादेः'' (३। २। ३८) से 'ना' विकरण तथा प्रकृत सूत्र से 'ज्ञा' को 'जा' आदेश।। ७६२।

## ७६३. प्वादीनां ह्रस्वः [३।६।८३]

### [ सूत्रार्थ ]

विकरण के परे रहते प्वादिगणपठित धातुओं को ह्रस्व होता है।।७६३।

### [दु० वृ०]

प्वादीनां विकरणे ह्रस्वो भवति। पुनाति, लुनाति। 'ल्यी' चेत्यतो ल्वादिप्वादि-व्यवच्छित्तये **वृत्** । पूङस्तु पवते, मूङस्तु भवते।।७६३।

### [दु० टी०]

प्वा०। ल्यी चेत्यादि। न ह्युभयगणसमाप्त्यर्थता **केनचिद्** वृद्ग्रहणस्य वार्यते। न्वादिसमाप्त्यर्थमेव **वृद्**ग्रहणम्, प्वादय आगणान्ता इत्**येके**। तेषां 'ब्रिणाति, ध्रिणाति' इत्यत्र ह्रस्व एव। जानातीत्यत्र न भवति, प्रकृतिवृत्तेः पुनर्वृत्तावविधिर्निष्ठितस्येति भावः। **अन्य** आह- व्यक्तौ दीर्घबलान्न भविष्यति।।७६३।

### [समीक्षा]

'पुनाति, लुनाति' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में ह्रस्वविधान किया गया है । पाणिनि का सूत्र है- "प्वादीनां ह्रस्वः" (अ० ७।३।८०)। जो आचार्य क्र्यादिगण के अन्त तक 'प्वादिगण' की सत्ता मानते हैं, उनके अनुसार इस गण में ४४ धातुएँ (८।८-५१) सम्मिलित की जाती हैं।

### [विशेष वचन]

१. अन्य आह- व्यक्तौ दीर्घबलान्न भविष्यति (दु० टी०)।

### [रूपसिद्धि]

१. **पुनाति**। पू+ना+ति। 'पूञ् पवने' (८।८) धातु से वर्तमानासंज्ञक परस्मैपद - प्र० पु०- ए० व० 'ति' प्रत्यय, "ना क्र्यादेः" (३।२।३८) से 'ना' विकरण तथा प्रकृत सूत्र से धातुघटित ऊकार को ह्रस्वादेश।

२. **लुनाति**। लू+ना+ति। 'लूञ् छेदने' (८।९) धातु से 'ति' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत् ।।७६३।

## ७६४. उतो वृद्धिर्व्यञ्जनादौ गुणिनि सार्वधातुके [३।६।८४]

### [सूत्रार्थ]

व्यञ्जनादि गुणी सार्वधातुक प्रत्यय के परे रहते धातुगत उकार को वृद्धि होती है।।७६४।

### [दु० वृ०]

धातोरुतो वृद्धिर्भवति व्यञ्जनादौ गुणिनि सार्वधातुके परे। रौति, रौषि, रौमि। एवं नौति, स्तौति। कथं जुहोति? जुहोतेरिति निर्देशात् । धातोरिति किम्? तनोति, सुनोति।।७६४।

## [दु० टी०]

उतः। तकारनिर्देशः **सुखप्रतिपत्त्यर्थ** एव। उत औरिति सिद्धे वृद्धिग्रहणं संज्ञापूर्वकत्वादनित्यार्थम्-योयोति, रोरोति। **चेक्रीयितलुगन्तमप्युदाहरन्त्येके**॥ ७६४।

## [समीक्षा]

'यौति, नौति, स्तौति' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में वृद्धिविधान किया गया है। पाणिनि का सूत्र है - "उतो वृद्धिर्लुकि हलि" (अ० ७।३।८९)। 'हल्-व्यञ्जन' शब्दों का प्रयोग अपने अपने व्याकरण की मान्यता के अनुसार किया गया है। पाणिनि ने 'लुकि' शब्द का अधिक प्रयोग करके 'अदादिगणपठित धातुओं में ही प्रकृत सूत्र की प्रवृत्ति निश्चित कर दी है, परन्तु 'जुहोति' इत्यादि इसके अपवाद हैं।

## [विशेष वचन]

१. कथं जुहोति? जुहोतेरिति निर्देशात् (दु० वृ०)।

२. तकारनिर्देशः सुखप्रतिपत्त्यर्थ एव (दु० टी०)।

३. 'उत औः' इति सिद्धे वृद्धिग्रहणं संज्ञापूर्वकत्वादनित्यार्थम् (दु० टी०)।

## [रूपसिद्धि]

१. **रौति**। रु + अन्लुक् + ति। 'रु शब्दे' (२।१०) धातु से वर्तमानासंज्ञक परस्मैपद-प्र० पु०-ए०व०– 'ति' प्रत्यय, "अन् विकरणः कर्तरि" (३।२।३२) से 'अन्' विकरण, "अदादेर्लुग् विकरणस्य" (३।४।९२) से उसका लुक् तथा प्रकृत सूत्र से धातुघटित उकार को वृद्धि - औकार।

२. **रौषि**। रु-अन्लुक् + ति। 'रु शब्दे' (२।१०) धातु से 'ति' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

३. **रौमि**। रु + अन्लुक् + मि। 'रु' धातु से 'मि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत् ।

४. **नौति**। नु + अन्लुक् + ति। 'णु स्तुतौ' (२।७) धातु से वर्तमानासंज्ञक 'ति' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत् ।

५. **स्तौति**। स्तु + अन्लुक् + ति। 'ष्टुञ् स्तुतौ' (२।६५) धातु से वर्तमानसंज्ञक 'ति' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्॥ ७६४।

# ७६५. ऊर्णोतेर्गुणः [३।६।८५]

## [सूत्रार्थ]

व्यञ्जनादि गुणी सार्वधातुक प्रत्यय के परे रहते 'ऊणु' धातु के अन्तिम उकार को विकल्प से गुणादेश होता है॥ ७६५।

## [दु० वृ०]

परयोगेणात्र वा गम्यते। ऊर्णोतेर्व्यञ्जनादौ गुणिनि सार्वधातुके परे गुणो भवति वा। प्रोर्णोति, प्रोर्णौति॥ ७६५।

## [दु० टी०]

ऊर्णु०। वृद्धेरपवादः ।

**पूर्वसिद्धं तु यत् कार्यं पुनरारभ्यते विधौ।**
**पूर्वकार्यव्युदासाय विशेषार्थं च तद् भवेत् ।।**

**लौकिको**ऽयं न्याय इति। विशेषोऽपि सम्भाव्यते इति विकल्पोऽत्र सम्भाव्यते। एवन्तर्हि ह्यस्तन्यामेव गुणो भवतीति नियमेन पूर्वो गुणों व्यावर्त्यते, वचनाच्च प्रवर्तते इति विकल्पोऽपि सिद्धो भवति। तत्र अन्लुकीति सिद्धे सार्वधातुकग्रहणं **प्रतिपत्तिगौरव-निरासार्थम्,** तथात्र तिब्निर्देशोऽपि **कश्चिदाह** - 'ओ' इति सिद्धे गुणग्रहणं **संज्ञापूर्वकत्वाद-नित्यार्थम्** । प्रोर्णोनौति, तर्हि तिपाऽत्र किम् ? **चेक्रीयितलुगन्तस्य भाषायां नाभिधानमिति भावः।।** ७६५।

## [वि० प०]

ऊर्णोतेः। वक्ष्यमाणवचनं **नियमार्थम्।** ऊर्णोतेर्ह्यस्तन्यामेव गुणो नान्यस्मिन् सार्वधातुके इति। अयं गुणो व्यावृत्यते, तथा एतद्वनाच्च प्रवर्तते इति, अर्थाद् विकल्पः सिद्धः इत्याह - परयोगेणात्र वा गम्यते इति।। ७६५।

## [समीक्षा]

'प्रोर्णोति - प्रोर्णौति, प्रोर्णोमि - प्रोर्णौमि' आदि प्रयोगों को सिद्ध करने के लिए गुण तथा वृद्धि करने की आवश्यकता होती है। इसकी पूर्ति दोनों ही व्याकरणों में की गई है। अन्तर यह है कि कातन्त्रकार ने वैकल्पिक गुणविधान किया है और पाणिनि ने वैकल्पिक वृद्धिविधान । निर्देशभेद होने पर भी अभीष्टसिद्धि उभयथा होने के कारण समानता ही है। पाणिनि का सूत्र है - "ऊर्णोतेर्विभाषा" (अ० ७।३।९०)।

## [विशेष वचन]

१. नियमेन पूर्वो गुणो व्यावर्त्यते वचनाच्च प्रवर्तते इति विकल्पोऽपि सिद्धो भवति (दु० टी०)।
२. अन्लुकीति सिद्धे सार्वधातुकग्रहणं प्रतिपत्तिगौरवनिरासार्थम् (दु० टी०)।
३. 'ओ' इति सिद्धे गुणग्रहणं संज्ञापूर्वकत्वादनित्यार्थम् (दु० टी०)।
४. चेक्रीयितलुगन्तस्य भाषायां नाभिधानमिति भावः (दु० टी०)।

## [रूपसिद्धि]

१. **प्रोर्णोति, प्रोर्णौति।** प्र + ऊर्णु + अन्लुक् + ति। 'प्र' उपसर्गपूर्वक 'ऊर्णुञ् आच्छादने' (२।६४) धातु से वर्तमानाविभक्तिसंज्ञक परस्मैपद - प्र० पु० - ए० व० 'ति' प्रत्यय, "अन् विकरणः कर्तरि" (३।२।३२) से 'अन्' विकरण, "अदादेर्लुग् विकरणस्य" (३।४।९२) से उसका लुक् तथा **प्रकृत सूत्र** से वैकल्पिक धातुगत उकार को गुण-ओकार। गुणाभावपक्ष में "उतो वृद्धिर्व्यञ्जनादौ गुणिनि सार्वधातुके" (३।६।८४) से उकार को वृद्धि-औकार।। ७६५।

## ७६६. ह्यस्तन्यां च [३।६।८६]

### [सूत्रार्थ]

व्यञ्जनादि, गुणी तथा ह्यस्तनीविभक्तिसंज्ञक प्रत्यय के परे रहते 'ऊर्णु' धातु को नित्य गुणादेश होता है।। ७६६।

### [दु० वृ०]

ऊर्णोतेर्व्यञ्जनादौ गुणिनि ह्यस्तन्यां च नित्यं गुणो भवति। प्रौर्णोत् , प्रौर्णोः। **चकारोऽनुक्तसमुच्चयार्थः,** तेनेटि वा स्यात् - प्रोर्णविता, प्रोर्णुविता । प्रोर्णावीत्, प्रोर्णुवीत् इत्यपि स्यात् ॥ ७६६।

### [वि० प०]

ह्यस्तन्याम्। **''स्वरादीनां वृद्धिरादेः''** (३।८।१७) इत्युकारस्य वृद्धिरौकारः। प्रोर्णुवीदित्यपि स्यादिति गुणबाधिका वृद्धिरिति ज्ञापनार्थमिह गुणस्याभावपक्षे **''सिचि परस्मै स्वरान्तानाम्''** (३।६।६) इति वृद्धेरभावादिदमपि स्यादित्यर्थः। गुणप्राप्तिपक्षे वृद्धिरेव प्रोर्णावीदिति ॥ ७६६।

### [समीक्षा]

'प्रौर्णोत् , प्रौर्णोः' आदि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में गुणविधान किया गया है। पाणिन का सूत्र है - ''गुणोऽपृक्ते'' (अ० ७।३।९१) ।

### [रूपसिद्धि]

१. **प्रौर्णोत्।** प्र + ऊर्णु + दि। 'प्र' उपसर्गपूर्वक 'ऊर्णुञ् आच्छादने' (२।६४) धातु से ह्यस्तनीसंज्ञक प्र० पु० - ए० व० 'दि' प्रत्यय, अन्लोप, ''स्वरादीनां वृद्धिरादेः'' (३।८।१७) से ऊकार की वृद्धि-औकार, प्रकृत सूत्र से धातु के अन्त में उकार को वृद्धि तथा ''पदान्ते धुटां प्रथमः'' (३।८।१) से दकार को तकारादेश ।

२. **प्रौर्णोः।** प्र + ऊर्णु + सि । 'प्र' उपसर्गपूर्वक 'उर्णुञ् आच्छादने' (२।६४) धातु से ह्यस्तनीसंज्ञक परस्मैपद - म० प० - ए० व० 'सि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत् ॥ ७६६।

## ७६७. तृहेरिड् विकरणात् [३।६।८७]

### [सूत्रार्थ]

व्यञ्जनादि गुणी सार्वधातुक प्रत्यय के परे रहते 'तृह्' धातु में प्रयुक्त विकरण के बाद इडागम होता है।। ७६७।

### [दु० वृ०]

प्रकृतत्वात् सार्वधातुकमनुवर्तते। तृहेर्विकरणात् परः इडागमो भवति व्यञ्जनादौ गुणिनि सार्वधातुके परे। तृणेढि, तृणेक्षि, तृणेह्मि ॥ ७६७।

## [दु० टी०]

तृहेः। व्यञ्जनादाविति किम् ? तृण्हानि। गुणिनीति किम् ? तृणढः । किमर्थमिटष्कारः, आदेशो न भविष्यति विकरणग्रहणबलात् ? सत्यम् । आगमलिङ्गमिह **लोकतः सिद्धं मन्दमतिबोधनार्थम्,** न च **लाघवम**स्तीति। सार्वधातुक इति परसप्तमीनिर्दिष्टत्वात् । विकरणादिति परयोगलक्षणा पञ्चमी। नादिति कृतेऽकार **उच्चारणार्थः** सम्भाव्यते। साध्यनिर्देश एव युक्त इति 'तृण्हः, तृणेहि' इति न कृतम्।। ७६७।

## [वि० प०]

तृहेः। **'तृह हिसि हिंसायाम्'** (६।१५) इति रौधादिकोऽयम् । तृणेढीति। "हो ढः" (३।६।५६), **"घढधभेभ्यस्तथोर्धोऽधः"** (३।८।३), तवर्गस्य टवर्गत्वम् । तृणेक्षीति। **"षढोः कः से"** (३।८।४) कत्वम्, निमित्तात् षत्वम् ।। ७६७।

## [समीक्षा]

'तृणेढि, तृणेक्षि, तृणेह्मि' इत्यादि शब्दरूपों के सिद्ध्यर्थ इकारागम की जो अपेक्षा होती है, उसकी पूर्ति दोनों ही व्याकरणों में की गई है। पाणिनि ने इमागम किया है - "तृणह इम् " (अ० ७।३।९२) और कातन्त्रकार ने इडागम । आगम यतः मित्रवत् होता है, अतः उसके स्थान का निश्चय करना आवश्यक होता है। पाणिनि के अनुसार मित् आगम अन्तिम अच् के बाद होता है - "मिदचोऽन्त्यात् परः" (१।१।४७), अतः उन्होंने 'इम्' आगम किया है। कातन्त्रकार को इडागम का स्थान सूत्र में ही कहना पड़ा है- 'विकरणात् '। इस प्रकार उभयत्र समानता है।

## [विशेष वचन]

१. आगमलिङ्गमिह लोकतः सिद्धं मन्दमतिबोधनार्थम् (दु० टी०)।

२. नादिति कृते अकारः उच्चारणार्थः सम्भाव्यते (दु० टी०)।

## [रूपसिद्धि]

१. **तृणेढि।** तृह + न-विकरण + ति । 'तृह हिंसायाम्' (६।१५) धातु से वर्तमानासंज्ञक 'ति' प्रत्यय, "स्वराद् रुधादेः परो नशब्दः" (३।२।३६), प्रकृत सूत्र से विकरणपरवर्ती इडागम, "हो ढः" (३।६।५६) से इकार को ढकार, "घढधभेभ्यस्तथोर्धोऽधः" (३।८।३) से तकार को धकार, "तवर्गस्य षटवर्गाट्टवर्गः" (३।८।५) से धकार को ढकार, "ढे ढलोपो दीर्घश्चोपधायाः" (३।८।६) से पूर्ववर्ती ढकार का लोप, "रषृवर्णेभ्यो नो णमनन्तः स्वरहयवकवर्गपवर्गान्तरोऽपि" (२।४।४८) से नकार को णकार तथा "अवर्ण इवर्णे ए" (१।२।२) से अकार को एकार-इकार का लोप ।

२. **तृणेक्षि।** तृह् + न - विकरण + सि । 'तृह हिंसायाम् ' (६।१५) धातु से वर्तमानासंज्ञक म० पु० - ए० व० 'सि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्!

३. **तृणेह्मि ।** तृह् + न - विकरण - मि। 'तृह हिंसायाम्' (६।१५) धातु से वर्तमानासंज्ञक उ० पु०-ए०व० 'मि' प्रत्यय तथा शेष प्रक्रिया पूर्ववत्।। ७६७।

## ७६८. ब्रुव ईड् वचनादिः [३।६।८८]

### [सूत्रार्थ]

व्यञ्जनादि गुणी सार्वधातुकसंज्ञक प्रत्यय के परे रहते 'ब्रू' धातु से उत्तर तथा प्रत्यय के आदि में ईट् आगम होता है।। ७६८।

### [दु० वृ०]

ब्रुव ईड् भवति वचनादिर्भूत्वा व्यञ्जनादौ गुणिनि सार्वधातुके परे । ब्रवीति, ब्रवीतु, अब्रवीत् । चर्करीताद् वेति **केचित्**-बोभवीति, बोभोति।। ७६८।

### [दु० टी०]

ब्रुव०। वचनग्रहणमन्तरेण ब्रूञ् आदिः सम्भाव्यते। **आदेशवादी**-ब्रुव इति व्यक्तिमाह, तेन आहेति।। ७६८।

### [वि० प०]

ब्रुवः। यद्ययं प्रत्ययः स्यात् तदा असार्वधातुके ब्रुवो वचिः स्यादित्यागमार्थमादि-ग्रहणमिति वचनग्रहणमन्तरेण च ब्रुव एवादिः स्यादित्याह वचनादिर्भूत्वेति। चर्करीताद् वेति। चेक्रीयितलुगन्तस्य **चर्करीतमिति पूर्वाचार्यसञ्ज्ञा।** अत्रापि पूर्ववच्चेक्रीयितस्य लुक्, **केचिद्** इति **अन्ये। अयं तु न मन्यते छान्दसत्वात्**।। ७६८।

### [समीक्षा]

'ब्रवीति, ब्रवीतु, ब्रवीमि' आदि शब्दरूपों के सिद्ध्यर्थ ईट् आगम दोनों व्याकरणों में किया गया है । पाणिनि का सूत्र है - "ब्रुव ईट्" (अ० ७।३।९३)। पाणिनि ने चर्करीत धातु से वैकल्पिक ईट् का विधान किया है - 'यङो वा" (अ० ७।३।९४), आचार्य शर्ववर्मा यतः चर्करीत को छान्दस मानते है, अतः उन्होंने एतदर्थ सूत्र नहीं बनाया है, तथापि अन्य कुछ आचार्यों की मान्यता का वृत्तिकार दुर्गसिंह आदि ने उल्लेख किया है।

### [विशेष वचन]

१. चर्करीताद् वेति केचित् - बोभवीति, बोभोति (दु० वृ०)।

२. आदेशवादी ब्रुव इति व्यक्तिमाह, तेन आहेति (दु० टी०)।

३. चेक्रीयितलुगन्तस्य चर्करीतमिति पूर्वाचार्यसंज्ञा। ------ अयं तु न मन्यते, छान्दसत्वात् (वि० प०)।

### [रूपसिद्धि]

१. **ब्रवीति।** ब्रू + अन्लुक् + ईट् + ति। 'ब्रूञ् व्यक्तायां वाचि' (२।६६) धातु से वर्तमानासंज्ञक परस्मैपद - प्र० पु० - ए० व० 'ति' प्रत्यय, 'अन्' विकरण का लुक्, प्रकृत सूत्र द्वारा 'ति' प्रत्यय से पूर्व 'ईट्' आगम, "नाम्यन्तयोर्धातुविकरणयोर्गुणः" (३।५।१) से ऊकार को गुण-ओकार तथा "ओ अव्" (१।२।१४) से उसका 'अव्' आदेश ।

२. **ब्रवीतु।** ब्रू + अन्लुक् + ईट् + तु । 'ब्रूञ् व्यक्तायां वाचि' (२।६६) धातु से पञ्चमीविभक्तिसंज्ञक 'तु' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

३. **अब्रवीत्।** अट् + ब्रू + अन्लुक् + ईट् + दि। 'ब्रूञ् व्यक्तायां वाचि' (२।६६) धातु से ह्यस्तनीसंज्ञक 'दि' प्रत्यय, अडागम, अन्लुक्, ईडागम, गुण, अवादेश तथा "पदान्ते धुटां प्रथमः" (३।८।१) से 'द्' को 'त्'॥ ७६८।

## ७६९. अस्तेर्दिस्योः [३।६।८९]

### [सूत्रार्थ]

'दि-सि' प्रत्ययों के परे रहते 'अस्' धातु से उत्तर तथा प्रत्यय से पूर्व ईट् आगम होता है॥७६९।

### [दु०वृ०]

अस्तेः परयोर्दिस्योर्वचनादिरीड् भवति। आसीत्, आसीः। साहचर्यात् त्वमसि । तिपा **धातुस्वरूपनिर्देशात्**-अभूत् ॥७६९।

### [वि० प०]

अस्तेः। **"अवर्णस्याकारः"** (३।८।१८) इत्यात्त्वम् । साहचर्यादित्यादि। सानुबन्धेन सहचरितः सिरपि सानुबन्धो ह्यस्तन्या एव गृह्यते इति भावः। निरनुबन्धो वर्तमानाया इति। **"अस्तेः सौ"** (३।६।३९) इत्यन्तलोपः॥७६९।

### [समीक्षा]

'आसीत्, आसीः' आदि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में ईडागम किया गया है । पाणिनि का सूत्र है- "अस्तिसिचोऽपृक्ते" (अ० ७।३।९६)। अतः उभयत्र समानता है ।

### [विशेष वचन]

१. तिपा धातुस्वरूपनिर्देशात्-अभूत् (दु० वृ०)।

### [रूपसिद्धि]

१. **आसीत्।** अस् + ईट् + दि। 'अस् भुवि' (२।२८) धातु से ह्यस्तनी-विभक्तिसंज्ञक परस्मैपद- प्र० पु०-ए० व० 'दि' प्रत्यय, "स्वरादीनां वृद्धिरादेः" (३।८।१७) से 'अस् ' धातुगत अकार को वृद्धि, अन्लुक् , प्रकृत सूत्र से ईडागम तथा दकार को तकारादेश ।

२. **आसीः।** अस् + ईट् + सि। 'अस् भुवि' (२।२८) धातु से ह्यस्तनीसंज्ञक म० पु०-ए० व० 'सि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत् ॥७६९।

## ७७०. सिचः [३।६।९०]

### [सूत्रार्थ]

'सिच् ' प्रत्यय के बाद 'दि-सि' प्रत्ययों के परे रहते 'ईट् ' आगम होता है॥७७०।

## [दु० वृ०]

सिचः। परयोर्दिस्योर्वचनादिरीड् भवति। अकार्षीत्, अकार्षीः। आगमशासनमनित्यमिति **केचित्**-मा भैः॥७७०।

## [वि० प०]

सिचः। आगमेत्यादि। **केचित्** 'वचनाद् दिस्योः' इत्यत्र व्यञ्जनेन धातुं न विशेषयन्ति, ततश्च तदन्तविधेरभावात् सिचोऽपि व्यञ्जनाद्दिस्योर्लोपः, सिद्धप्रयोगश्च दृश्यते,

**मा भैः शशाङ्क! मम सीधुनि नास्ति राहुः**
**खे रोहिणी वसति कातर! किं बिभेषि।**
**प्रायो विदग्धवनितानवसङ्गमेषु**
**पुंसां मनो विचलतीति किमत्र चित्रम् ।।इति।**

तदयुक्तम् , अलङ्कारसौन्दर्या**दपप्रयोगो**ऽयं **लोके** प्रसिद्धिमुपागतः। प्रयोगस्तु मा भैषीरिति। तथा च,

**मा मैषीः पुत्रि! सीते! व्रजति मम पुरो नैष दूरे दुरात्मा**
**रे रे रक्षः! क्व दारान् रघुकुलतिलकस्यापहृत्य प्रयासि।**
**चञ्चच्चाक्षेपप्रहारैस्त्रुटितधमनिभिर्दिक्षु निक्षिप्यमाणै–**
**राशापालोपहारं दशभिरपि भृशं त्वच्छिरोभिः करोमि।।** इति।७७०।

## [समीक्षा]

पाणिनि ने "अस्तिसिचोऽपृक्ते" (अ० ७।३।९६) इसी सूत्र में 'अस् ' धातु तथा 'सिच् ' दोनों का पाठ किया है, जबकि कातन्त्रकार ने सुखबोधार्थ इसके लिए दो सूत्र पृथक् पृथक् बनाए हैं। 'सिच्' प्रत्यय के बाद ईडागम 'अकार्षीत् , अकार्षीः' इत्यादि शब्दरूपों में प्रवृत्त होता है । आगमशासन के अनित्य होने से "मा भैः' प्रयोग बनता है। पञ्जीकार त्रिलोचनदास ने कहा कि वस्तुतः यह अपप्रयोग है, जो अलंकारसौन्दर्य के कारण लोक में प्रचलित हो गया। साधुरूप तो 'मा भैषीः' होता है।

## [विशेष वचन]

१. आगमशासनमनित्यमिति केचित् - मा भैः (दु० वृ०)।
२. केचिद् व्यञ्जनाद् दिस्योरित्यत्र व्यञ्जनेन धातुं न विशेषयन्ति (वि० प०)।
३. अलंकार सौन्दर्यादपप्रयोगोऽयं लोके प्रसिद्धिमुपागतः। प्रयोगस्तु मा भैषीरिति (वि० प०)।

## [रूपसिद्धि]

१. **अकार्षीत्।** अट् + कृ + सिच् + ईट् + दि। 'डु कृञ् करणे' (७।७) धातु से अद्यतनीविभक्तिसंज्ञक परस्मैपद - प्र० पु०- ए० व० 'दि' प्रत्यय, अडागम, "सिजद्यतन्याम्" (३।२।२४) से 'सिच् ' प्रत्यय "ऋतोऽवृङ्वृञः" (३।७।१६) से अनिट् "सिचि परस्मै स्वरान्तानाम्" (३।६।६) से 'कृ' धातुघटित 'ऋ' को वृद्धि- आर्, प्रकृत सूत्र से 'ईट्'

आगम, "नामिकरपरः प्रत्ययविकारागमस्थः सिः षं नुविसर्जनीयषान्तरोऽपि" (२।४।४७) से सकार को षकार तथा "पदान्ते धुटां प्रथमः" (३।८।१) से 'द्' को 'त्'।

२. **अकार्षीः**। अट् + कृ + सिच् + ईट् + सि। 'डु कृञ् करणे' (७।७) धातु से अद्यतनीसंज्ञक परस्मैपद - म० पु०- ए० व० 'सि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत् ॥७७०।

## ७७१. रुदादिभ्यश्च [३।६।९१]

### [सूत्रार्थ]

रुदादि धातुओं से परवर्ती तथा 'दि-सि' प्रत्ययों से पूर्ववर्ती ईट् आगम होता है॥७७१।

### [दु० वृ०]

रुदादिभ्यः परयोर्दिस्योर्वचनादिरीड् भवति। अरोदीत्, अरोदीः। अस्वपीत्, अस्वपीः। अश्वसीत्, अश्वसीः। प्राणीत्, प्राणीः। अजक्षीत्, अजक्षीः। पञ्चैते रुदादयः ॥७७१।

### [दु० टी०]

रुदा०। पञ्चैते इत्यादि। **आदिशब्दस्य व्यवस्थावाचित्वाद्** गुणिनि सार्वधातुके तौति-रौति-स्तौतिभ्यो विभाषेति **केचित्तु** वृत्तिहिंसयोरित्यादौ स्मरन्ति-तौति, तवीति। रौति, रवीति। स्तौति, स्तवीति।

**'सुदुस्तरं व्याकरणं स्तवीमि। भूयस्तवीमीह हितेच्छयेति'॥७७१।**

### [समीक्षा]

'अरोदीत्, अस्वपीत्, अश्वसीत्, प्राणीत्, अजक्षीत्' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में ईडागम किया गया है। पाणिनि का सूत्र है - "रुदश्च पञ्चभ्यः" (अ० ७।३।९८)। कातन्त्रकार और पाणिनि ने समान रूप से 'रुद्' आदि पाँच धातुएँ मानी हैं। कातन्त्रकार ने उन पाँच धातुओं को रुदादिगण माना है और पाणिनि ने स्पष्ट रूप में पाँच संख्या का निर्देश सूत्र में ही कर दिया है। अतः उभयत्र समानता ही है।

### [विशेष वचन]

१. पञ्चैते रुदादयः (दु० वृ०)।

२. आदिशब्दस्य व्यवस्थावाचित्वात् (दु० टी०)।

३. सुदुस्तरं व्याकरणं स्तवीमि (दु० टी०)।

### [रूपसिद्धि]

१. **अरोदीत्**। अट् + रुद् + ईट् + दि। 'रुदिर् अश्रुविमोचने' (२।३१) धातु से ह्यस्तनीसंज्ञक परस्मैपद-प्र० पु०-ए० व० 'दि' प्रत्यय, "अड् धात्वादिर्ह्यस्तन्यद्यतनी-क्रियातिपत्तिषु" (३।८।१६) से धातुपूर्व अडागम, अन्लुक्, प्रकृत सूत्र से ईडागम, "नामिनश्चोपधायाः लघोः" (३।५।२) से उपधासंज्ञक उकार को गुण-ओकार तथा "पदान्ते धुटां प्रथमः" (३।८।१) से दि-प्रत्ययगत दकार को तकारादेशे।

२. **अरोदीः**। अट् + रुद् + ईट् + सि। 'रुदिर् अश्रुविमोचने' (२।३१) धातु से ह्यस्तनीसंज्ञक म० पु०-ए० व० 'सि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत् ।

३. **अस्वपीत्**। अट् + स्वप् + ईट् + दि। 'ञि ष्वप शये' (२।३२) धातु से ह्यस्तनीसंज्ञक 'दि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत् ।

४. **अस्वपीः**। अट् +स्वप् + ईट् + सि। 'ञि ष्वप शये' (२।३२) धातु से ह्यस्तनीसंज्ञक 'सि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत् ।

५. **अश्वसीत्**। अट् + श्वस् + ईट् + दि। 'श्वस प्राणने' (२।३३) धातु से ह्यस्तनीसंज्ञक 'दि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत् ।

६. **अश्वसीः**। अट् + श्वस् + ईट् + सि। 'श्वस प्राणने' (२।३३) धातु से ह्यस्तनीसंज्ञक 'सि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत् ।

७. **प्राणीत्**। प्र + अन् + ईट् + दि। 'प्र' उपसर्गपूर्वक 'अन च' (२।३४) धातु से ह्यस्तनीसंज्ञक 'दि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत् ।

८. **प्राणीः**। प्र + अन् + ईट् + सि। 'प्र' उपसर्गपूर्वक 'अन च' (२।३४) धातु से ह्यस्तनीसंज्ञक 'सि' प्रत्यय तथा शेष प्रक्रिया पूर्ववत् ।

९. **अजक्षीत्**। अट् + जक्ष् + ईट् + दि। 'जक्ष भक्षहसनयोः' (२।३५) धातु से ह्यस्तनीविभक्तिसंज्ञक 'दि' प्रत्यय तथा शेष प्रक्रिया पूर्ववत् ।

१०. **अजक्षीः**। अट् + जक्ष् + ईट् + सि। 'जक्ष भक्षहसनयोः' (२।३५) धातु से ह्यस्तनीसंज्ञक 'सि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत् ॥७७१।

## ७७२. अदोऽट् [३।६।९२]

### [सूत्रार्थ]

'अद् ' धातु से परवर्ती 'दि-सि' प्रत्ययों से पूर्व 'अट्' आगम होता है॥७७२।

### [दु० वृ०]

अदः परयोर्दिस्योर्वचनादिरड् भवति । आदत्, आदः। रुदादेरपि **केचित्**-अरोदत्, अरोदः॥७७२।

### [दु० टी०]

अदो०। रुदादेरपीत्यादि। एवम् अरोदत् , अरोदः। अस्वपत् , अस्वपः। **तदप्रमाणमिह** लक्ष्यते, 'रुदादिभ्योऽट् चादः' इत्यकरणात् ॥७७२।

### [समीक्षा]

'आदत्, आदः' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में 'अडागम' किया गया है। पाणिनि का सूत्र है - ''अदः सर्वेषाम्'' (अ० ७।३।१००)। वृत्तिकार के अनुसार कुछ आचार्य पूर्ववर्ती सूत्रपठित रुदादि धातुओं से भी अडागम मानते हैं, परन्तु टीकाकार ने ''रुदादिभ्योऽट् चादः'' ऐसा सूत्र न बनाए जाने से इसका खण्डन किया है। पाणिनि का सूत्र है-''अड् गार्ग्यगालवयोः'' (अ० ७।३।९९)। इसके अनुसार 'गार्ग्य-गालव' आचार्यों के मत में रुदादि धातुओं से अडागम प्रवृत्त होता है ।

### [रूपसिद्धि]

१. **आदत्।** अद् + ह्यस्तनी-दि। 'अद् भक्षणे' (२।१) धातु से ह्यस्तनी विभक्तिसंज्ञक परस्मैपद-प्र० पु०-ए० व० 'दि' प्रत्यय, "अवर्णस्याकारः" (३।८।१८) से अद्धातुघटित अकार को आकार, "अन् विकरणः कर्तरि" (३।२।३२) से 'अन्' विकरण, "अदादेर्लुग् विकरणस्य" (३।४।९२) से उसका लुक्, प्रकृत सूत्र द्वारा 'दि' प्रत्यय से पूर्व अडागम तथा "पदान्ते धुटां प्रथमः" (३।८।१) से दकार को तकारादेश।

२. **आदः।** अद+ह्यस्तनी- सि। 'अद भक्षणे' (२।१) धातु से ह्यस्तनीसंज्ञक म० पु०-ए० व० 'सि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत् ।।७७२।

## ७७३. सस्य सेऽसार्वधातुके तः [३।६।९३]

### [सूत्रार्थ]

असार्वधातुकसंज्ञक सकार के परे रहते सकार को तकारादेश होता है।।७७३।

### [दु० वृ०]

सस्य तकारो भवति असार्वधातुके से परतः। जिघत्सति, वत्स्यति, दित्सा । असार्वधातुके इति किम् ? वस्से।।७७३।

### [दु० टी०]

सस्य । अर्थाद् धातोरेव सकारः सम्भवतीति धातुग्रहणं **वृत्तौ** नोच्यते।।७७३।

### [वि प०]

सस्य। जिघत्सतीति। **"अदेर्घस्लृ सनद्यतन्योः"** (३।४।७९) इति घस्लृरादेशः।।७७३।

### [समीक्षा]

'जिघत्सति, वत्स्यति' इत्यादि प्रयोगों के सिद्ध्यर्थ सकार को तकारादेश का विधान दोनों ही व्याकरणों में किया गया है। पाणिनि का सूत्र है- "सः स्यार्धधातुके" (अ० ७।४।४९)। सूत्र वृत्ति में 'धातोः' पद के न पढ़े जाने के सम्बन्ध में टीकाकार ने कहा है कि उसका तो परिज्ञान अर्थतः ही हो जाएगा, अतः वृत्तिकार ने 'धातोः' पद को वृत्ति में नहीं पढ़ा है।

### [रूपसिद्धि]

१. **जिघत्सति।** अद्-घस् + सन् + ति। 'अद भक्षणे' (२।१) धातु से "धातोर्वा तुमन्तादिच्छतिनैककर्तृकात् " (३।२।४) से 'सन्' प्रत्यय, "अदेर्घस्लृ सनद्यतन्योः" (३।४।७९) से 'अद्' को 'घस्लृ' आदेश, "वसतिघसेः सात्" (३।७।२९) से अनिट्, "च्ण्परोक्षाचेक्रीयितसनन्तेषु" (३।३।७) से 'घस्' को द्वित्व, "पूर्वोऽभ्यासः" (३।३।४) से पूर्ववर्ती 'घस्' की अभ्याससंज्ञा, "अभ्यासस्यादिर्व्यञ्जनमवशेष्यम्" (३।३।९) से सकार का लोप, "द्वितीयचतुर्थयोः प्रथमतृतीयौ" (३।३।११) से अभ्याससंज्ञक घकार को गकार, "कवर्गस्य चवर्गः" (३।३।१३) से गकार को जकार, "सन्यवर्णस्य" (३।३।२६) से अकार को इकार, प्रकृत सूत्र से सकार को तकार, "ते धातवः"

(३।२।१६) से 'जिघत्स' की धातुसंज्ञा, वर्तमानासंज्ञक 'ति' प्रत्यय, अन् विकरण तथा अकार का लोप।

२. **वत्स्यति।** वस् + स्यति। 'वस निवासे' (१।६१४) से भविष्यन्तीविभक्तिसंज्ञक प्र० पु० - ए० व० 'स्यति' प्रत्यय, "वसतिघसे:" (३।७।२९) से अनिट् तथा प्रकृत सूत्र से सकार को तकारादेश।

३. **दित्सा।** दा + सन् + आ + सि। 'डु दाञ् दाने' (७।७) धातु से सन् प्रत्यय, द्वित्व, "सनि मिमीमादारभलभशकपतपदामिस् स्वरस्य" (३।३।३९) से अभ्यासलोप तथा आकार को इस आदेश, प्रकृत सूत्र से सकार को तकार, "ते धातव:" (३।२।१६) से 'दित्स' की धातुसंज्ञा, "स्त्रियामादा" (२।४।४९) से स्त्रीत्वविवक्षा में 'आ' प्रत्यय, दित्सा' की "धातुविभक्तिवर्जमर्थवल्लिङ्गम्" (२।१।१) से लिङ्गसंज्ञा, 'सि' प्रत्यय तथा "ह्रस्वनदीश्रद्धाभ्य: सिर्लोपम्" (२।१।७१) से 'सि' प्रत्यय का लोप ।।७७३।

## ७७४. अणि वचेरोदुपधाया: [३।६।९४]

### [सूत्रार्थ]

'अण्' प्रत्यय के परे रहते 'वच्' धातु की उपधा = वकारोत्तरवर्ती अकार को ओकारादेश होता है।।७७४।

### [दु० वृ०]

वचेरुपधाया ओद् भवति अणि परे। अवोचत्, अवोच:। कथं पुस्तकवाच:, असार्वधातुक इति विशेषणात् । एवमुत्तरत्रापि।।७७४।

### [दु० टी०]

अणि। कथमित्यादि। पुस्तकं वक्तीति कर्मण्यण् । ननु सार्वधातुकं यत्र भवति तदसार्वधातुकमिति प्रसज्यप्रतिषेधात् स्यादिरप्यसार्वधातुकं भवति, नैवम् । धात्वपेक्षयेति। एवमुत्तरत्रापि । इषून् अस्यतीति **इष्वास:।** साध्यनिर्देश एव युक्त इति अणि वचेर्वोजिति न कृतम् । 'अणि वचेरोदत:' इत्युक्तेऽप्यटोऽपि सम्भाव्यते। सप्तम्यामानन्तर्यं न चिन्तयति **मन्दमतिरिति**।।७७४।

### [वि० प०]

अणि०। **"अणसुवचि०"** (३।२।२७) इत्यादिना अण् । कथमित्यादि। पुस्तकं वक्तीति कर्मण्यण् । असार्वधातुकं परं निमित्तं यस्य तस्मिन्नणि प्रत्यये भवति, अयमनिमित्तक एवेति कुत: प्रसङ्ग:। एवमुत्तरत्रापि। इषून् अस्यतीति **इष्वास:** इति। **"अस्यतेस्थोऽन्तोऽपि"** (३।६।९५) न भवतीत्यर्थ:।।७७४।

### [समीक्षा]

'अवोचत्, अवोचन्, अवोच:' आदि शब्दरूपों के साधनार्थ वच्धातुगत अकार के स्थान में ओकार की आवश्यकता होती है। इसकी पूर्ति कातन्त्रकार ने ओकारादेश से तथा पाणिनि ने 'उम्' आगम से की है। उनका सूत्र है - "वच उम्" (अ० ७।४।२०)। 'उम्'

आगम करने के बाद गुणादेश भी करना पड़ता है, अत: कातन्त्रकार के ओकारादेश में लाघव सन्निहित है ।

**[रूपसिद्धि]**

१. **अवोचत्।** अट् + वच् + अण् + दि । 'वच भाषणे' (२।३०) धातु से अद्यतनीसंज्ञक परस्मैपद-प्र० पु०-ए० व० 'दि' प्रत्यय, अडागम, "अण् असुवचिख्याति-लिपिसिचिह्न:" (३।२।२७) से 'अण्' प्रत्यय, प्रकृत सूत्र से अकार को ओकार तथा दकार को तकारादेश।

२. **अवोच:।** अट् + वच् + अण् + सि । 'वच भाषणे' (२।३०) धातु से अद्यतनीसंज्ञक 'सि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत् ॥७७४।

## ७७५. अस्यतेस्थोऽन्तः [३।६।९५]

**[सूत्रार्थ]**

'अण् ' प्रत्यय के परे रहते 'अस्' धातु के अन्त में 'थ' आगम होता है॥७७५।

**[दु० वृ०]**

अस्यतेरन्तस्थो भवति अणि परे। अपास्थत॥७७५।

**[दु० टी०]**

अस्य०। **तिब्निर्देशः सुखार्थ एव**॥७७५।

**[वि० प०]**

अस्य०। अत्रापि पूर्ववदण् ॥७७५।

**[समीक्षा]**

'आस्थत् , उपास्थत' आदि शब्दरूपों के सिद्ध्यर्थ 'अस्' धातु के बाद थकार की आवश्यकता होती है, जिसकी पूर्ति कातन्त्रकार ने 'थ' आगम से तथा पाणिनि ने 'थुक्' आगम से की है- "अस्यतेस्थुक्" (अ० ७।४।१७)। पाणिनि ने कित् आगमों के स्थाननिश्चयार्थ परिभाषासूत्र बनाया है- "आद्यन्तौ टकितौ" (अ० १।१।४६), जब कि कातन्त्रकार ने आगम वाले सूत्र में ही स्थान का निश्चय कर दिया है।

**[विशेष]**

१. तिब्निर्देश: सुखार्थ एव (दु० टी०)।

**[रूपसिद्धि]**

१. **अपास्थत।** अप+अस् + थ् + त। 'अप' उपसर्गपूर्वक 'अस भुवि' (२।२८) धातु से अद्यतनीसंज्ञक आत्मनेपद - प्र० पु० - ए० व० 'त' प्रत्यय, "अवर्णस्याकार:" (३।८।१८) से धातु के आदि अकार को आकार, अण् प्रत्यय तथा प्रकृत सूत्र से थकारागम॥७७५।

## ७७६. पतेः पप्तिः [३।६।९६]

### [सूत्रार्थ]

'अण्' प्रत्यय के परे रहते 'यत्' को 'पप्ति' आदेश होता है।।७७६।

### [दु० वृ०]

पतेः पप्तिर्भवति अणि परे। अपप्तत् । श्वेरद् वक्तव्यः-अश्वत् ।।७७६।

### [दु० टी०]

पतेः। 'श्वेरद् वक्तव्यः' इति **केचिद्** रूपमिदं मन्यन्ते, तन्मते न वक्तव्यमुच्यते।।७७६।

### [वि० प०]

पतेः। लृदनुबन्धत्वादण् । श्वेरद् वक्तव्यः इति। "जृश्विस्तन्भुम्रुचुम्लुचुग्लुचां वा" इति वचनादण् । वक्तव्यो व्याख्येयः इतीह वर्णविकारो दृश्यते इत्यर्थः।।७७६।

### [समीक्षा]

'अपप्तत्' आदि शब्दरूपों के साधनार्थ 'पत्' धातु में अकार-तकार के मध्य में पकार की आवश्यकता होती है । इसकी पूर्ति कातन्त्रकार ने 'पत् ' को 'पप्त्' आदेश करके तथा पाणिनि ने पुमागम करके की है- "पतः पुम्" (अ० ७।४।१९)। पाणिनि के अनुसार मित् आगम यतः धात्वादि के अन्तिम अच् के बाद प्रवृत्त होते हैं, अतः यहाँ पकारोत्तरवर्ती अकार के बाद होगा- "मिदचोऽन्त्यात् परः" (अ० १।१।४७)। यहाँ पाणिनीय पुमागम की अपेक्षा कातन्त्रीय 'पप्त्' आदेश में लाघव सन्निहित है।

### [रूपसिद्धि]

१. **अपप्तत्।** अट् + पत् - अण् + दि। 'पत्लृ पतने' (१।५५४) धातु से अद्यतनीसंज्ञक परस्मैपद - प्र० पु०-ए० व० 'दि' प्रत्यय, अडागम, अण् प्रत्यय, प्रकृत सूत्र से 'पत्' धातु को 'पप्त्' आदेश तथा "पदान्ते धुटां प्रथमः" (३।८।१) से दकार को तकारादेश ।।७७६।

## ७७७. कृपे रो लः [३।६।९७]

### [सूत्रार्थ]

'कृप्' धातुगत रकार के स्थान में लकारादेश होता है।।७७७।

### [दु० वृ०]

कृपे रेफस्य लकारो भवति। कल्प्ता, कल्पयति, कल्पः। कथं कॢप्तः, क्लृप्तिरिति? रश्रुतेर्लश्रुतेरिति वक्तव्यं वा। इह ऋकारस्थस्य रेफस्यावर्णात्मनः लृकारस्थो लकारोऽवर्णात्मा आन्तरतम्याद् भवन् ऋकारस्य लृकार एव स्यात्, अव्यतिरिक्तत्वात् । कथं कृपा? लाक्षणिकत्वात् । कृपणादयो हि औणादिका इति ।।७७७।

### [दु० टी०]

कृपेः। कथमित्यादि **जातिनिर्देशादित्याह** - रश्रुतेर्लश्रुतिरिति । **वर्णैकदेशास्तु वर्णच्छायानुकारिणः** इति दर्शयन्नाह- वक्तव्यं वेति। वक्तव्यं व्याख्येयम् । ऋकारादकारः

ऌकारादप्यकारः प्रतिपत्तव्यः, तेनाभेदादृकार ऌकारो भवतीत्यपि पक्षः। यथा 'श्वेतो धावति, श्वा इतो धावति'। श्वेतगुणयुक्तो धावतीति। अक्ऌपिचृतेरिति **वररुचिवचनाद्** वा संग्रहः। कथमित्यादि। भिदादिषु पठ्यन्ते कृपेः सम्प्रसारणं च। कृपेरिति इङ्निर्देशो वा स्वरूपग्राहकः। **यस्त्वाह** कृपेरेव भिदादित्वादङिति, स च **'क्रप कृपायाम्'** (१।४९७) इति ज्ञापयति। कृपणादयो ह्यौणादिका इति व्युत्पत्तिपक्षेऽपि लत्वं न भवति, **''उणादिषु बहुलम्''** इति । कृपणः, कृपाणः, कृपीटः, कर्पूरः। **अन्य** आह- ऋकारऌकारयोः सवर्णविधिरिति । अत्र गणे ऋकारोपदेश एव लिङ्गं कृपणादेर्न भवति।।७७७।

## [वि० प०]

कृपेः। कथमित्यादि। र इति ल इति च जातिनिर्देशाददोष इत्याह–रश्रुते रित्यादि। एतदुक्तं भवति, ऋकारे त्रयः स्वरभागाः सन्ति, तन्मध्यवर्ती रेफश्चतुर्थो भागस्तथा ऌकार लकार इति, ततश्च ऋकारस्थस्य रेफस्य लकारो भवन्नान्तरतम्यात् ऌकारस्थ एव भवितुमर्हतीति न स्वतन्त्रः, स च ऌकारमन्तरेण न शक्नोति भवितुम् , अव्यतिरिक्तत्वात्। अतोऽर्थाद् ऋकारस्य ऌकार एव प्रवर्तते इत्येतदेवाह - इहेत्यादि। अवर्णात्मन इति वर्णावयवत्वाद् असम्पूर्णस्य वर्णस्येत्यर्थः। **ये** तु मन्यन्ते **'वर्णैकदेशास्तु वर्णच्छायानुकारिणो न पुनर्वर्णाः'** इति। तथा चोक्तम् - **'पृथक प्रयत्ननिर्वर्त्यं हि वर्णमिच्छन्त्याचार्याः'** इति। तदा ऋकारे रेफस्यानभ्युपगमान्न सिध्यति इत्याशङ्क्याह-वक्तव्यं वेति। वक्तव्यं व्याख्येयम्। एकमेवेदं वाक्यमावृत्य द्विधा व्याख्यायते ऋकारादकारः ऌकारादप्यकारः **उच्चारणार्थः** प्रतिपत्तव्यः । ततः सन्धौ सति 'रो लः' इति प्रथमान्तं पदम्, तेनाभेदाद् ऋकारः ऌकारो भवतीत्यपि पक्ष इत्यर्थः। यथा 'श्वेतो धावति, श्वा इतो धावति'। श्वेतगुणयुक्तोऽपि धावतीति वाक्यं भिद्यते, तथेदमपीत्यर्थः। कथमित्यादि। 'क्रप कृपायाम्' (१।४९७) इत्यस्य षानुबन्धभिदादित्वादङि कृते सम्प्रसारणे च निपातिते लाक्षणिकत्वम् । अतः कृपू सामर्थ्ये एव परिशिष्यते। कृपणादय इति। 'कृपणः, कृपाणः, कृपीटः, कर्पूरः' इत्यादीनां व्युत्पत्तिपक्षेऽपि न भवति, उणादयो हि बहुलं भवन्तीति।।७७७।

## [समीक्षा]

'कल्पयति, कल्प्ता, कल्पः' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में रेफ को लकारादेश किया गया है। पाणिनि का सूत्र है- ''कृपो रो लः'' (अ० ८।२।१८)। वर्ण में वर्णैकदेश की मान्यता आदि पर व्याख्याकारों ने विचार किया है और इसी प्रसङ्ग में वर्ण की परिभाषा भी दी गई है। ऋकार में तीन भाग स्वर तथा एक भाग रेफ को माना गया है, इसी प्रकार ऌकार में लकार की भी चतुर्थांश स्थिति समझनी चाहिए। 'ऋ-ऌ' अथवा 'र्-ल्' समानजातीय होने के कारण या सवर्णसंज्ञा के बल पर अभिन्न माने जाते हैं - इन पक्षों को भी दिखाया गया है।

## [विशेष वचन]

१. ऋकारस्थस्य रेफस्यावर्णात्मनः ऌकारस्थो लकारोऽवर्णात्मा आन्तरतम्याद् भवन् ऋकारस्य ऌकार एव स्यात् अव्यतिरिक्तत्वात् (दु० वृ०)।

२. वर्णैकदेशास्तु वर्णच्छायानुकारिणः (दु० टी०)।
३. अभेदाद् ऋकारः ऌकारो भवतीत्यपि पक्षः (दु० टी०)।
४. अन्य आह- ऋकारऌकारयोः सवर्णविधिरिति (दु० टी०)।
५. ऋकारे त्रयः स्वरभागाः सन्ति तन्मध्यवर्ती रेफश्चतुर्थो भागः, तथा ऌकारे ऌकारः (वि० प०)।
६. वर्णैकदेशास्तु वर्णच्छायानुकारिणो न पुनर्वर्णाः (वि० प०)।
७. तथा चोक्तम् पृथक् प्रयत्ननिर्वर्त्यं हि वर्णमिच्छन्त्याचार्याः (वि० प०)।
८. उणादयो हि बहुलं भवन्तीति (वि० प०)।

**[रूपसिद्धि]**

१. **कल्प्ता।** कृप् + ता। 'कृपू सामर्थ्ये' (१।४८८) धातु से श्वस्तनीविभक्तिसंज्ञक प्र० पु०-ए० व० 'ता' प्रत्यय, "उवर्णान्ताच्च" (३।७।३२) से अनिट्, "नामिनश्चोपधाया लघोः" (३।५।२) से उपधासंज्ञक ऋकार को गुण-अर् तथा प्रकृत सूत्र से रकार को लकारादेश ।

२. **कल्पयति।** कृप् + इन् + अन् + ति। 'कृपू सामर्थ्ये' (१।४८८) धातु से हेत्वर्थ में "धातोश्च हेतौ" (३।२।१०) से 'इन् ' प्रत्यय, गुण, प्रकृत सूत्र से रेफ को ल् 'कल्पि' की "ते धातवः" (३।२।१६) से धातुसंज्ञा, वर्तमानासंज्ञक प्र० पु०-ए० व० 'ति' प्रत्यय, "अन् विकरणः कर्तरि" (३।२।३२) से 'अन्' विकरण, इकार को गुण-एकार तथा "ए अय्" (१।२।१२) से एकार को 'अय्' आदेश।

३. **कल्पः।** कृप् + अ + सि। 'कृपू सामर्थ्ये' (१।४८८) धातु से 'अ' प्रत्यय, गुण, प्रकृत सूत्र से रेफ को लकार, 'कल्प' की लिङ्गसंज्ञा, 'सि' प्रत्यय तथा "रसकारयोर्विसृष्टः" (३।८।२) से सकार को विसर्गादेश।।७७७।

## ७७८. गिरतेश्चेक्रीयिते [३।६।२८]

**[सूत्रार्थ]**

चेक्रीयितसंज्ञक प्रत्यय के परे रहते 'गृ' धातु सम्बन्धी रेफ को लकारादेश होता है।।७७८।

**[दु० वृ०]**

गिरते रेफस्य चेक्रीयिते परे लकारो भवति। गर्हितं गिरति **निजेगिल्यते**।।७७८।

**[दु० टी०]**

गिरतेः। **तिब्निर्देशाद् 'गृ शब्दे'** (८।२२) इत्यस्य क्र्यादिकस्य न भवति- अनुजे गीर्यते। **अन्य** आह - अनभिधानादेव गृणातेश्चेक्रीयितं नास्ति, **तिब्ग्रहणं मन्दमतिबोधनार्थम्** ।।७७८।

**[वि० प०]**

'लुपादेर्गर्ह्यात् ' (३।२।१४-वा०) इति चेक्रीयितम् ।।७७८।

## [समीक्षा]

'निजेगिल्यते, निजेगिल्येते, निजेगिल्यन्ते' आदि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में लकारादेश किया गया है। पाणिनि का सूत्र है - ''ग्रो यङि'' (अ० ८।२।२०)। कुछ विद्वान् क्र्यादिगणपठित 'गृ शब्दे' (८।२२) धातु से चेक्रीयितप्रत्यय का अभिधान नहीं मानते हैं, अतः उसमें लकारादेश भी प्रवृत्त नहीं होगा।

## [विशेष वचन]

१. तिबग्रहणं मन्दमतिबोधनार्थम् (दु० टी०)।

## [रूपसिद्धि]

१. **निजेगिल्यते।** गृ + चेक्रीयित-य + ते। गर्हितं निगिरति। 'नि' उपसर्गपूर्वक 'गृ निगरणे' (५।२२) धातु से ''लुपादेर्गर्ह्यात्'' (३।२।१४-वा०) वार्तिक सूत्र द्वारा चेक्रीयितसंज्ञक 'य' प्रत्यय, ''ऋदन्तस्येरगुणे'' (३।५।४२) से ऋकार को 'इर्' आदेश, द्विर्वचनादि, ''कवर्गस्य चवर्गः'' (३।३।१३) से गकार को जकार, ''गुणश्चेक्रीयिते'' (३।३।२८) से अभ्यासघटित इकार को गुण् -एकार, प्रकृत सूत्र से रकार को लकार, ''ते धातवः'' (३।२।१६) से 'निजेगिल्य' की धातुसंज्ञा, वर्तमानासंज्ञक आत्मनेपद-प्र० पु०- ए० व० 'ते' प्रत्यय, अन् विकरण तथा अकार का लोप॥७७८।

# ७७९. वा स्वरे [३।६।९९]

## [सूत्रार्थ]

स्वरसंज्ञक वर्ण के परे 'गृ' धातुसम्बन्धित रेफ को लकारादेश होता है॥७७९।

## [दु० वृ०]

गिरते रेफस्य लत्वं भवति वा स्वरे परे । गिरति, गित्सति । निगरणम्, निगलनम्। 'निगाल्यते' इति इनः स्थानिवद्भावात् । गलः प्राण्यङ्गे, विषे तु गर इति। कपिरिकादे**र्लोकतः** सिद्धिः । कपिरिका, कपिलिका । रोहिणी, लोहिनी । रोम, लोम । पर्यङ्कः, पल्यङ्कः। परिघः,पलिघः। परियोगः, पलियोगः। चूडा, चूला । वडभी, वलभी । जडम्, जलम् । जडधिः, जलधिः । उलयोरेकत्वम् । तथोपसर्गस्यायतौ । पलायते, पल्ययते । निर्दुरोर्वा स्यात् निरयणम्, निलयनम् । दुरयणम्, दुलयनम्। अतिव्यवहिते नेष्टम् प्रत्ययते ॥७७९।

## [दु० टी०]

वा स्वरे। निगाल्यते इति स्वरादेशः; परनिमित्तकः पूर्वविधिं प्रति स्थानिवदित्यर्थः। 'गिरौ, गिरः' इति अधातुप्रत्ययत्वाच्च न भवति। गल इति। प्राण्यङ्गे गल एव भवति, विषे तु गर एव । वडिशादौ तूभयं दृश्यते । गलो गर इति न वक्तव्यम्, **रूढि**शब्दत्वादिति। कपिरिकादेरिति एवं कपिरिकः, कपिलिकः पुंसिः। एवं कर्म, कल्म। ऋतकः, लृतकः। पांशुरम्, पांशुलम् । पांशमादत्ते इति वा व्युत्पतिः, रातेर्लातेश्च कप्रत्ययः। **शुक्रः**, शुक्लः। एवं परेरङ्घयोगेष्वपि वक्तव्यम् । परिहन्यतेऽस्मिन्निति परिघः, **पलिघः। परौ डः**

घनिरादेशः। एवं चूडादीनां च पक्षे डस्य लत्वम् । चूडा, चूला। तथा पीडा, पीला। बडिशम्, बलिशम् । पुडिनम्, पुलिनम् । विकिडः, विकिलः। उपसर्गस्यायताविति उपसर्गस्य यो रेफस्तस्यायतावित्यर्थः। उपसर्गो विशेषणमिति व्यवधानेऽपि भवति, प्रतेस्तु न भवति। एकेन वर्णेन व्यवधानमाश्रीयते न त्वनेकेनेत्याह-अतिव्यवहिते नेष्टमिति। प्रतेर्वेत्येके, तदप्रमाणम्।।७७९।

## [वि० प०]

वा स्वरे। परिघः, पलिघः। "**परौ डः**" (४।५।६२) इति हन्तेर्घनिरादेशो डप्रत्ययश्च। उपसर्गस्यायताविति उपसर्गस्य यो रेफस्तस्यायतावित्यर्थः। वचनप्रामाण्यादेकेन वर्णेन व्यवधानमाश्रीयते न त्वनेकेनेत्याह-अतिव्यवहिते नेष्टमिति। न च वक्तव्यम्-'निलयनम्, दुलयनम्' इत्यत्र वचनं चरितार्थमिति निर्दुरोर्वेत्यस्य विषयत्वात् तेन प्रतेर्न भवति 'प्रत्ययः' इति।।७७९।

## [समीक्षा]

'गिरति, गिलति, निगरणम् निगलनम्' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों व्याकरणों में वैकल्पिक लकारादेश का विधान किया गया है। पाणिनि का सूत्र है- "अचि विभाषा" (अ० ८।२।२१)। वृत्तिकारादि ने अनेक वार्त्तिक वचन प्रस्तुत कर 'रोम-लोम, रोहिणी-लोहिनी, चूडा-चूला' आदि में भी वैकल्पिक लकारादेश का विधान किया है। 'जडम्-जलम, जडधिः-जलधिः' आदि शब्दों में ड्-ल्' वर्णों का अभेद माना गया है।

## [विशेष वचन]

१. कपिरिकादेर्लोकतः सिद्धिः (दु० वृ०)।
२. जडम्-जलम्, जडधिः-जलधिः। उलयोरेकत्वम् (दु० वृ०) ।
३. अतिव्यवहिते नेष्टम्-प्रत्ययते (दु० वृ०)।
४. एकेन वर्णेन व्यवधानमाश्रीयते न त्वनेकेन (दु० टी०; वि० प०)।
५. प्रतेर्वेत्येके, तदप्रमाणम् (दु० टी०)।

## [रूपसिद्धि]

१. **गिलति, गिरति।** गृ + जन् + ति। 'गृ निगरणे' (५।२२) धातु से वर्तमानासंज्ञक परस्मैपद-प्र० पु०-ए० व० 'ति' प्रत्यय, "अन् विकरणः कर्तरि" (३।२।३२) से 'अन् विकरण, "ऋदन्तस्येरगुणे" (३।५।४२) से 'ऋ' को 'इर' आदेश तथा प्रकृत सूत्र से रेफ को वैकल्पिक लकार।

२. **निगलनम्, निगरणम्।** नि+गृ + युट् + सि। 'नि' उपसर्गपूर्वक 'गृ निगरणे' (५।२२) धातु से "युट् च" (४।५।९४) से 'युट्' प्रत्यय, 'ट्' अनुबन्ध का प्रयोगाभाव, "युवुझामनाकान्ताः" (४।६।५४) से 'यु' को 'अन' आदेश, "नाम्यन्तयोर्धातुविकरणयोर्गुणः" (३।५।१) से ऋकार को गुण-अर्, प्रकृत सूत्र से वैकल्पिक रेफ को लत्व, 'निगलन-निगरण' की लिङ्गसंज्ञा, प्रथमा-ए० व० 'सि' प्रत्यय, नपुंसकलिङ्ग में "अकारादसंबुद्धौ मुश्च" (२।२।७) से 'मु'- आगम तथा 'सि' प्रत्यय का लोप।।७७९।

## ७८०. तृतीयादेर्घढधभान्तस्य धातोरादिचतुर्थत्वं सध्वोः [३।६।१००]

### [सूत्रार्थ]

'स् ' तथा 'ध्' के परे रहते 'घ्-ढ्-ध्-भ्'- अन्त वाली धातुओं के आदि में स्थित तृतीय वर्ण के स्थान में उसी वर्ण का चतुर्थ वर्ण आदेश होता है।।७८०।

### [दु० वृ०]

धातोरवयवस्य तृतीयादेर्घढधभान्तस्यादेश्चतुर्थत्वं भवति आन्तरतम्यात् सकारे ध्वे च परतः। दुधुक्षति, अधोक्ष्यत् , अधुग्ध्वम् । अघुक्षत्, अघूढ्वम् । बुभुत्सते, अभुद्धवम् । धीप्सति। भोत्स्यते। निघोक्ष्यते इत्याद्यन्तवद्भावात् । सिध्वोरिति किम् ? दिदम्भिषति, दुग्धः, दुग्धवान् । पुनर्धातुग्रहण**मुत्तरार्थ**मिह **सुखार्थं** च।।७८०।

### [दु० टी०]

तृतीयादेः। पुनरित्यादि। धातोरित्यवयवावयविसम्बन्धे षष्ठी, तृतीयादेरिति घढधभान्तस्येति चावयवस्य विशेषणमिति **सुखार्थम्** । सेरिकार **उच्चारणार्थः** 'घढधभान्त०' इति वचनात् । सध्वोरघोषेष्वशिटां प्रथमो धुटां तृतीयश्च नित्योऽप्यादिचतुर्थत्वमपेक्षते वचनाद् **भूतपूर्वगत्या** वा।।७८०।

### [वि० प०]

तृतीयादेः। **'दुह प्रपूरणे, गुहू संवरणे'** (२।६१; १।५९५) अनयोरद्यतन्याध्वम्। इह सन् विकल्पितपक्षे सिजपि नास्तीति **''दुहदिहलिहगुहामात्मने''**तवर्गे वा सनेवेत्युक्तमेव। दुहेर्दिहेर्धत्वं गुहेश्च हो ढः, तवर्गयोगे धस्य ढत्वम्, **''ढे ढलोपो दीर्घश्चोपधायाः''** (३।८।६)। अभुद्ध्वमिति। 'बुध अवगमने' (३।१११), **''धुटश्च धुटि''** (३।६।५१) इति सिचो लोपः। धीप्सतीति। **''दन्भेरीच्च''** (३।३।४१) इति स्वरस्येकारोऽभ्यासलोपश्च। चकारादनामिनोऽपि क्वचिदित्यनुषङ्गलोपः। ननु धातोरित्यवयवावयविसम्बन्धे षष्ठी, तृतीयादेर्घढधभान्तस्येति चावयवस्य विशेषणम्, तथा चैवमेव सूत्रार्थे आविर्भावितम् । अतोऽन्तरङ्गत्वाद् द्विर्वचने कृतेऽडागमे च सति अवयवावयविसम्बन्धस्य विद्यमानत्वात् 'बुभुत्सति, अभुद्धवम्' इत्यादावेव स्यात् । धीप्सतीत्यादौ तु कथमित्याह - आद्यन्तवद्भावादिति। दिदम्भिषतीति। **''इवन्तर्द्ध०''** (३।७।३३) इत्यादिना पक्षे इट्, **प्रकरणान्महाधात्वधिकाराच्च** धातुर्लब्ध एवेत्याह- पुनरित्यादि।।७८०।

### [समीक्षा]

'गोधुक्, भोत्स्यन्ते, धीप्सति, दुधुक्षति' इत्यादि शब्दरूपों के सिद्ध्यर्थ धात्वादिस्थ वर्गीय तृतीय वर्ण के स्थान में चतुर्थ **वर्ण** का विधान दोनों ही व्याकरणों में किया गया है। पाणिनि का सूत्र है - ''एकाचो **बशो** भष् झषन्तस्य स्ध्वोः'' (अ० ८।२।३७)। पाणिनीय 'बश्' प्रत्याहार में 'ब्-ग्-ड्-द्' वर्ण तथा 'भष् ' प्रत्याहार में 'भ्-घ्-ढ-ध्' वर्ण सम्मिलित हैं । इन प्रत्याहारों के ज्ञान में होने वाले गौरव की अपेक्षा कातन्त्रीय 'तृतीय-चतुर्थ' शब्दों का प्रयोग लाघवाध्यायक ही कहा जाएगा ।

## [विशेष वचन]

१. पुनर्धातुग्रहणमुत्तरार्थमिह सुखार्थं च (दु० वृ०)।

२. धातोरित्यवयवावयविसम्बन्धे षष्ठी, तृतीयादेरिति घढधभान्तस्येति च अवयवस्य विशेषणमिति सुखार्थम् (दु० टी०)।

३. सेरिकार उच्चारणार्थः (दु० टी०)।

४. प्रकरणान्महाधात्वधिकाराच्च धातुर्लब्ध एवेत्याह-पुनरित्यादि (वि० प०) ॥७८०।

## [रूपसिद्धि]

१. **दुधुक्षति।** दुह + सन् + अन् + ति। दोग्धुमिच्छति। 'दुह प्रपूरणे' (२।६१) धातु से "धातोर्वा तुमन्तादिच्छतिनैककर्तृकात्" (३।२।४) से इच्छा अर्थ में 'सन्' प्रत्यय, "दहिदिहिदुहिमिहिरिहिरुहिलिहिलुहिनहिवहेर्हात्" (३।७।३०) से अनिट्, अगुण, द्वित्व, अभ्यासकार्य, "दादेर्घः" (३।६।५७) से हकार को घकार, प्रकृत सूत्र से ढकार को धकार, "अघोषे प्रथमः" (२।३।६१) से घकार को ककार, "नामिकरपरः प्रत्ययविकारागमस्थः सिः षं नुविसर्जनीयषान्तरोऽपि" (२।४।४७) से सकार को षकार, 'क् -ष् ' संयोग से क्ष, "ते धातवः" (३।२।१६) से 'दुधुक्ष' की धातुसंज्ञा, वर्तमानासंज्ञक परस्मैपद-प्र० पु०-ए० व० 'ति' प्रत्यय, "अन् विकरणः कर्तरि" (३।२।३२) से 'अन्' विकरण तथा अकार का लोप।

२. **अधोक्ष्यत्।** अट् + दुह् + स्यत्। 'दुह प्रपूरणे' (२।६१) धातु से क्रियातिपत्ति-संज्ञक प० प०-प्र० पु०-ए० व० 'स्यत्' प्रत्यय, अडागम तथा शेष प्रक्रिया पूर्ववत्।

३. **अधुग्ध्वम्।** अट् + दुह + ह्यस्तनी-ध्वम्। 'दुह प्रपूरणे' (२।६१) धातु से ह्यस्तनीसंज्ञक 'ध्वम् प्रत्यय, अडागम तथा अन्य प्रक्रिया पूर्ववत्।

४. **अघुक्षत्।** अट् + गुह + दि। 'गुहू संवरणे' (१।५९५) धातु से अद्यतनीसंज्ञक प्र० पु०-ए० व० 'दि' प्रत्यय, अडागम "सणनिटः शिडन्तान्नाम्युपधाददृशः" (३।२।२५) से 'सण्' प्रत्यय तथा शेष प्रक्रिया पूर्ववत्।

५. **अघूढ्वम्।** अट् + गुह + ध्वम्। 'गुहू संवरणे' (१।५९५) धातु से अद्यतनीसंज्ञक 'ध्वम्' प्रत्यय, अडागम तशा अन्य प्रक्रिया पूर्ववत्।

६. **बुभुत्सते।** बुध् + सन् + अन् + ते। 'बुध अवगमने' (१।५६६) धातु से सन् प्रत्यय, द्वित्वादि तथा अन्य प्रक्रिया पूर्ववत्।

७. **अभुद्धवम्।** अट् + बुध् + अद्यतनी-ध्वम्। 'बुध अवगमने' (१।५६६) धातु से अद्यतनीसंज्ञक 'ध्वम्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

८. **धीप्सति।** दन्भ् + सन् + ति। 'दन्भु दम्भे' (४।१९) धातु से 'सन्' प्रत्यय, तथा अन्य प्रक्रिया पूर्ववत्।

९. **भोत्स्यते।** बुध + स्यते। 'बुध अवगमने' (१।५६६) धातु से भविष्यन्तीसंज्ञक आत्मनेपद-प्र० पु०-ए० व० 'स्यते' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

१०. **निघोक्ष्यते।** नि+गुह+स्यते। 'नि' उपसर्गपूर्वक 'गुहू संवरणे' (१।५९५) धातु से भविष्यन्तीसंज्ञक आत्मनेपद-प्रथमपुरुष-ए० व० 'स्यते' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत् ॥७८०।

## ७८१. लोपे च दिस्योः [३।६।१०१]

### [सूत्रार्थ]

'दि-सि' प्रत्ययों का लोप हो जाने पर 'घ्-ढ्-ध्-भ्'- अन्त वाली धातु में आदिभूत तृतीय वर्ण के स्थान में चतुर्थ वर्ण आदेश होता है॥७८१।

### [दु० वृ०]

धातोरवयवस्य तृतीयादेर्घढधभान्तस्यादेश्चतुर्थत्वं भवति दिस्योर्लोपे च सति। अधोक, अजोघोट्, अबोभोत् । दिस्योरिति किम्? अदुग्धाः। वर्णाश्रयत्वात् प्रत्ययलोपलक्षणं नास्तीति॥७८१।

### [दु० टी०]

लोपे०। चकार **उक्तसमुच्चयमात्रे।** ननु सेर्लोपे कृते **'प्रत्ययलोपे प्रत्ययलक्षणम्'** (का० परि० ५२) इति पूर्वेणैव सकारो भविष्यतीति मनसि कृत्वाह-वर्णेत्यादि॥७८१।

### [वि० प०]

लोपे च०। गुहेर्वुधेश्च पूर्ववन्**मतान्तरे** चेक्रीयितलुगन्तस्योदाहरणं दिस्योरित्यादि। अदुग्धाः इति। दुहे रुचादित्वात् कर्मकर्तर्यात्मनेपदम्, ह्यस्तन्यास्थास् । इह अन्विकरणस्य लुक्, अदुग्धा गौः स्वयमेवेत्यर्थः। ननु सेर्लोपे प्रत्ययलोपलक्षणमिति सकारे पूर्वेणैव सिध्यति, किं सिलोपग्रहणेनेत्याह-वर्णेत्यादि॥७८१।

### [समीक्षा]

द्रष्टव्य, सूत्र सं० ७८० की समीक्षा।

### [रूपसिद्धि]

१. **अधोक्।** अट् + दुह + ह्यस्तनी-दि। 'दुह प्रपूरणे' (२।६१) धातु से ह्यस्तनी विभक्तिसंज्ञक परस्मैपद-प्र० पु०- ए० व० 'दि' प्रत्यय, अडागम, ''व्यञ्जनाद् दिस्यो;'' (३।६।४७) से 'दि' प्रत्यय का लोप, हकार को घकार, प्रकृत सूत्र से दकार को धकार, गुण तथा ''पदान्ते धुटां प्रथमः'' (३।८।१) से घकार को ककारादेश।

२. **अजोघोट्।** अट् + गुह + चर्करीत + दि। 'गुहू संवरणे' (१।५९५) धातु से चेक्रीयित- 'य' प्रत्यय का लोप, प्रत्ययलोपलक्षण से द्विर्वचनादि, 'जोगोह' की धातुसंज्ञा, ह्यस्तनीसंज्ञक 'दि' प्रत्यय, अडागम, दि-लोप, हकार को ढकार, प्रकृत सूत्र से गकार को घकार, गुण तथा ढकार को टकारादेश।

३. **अबोभोत्।** अट् + बुध् + चर्करीत + दि । 'बुध अवगमने' (१।५६६) धातु से चेक्रीयित- 'य' का लोप, द्विर्वचनादि, 'बोबुध्' की धातुसंज्ञा, दि-प्रत्यय तथा शेष प्रक्रिया पूर्ववत् ॥७८१।

## ७८२. तथोश्च दधातेः [३।६।१०२]

### [सूत्रार्थ]

'त्-थ्-स्-ध्व' के परे रहते 'धा' धातुसम्बन्धी 'दध्' रूप के उपस्थित होने पर दकार को चतुर्थ वर्ण आदेश होता है।।७८२।

### [दु० वृ०]

दधातेर्धान्तस्यादेश्चतुर्थत्वं भवति तथोः सिध्वोश्च परतः। धत्तः, धत्थः। धत्से, धद्ध्वे। धान्तस्येति किम्? दधाति, दधासि ।।७८२।

**।।इति दौर्गसिंह्यां वृत्तावाख्याते तृतीयाध्याये षष्ठोऽनुषङ्गलोपादिपादः समाप्तः।।**

●

### [दु० टी०]

तथो०। चकारः सिध्वोरनुकर्षणार्थो न्यायादित्याह- सिध्वोश्चेति **सुखनिर्देशार्थ** एव। **तिब्निर्देशश्चेक्रीयितलुगन्तार्थ इत्येके।** दात्तः, दात्थः। धात्तः, धात्थः।।७८२।

**।।इति दुर्गसिंहविरचितायां कातन्त्रवृत्तिटीकायामाख्याते तृतीयाध्याये षष्ठोऽनुषङ्गलोपादिपादः समाप्तः।।**

●

### [वि० प०]

तथो०। घढधभान्त इह न सम्भवतीत्याह - दधातेर्धान्तस्येति। जुहोत्यादित्वाद् द्विर्वचनम्, अभ्यस्तानामाकारस्येत्याकारलोपः। इह पारिशेष्यादभ्यासदकारस्यादिचतुर्थत्वं धकारः।।७८२।

**।।इति श्रीमत्त्रिलोचनदासकृतायां कातन्त्रवृत्तिपञ्जिकायामाख्याते तृतीयाध्याये षष्ठोऽनुषङ्गलोपादिपादः समाप्तः।।**

●

### [समीक्षा]

'धत्तः, धत्से' इत्यादि शब्दरूपों के सिद्ध्यर्थ दकार को धकारादेश का विधान दोनों व्याकरणों में किया गया है। पाणिनि का सूत्र है-"दधस्तथोश्च" (अ० ८।२।३८)।

### [विशेष वचन]

१. तिब्निर्देशश्चेक्रीयितलुगन्तार्थ इत्येके (दु० टी०)।

२. इह पारिशेष्यादभ्यासदकारस्यादिचतुर्थत्वं धकारः (वि० प०)।

**[रूपसिद्धि]**

१. **धत्तः।** धा+तस् । 'डु धाञ् धारणपोषणयोः' (२।८५) धातु से वर्तमानासंज्ञक प्र० पु०-द्विव० 'तस्' प्रत्यय, "जुहोत्यादीनां सार्वधातुके" (३।३।८) से 'धा' को द्वित्व, पूर्ववर्ती 'धा' की अभ्यासंज्ञा, "द्वितीयचतुर्थयोः प्रथमतृतीयौ" (३।३।११) से धकार को दकार, "ह्रस्वः" (३।३।१५) से आकार को ह्रस्व, "अभ्यस्तानामाकारस्य" (३।६।४१) से 'ध' धातुगत आकार का लोप, प्रकृत सूत्र से दकार को चतुर्थ वर्ण धकारादेश तथा "रसकारयोर्विसृष्टः" (३।८।२) से सकार को विसर्ग।

२. **धत्थः।** धा + थस् । 'डु धाञ् धारणपोषणयोः' (२।८५) धातु से वर्तमाना संज्ञक परस्मैपद म० पु०-द्विव० 'थस्' प्रत्यय तथा शेष प्रक्रिया पूर्ववत् ।

३. **धत्से।** धा + से। 'डु धाञ् धारणपोषणयोः' (२।८५) धातु से वर्तमानासंज्ञक आत्मनेपद-म० पु०-ए० व० 'से' प्रत्यय तथा शेष प्रक्रिया पूर्ववत् ।

४. **धद्ध्वे।** धा + ध्वे। 'डु धाञ् धारणपोषणयोः' (२।८५) धातु से वर्तमानासंज्ञक आत्मनेपद-मध्यमपुरुष-ब० व० 'ध्वे' प्रत्यय तथा शेष प्रक्रिया पूर्ववत् ॥७८२।

**॥इत्याख्याते तृतीयाध्याये समीक्षात्मकः षष्ठोऽनुषङ्गलोपादिपादः समाप्तः॥**

●

# अथाख्याते तृतीयाध्याये सप्तमः इडागमादिपादः

## ७८३. इडागमोऽसार्वधातुकस्यादिर्व्यञ्जनादेरयकारादेः [३।७।१]

**[सूत्रार्थ]**

यकारादिभिन्न व्यञ्जनादि असार्वधातुक प्रत्यय से पूर्व तथा धातु से पर में 'इट्' आगम होता है। इस 'इट्' आगम में शेष इकार उक्त असार्वधातुक प्रत्यय का आदि अवयव माना जाता है॥७८३।

**[दु० वृ०]**

धातोर्विहितस्यासार्वधातुकस्य व्यञ्जनादेरयकारादेरादिरिडागमो भवति। भविता, भविष्यति, भवितव्यम् । पुनर्धात्वधिकारो धातुसंज्ञाश्रितासार्वधातुकार्थः। तेन गृह्णाति, वृणोति, जुगुप्सते, मीमांसते। असार्वधातुकस्येति किम् ? शेते, वेत्ति । टकार इटि चेत्यादौ **विशेषणार्थः।** व्यञ्जनादेरिति किम् ? बभूव। अयकारादेरिति किम् ? भूयात् ॥७८३।

## [दु० टी०]

इडा०। पुनरित्यादि। धातुसंज्ञामाश्रितमसार्वधातुकमर्थः प्रयोजनमस्येति विग्रहः। धातोरित्यनया श्रुत्या यद्विहितमसार्वधातुकमित्यर्थः। तेन नान्वोर्गुपादिभ्यश्च सनि प्रतिषेधो वक्तव्यो न स्यात् । एवं सति नूभ्याम्, लूभ्यामिति चोद्यमेव नावतरति, तर्हि किमसार्वधातुकग्रहणेन, व्यञ्जनादेरयकारादेर्धातोरिति विशेषणं स्याद् घढधभान्तस्येति। धातोरिति षष्ठ्यन्तस्यो पात्तं न च पञ्चम्यन्ततया कल्पयितुं शक्यते । अडागम इवेडागमे। धातोरादिश्चेद् इवर्णादश्रिडीङ्शीङः शकेः कादित्ययुक्तं स्यात् । विजेरिटीति गुणनिषेधवचनाच्च। तस्माद् धातोरिति पञ्चम्यन्तं तच्च प्रत्ययस्य विशेषणं तथापि सार्वधातुकनिवृत्त्यर्थं कर्तव्यमित्याह- शेते वेत्तीति। एतदपि न प्रयोजनम्,रुचादेः सार्वधातुके इति नियमो भविष्यति, नैवम् । **विपरीतनियमोऽपि** शङ्क्यते। रुदादेः सार्वधातुके एवेति ततश्च रोदितेत्यत्र न स्यात् 'वस्ते, शेते' इत्यत्र स्याद् इट् । तर्हि **"सनि चानिटि"** (३।५।९) इति सिद्धे **"रुदविदमुषां सनि"** (३।५।१६) इति रुदिग्रहणमनर्थकम्, स्वपेरिट्प्रतिषेधनं चेति, तस्मादसार्वधातुकग्रहणं **प्रतिपत्तिगौरवनिरासार्थम् ।** आगमग्रहणमन्यत्र विधीयमानस्येटोऽसार्वधातु**कस्यादित्त्व-प्रतिपत्त्यर्थम् ।** अर्त्तीण्घसैकस्वरातामिड्वन्सावित्यादावि**त्येके।** भिन्नकर्तृकत्वात्, तदसत्। स एवायमिति तत्रैकत्वाध्यवसायान्न दुष्यतीति **स्पष्टार्थमेवैतत्** ॥७८३।

## [वि० प०]

इडागमः। अथ किमर्थमिदं पुनर्धातुग्रहणम् **उत्तरार्थ**मित्युक्तमेवेत्याह- पुनरित्यादि। धातुसंज्ञामाश्रितं **धातुसंज्ञाश्रितम्,** तथाभूतमसार्वधातुकमेवार्थः प्रयोजनमस्येति विग्रहः। **अयमर्थः**- धातोरिति किमुक्तं भवति, धातो रित्यनया श्रुत्या यद् विहितमसार्वधातुकं तस्यादिरिडित्यर्थः। तेन **"ना क्र्यादेः"** (३।२।३८) इत्यादिना विहितस्य विकरणस्य गुपमानादिभ्यः सनश्चादिरिडागमो न भवतीति सिद्धम् ॥७८३।

## [बि० टी०]

इडा०। धातोरित्यनया श्रुत्येति, अय**मभिप्रायः** प्रकरणत्वेन। यद् धातुत्वं प्राप्तं तदवलम्बनेन यः प्रत्ययो भवति साध्यगतित्वावलम्बनेन यः प्रत्ययो जातस्तस्यादिरिडित्यर्थः। ननु रुचादि (सूत्र) द्वारेण यः प्रत्ययो जातस्तस्यादिरिड् न भवतु गणद्वारेण विहितत्वात्? सत्यम् । रुचादिसूत्रेण वर्तमानादयः काले विधीयन्ते इति कालश्च क्रियाया एव। **क्रिया च धात्वर्थः,** अतोऽत्र धात्ववलम्बनेन प्रत्ययो जातस्तेनेट् स्यादेव, अनादयः काले विधीयन्त एव। किञ्च रुचादिसूत्रे धात्वधिकारोऽवश्यमेव कार्यः, अन्यथा रोचनं रुच् , भावे क्विप्, तस्मादप्यात्मनेपदं स्यात्, तर्हि "नुः ष्वादेः" (३।२।३४) इत्यत्रापि धात्वधिकारः आश्रयणीयः। अन्यथा उपसर्गादपि नुः स्यादिति, न देश्यं स्वादेर्नुः स्यात् सार्वधातुके परे इति सार्वधातुके उपसर्गस्य वर्तमानत्वाभावात् । गुपूप्रभृति धातुत्वं नावलम्बते। अन्यथा गुपशब्दोऽपि स्यात्, तदयुक्तम् । गुपधातोर्यदि कृत्प्रत्ययः स्यात तदा शब्दवत् तस्माद् धातोर्नित्यं सनेव विद्यते नान्यः प्रत्ययस्तर्हि गुपधातोर्निन्दायां कृत्प्रत्ययो दृष्टस्तत्र स्यादिति न देश्यम् । **सिद्धपक्षे** यथा **निन्दार्थे** वर्तमानगुपधातोर्न स्यात्, अस्मिन् पक्षेऽपि तथा । यद् वा **"धातोर्वा तुमन्तात्"**

(३।२।४) इत्यत्र धातुग्रहणं वर्तते। **"गुप्तिज्किद्भ्यः सन्"** (३।२।२) इत्यादियोगस्तस्मात् पूर्वेण विहितः, कथं तत्र धातुत्वम् ॥७८३।

## [समीक्षा]

'भविता, भविष्यति, भवितव्यम्' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में इडागम का विधान किया गया है । एतदर्थ पाणिनि का सूत्र है- "आर्धधातुकस्येड् वलादेः" (अ० ७।२।३५)। **सार्वधातुक** से भिन्न की पाणिनि ने "आर्धधातुकं शेषः" (अ०३।४।११४) सूत्र द्वारा 'आर्धधातुक' संज्ञा की है, कातन्त्रकार उसे असार्वधातुक कहते हैं। वस्तुतः अर्थसङ्गति की दृष्टि से आर्धधातुक की अपेक्षा असार्वधातुक का प्रयोग अधिक समीचीन है। पाणिनीय 'वल् ' प्रत्याहार में यकार को छोड़कार ३२ व्यञ्जन (हल्) वर्णों का ग्रहण होता है। कातन्त्र में स्वर-व्यञ्जन संज्ञाओं का प्रयोग होने से यकारभिन्न व्यञ्जन शब्द का पाठ किया गया है, जो **प्रसिद्ध** लोकव्यवहार के अनुरूप है । पाणिनि ने टित् आगमों का स्थान निश्चित करने के लिए "आद्यन्तौ टकितौ" (अ० १।१।४६) यह परिभाषासूत्र बनाया है, तदनुसार टित् आगम (इट् आदि) आदि अवयव के रूप में प्रवृत्त होते हैं, परन्तु कातन्त्रकार ने इस सूत्र में ही 'आदि' शब्द का पाठ करके लाघव उपस्थापित किया है।

## [विशेष वचन]

१. पुनर्धात्वधिकारो धातुसंज्ञाश्रितासार्वधातुकार्थः (दु० वृ०)।
२. विपरीतनियमोऽपि शङ्क्यते (दु० टी०)।
३. असार्वधातुकग्रहणं प्रतिपत्तिगौरवनिरासार्थम् (दु० टी०)।
४. आगमग्रहणम् अन्यत्र विधीयमानस्येटोऽसार्वधातुकस्यादित्वप्रतिपत्त्यर्थम् (दु० टी०)।
५. स एवायमिति तत्रैकत्वाध्यवसायान्न दुष्यतीति स्पष्टार्थमेवैतत् (दु० टी०)।
६. पुनर्धातुग्रहणमुत्तरार्थम् (वि० प०)।
७. वर्तमानादयः काले विधीयन्ते इति कालश्च क्रियाया एव, क्रिया च धात्वर्थः (बि० टी०)।

## [रूपसिद्धि]

१. **भविता।** भू + श्वस्तनी-ता। 'भू सत्तायाम् ' (१।१) धातु से श्वस्तनीसंज्ञक परस्मैपद-प्र० पु०-ए० व० 'ता' प्रत्यय, प्रकृत सूत्र से इडागम, "नाम्यन्तयोर्धातुविकरण-योर्गुणः" (३।५।१) से भूधातुघटित ऊकार को गुण-ओकार तथा "ओ अव्" (१।२।१४) से ओकार को अवादेश।

२. **भविष्यति।** भू + स्यति । 'भू सत्तायाम्' (१।१) धातु से भविष्यन्तीसंज्ञक प्र० पु० - ए० व० 'स्यति' प्रत्यय, प्रकृत सूत्र से इडागम, गुण, अवादेश तथा सकार को षकारादेश ।

३. **भवितव्यम्।** भू+इट्+ तव्य + सि। 'भू सत्तायाम्' (१।१) धातु से "तव्यानीयौ" (४।२।९) सूत्र द्वारा लिङ्गसंज्ञा, 'सि' प्रत्यय, नपुंसकलिङ्ग' में 'मु' आगम तथा सि-प्रत्यय का लोप॥७८३।

## ७८४. स्नुक्रमिभ्यां परस्मै [३।७।२]

### [सूत्रार्थ]

यकारादिभिन्न असार्वधातुक प्रत्यय के परे रहते परस्मैपदी 'स्नु-क्रम' धातुओं से उत्तर तथा प्रत्यय से पूर्व में इडागम होता है॥७८४।

### [दु० वृ०]

परस्मैपदविषये यौ स्नुक्रमी ताभ्यां परस्यासार्वधातुकस्य व्यञ्जनादेरयकारादेरादिरिडागमो भवति। प्रस्नविता, प्रस्नविष्यति, क्रमिता, क्रमिष्यति, चिक्रमिषति । परस्मैपदविषय एवेति नियमात् - व्यतिस्नोष्यते, प्रचिक्रंसते, उपचिक्रंसते। प्रोपाभ्यां क्रमी रुचादिः। आदिकर्मणि - प्रस्नवितव्यम्, प्रक्रमितव्यम् इत्यसमानविषयत्वादिट् । कथं प्रक्रन्ता, उपक्रन्ता? आत्मनेपदविषयस्य क्रमेः कर्तरि कृतीट् प्रतिषेध एव। प्रस्नवितेवाचरति- प्रस्नवित्रीयते। आयिरयमात्मनेपदी ॥७८४।

### [दु० टी०]

स्नुक्र०। "**अयुरुनुस्नुक्षुक्ष्णुवः**" (३।७।१५) इति वर्जनात् स्नौतेरिट् प्राप्तः, क्रमेश्चाप्रतिषेधान्नियम आरभ्यते, तत्र स्नुक्रमिभ्यामेवेति न विपरीतनियमो "**व्यञ्जनान्तानामनिटाम्**" (३।६।७) इति वचनात् । अथवा परस्मैपद इति सति (भावे) सप्तमी नौपश्लेषिकलक्षणेति परस्मैपदे सति भवति, असति न भवतीति। कथमित्यादि। अन्यस्य विषयस्यासम्भवादत्र विषयो ह्यनन्यभाव एवेति । यस्य भावकर्मणी कर्मकर्तृविनिमयौ वृत्त्यादयश्चार्था विवक्ष्यन्ते, **प्रादयश्चोपसर्गा विशेषका भवन्ति,** स च क्रमिरात्मनेपदविषयः। **माघस्य** स्खलितं दृश्यते- **चिक्रंसया कृत्रिमपत्रिपङ्क्तेः**' इति, तदेतन्न वक्तव्यम्- **अभिधानलक्षणाः कृत्तद्धितसमासा इति।** प्रस्नवितेत्यादि । एवं प्रक्रमित्रीयते, बहिरङ्गमात्मनेपदमन्तरङ्गे इडागम इति भावः। कथं तर्हि प्रचिक्रंसिष्यते । सनन्तस्यात्मनेपदविषयत्वात्, नैवम् । क्रमिरेवात्मनेपदविषय इति तत्प्राप्तेः पूर्ववत् सनन्तादित्यतिदेशात् ॥७८४।

### [वि० प०]

स्नुक्रमि०। भावकर्मकर्मकर्तृक्रियाविनिमयाः वृत्त्यादयश्चार्थाः। ययोर्न विवक्ष्यन्ते तौ परस्मैपदविषयौ स्नुक्रमी, ताभ्यामित्याह- परस्मै इत्यादि । उकारान्तप्रतिषेधे "**अयुरुनुस्नुक्षुक्ष्णुवः**" (३।७।१५) इति वर्जनात् स्नौतेरप्रतिषेधात् क्रमेश्च बाधकाभावात् पूर्वेणैवेटि सिद्धे **नियमार्थ**मिदमुच्यते। स च स्नुक्रमिभ्यामेवेति न **विपरीतनियमः**। तदा हि परस्मैपदेनान्येषामिडिति "**व्यञ्जनान्तानामनिटाम्**" (३।६।७) इत्यनिडग्रहणमनर्थकमेव स्यात् । सिचि परस्मैपदे इटोऽसम्भवात् किं व्यवच्छिद्यते इत्याह-परस्मैपदविषय एवेति । असमानविषयत्वादिति। सादृश्यादात्मनेपदमेव नियमेन व्यावृत्यते इत्यर्थः। एवं तर्हीदं न

सिध्यतीत्याह-कथमिति । येषु सत्स्वात्मनेपदं क्रमेर्विहितं तद्वृत्तिः क्रमिरात्मनेपदविषय एवेष्यते। 'प्रक्रन्ता, उपक्रन्ता' इति। **''प्रोपाभ्यामारम्भे''** (३।२।४२-३७) इत्यात्मनेपदविषयता। तदेतन्न वक्तव्यम्-**अभिधानलक्षणा हि कृत्तद्धितसमासा** इति । प्रस्नवितेत्यादि। एवं क्रमितेवाचरति प्रक्रमित्रीयते, आयिरयमात्मनेपदीति न स्नुक्रमाविति। तेनान्तरङ्गत्वादिटि कृते बहिरङ्गत्वादात्मनेपदं पश्चादित्यर्थः। यद्येवं कथं 'प्रचिक्रंसते' इति सन् प्रत्ययस्यात्मनेपदविषयत्वात् । **तदयुक्तम्**, क्रमिरेवात्मनेपदविषयः इति, कथमन्यथा **''पूर्ववत् सनन्तात्''** (३।२।४६) इत्यतिदेशः प्रवर्तते ॥७८४।

## [समीक्षा]

'प्रस्नविता, प्रस्नविष्यति, क्रमिता, क्रमिष्यति' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में इडागम किया गया है। पाणिनि का सूत्र है- ''स्नुक्रमोरनात्मनेपदनिमित्ते'' (अ० ७।२।३६)। परस्मैपद में ही इडागम प्रवृत्त **हो - इसलिए ही यह सूत्र कातन्त्रकार** ने बनाया है। अतः 'व्यतिस्नोष्यते' इत्यादि स्थलों **में इडागम नहीं होता। इसका स्पष्ट निर्देश** 'परस्मै' पद से कातन्त्र में किया गया है, जबकि **पाणिनि नें 'अनात्मनेपदनिमित्ते' शब्द** का प्रयोग किया है। व्याख्याकारों ने कहा है कि कृत्, तद्धित तथा समास अभिधानलक्षण होते हैं, अतः 'प्रक्रन्ता' आदि में इडागम के निषेधार्थ ''प्रोपाभ्यामारम्भे'' आदि सूत्रवचन बनाने की आवश्यकता नहीं है।

## [विशेष वचन]

१. आयिरयमात्मनेपदीति (दु० वृ०)।
२. तत्र स्नुक्रमिभ्यामेवेति न विपरीतनियमः (दु० टी०)।
३. प्रादयश्चोपसर्गा विशेषका भवन्ति (दु० टी०)।
४. अभिधानलक्षणा हि कृत्तद्धितसमासा इति (दु० टी०; वि० प०)।
५. सादृश्यादात्मनेपदमेवनियमेन व्यावृत्यते (वि० प०)।

## [रूपसिद्धि]

१. **प्रस्नविता।** प्र + ष्णु + इट् + ता। 'प्र' उपसर्गपूर्वक 'ष्णु प्रस्रवणे' (२।९) धातु से श्वस्तनीसंज्ञक प्र० पु०-ए० व० 'ता' प्रत्यय, ''धात्वादेः षः सः'' (३।८।२४) से षकार को सकार, 'निमित्तापाये नैमित्तिकस्याप्यपायः' से णकार को नकार, प्रकृत सूत्र से इडागम, गुण तथा अवादेश।

२. **प्रस्नविष्यति।** प्र+ष्णु + इट् + स्यति। 'प्र' उपसर्गपूर्वक 'ष्णु प्रस्रवणे' (२।९) धातु से भविष्यन्तीसंज्ञक परस्मैपद-प्र० पु०-ए० व० 'स्यति' प्रत्यय, प्रकृत सूत्र से इडागम, गुण, अवादेश तथा सकार को षकारादेश।

३. **क्रमिता।** क्रम+ इट् + ता। 'क्रमु पादविक्षेपे' (१।१५७) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय तथा प्रकृत सूत्र से इडागम।

४. **क्रमिष्यति।** क्रम्+इट्+स्यति। 'क्रमु पादविक्षेपे' (१।१५७) धातु से भविष्यन्ती-संज्ञक परस्मैपद-प्र० पु०-ए० व० 'स्यति' प्रत्यय, प्रकृत सूत्र से इडागम तथा सकार को षकारादेश ।

५. **चिक्रमिषति** । क्रम् + सन् + ति । क्रमितुमिच्छति। 'क्रमु पादविक्षेपे' (१।१५७) धातु से इच्छार्थ में "धातोर्वा तुमन्तादिच्छतिनैककर्तृकात्" (३।२।४) से 'सन्' प्रत्यय, प्रकृत सूत्र से इडागम, "चण्परोक्षाचेक्रीयितसनन्तेषु" (३।३।७) से धातु को द्विर्वचन, पूर्ववर्ती 'क्रम्' की अभ्याससंज्ञा, "अभ्यासस्यादिर्व्यञ्जनमवशेष्यम्" (३।३।९) से 'र्-म्' का लोप, "कवर्गस्य चवर्गः" (३।३।१३) से ककार को चकार, "सन्यवर्णस्य" (३।३।२६) से अभ्यासगत अकार को इकार तथा सकार को षकारादेश॥७८४।

## ७८५. रुदादेः सार्वधातुके [३।७।३]

### [सूत्रार्थ]

यकारादिभिन्न व्यञ्जनादि सार्वधातुकसंज्ञक प्रत्यय के परे रहते रुदादिगणपठित धातु से उत्तर तथा प्रत्यय से आदि में इडागम होता है॥७८५।

### [दु० वृ०]

रुदादेर्गणात् सार्वधातुके व्यञ्जनादेरयकारादेरादिरिडागमो भवति । रोदिति, रुदितः। स्वपिति, स्वपितः। श्वसिति, श्वसितः। प्राणिति, प्राणितः। जक्षिति, जक्षितः। रुद्यते इति परत्वाद यणा भवितव्यम् ।

**रोदितिः स्वपितिश्चैव श्वसितिः प्राणितिस्तथा।**
**जक्षितिश्चैव विज्ञेयो रुदादिः पञ्चको गणः॥७८५।**

### [दु० टी०]

रुदादेः। सार्वधातुके इति **विषयसप्तमीयम्,** यथा वृक्षे शाखेति । सार्वधातुक इति किमर्थम् - स्वप्ता, नैवम् । स्वपेरिट्प्रतिषेधानर्थक्यप्रसङ्गात् । तर्हि **प्रतिपत्तिगौरवनिरासार्थम्।** अन्येभ्यस्तु रुदादिभ्योऽसार्वधातुकलक्षणेनेटा भवितव्यमेव॥७८५।

### [समीक्षा]

'रोदिति, स्वपिति, श्वसिति' आदि शब्दरूपों के सिद्ध्यर्थ दोनों व्याकरणों में इडागम का विधान किया गया है। पाणिनि का सूत्र है -"रुदादिभ्यः सार्वधातुके" (अ० ७।२।७६)। दोनों के अनुसार रुदादिगण में 'रुद्, स्वप्, श्वस्, अन्, जक्ष्' इन पाँच धातुओं का समावेश मान्य है।

### [विशेष वचन]

१. सार्वधातुक इति किमर्थम् ----- तर्हि प्रतिपत्तिगौरवनिरासार्थम् (दु० टी०)।

### [रूपसिद्धि]

१. **रोदिति।** रुद्+ इट् + ति । 'रुदिर् अश्रुविमोचने' (२।३१) धातु से वर्तमानाविभक्ति-संज्ञक परस्मैपद-प्र० पु० - ए० व० 'ति' प्रत्यय, अन्लुक्, प्रकृत सूत्र से इडागम तथा "नामिनश्चोपधाया लघोः" (३।५।२) से उपधासंज्ञक उकार को गुण-ओकार।

२. **रुदितः।** रुद् + इट् + तस् । 'रुदिर् अश्रुविमोचने' (२।३१) से वर्तमानासंज्ञक 'तस्' प्रत्यय तथा शेष पूर्ववत् ।

३. **स्वपिति।** स्वप् + इट् + ति। 'ञि ष्वप शये' (२।३२) धातु से वर्तमानासंज्ञक 'ति' प्रत्यय, "धात्वादेः षः सः" (३।८।२४) से षकार को सकार, अन्लुक्, तथा प्रकृत सूत्र से इडागम।

४. **स्वपितः।** स्वप्+ इट्+ तस्। 'ञि ष्वप शये' (२।३२) धातु से वर्तमानासंज्ञक 'तस्' प्रत्यय तथा शेष प्रक्रिया पूर्ववत्।

५. **श्वसिति।** श्वस् + इट् + ति। 'श्वस् प्राणने' (२।३३) धातु से वर्तमानासंज्ञक 'ति' प्रत्यय तथा शेष पूर्ववत्।

६. **श्वसितः।** श्वस् + इट् + तस्। 'श्वस् प्राणने' (२।३३) धातु से वर्तमानासंज्ञक 'तस् ' प्रत्यय तथा शेष पूर्ववत्।

७. **प्राणिति।** प्र+अन् + इट् + ति। 'प्र' उपसर्गपूर्वक 'अन प्राणने' (२।३४) धातु से वर्तमानासंज्ञक 'ति' प्रत्यय तथा शेष पूर्ववत्।

८. **प्राणितः।** प्र + अन् + इट् + तस्। 'प्र' उपसर्गपूर्वक 'अन प्राणने' (२।३४) धातु से वर्तमानासंज्ञक 'तस्' प्रत्यय तथा शेष पूर्ववत्।

९. **जक्षिति।** जक्ष् + इट् + ति। 'जक्ष भक्षहसनयोः' (२।३५) से वर्तमानासंज्ञक 'ति' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत्।

१०. **जक्षितः।** जक्ष्+ इट् + तस्। 'जक्ष भक्षहसनयोः' (२।३५) से वर्तमानासंज्ञक 'तस्' प्रत्यय तथा शेष पूर्ववत् ॥७८५।

## ७८६. ईशः से [३।७।४]

### [सूत्रार्थ]

सकारादि सार्वधातुक प्रत्यय के परे रहते 'ईश्' धातु से उत्तर तथा प्रत्यय से पूर्व इडागम होता है॥७८६।

### [दु० वृ०]

ईशः सादौ सार्वधातुके आदिरिडागमो भवति। ईशिषे, ईशिष्व॥७८६।

### [समीक्षा]

'ईशिषे, ईशिष्व' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में इडागम किया गया है। पाणिनि का सूत्र है - "ईशः से" (अ० ७।२।७७)। पाणिनि के अनुसार इडागम सार्वधातुक प्रत्यय को होता है, 'इट्' आगम यतः टित् है, अतः "आद्यन्तौ टकितौ" (अ० १।१।४६) इस परिभाषाबल से 'से' प्रत्यय से पूर्व प्रवृत्त होकर उसी का आदि अवयव माना जाता है। कातन्त्रकार ने सूत्र सं० ३।७।१ में इडागम को धातु से उत्तर तथा प्रत्यय से आदि में विहित किया है, उसी की अनुवृत्ति प्रकृत सूत्र में भी होती है, उस अनुवृत्तिबल से प्रत्ययपूर्व में इडागम होगा।

### [रूपसिद्धि]

१. **ईशिषे।** ईश्+इट्+ से। 'ईश ऐश्वर्ये' (२।४४) धातु से वर्तमानाविभक्तिसंज्ञक आत्मनेपद - मध्यमपुरुष- ए० व० 'से' प्रत्यय, अन्लुक्, प्रकृत सूत्र से इडागम, तथा "निमित्तात् प्रत्ययविकारागमस्थः सः षत्वम्" (३।८।२६) से सकार को षकारादेश॥७८६।

## ७८७. ईड्जनोः सध्वे च [३।७।५]

### [सूत्रार्थ]

सार्वधातुकसंज्ञक प्रत्यय के सकार तथा ध्व के परे रहते 'ईड्-जन्' धातुओं से उत्तरवर्ती इडागम होता है।।७८७।

### [दु० वृ०]

ईड्जनोः सार्वधातुके सकारे ध्वे च परतः आदिरिडागमो भवति। ईडिषे, ईडिष्व, ईडिध्वे, ईडिध्वम्। व्यतिजज्ञिषे, व्यतिजज्ञिध्वे, व्यतिजज्ञिध्वम्। जन जनने। न जनी-यना व्यवहितत्वात्। सध्वे चेति पठितत्वाच्चकारेण ईशिरनुकृष्यते- ईशिध्वे, ईशिध्वम्।।७८७।

### [दु० टी०]

ईड्०। सश्च ध्वं च सध्वम्। समाहारो **यथासंख्यविधातार्थः**। व्यतिजज्ञिध्वे इति क्रियाविनिमये रुचादित्वम्। न जनीत्यादि। अत्र जायते इति भवितव्यम्, परादपि नित्यो विधिर्बलवानिति यन्नेवेत्यर्थः। प्रत्ययादनर्थकश्चकारः प्रकृत्याभिसम्बध्यते। ईड्जनोश्च सध्वे इत्याह - चकार इत्यादि। तर्हि योगविभागः किमर्थः 'ईशीड्जनां सध्वे' इत्यास्ताम्। **सूत्रकारमतं** वर्णयन्ति- नियमार्थो **योगविभागः** स **इत्यविभक्तिकोऽयं निर्देशः**। ईशः से शब्द एवेति। स्वशब्दे 'ईशिष्व' इति न भवितव्यम्। **वाक्यकारस्तु प्रमाणभूतो**। मध्यमैकवचनं यः स्वशब्दः स एव **क्रियासमभिहारे** सर्वेषां वचनानां प्रसङ्गे तस्माद् **योगविभागगौरवं** देयानुषङ्गश्च सर्वथा न व्यावर्त्यते इत्येकयोग एव कर्तव्य इत्याह। **अन्यः** पठति 'ईड्जनोः सध्वे च' इति ईशोऽप्यनुवृत्तिः स्मर्यते इति। योगविभागस्तु **वैचित्र्यार्थः**।।७८७।

### [वि० प०]

ईड्जनोः। अथेह निमित्तनैमित्तिकयोः समानत्वाद् यथासंख्यं कथं न् स्यात्? नैवम्, सश्च ध्वश्च सध्वमिति समाहारोऽयमन्यत्रैकत्वाद् वैषम्यमिति कुतो यथासंख्यम्। अन्यथा सध्वयोरिति विदध्यात्। जनेर्व्यतीहारे आत्मनेपदम्, जुहोत्यादित्वाद् द्विर्वचनम्, गमहनेत्यादिनोपधालोपः। ततः **"तवर्गश्चटवर्गयोगे चटवर्गौ"** (२।४।४६) इति ञकारः। नन्विह सकारस्यापि पठितत्वात् तदनुकर्षणार्थश्चकारो न युज्यते। तत् किमनेनेत्याह- सध्वे चेत्यादि।।७८७।

### [बि० टी०]

ईड्जनोः। ईशीड्जनां सध्वे चेत्येकयोगे सिध्यति **भिन्नयोगो नियमार्थः**- ईशः सेशब्द एवेति। तेन ईश् धातोः स्वे नेडागमः, यत् पुनर्वृत्तौ 'ईशिष्व' इति, **तत्परमत**माश्रित्योक्तमित्या**होमापतिसेनः**। तन्न, **टीकाविरोधात्,** टीकातिरिक्तवादि-पक्षमाश्रित्योक्तम्।।७८७।

## [समीक्षा]

'ईडिषे, ईडिध्वे, जनिषे, जनिध्वे' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों व्याकरणों में इडागम का विधान किया गया है। पाणिनि का सूत्र है- "ईड्जनोर्ध्वे च" (अ०७।२।७८)। आचार्य बिल्वेश्वर के अनुसार 'ईशिष्व' आदि में इडागम का साधुत्व उमापतिसेन मानते हैं, उसे यहाँ टीकाकार के विरोध से साधु नहीं माना गया है। 'ईडीशिजनां सेध्वयोः' ऐसा एक सूत्र बनाना चाहिए था । दो पृथक् सूत्रों का औचित्य सिद्ध नहीं होता, फिर भी पाणिनि तथा कातन्त्रकार ने जो दो सूत्र बनाए हैं, उससे उनकी रचना को विचित्र कहकर आक्षेप किया जाता है।

## [विशेष वचन]

१. सध्वे चेति पठितत्वाच्चकारेण ईशिरनुकृष्यते (दु० वृ०)।

२. सूत्रकारमतं वर्णयन्ति- नियमार्थो योगविभागः (दु० टी०)।

३. वाक्यकारस्तु प्रमाणभूतः ---- इत्येकयोग एव कर्तव्यः (दु० टी०)।

४. योगविभागस्तु वैचित्र्यार्थः (दु० टी०)।

५. ईर्शाड्जनां सध्वे चेत्येकयोगे सिध्यति भिन्नयोगो नियमार्थः (बि० टी०)।

६. यत् पुनर्वृत्तौ 'ईशिष्व' इति, तत् परमतमाश्रित्योक्तमित्याह उमापतिसेनः (बि० टी०)।

## [रूपसिद्धि]

१. **ईडिषे।** ईड् + इट् + से। 'ईड् स्तुतौ' (२।४३) धातु से वर्तमानासंज्ञक 'से' प्रत्यय, अन्लुक्, प्रकृत सूत्र से इडागम तथा सकार को षकारादेश।

२. **ईडिष्व।** ईड् + इट् + स्व। 'ईड् स्तुतौ' (२।४३) धातु से पञ्चमीविभक्तिसंज्ञक आत्मनेपद-म० पु०-ए० व० 'स्व' प्रत्यय, अन्लुक्, इडागम तथा 'स्' को 'ष्'।

३. **ईडिध्वे।** ईड्+इट्+ध्वे। 'ईड् स्तुतौ' (२।४३) धातु से वर्तमानासंज्ञक 'ध्वे' प्रत्यय, अन्लुक्, तथा इडागम।

४. **ईडिध्वम्।** ईड् + इट् + ध्वम् । 'ईड् स्तुतौ' (२।४३) से पञ्चमीसंज्ञक म० पु०-ब० व० 'ध्वम्' प्रत्यय, अन्लुक् तथा इडागम।

५. **व्यतिजज्ञिषे।** वि + अति + जन् + इट् + से। 'वि-अति' उपसर्गपूर्वक 'जन जनने' (२।८०) से "अनियमे चागतिहिंसाशब्दार्थहसः" (३।२।४२-६६) के नियमानुसार वर्तमानासंज्ञक आत्मनेपद मध्यमपुरुष- ए० व० 'से' प्रत्यय, अन्लुक्, इडागम, "जुहोत्यादीनां सार्वधातुके" (३।३।८) से 'जन्' धातु को द्वित्व, अभ्याससंज्ञा, न् - लोप, "सर्वेषामात्मने सार्वधातुकेऽनुत्तमे पञ्चम्याः" (३।५।१८) से अगुण, "गमहनजनखनघसामुपधायाः स्वरादावनण्यगुणे" (३।६।४३) से 'जन्' धातु की उपधा अकार का लोप, "तवर्गश्चटवर्गयोगे चटवर्गौ" (२।४।४६) से नकार को अकार, 'ज्-ञ्' संयोग से ज्ञ् तथा सकार को षकारादेश ।

६. **व्यतिजज्ञिध्वे।** वि + अति + जन् + इट् + ध्वे। 'वि-अति' उपसर्गपूर्वक 'जन जनने' (२।८०) धातु से वर्तमानासंज्ञक 'ध्वे' प्रत्यय तथा शेष प्रक्रिया पूर्ववत् ।

७. **व्यतिजज्ञिध्वम्।** वि + अति + जन् + इट् + ध्वम् । 'वि-अति' उपसर्गपूर्वक पञ्चमीसंज्ञक आत्मनेपद - मध्यमपुरुष-बहुवचन 'ध्वम्' प्रत्यय तथा शेष प्रक्रिया पूर्ववत्।।७८७।

## ७८८. से गमः परस्मै [३।७।६]

### [सूत्रार्थ]

परस्मैपदसंज्ञक प्रत्यय के आदि में वर्तमान सकार के परे रहते 'गम्' धातु से उत्तर में इडागम होता है।।७८८।

### [दु० वृ०]

परस्मैपदस्य यो गमिस्तस्मात् से परे आदिरिडागमो भवति। गमिष्यति, जिगमिषति, अधिजिगमिष त्वम्, जिगमिषा, जिगमिषुः। जिगमिषितव्यम् । परस्मैपदस्येति किम्? अधिजिगांसते, सङ्गसीष्ट। **केचिद्** योगं विभज्यात्मनेपदेऽपीटमिच्छन्ति। **तन्मते** 'संजिगमिषुः, अधिजिगमिषितव्यम् । अनिङ्गमः कृतीत्येके, तदा अधिजिगांसुरिति।।७८८।

### [दु० टी०]

से०। गमेरनन्तरः सार्वधातुके सकारो नास्तीत्यर्थादसार्वधातुक एव भवति। **''यमिरमिनमिगमेर्मात्''** (३।७।२६) इति प्रतिषेधे वचनम् । पदशब्दोऽत्रावगम्यते, स च षष्ठ्यन्तेन भाव्यते इत्याह - परस्मैपदस्येति। अधिजिगमिष त्वम् इति अधिपूर्वः **'इक स्मरणे'** (२।१२), 'इष्वदिकोऽपि' इति गमिरादेशः। **केचिद्** इत्यादि। ''से गमः'' इत्येकं सूत्रम्, ''परस्मैपदे'' इति द्वितीयम् । भावे सप्तमीयमात्मनेपदे न भवतीत्येकयोगो **वाक्यकारस्य दर्शनम्।** इदं तु **भाष्यकार**सम्मतम् । यथोक्तम् सिद्धं तु गमेरात्मनेपदेन समानपदस्येट्प्रतिषेधादिति। अनिङ्गम इति। इङो गमिर्य इङः स्थाने विहितस्तस्य प्रतिषेधोऽयम्, तेनान्यस्य गमेः कृतीडागम इति।।७८८।

### [वि० प०]

से गमः। आदिलोप इत्यादिना षष्ठ्या सह पदशब्दस्य लोप इत्याह-परस्मैपदस्येति। कः पुनः परस्मैपदविषयो गमिर्यस्य भावकर्मणी नार्थौ यश्च **''समो गमृच्छि०''** (३।२।४२-२०) इत्यादेरविषय इङादेशश्च न भवति, स परस्मैपदसम्बन्धी गमिः। तेनान्तरेणापि परस्मैपदं गमेरिडागमो भवति, तस्य निमित्तत्वेनानभिधानात् । गमेरनन्तरः सार्वधातुके सकारो नान्तानां व्यवहितत्वात् । अतः प्रकृतमपि सार्वधातुकं न वर्तते इत्यसार्वधातुके भवति। अधिजिगमिष त्वम् इति अधिपूर्वः **'इक् स्मरणे'** (२।१२), सन्, इण्वदिकोऽपीति गमिरादेशः **''हेरकारादहन्तेः''** (३।४।३३) इति हिलोपः। परस्मैपदस्येत्यादि। अधिपूर्व इङः ''सनीणिङोर्गमिः'' (३।४।८६) इति गमिः, ''हनिङ्गमोरुपधायाः'' (३।८।१३) इति दीर्घः। तथा सम्पूर्वस्य गम्लृधातोः ''समो गमृच्छि०'' (३।२।४२-२०) इत्यादिना

आशीरात्मनेपदम् -सीष्ट। **केचिदि**त्यादि। "से गमः" इत्येकं सूत्रम्, "परस्मै" इत्यपरम्। तेन सम्पूर्वस्य गमेरधीङादेशस्य चात्मनेपदसम्बन्धिनोऽपीति कृतीडागमः सिद्धः। "अनिङ्गमः" इति इङः स्थाने यो गमिस्तस्य कृति नेडिति।।७८८।

## [समीक्षा]

'गमिष्यति, जिगमिषति, जिगमिषा' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों व्याकरणों में इडागम किया गया है। पाणिनि का सूत्र है - "गमेरिट् परस्मैपदेषु" (अ० ७।२।५८)। कुछ आचार्य ("गमेरिट्" तथा "परस्मै"- पाणिनि के अनुसार) "से गमः" एवं "परस्मै" ये दो सूत्र मानकर आत्मनेपद में इड्विधान को साधु मानते हैं। "यमिरमिनमिगमेर्मात्" (३।७।२६) से 'गम्' धातु में इट् का प्रतिषेध होने से प्रकृत सूत्र इडागमार्थ बनाया गया है।

## [विशेष वचन]

१. केचिद् योगं विभज्यात्मनेपदेऽपीटमिच्छन्ति (दु० वृ०)।

२. अनिङ्गमः कृतीत्येके, तदा अधिजिगांसुरिति (दु० वृ०)।

३. "यमिरमिनमिगमेर्मात्" इति प्रतिषेधे वचनम् (दु० टी०)।

४. "से गमः" इत्येकं सूत्रम् "परस्मैपदे" इति द्वितीयम् (दु० टी०; वि० प०)।

५. "अनिङ्गमः" इति इङः स्थाने यो गमिस्तस्य कृति नेडिति (वि० प०)।

## [रूपसिद्धि]

१. **गमिष्यति।** गम्+ इट् + स्यति। 'गम्ल्ृ गतौ' (१।२७९) धातु से भविष्यन्तीसंज्ञक परस्मैपद-प्र० पु०- ए० व० 'स्यति' प्रत्यय, प्रकृतसूत्र से इडागम तथा "निमित्तात् प्रत्ययविकारागमस्थः सः षत्वम्" (३।८।२६) से सकार को षकारादेश।

२. **जिगमिषति।** गम् + इट् + सन् + ति। गन्तुमिच्छति। 'गम्ल्ृ गतौ' (१।२७९) धातु से इच्छार्थ में सन् , प्रकृत सूत्र से इडागम, द्विर्वचन, अभ्याससंज्ञा, म् - लोप, अकार को इकार, गकार को जकार, सकार को षकार, "ते धातवः" (३।२।१६) से 'जिगमिष' की धातुसंज्ञा, वर्तमानासंज्ञक 'ति' प्रत्यय, अन् - विकरण तथा अकारलोप।

३. **अधिजिगमिष त्वम्।** अधि+ इक् + गम् + हि अध्येतुमिच्छ। 'अधि' उपसर्गपूर्वक 'इक स्मरणे' (२।१२) धातु से इच्छार्थक 'सन् ' प्रत्यय, इडागम, 'इण्वदिकोऽपि' इस न्यायवचन के अनुसार "सनीणिङोर्गमिः" (३।४।८६) से 'इक' को 'गम् ' आदेश, द्विर्वचनादि तथा "हेरकारादहन्तेः" (३।४।३३) से 'हि' प्रत्यय का लोप।

४. **जिगमिषा।** गम् + सन् + आ + सि। गन्तुमिच्छा। 'गम्ल्ृ गतौ' (१।२७९) धातु से सन् प्रत्यय, इडागम, द्विर्वचनादि, "शंसिप्रत्ययादः" (४।६।८०) से 'अ' प्रत्यय "अकारे लोपम्" (२।१।१७) से पूर्ववर्ती अकार का लोप, स्त्रीलिङ्ग में "स्त्रियामादा" (२।४।४९) से 'आ' प्रत्यय, समानदीर्घ - आकारलोप, लिङ्गसंज्ञा, सि-प्रत्यय तथा "ह्रस्वनदीश्रद्धाभ्यः सिर्लोपम्" (२।१।७१) से उसका लोप।

५. **जिगमिषुः**। गम् + इट् + सन् + उ + सि। 'गम्ल गतौ' (१।२७९) से सन् प्रत्यय, इडागम, द्विर्वचनादि, "सनन्ताशंसिभिक्षामुः" (४।४।५१) से 'उ' प्रत्यय, "अस्य च लोपः" (३।६।४९) से अकार लोप, लिङ्गसंज्ञा, 'सि' प्रत्यय तथा "रसकारयोर्विसृष्टः" (३।८।२) से स् को विसर्गादेश।

६. **जिगमिषितव्यम्**। गम् + इट् + सन् + इट् + तव्य + सि। 'गम्ल गतौ' (१।२७९) धातु से सन् प्रत्यय, इडागम, द्विर्वचनादि, धातु संज्ञा, 'तव्य' प्रत्यय, इडागम, लिङ्गसंज्ञा, 'सि' प्रत्यय, नपुंसकलिङ्ग में 'मु' आगम तथा सि-प्रत्यय का लोप॥७८८।

## ७८९. हनृदन्तात् स्ये [३।७।७]

### [सूत्रार्थ]

'स्य' के परे रहते 'हन्' तथा ऋकारान्त धातु से उत्तर तथा प्रत्यय के आदि में इडागम होता है॥७८९।

### [दु० वृ०]

हन्तेर्ऋदन्ताच्च धातोः स्ये परे आदिरिडागमो भवति। हनिष्यति, हनिष्यमाणः। करिष्यति, करिष्यमाणः। स्मरिष्यति, स्मरिष्यमाणः, अस्मरिष्यत्॥७८९।

### [दु० टी०]

हनृ०। ऋदन्तो यस्येति विग्रहः। अन्तग्रहणं **व्याप्त्यर्थम्**, तेन स्वरतिसूतीत्यादिना परेणापि स्वरतेः से विकल्पो न भवति, यदि पुनस्तत्र **व्यवस्थितविभाषा**श्रीयते, तदान्त-ग्रहणमिह **सुखप्रतिपत्त्यर्थमेव**। तकारोऽत्र **सुखनिर्देशार्थ** एव॥७८९।

### [वि० प०]

हनृ०। स्वरतिसूतीत्यादिना परत्वात् स्वरतेर्विकल्पोऽपि न भवति। इह ऋदन्तादित्य-स्यान्तग्रहणस्य **व्याप्त्यर्थत्वात्**। अन्यथा **'येन विधिस्तदन्तस्य'** (का० परि० ३) इति सिद्धमिति भावः॥७८९।

### [समीक्षा]

'करिष्यति, हरिष्यति, हनिष्यति' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों व्याकरणों में इडागम का विधान किया गया है। पाणिनि का सूत्र है- "ऋद्धनोः स्ये" (अ० ७।२।७०)। सूत्र में 'अन्त' शब्द का उपादान व्याप्त्यर्थ तथा तपरनिर्देश सुखप्रत्तिपत्त्यर्थ किया गया है।

### [विशेष वचन]

१. अन्तग्रहणं व्याप्त्यर्थम् (दु० टी०)।

२. अन्तग्रहणमिह सुखप्रतिपत्त्यर्थमेव (दु० टी०)।

३. तकारोऽत्र सुखनिर्देशार्थ एव (दु० टी०)।

## [रूपसिद्धि]

१. **हनिष्यति।** हन् + इट्+ स्यति । 'हन हिंसागत्योः' (२।४) धातु से भविष्यन्तीसंज्ञक परस्मैपद-प्र० पु० - ए० व० 'स्यति' प्रत्यय, प्रकृत सूत्र से इडागम तथा "निमित्तात् प्रत्ययविकारागमस्थः सः षत्वम्" (३।८।२६) से सकार को षकारादेश ।

२. **हनिष्यमाणः।** हन् + इट् + स्य + आनश् + सि। 'हन् हिंसागत्योः' (२।४) से भविष्यत् अर्थ में "शन्त्रानौ स्यसंहितौ शेषे च" (४।४।७२) से 'स्य-आनश्'प्रत्यय, 'श्' अनुबन्ध का प्रयोगाभाव, प्रकृत सूत्र से इडागम, "आन्मोऽन्त आने" (४।४।७) से 'आनपूर्व' 'म्' आगम् "निमित्तात् प्रत्ययविकारागमस्थः सः षत्वम्" (३।८।२६) से सकार को षकार "रषृवर्णेभ्यो नो णमनन्त्यः स्वरहयवकवर्गपवर्गान्तरोऽपि" (२।४।४८) से नकार को णकार, "धातुविभक्तिवर्जमर्थवल्लिङ्गम्" (२।१।१) से 'करिष्यमाण' की लिङ्गसंज्ञा, प्रथमाविभक्ति- ए० व० 'सि' प्रत्यय तथा "रेफसोर्विसर्जनीयः" (२।३।६३) से सकार को विसर्गादेश।

३. **करिष्यति।** कृ+इट् + स्यति। 'डु कृञ् करणे' (७।७) से भविष्यन्तीसंज्ञक परस्मैपद- प्र० पु०-ए० व० 'स्यति' प्रत्यय, इडागम तथा षकारादेश।

४. **करिष्यमाणः।** कृ + इट् + स्य + आनश् + सि । 'डु कृञ् करणे' (७।७) धातु से भविष्यत् अर्थ में "शन्त्रानौ स्यसंहितौ शेषे च" (४।४।७२) से 'स्य-आनश्' प्रत्यय तथा शेष प्रक्रिया पूर्ववत् ।

५. **स्मरिष्यति।** स्मृ + इट् + स्यति। 'स्मृ चिन्तायाम्, स्मृ आध्याने' (१।२७८,५२१) धातु से भविष्यन्ती संज्ञक 'स्यति' प्रत्यय तथा शेष प्रक्रिया पूर्ववत् ।

६. **स्मरिष्यमाणः।** स्मृ + इट् + स्य + आनश् + सि । 'स्मृ चिन्तायाम् ,स्मृ आध्याने' (१।२७८, ५२१) से भविष्यत् अर्थ में 'स्य-आनश्' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत् ।

७. **अस्मरिष्यत्।** अट् + स्मृ + इट् + स्यत् । 'स्मृ' धातु से क्रियातिपत्तिसंज्ञक परस्मैपद-प्र० पु०- ए० व० 'स्यत्' प्रत्यय, "अड् धात्वादिह्यस्तन्यद्यतनीक्रियातिपत्तिषु' (३।८।१६) से धातुपूर्व अडागम, प्रकृत सूत्र से इडागम, "नाम्यन्तयोर्धातुविकरणयोर्गुणः" (३।५।१) से 'ऋ' को गुण तथा सकार को षकारादेश।।७८९।

## ७९०. अन्जेः सिचि [३।७।८]

## [सूत्रार्थ]

'सिच्' प्रत्यय के परे रहते 'अन्ज्' धातु से उत्तर तथा प्रत्यय से पूर्व में इडागम होता है।।७९०।

## [दु० वृ०]

अन्जेः सिच्यादिरिडागमो भवति। आञ्जीत्, आञ्जिष्टाम् । ऊदनुबन्धत्वाद् विकल्पे प्राप्ते **नित्यार्थं वचनम्**।।७९०।

**[वि० प०]**

अन्जे:। आञ्जीदिति। **"अवर्णस्याकार:"** (३।८।१८) इत्यात्त्वम्। ऊदनुबन्धत्वादिति स्वरतीत्यादिना॥७९०।

**[समीक्षा]**

'आञ्जीत्' आञ्जिष्टाम्, आञ्जिषु:' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों व्याकरणों में इडागम किया गया है। पाणिनि का सूत्र है- "अञ्जे: सिचि" (अ० ७।२।७१)। 'अञ्जू' धातु दीर्घ ऊकारान्त है, अत: "स्वरतिसूतिसूयत्यूदनुबन्धात्" (४।६।८३) से वैकल्पिक इडागम प्राप्त था। वह न हो, अर्थात् नित्य इडागम के लिए यह सूत्र बनाया गया है।

**[विशेष वचन]**

१. ऊदनुबन्धत्वाद् विकल्पे प्राप्ते नित्यार्थं वचनम् (दु० वृ०; वि० प०)।

**[रूपसिद्धि]**

१. **आञ्जीत्।** अन्ज् + अद्यतनी-दि। 'अन्जू व्यक्तिम्रक्षणगतिषु' (६।१७) धातु से अद्यतनीविभक्तिसंज्ञक परस्मैपद- प्र० पु०- ए० व० 'दि' प्रत्यय, "अवर्णस्याकार:" (३।८।१८) से धात्वादि अकार को आकार "सिजद्यतन्याम्" (३।२।२४) से 'सिच्' प्रत्यय, प्रकृत सूत्र से इडागम, "सिच:" (३।६।९०) से ईडागम "इटश्चेटि" (३।६।५३) से सिच् का लोप, 'इ-ई' को समानलक्षण दीर्घ, "मनोरनुस्वारो धुटि" (२।४।४४) से नकार को अनुस्वार तथा "वर्गे वर्गान्त:" (२।४।४५) से अनुस्वार को ञकार तथा "पदान्ते धुटां प्रथम:" (३।८।१) से दकार को तकारादेश।

२. **आञ्जिष्टाम्।** अन्ज् + अद्यतनी-ताम्। 'अन्जू व्यक्तिम्रक्षणगतिषु' (६।१७) धातु से अद्यतनीविभक्तिसंज्ञक 'ताम्' प्रत्यय तथा अन्य प्रक्रिया प्राय: पूर्ववत्॥७९०।

## ७९१. स्तुसुधूञ्भ्य: परस्मै [३।७।९]

**[सूत्रार्थ]**

परस्मैपद में 'सिच्' प्रत्यय के परे रहते 'स्तु-सु-धूञ्' धातुओं से उत्तरवर्ती तथा प्रत्यय के आदि में इडागम होता है॥७९१।

**[दु० वृ०]**

एभ्य: परस्मैपदे सिच्यादिरिडागमो भवति। प्रास्तावीत्, प्रासावीत्, प्राधावीत्। परस्मै इति किम्? प्रास्तोष्ट प्रासोष्ट, प्राधोष्ट। धूञ् कम्पनेऽपि 'अधावीत्'॥७९१।

**[दु० टी०]**

स्तुसु०। **'ष्टुञ् स्तुतौ, षुञ् अभिषवे, धूञ् कम्पने'** (२।६५; ४।१; ८।१३) **"उतोऽयुरुनु०"** (३।७।१५) इति प्रतिषेधे वचनम्'। धूञित्यादि। क्रैयादिकोऽयं दीर्घान्त:, आत्मनेपदे तु धुञा धूञा च रूपद्वयम्-अधोष्ट, अधविष्ट। **योऽपि** स्वरतिसूतीत्यादौ धूञं पठित्वा **नित्यार्थमिह** धूञमाचष्टे, तस्यापि धूञ: अधौषीदिति न भवितव्यम्, वचनात्। **केषांचिद्** अधौषीदिति **मतं** चिन्त्यम्॥७९१।

## [वि० प०]

स्तुसु०। **कश्चित्** स्वरतिसूतीत्यादौ धूञः पठितत्वात् पुनरिह नित्यार्थं धूञः पाठमाचष्टे। **शर्ववर्मणा** धूञः पाठस्तत्रानादृत एव, तेनास्मादपि नित्यमिडागम इत्याह- धूञित्यादि। क्रैयादिकोऽयं दीर्घान्तः। न च परस्यापि मते सौवादिकेन धुञा अधौषीदिति भवितव्यम्, इह नित्यार्थपाठस्यानर्थक्यप्रसङ्गादिति।।७९१।

## [समीक्षा]

'प्रास्तावीत्, प्रासावीत्, प्राधावीत्' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों व्याकरणों में इडागम किया गया है। पाणिनि का सूत्र है - "स्तुसुधूञ्भ्यः परस्मैपदेषु" (अ० ७।२।७२)। "उतोऽयुरुनुस्नुक्षुक्ष्णुवः" (३।७।१५) से निषेध प्राप्त होने पर प्रकृत सूत्र द्वारा नित्य इडागम का विधान किया गया है। पञ्जिकाकार त्रिलोचनदास के अनुसार आचार्य शर्ववर्मा 'धूञ्' धातु का पाठ उक्त निषेधक सूत्र में नहीं करते, अतः उनके मत में तो प्रकृत सूत्र नित्यार्थ ही है।

## [विशेष वचन]

१. "उतोऽयुरुनुस्नु०" इति प्रतिषेधे वचनम् (दु० टी०)।

२. आत्मनेपदे तु धुञा धूञा च रूपद्वयम्-अधोष्ट अधविष्ट (दु० टी०)।

३. केषांचिद् अधौषीदिति मतं चिन्त्यम् (दु० टी०)।

४. शर्ववर्मणा धूञः पाठस्तत्रानादृत एव, तेनास्मादपि नित्यमिडागमः (वि० प०)।

## [रूपसिद्धि]

१. **प्रास्तावीत्।** प्र + अट् + स्तु + दि। 'प्र' उपसर्गपूर्वक 'ष्टुञ् स्तुतौ' (२।६५) धातु से अद्यतनीसंज्ञक 'दि' प्रत्यय, "अड् धात्वादिर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु" (३।८।१६) से धातुपूर्व अडागम, सिच् प्रत्यय, प्रकृत सूत्र से इडागम, "सिचि परस्मै स्वरान्तानाम्" (३।६।६) से धातुघटित उकार को वृद्धि, "औ आव्" (१।२।१५) से 'औ' को 'आव्' आदेश, "सिचः" (३।६।९०) से ईडागम, "इटश्चेटि" (३।६।५३) से सिच्प्रत्यय का लोप, समानदीर्घ तथा दकार को तकारादेश।

२. **प्रासावीत्।** प्र+ अट् + सु + दि। 'प्र' उपसर्गपूर्वक 'षु अभिषवे' (४।१) धातु से अद्यतनीसंज्ञक 'दि' प्रत्यय तथा शेष प्रक्रिया पूर्ववत् ।

३. **प्राधावीत्।** प्र+ अट् + धू + दि। 'प्र' उपसर्गपूर्वक 'धूञ् कम्पने' (८।१३) धातु से अद्यतनीसंज्ञक 'दि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत् ।।७९१।

# ७९२. यमिरमिनम्यादन्तानां सिरन्तश्च [३।७।१०]

## [सूत्रार्थ]

परस्मैपद में 'सिच्' प्रत्यय के परे रहते 'यम्-रम् - नम्' तथा आकारान्त धातुओं से उत्तर इडागम तथा धातुओं के अन्त में सकार (आगम) होता है।।७९२।

## [दु० वृ०]

एषां परस्मैपदे सिच्यादिरिडागमो भवति सिश्चान्तः। अयंसीत्, अयंसिष्टाम्। व्यरंसीत्, व्यरंसिष्टाम्। अनंसीत्, अनंसिष्टाम्। अयासीत्, अयसिष्टाम्। अम्लासीत्, अम्लासिष्टाम् । अदरिद्रासीत्, अदरिद्रासिष्टाम्? अन्तग्रहणाद् दरिद्रातेरालोपो न स्यात्। कथम् अदरिद्रीत्, अदरिद्रिष्टाम्? आगमस्यानित्यत्वाद् विभाषैव।।७९२।

## [दु० टी०]

यमि०। अयंसीदित्यादि। एकवचनमप्युदाहृतम्, सेट्त्वाद् अस्य च दीर्घो मा भूदिति । न च वक्तव्यम्, इटोऽभावे सिरागमो न भवति, **"ह्यन्तक्षण०"** (अ० ७।२।५) इति प्रतिषेधादिह न दीर्घ इति। अत्रापि यस्मादनिटाम् इति सम्बन्धो यथा 'अधाक्षीत्' इति। अदरिद्रासीदित्येकवचनमपि प्रयोजयति, **मतान्तरेणापि "अनिडेकस्वरादातः"** (३।७।१३) इति प्रतिषेधदिडस्ति। परस्मा इति किम्? अयंस्त, अरंस्त ।।७९२।

## [वि० ०प०]

यमिरमि०। व्यरंसीदिति। **"व्याङ्परिभ्यो रमः"** (अ० १।३।८३) इति वचनात् परस्मैपदम् एषु सेट्कत्वादस्य च दीर्घो न भवति। अन्तग्रहणमागमार्थमित्याह- अन्तेत्यादि। ननु तद्ग्रहणेन गृहीतस्य सकारस्यैवान्तस्य कथं लोपो न भवति। नहि **"दरिद्रातेरसार्वधातुके"** (३।६।३४) इत्यत्र **विशेषो**ऽस्ति, येनाकारस्यैवेति। न च सकारकरणस्य व्यर्थत्वादिति परिहारो युज्यते, अन्यत्र चरितार्थत्वात् । तदयुक्तम्, वर्णान्तस्य विधित्वाद् अन्यत्राकारस्यैव लोपदर्शनात्। ततो दृष्टपरिकल्पनावशात् सर्वत्र स एव स्थानी समूहनीयः, स चेह नान्त इति न दोषः।।७९२।

## [समीक्षा]

'अयंसीत्, व्यरंसीत्, अयासीत्' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों व्याकरणों में इडागम तथा सकारागम का विधान किया गया है। पाणिनि का सूत्र है- "यमरमनमातां सक् च" (अ० ७।२।७३)। पाणिनीय 'सक्' आगम कित् है और कित् आगम "आद्यन्तौ टकितौ" (अ० १।१।४६) परिभाषा के नियमानुसार धातुओं के अन्त में प्रवृत्त होता है । कातन्त्रकार ने प्रकृत सूत्र में ही उसका स्पष्ट निर्देश कर दिया है।

## [विशेष वचन]

१. अन्तग्रहणाद् दरिद्रातेरालोपो न स्यात् (दु० वृ०)।
२. आगमस्यानित्यत्वाद् विभाषैव (दु० वृ०)।
३. मतान्तरेणापि अनिडेकस्वरादातः इति प्रतिषेधादिडस्ति (दु० टी०)।
४. अन्तग्रहणमागमार्थ (वि० प०)।

## [रूपसिद्धि]

१. **अयंसीत्।** अट्+यम्+स्+इट्+दि। 'यम उपरमे' (१।१५८) धातु से अद्यतनी-संज्ञक परस्मैपद प्र० पु०-ए० व० 'दि' प्रत्यय, अडागम, सिच् प्रत्यय,-प्रकृत सूत्र से

इडागम, धातु के अन्त में सकारागम, ईडागम, सिच् का लोप, म् को अनुस्वार तथा दकार को तकारादेश।

२. **अयंसिष्टाम्।** अट्+यम्+स्+इट्+सिच्+ताम् । 'यम उपरमे' (१।१५८) धातु से अद्यतनीसंज्ञक 'ताम्' प्रत्यय, अडागम, सिच् प्रत्यय, इडागम, धातु के अन्त में सकारागम, सकार को षकार, तकार को टकार तथा मकार को अनुस्वारादेश ।

३. **व्यरंसीत्** । वि + अट् + रम् + इट् + सिच् + ईट् + दि । 'वि' उपसर्गपूर्वक 'रमु क्रीडायाम्' (१।५६१) धातु से अद्यतनीसंज्ञक 'दि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत् ।

४. **व्यरंसिष्टाम्** । वि + अट् + रम् + सिच् + ताम् । 'वि' उपसर्गपूर्वक 'रमु क्रीडायाम्' (१।५६१) धातु से अद्यतनीसंज्ञक 'ताम्' प्रत्यय तथा शेष प्रक्रिया पूर्ववत् ।

५. **अनंसीत्।** अट् + नम् + सिच् + दि। 'णम प्रह्वत्वे शब्दे च' (१।१५९) धातु से अद्यतनीसंज्ञक 'दि' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत् ।

६. **अनंसिष्टाम्।** अट् + नम् + इट् + सिच् + ताम् । 'णम् प्रह्वत्वे शब्दे च' (१।१५९) धातु से अद्यतनीसंज्ञक 'ताम्' प्रत्यय तथा शेष प्रक्रिया पूर्ववत् ।

७. **अयासीत्।** अट् + या + स् + इट् + सिच् + ईट् + दि। 'या प्रापणे' (२।१६) धातु से अद्यतनीविभक्तिसंज्ञक 'दि' प्रत्यय, अडागम, सिच्, प्रकृत सूत्र से इडागम-धातु के अन्त में सकारागम, ईडागम, 'सिच्' प्रत्यय का लोप, समान दीर्घ तथा दकार को तकारादेश।

८. **अयासिष्टाम्।** अट् + या + सिच् + ताम् । ''या प्रापणे'' (२।१६) से अद्यतनीसंज्ञक 'ताम्' प्रत्यय तथा शेष प्रक्रिया पूर्ववत् ।

९. **अम्लासीत्।** अट् + म्ला + सिच् + दि। 'म्लै गात्रविनामे' (१।२५२) धातु से अद्यतनीसंज्ञक 'दि' प्रत्यय तथा शेष प्रक्रिया पूर्ववत् ।

१०. **अम्लासिष्टाम्।** अट् + म्ला + सिच् + ताम् । 'म्लै गात्रविनामे' (१।२५२) धातु से अद्यतनीसंज्ञक 'ताम्' प्रत्यय तथा शेष प्रक्रिया पूर्ववत् ।

११. **अदरिद्रासीत्।** अट् + दरिद्रा + सिच् + दि। 'दरिद्रा दुर्गतौ' (२।३७) धातु से अद्यतनीसंज्ञक 'दि' प्रत्यय तथा शेष प्रक्रिया पूर्ववत् ।

१२. **अदरिद्रासिष्टाम्।** अट् + दरिद्रा + सिच् + ताम् । 'दरिद्रा दुर्गतौ' (२।३७) धातु से अद्यतनीसंज्ञक 'ताम्' प्रत्यय तथा शेष प्रक्रिया पूर्ववत् ॥७९२।

## ७९३. स्मिङ्पूङ्रञ्जशूकृगृदृधृप्रच्छां सनि [३।७।११]

### [सूत्रार्थ]

'सन्' प्रत्यय के परे रहते 'स्मिङ्, पूङ्, ऋ, अञ्ज्, अशू, कृ, गृ, दृ, धृ, प्रच्छ्' धातुओं से उत्तर में इडागम होता है॥७९३।

## [दु० वृ०]

एषां सनि परे इडागमो भवत्यादिः। स्मिङ्-सिस्मयिषते। पूङ्-पिपविषते । पुत्रस्तु पुपूषति। ऋ-अरिरिषति। अन्जू-अञ्जिजिषति । अशू -अशिशिषते । कृ-चिकरिषति । गृ-जिगरिषति । दृङ् आदरे-दिदरिषते । धृङ् अवस्थाने-दिधरिषते । प्रच्छ ज्ञीप्सायाम्-पिपृच्छिषति। प्रच्छिसहचरिताः कृ-गृ-धृ-तौदादिकाः। कृञ् हिंसायाम्-चिकरिषति, चिकीर्षति । गृ शब्दे-जिगरिषति, जिगीर्षति । दृ विदारणे-दिदरिषति, दिदीर्षति । धृञ् धारणे-दिधीर्षति ।

कृग्रोर्ज्ञापकस्य सविकल्पकत्वादन्येषामृदन्ताना वा स्यादेव। कथं प्रावुवूर्षते, प्राविवरिषते, संवुवूर्षति, संविवरिषति ? वृङवृञोर्नञा निर्दिष्टस्यानित्यत्वात् ।

**ऋदृवृङ्वृञां सनीड् वा स्यादात्मने च सिजाशिषोः।**
**संयोगादेर्ऋतो वाच्यः सुडसिद्धो बहिर्भवः।।**

तॄ - तितरिषति, तितीर्षति। अतरिष्ट, अतीर्ष्ट। तरिषीष्ट, तीर्षीष्ट। वृङ् वृञ् वा - अवरिष्ट, अवृत। वरिषीष्ट, वृषीष्ट । ध्वृ-अध्वरिष्ट, अध्वृत । ध्वरिषीष्ट, ध्वृषीष्ट । समस्कृत, संस्कृषीष्ट इति, असिद्धं बहिरङ्मन्तरङ्गे ।।७९३।

## [दु० टी०]

स्मिङ्०। स्मिङो ङकारः **स्पष्टार्थ** एव, **केचिद्** न पठन्ति। **'ऋ प्रापणे, ऋ सृ गतौ'** (१।२७५; २।७४), द्वयोरपि ग्रहणम् । 'अशू' इत्यूदनुबन्धः किमर्थः, **'अंश भोजने'** (८।४३) इत्यस्माद् इडस्त्येव? सत्यम् । **'रन्ज रागे वश कान्तौ'** (३।१२१; २।३) इत्यपि प्रतिपद्येत । स्मिङ्-पूङ्-ऋणां प्रतिषेधे वचनम् । अन्जेरशोश्चोदनुबन्धत्वाद् विकल्पे प्राप्ते नित्यार्थमिति। प्रच्छीत्यादि । कृग्रोः क्रैयादिकयोः धृञश्च भौवादिकस्य न भवतीत्यर्थः। दृधातुर्न व्यभिचरत्येव। ऋकारान्तत्वात् प्रतिषेधे कृग्रोर्ग्रहणं युक्तम् । कृग्रोर्ग्रहणं किमर्थमित्याह-कृग्रोर्ग्रहणं ज्ञापयति सनि ऋकारान्तानामिड् नास्तीति। अन्यथानयोरिट् सिद्ध एव, सविकल्पान्यपि ज्ञापकानि भवन्ति इति विभाषा साधितेत्यर्थः। कृग्रोरेव सनि, सन्येव वा कृग्रोरिति नियमो न भवति, आगमात्। जिहीर्षतीति। सनि दीर्घत्वे न भवति प्रतिपदोक्तस्य व्यावृत्तिबलात् । कथमित्यादि। नञा निर्दिष्टमनित्यम् । तच्च लक्ष्यानुरोधादिति **विभाषा** सिद्धा। ऋकारान्तस्य वृञवृङोश्चात्मनेपदे सिजाशिषोर्विभाषा संयोगादेर्ऋकारान्तस्यात्मनेपदे सिजाशिषोर्विभाषा वाच्या, व्याख्येया इत्यर्थः। एतच्च आगमशासनमनित्यमिति प्रतिपदोक्तग्रहणाद् वा सुरागमे कृते संयोगादिर्नोच्यते इति समुच्चयेन श्लोकमाह-'ऋदृवृञ्वृङामित्' इत्यादि।।७९३।

## [वि० प०]

स्मिङ् । पिपविषते इति। **''उवर्णस्य जान्तस्था०''** (३।३।२७) इत्यादिनाभ्यासे उकारस्येत्त्वम्, पूजस्त्वित्यादि। **''उवर्णान्ताच्च''** (३।७।३२) इतीटः प्रतिषेध एवेत्यर्थः। प्रच्छीत्यादि। तेन कृग्रोर्वक्ष्यमाणन्यायेन विकल्प एवेत्यर्थः। धृञस्तु भौवादिकस्य **''ऋतोऽवृङ्वृञः''** (३।७।१६) इतीट्प्रतिषेध एवेति । अथ कृग्रोरुपादानं किमर्थम्, **प्रतिषेधाभावाद्** अनयोरिट् सिद्ध एवेत्याह - कृग्रोरित्यादि। कथमित्यादि। अथ किमिहं इट्

प्रतिषेधेन, 'अवृङ्वृञः' इति प्रतिषिद्धत्वान्नित्यमिटा भवितव्यमित्याह-नञित्यादि । तथा आगमशासनमनित्यम् इति न्यायादेषां सिजाशिषोश्चात्मनेपदे विभाषा। संयोगादेर्ऋकारान्तस्य चेत्यर्थः। श्लोकेन सकलं संगृह्याह-ऋदृवृङ्वृञामित्यादि। वाच्यो वक्तव्यः, व्याख्येय इडागम इत्यर्थः। व्याख्यानं च दर्शितम् आगमशासनमनित्यमिति **"सुड् भूषणे सम्पर्युपात्"** (३।७।३८) इति । यदा करोतेः सुड् विधीयते तदा नायं संयोगा-दिरुपसर्गसम्बन्धस्य बहिरङ्गत्वात् तदाश्रितः सुडपि बहिरङ्गोऽन्तरङ्गे इटि कर्तव्येऽसिद्ध इत्याह-सुडसिद्धो बहिर्भवः इति।।७९३।

## [समीक्षा]

'पिपविषते, अरिरिषति, चिकरिषति' आदि शब्दरूपों के सिद्ध्यर्थ दोनों व्याकरणों में इडागम का विधान किया गया है । पाणिनि के दो सूत्र हैं- "स्मिङ्पूङ्रञ्वशां सनि, किरश्च पञ्चभ्यः" (अ० ७।२।७४, ७५)। कातन्त्रकार ने यहाँ एक ही सूत्र में १० धातुओं का पाठ किया है, जबकि पाणिनि ने दो सूत्रों में ५-५ धातुएँ पढ़ी हैं। व्याख्याकारों ने व्याख्यानबल से वैकल्पिक इडागम निर्धारित किया है।

## [विशेष वचन]

१. कृग्रोर्ज्ञापकस्य सविकल्पकत्वादन्येषामृदन्तानां वा स्यादेव (दु० वृ०)।
२. वृङ्वृञोर्नञा निर्दिष्टस्यानित्यत्वात् (दु० वृ०)।
३. स्मिङो ङकारः स्पष्टार्थ एव, केचिन्न पठन्ति (दु० टी०)।
४. अन्जेरशोश्चोदनुबन्धत्वाद् विकल्पे प्राप्ते नित्यार्थमिति (दु० टी०)।
५. कृग्रोर्ग्रहणं ज्ञापयति-सनि ऋकारान्तानामिड् नास्तीति (दु० टी०)।
६. नञा निर्दिष्टमनित्यम्, तच्च लक्ष्यानुरोधादिति विभाषा सिद्धा (दु० टी०)।
७. व्याख्यानं च दर्शितम् आगमशासननित्यमिति (वि० प०)।

## [रूपसिद्धि]

१. **सिस्मयिषते।** स्मि + सन् + ते। स्मेतुमिच्छति। स्मिङ् ईषद्धसने' (१।४५७) धातु से इच्छार्थक 'सन्' प्रत्यय, इडागम, द्विर्वचनादि, "नाम्यन्तयोर्धातुविकरणयोर्गुणः" (३।५।१) से धातुघटित इकार को गुण-एकार, "ए अय्" (१।२।१२) से एकार को अयादेश, "निमित्तात् प्रत्ययविकारागमस्थः सः षत्वम्" (३।८।२६) से सकार को षकार, "ते धातवः" (३।२।१६) से 'सिस्मयिष' की धातुसंज्ञा, वर्तमानासंज्ञक आत्मनेपद 'ते' प्रत्यय, अन् -विकरण तथा अकारलोप।

२. **पिपविषते।** पू + सन् + ते। पवितुमिच्छति। 'पूङ् पवने' (१।४६५) धातु से 'सन्' प्रत्यय, इडागम, द्विर्वचनादि, गुण, अवादेश, सकार को षकार, 'पिपविष' की धातुसंज्ञा, 'ते' प्रत्यय, अन्-विकरण तथा अकार का लोप ।

३. **अरिरिषति।** ऋ + सन् + ति। अर्तुमिच्छति। 'ऋ प्रापणे च' (१।२७५) से सन्, इडागम, गुण, द्विर्वचनादि, सकार को षकार, 'अरिरिष' की धातुसंज्ञा, 'ति' प्रत्यय, अन्विकरण तथा अकारलोप ।

४. **अञ्जिजिषति।** अन्ज् + सन् + ति । 'अन्ज् व्यक्तिम्रक्षणगतिषु' (६।१७) धातु से सन् प्रत्यय, इडागम, द्विर्वचनादि, सकार को षकार, नकार को अनुस्वार "वर्गे वर्गान्तः" (२।४।४५) से अनुस्वार को ञकार, धातुसंज्ञा, 'ति' प्रत्यय' अन्- विकरण तथा अकारलोप।

५. **अशिशिषते।** अश्+सन् + ते। 'अशू व्याप्तौ' (४।२२) धातु से सन् प्रत्यय, इडागम, द्विर्वचनादि तथा विभक्तिकार्य।

६. **चिकरिषति।** कृ + सन् + ति । करितुमिच्छति। 'कृ विक्षेपे' (५।२१) धातु से सन् प्रत्यय, इडागम, द्विर्वचनादि तथा विभक्तिकार्य।

७. **जिगरिषति।** गृ +सन् + ति। 'गृ निगरणे' (५।२२) से सन् प्रत्यय, इडागम, द्विर्वचनादि तथा विभक्तिकार्य ।

८. **दिदरिषते।** दृ+इट्+ सन् + ते। 'दृङ् आदरे' (५।११२) धातु से सन् प्रत्यय, इडागम, द्विर्वचनादि तथा विभक्तिकार्य ।

९. **दिधरिषते।** धृ + इट् + सन् + ते। 'धृङ् अवस्थाने' (५।११३) धातु से सन् प्रत्यय, इडागम, द्विर्वचनादि तथा विभक्तिकार्य।

१०. **पिपृच्छिषति।** प्रच्छ् + इट् + सन् + ति। 'प्रच्छ् ज्ञीप्सायाम्' (५।४९) धातु से सन् प्रत्यय, इडागम, द्विर्वचनादि तथा विभक्ति कार्य।।७९३।

## ७९४. इटो दीर्घो ग्रहेरपरोक्षायाम् [३।७।१२]

### [सूत्रार्थ]

'ग्रह' धातु से परवर्ती इट् को दीर्घ होता है, यदि परोक्षाविभक्ति पर में न हो तो।।७९४।

### [दु० वृ०]

ग्रहेः परस्येटो दीर्घो भवति, न तु परोक्षायाम् । ग्रहीता, ग्रहीष्यति। अग्रहीत् । इट्त्वात् सिचो लोपः स्यात् । अस्य च दीर्घो न स्यात् । कथं ग्राहिता, ग्राहिष्यते? इज्वद् इटोऽश्रुतत्वात् । अपरोक्षायामिति किम्? जगृहिव, जगृहिम।

**ऋदृवृङ्वृञोऽपि वा दीर्घो न परोक्षाशिषोरिटः।**
**न परस्मै सिचि प्रोक्त इति योगविभञ्जनात् ।।**

तॄ-तरिता, तरीता। वृङ्, वृञ् वा-वरिता, वरीता। **वर्जने** तु विशशरिव, विशशरिम। ववरिथ, तरिषीष्ट, वरिवीष्ट, अतारिष्टाम्, अवारिष्टाम् ।।७९४।

### [दु० टी०]

इटः। नन्वागमान्तरमेव दीर्घ ईड् आस्ताम्, किं दीर्घग्रहणेन। अतद्भावादिटः कार्यमीटो न स्यादित्याह- इट्त्वादित्यादि। **"इटश्चेटि"** (३।६।५३) इति लक्षणं प्रवर्तते इत्यर्थः। सेट्त्वादस्य च दीर्घो न भवतीत्यर्थः। तथा अग्रहीध्वम्, अग्रहीढ्वम् । विभाषयेटो धस्य ढत्वम् । तर्हि इटः ईरित्यास्ताम्, स्थानिवदभावादिटः कार्यं भवत्येव?. सत्यम् । दीर्घग्रहणं

**योगविभागार्थमित्याह** -ऋद्वृङ्वृञोऽपीत्यादि । इङ्ग्रहणं न कर्तव्यम्, तत्रैव प्रथमान्तं निर्दिष्टं षष्ठीनिर्देशेन चेहार्थः? सत्यम् । ग्रहेरेव दीर्घ इत्यपि विप्रतिपद्येत। **'श्रुतानुमितयोः श्रौतसम्बन्धो विधिर्बलवान्'** (का० परि० ९२) इति व्यवहितस्य इज्वद् इटो न ग्रहणम् इति भावः। कथं जरीग्रहितेति। **''यस्याननि''** (३।६।४८) इति यलोपे कृते ग्रहेः पर इड् भवत्येव, नैवम् । इङ्निर्देशस्य स्वरूपग्राहकत्वात्। **अपर** आह- अपरोक्षायामिति युक्तं तावद् द्विप्रयोगे (द्विर्वचने) स एवायं ग्रहिरिति **गृह्यशब्दस्य** द्विर्वचने कथं ग्रहिग्रहणेन ग्रहणं स्यात्। **''यस्याननि''** (३।६।४८) इति भेदकेऽपि **निवृत्ते तथाबुद्धेः** समुन्नयाच्च, तदसत्, ग्रहः पर इति स्यात् । अथापरोक्षायामिति प्रतिषेधो जग्रहिथेत्यत्र प्रयोजयति, ग्रहरूपस्य सम्भवात् । कथं तर्हि गृहीतं ग्रहीतिरिति नित्यत्वात् सम्प्रसारणे कृते दीर्घो न स्यात्? सत्यम् , अथलीति सिद्धे अपरोक्षायाम् इति वचनाद् दीर्घ एव प्राक् प्रवर्तते न सम्प्रसारणमिति। **अन्य** आह- विहितविशेषणमिहेति ग्रहेर्यो विहित इट् **तस्य दीर्घ इति चेक्रीयितान्तान्त्र भवति**। ननु चात्र एकस्वरादिति क्रियताम् अपरोक्षायामिति **न विधेयं स्यात्? सत्यम्। प्रतिपत्तिरियं गरीयसीति।** ववरिथेति। **''वृव्येऽदाम्''** नित्यमिट् **थलीति, वृञ इडागमो नित्यं थलि। अदारिष्टाम्** इति। **'दृ विदारणे'** (८।१९)॥७९४।

## [वि० प०]

इटो०। नन्विडिति। आगमान्तरमेवास्ताम्, किमिटो दीर्घ इत्यनेन इत्याह- इट्त्वादिति। इह इटः स्थाने दीर्घस्यापि तद्भावाद् इट्त्वम्, ततः **''इटश्चेटि''** (३।६।५३) इति लक्षणं प्रवर्तते, तथा सेट्त्वाद् अस्य च दीर्घो न स्यादित्यर्थः। कथमित्यादि। **''कृञोऽसुटः''** (३।७।३७) इत्यत्र प्रकरणान्तरविहितस्य इज्वद् इटः इहाश्रुतत्वान्न दीर्घ इत्यर्थः। योगविभङ्गनादिति । इडीडिति कृते सिध्यति यदिह दीर्घग्रहणं तद्योगविभागार्थं ततश्चेय**मिष्टसिद्धि**रिति भावः॥७९४।

## [समीक्षा]

'ग्रहीता, ग्रहीतुम्, ग्रहीतव्यम्' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों व्याकरणों में इडागम का विधान किया गया है। पाणिनि का सूत्र है - "ग्रहोऽलिटि दीर्घः" (अ० ७।२।३७)। ज्ञातव्य है कि पाणिनि ने 'लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लिङ्, लुङ्, लृङ्' इन दस लकारों द्वारा कालविभाग किया है, परन्तु कातन्त्रकार ने तदर्थ 'वर्तमाना-परोक्षा-श्वस्तनी-अद्यतनी-भविष्यन्ती' आदि लोकप्रसिद्ध संज्ञाओं का प्रयोग किया है। पाणिनीट् 'लिट्' के लिए कातन्त्र में परोक्षा विभक्ति का प्रयोग प्रचलित है, तदनुसार ही सूत्रों में उन शब्दों का प्रयोग किया गया है।

## [विशेष वचन]

१. दीर्घग्रहणं योगविभागार्थम् (दु० टी०; वि० प०)।
२. इङ्निर्देशस्य स्वरूपग्राहकत्वात् (दु० टी०)।
३. प्रतिपत्तिरियं गरीयसीति (दु० टी०)।
४. ततश्चेयमिष्टसिद्धिरिति भावः (वि० प०)।

### [रूपसिद्धि]

१. **ग्रहीता।** ग्रह् + इट् + ता। 'ग्रह उपादने' (८।१४) धातु से श्वस्तनीविभक्तिसंज्ञक परस्मैपद-प्र० पु०-ए० व० 'ता' प्रत्यय, "इडागमोऽसार्वधातुकस्यादिर्व्यञ्जनादेरयकारादेः" (३।७।१) से इडागम तथा प्रकृत सूत्र से इट् को दीर्घ।

२. **ग्रहीष्यति।** ग्रह् + इट् + स्यति। 'ग्रह उपादाने' (८।१४) धातु से भविष्यन्ती संज्ञक 'स्यति' प्रत्यय, इडागम, प्रकृत सूत्र से दीर्घ तथा सकार को षकार।

३. **अग्रहीत्।** अट् + ग्रह् + अद्यतनी-दि। 'ग्रह उपादाने' (८।१४) धातु से अद्यतनीसंज्ञक 'दि' प्रत्यय, अडागम, इडागम, सिच् प्रत्यय, ईडागम, सिच् लोप तथा दकार को तकारादेश॥७९४।

## ७९५. अनिडेकस्वरादातः [३।७।१३]

### [सूत्रार्थ]

एकस्वरविशिष्ट आकारान्त धातु से उत्तर में असार्वधातुक प्रत्यय को निमित्त मानकर होने वाला इडागम नहीं होता है॥७९५।

### [दु० वृ०]

एकस्वराद् आकारान्ताद् धातोः परमसार्वधातुकमनिड् भवति। दाता, दास्यति, दातव्यम् । एकस्वरादिति किम्? दरिद्रिता।

**अनात्मनेपदस्थात्तु वृतादेरिड् न स्ये सनि।**
**श्वस्तन्यां च कृपेर्नैव कृतादेर्वापि सेऽसिचि।।**

वृतू-वर्त्स्यति, विवृत्सति। वृधू-वर्त्स्यति, विवृत्सति। शृधू-शर्त्स्यति, शिशृत्सति । स्यन्दू-स्यन्त्स्यति, सिस्यन्त्सति। कृपू-कल्प्स्यति, चिक्लृप्सति, कल्प्ता, कल्प्तासि कृपेः श्वस्तन्यां वा रुचादित्वम्। कृती-कर्त्स्यति, कर्तिष्यति। एवं चृती हिंसायाम्- चर्त्स्यति, चर्त्तिष्यति । उ छृदिर्-छर्त्स्यति, छर्द्दिष्यति। उ तृदिर्-तर्त्स्यति, तर्द्दिष्यति । नृती-नर्त्स्यति, नर्त्तिष्यति । असिचीति किम्? अकर्त्तीत् ॥७९५।

### [दु० टी०]

अनिट्। न विद्यते इट् यस्येति बहुव्रीहिणा षष्ठ्यन्तस्योक्तत्वादाह- असार्वधातुकमिह प्रथमान्तमभिसम्बध्यते इत्याह- परमसार्वधातुकमिति। अनात्मनेपदस्थादिति। वृतादेः स्यसनोर्विषये उभयपदम्, **यजादेराकृतिगणत्वात्।** वृतादयः पञ्चैवान्ते **वृत्**करणात्। वृतादिभ्यस्त्रिभ्यो नित्यम् इटि प्राप्ते स्यन्दू कृप्वोस्तूदनुबन्धत्वाद् विकल्पे प्राप्ते **प्रतिषेधः।** विवृत्सिता, विवृत्सितुम्, विवृत्युसितव्यम् इत्युदाहरणम् । आत्मनेपदस्याभावोऽनात्मनेपदमिति। अनात्मनेपदस्थादिति किम्? वर्त्तिष्यते। श्वस्तन्यां च कृपेर्नैवेति सकारादौ श्वस्तन्यां चेत्यर्थः। सकारादेर्बाधकः सम्भाव्यते इति चकारः क्रियते। अनात्मनेपदस्थादित्येव । कल्पिष्यते, चिकल्पिषते, कल्पितासे, कल्पिषीष्ट। कृतादेर्वापि सेऽसिचीति सिचं वर्जयित्वेत्यर्थः। **'कृती छेदने, कृती वेष्टने'** (५।१२; ६।१०) द्वयोरपि ग्रहणम्, कृतादयः पञ्च व्यवस्थिताः। अपिशब्दोऽत्र **पादपूरणे**॥७९५।

## [वि० प०]

अनिट्०। अनात्मने इत्यादिः वृतादेरात्मनेपदिनोऽपि यजादेराकृतिगणत्वात् स्यसनोर्विषये उभयपदं ज्ञेयम् । आत्मनेपदस्याभावोऽ**नात्मनेपदम्,** तत्स्थाद् इति । तेन विवृत्सितुम्, विवृत्सितव्यम् इत्यादावपि । 'वृतु, वृधु, शृधु, स्यन्दू कृपू' इति **वृतादिः**। कृपेरधिकार्थमाह-श्वस्तन्यां च कृपेरिति। चकारात् स्ये सनि चेत्यर्थः। अनात्मनेपदस्थादित्येव च-वर्त्तिष्यते, विवर्त्तिष्यते इत्यादि। स्यन्दू-कृप्वोश्च ऊदनुबन्धत्वादात्मनेपदे विकल्प एव। स्यन्त्स्यते, स्यन्दिष्यते, सिस्यन्त्सते, सिस्यन्दिषते, कल्प्स्यते, कल्पिष्यते, चिक्लृप्सते, चिकल्पिषते, कल्प्तासे, कल्पितासे॥७९५।

## [समीक्षा]

'दाता, दास्यति' आदि शब्दरूपों के सिद्ध्यर्थ दोनों व्याकरणों में इडागम का प्रतिषेध किया गया है। पाणिनि का सूत्र है-"एकाच उपदेशेऽनुदात्तात्" (अ० ७।२।१०)। उपदेश में कौन सी धातुएँ अनुदात्त हैं - इसके परिज्ञानार्थ पाणिनीय सम्प्रदाय में ११-१२ अनिट्कारिकाएँ पढ़ी जाती हैं। कातन्त्रकार ने सूत्रों में ही अनिट् धातुओं को दिखाया है। दो प्रकार की धातुएँ बताई गई हैं - स्वरान्त तथा व्यञ्जनान्त धातुओं में ह्रस्व अकारान्त धातुएँ उदात्त होती हैं। फलतः आकारान्त, इवर्णान्त, उवर्णान्त, तथा ऋवर्णान्त धातुएँ अनुदात्त मानी जाती हैं, उनमें यहाँ इडागम का प्रतिषेध किया गया है। पाणिनि के अनुसार इन धातुओं का समावेश 'अनुदात्त' शब्द में हो जाता है, परन्तु कातन्त्रकार ने आकारान्त, इवर्णान्त, उकारान्त तथा ऋकारान्त धातुओं में इडागम के प्रतिषेधार्थ पृथक् सूत्र बनाए हैं।

## [विशेष वचन]

१. वृतादेः स्यसनोर्विषये उभयपदम्, यजादेराकृतिगणत्वात् (दु० टी०; वि० प०)।

२. वृतादयः पञ्चैव, अन्ते वृत्करणात् (दु० टी०)।

३. अपिशब्दोऽत्र पादपूरणे (दु० टी०)।

## [रूपसिद्धि]

१. **दाता।** दा+ता। 'डु दाञ् दाने' (२।८४) धातु से श्वस्तनीविभक्तिसंज्ञक परस्मैपद-प्र० पु०- ए० व० 'ता' प्रत्यय तथा प्रकृत सूत्र से अनिट्।

२. **दास्यति।** दा+स्यति। 'डु दाञ् दाने' (२।८४) धातु से भविष्यन्तीसंज्ञक 'स्यति' प्रत्यय तथा प्रकृत सूत्र से इडागम का प्रतिषेध।

३. **दातव्यम्।** दा+तव्य+सि। 'डु दाञ् दाने' (२।८४) धातु से "तव्यानीयौ" (४।२।९) सूत्र से 'तव्य' प्रत्यय, प्रकृत सूत्र से अनिट्, "धातुविभक्तिवर्जमर्थवल्लिङ्गम्" (२।१।१) से 'दातव्य' की लिङ्गसंज्ञा, प्रथमाविभक्ति-एकवचन में 'सि' प्रत्यय तथा "अकारादसम्बुद्धौ मुश्च" (२।२।७) से मु-आगम-सिलोप॥७९५।

## ७९६. इवर्णादश्विश्रिडीङ्शीङः [३।७।१४]

### [सूत्रार्थ]

'श्वि-श्रि-डी-शी' धातुओं को छोड़कर एकस्वरविशिष्ट इवर्णान्त धातु को इडागम नहीं होता है, असार्वधातुक प्रत्यय के परे रहते ।।७९६।

### [दु० वृ०]

इव०। "न डीश्वीदनुबन्धवेटाम्, न श्र्यवर्णवृताम्" (४।६।९०, ८९) इति। प्रतिषेधादन्यत्रेडिति न सुखावहम्, भिन्नकर्तृकत्वाच्च। 'अश्विश्रिडीङ्शीङः' इति पर्युदासाद् वा। चिरि-अचिरायीत्। जिरि-अजिरायीत्। एवमुत्तरत्रापि।।७९६।

### [वि० प०]

इवर्णा०। एकस्वरादित्यादि। "दीधीवेव्योरिवर्णयकारयोः" (३।६।४१) इत्यन्तलोपः।।७९६।

### [समीक्षा]

द्रष्टव्य समीक्षा-सूत्र सं० ७९५।

### [रूपसिद्धि]

१. **चेता।** चि+ता। 'चिञ् चयने' (४।५) धातु से श्वस्तनीविभक्तिसंज्ञक प्र० पु०-ए० व०' 'ता' प्रत्यय, प्रकृत सूत्र से अनिट् तथा "नाम्यन्तयोर्धातुविकरणयोर्गुणः" (३।५।१) से इकार को गुण-एकार।

२. **चेष्यति।** चि+स्यति। 'चिञ+स्यति। 'चिञ् चयने' (४।५) धातु से भविष्यन्तीसंज्ञक 'स्यति' प्रत्यय, इडागम का प्रतिषेध, गुण तथा "निमित्तात् प्रत्ययविकारागमस्थः सः षत्वम्" (३।८।२६) से सकार को षकारादेश।

३. **नेता।** नी+ ता। 'णीञ् प्रापणे' (१।६००) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय, "णो नः" (३।८।२५) से धातुगत णकार को नकार, प्रकृत सूत्र से अनिट् तथा गुण।

४. **नेष्यति।** नी+स्यति। 'णीञ् प्रापणे' (१।६००) धातु से भविष्यन्तीसंज्ञक 'स्यति' प्रत्यय, अनिट्, गुण तथा सकार को षकारादेश।।७९६।

## ७९७. उतोऽयुरुनुस्तुक्षुक्ष्णुवः [३।७।१५]

### [सूत्रार्थ]

'यु-रु-नु-स्नु-क्षु-क्ष्णु' धातुओं को छोड़कर एकस्वरविशिष्ट उवर्णान्त धातु से असार्वधातुकप्रत्ययनिमित्तक इडागम नहीं होता है।।७९७।

### [दु० वृ०]

उकारान्तादेकस्वराद् युरुनुस्नुक्षुक्ष्णुवर्जितात् परमसार्वधातुकमनिड् भवति। होता, स्तोता ! अयुरुनुस्नुक्षुक्ष्णुव इति किम्? यविता, रविता, नविता, स्नविता, क्षविता, क्ष्णविता। उत इति किम्? लविता। एकस्वरादिति किम्? प्रोर्णविता।।७९७।

**[समीक्षा]**

द्रष्टव्य सूत्र-सं० ७९५।

**[रूपसिद्धि]**

१. **होता।** हु + ता । 'हु दाने' (२।६७) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय, इडागम का प्रतिषेध तथा धातुघटित उकार को गुणादेश ।

२. **स्तोता।** स्तु+ता । 'ष्टुञ् स्तुतौ' (२।६५) से श्वस्तनीसंज्ञक 'ता' प्रत्यय, इडागम का प्रतिषेध तथा गुणादेश।।७९७।

## ७९८. ऋतोऽवृङ्वृञः [३।७।१६]

**[सूत्रार्थ]**

'वृङ्-वृञ्' धातुओं को छोड़कर एकस्वरविशिष्ट ऋकारान्त धातु से उत्तर असार्वधातुकप्रत्ययनिमित्तक इडागम नहीं होता है।।७९८।

**[दु० वृ०]**

ऋदन्तादेकस्वराद् वृङ्वृञ्वर्जितात् परमसार्वधातुकमनिड् भवति । कर्ता, हर्ता। अवृङ्वृञ इति किम्? वृ-वरिता। ऋत इति किम्? कृ-करिता। एकस्वरादिति किम्? जागरिता।।७९८।

**[दु० टी०]**

ऋतो०। वृङ्वृञोरनुबन्धः **सुखप्रतिपत्त्यर्थ** एव । ङीङ्शीङोरिव गुणे कृते पुनरिड् न भवति, प्रकरणेऽस्मिन् विहितविशेषणव्याख्यानात् ।।७९८।

**[समीक्षा]**

द्रष्टव्य सूत्र-सं० ७९८।

**[विशेष वचन]**

१. वृङ्वृञोरनुबन्धः सुखप्रतिपत्त्यर्थ एव (दु० टी०)।

**[रूपसिद्धि]**

१. **कर्ता।** कृ+ता। 'डु कृञ् करणे' (७।७) धातु से श्वस्तनीविभक्तिसंज्ञक परस्मैपद - प्र० पु०- ए० व० 'ता' प्रत्यय, प्रकृत सूत्र से इडागम का प्रतिषेध तथा "नाम्यन्तयोर्धातुविकरणयोर्गुणः" (३।५।१) से धातुघटित ऋकार को गुणादेश-अर्।

२. **हर्ता।** हृ + ता। 'हृञ् हरणे' (१।५९६) धातु से श्वस्तनीसंज्ञक परस्मैपद - प्र० पु० - ए० व० 'ता' प्रत्यय, इडागम का प्रतिषेध तथा गुणादेश।।७९८।

## ७९९. शकेः कात् [३।७।१७]

**[सूत्रार्थ]**

ककारान्त 'शक्' धातु से उत्तर में असार्वधातुकनिमित्तक इडागम नहीं होता है।।७९९।

**[दु० वृ०]**

शकेः कान्तात् परमसार्वधातुकमनिड् भवति। शक्ल्, शक-शक्ता, शक्ष्यति।।७९९।

**[दु० टी०]**

शकेः। 'शक विभाषितो मर्षणे' इत्यस्य दैवादिकस्य न ग्रहणमिति मन्यते, तदसम्मतम् इहाविशेषात् । तथा च 'शकिस्तु कान्तेष्वनिडेक इष्यते' इति नहि शकिः कान्तत्वं व्यभिचरति, कान्ताच्छकेरेवेति **मन्दमतिबोधार्थं** काद्ग्रहणम् । एवं सर्वत्र । एकस्वराद् विहितमिति किम्? शाशकिता ।।७९९।

**[वि० प०]**

शकेः। 'शक्ल्, शक' (४।१५; ३।११८) इति । **अन्यस्तु 'शक मृष क्षमायाम्'** (३।११८) इति दैवादिकस्य ग्रहणं न मन्यते। अतस्तस्य शकितेति मतम् । तदयुक्तम्, इह द्वयोरपि ग्रहणम् अविशेषा**दपरोऽ**प्यविशेषमाह– शकिस्तु कान्तोऽनिडेवेष्यते इति। **शकेः कान्तत्वव्यभिचारो नास्ति,** यत् कादिति विशेषणं तत् **सुखार्थम्**। एवमन्यत्रापि।।७९९।

**[समीक्षा]**

जैसे स्वरान्त धातुओं में इडागम के प्रतिषेधार्थ पाणिनि का एक ही सूत्र है - "एकाच उपदेशेऽनुदात्तात्" (अ० ७।२।१०), उसी प्रकार व्यञ्जनान्त धातुओं में भी इडागम का निषेध सामान्यतः इसी सूत्र से होता है। इसके स्पष्टीकरण के लिए अनिट्कारिकाएँ पढ़ी गई हैं। कातन्त्रकार ने अनिट्कारिकोक्त धातुओं के लिए प्रायः पृथक् सूत्र बनाए हैं। प्रकृत सूत्र के भी विषय में यही जानना चाहिए।

**[विशेष वचन]**

१. दैवादिकस्य न ग्रहणमिति मन्यते, तदसम्मतमिहाविशेषात् (दु० टी०; वि० प०)।

२. नहि शकिः कान्तत्वं व्यभिचरति, कान्ताच्छकेरेवेति मन्दमतिबोधार्थं काद्ग्रहणम् (दु० टी०)।

**[रूपसिद्धि]**

१. **शक्ता।** शक्+ता। 'शक क्षमायाम्, शक्ल् शक्तौ' (३।११८; ४।१५) धातु से श्वस्तनीसंज्ञक परस्मैपद-प्र० पु०-ए० व० 'ता' प्रत्यय तथा प्रकृत सूत्र द्वारा इडागम का प्रतिषेध।

२. **शक्ष्यति।** शक् + स्यति। 'शक क्षमायाम्, शक्ल् शक्तौ' (३।११८; ४।१५) धातु से भविष्यन्तीसंज्ञक 'स्यति' प्रत्यय, इडागम का प्रतिषेध, "निमित्तात् प्रत्ययविकारागमस्थः" (३।८।२६) से सकार को षकारादेश तथा 'क् -ष्' संयोग से 'क्ष्'।।७९९।

## ८००. पचिवचिसिचिरिचिमुचेश्चात् [३।७।१८]

**[सूत्रार्थ]**

चकारान्त 'पच्, वच्, सिच्, रिच्, मुच्' इन पाँच धातुओं से उत्तर में असार्वधातुकनिमित्तक इडागम नहीं होता है।।८००।

## [दु० वृ०]

एभ्यः पञ्चभ्योऽनिड् भवति। 'डु पचष् पाके, पच व्यक्तीकरणे' (१।६०३; ३४३) वा-पक्ता । वच, वचिश्च-वक्ता । सिचिर् -सेक्ता। रिचिर्-रेक्ता। मुच्ल्-मोक्ता॥८००।

## [दु० टी०]

पचि०। वचिश्चेति ब्रुवो वचिर्गृह्यते, अविशेषाद् द्वयोरपि ग्रहणमित्यर्थः एभ्यः एकस्वरेभ्यो विहितविशेषणत्वात् पिपक्षती कृतेऽपि द्विर्वचने प्रतिषेधः। पवसिरिमुभ्यश्चादिति चोद्येऽर्थविवरणविस्तरः **प्रतिपत्तिगौरवं** च स्यात् । पकाद्यवयवेभ्यो यश्चकारस्तदन्तादेकस्वरादिति॥८००।

## [वि० प०]

पचि०। वचिश्चेति ब्रुवो वचिरित्यस्यापि ग्रहणम् अविशेषादित्यर्थः॥८००।

## [समीक्षा]

द्रष्टव्य समीक्षा सूत्र-सं० ७९९।

## [विशेष वचन]

१. वचिश्चेति ब्रुवो वचिर्गृह्यते, अविशेषाद् द्वयोरपि ग्रहणमित्यर्थः (दु० टी०; वि० प०)।

२. पवसिरिमुभ्यश्चादिति चोद्येऽर्थविवरणविस्तरः प्रतिपत्तिगौरवं च स्यात् (दु० टी०)।

## [रूपसिद्धि]

१. **पक्ता।** पच् + ता। 'डु पचष् पाकं, पच व्यक्तीकरणे' (१।६०३, ३४३) धातु से श्वस्तनीसंज्ञक परस्मैपद - प्र० पु० - ए० व० 'ता' प्रत्यय, "चवर्गस्य किरसवर्णे" (३।६।५५) से चकार को ककारादेश तथा प्रकृत सूत्र से इडागम का निषेध।

२. **वक्ता।** वच् + ता। 'वच भाषणे' (२।३०) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय, ककारादेश तथा इडागम का प्रतिषेध।

३. **सेक्ता।** सिच् + ता। 'षिचिर् क्षरणे' (५।११) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय, इडागम का प्रतिषेध, "नामिनश्चोपधाया लघोः" (३।५।२) से इकार को गुण तथा चकार को ककार।

४. **रेक्ता।** रिच् + ता। 'रिचिर् विरेचने' (६।४) धातु से 'ता' प्रत्यय, अनिट्, गुण तथा ककारादेश।

५. **मोक्ता।** मुच्+ ता। 'मुच्ल् मोक्षणे' (५।७) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय, अनिट्, गुण तथा ककारादेश॥८००।

# ८०१. प्रच्छेश्छात् [३।७।१९]

## [सूत्रार्थ]

छकारान्त 'प्रच्छ्' धातु से उत्तर **में असार्वधातुकनिमित्तक** इडागम का प्रतिषेध होता है॥८०१।

**[दु० वृ०]**

प्रच्छेश्छान्तादनिड् भवति। प्रष्टा, प्रक्ष्यति॥८०१।

**[समीक्षा]**

द्रष्टव्य समीक्षा सूत्र-सं० ७९९।

**[रूपसिद्धि]**

१. **प्रष्टा।** प्रच्छ् + ता। 'प्रच्छ् ज्ञीप्सायाम्' (५।४९) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय, अनिट् "छशोश्च" (३।६।६०) से छकार को षकार तथा "तवर्गस्य षटवर्गाट्टवर्गः" (३।८।५) से तकार को टकारादेश।

२. **प्रक्ष्यति।** प्रच्छ् + स्यति। 'प्रच्छ् ज्ञीप्सायाम्' (५।४९) धातु से भविष्यन्तीसंज्ञक 'स्यति' प्रत्यय, प्रकृत सूत्र से अनिट्, छकार को षकार, "षढोः कः से" (३।८।४) से षकार को ककार, "निमित्तात् प्रत्ययविकारागमस्थः सः षत्वम्" (३।८।२६) से सकार को षकार तथा 'क-ष्' संयोग से क्षकार॥८०१।

## ८०२. युजिरुजिरन्जिभुजिभजिभन्जिसन्जित्यजिभ्रस्जियजिमस्जि-सृजिनिजिविजिस्वन्जेर्जात् [३।७।२०]

**[सूत्रार्थ]**

जकारान्त 'युज्, रुज्, रन्ज्, भुज्, भज्, भन्ज, सन्ज्, त्यज्, भ्रस्ज्, यज्, मस्ज्, सृज्, निज्, विज् तथा स्वन्ज्' इन १५ धातुओं से उत्तर में असार्वधातुकप्रत्ययनिमित्तक इडागम नहीं होता है॥८०२।

**[दु० वृ०]**

एभ्यः पञ्चदशभ्योऽनिड् भवति। युजिर्, युज्-योक्ता। रुज्-रोक्ता। रन्ज्-रङ्क्ता। भुज्, भुजो-भोक्ता। भज्-भक्ता। भन्ज्-भङ्क्ता। सन्ज्-सङ्क्ता। त्यज्-त्यक्ता। भ्रस्ज्- भ्रष्टा। यज्-यष्टा। टु मस्जो-मङ्क्ता। सृज्-स्रष्टा। निजिर्-नेक्ता। विजिर्-वेक्ता। न तु 'ओ विजी' (५।११५; ६।१९), ईदनुबन्धबलात्। स्वन्ज्-स्वङ्क्ता॥८०२।

**[दु० टी०]**

युजि०। विजिर् इत्यादि। 'विजिर् पृथग्भावे' इत्यस्यैव ग्रहणम्, न तु **'ओ विजी भयचलनयोः'** (५।११५; ६।१९) इत्यस्यैव। यद्यनेन सिद्धः **"न डीश्वीदनुबन्धवेटाम्"** (४।६।९०) इत्यनेन प्रतिषेधोऽनर्थकः स्यात्। भिन्नकर्तृकत्वान्न ज्ञापकश्चेत् तथापि निजिना साहचर्याद् विजेर्जौहोत्यादिकस्य ग्रहणम्, **'ओ विजी भयचलनयोः'** (५।११५; ६।१९) इत्यस्य तौदादिकस्य-'उद्विजिता, उद्विजितुम्' भवत्येव॥८०२।

**[वि० प०]**

युजि०। मङ्क्तेति। **"व्रश्चिमस्जोर्धुटि"** (३।६।३५) इत्यत्र साधितम् स्रष्टेति। **"सृज्दृशोः"** (३।४।२५) इत्यादिना अकारागमः। न तु 'ओ विजी' इति। ईदनुबन्धो हि **"न**

**डीश्वीदनुबन्ध०**'' (४।६।९०) इत्यादिना निष्ठायामिट्प्रतिषेधार्थः। यदि चास्यापीह ग्रहणं स्यात् तदा इदनुबन्धो व्यर्थः स्यात् । साध्यस्य सामान्यद्वारेणैव सिद्धत्वादिति।।८०२।

## [समीक्षा]

द्रष्टव्य समीक्षा, सूत्र-सं० ७९५, ७९९।

## [विशेष वचन]

१. भिन्नकर्तृकत्वान्न ज्ञापकश्चेत् तथापि निजिना साहचर्याद् विजेर्जौहोत्यादिकस्य ग्रहणम् (दु० टी०)।

२. यदि चास्यापीह ग्रहणं स्यात् तदा इदनुबन्धो व्यर्थः स्यात्, साध्यस्य सामान्यद्वारेणैव सिद्धत्वात् (वि० प०)।

## [रूपसिद्धि]

१. **योक्ता।** युज्+ ता। 'युज समाधौ, युजिर् योगे' (३।११५; ६।७) धातु से श्वस्तनीसंज्ञक परस्मैपद-प्र० पु०- ए० व० 'ता' प्रत्यय, प्रकृत सूत्र से इडागम का प्रतिषेध, ''नामिनश्चोपधाया लघोः'' (३।५।२) द्वारा 'युज्' धातु से उपधासंज्ञक उकार को गुण-ओकार तथा ''चवर्गस्य किरसवर्गे'' (३।६।५५) से जकार को ककार।

२. **रोक्ता।** रुज्+ता। 'रुज् हिंसायाम्' (९।१७२) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय तथा शेष प्रक्रिया पूर्ववत् ।

३. **रङ्क्ता।** रन्ज्+ता। 'रन्ज रागे' (१।६०५) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय, प्रकृत सूत्र से अनिट्, ''चवर्गस्य किरसवर्गे'' (३।६।५५) से जकार को ककार, ''मनोरनुस्वारो धुटि'' (२।४।४४) से नकार को अनुस्वार तथा ''वर्गे वर्गान्तः'' (२।४।४५) से अनुसार को ङकारादेश।

४. **भोक्ता।** भुज्+ता। 'भुजो कौटिल्ये, भुज पालनाभ्यवहारयोः' (५।५३; ६।१४) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत् ।

५. **भक्ता।** भज् + ता। 'भज सेवायाम्' (१।६०४) से 'ता' प्रत्यय, अनिट् तथा अन्य प्रक्रिया पूर्ववत् ।

६. **भङ्क्ता।** भन्ज्+ता। 'भन्जो आमर्दने' (६।१३) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय, अनिट्, जकार को ककार, नकार को अनुस्वार तथा अनुस्वार को ङकारादेश।

७. **सङ्क्ता।** सन्ज् + ता। 'षन्ज सङ्गे' (१।२८८) धातु से 'ता' प्रत्यय, अनिट, ज् को क्, न् को अनुस्वार तथा उसको ङकारादेश।

८. **त्यक्ता।** त्यज् + ता। 'त्यज हानौ' (१।२८७) धातु से 'ता' प्रत्यय तथा शेष प्रक्रिया पूर्ववत् ।

९. **भ्रष्टा।** भ्रस्ज्+ता। 'भ्रस्ज् पाके' (५।४) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय, प्रकृत सूत्र से अनिट्, ''स्कोः संयोगाद्योरन्ते च'' (३।६।५४) से सकार का लोप, ''भृजादीनां षः'' (३।६।५९) से जकार को षकार तथा ''तवर्गस्य षटवर्गाट्टवर्गः'' (३।८।५) से तकार को टकार आदेश।

१०. **यष्टा।** यज्+ता। 'यज देवपूजासङ्गतिकरणदानेषु' (१।६०८) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय तथा शेष प्रक्रिया पूर्ववत्।

११. **मङ्क्ता।** मस्ज् + ता। 'टु मस्जो शुद्धौ' (५।५१) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय तथा शेष प्रक्रिया पूर्ववत्।

१२. **स्रष्टा।** सृज् + ता। 'सृज विसर्गे' (३।११६) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय, अनिट्, "सृजिदृशोरागमोऽकारः स्वरात् परो धुटि गुणवृद्धिस्थाने" (३।४।२५) से 'सृज्' धातुगत ऋकार के बाद अकारागम, "रम् ऋवर्णः" (१।२।१०) से ऋकार को रकार, जकार को षकार तथा तकार को टकार।

१३. **नेक्ता।** निज् + ता। 'निजिर् शौचपोषणयोः' (२।८१) से 'ता' प्रत्यय, अनिट् तथा शेष प्रक्रिया पूर्ववत्।

१४. **वेक्ता।** विजिर् + ता। 'विजिर् पृथग्भावे' (२।८२) धातु से 'ता' प्रत्यय, अनिट् तथा शेष प्रक्रिया पूर्ववत्।

१५. **स्वङ्क्ता।** स्वन्ज् + ता। 'स्वन्ज् परिष्वङ्गे' (१।३४९) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय तथा शेष प्रक्रिया पूर्ववत् ॥८०२।

## ८०३. अदितुदिनुदिक्षुदिस्विद्यतिविद्यतिविन्दतिविनत्तिछिदिभिदि-हदिशदिसदिपदिस्कन्दिखिदेर्दात् [३।७।२]

### [सूत्रार्थ]

'अद्, तुद्, नुद्, क्षुद्, स्विद्, विद्, विन्द्, विद्, छिद्, भिद्, हद्, शद्, सद्, पद्, स्कन्द् तथा खिद्' इन १६ धातुओं से उत्तर में असार्वधातुकप्रत्ययनिमित्तक इडागम नहीं होता है॥ ८०३।

### [दु० वृ०]

एभ्यः षोडशभ्योऽनिड् भवति। अद्-अत्ता। तुद्-तोत्ता। नुद्-नोत्ता। क्षुदिर्-क्षोत्ता। स्विद्-स्वेत्ता। विद सत्तायाम्, विद्लृलाभे, विद् विचारे वा-वेत्ता। छिदिर्-छेत्ता। भिदिर्-भेत्ता। हद्-हत्ता। शद्लृ शातने-शत्ता। सद्लृ-सत्ता। पद-पत्ता। स्कन्दिर्-स्कन्ता। खिद् दैन्ये, खिद परिघाते वा-खेत्ता॥ ८०३।

### [दु० टी०]

अदि०। सविकरणनिर्देशाल्लुग्विकरणाद् विदेरिडेव - वेदिता शास्त्रस्य। लाभार्थादपीटमिच्छन्तीत्येके- वेदिता धनस्य। तथा च 'तुदिं नुदिं विद्यतिविन्दतीं अपि प्रतीहि दान्तान् दश पञ्च चानिटः'। इङ्निर्देशो धातुस्वरूपपरिग्रहार्थः। भिनत्तीति **भित्**। भिदिवाचरिता **भेदिता।** दादिति विशेषणबलाल्लुप्तप्रत्ययान्तादपि न भवति॥ ८०३।

### [समीक्षा]

द्रष्टव्य समीक्षा सूत्र-सं० ७९५, ७९९।

### [विशेष वचन]

१. लाभार्थादपीटमिच्छन्तीत्येके (दु० टी०)।

२. इङ्निर्देशो धातुस्वरूपपरिग्रहार्थः (दु० टी०)।

३. दादिति विशेषणबलाल्लुप्तप्रत्ययान्तादपि न भवति (दु० टी०)।

### [रूपसिद्धि]

१. **अत्ता**। अद् + ता। 'अद भक्षणे' (२।१) धातु से श्वस्तनीविभक्तिसंज्ञक 'ता' प्रत्यय, अनिट् तथा "अघोषे प्रथमः" (२।३।६१) से दकार को तकार।

२. **तोत्ता**। तुद् + ता। 'तुद व्यथने' (५। १) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय, अनिट्, गुण तथा दकार को तकारादेश।

३-१४. **नोत्ता**। नुद् + ता। **क्षोत्ता**। क्षुद् + ता। **स्वेत्ता**। स्विद् + ता। **वेत्ता**। विद्, विद्ऌ + ता। **छेत्ता**। छिदिर् + ता। **भेत्ता**। भिदिर्+ ता। **हत्ता**। हद् + ता। **शत्ता**। शद्ऌ + ता। **सत्ता**। सद्ऌ + ता। **पत्ता**। पद् + ता। **स्कन्ता**। स्कन्दिर्+ ता। **खेत्ता**। खिद् + ता।। ८०३।

## ८०४. राधिरुधिक्रुधिक्षुधिबन्धिशुधिसिध्यतिबुध्यतियुधिव्यधि-साधेर्धात् [३।७।२२]

### [सूत्रार्थ]

'राध्, रुध्, क्रुध्, क्षुध्, बन्ध्, शुध्, सिध्, बुध्, युध्, व्यध्' तथा 'साध्' धकारान्त ११ धातुओं से उत्तर में असार्वधातुकप्रत्ययनिमित्तक इडागम का प्रतिषेध होता है।। ८०४।

### [दु० वृ०]

एभ्य एकादशभ्योऽनिड् भवति। राध्-राद्धा। रुधिर्-रोद्धा। क्रुध्-क्रोद्धा। क्षुध्-क्षोद्धा। बन्ध्-बन्द्धा। शुध्-शोद्धा। सिधु-सेद्धा। बुध् अवगमने- बोद्धा। युध-योद्धा। व्यध-व्यद्धा। साध-साद्धा।। ८०४।

### [दु० टी०]

राधि०। सिध्यतिबुध्यतोर्यना निर्देशाद् भौवादिकयोरिड् न भवतीति। 'षिधु गत्याम्, षिधु शास्त्रे माङ्गल्ये च, बुध बोधने'-सेधिता, बोधिता।। ८०४।

### [समीक्षा]

द्रष्टव्य समीक्षा सूत्र-सं० ७९५, ७९९।

### [रूपसिद्धि]

१. **राद्धा**। राध् + ता। 'राध संसिद्धौ' (३। २३;४।१६) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय, अनिट्, "घढधभेभ्यस्तथोर्धोऽधः" (३। ८। ३) से तकार को धकार तथा "धुटां तृतीयश्चतुर्थेषु" (३। ८। ८) से पूर्ववर्ती धकार को दकारादेश।

२. **रोद्धा।** रुध् + ता । 'रुधिर् आवरणे' (६।१) धातु से श्वसतनीसंज्ञक 'ता' प्रत्यय, अनिट्, ''नामिनश्चोपधाया लघोः'' (३। ५। २) से 'रुध्' धातु की उपधा उकार को गुण, तकार को धकार तथा धकार को दकार।

३-११. **क्रोद्धा।** क्रुध + ता। **क्षोद्धा।** क्षुध् + ता। **बन्द्धा।** बन्ध् + ता। **शोद्धा।** शुध् + ता। **सेद्धा।** सिध् + ता। **बोद्धा।** बुध् + ता। **योद्धा।** युध् + ता। **व्यद्धा।** व्यध् + ता। **साद्धा।** साध् + ता।। ८०४।

## ८०५. हनिमन्यतेर्नात् [३।७।२३]

### [सूत्रार्थ]

'हन्-मन्' इन दो नकारान्त धातुओं से उत्तर में असार्वधातुकप्रत्ययनिमित्तक इडागम का प्रतिषेध होता है।। ८०५।

### [दु० वृ०]

आभ्यामनिड् भवति। हन् - हन्ता। मन ज्ञाने - मन्ता। कथम् अवर्धीत् ? नायं नान्त इति।। ८०५।

### [दु० टी०]

हनि०। मन्यतेरिति यना निर्देशान्मनु बोधने इतीट्-मनिता।। ८०५।

### [वि० प०]

हनि०। कथमित्यादि। ''**अद्यतन्यां च**'' (३। ४। ८३) इति वधिरादेशः।। ८०५।

### [बि० टी०]

हनि०। समाहारत्वान्नपुंसकमिति नुर्न भवति, सूत्रत्वादिति। एवं पूर्वयोगेऽपि। मन्यतेरिति यना निर्देशान्न 'मनु बोधने' इति। तस्माद् इड् भवत्येव मनिता। कथम् अवर्धीत्, नायं नान्त इति। ननु यथा नान्तत्वाभावादिट् स्यात् तथा 'अत्ता, बोद्धा, योक्ता' इत्यत्रापि ''**अघोषे प्रथमः**'' (२। ३। ६१), ''**चवर्गस्य किरसवर्णे**'' (३। ६। ५५) इत्यादिना प्रथमादौ कृते दान्तत्वाभावादिट् स्याद् **'आगमादेशयोरागमविधिर्बलवान्'** (का० परि० ४०) इति न्यायाद् आदौ इटि प्राप्ते प्रतिषेधः, ततः प्रथमे सति दान्तत्वाभावाद् इट् न स्यात्, प्रतिषेधबलात्, तर्हि तत्रापि **'आगमादेशयोरागमविधिर्बलवान्'** (का० परि० ४०) इति प्रतिषेधः कथं न स्यादिति चेत्, न देश्यम्। **'आगमात् सर्वादेशविधिर्बलवान्'** (का० परि० ४१) इति न्यायात् पूर्ववद् वधिरादेशः। न च वक्तव्यम् - वध्यादेशे कृते निषेधः स्यात्, प्रतिषेधसामर्थ्याद् हन्तेत्यत्र कृतार्थत्वात् । न च वक्तव्यम् - **'यस्य स्थाने य आदेशास्ते तद्ग्रहणेन गृह्यन्ते'** (का० परि० ९१) इति न्यायाद् हनिरेवायं स्थानिवद्भावो ह्यवर्णविधाविति न्यायान्नान्तत्वं नावसीयते इति तर्हि 'आहत' इत्यत्र कथमिट् न स्यात् । आङ्पूर्वाद् हन्धातोरद्यतन्यामात्मनेपदस्य प्रथमैकवचनम्, ततः सिच्, आगमादेशयोरित्यादिना प्रतिषेधः कथन्न स्याद् इति चेत्, न देश्यम् 'आगमात् सर्वादेशविधिर्बलवान्' इति न्यायात् पूर्वं वध्यादेशे कृते पश्चान्नलोपे कृते नान्तत्वाभावात् कथन्न इट् । न च वक्तव्यम् -

प्रतिषेधसामार्थ्याद् हन्तेत्यत्र कृतार्थत्वात्। किञ्च पिपक्षतीत्यत्र वा कथं नेट्, पच् धातोः सनि द्विर्वचनेऽनेकस्वरत्वादिट् स्यादिति चेत्, तदयुक्तम्। एतद्विहितविशेषणत्वादिट् न भविष्यति। अत्रापि विहितविशेषणमिति चेत्, **न काचित् क्षतिरिति।**

हन्धातोर्विहिते दीति ततो वध्यादेशः, ततः सिच्, तस्मादिट् स्यादेव वधभागाद् विहितत्वात्। न च वक्तव्यम्-हन्धातोरद्यतनी ततः सिच् ,ततो वधिरादेशः। **"अद्यतन्यां च"** (३। ४। ४३) इति वधिरादेशो न स्यात्, सिचा व्यवहितत्वात्। तर्हि कथन्न भविष्यति हन्धातोर्विहिताशिषि **"हन्तेर्वधिराशिषि"** (३।४।८२) इत्यनेन वध्यादेशे कृते इट् न स्यात्? सत्यम्, विषयसप्तमीत्वाद् वध्यादेशे कृते पञ्चादाशीर्विभक्तिः स्यात्। यत्तु आशिषि परतः इत्युक्तं **वृत्तौ** तदुभयसप्तमीपक्षमाश्रित्योक्तं विषयत्वमपि बोद्धव्यम्। यद् वा विहितविशेषणं सर्वादेशं प्रति नास्त्येव **"वसतिघसेः सात्"** (३। ७।२९) इत्यत्र घसिग्रहणसामर्थ्यात्। अन्यथा घस्धातोर्मरग्विषय एव प्रयोगः। अर्थाद् अदः स्थानिकस्य घस्धातोर्ग्रहणं जिघत्सतीत्यत्र हन्धातोर्विहिते सनि घसिरादेशः विहितविशेषणत्वान्नानिड् भविष्यति, किं घसिग्रहणेन। तस्माद् घसिग्रहणेन ज्ञापयति - सर्वादेशं प्रति विहितविशेषणं नास्त्येव। तदा 'जग्धवान्' इत्यत्र कथमिट् न स्यात्? सत्यम्। अत्र **केचिदाहुः**- घसिग्रहणेनाख्यातप्रकरणं नियम्यते, न कृत्प्रकरणम्, **भिन्नकर्तृकत्वात्। गुरवस्त्वाहुः**- तत्र विषयसप्तमीत्वादादौ जग्ध्यादेशः पश्चात् क्तः। यथा **'आगमशासनमनित्यम्'** (का० परि० २१) इति न्यायाद् इट् न भविष्यतीति सर्वं समञ्जसम् ॥८०५।

## [समीक्षा]

द्रष्टव्य समीक्षा सूत्र-सं० ७९५, ७९९।

## [विशेष वचन]

१. यस्य स्थाने य आदेशास्ते तद्ग्रहणेन गृह्यन्ते (बि० टी०)।

२. विहितविशेषणं सर्वादेशं प्रति नास्त्येव (बि० टी०)।

३. केचिदाहुः- घसिग्रहणेनाख्यातप्रकरणं नियम्यते, न कृत्प्रकरणम्। भिन्नकर्तृकत्वात् (बि० टी०)।

४. गुरवस्त्वाहुः- तत्र विषय ---------- सर्वं समञ्जसम् (बि० टी०)।

## [रूपसिद्धि]

१. **हन्ता**। हन्+ ता। 'हन हिंसागत्योः' (२।४) धातु से श्वस्तनीसंज्ञक परस्मैपद-प्र० पु०-ए० व० 'ता' प्रत्यय तथा प्रकृत सूत्र से इडागम का प्रतिषेध।

२. **मन्ता**। मन्+ ता। 'मन ज्ञाने' (३।११३) धातु से श्वस्तनीसंज्ञक प्र० पु० - ए० व० 'ता' प्रत्यय तथा इडागम का प्रतिषेध॥ ८०५।

## ८०६. आपितपितिपिस्वपिवपिशपिछुपिक्षिपिलिपि-लुपिसृपेः पात् [३।७।२४]

### [सूत्रार्थ]

'आप्, तप् , तिप् , स्वप् , वप् , शप् , छुप् , क्षिप्, लिप् , लुप्' तथा 'सृप्' इन ११ धातुओं से असार्वधातुकनिमित्तक इडागम नहीं होता है॥ ८०६।

### [दु० वृ०]

एभ्य एकादशभ्योऽनिड् भवति। आप्ल् - आप्ता। तप धूप सन्तापे, तप ऐश्वर्ये वा-तप्ता। तिपृ - तेप्ता। ञि ष्वप् शये-स्वप्ता। डु वप - वप्ता। शप आक्रोशे - शप्ता। छुप-छोप्ता। क्षिप-क्षेप्ता। लिप-लेप्ता। लुप्ल्-लोप्ता। सृप्ल्-सर्प्ता। कथं तर्प्ता, दर्प्ता ? रधादित्वाद् **विभाषैव**॥ ८०६।

### [दु० टी०]

आपि०। कथमित्यादि। **'तृप प्रीणने, दृप हर्षणमोचनयोः'**(३।३५,३६) इह पाठः कर्तव्य; इति भावः। तथा च 'लिपिं लुपिं तृप्यतिदृप्यती सृपिम्' इति पठन्ति । तदयुक्तमित्याह-रधादित्वाद् विभाषेति। अन्यथा रधादिष्वनयोः **पाठोऽनर्थकः** स्यात् ॥ ८०६।

### [वि० प०]

आपि०। **'तृप प्रीणने, दृप् हर्षणमोचनयोः'** (३। ३५, ३६) इत्यनयोरपीह पाठः कर्तव्यः। तथाहि- 'लिपिं लुपिं तुप्यतिदृप्यती सृपिम्' इत्याह - कथमित्यादि। रधादित्वाद् विकल्पेन भवितव्यमनयोः, अन्यथा रधादिषु **पाठोऽनर्थकः** स्यादिति भावः॥ ८०६।

### [समीक्षा]

द्रष्टव्य समीक्षा, सूत्र सं० ७९५, ७९९।

### [विशेष वचन]

१. रधादित्वाद् विकल्पेन भवितव्यमनयोः, अन्यथा रधादिषु पाठोऽनर्थकः स्यादिति भावः (वि० प०)।

### [रूपसिद्धि]

१. **आप्ता।** आप् + ता। 'आप्ल् व्याप्तौ' (४।१४) धातु से श्वस्तनीसंज्ञक परस्मैपद– प्र० पु०- ए० व० 'ता' प्रत्यय तथा प्रकृत सूत्र से इडागम का प्रतिषेध।

२. **तप्ता।** तप् + ता। 'तप धूप सन्तापे, तप ऐश्वर्ये' (१।१३३; ९।२९१) से 'ता' प्रत्यय तथा अनिट् ।

३-११. **तेप्ता।** तिप् + ता। **स्वप्ता।** स्वप् + ता। **वप्ता।** वप् + ता। **शप्ता।** शप् + ता। **छोप्ता।** धुप् + ता। **क्षेप्ता।** क्षिप् + ता। **लेप्ता।** लिप् + ता। **लोप्ता।** लुप् + ता। **सर्प्ता।** सृप् + ता॥८०६।

## ८०७. यभिरभिलभेर्भात् [३।७।२५]

### [सूत्रार्थ]

असार्वधातुक प्रत्यय के परे रहते 'यभ् - रभ् - लभ्' इन तीन भकारान्त धातुओं से उत्तर में इट् का प्रतिषेध होता है॥८०७।

### [दु० वृ०]

एभ्यस्त्रिभ्योऽनिड् भवति। यब्धा, रब्धा, लब्धा॥८०७।

### [समीक्षा]

द्रष्टव्य समीक्षा-सूत्र सं० ७९५।

### [रूपसिद्धि]

१. **यब्धा** । यभ् + ता । 'यभ मैथुने' (१।२८२) धातु से श्वस्तनीविभक्तिसंज्ञक प्र० पु० - ए० व० 'ता' प्रत्यय, प्रकृत सूत्र से अनिट्, "धढधभेभ्यस्तथोर्धोऽधः" (३।८।३) से तकार को धकार तथा "धुटां तृतीयश्चतुर्थेषु" (३।८।८) से भकार को बकारादेश ।

२. **रब्धा**। रभ् + ता। 'रभ राभस्ये' (१।४७१) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत् ।

३. **लब्धा**। लभ् + ता। 'डु लभष् प्राप्तौ' (१।४७२) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत् ॥८०७।

## ८०८. यमिरमिनमिगमेर्मात् [३।७।२६]

### [सूत्रार्थ]

असार्वधातुक प्रत्यय के परे रहते 'यम् - रम् - नम् - गम्' इन चार मकारान्त धातुओं से उत्तर में इडागम नहीं होता है॥८०८।

### [दु० वृ०]

एभ्यश्चतुर्भ्योऽनिड् भवति। यन्ता, रन्ता, नन्ता, गन्ता॥८०८।

### [समीक्षा]

द्रष्टव्य समीक्षा-सूत्र सं० ७९५।

### [रूपसिद्धि]

१. **यन्ता**। यम् + ता। 'यम उपरमे' (१।१५८) धातु से श्वस्तनीविभक्तिसंज्ञक 'ता' प्रत्यय, प्रकृत सूत्र से इडागम का निषेध, "मनोरनुस्वारो धुटि" (२।४।४४) से मकार को अनुस्वार तथा "वर्गे वर्गान्तः" (२।४।४५) से अनुस्वार को नकारादेश।

२. **रन्ता**। रम् + ता। 'रमु क्रीडायाम्' (१।५६१) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय तथा शेष प्रक्रिया पूर्ववत् ।

३. **नन्ता**। नम् + ता। 'णमु प्रह्वत्वे शब्दे च' (१।१५९) धातु से 'ता' प्रत्यय, "णो नः" (३।८।२५) से णकार को नकारादेश तथा अन्य प्रक्रिया पूर्ववत् ।

४. **गन्ता।** गम् + ता। 'गम्ल्ृ गतौ' (१।२७९) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत् ॥८०८।

## ८०९. रिशिरुशिक्रुशिलिशिविशिदिशिदृशिस्पृशिमृशिदन्शेः शात् [३।७।२७]

### [सूत्रार्थ]

असार्वधातुकसंज्ञक प्रत्यय के परे रहते 'रिश्, रुश्, क्रुश्, लिश्, विश्, दिश्, दृश्, स्पृश्, मृश्, दन्श्' इन दश शकारान्त धातुओं से उत्तर में इडागम नहीं होता है ॥८०९।

### [दु० वृ०]

एभ्यो दशभ्योऽनिड् भवति। रिश रुश हिंसायाम् - रेष्टा, रोष्टा । क्रुश् - क्रोष्टा। लिश् - लेष्टा। विश् - वेष्टा। दिश् - देष्टा। दृश् - द्रष्टा। स्पृश् - स्प्रष्टा। मृश् - म्रष्टा । दन्श्- दंष्टा॥८०९।

### [वि० प०]

रिशि०। द्रष्टेति। अकारागमः सृजेरिव । तथा स्पृशिमृशोः 'स्पृशादीनां वा' इति वचनात् ॥८०९।

### [समीक्षा]

द्रष्टव्य समीक्षा-सूत्र सं० ७९५।

### [रूपसिद्धि]

१. **रेष्टा।** रिश् + ता। 'रुश् रिश् हिंसायाम्' (५।५५) धातु से श्वस्तनीविभक्तिसंज्ञक 'ता' प्रत्यय, प्रकृत सूत्र से अनिट्, "नामिनश्चोपधाया लघोः" (३।५।२) से धातु की उपधा इकार को गुण, "छशोश्च" (३।६।६०) से शकार को षकार तथा "तवर्गस्य षटवर्गाट्टवर्गः" (३।८।५) से तकार को टकारादेश।

२-१०. **रोष्टा।** रुश् + ता। **क्रोष्टा।** क्रुश् + ता। **लेष्टा।** लिश् + ता। **वेष्टा।** विश् + ता। **देष्टा।** दिश् + ता। **द्रष्टा।** दृश् + ता । "सृजिदृशोरागमोऽकारः" (३।४।२५) से ऋकारोत्तर में अकारागम तथा "रम् ऋवर्णः" (१।२।१०) से ऋकार को रकारादेश। **स्प्रष्टा।** स्पृश् + ता। ऋकार को रकार। **म्रष्टा।** मृश् + ता। **दंष्टा ।** दन्श् + ता ॥८०९।

## ८१०. द्विषिपुष्यतिकृषिश्लिष्यतित्विषिपिषिविषिशिषि-शुषितुषिदुषेः षात् [३।७।२८]

### [सूत्रार्थ]

असार्वधातुकसंज्ञक प्रत्यय के परे रहते 'द्विष्, पुष्, कृष्, श्लिष्, त्विष्, पिष्, विष्, शिष्, शुष्, तुष्, दुष्' इन ११ धातुओं से उत्तर में इडागम नहीं होता है॥८१०।

### [दु० वृ०]

एभ्य एकादशभ्योऽनिड् भवति । द्विष् - द्वेष्टा । पुष्-पोष्टा । कृष्-क्रष्टा । श्लिष् - श्लेष्टा । त्विष् - त्वेष्टा । पिष्ल्ट - पेष्टा । विष्ल्ट - वेष्टा । शिष्ल्ट - शेष्टा । शुष् - शोष्टा । तुष्- तोष्टा। दुष् - दोष्टा॥८१०।

### [दु० टी०]

द्विषि०। पुष्यतीति यना निर्देशाद् भौवादिकक्रैयादिकाभ्याम् इड् भवति- **पोषिता।** कृषिरिह भौवादिकस्तौदादिकश्चेत्यर्थः। श्लिष्यतीति यना निर्देशात् **'श्रिषु श्लिषु प्रुषु प्लुषु उष दाहे'** (१।२२९) इति भौवादिकाद् इड् भवति– 'श्रेषिता, श्लेषिता' इत्यादि। विशिरित्यविशेषात् सामान्यस्य ग्रहणम् ॥८१०।

### [समीक्षा]

द्रष्टव्य समीक्षा- सूत्र सं० ७९५।

### [रूपसिद्धि]

१. **द्वेष्टा** । द्विष् + ता । 'द्विष अप्रीतौ' (२।६०) धातु से श्वस्तनीविभक्तिसंज्ञक प्र० पु०–ए० व० 'ता' प्रत्यय, प्रकृत सूत्र द्वारा अनिट्, "नामिनश्चोपधाया लघोः" (३।५।२) से उपधासंज्ञक इकार को गुण-एकार तथा "तवर्गस्य षटवर्गाट्टवर्गः" (३।८।२) से तकार को टकारादेश।

२-११. **पोष्टा** । पुष् + ता । **क्रष्टा** । कृष् + ता । ऋकार को रकार । **श्लेष्टा** । श्लिष् + ता। **त्वेष्टा** । त्विष् + ता। **पेष्टा** । पिष्ल्ट + ता। **वेष्टा**। विष्ल्ट + ता। **शेष्टा** । शिष्ल्ट + ता। **शोष्टा** । शुष् + ता । **तोष्टा** । तुष् + ता। **दोष्टा** । दुष् + ता ॥८१०।

## ८११. वसतिघसेः सात् [३।७।२९]

### [सूत्रार्थ]

असार्वधातुक प्रत्यय के परे रहते 'वस्, घस्' इन सकारान्त दो धातुओं के उत्तर में इडागम नहीं होता है॥८११।

### [दु० वृ०]

आभ्यामनिड् भवति। वस् - वस्ता। जिघत्सति। नायं दान्त इति॥८११।

### [दु० टी०]

वस्० । अन्विकरणनिर्देशाद् **'वस आच्छादने'** (२।४७) इत्यादादिकाद् इड् भवति। वसिता वस्त्राणाम्। **"अदेर्घस्ल्ट सनद्यतन्योः"** (३।४।७९) इति कृते स्थानिवद्भावान्न सिध्यतीत्याह– नायं दान्त इति। 'घस्ल्ट अदने' इति प्रकृत्यन्तरमस्ति, स च मरगविषये एव, भाषायां तत्र **"घोषवत्योश्च कृति"** (४।६।८०) इतीट्प्रतिषेधः॥८११।

### [वि० प०]

वसति। **"अदेर्घस्ल्ट सनद्यतन्योः"** (३।४।७९) इति कृते अदेः स्थानिवद्भावाद् **"अदितुदिनुदि०"** (३।७।२१) इत्यादिना इट्प्रतिषेधः सिद्धः, किं घसेरुपादानेनेत्याह–

नायं दान्त इति। यश्च "स्नदिघसां मरक्" (४।४।४०) इति वचनाद् 'घस्लृ अदने' इति **सौत्रो** धातुः, भाषायां मरग्विषय एवेति। तत्र **"घोषवत्योश्च कृति"** (४।६।८०) इत्यनेनेवेट्-प्रतिषेधः सिद्धः, यथा 'घस्मरः' इति॥८११।

**[समीक्षा]**

द्रष्टव्य समीक्षा-सूत्र सं० ७९५।

**[रूपसिद्धि]**

१. **वस्ता।** वस् + ता। 'वस निवासे' (१।६१४) धातु से श्वस्तनीविभक्तिसंज्ञक प्र० पु० - ए० व० 'ता' प्रत्यय तथा प्रकृत सूत्र द्वारा अनिट्।

२. **जिघत्सति।** अद् - घस्लृ + सन्+अन्+ति। अत्तुमिच्छति। 'अद भक्षणे' (२।१) धातु से इच्छार्थ में "धातोर्वा तुमन्तादिच्छतिनैककर्तृकात्" (३।२।४) से 'सन्' प्रत्यय, "अदेर्घस्लृ सनद्यतन्योः" (३।४।७९) से अद् को 'घस्लृ' आदेश, चण्परोक्षाचेक्रीयित-सनन्तेषु" (३।३।७) से 'घस्' को द्वित्व, "पूर्वोऽभ्यासः" (३।३।४) से पूर्ववर्ती 'घस्' की अभ्याससंज्ञा, "अभ्यासस्यादिर्व्यञ्जनमवशेष्यम्" (३।३।९) से सकार का लोप, "द्वितीयचतुर्थयोः प्रथमतृतीयौ" (३।३।११) से घकार को गकार, "कवर्गस्य चवर्गः" (३।३।१३) से गकार को जकार, "सन्यवर्णस्य" (३।३।२६) से अकार को इकार, "सस्य सेऽसार्वधातुके तः" (३।६।९३) से सकार को तकार, "ते धातवः" (३।२।१६) से 'जिघत्स' की धातुसंज्ञा, वर्तमानाविभक्तिसंज्ञक परस्मैपद प्र० पु० - ए० व० 'ति' प्रत्यय, "अन् विकरणः सार्वधातुके" (३।२।३२) से 'अन्' विकरण तथा "अकारे लोपम्" (२।१।१७) से पूर्ववर्ती अकार का लोप॥८११।

## ८१२. दहिदिहिदुहिमिहिरिहिरुहिलिहिलुहिनहिवहेर्हात्

## [३।७।३०]

**[सूत्रार्थ]**

असार्वधातुक प्रत्यय के परे रहते 'दह्, दिह्, दुह्, मिह्, रिह्, रुह्, लिह्, लुह्, नह्, वह्' इन दश हकारान्त धातुओं से उत्तर में इडागम नहीं होता है॥८१२।

**[दु० वृ०]**

एभ्यो दशभ्योऽनिड् भवति। दह-दग्धा। दिह-देग्धा। दुह-दोग्धा। मिह-मेढा। रिह-रेढा। रुह-रोढा। लिह-लेढा। लुह-लोढा। नह-नद्धा। वह-वोढा। रिहिलुही **सौत्रौ धातू। केचित्र** पठन्त्येव। कथं मोढा, सोढा ? मुहे रधादित्वात् सहेः **"वेषुसह०"** (४।६।८१) इत्यादिना विकल्प एव॥८१२।

**[दु० टी०]**

दहि०। रिहिलुही गणे न पठितौ **सौत्रौ त्वेतौ** वचनाद् हिंसागार्ध्ययोर्वर्तेते, **केचित्र** पठन्त्येव –

**दिहिर्दुहिर्मेहति–रोहतिर्वहिर्लुहिस्तु षष्ठो दहतिस्तथा लिहिः।**
**इमेऽनिटोऽष्टाविह युक्तसंशया गणेषु हान्ताः परिभज्य कीर्तिताः।।** इति।

तकारादेरन्यत्र सहेर्नित्यमिडागमः– सहिष्यते, असहिष्ट॥८१२।

## [वि० प०]

दहि०। रिहिलुही यथाक्रमं हिंसागत्यर्थयोर्वर्तेते इति॥८१२।

## [समीक्षा]

द्रष्टव्य समीक्षा - सूत्र सं० ७९५।

## [रूपसिद्धि]

१. **दग्धा।** दह् + ता। 'दह भस्मीकरणे' (१।२४३) धातु से श्वस्तनीविभक्तिसंज्ञक प्र० पु० – ए० व० 'ता' प्रत्यय, प्रकृत सूत्र से इडागम का निषेध, "दादेर्घः" (३।६।५७) से धातुघटित हकार को घकार, "घढधभेभ्यस्तथोर्धोऽधः" (३।८।३) से तकार को धकार तथा "धुटां तृतीयश्चतुर्थेषु" (३।८।८) से घकार को गकारादेश।

२-३. **देग्धा।** दिह् + ता। "नामिनश्चोपधाया लघोः" (३।५।२) से उपधासंज्ञक इकार को गुण-एकार। **दोग्धा।** दुह् + ता।

४. **मेढा।** मिह् + ता। "हो ढः" (३।६।५६) से हकार को ढकार, तकार को धकार, "तवर्गस्य षटवर्गाट्टवर्गः" (३।८।५) से धकार को ढकार तथा "ढे ढलोपो दीर्घश्चोपधायाः" (३।८।६) से पूर्ववर्ती ढकार का लोप।

५-१०. **रेढा।** रिह् + ता। **रोढा।** रुह् + ता। **लेढा।** लिह् + ता। **लोढा।** लुह् + ता। **नद्धा।** नह् + ता। **वोढा।** वह् + ता॥८१२।

# ८१३. ग्रहगुहोः सनि [३।७।३१]

## [सूत्रार्थ]

'सन्' प्रत्यय के परे रहते 'ग्रह् - गुह्' धातुओं से उत्तर में इडागम नहीं होता है॥८१३।

## [दु० वृ०]

ग्रहगुहोः सनि नेड् भवति। ग्रह–जिघृक्षति। गुहू-जुघुक्षति॥८१३।

## [दु० टी०]

ग्रह०। ग्रहेर्नित्यमिटि प्राप्ते गुहेरूदनुबन्धत्वाद् विकल्पे प्राप्ते वचनम् ॥८१३।

## [वि० प०]

ग्रह०। "**ग्रहिस्वपिप्रच्छां सनि**" (३।४।९) इति ग्रहेः संप्रसारणम् "**तृतीयादेर्घढधभान्तस्य**" (३।६।१००) इत्यादिना आदिचतुर्थत्वम् ॥८१३।

## [समीक्षा]

'जिघृक्षति, जुघुक्षति' इत्यादि शब्दरूपों के सिद्ध्यर्थ इडागम का निषेध दोनों व्याकरणों में किया गया है। पाणिनि का सूत्र है – "**सनि ग्रहगुहोश्च**" (अ० ७।२।१२)।

चकारपाठ से यहाँ उवर्णान्त धातुओं का ग्रहण होता है, परन्तु कातन्त्रकार ने तदर्थ अतिरिक्त सूत्र बनाया है।

**[रूपसिद्धि]**

१. **जिघृक्षति।** ग्रह् + सन् + अन् + ति। 'ग्रह उपादाने' (८।१४) धातु से "धातोर्वा तुमन्तादिच्छतिनैककर्तृकात्" (३।२।४) सूत्र द्वारा 'सन्' प्रत्यय, प्रकृत सूत्र से इडागम का निषेध, "ग्रहिस्वपिप्रच्छां सनि" (३।४।९) से 'र' को सम्प्रसारण, "चणपरोक्षाचेक्रीयितसनन्तेषु" (३।३।७) से धातु को द्वित्व, अभ्याससंज्ञा, "ऋवर्णस्याकारः" (३।३।१६) से ऋकार को अकार, "अभ्यासस्यादिर्व्यञ्जनमवशेष्यम्" (३।३।९) से हकार का लोप, "सन्यवर्णस्य" (३।३।२६) से अकार को इकार, "कवर्गस्य चवर्गः" (३।३।१३) से गकार को जकार, "हो ढः" (३।६।५६) से हकार को ढकार, "तृतीयादेर्घढधभान्तस्य धातोरादिचतुर्थत्वं सध्वोः" (३।६।१००) से गकारको घकार, "षढोः कः से" (३।८।४) से ढकार को ककार, "निमित्तात् प्रत्ययविकारागमस्थः सः षत्वम्" (३।८।२६) से सकार को षकार, 'क्-ष्' संयोग से 'क्ष्', "ते धातवः" (३।२।१६) से 'जिघृक्ष' की धातुसंज्ञा, वर्तमानाविभक्तिसंज्ञक परस्मैपद - प्र० पु०-ए० व० 'ति' प्रत्यय, 'अन्' विकरण तथा अकार का लोप।

२. **जुघुक्षति।** गुह्+ सन् + अन् + ति। 'गुहू संवरणे' (१।५९५) से सन्, इडागम का निषेध, द्वित्वादि तथा शेष कार्य पूर्ववत् ॥८१३।

## ८१४. उवर्णान्ताच्च [३।७।३२]

**[सूत्रार्थ]**

'सन्' प्रत्यय के परे रहते उवर्णान्त धातुओं से इडागम का निषेध होता है॥८१४।

**[दु० वृ०]**

उवर्णान्ताच्च धातोः सनि नेड् भवति। वर्णग्रहणं रुनुस्नुक्षुक्ष्णवर्थम् । रुरूषति, नुनूषति, सुस्नूषति, चुक्षूषति, चुक्ष्णूषति, पुपूषति, लुलूषति॥८१४।

**[दु० टी०]**

उव०। वर्णग्रहणमित्यादि। रुश्च नुश्च स्नुश्च क्षुश्च क्ष्णुश्च ते इत्यर्थः प्रयोजनमस्येति **विग्रहः**। अन्यस्मादुकारान्तादिट्प्रतिषेधः सिद्ध एवेति भावः। यौतेरपि वक्ष्यमाणेन विभाषेति यौतिरिह नोच्यते। अन्तग्रहणं **स्पष्टार्थम्** तथा **योगविभागश्च, चकार उक्तसमुच्चयमात्रे**॥८१४।

**[वि० प०]**

उवर्णा०। अथ वर्णग्रहणं किमर्थम्, उदन्तादित्यास्ताम् इत्याह - वर्णेत्यादि। उदन्तादिटः प्रतिषेधे येषामतिप्रतिषेधस्तदर्थं **वर्णग्रहण**मित्यर्थः। यौतिस्तु वक्ष्यमाणेन विकल्प एव॥८१४।

**[बि० टी०]**

उवर्णा०। अत्र 'यु' इति पाठो नास्त्येव, **"इवन्तर्द्ध०"** (३।७।३३) इत्यादिना विकल्पविधानात् । यत्तु भ्रस्जभृयूणामप्राप्ते विभाषेत्युक्तं तदपि स्थितेर्गतिरिति **केचित्** ।

**वस्तुतस्तु** सनि परसूत्रेणेड् विभाष्यते। अत्र वर्णग्रहणसामर्थ्याद् यथा रुप्रभृतीनां संग्रहस्तथा युधातोरपि ग्रहणं भवितुमुत्सहते। अत्र ग्रहणे तु **फलविरहः,** अतोऽत्र न गृह्यते। यत्तु **गुरवः** भ्रस्ज्भृयूणामित्युक्तवन्तस्तत्सामर्थ्यप्राप्त्यर्थो दर्शित इति। एतदेव **पञ्जीकृतो**क्तम् अर्थादुक्तमिति, अर्थस्तु सामर्थ्यलब्धः।।८१४।

## [समीक्षा]

'रुरूषति, लुलूषति, पुपूषति' इत्यादि शब्दों के सिद्ध्यर्थ इडागम का निषेध दोनों व्याकरणों में किया गया है। पाणिनि का सूत्र है – "सनि ग्रहगुहोश्च" (अ० ७।२।१२)। इस सूत्र में चकार से 'उगन्त' की अनुवृत्ति होती है। व्याख्याकारों ने कहा है कि सूत्र में अन्तग्रहण तथा पूर्ववर्ती सूत्र से प्रकृत सूत्र का योगविभाग ये दोनों ही सूत्रकार ने स्पष्टावबोधार्थ किए हैं। 'रु-नु' आदि धातुओं के भी ग्रहणार्थ सूत्र में 'वर्ण' शब्द पढ़ा गया है।

## [विशेष वचन]

१. वर्णग्रहणं रुनुस्नुक्षुक्ष्णवर्थम् (दु० वृ०)।
२. अन्तग्रहणं स्पष्टार्थम्, योगविभागश्च, चकार उक्तसमुच्चयमात्रे। (दु० टी०)।
३. उदन्तादिटः प्रतिषेधे येषामतिप्रतिषेधस्तदर्थं वर्णग्रहणमित्यर्थः (वि० प०)।
४. वस्तुतस्तु सनि परसूत्रेणेड् विभाष्यते (बि० टी०)।
५. अर्थस्तु सामर्थ्यलब्धः (बि० टी०)।

## [रूपसिद्धि]

१. **रुरूषति।** रु + सन् + अन् + ति। 'रु शब्दे' (२।१०) धातु से 'सन्' प्रत्यय, अनिट्, धातु को द्वित्व, "स्वरान्तानां सनि" (३।८।१२) से धातुगत उकार को दीर्घ, "निमित्तात् प्रत्ययविकारागमस्थः सः षत्वम्" (३।८।२६) से सकार को षकार, "ते धातवः" (३।२।१६) से 'रुरूष' की धातुसंज्ञा, वर्तमानासंज्ञक 'ति' प्रत्यय, 'अन्' विकरण तथा अकारलोप।

२-७. **नुनूषति।** नु + सन् + अन् + ति। **'सुस्नूषति।** स्नु + सन् + अन् + ति। **चुक्षूषति।** क्षु + सन् + अन् + ति। **चुक्ष्णूषति।** क्ष्णु + सन् + अन् + ति। **पुपूषति ।** पू + सन् + अन् + ति। **लुलूषति ।** लू + सन् + अन् + ति।।८१४।

# ८१५. इवन्तर्द्धभ्रस्ज्दन्भुश्रियूर्णुभरज्ञपिसनितनिपतिदरिद्रां वा [३।७।३३]

## [सूत्रार्थ]

'सन्' प्रत्यय के परे रहते 'इवन्त, ऋध्, भ्रस्ज्, दन्भ्, श्रि, यु, ऊर्णु, भर्, ज्ञप्, सन्, तन्, पत्, दरिद्रा' धातुओं से उत्तर में इडागम विकल्प से होता है।।८१५।

## [दु० वृ०]

एषां सनि परे इड् भवति वा। इवन्त-दिदेविषति, दुद्यूषति। ऋधु-अर्दिधिषति, ईर्त्सति। भ्रस्ज् - बिभ्रज्जिषति, बिभ्रक्षति। दन्भु-दिदम्भिषति, धिप्सति, धीप्सति। श्रिञ् -

शिश्रयिषति, शिश्रीषति। यु-यियविषति, युयूषति । ऊर्णुञ् - प्रोर्णुनविषति, प्रोर्णुनूषति। भर्-बिभरिषति, बुभूर्षति। ज्ञप-जिज्ञपयिषति, ज्ञीप्सति। सनु-सिसनिषति, सिषासति। तनु-तितनिषति, तितांसति। पत्लृ-पिपतिषति, पित्सति। दरिद्रा-दिदरिद्रिषति, दिदरिद्रासति। भ्रस्जभृयूणा**मप्राप्ते विभाषा**॥८१५।

## [दु० टी०]

इव०। सनीत्यनुवर्तते। भरेत्यना निर्देशाद् **'भृञ् भरणे'** (१।५९७) इति भौवादिकस्य ग्रहणम् । सिस्वरिषति, सुस्वूर्षति। **''स्वरतिसूति०''** (४।६।८३) इत्यादिना स्वरतेर्विभाषाऽस्त्येव। भ्रस्जभृयूणामिति यौतेरुवर्णान्तात् प्रतिषेधे सति अप्राप्ते विभाषा॥८१५।

## [वि० प०]

इवन्त०। दुद्यूषतीति। **''च्छ्वोः शूटौ पञ्चमे च''** (४।१।५६) इति वकारस्योट्। ईर्त्सतीति। 'ऋधिज्ञप्योरीरितौ वक्तव्यौ' इति वचनाद् ईर् अभ्यासलोपश्च। बिभृक्षतीति। भ्रस्जेर्भृजादेशो दर्शित एव। धीप्सतीति। **''दन्भेरिच्च''** (३।३।४१) इति ईत्वम् । **''सनि चानिटि''** (३।५।९) इत्यत्र चकारादनामिनोऽपि क्वचिदिति वचनादनुषङ्गलोपः। यियविषतीति। **''उवर्णस्य जान्तस्थ०''** (३।३।२७) इत्यादिना अभ्यास-उकारस्येकारः। बिभरिषतीति। सूत्रे 'भर' इत्यना निर्देशात् **'भृ भरणे'** (१।५९७) इति भौवादिकस्य ग्रहणम् । डु भृञस्तु नित्यम् - बुभूर्षतीति। ज्ञीप्सतीति। ऋधिना तुल्यं लक्षणम् । सिषासतीति। **''धुटि खनिसनिजनाम्''** (४।१।७१) इत्यत्र **''सनि च''** (३।५।९) इति वचनादात्त्वम् । तितांसतीति। **''हनिङ्गमोरुपधायाः''** (३।८।१३) इत्यत्र 'तितांसति, तितनिषति इति वा वक्तव्यम्' इति पक्षे दीर्घत्वम् । पित्सतीति। **''सनि मिमी०''** (३।३।३९) इत्यादिना स्वरस्येस् अभ्यासलोपश्च। **''स्कोः संयोगाद्योरन्ते च''** (३।६।५४) इति सकारलोपः। भ्रस्जेरित्यादि। अन्येषां प्राप्त इत्यर्थादुक्तम् ॥८१५।

## [बि० टी०]

इवन्त०। नन्वत्र वाग्रहणं किमर्थम्, भ्रस्ज्भृयूणां ग्रहणेनैव विकल्पोपलब्धेः, **'सिद्धे सत्यारम्भः'** (का० परि० ५९) इति न्यायात् । न च वक्तव्यं नियमार्थम् । उकारान्तानां मध्ये युधातोरेव, उवर्णान्ताच्चेत्यत्र दोषाद् व्यावृत्तिर्नास्तीत्यतो विकल्पः स्यात् । **ज्ञापकं** तु न भवत्येव? सत्यम् । परयोगेणात्र वा गम्यते इति। **''उवर्णान्ताच्च''** (३।७।३२) इत्यादौ विकल्पं बोधयिष्यति, **तन्निरासार्थं** वाग्रहणम् । अथवा **उत्तरार्थं** क्रियमाणं वाग्रहणम्, इह त्वेतदर्थम् ॥८१५।

## [समीक्षा]

'दिदेविषति-दुद्यूषति, दिदम्भिषति-धिप्सति' आदि शब्दरूपों के सिद्ध्यर्थ दोनों व्याकरणों में वैकल्पिक इडागम किया गया है। पाणिनि का सूत्र है – ''सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्'' (अ० ७।२।४९)। पाठान्तर में 'तन्, पत्, दरिद्रा' धातुओं का भी पाठ देखा जाता है। 'स्वृ' धातु से वैकल्पिक इडागम के सम्बन्ध

में टीकाकार ने कहा है कि वह तो "स्वरतिसूति०" (४।६।८३) सूत्र द्वारा ही सिद्ध है, अतः प्रकृत सूत्र में 'स्वृ' धातु नहीं पढ़ी गई है।

## [विशेष वचन]

१. यौतेरुवर्णान्तत्वात् प्रतिषेधे सत्यप्राप्ते विभाषा (दु० टी०)।

२. ऋधिज्ञप्योरीरितौ वक्तव्याविति वचनादीर् अभ्यासलोपश्च (वि० प०)।

३. धीप्सतीति। ..... इत्यत्र चकारादनामिनोऽपि क्वचिदिति वचनादनुषङ्गलोपः (वि० प०)।

४. 'सिद्धे सत्यारम्भः' इति न्यायात् (बि० टी०)।

५. अथवा उत्तरार्थं क्रियमाणं वाग्रहणम्, इह त्वेतदर्थम् (बि० टी०)।

## [रूपसिद्धि]

१. **दिदेविषति, दुद्यूषति।** दिव् + इट् + सन् + अन् + ति। देवितुमिच्छति। 'दिवु क्रीडाविजिगीषाव्यत्रहारद्युतिस्तुतिकान्तिगतिषु' (३।१) धातु से इच्छार्थ में "धातोर्वा तुमन्तादिच्छतिनैककर्तृकात्" (३।२।४) से 'सन्' प्रत्यय, प्रकृत सूत्र से इडागम, द्वित्व, अभ्याससंज्ञा, वकारलोप, धातु की उपधा इकार को गुण, सकार को षकार, 'दिदेविष' की धातुसंज्ञा, 'ति' प्रत्यय, अन् - विकरण तथा अकार का लोप।

इडभावपक्ष में 'दिव्' धातु से 'सन्' प्रत्यय, द्विर्वचनादि, 'ति' प्रत्यय, "छ्वोः शूटौ पञ्चमे च" (४।१।५६) से 'व' को 'ऊ', इकार को यकार, धातुसंज्ञा, ति-प्रत्यय, अन् -विकरण तथा अकार-लोप।

२. **अर्दिधिषति, ईर्त्सति।** ऋध् + इट् + सन् + अन् + ति। 'ऋधु वृद्धौ' (३।७९; ४।२०) धातु से 'सन्' प्रत्यय, धातुगत ऋकार को गुण, प्रकृत सूत्र से इडागम, "स्वरादेर्द्वितीयस्य" (३।३।२) से 'धि' को द्वित्व, अभ्याससंज्ञा, अभ्यासगत धकार को ढकार, सकार को षकार, 'अर्दिधिष' की धातुसंज्ञा, ति-प्रत्यय, अन् -विकरण तथा अकार का लोप। इडागम के अभाव में 'ऋधिज्ञप्योरीरितौ वक्तव्यौ' इस वचन से ऋ को ईर् तथा अभ्यासलोप होने पर 'ईर्त्सति' प्रयोग।

३. **बिभ्रज्जिषति, बिभ्रक्षति।** भ्रस्ज् + इट् + सन् + अन् + ति। 'भ्रस्ज पाके' (५।४) धातु से सन् प्रत्यय, इडागम, द्विर्वचनादि तथा सकार को जकार। इडागम के अभाव में सकार का लोप, जकार को षकार तथा षकार को ककार, भृजादेश होने पर 'बिभृक्षति'।

४. **दिदम्भिषति, धिप्सति, धीप्सति।** दन्भ् + इट् + सन् + अन् + ति। 'दन्भु दम्भे' (४।१९) से सन्, द्विर्वचनादि। इडभावपक्ष में "दन्भेरिच्च" (३।३।४१) से इत्त्व-ईत्त्व तथा अभ्यासलोप।

५. **शिश्रयिषति, शिश्रीषति।** श्रि + इट् + सन् + अन्+ ति। 'श्रिञ् सेवायाम्' (१।६०४) से सन्, द्विर्वचनादि। इडभावपक्ष में "स्वरान्तानां सनि" (३।८।१२) से धातुगत इकार को दीर्घ।

६. **यियविषति, युयूषति।** यु + इट् + सन् + अन् + ति। 'यु मिश्रणे' (२।६) से सन्, द्विर्वचनादि। इडभावपक्ष में उकार को दीर्घ।

७. **प्रोर्णुनविषति, प्रोर्णुनूषति।** प्र + ऊर्णु + इट् + सन् + अन् + ति। 'प्र' उपसर्गपूर्वक 'ऊर्णुञ् आच्छादने' (२।६४) से सन्, इट्, द्विर्वचनादि। इडभावपक्ष में उकार को दीर्घ।

८. **बिभरिषति, बुभूर्षति।** भृ + इट् + सन् + अन् + ति। 'भृञ् भरणे' (१।५९७) से सन्, इट्, द्विर्वचनादि। इडभावपक्ष में "उरोष्ठ्योपधस्य च" (३।५।४३) से ऋकार को 'उर्' आदेश।

९. **जिज्ञपयिषति, ज्ञीप्सति।** ज्ञप् + इट् + सन् + अन् + ति। 'ज्ञप मानुबन्धश्च' (९।५४) से सन्, इट्, द्विर्वचनादि। इडभावपक्ष में "ऋधिज्ञप्योरीरितौ" इस वचन के अनुसार ज्ञप्धातुगत अकार को इकार तथा उसको दीर्घ।

१०. **सिसनिषति, सिषासति।** सन् + इट् + सन् + अन् + ति। 'षणु दाने' (७।२) धातु से सन्, इट्, द्विर्वचनादि। इडभावपक्ष में "सनि च" (३।५।९) से नकार को आत्त्व।

११. **ततनिषति, तितांसति।** तन् + इट् + सन् + अन् + ति। 'तनु विस्तारे' (७।१) धातु से सन्, इट्, द्विर्वचनादि। इडभावपक्ष में धातुगत अकार को दीर्घ तथा नकार को अनुस्वार।

१२. **पिपतिषति, पित्सति।** पत् + इट् + सन् + अन् + ति। 'पत्लृ पतने' (१।५५४) धातु से सन्, इट्, द्विर्वचनादि। इडभावपक्ष में "सनि मिमीमादारभलभशकपतपदामिस् स्वरस्य" (३।३।३९) से अकार को इस् तथा अभ्यासलोप।

१३. **दिदरिद्रिषति, दिदरिद्रासति।** दरिद्रा + इट् + सन् + अन् + ति। 'दरिद्रा दुर्गतौ' (२।३७) धातु से सन्, इट्, द्विर्वचनादि। इडभावपक्ष में आकारलोप का अभाव ॥८१५।

## ८१६. भुवः सिज्लुकि [३।७।३४]

### [सूत्रार्थ]

सिच् प्रत्यय का लोप होने पर 'भू' धातु से उत्तर में इडागम नहीं होता है ॥८१६।

### [दु० वृ०]

भुवो धातोः सिज्लुकि सति नेड् भवति। अभूत्, अभूताम्। सिज्लुकीति किम्? व्यत्यभविष्ट ॥८१६।

### [दु० टी०]

भुवः। ननु भुवो लुकीति कृते अर्थादिह सिच एवावसीयते। बोभवितेति। **चेक्रीयितलुकि** इड् भवत्येव, एकस्वराद् भुवो विहितमसार्वधातुकमिति विहितविशेषणात्? सत्यम्। **प्रतिपत्तिगौरवं** स्यात् ॥८१६।

### [बि० टी०]

भुवः । नन्वत्र वाग्रहणं कथं न वर्तते ? सत्यम् , पृथग्योगात् । अन्यथा भुवः सिज्लुकीति उक्तं स्यात् । नन्वनेन किं प्रमाणम् , **'लुग्लोपे न प्रत्ययकृतम्'** (कलाप० २२२।६९) इति भविष्यति ? सत्यम् । परस्य न लुग्लोप इति। ननु प्रागिट् कथं न स्यात् **'आगमादेशयोरागमविधिर्बलवान्'** (का० परि० ४०) इति न्यायाल्लोपस्यादेशत्वात् परत्वाच्च ? सत्यम् । लुग्लोपयोर्विशेषणत्वात् । यत्तु पर्यायत्वादित्युक्तम् , तदपि लुक्श्रुतं कार्यं लोपे स्यात्, लोपकृतं तु कार्यं लुकि न स्यात् । यदपि लुग्लोप इति लोपे प्रसज्येत तदपि तत्र लोप इति चिह्नितत्वान्न लोपे, अन्यथा लुर्कीति कृतं स्यात् किं लोप इत्यनेन। अत एव लुग्लोपयोर्विशेषप्रतिपत्त्यर्थमित्युक्तम् । अतोऽस्यादेशत्वाभावान्न प्रागिट् । यदि च परत्वमित्युक्तं तथापि नित्यत्वेन लोपस्य बलवत्त्वम् अनवकाशत्वाच्च ॥८१६।

### [समीक्षा]

'अभूत् , अभूताम्' आदि प्रयोगों में इडागम दोनों ही व्याकरणों में नहीं किया जाता है । पाणिनि द्वारा इडागम के निषेध का स्पष्ट निर्देश प्राप्त नहीं है । परन्तु "एकाच उपदेशेऽनुदात्तात्" (अ० ७।२।१०) सूत्र की व्याख्या में सर्वप्रथम जो यह निर्धारण किया गया है– 'अनिट् स्वरान्तो भवतीति दृश्यताम्' इसके बल से विशेष स्थिति में 'भू' धातु को भी अनिट् कहा जा सकता है ।

### [विशेष वचन]

१. प्रतिपत्तिगौरवं स्यात् (दु० टी०) ।
२. लुग्लोपयोर्विशेषणत्वात् (बि० टी०) ।
३. लुग्लोपयोर्विशेषप्रतिपत्त्यर्थम् (बि० टी०) ।
४. यदि च परत्वमित्युक्तम् , तथापि नित्यत्वेन लोपस्य बलवत्त्वम् अनवकाशत्वाच्च (बि० टी०) ।

### [रूपसिद्धि]

१. **अभूत्** । अट् + भू + सिच् + दि । 'भू सत्तायाम्' (१।१) धातु से अद्यतनीविभक्तिसंज्ञक परस्मैपद – प्र० पु०-ए० व० 'दि' प्रत्यय, "अड् धात्वादिर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु" (३।८।१६) से धातुपूर्व अडागम, "सिजद्यतन्याम्" (३।२।२४) से 'सिच्' प्रत्यय, "ह्स्वाच्चानिटः" (३।६।५२) से उसका लोप, प्रकृत सूत्र से इडागम का प्रतिषेध तथा "पदान्ते धुटां प्रथमः" (३।८।१) से दकार को तकारादेश ।

२. **अभूताम्** । अट् + भू + सिच् + ताम् । 'भू सत्तायाम्' (१।१) से अद्यतनीसंज्ञक प्र० पु०-द्विव० 'ताम्' प्रत्यय तथा शेष प्रक्रिया पूर्ववत् ॥८१६।

## ८१७. सृवृभृस्तुद्रुश्रुस्रुव एव परोक्षायाम् [३।७।३५]

### [सूत्रार्थ]

परोक्षासंज्ञक प्रत्यय के परे रहते 'सृ, वृ, भृ, स्तु, द्रु, श्रु, स्रु' इन सभी धातुओं के उत्तर में इडागम नहीं होता है ॥८१७।

## [दु० वृ०]

एभ्य एव परोक्षायामनिड् भवति। सृ–ससृव, ससृम। वृङ् , वृञ् वा–ववृवहे, ववृमहे। डु भृञ् ,भृञ् वा-बभृव, बभृम । ष्टुञ् - तुष्टुव, तुष्टुम। द्रु-दुद्रुव, दुद्रुम। श्रु-शुश्रुव, शुश्रुम। स्तु-सुस्तुव, सुस्तुम। एभ्य एवेति किम् ? पेचिव, शेकिव, ददिव, ररन्धिव, नेशिव। रधादित्वाद् विभाषापि बाध्यते। परत्वाद् विकल्प इत्येके - ररन्धिव, रेध्वेति ॥८१७।

## [दु० टी०]

सृवृ०। विशेषाभावात् सामान्यग्रहणम् इत्यादि । वृङ्वृञिति। वृङ्वृञोः परोक्षायां प्राप्ते इट् प्रतिषिध्यते। सत्येकवाक्ये खल्वेवशब्देन सम्बन्धो वृग्रहणन्तु न पृथगुच्यते। लाघवायेति । स्नादीनां तु सिद्धे प्रतिषेधे युक्तो नियम इति पचादिभ्यः पुनरिटः प्रसङ्गो भवति। एवग्रहणं **प्रकृतिनियमनिरासार्थम्,** अन्यथा स्नादीनां परोक्षायामेव नेड् भवति 'सर्ता, भर्ता' इतीट् स्यात् । 'पेचिव, शेकिव' इत्यत्र न स्यात् । अथ **'ष्टुञ् स्तुतौ'** (२।६५) इति नेटो **गणकारो** निर्देशं विधत्ते, अतो **विपरीतनियमो** न भवति इत्ययुक्तमेव। यस्मादेवग्रहणेनात्र **व्याप्ति**रवधार्यते, तेन कृत्रकरणलक्षणापि रधादिलक्षणविभाषा व्यावृत्यते इत्याह– ररन्धिवेति। परत्वाद् इति **एकेऽन्ये** । रेध्वेति। **''अस्यैकव्यञ्जन०''** (३।४।५१) इत्यादिना एत्वमभ्यासलोपश्च, नैतद् **भाष्य**सम्मतम् ॥८१७।

## [वि० प०]

सृवृ०। एवग्रहणान्न विपरीतनियमः – एभ्य एवेत्यादि। तेन **''पचिवचि०''** (३।७।१८) इत्यादिना प्रतिषिद्धोऽपीट् पुनः परोक्षायां प्रतिप्रसूयते। **''अस्यैकव्यञ्जन०''** (३।४।५१) इत्यादिना एत्वम् अभ्यासलोपश्च। ररन्धिवेति। **''रधियभोः स्वरे''** (३।५।३२) इति नकारागमः ॥८१७।

## [बि० टी०]

सृवृ० । नन्वत्र एवग्रहणेन किं प्रयोजनम्, यावता सिद्धादेव नियमो गम्यते, यदि परयोगेणेत्युच्यते तत् तेनैव निरस्तम्, तत्रैव वाग्रहणाभावात् ? सत्यम् । एवग्रहणं ज्ञापयति क्वचिदत्राप्यनिट् स्यात्, तेन **'न जगाम गमेर्धातोर्वृक्षादिति न पञ्चमी'** इति सिद्धम् ॥८१७।

**।।इति श्रीबिल्वेश्वरटीकायामाख्याते तृतीयाध्याये सप्तमः इडागमादिपादः समाप्तः।।**

●

## [समीक्षा]

'ससृम, शुश्रुम, तुष्टुव' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में इडागम का निषेध किया गया है। पाणिनीय सूत्र में ८ धातुओं का पाठ है – ''कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि'' (अ० ७।२।१३)। कातन्त्रकार ने 'कृ' धातु से इडागमनिषेधार्थ पृथक् सूत्र बनाया है, अतः प्रकृत सूत्र में ७ ही धातुएँ पठित हैं ।

## [विशेष वचन]

१. रधादित्वाद् विभाषाऽपि बाध्यते, परत्वाद् विकल्प इत्येके (दु० वृ०) ।

२. एवग्रहणं प्रकृतिनियमनिरासार्थम् (दु० टी०) ।
३. अथ ष्टुञ् स्तुताविति नेटो गणकारो निर्देशं विधत्ते, अतो विपरीतनियमो न भवति (दु० टी०) ।
४. एवग्रहणेनात्र व्याप्तिरवधार्यते ..... नैतद् भाष्यसम्मतम् (दु० टी०)।
५. एवग्रहणान्न विपरीतनियमः (वि० प०) ।
६. एवग्रहणं ज्ञापयति - क्वचिदत्राप्यनिट् स्यात् (बि० टी०) ।

**[रूपसिद्धि]**

१-२. **ससृव, ससृम** । सृ + परोक्षा - व, म । 'सृ गतौ' (१।२७४) धातु से परोक्षाविभक्तिसंज्ञक उत्तमपुरुष-द्विव० 'व' एवं ब० व० 'म' प्रत्यय, द्विर्वचनादि तथा प्रकृत सूत्र से अनिट् ।

३-४. **ववृवहे, ववृमहे** । वृ + परोक्षा - वहे, महे । 'वृञ् वरणे, वृङ् सम्भक्तौ' (४।८; ८।५१) धातु से परोक्षासंज्ञक उत्तमपुरुष द्विव० 'वहे' तथा ब० व०– 'महे' प्रत्यय, द्विर्वचनादि तथा प्रकृत सूत्र से इडागम का निषेध ।

५-६. **बभृव, बभृम** । भृ + परोक्षा - व, म । 'भृञ् भरणे, डु भृञ् धारण-पोषणयोः' (१।५९७; २।८५) धातु से परोक्षासंज्ञक उत्तमपुरुष-द्विव० 'व' प्रत्यय एवं ब० व० 'म' प्रत्यय, द्विर्वचनादि तथा इडागम का प्रतिषेध ।

७-८. **तुष्टुव, तुष्टुम** । स्तु + परोक्षा - व, म । 'ष्टुञ् स्तुतौ' (२।६५) धातु से परोक्षासंज्ञक उत्तमपुरुष- द्विव० 'व' एवं ब० व० 'म' प्रत्यय, द्विर्वचनादि तथा इडागम का निषेध ।

९-१०. **दुद्रुव, दुद्रुम** । द्रु + परोक्षा - व, म । 'द्रु गतौ, द्रु जिघांसायाम्' (१।२७९; ४।१७) धातु से परोक्षासंज्ञक उत्तमपुरुष-द्विव० 'व' एवं ब० व० 'म' प्रत्यय, द्विर्वचनादि तथा अनिट् ।

११-१२. **शुश्रुव, शुश्रुम** । श्रु + परोक्षा - व, म । 'श्रु श्रवणे' (१।२७८) धातु से परोक्षासंज्ञक उत्तमपुरुष - द्विव० 'व' एवं ब० व० 'म' प्रत्यय, द्विर्वचनादि तथा प्रकृत सूत्र से इडागम का प्रतिषेध ।

१३-१४. **सुस्रुव, सुस्रुम** । स्रु + परोक्षा - व, म । 'स्रु गतौ' (१।२७९) धातु से परोक्षासंज्ञक उत्तमपुरुष- द्विव० 'व' एवं ब० व० 'म' प्रत्यय, द्विर्वचनादि एवं प्रकृत सूत्र से इडागम का निषेध ॥८१७।

## ८१८. थल्यृकारात् [३।७।३६]

**[सूत्रार्थ]**

परोक्षासंज्ञक 'थल्' प्रत्यय के परे रहते ऋकारान्त धातु से इडागम नहीं होता है ॥८१८।

**[दु० वृ०]**

ऋकारान्ताद् धातोस्थलि नेड् भवति । दधर्थ, जहर्थ । थलीति किम् ? दद्रिव, दद्रिम । ऋकारान्तादिति किम् ? स्तॄञ् - तस्तरिथ ।

**नित्यात्वतां स्वरान्तानां सृजिदृशोश्च वेट् थलि ।**
**तृचि नित्यानिटः स्युश्चेद् वृव्येऽदां नित्यमिट् थलि।।**

पपक्थ, पेचिथ । पपाथ, पपिथ । चिचेथ, चिचयिथ । सस्रष्ठ, ससर्जिथ । दद्रष्ठ, ददर्शिथ । तृचि योऽकारवान् नित्यानिट् इति विशेषणात् । अदेर्घस्लृ – जघसिथ । वेञो वयिः - उवयिथ । अन्जेर्विकल्पेट्त्वात् - आनञ्जिथ, आरिथ, ववरिथ, विव्ययिथ, आदिथ ॥८१८।

## [दु० टी०]

थलि० । नित्यात्वतामित्यादि । नित्यश्चासावच्चेति **कर्मधारयः** । स विद्यते येषामिति वन्तुः । उपदेशकाले येऽकारवन्तः इत्यर्थः । ते च नित्यात्वन्तः स्वरान्ताश्च सृजिदृशौ च तृचि विषये नित्यानिटो यदि भवेयुरित्यर्थः । वृव्येऽदामिति । वृञोऽर्तेरियर्तेश्च व्येञोऽदश्चेत्यर्थः। वृञर्त्योर्नित्ये प्राप्ते प्रतिषेधे प्राप्तेऽदिव्येञोर्विभाषायां प्राप्तायां नित्यमुच्यते। **श्लोके** पुनस्थल्ग्रहणं स्पष्टार्थम् । नैतद् वक्तव्यम्, वाग्रहणमनन्तरं पूर्वसूत्राद् व्यवस्थिविभाषात्वेनानुवर्तयितव्यम्, एवं सति थल्यृकारादिति वचनं नित्यार्थम् । तथा 'तुष्टोथ, दुद्रोथ, शुश्रोथ'। विभाषा न भवति । एकस्वराधिकाराच्च - जजागरिथ ॥८१८।

## [वि० प०]

थल्यृ० । नित्यात्वतामित्यादि । नित्यश्चासावच्चेति **नित्यात्,** स विद्यते येषां ते **नित्यात्वन्तः** । उपदेशावस्थायामकारान्ता ये धातव इत्यर्थः । कीदृशानामेषां थलि वेडित्याह - 'तृचि नित्यानिटः स्युश्च' इत्यादि । तृचि विषये नित्यात्वन्तः स्वरान्ताश्च सृजिदृशौ च यदि सर्वे नित्यमनिटो भवेयुरित्यर्थः । वृव्येऽदामिति । **'वृञ् वरणे, ऋ प्रापणे, ऋ गतौ, व्येञ् संवरणे, अद प्सा भक्षणे'** (४।८; १।२७५; २।७४; १।६१२; २।१) इत्येतेषामित्यर्थः । तदेतन्न वक्तव्यम् **''इवन्तर्द्ध०''** (३।७।३३) इत्यतो **मण्डूकप्लुत्या** वाऽधिकारात् सिद्धमिति । पपिथेति । **''इटि च''** (३।४।२८) इत्याकारलोपः, 'तृचि' इत्यादौ **''वा परोक्षायाम्, वेञश्च वयिः''** (३।४।८०, ८१) इति वचनाभ्यां परोक्षायामादेशविधानमिति कुतो घसेर्वयेश्च तृचि नित्यमकारयोगोऽनिट्त्वं चेति वयेरभ्यासे **''परोक्षायामभ्यासस्योभयेषाम्''** (३।४।४) इत्यनेन सम्प्रसारणम् , **''तस्मान्नागमः''** (३।३।१९) इत्यादिनाऽञ्जेर्नकारागमः, **''न व्ययतेः परोक्षायाम्''** (३।४।२१) इति प्रतिषेधवचनाद् व्येञः सन्ध्यक्षरान्तलक्षणमात्वं न भवति ॥८१८।

## [समीक्षा]

'दधर्थ, जहर्थ, सस्मर्थ, दध्वर्थ' इत्यादि शब्दरूपों में इडागम का निषेध दोनों व्याकरणों में किया गया है। पाणिनि का सूत्र है – ''ऋतो भारद्वाजस्य'' (अ० ७।२।६३)। यहाँ आचार्य भारद्वाज के निश्चयानुसार निषेध सूचित किया गया है। अर्थात् ऋकारान्त धातुओं से ही इडागम का निषेध भारद्वाज के अनुसार जानना चाहिए, अतः 'ययिथ, पेचिथ' आदि में इडागम का निषेध नहीं होगा।

## [विशेष वचन]

१. नित्यात्वतामित्यादि। ..... उपदेशकाले येऽकारवन्त इत्यर्थः (दु० टी०)।

२. श्लोके पुनस्थलग्रहणं स्पष्टार्थम् (दु० टी०) ।

३. एवं सति थल्यृकारादिति वचनं नित्यार्थम् (दु० टी०)।

४. नित्यात्वन्तः । उपदेशावस्थायामकारान्ता ये धातव इत्यर्थः (वि० प०)।

५. "इवन्तर्द्ध" इत्यतो मण्डूकप्लुत्या वाऽधिकारात् सिद्धमिति (वि० प०) ।

**[रूपसिद्धि]**

१. **दधर्थ** । धृ + परोक्षा - थल् । 'धृञ् धारणे' (१।५९९) धातु से परोक्षाविभक्तिसंज्ञक म० पु०- ए० व० 'थल्' प्रत्यय, "चण्परोक्षाचेक्रीयितसनन्तेषु" (३।३।७) से 'धृ' को द्विर्वचन, पूर्ववर्ती 'धृ' की "पूर्वोऽभ्यासः" (३।३।४) से अभ्याससंज्ञा, "ऋवर्णस्याकारः" (३।३।१६) से अभ्याससंज्ञक 'धृ' धातुगत ऋकार को अकार, "द्वितीयचतुर्थयोः प्रथमतृतीयौ" (३।३।११) से ध् को द्, "नाम्यन्तयोर्धातुविकरणयोर्गुणः" (३।३।१) से 'धृ' धातुगत ऋकार को गुण-अर् तथा प्रकृत सूत्र से इडागम का प्रतिषेध ।

२. **जहर्थ** । हृ + परोक्षा - थल् । 'हृञ् हरणे' (१।५९६) धातु से परोक्षाविभक्तिसंज्ञक म० पु० - ए० व० 'थल्' प्रत्यय, द्विर्वचनादि, "हो जः" (३।३।१२) से हकार को जकार तथा इडागम का प्रतिषेध ॥८१८।

## ८१९. कृञोऽसुटः [३।७।३७]

**[सूत्रार्थ]**

परोक्षा-विभक्ति के परे रहते सुडागमरहित 'कृ' धातु को इडागम नहीं होता है॥८१९।

**[दु० वृ०]**

असुटः कृञः परोक्षायां थलि च नेड् भवति। चकृव, चकृम, चकर्थ । असुट इति किम् ? सञ्चस्करिव, सञ्चस्करिम, सञ्चस्करिथ ।

**स्यसिजाशीःश्वस्तनीषु भावकर्मार्थिकासु च।**
**स्वरहनग्रहदृशामिड् वेञ्वच्च** ।। इति वक्तव्यम् ।

चेष्यते, चायिष्यते । दास्यते, दायिष्यते । अचेष्यत, अचायिष्यत । अदास्यत, अदायिष्यत । हनिष्यते, घानिष्यते । अहनिष्यत, अघानिष्यत । ग्रहीष्यते, ग्राहिष्यते । अग्रहीष्यत, अग्राहिष्यत। द्रक्ष्यते, दर्शिष्यते । अद्रक्ष्यत, अदर्शिष्यत । सिचि च - अचेषाताम्, अचायिषाताम् । अदिषाताम्, अदायिषाताम् । अवधिषाताम्, अघानिषाताम् । अग्रहीषाताम्, अग्राहिषाताम् । अदृक्षाताम्, अदर्शिषाताम् ।

आशिषि च – चेषीष्ट, चायिषीष्ट । दासीष्ट, दायिसीष्ट । वधिसीष्ट, घानिसीष्ट । ग्रहीषीष्ट, ग्राहिषीष्ट । द्रक्षीष्ट, दर्शिषीष्ट । श्वस्तन्यां च - चेता, चायिता । दाता, दायिता । हन्ता, घानिता । ग्रहीता, ग्राहिता । द्रष्टा, दर्शिता । इज्वद्भावादिटस्तु कारितलोपः स्यात् - कारयिष्यते, कारिष्यते । चोरयिष्यते, चोरिष्यते । मानुबन्धानां ह्रस्वो नित्यं गमिष्यते ॥८१९।

## [दु० टी०]

कृञो० । स्नादिनियमादिति प्राप्ते **प्रतिषेधार्थम्,** इह तु परोक्षानुवर्तते विशेषातिदिष्टत्वात्। नन्वनन्तरस्थलिति **''थलि च''** (३।४।५२) इति यद् **वृत्तावुक्तम्, तन्मन्दधियां सुखार्थमेव।** ससुट: पूर्वेण प्रतिषेधे प्राप्तेऽसुड् इत्युच्यते 'कृञोऽस:' इति सिद्धे न विद्यते सकारो यस्येति यद् असुटो ग्रहणं तत् **स्पष्टार्थम् ।** स्यसिजाशीरित्यादि। इड् विभाषया भवति स च इच् प्रत्यय इवेत्यर्थ: । 'अघानिषाताम्, घानिषीष्ट' इति इज्वद्भावविधानसामर्थ्याद् वधिरादेशो न भवति । वक्तव्यं व्याख्येयम् । **केचिदिच्छन्ति केचिन्नेच्छन्ती**त्युभयं प्रमाणीकृत्य **परेण** सूत्रं कृतमिदमित्यर्थ: ॥८१९।

## [वि० प०]

कृञ: । स्नादिनियमादिटि प्राप्ते प्रतिषेध उच्यते । थलि तु थल्यृकारादिति। इह थलो विशेषातिदिष्टत्वात् परोक्षानुवर्तते, न त्वनन्तरस्थलीति। यच्च तद्ग्रहणेन गृहीतस्य थलो **वृत्तौ** विवरणं तत्तु **सुखार्थमेव ।** स्यसिजाशीरित्यादि । इच्प्रत्ययवदिडागमो विभाषेत्यर्थ:। वक्तव्यं व्याख्येयम् । इहापि वाशब्दानुवृत्त्या सिद्धमित्यर्थ: । इच्कार्यं पुनर्वृद्धिरायिरादेशो हन्तेर्घ:। उपधाया दीर्घ इत्यादिकमिह वेदितव्यम् । हन्तेस्तु पक्षे **''हन्तेर्वधिराशिषि, अद्यतन्यां च''** (३।४।८२,८३), इति वधिरादेश: । मानुबन्धानामित्यादि । एतदपि वाशब्दादेव, अन्यथा **''इचि वा''** (३।४।६६) इति विकल्प एव स्यात् । **अन्ये** तु 'गामिष्यते' इत्यपि मन्यन्ते । **पक्षे** गमिष्यते इति॥८१९।

## [समीक्षा]

'चकृव, चकृम, चकर्थ' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों व्याकरणों में अनिट् का विधान किया गया है । पाणिनि का सूत्र है – ''कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि'' (अ० ७।२।१३) । 'कृ' धातु के विषय में वार्त्तिककार ने कहा है कि सुडागमरहित ही 'कृ' धातु को इट् - निषेध होगा, 'संचस्करिव-संचस्करिम' में सुडागम के कारण इडागम प्रवृत्त हो जाएगा– ''कृञोऽसुट इति वक्तव्यम् (वा०), ससुट्कस्येडागमो यथा स्यात् - संचस्करिव, संचस्करिम'' (काशिका ७।२।१३) । यही कारण है कि इस विशेषता के कारण कातन्त्रकार ने 'कृ' धातु से इडागमनिषेधार्थ सूत्र ३।७।३६ से भिन्न प्रकृत सूत्र बनाया है।

## [विशेष वचन]

१. मानुबन्धानां ह्रस्वो नित्यम् (दु० वृ०) ।
२. थलि चेति यद् वृत्तावुक्तं तन्मन्दधियां सुखार्थमेव (दु० टी०) ।
३. यद् असुटो ग्रहणं तत् स्पष्टार्थम् (दु० टी०) ।
४. केचिदिच्छन्ति, केचिन्नेच्छन्तीत्युभयं प्रमाणीकृत्य परेण सूत्रं कृतम् इदमित्यर्थ: (दु० टी०)।
५. यद् वृत्तौ विवरणं तत्तु सुखार्थमेव (वि० प०) ।
६. वक्तव्यं व्याख्येयम् । इहापि वाशब्दानुवृत्त्या सिद्धमित्यर्थ: (वि० प०) ।
७. अन्ये तु 'गामिष्यते' इत्यपि मन्यन्ते (वि० प०) ।

## [रूपसिद्धि]

१. **चकृव** । कृ + परोक्षा - व । 'डु कृञ् करणे' (७।७) धातु से परोक्षाविभक्तिसंज्ञक उ० पु० - द्विव० 'व' प्रत्यय, द्विर्वचनादि तथा प्रकृत सूत्र से इडागम का प्रतिषेध ।

२. **चकृम** । कृ + परोक्षा-म । 'डु कृञ् करणे' (७।७) धातु से परोक्षाविभक्तिसंज्ञक उ० पु० - ब० व० 'म' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत् ।

३. **चकर्थ** । कृ + परोक्षा - थल् । 'डु कृञ् करणे' (७।७) धातु से परोक्षासंज्ञक म० पु० - ए० व० 'थल्' प्रत्यय तथा अन्य प्रक्रिया प्रायः पूर्ववत् ॥८१९।

# ८२०. सुड् भूषणे सम्पर्युपात् [३।७।३८]

## [सूत्रार्थ]

भूषण अर्थ की विवक्षा में 'सम् - परि - उप' उपसर्गों के बाद आने वाली 'कृ' धातु से पूर्व में सुट् का आगम होता है ॥८२०।

## [दु० वृ०]

भूषणेऽर्थे सम्पर्युपात् परस्य कृञः सुडादिर्भवति। संस्कर्ता, सञ्चस्कार, समस्कार्षीत्। परिष्कर्ता, परिचस्कार, पर्यस्कार्षीत् । अडभ्यासव्यवधानेऽपि षत्वमिष्यते। उपस्कर्ता, उपचस्कार, उपास्कार्षीत्। एवं समवायेऽपि वक्तव्यम् । भूषणसमवायाभ्यामन्यत्रापि दृश्यते । संस्कृतमिदमनित्यमिति। उपात् प्रतियत्नविकृतवाक्याध्याहारेषु वक्तव्यः । असिपत्रस्योपस्कुरुते,उपस्कृतं भुङ्क्ते । विकृतं भुङ्क्ते इत्यर्थः। उपस्कृतं जल्पति। वाक्याध्याहारं जल्पतीत्यर्थः ॥८२०।

**।।इति दौर्गसिंह्यां वृत्तावाख्याते तृतीयाध्याये**
**सप्तमः इडागमपादः समाप्तः।।**

●

## [दु० टी०]

सुट्० । कथं पुनः कृञः कात् पूर्वोऽवसीयते ? सत्यम्, इडागमोऽसार्वधातुकस्यादिरित्यतः आदिग्रहणानुवृत्तेरित्याह – कृञः सुडादिर्भवतीति। उकार **उच्चारणार्थः** । ढकारोऽपि **सुखावबोधार्थ** एव। ढकारेण विना रेफेण भवितव्यमिति नास्ति **लाघवम्** । एवं संस्करोति, परिष्करोति, उपस्करोति कन्याम् , भूषयतीत्यर्थः । समवायेऽपि वक्तव्यमिति । वक्तव्यं व्याख्येयम् । **''इवन्तर्द्ध०''** (३।७।३३) इत्यतो विभाषा बहुलत्वेन प्रतिपत्तव्येति भावः। तत्र नः संस्कृतम्, तत्र नः परिष्कृतम्, तत्र न उपस्कृतम्, समुदितमित्यर्थः। संस्कृतं वचनमिति भाक्तो निर्देशः, भूषणे प्रविशति। इदं तु न सिध्यतीत्याह - संस्कृतमित्यादि । संस्कृतत्वेनानित्यमेव साध्यते, नित्यस्य संस्काराभावात् । उपादित्यादि । पुनः पुनः प्रयत्नः **प्रतियत्नः** । प्रकृतेरन्यथाभावो **विकृतिः**। सतोऽर्थस्य सम्बन्धोपपत्तये तादवस्थ्याय वा गम्यमानार्थस्य वाक्यैकदेशस्य स्वरूपेणोपादानं **वाक्याध्याहारः** ।

एवं **सोपस्काराणि सूत्राणि** सवाक्याध्याहाराणीत्यर्थः । किरतेर्लवने उपात् किरतेर्लवनविषयश्चेदर्थो भवतीत्यर्थः । उपस्कीर्य मद्रकाराः लुनन्तीति। विक्षिप्य लुनन्तीत्यर्थः।

लवन इति किम् ? उपकिरति धान्यम् । प्रतेश्च हिंसायाम् - प्रतिस्कीर्णं ते वृषल ! भूयात्, उपस्कीर्णं ते वृषल ! भूयात्, उपस्कीर्णं ते वृषल ! भूयात् । हिंसानुबन्धो विक्षेपस्ते भूयादित्यर्थः । अपाच्चतुष्पादस्य हर्षेणापस्किरते वृषभः । हर्षेण विलिख्य क्षिपतीत्यर्थः । चतुष्पादस्येति किम् ? अपकिरति बालस्तुष्टः । पक्षिणि भक्षाय-अपस्किरते कुक्कुटो भक्षार्थी । विलिख्य क्षिपतीत्यर्थः । शुनि चाश्रयाय - अपस्किरते कुक्कुरः आश्रयार्थी, विलिख्य क्षिपतीत्यर्थः । प्रात् तुम्पतेर्गवि-तुन्य इत्यस्य गवि कर्तरि सुडित्यर्थः । प्रस्तुम्पति गौः, प्रस्तुम्पति वत्सो मातरम् । एतच्च वाशब्दस्याधिकृतस्य बहुलार्थत्वात् **लोकतो** वा सिद्धम् ॥८२०।

**॥ इत्याचार्यदुर्गसिंहविरचितायां कातन्त्रवृत्तिटीकायामाख्याते तृतीयाध्याये सप्तमः इडागमपादः समाप्तः ॥**

●

## [वि० प०]

सुट्०। **अधिकारस्येष्टविषयार्थत्वात् ''इडागमोऽसार्वधातुकस्यादिः''** (३।७।१) इत्यत आदिग्रहणमनुवर्तते इत्याह– कृञः सुडादिरिति । एवमिति समवायः समुदाय उच्यते । वक्तव्यं व्याख्येयम् । अत्रापि वाशब्दोऽनुवर्तते इति भावः। तत्र नः संस्कृतम्, तत्र नः परिष्कृतम्, तत्र न उपस्कृतम् । समुदितमित्यर्थः । भूषणेत्यादि। संस्कृतत्वेनानित्यत्वमेव साध्यते, नित्यस्य संस्कारायोगात् । वाक्याध्याहारं जल्पतीति सतोऽर्थस्य सम्बन्धोपबुद्ध्यर्थं तादवस्थ्यकथनार्थं वा गम्यमानार्थस्य वाक्यैकदेशस्य स्वरूपेणोपादानं **वाक्याध्याहारः।** एवं **सोपस्काराणि सूत्राणि** भवन्ति । सवाक्याध्याहारार्णात्यर्थः ॥८२०।

**॥ इति श्रीमत्त्रिलोचनदासकृतायां कातन्त्रवृत्तिपञ्जिकायामाख्याते तृतीयाध्याये सप्तमः इडागमपादः समाप्तः ॥**

●

## [समीक्षा]

'संस्कर्ता, परिष्कर्ता, उपस्कर्ता' आदि शब्दरूपों के सिद्ध्यर्थ सुडागम का विधान पाणिनि तथा शर्ववर्मा दोनों ही आचार्यों ने किया है। पाणिनि का सूत्र है – ''सम्पर्युपेभ्यः करोतौ भूषणे'' (अ० ६।१।१३७) । समवाय-हिंसा-प्रतियत्न-लवन आदि अर्थों में भी सुडागम के लिए पाणिनि ने सूत्र बनाए हैं– द्र० सूत्र - ६।१।१३५, १३६, १३८, १३९ आदि, इनकी पूर्ति कातन्त्रदुर्गवृत्ति आदि में की गई है। 'संस्कृत' शब्द भी भूषणार्थक सुडागम होकर निष्पन्न होता है । यही कारण है कि उसकी शब्दावली अन्य भाषाओं की भूषण होती है । फलतः वैदिक-लौकिक संस्कृत में किए गए अनुष्ठान-यज्ञ-यागादि सार्थक माने जाते हैं ।

## [विशेष वचन]

१. अडभ्यासव्यवधानेऽपि सत्वमिष्यते (दु० वृ०) ।

२. एवं समवायेऽपि वक्तव्यम् (दु० वृ०) ।

३. भूषणसमवायाभ्यामन्यत्रापि दृश्यते (दु० वृ०)।

४. उपात् प्रतियत्नविकृतवाक्याध्याहारेषु वक्तव्यः (दु० वृ०)।

५. उकार उच्चारणार्थः, टकारोऽपि सुखावबोधार्थ एव (दु० टी०)।

६. सोपस्काराणि सूत्राणि सवाक्याध्याहाराणीत्यर्थः (दु० टी०)।

७. एतच्च नाशब्दस्याधिकृतस्य बहुलार्थत्वाल्लोकतो वा सिद्धम् (दु० टी०)।

८. अधिकारस्येष्टविषयार्थत्वात् (वि० प०)।

९. सतोऽर्थस्य सम्बन्धोपबुद्ध्यर्थं तादवस्थ्यकथनार्थं वा गम्यमानार्थस्य वाक्यैकदेशस्य स्वरूपेणोपादानं वाक्याध्याहारः, एवं सोपस्काराणि सूत्राणि भवन्ति सवाक्याध्याहाराणीत्यर्थः (वि० प०)।

## [रूपसिद्धि]

१. **संस्कर्ता।** सम् + कृ + ता। 'सम् ' उपसर्गपूर्वक 'डु कृञ् करणे' (७।७) धातु से श्वस्तनीविभक्तिसंज्ञक प्र० पु० – ए० व० 'ता' प्रत्यय, प्रकृत सूत्र द्वारा 'कृ' से आदि में सुट् का आगम, 'उ – ट् ' अनुबन्धों का प्रयोगाभाव, मकार को अनुस्वार तथा धातुगत ऋकार को गुण-अर् ।

२. **सञ्चस्कार।** सम् + कृ + परोक्षा – अट् । 'सम् ' उपसर्गपूर्वक 'डु कृञ् करणे' (७।७) धातु से परोक्षाविभक्तिसंज्ञक प्र० पु० – ए० व० 'अट्' प्रत्यय, द्विर्वचनादि, प्रकृत सूत्र से सुडागम, म् को अनुस्वार, परसवर्ण तथा धातुगत ऋकार को वृद्धि – आर् ।

३. **समस्कार्षीत् ।** सम् + अट् + कृ + अद्यतनी – दि । 'सम्' उपसर्गपूर्वक 'डु कृञ् करणे' (७।७) धातु से अद्यतनीविभक्तिसंज्ञक प्र० पु० – ए० व० 'दि' प्रत्यय, अडागम, सिच् प्रत्यय, ईट् का आगम, प्रकृत सूत्र से सुडागम, धातुगत ऋकार को वृद्धि – आर्, सकार को षकार तथा दकार को तकारादेश।

४. **परिष्कर्ता।** परि + कृ + ता। 'परि' उपसर्गपूर्वक 'डु कृञ् करणे' (७।७) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय, सुडागम तथा गुणादेश।

५. **परिचस्कार।** परि + कृ + परोक्षा – अट् । 'परि' उपसर्गपूर्वक 'कृ' धातु से परोक्षासंज्ञक प्र० पु० – ए० व० 'अट्' प्रत्यय, द्विर्वचनादि, सुडागम तथा धातुगत ऋकार को वृद्धि – आर्।

६. **पर्यस्कार्षीत् ।** परि + अट् + कृ + अद्यतनी – दि । 'परि' उपसर्गपूर्वक 'कृ' धातु से अद्यतनीविभक्तिसंज्ञक प्र० पु० – ए० व० 'दि' प्रत्यय, अडागम, सिच् प्रत्यय, ईट् आगम, सुडागम, धातुगत ऋकार को वृद्धि – आर्, सकार को षकार, इकार को यकार तथा दकार को तकारादेश।। ८२०।।

।। **इत्याख्याते तृतीयाध्याये समीक्षात्मकः**
**सप्तमः इडागमादिपादः समाप्तः।।**

# अथाख्याताध्याये तृतीयेऽष्टमो धुडादिपादः

## ८२१. पदान्ते धुटां प्रथमः [३। ८। १]

### [सूत्रार्थ]

पदान्त में वर्तमान धुट्संज्ञक वर्णों के स्थान में वर्गीय प्रथमवर्णादेश होता है॥ ८२१।

### [दु० वृ०]

पदस्यान्ते वर्तमानानां धुटां वर्णानामन्तरतमः प्रथमो भवति। त्वन्नाथः, षण्मुखानि, ज्ञानभुट्टीकनम्,त्वच्छुतम् , ककुब्भासः। वर्गप्रथमलक्षणं स्यात् । अलेट् , अलेड् । आसीत्, आसीद् । **"वा विरामे"** (२। ३। ६२) इत्यस्य बाधकत्वात् प्रथमतृतीयौ। पदग्रहणमप्रकृतस्यापि लिङ्गस्य परिग्रहार्थम्, तेन च धातोरन्ते न स्यात् । वदति, एधते। धुटामिति किम् ? अहन्, अपचम् ॥ ८२१।

### [दु० टी०]

पदान्ते०। 'तव नाथः **त्वन्नाथः,** षण्णां मुखानि **षण्मुखानि**' इति प्रथमत्वे **"पञ्चमे पञ्चमांस्तृतीयान्न वा"** (१। ४। २) आपद्यते। ज्ञानबुधष्टीकनं **ज्ञानभुट्टीकन**मिति। **"पररूपं तकारो लचटवर्गेषु"** (१। ४। ५)। तव श्रुतं **त्वच्छुतम्** इति **"वर्गप्रथमेभ्यः शकारः स्वरयवरपरश्छकारं न वा"** (१। ४। ३)। ककुभां हासः **ककुब्भास** इति। **"तेभ्य एव हकारः पूर्वचतुर्थं न वा"** (१। ४। ४) इत्याह– वर्गेत्यादि। लिहेरस्तेश्च ह्यस्तन्यां दिः। **'येन नाप्राप्तौ यो विधिरारभ्यते स तस्य बाधकः'** (व्या०परि०४२) इति विराममात्रे पक्षे तृतीयोऽपीत्याह–अलेडित्यादि। आसीज्ज्ञानमलेडदुग्धमित्यादौ वचनात् तृतीय एवावतिष्ठते। पदेत्यादि। नन्वन्तग्रहणादेव धातोरन्ते न भविष्यति, अन्यथा धुटा धातुर्विशिष्यते, विशेषणेन च तदन्तविधिः स्यात् , तर्हि प्रकरणादाख्यातिकपदस्यैव प्राप्नोतीति भावः। धुटा च यदि पदं विशिष्यते अन्तग्रहणेन विना तदेव दूषणम् । धुटामिति व्यक्तिरिहाशेषपरिग्राहिणी न्याय्या निर्दिश्यते॥ ८२१।

### [वि० प०]

पदान्ते०। प्रथमे सति **"पञ्चमे पञ्चमांस्तृतीयान्नवा"** (१। ४। २) इत्यादिकमपि प्रवर्तते इत्याह – वर्गप्रथमेत्यादि । प्रथमे प्राप्ते "वा विरामे" (२। ३। ६२) इति वचनमुच्यमानस्य प्रथमस्य बाधकमित्याह–अलेडित्यादि । उभयत्रापि ह्यस्तन्यां दिः। अत एवानेन सर्वत्र समासे प्रथमत्वं दर्शितम् । अथ **"अन्ते धुटां प्रथमः"** इत्यास्ताम् , एवमपि पदस्यान्ते भविष्यति। न च धातोरन्तग्रहणात् , अन्यथा येन विधिस्तदन्तस्येति सिद्धमित्याह – पदेत्यादि । अन्यथा प्रकरणत्वाद् आख्यातिकपदस्यैव स्यादित्यर्थः। चकार एवार्थे, तेनैवान्तग्रहणेनेत्यर्थः॥८२१।

### [बि० टी०]

पदान्ते०। **"वा विरामे"** (२। ३। ६२) इति बाधकत्वादिति **वृत्तिः।** ननु परत्वादनेन पदान्ते भवतु लिङ्गान्ते विरामे पुनर्वाक्, वागित्यादौ वा विरामे स्यात्., नैवम् । पदसंज्ञाविषये

उपलब्धिग्रहणेन येनोभयार्थो लभ्यते तस्यैव पदत्वं साधितमिति। अतोऽत्र पदग्रहणाद् **''वा विरामे''** (२। ३। ६२) इत्यस्य क्व विषयः। अतो निर्विषयत्वाद् बाधक इत्याह– वा विराम इत्यादि। अस्य पुनरन्तर्वर्तिनीं विभक्तिमाश्रित्य विषयसिद्धिः। अतो वृत्तौ त्वन्नाथ इति दर्शितम्। तद् वा निरवकाशत्वाद् वा विरामे भूते पश्चाद् वागत्र इत्यादेर्विषयापत्तिस्तर्हि निरवकाशत्वाद् इत्येव वक्तुं युज्यते ? सत्यम्। निरवकाशतया बाधकत्वमित्यर्थः। येन नाप्राप्तिन्यायेन बाधकं **व्याप्तिपक्षे** बोद्धव्यम्॥ ८२१।

## [समीक्षा]

'त्वन्नाथः, षण्मुखानि, ककुब्भासः' आदि शब्दों की सिद्धि-हेतु कातन्त्रकार तथा पाणिनि ने समान प्रक्रिया ही अपनाई है। तदनुसार पाणिनि वैकल्पिक अनुनासिकादेश तथा जश्त्व आदेश करके 'अग्निचिन्नयति, अग्निचिद् नयति, वाङ् नयति – वाग्नयति' दो दो रूप सिद्ध करते हैं। उनके सूत्र हैं — ''यरोऽनुनासिकेऽनुनासिको वा, झलां जशोऽन्ते, (अ० ८। ४। ४५;२। ३९)। जब कि कातन्त्रकार ने दकार–डकार आदि के स्थान में तकार–टकार आदि करके ''पञ्चमे पञ्चमांस्तृतीयान्न वा'' (१। ४। २) से पञ्चम – तृतीय वर्णों का वैकल्पिक विधान किया है। 'अलेट् – अलेड्, आसीत्-आसीद्' आदि शब्दरूपों के अन्त में प्रथम–तृतीय वर्ण की उपस्थिति इसलिए रहती है, क्योंकि वहाँ ''वा विरामे'' (२। ३। ६२) सूत्र बाधक होने के कारण एक बार तो प्रथम वर्ण की उपस्थिति अनिवार्यरूप में होगी।

## [विशेष वचन]

१. पदग्रहणमप्रकृतस्यापि लिङ्गस्य परिग्रहार्थम् (दु० वृ०)।
२. धुटामिति व्यक्तिरिहाशेषपरिग्राहिणी न्याय्या (दु० टी०)।
३. अथान्ते धुटां प्रथम इत्यास्ताम्, एवमपि पदस्यान्ते भविष्यन्ति (वि० प०)।
४. चकार एवार्थे तेनैवान्तग्रहणेनेत्यर्थः (वि० प०)।
५. निरवकाशतया बाधकत्वमित्यर्थः। येन नाप्राप्तिन्यायेन बाधकं व्यक्तिपक्षे बोद्धव्यम् (बि० टी०)।

## [रूपसिद्धि]

१. **त्वन्नाथः।** त्वद् + नाथः। प्रकृत सूत्र द्वारा दकार को तकार तथा ''पञ्चमे पञ्चमांस्तृतीयान् नवा' (१। ४। २) से तकार को नकारादेश।

२. **षण्मुखानि।** षड् + मुखानि। प्रकृत सूत्र से डकार को टकार तथा १। ४। २ सूत्र से टकार को णकारादेश।

३.**ज्ञानभुट्टीकनम्।** ज्ञानबुध् + टीकनम्। ''तृतीयादेर्घढधभान्तस्य धातोरादिचतुर्थत्वं सध्वोः'' (३। ६। १००) से बकार को भकार, प्रकृत सूत्र से धकार को तकार तथा ''तवर्गस्य षटवर्गाट्टवर्गः'' (३। ८। ५) से तकार को टकारादेश।

४. **त्वच्छुतम्।** त्वद् + श्रुतम्। प्रकृत सूत्र से दकार को तकार, ''चं शे'' (१। ४। ६) से तकार को चकार तथा ''वर्गप्रथमेभ्यः शकारः स्वरयवरपरश्छकारं न वा'' (१। ४। ३) से शकार को छकारादेश।

५. **ककुब्भासः**। ककुव् - हासः। प्रकृत सूत्र से बकार को पकार, "तेभ्य एव हकारः पूर्वचतुर्थं न वा" (१। ४। ४) से हकार को भकार तथा "वर्गप्रथमाः पदान्ताः स्वरघोषवत्सु तृतीयान्" (१। ४। १) से पकार को बकारादेश।

६. **अलेट् – अलेड्**। प्रकृत सूत्र का बाधक सूत्र माना जाता है – "वा विरामे" (२। ३। ६२), अतः प्रथमवर्णादेश के वैकल्पिक रूप में प्रवृत्त होने से टकारान्त तथा डकारान्त रूप निष्पन्न होते हैं।

७. **आसीत्, आसीद्**। क्रम सं० ६ के अनुसार दो रूप साधु माने जाते हैं ॥८२१।

## ८२२. रसकारयोर्विसृष्टः [३। ८। २]

### [सूत्रार्थ]

पदान्तवर्ती रेफ और सकार के स्थान में विसर्गादेश होता है॥ ८२२।

### [दु० वृ०]

पदान्ते वर्तमानयो रेफसकारयोर्विसृष्टो भवति। अबिभः, पचावः। पदान्त इति किम्? बिभर्त्ति, आस्महे। अत एवारम्भ इति। कथम् अभिनस्त्वम्, अभिनत्त्वम्, अरुणस्त्वम्, अरुणत्त्वम्? सौ पदान्तेऽरेफप्रकृत्योरपि वा धोरत्वं स्यात्॥ ८२२।

### [दु० टी०]

रस०। इह पदान्तग्रहणं प्रकरणमपेक्षते, वचनादाख्यातिकप्रकरणे पदान्त एवेत्यर्थ इत्याह — पदान्त इत्यादि। अत एवारम्भ इति नियमार्थं सूत्रयति। अन्यथा **"रेफसोर्विसर्जनीयः"** (२। ३। ६३) इत्येनेनैव सिद्धमिति भावः। प्रकृतिनियमश्चायमन्यस्य नियमस्याभावात्। कथमित्यादि। सौ विषये पदान्ते दकारधकारयोर्विसर्जनीयो न वक्तव्य एव **"रप्रकृतिरनामिपरोऽपि"** (१। ५। १४) इति बहुलवचनेन सिद्धमिति भावः॥ ८२२।

### [वि० प०]

रस०। अबिभः इति। **'डु भृञ्'** (२। ८५) ह्यस्तन्या दिः सिर्वा, जुहोत्यादित्वाद् द्विर्वचनम्। **"भृञ्हाङ्माङामित्"** (३। ३। २४) इत्यभ्यासे इकारः, गुणे कृते **"व्यञ्जनाद् दिस्योः"** (३। ६। ४७) लोपः, पदमध्ये **"रेफसोर्विसर्जनीयः"** (२। ३। ६३) इत्यनेन कथन्न भवतीत्याह—अत एवारम्भ इति। अन्यथा तेनैव सर्वत्र सिद्धिरिति भावः। तस्माद् आख्यातप्रकरणे पदान्ते एवेति नियमः साध्यते इति नियमः। कथमित्यादि। रधादित्वान्नशब्दः। इह **"व्यञ्जनाद् दिस्योः"** (३। ६। ४७) इति सेर्लोपे सति अभिनत् त्वम्, अरुणत् त्वमेव स्यादिति। परिहारमाह–सावित्यादि। सौ विषये पदान्ते वर्तमानयोर्दकारधकारयोः **"रप्रकृतिरनामिपरोऽपि"** (१। ५। १४) इत्यपिशब्दस्य बहुलार्थत्ववचनाद् रेफे सति सिद्धिरिति भावः॥ ८२२।

### [समीक्षा]

'अबिभः, पचावः' इत्यादि शब्दरूपों में रेफ-सकार को विसर्गादेश दोनों ही व्याकरणों में किया गया है। पाणिनि का सूत्र है "खरवसानयोर्विसर्जनीयः" (अ० ८। ३। १५)।

तदनुसार केवल रेफ को विसर्गादेश होता है, अत: सकार के स्थान में "ससजुषो रु:" (अ० ८। २। ६६) से 'रु' आदेश करना आवश्यक होता है। कातन्त्रकार ने लिङ्गप्रकरण में "रेफसोर्विसर्जनीय:" (२। ३। ६३) से विसर्गादेश किया है, यहाँ पुन: तदर्थ सूत्ररचना में हेतु बताया गया है — 'धातुप्रकरण में पदान्त में ही विसर्गादेश हो, 'बिभर्त्ति, आस्महे' इत्यादि अपदान्त-स्थलों में न हो'। अन्यथा इस सूत्र के बनाने की कोई आवश्यकता नहीं रह जाती है।

### [विशेष वचन]

१. पदान्त इति किम् ? बिभर्त्ति, आस्महे। अत एवारम्भ इति (दु० वृ०)।

२. इह पदान्तग्रहणं प्रकरणमपेक्षते, वचनादाख्यातिकप्रकरणे पदान्ते एवेत्यर्थ: (दु० टी०)।

३. अत एवारम्भ इति नियमार्थं सूत्रयति, अन्यथा "रेफसोर्विसर्जनीय:" इत्यनेनैव सिद्धम् (दु० टी०)।

४. प्रकृतिनियमश्चायम् , अन्यस्य नियमस्याभावात् (दु० टी०)।

### [रूपसिद्धि]

१. **अबिभ:** । अट् + भृ + ह्यस्तनी – दि, सि । 'डु भृञ् धारणपोषणयो:' (२।८५) धातु से ह्यस्तनीविभक्तिसंज्ञक प्र० पु० – ए० व० 'दि' प्रत्यय एवं म० पु० – ए० व० 'सि' प्रत्यय, अडागम, अन् विकरण, द्विर्वचनादि, विकरण का लुक् , "व्यञ्जनाद् दिस्यो:" (३। ६। ४७) से 'दि–सि' का लोप, धातुघटित ऋकार को गुण-अर् तथा प्रकृत सूत्र से रकार को विसर्गादेश।

२. **पत्तावः।** पच् + वर्तमाना–वस् । 'डु पचष् पाके' (७। ७) धातु से वर्तमानाविभक्तिसंज्ञक उत्तमपुरुष–द्विव० 'वस्' प्रत्यय, अन्विकरण, "अस्य वमोर्दीर्घ:" (३।८।११) से अन्विकरणघटित अकार को दीर्घ तथा प्रकृत सूत्र से सकार को विसर्गादेश ॥ ८२२।

## ८२३. घढधभेभ्यस्तथोर्धोऽधः [३।८।३]

### [सूत्रार्थ]

'डु धाञ् धारणपोषणयो:' (२। ८५) धातु को छोड़कर 'घ् - ढ् - ध् - भ्' से परवर्ती 'त् - थ्' के स्थान में 'ध्' आदेश होता है ॥ ८२३।

### [दु० वृ०]

घढधभेभ्य: परयोस्तथोर्धो भवति, न तु धाञ: । अदुग्ध, अदुग्धः । अलीढ, अलीढाः। अबुद्ध, अबुद्धाः। अलब्ध, अलब्धाः। अध इति किम् ? धत्तः, धत्थः॥ ८२३।

### [दु० टी०]

घढ०। अन्यस्य कार्यिणोऽश्रुतत्वात् तथोरिति सप्तमी नाशङ्क्यते। चतुर्थेभ्य इति कृते **प्रतिपत्तिगौरवं** स्यात् ॥८२३।

## [वि० प०]

घढध०। **''दुहदिह०''** इत्यादिना दुहलिहो: सण् विनिर्मुक्तपक्षे सिजपि नास्तीति दर्शितम् । बुधेर्लभेश्च **''धुटश्च धुटि''** (३।६।५१) इति सिचो लोप:। धत्त:, धत्थ: इति। जुहोत्यादित्वाद् द्विर्वचनम् । **''अभ्यस्तानामाकारस्य''** (३।४।४२) इत्याकारलोपे ''तथोश्च दधाते:'' (३।६।१०२) इत्यभ्यासे धत्वम् ॥८२३।

## [समीक्षा]

'लब्धुम्, दोग्धा, अलीढ, अबुद्ध' आदि शब्दरूपों के सिद्ध्यर्थ दोनों व्याकरणों में 'त् -थ्' को 'ध्' आदेश किया है। पाणिनि का सूत्र है – ''झषस्तथोर्धोऽध:'' (अ० ८।२।४०) । पाणिनीय 'झष्' प्रत्याहार में 'झ् - भ् - घ् - ढ् - ध्' वर्गीय चतुर्थ वर्ण सम्मिलित हैं, इनमें से 'झ्' से परवर्ती 'त्-थ्' को ध् आदेश का कोई उदाहरण उपलब्ध नहीं होता, फलत: उसका परिगणन अनावश्यक सिद्ध होता है। अत: कातन्त्रकार द्वारा चार वर्णों का उल्लेख अधिक समीचीन माना जाएगा।

## [विशेष वचन]

१. चतुर्थेभ्य इति कृते प्रतिपत्तिगौरवं स्यात् (दु० टी०) ।

## [रूपसिद्धि]

१. **अदुग्ध।** अट् + दुह् + अद्यतनी - त। 'दुह प्रपूरणे' (२।६१) धातु से अद्यतनीविभक्तिसंज्ञक प्र० पु० - ए० व० 'त' प्रत्यय, अडागम, ''सिजद्यतन्याम्'' (३।२।२४) से 'सिच्' प्रत्यय, ''दादेर्घ:'' (३।६।५७) से धातुघटित हकार को घकार, प्रकृत सूत्र से तकार को धकार, ''सिचो धकारे'' (३।६।५०) से सिच् का लोप तथा घ् को 'ग्' आदेश।

२. **अदुग्धा:।** अट् + दुह् + अद्यतनी-थास् । 'दुह प्रपूरणे' (२।६१) धातु से अद्यतनीसंज्ञक म० पु० - ए० व० 'थास्' प्रत्यय, अडागम, सिच् प्रत्यय, हकार को घकार, थकार को धकार, सिच् का लोप, घकार को गकार तथा सकार को विसर्गादेश।

३. **अलीढ।** अट् + लिह् + अद्यतनी-त। 'लिह आस्वादने' (२।६३) धातु से अद्यतनीविभक्तिसंज्ञक प्र० पु० - ए० व० 'त' प्रत्यय तथा अन्य प्रक्रिया प्राय: पूर्ववत्।

४. **अलीढा:।** अट् + लिह् - अद्यतनी-थास् । पूर्ववत् प्रक्रिया।

५. **अबुद्ध।** अट् + बुध् + अद्यतनी-त । 'बुध अवगमने' (१।५६६) धातु से अद्यतनीविभक्तिसंज्ञक प्र० पु० - ए० व० 'त' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत् ।

६. **अबुद्धा:।** अट् + बुध् + अद्यतनी- थास् । पूर्ववत् प्रक्रिया ।

७. **अलब्ध।** अट् + लभ् + अद्यतनी-त । 'डु लभष् प्राप्तौ' (१।४७२) धातु से अद्यतनीसंज्ञक 'त' प्रत्यय तथा शेष प्रक्रिया पूर्ववत् ।

८. **अलब्धा:।** अट् - लभ् - अद्यतनी-थास् । शेष प्रक्रिया पूर्ववत् ॥८२३।

## ८२४. षढोः कः से [३।८।४]

### [सूत्रार्थ]

सकार के परे रहते षकार तथा ढकार के स्थान में ककार आदेश होता है ॥८२४।

### [दु० वृ०]

षढोः को भवति से परे। पेक्ष्यति, पिपिक्षति। लेक्ष्यति, लिलिक्षिति। से इति किम् ? पिनष्टि, लेढि ॥८२४।

### [दु० टी०]

षढोः। कषयोरकार **उच्चारणार्थः** । षकारस्य स्थितिरेव प्राप्ता, ढकारस्य "अघोषेष्वशिटां प्रथमः" (३।८।९) इति वचनम् । पेक्ष्यतीति। 'पिष्लृ संचूर्णने' (६।१२) । लेक्ष्यतीति। 'लिह आस्वादने' (२।६३) ॥८२४।

### [समीक्षा]

'विवक्षति, लेक्ष्यति, पेक्ष्यति' इत्यादि शब्दरूपों के सिद्ध्यर्थ षकार-ढकार को ककारादेश का विधान दोनों ही शाब्दिक आचार्यों ने किया है। पाणिनि का सूत्र है – "षढोः कः सि" (अ० ८।२।४१) । यहाँ उभयत्र समानता ही है।

### [विशेष वचन]

१. कषयोरकार उच्चारणार्थः (दु० टी०) ।

### [रूपसिद्धि]

१. **पेक्ष्यति।** पिष् + स्यति। 'पिष्लृ संचूर्णने' (६।१२) धातु से भविष्यन्तीविभक्तिसंज्ञक प्र० पु० - ए० व० 'स्यति' प्रत्यय, "नामिनश्चोपधाया लघोः" (३।५।२) से उपधासंज्ञक इकार को गुण-एकार, प्रकृत सूत्र से षकार को ककार, "निमित्तात् प्रत्ययविकारागमस्थः सः षत्वम्" (३।८।२६) से सकार को षकार तथा 'क्-ष्' संयोग से क्षकार की निष्पत्ति।

२. **पिपिक्षति।** पिष् + सन् + अन् + ति। 'पिष्लृ संचूर्णने' (६।१२) धातु से 'पेष्टुमिच्छति' अर्थ में "धातोर्वा तुमन्तादिच्छतिनैककर्तृकात्" (३।२।४) से 'सन्' प्रत्यय, नकार अनुबन्ध का प्रयोगाभाव, "चण्परोक्षाचेक्रीयितसनन्तेषु" (३।३।७) से 'पिष्' धातु को द्विर्वचन, "पूर्वोऽभ्यासः" (३।३।४) से पूर्ववर्ती 'पिष्' की अभ्याससंज्ञा, "अभ्यासस्यादिर्व्यञ्जनमवशेष्यम्" (३।३।९) से षकार का लोप, प्रकृत सूत्र से षकार को ककार, सकार को षकार, 'क्-ष्' संयोग से क्ष, "ते धातवः" (३।२।१६) से 'पिपिक्ष' की धातुसंज्ञा, वर्तमानासंज्ञक प्र० पु० - ए० व० 'ति' प्रत्यय, "अन् विकरणः कर्तरि" (३।२।३२) से अन् विकरण तथा "अकारे लोपम्" (२।१।१७) से पूर्ववर्ती अकार का लोप।

३. **लेक्ष्यति।** लिह् + स्यति। 'लिह आस्वादने' (२।६३) से भविष्यन्तीसंज्ञक 'स्यति' प्रत्यय तथा शेष प्रक्रिया पूर्ववत् ।

४. **लिलिक्षति।** लिह् + सन् + अन् + ति। 'लिह आस्वादने' (२।६३) धातु से सन् प्रत्यय तथा अन्य प्रक्रिया पूर्ववत् ॥८२४।

## ८२५. तवर्गस्य षटवर्गाट्टवर्गः [३।८।५]

### [सूत्रार्थ]

षकार-टवर्ग से परवर्ती तवर्ग के स्थान में सदृशतम टवर्गादेश होता है ॥८२५।

### [दु० वृ०]

षाट्टवर्गाच्च परस्य तवर्गस्य टवर्गो भवति आन्तरतम्यात् । वपुष्टवम्, वपुष्टा, द्वेष्टि, दिष्टः। पिण्ड्ढि, कुष्णाति, ईट्टे, लीढः, अलीढ्वम् । टवर्गाट्टवर्ग इति किम् ? वक्ता, पपक्थेति सिद्ध्यर्थम् । कथं मधुलिट् तरति मधुलिट्तरः ? अन्त्यत्वात् ॥८२५।

### [दु० टी०]

तवर्गस्य० । नात्र प्रकरणमाश्रीयते इति मनसिकृत्याह– वपुष्टरमिति। टवर्गाट् टवर्ग इति किमिति **"तवर्गश्चटवर्गयोगे चटवर्गौ"** (२।४।४६) इत्यनेनैव सिध्यतीति भावः? सत्यम् । सिद्धे पुनर्वचनं प्रकरणद्वारेण नियमार्थम् आख्यातेऽस्मिन् टवर्गाट् टवर्गो भवति, चवर्गाच्चवर्गो न भवतीत्याह– वक्तेत्यादि। मधुलिट् तरतीत्यादिषु तत्रानन्त्यव्याख्यानबलादेव व्यावृत्तिरिति चोद्यं परिहरन्नाह-कथमित्यादि ॥८२५।

### [वि० प०]

तवर्ग० । इह **प्रकरणं** नाद्रियते इति लिङ्गस्यापि दर्शयन्नाह– वपुष्टरम्, वपुष्टेति। प्रकृष्टं वपुः, वपुषो भाव इति विगृह्य तद्धितः **"ह्रस्वात् तादौ तद्धिते नाम्नः"** (कात०परि०-ष०२२) इति षत्वम् । पिण्ढीति। 'पिष्ल संचूर्णने (६।१२) इति रुधादित्वान्नशब्दः, **"हुधुड्भ्यां हेर्धिः"** (३।५।३५) इति धत्वम्, **"धुटां तृतीयश्चतुर्थेषु"** (३।८।८) इति षस्य डत्वम्। ईट्टे इति। **'ईड स्तुतौ'** (२।४३) । लीढ इति। निष्ठा तस् वा। **"तवर्गश्चटवर्गयोगे चटवर्गौ"** (२।४।४६) इत्यनेनैव सिद्धे नियमार्थमित्याह– टवर्गादित्यादि। इहाख्याते टवर्गाट्टवर्गो भवति चवर्गाच्चवर्गो न भवतीति प्रकरणद्वारेण **नियमार्थमि**त्याह– वक्तेत्यादि। अन्यथा चवर्गादपि तेन चवर्गः स्यादिति भावः। अन्त्यत्वादिति। तत्रानन्त्यव्याख्यान-व्यावृत्तिबलादिहानेन टवर्गो न भवतीत्यर्थः ॥८२५।

### [बि० टी०]

तवर्ग०। मधुलिट् तरतीति **वृत्तिः**। "तवर्गश्चटवर्गयोगे (२।४।४६) इत्यस्य व्यावृत्तिबलादित्यर्थः। यत्तु **टीकाकृता**ऽन्तसर्मीपोऽन्त्यम् इत्युक्तं तस्यात्रैव विषयः। अन्यथा तकारस्यानन्त्यत्वात् कथं व्यावृत्तिः ॥८२५।

### [समीक्षा]

'द्वेष्टि, पेष्टव्यम्, ईट्टे, लीढः' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में तवर्ग को टवर्गादेश किया गया है । पाणिनि का सूत्र है – "ष्टुना ष्टुः" (अ० ८।४।४१) । तदनुसार तवर्ग को टवर्ग तथा सकार को षकारादेश होता है। कातन्त्रकार ने यहाँ सकार को षकारादेश का विधान नहीं किया है, उसकी पूर्ति कातन्त्रपरिशिष्टकार ने "ह्रस्वात् तादौ तद्धिते नाम्नः" (कात० परि०-ष० २२) सूत्र द्वारा की है।

## [विशेष वचन]

१. सिद्धे पुनर्वचनं प्रकरणद्वारेण नियमार्थम् (दु० टी०)।

२. तवर्गश्चटवर्गयोगे चटवर्गावित्यनेनैव सिद्धे नियमार्थम् (वि० प०)।

## [रूपसिद्धि]

१. **वपुष्टरम्।** वपुस् + तर + सि। प्रकृष्टं वपुः। 'वपुस्' शब्द से प्रकृष्टार्थ में 'तर' प्रत्यय, "ह्रस्वात् तादौ तद्धिते नाम्नः" (कात० परि०-ष० २२) से सकार को षकार, प्रकृत सूत्र से तकार को टकार, लिङ्गसंज्ञा, प्रथमाविभक्ति-ए० व० में 'सि' प्रत्यय तथा "अकारादसम्बुद्धौ मुश्च" (२।२।७) से 'मु' का आगम- सिप्रत्यय का लोप।

२. **वपुष्टा।** वपुस् + ता + सि। वपुषो भावः। 'वपुस्' शब्द से "तत्वौ भावे" (२।६।१३) सूत्र द्वारा 'त' प्रत्यय, स्त्रीलिङ्ग में 'आ' प्रत्यय, समानदीर्घ-आकारलोप, सकार को षकार, सिप्रत्यय तथा उसका लोप।

३. **द्वेष्टि।** द्विष् + ति। 'द्विष अप्रीतौ' (२।६०) से वर्तमानाविभक्तिसंज्ञक प्र० पु०-ए० व० 'ति' प्रत्यय, अन् विकरण का लुक्, "नामिनश्चोपधाया लघोः" (३।५।२) से उपधासंज्ञक इकार को गुण-एकार तथा प्रकृत सूत्र से तकार को टकारादेश।

४. **द्विष्टः।** द्विष् + तस्। 'द्विष्' धातु से वर्तमानासंज्ञक 'तस्' प्रत्यय, अन्-विकरण का लुक् तथा तकार को टकारादेश।

५. **पिण्ड्ढि।** पिष् + हि। 'पिष्ल संचूर्णने' (६।१२) धातु से पञ्चमीविभक्तिसंज्ञक म० पु० - ए० व० 'हि' प्रत्यय, "स्वराद् रुधादेः परो नशब्दः" (३।२।३६) से 'न' विकरण, (पिनष् + हि), नकार को णकार, हि को धि,ष् को ढ्, "धुटां तृतीयश्चतुर्थेषु" (३।८।८) से ढ् को ड् तथा ध् को ढ् आदेश।

६. **कुष्णाति।** कुष् + ना + ति। 'कुष निष्कर्षे' (८।४०) धातु से वर्तमानासंज्ञक 'ति' प्रत्यय, "ना ह्रयादेः" (३।२।३८) से 'ना' विकरण तथा प्रकृत सूत्र से नकार को णकारादेश।

७. **ईट्टे।** ईड् + ते। 'ईड स्तुतौ' (२।४३) धातु से वर्तमानासंज्ञक आत्मनेपद-प्र० पु०- ए० व० 'ते' प्रत्यय, प्रकृत सूत्र से तकार को टकार तथा "अघोषेष्वशिटां प्रथमः" (३।८।९) से डकार को टकारादेश।

८. **लीढः।** लिह् + तस्। 'लिह आस्वादने' (२।६३) धातु से वर्तमानाविभक्तिसंज्ञक प्र० पु० - द्विव० 'तस्' प्रत्यय, ह् को ढ्,त् को ध्, ध् को ढ्, "ढे ढलोपो दीर्घश्चोपधायाः" (३।८।६) से पूर्ववर्ती ढकार का लोप तथा इकार को दीर्घ आदेश।

९. **अलीढ्वम्।** अट् + लिह् + अद्यतनी-ध्वम्। 'लिह आस्वादने' धातु से अद्यतनीविभक्तिसंज्ञक म० पु० - ब० व० 'ध्वम्' प्रत्यय, अडागम, हकार को ढकार, सिच् प्रत्यय, धकार को ढकार, सिच् का लोप, ढलोप तथा इकार को दीर्घ आदेश ॥८२५॥

## ८२६. ढे ढलोपो दीर्घश्चोपधायाः [३।८।६]

### [सूत्रार्थ]

ढकार के परे रहते पूर्ववर्ती ढकार का लोप तथा उपधासंज्ञक स्वर को दीर्घ आदेश होता है ॥८२६।

### [दु० वृ०]

ढे परे ढलोपो भवति उपधायाश्च दीर्घः। लीढः, मूढः। कथं लेढा, द्रोढा ? अन्तरङ्गत्वाद् गुणे कृते ढलोप एव स्यात्। उपधाग्रहणस्य संज्ञापूर्वकत्वाद् ऋतो न स्यात्। तेन बृहू - वृढः, दृहू-दृढः ॥८२६।

### [दु० टी०]

ननु च ढलोपेऽनन्तरस्यैव ढे दीर्घो न्यायादव्यवहितत्वाच्चान्यत्र न भवति उपधाग्रहणं किमर्थमित्याह - उपधेत्यादि। **'संज्ञापूर्वको विधिरनित्यः'** (का० परि० ३०) इति ऋकारस्य न भवति। **अन्य** आह - वृढस्तृढ इति कृदन्तप्रयोगोऽभिधानात् प्रवर्तते, उपधाग्रहणं तु **स्पष्टार्थमिति । शर्ववर्ममतं** ननु तड्ढौकते इत्यत्र पररूपे कृते ढलोपः प्राप्नोति, परत्वात् ? सत्यम् । प्रकरणमत्राश्रयणीयम्, तदसत् । पदान्ते धुटां प्रथमोऽन्तरङ्गो ढे ढलोपोऽत्र बहिरङ्गस्तत्र **'अन्तरङ्गबहिरङ्गयोरन्तरङ्गविधिर्बलवान्'** (का० परि० ५०) इत्याह - **भाष्यकारो** ढे ढलोपेऽपदान्तग्रहणमिति ॥८२६।

### [वि० प०]

ढे ढ०। ननु परत्वान्नित्यत्वाच्च ढे ढलोपे दीर्घत्वे उपधालक्षणस्य गुणस्याभावात् कथं लेढा, द्रोढेति। न च नाम्यन्तलक्षणो गुण इहास्तीति नाम्यन्तस्य लाक्षणिकत्वात् । **'सकृद्गतो विप्रतिषेधो यद् बाधितं तद् बाधितमेव'** (का० परि० ३६) इति न्यायाद् वेत्याह-अन्तरङ्गत्वाद् गुणे कृते ढलोप एवेति। चकारस्या**न्वाचयशिष्ट**त्वाद् दीर्घमन्तरेणापि प्रधानवाक्यनिर्दिष्टोऽयमेव ढलोपो भवतीत्यर्थः । ननु ढलोपानन्तरं दीर्घो भवन्नर्थादुपधाया एव भविष्यति, किमनेनेत्याह - उपधेत्यादि गतार्थम् ॥८२६।

### [समीक्षा]

'लीढः, मूढः, उपगूढम्' इत्यादि शब्दरूपों की सिद्धि के लिए दोनों ही व्याकरणों में ढलोप-उपधादीर्घ किया गया है। पाणिनि का सूत्र है – "ढ्रलोपे पूर्वस्य दीर्घोऽणः" (अ० ६।३।१११) ।

### [विशेष वचन]

१. उपधाग्रहणस्य संज्ञापूर्वकत्वाद् ऋतो न स्यात् (दु० वृ०) ।
२. संज्ञापूर्वको विधिरनित्य इति ऋकारस्य न भवति (दु० टी०) ।
३. अन्य आह- वृढस्तृढ इति कृदन्तप्रयोगोऽभिधानात् प्रवर्तते, उपधाग्रहणं तु स्पष्टार्थमिति शर्ववर्ममतम् (दु० टी०) ।
४. भाष्यकारो ढे ढलोपेऽपदान्तग्रहणमिति (दु० टी०) ।

५. चकारस्यान्वाचयशिष्टत्वात् (वि० प०)।

### [रूपसिद्धि]

१. **लीढः**। लिह् + वर्तमाना-तस्। 'लिह आस्वादने' (२।६३) धातु से वर्तमानाविभक्तिसंज्ञक प्र० पु०-द्विव० 'तस्' प्रत्यय, "अन् विकरणः कर्तरि" (३।२।३२) से अन् - विकरण, "अदादेर्लुग् विकरणस्य" (३।४।९२) से उसका लुक्, "दहिदिहिदुहिमिहि-रिहिरुहिलिहिलुहिनहिवहेर्हात्" (३।७।३०) से अगुण, "हो ढः" (३।६।५६) से हकार को ढकार, "घढधभेभ्यस्तथोर्धोऽधः" (३।८।३) से तकार को धकार, "तवर्गस्य षटवर्गाट् टवर्गः" (३।८।५) से धकार को ढकार, प्रकृत सूत्र से पूर्ववर्ती ढकार का लोप, उपधासंज्ञक इकार को दीर्घ तथा "रसकारयोर्विसृष्टः" (३।८।२) से सकार को विसर्गादेश।

२. **मूढः**। मुह् + त + सि। 'मुह वैचित्ये' (३।३७) धातु से "निष्ठा" (४।३।९३) सूत्र द्वारा 'क्त' प्रत्यय, क्-अनुबन्ध का प्रयोगाभाव, हकार को ढकार, तकार को धकार, धकार को ढकार, प्रकृत सूत्र से ढलोप, उपधासंज्ञक उकार को दीर्घ, 'मूढ' शब्द की "धातुविभक्तिवर्जमर्थवल्लिङ्गम्" (२।१।१) से लिङ्गसंज्ञा, सिप्रत्यय तथा सकार को विसर्गादेश ॥८२६।

## ८२७. सहिवहोरोदवर्णस्य [३।८।७]

### [सूत्रार्थ]

ढकार के परे रहते 'सह्' तथा 'वह्' धातु से संबद्ध ढकार का लोप एवं पूर्ववर्ती अवर्ण के स्थान में ओकारादेश होता है॥८२७।

### [दु० वृ०]

सहिवहोर्ढे परे ढलोपो भवति, अवर्णस्यौद् भवति। सोढा, वोढा। कथम् ऊढः, ऊढवान्? अन्तरङ्गत्वान्नित्यत्वाद् वा सम्प्रसारणम्। वर्णग्रहणं किम्? उदवोढाम्। सिचि अस्य च दीर्घत्वेऽपि स्यात् ॥८२७।

### [दु० टी०]

सहि०। ननु किमर्थमत्र ढलोपो विधीयमानत्वेनोच्यते औपश्लेषिकसप्तमीसामर्थ्यात् पूर्वेण ढलोपे दीर्घस्यापवादत्वाद् भवति ? सत्यम्, ओकारस्य प्रधानवाक्यार्थत्वाद् येन नाप्राप्तिन्यायेन च लोपस्य वचनाद् बाधापि सम्भाव्यते। उपधाधिकारेऽवर्णग्रहणम् ऊढवानिति सिद्ध्यर्थम्। ओदिति **तकारः सुखोच्चारणार्थः** ॥८२७।

### [समीक्षा]

'सोढा, वोढा' आदि शब्दरूपों के सिद्ध्यर्थ दोनों ही व्याकरणों में अकार को ओकारादेश की व्यवस्था की गई है। पाणिनि का सूत्र है – "सहिवहोरोदवर्णस्य" (अ० ६।३।११२)।

### [विशेष वचन]

१. अन्तरङ्गत्वान्नित्यत्वाद् वा सम्प्रसारणम् (दु० वृ०)।

२. उपधाधिकारेऽवर्णग्रहणम् ऊढवानिति सिद्ध्यर्थम् (दु० टी०)।

३. ओदिति तकारः सुखोच्चारणार्थः (दु० टी०)।

**[रूपसिद्धि]**

१. **सोढा**। सह + ता। 'षह मर्षणे' (१।५६०) धातु से पञ्चमीविभक्तिसंज्ञक प्र० पु०-ए० व० 'ता' प्रत्यय, "वेषुसह०" (४।६।८१) से अनिट्, "हो ढः" (३।६।५६) से हकार को ढकार, तकार को धकार, "तवर्गस्य षटवर्गाट्टवर्गः" (३।८।५) से धकार को ढकार तथा प्रकृत सूत्र से ढलोप-अकार को ओकार आदेश।

२. **वोढा**। वह + ता। 'वह प्रापणे' (१।६१०) धातु से पञ्चमीसंज्ञक 'ता' प्रत्यय तथा अन्य प्रक्रिया पूर्ववत् ॥८२७।

## ८२८. धुटां तृतीयश्चतुर्थेषु [३।८।८]

**[सूत्रार्थ]**

वर्गीय चतुर्थ वर्णों के परे रहते धातुघटित धुट्संज्ञक वर्ण के स्थान में तृतीय वर्ण आदेश होता है ॥८२८।

**[दु० वृ०]**

धातूनां धुटां वर्णानां तृतीयो भवति चतुर्थेष्वेव परतः। दोग्धा, द्विड्ढि, चकाद्धि, लब्धा। चतुर्थेष्वेवेति नियमात् शक्यते, द्विष्टः ॥८२८।

**[दु० टी०]**

धुटाम्०। धुटामित्यर्थायाता इह धातवः। सम्बन्धे त्वियं षष्ठी। तदन्तविशेषणं नास्तीति जक्षतुरित्यघोषेष्वशिटां प्रथमो भवत्येव। चतुर्थेष्वेवेत्यादि धुटां तृतीयो घोषवति सिद्धो नियमार्थोऽयं योग इत्यर्थः ॥८२८।

**[वि० प०]**

धुटाम् ०। द्विड्ढि इति। **'द्विष अप्रीतौ'** (२।६०)। हेः पूर्ववद् धिभावः। तथा चकाद्धीति। 'धुटां तृतीयः' इत्यनेनैव घोषवति सामान्ये सिद्धे नियमार्थमित्याह– चतुर्थेष्वेवेति॥८२८।

**[बि० टी०]**

धुटाम् ०। चतुर्थेष्वेवेति वृत्तिः। चतुर्थेष्वेवेति नियमात् शक्यते द्विष्टः इति। ननु कथमिदं प्रत्युदाहृतम्, यावता द्विष्ट इति चतुष्टयविहिततृतीयस्याघोषेऽनिषयत्वात् कथं नियमस्य व्यावृत्तिः प्राप्तेरभावात् ? अत्र **केचिद्** द्विष्ट इति पाठमपनीय 'द्विष्व' इति प्रत्युदाहरणं वदन्ति, **तन्नातिपेशलम्,** घोषवति प्रत्युदाहरणद्वयस्य वैफल्यात्। **वस्तुतस्तु** चतुर्थग्रहणाभावे धुटां तृतीय इति घोषवत्यघोषे चाख्यातसूत्रस्यैव विषयः। न च वक्तव्यम् अघोषे प्रथमो भविष्यति उत्तरत्र नियमेन शिटस्तदविषयत्वात्। अतः शक्यते इत्यत्र चतुष्टयप्रकरणसूत्रेण प्राप्तौ द्विष्ट इत्यत्राख्यातसूत्रेण प्राप्तौ नियमः। अतो द्विष्ट इति प्रत्युदाहृतम्।

ननु कथं चतुष्टयसूत्रे मज्जतीति प्रत्युदाहृतम् । यतश्चतुर्थेष्वेवेति नियमात् कथं तृतीयः स्यात् ? अत्र **कश्चिद्** - विरतौ नियमस्य व्यावृत्तिः, अविरतौ धुटां तृतीयः केन निवार्यते। यद् वा चतुर्थेष्वेवेति नियमो भवन् प्रत्ययमेव व्यावर्तयतीति भावः । नन्वत्र चतुर्थग्रहणाभावे चतुष्टयप्रकरणीयधुटां तृतीय इत्यस्यानेन को भेद इति चेद् घोषवति तेन स्यात् । अनेन त्वघोषे स्यात् तर्हि शक्यते इति न स्यात् ? सत्यम्, चतुर्थग्रहणाभावात् चतुष्टयप्रकरणीयस्य सामान्यतो न प्राप्तिर्यदपि तत्र सामान्यतो ग्रहणं लिङ्गप्रकरणघोषवद्ग्रहणेन ज्ञापितम्, तदपि मज्जतीत्यत्र प्रकृतिस्थघोषवति धातौ सार्थकं प्रत्यये तु विशेषत्वादनेन सामान्ये प्रत्यये स्यादिति **व्याप्ति**माह – शक्यते इति। ननु तथापि तेनास्य विषयत्वात् प्रत्यये परे भवन् घोषवति स्यान्नाघोषे ? सत्यम्, प्रत्ययेन विशेषो भवन् चतुर्थग्रहणाभावे सामान्यतो भविष्यतीति **हेमकरः**। व्याप्तिन्यायाद् वेत्याह – द्विष्ट इति ॥८२८।

## [समीक्षा]

'दोग्धा, लब्धा, बोद्धव्यम्' इत्यादि शब्दों के सिद्ध्यर्थ वर्गीय चतुर्थ आदि वर्णों के स्थान में तृतीय वर्णादेश दोनों ही व्याकरणों में किया गया है। पाणिनि का सूत्र है – "झलां जश् झशि" (अ० ८।४।५३) । यह ज्ञातव्य है कि पाणिनीय झल् प्रत्याहार में २४ वर्ण समाविष्ट हैं। 'झ, भ, घ, ढ, ध, ज, ब, ग, ड, द, ख, फ, छ, ठ, थ, च, ट, त, क, प, श, ष, स, ह'। कातन्त्रकार ने इन वर्णों की 'धुट्' संज्ञा की है – "धुड् व्यञ्जनमनन्तस्थानुनासिकम्" (२।१।१३) । 'जश्' प्रत्याहार में वर्गीय तृतीय वर्ण आते हैं, 'झश्' प्रत्याहार में वर्गीय चतुर्थ तथा तृतीय वर्णों का समावेश है, परन्तु तृतीय वर्णों के पर में रहते प्रकृत कार्य नहीं होता है, अतः कातन्त्रीय 'चतुर्थ' शब्द का उल्लेख सार्थक है, पाणिनीय 'झश्' प्रत्याहार की अपेक्षा । शेष शब्दों का उल्लेख अपनी-अपनी व्याकरणप्रक्रिया के अनुसार समझना चाहिए ।

## [विशेष वचन]

१. चतुर्थेष्वेवेति नियमात् शक्यते, द्विष्टः (दु० वृ०) ।
२. धुटामित्यर्थायाता इह धातवः। सम्बन्धे त्वियं षष्ठी (दु० टी०)।
३. नियमार्थोऽयं योगः (दु० टी०) ।
४. अत्र कश्चिद् 'द्विष्टः' इति पाठमपनीय 'द्विष्व' इति प्रत्युदाहरणं वदन्ति, तन्नातिपेशलम् (बि० टी०) ।
५. यद् वा चतुर्थेष्वेवेति नियमो भवन् प्रत्ययमेव व्यावर्तयतीति भावः (बि० टी०)।

## [रूपसिद्धि]

१. **दोग्धा** । दुह् + श्वस्तनी-ता । 'दुह प्रपूरणे' (२।६१) धातु से श्वस्तनीसंज्ञक प्र० पु०-ए० व० 'ता' प्रत्यय, "नामिनश्चोपधाया लघोः" (३।५।२) से उपधासंज्ञक उकार को गुण-ओकार, "दादेर्घः" (३।६।५७) से हकार को धकार, "घढधभेभ्यस्तथोर्धोऽधः" (३।८।३) से तकार को धकार तथा प्रकृत सूत्र से घकार को गकारादेश ।

२. **द्विड्ढि** । द्विष् + अन्लुक् + पञ्चमी-हि । 'द्विष अप्रीतौ' (२।६०) धातु से पञ्चमीविभक्तिसंज्ञक म० पु०-ए० व० 'हि' प्रत्यय, "अन् विकरण: कर्तरि" (३।२।३२), "अदादेर्लुग् विकरणस्य" (३।४।९२) से उसका लुक्, "हशषछान्तेजादीनां ड:" (२।३।४६) से षकार को डकार, "हुधुड्भ्यां हेर्धि:" (३।५।३५) से 'हि' को 'धि' आदेश तथा "तवर्गस्य षटवर्गाट्टवर्ग:" (३।८।५) से धकार को ढकार ।

३. **चकाद्धि** । चकास् + अन्लुक् + पञ्चमी-हि। 'चकासृ दीप्तौ' (२।३८) धातु से पञ्चमीसंज्ञक 'हि' प्रत्यय, अन् विकरण, उसका लुक्, सकार को दकार तथा हि को 'धि' आदेश ।

४. **लब्धा**। लभ् + श्वस्तनी-ता। 'डु लभष् प्राप्तौ' (१।४७२) धातु से श्वस्तनीसंज्ञक 'ता' प्रत्यय, तकार को धकार तथा प्रकृत सूत्र से भकार को बकार आदेश ॥८२८।

## ८२९. अघोषेष्वशिटां प्रथम: [३।८।९]

### [सूत्रार्थ]

अघोषसंज्ञक वर्ण के परे रहते धातुघटित शिट्भिन्न धुट्संज्ञक वर्ण के स्थान में प्रथम वर्ण आदेश होता है ॥८२९।

### [दु० वृ०]

अघोषेषु परतो धातूनामशिटामेव धुटां प्रथमो भवति । धोक्षि, भेत्ता, बुभुत्सते, युयुत्सते, आरिप्सते। अशिटामेवेति किम् ? अस्ति ॥८२९।

### [दु० टी०]

अघो० । अघोषे प्रथम. सिद्धोऽयमपि **नियमार्थ** इत्याह – अशिटामेवेति ॥८२९।

### [वि० प०]

अघोषे०। इहाप्यघोषे प्रथम: इति सिद्धे **नियमार्थमि**त्याह-अशिटामेवेति। धोक्षीति। दुहे: सि:। आरिप्सते इति। रभे: सनि **"सनि मिमी०"** (३।३।३९) इत्यादिना पूर्ववद् इसादेश: ॥८२९।

### [समीक्षा]

'भेत्ता, धोक्षि, आरिप्सते' इत्यादि शब्दरूपों की सिद्धि वर्गीय प्रथम वर्ण के विधान से उभयत्र की गई है। पाणिनि का सूत्र है – "खरि च" (अ० ८।४।५५)। पाणिनीय खर् प्रत्याहार में जिन वर्णों का समावेश होता है, उनके अवबोधार्थ कातन्त्र में 'अघोष' संज्ञा की गई है – "वर्गाणां प्रथमद्वितीया: शषसाश्चाघोषा:" (१।१।११) । पाणिनि ने 'झल्' प्रत्याहार में जिन वर्णों को सम्मिलित किया है, उन वर्णों की कातन्त्रकार ने 'धुट्' संज्ञा की है – "धुड् व्यञ्जनमनन्त:स्थानुनासिकम्" (२।१।१३) । कातन्त्रकार ने इन धुट्संज्ञक वर्णों में आने वाले 'शिट्' संज्ञक वर्ण = श्, ष्, स्' को छोड़ दिया है – 'अशिटाम्' इस पद के पाठ से, क्योंकि प्रकृत आदेश इन वर्णों के स्थान में प्रवृत्त नहीं होता, परन्तु पाणिनीय 'झल्' प्रत्याहार यहाँ पर्याप्त व्याख्येय बना रहता है । इसी प्रकार आदेश भी शकारादि के रूप में अभीष्ट नहीं है, इसलिए कातन्त्रकार का 'प्रथम' शब्दनिर्देश स्पष्टार्थावबोधक

है, जब कि पाणिनीय 'खर्' प्रत्याहार का निर्देश भ्रामक ही कहा जाएगा, क्योंकि 'खर्' प्रत्याहार में 'श्' ष्, स्' इन वर्णों का भी ग्रहण होता है।

### [विशेष वचन]

१. इहाप्यघोषे प्रथम: इति सिद्धे नियमार्थम् (वि० प०; द्र०-टीका)।

### [रूपसिद्धि]

१. **धोक्षि**। दुह् + सि। 'दुह प्रपूरणे' (२।६१) धातु से वर्तमानाविभक्तिसंज्ञक म० पु० - ए० व० 'सि' प्रत्यय, अन् विकरण, उसका लोप, "नामिनश्चोपधाया लघो:" (३।५।२) से उकार को गुण-ओकार, "दादेर्घ:" (३।६।५७) से हकार को घकार, "तृतीयादेर्घढधभान्तस्य धातोरादिचतुर्थत्वं सध्वो:" (३।६।१००) से दकार को धकार, प्रकृत सूत्र से घकार को ककार, "नामिकरपर: प्रत्ययविकारागमस्थ: सि: षं नुविसर्जनीयषान्तरोऽपि" (२।४।४७) से सकार को षकार तथा 'क्-ष्' संयोग से क्षकार वर्ण की निष्पत्ति।

२. **भेत्ता**। भिद् + ता। 'भिदिर् विदारणे' (६।२) धातु से श्वस्तनीसंज्ञक प्र० पु०-ए० व० 'ता' प्रत्यय, उपधागुण तथा प्रकृत सूत्र से दकार को तकार आदेश।

३. **बुभुत्सते**। बुध् + सन् + अन् + ते। 'बुध अवगमने' (१।५६६) धातु से इच्छार्थक 'सन्' प्रत्यय, द्विर्वचनादि, 'बुभुध् + स' इस स्थिति में प्रकृत सूत्र से धकार को तकार 'बुभुत्स' की धातुसंज्ञा, वर्तमानासंज्ञक आत्मनेपद प्र० पु०-ए० व० 'ते' प्रत्यय, अन् -विकरण तथा अकारलोप।

४. **युयुत्सते**। युध् + सन् + ते। 'युध संप्रहारे' (३।११०) धातु से सन् प्रत्यय, द्विर्वचनादि, प्रकृत सूत्र से धकार को तकार, 'युयुत्स' की धातुसंज्ञा, 'ते' प्रत्यय, अन् विकरण तथा अकार का लोप।

५. **आरिप्सते**। आ + रभ् + सन् + अन् + ते। 'रभ राभस्ये' (१।४७१) धातु से इच्छार्थक सन् प्रत्यय, द्विर्वचनादि, प्रकृत सूत्र से भकार को पकार, "सनि मिर्मीमादारभलभशकपतपदामिस् स्वरस्य" (३।३।३९) से इस् आदेश-अभ्यासलोप, धातुसंज्ञा, 'ते' प्रत्यय, अन् - विकरण तथा अकार का लोप॥८२९।

## ८३०. भृजः स्वरात् स्वरे द्वि: [३।८।१०]

### [सूत्रार्थ]

स्वरसंज्ञक वर्ण के परे रहते 'भृज्' धातुघटित स्वर से परवर्ती जकार को द्वित्व होता है ॥८३०।

### [दु० वृ०]

भृज: स्वरात् परस्य स्वरे द्विर्भवति। भृर्जी-बभृज्जे, बभृज्जाते, बभृज्जिरे। **आद्यव्याकरणमतमेतत्**॥८३०।

### [दु० टी०]

भृज:। **'भृजी भर्जने'** (१।३४६) इति भ्वादावात्मनेपदी। आद्येत्यादि। **आधुनिकव्याकरणेषु** नैतल्लक्षणमस्तीति भाव:। ऋत इति सिद्धे स्वरादिति **स्पष्टार्थम्** ॥८३०।

### [वि० प०]

भृजः । आद्येत्यादि । अर्वाचीनेषु व्याकरणेषु नैतल्लक्षणमस्तीति भावः ॥८३०।

### [समीक्षा]

'भृजी भर्जने' (१।३४६) धातु को पाणिनि ने भी भ्वादिगण में पढ़ा है (भ्वा० ११०) और उससे 'बभृजे' आदि शब्दरूप बनाए हैं, क्योंकि वहाँ जकार के द्वित्व का विधान नहीं है। इसीलिए वृत्तिकार दुर्गसिंह आदि ने शर्ववर्मा के इस द्वित्वविधान को आद्यव्याकरण= पूर्वाचार्यव्याकरण से सम्मत कहा है – **'आद्यव्याकरणमतमेतत्'** । जिस काशकृत्स्नव्याकरण से प्रभावित यह व्याकरण माना जाता है, उसके धातुव्याख्यान में (भृज् भर्जने १।४२६) इस धातु का पाठ तो उपलब्ध है, परन्तु उक्त रूप नहीं दिए गए हैं । अतः किसी अन्य प्राचीन व्याकरण का यह मत हो सकता है।

### [विशेष वचन]

१. आद्यव्याकरणमतमेतत् (दु० वृ०) ।

२. आधुनिकव्याकरणेषु नैतल्लक्षणमस्तीति भावः (दु० टी०; वि० प०)।

### [रूपसिद्धि]

१. **बभृज्जे** । भृजी + परोक्षा-ए । 'भृजी भर्जने' (१।३४६) धातु से परोक्षाविभक्तिसंज्ञक प्र० पु०-ए० व० 'ए' प्रत्यय, ''चण्परोक्षाचेक्रीयितसनन्तेषु'' (३।३।७) से धातु को द्विर्वचन, अभ्यासकार्य तथा प्रकृत सूत्र से जकार को द्वित्व।

२. **बभृज्जाते** । भृजी + परोक्षा-आते । 'भृजी' धातु से परोक्षासंज्ञक 'आते' प्रत्यय, द्विर्वचनादि तथा प्रकृत सूत्र से जकार को द्वित्व ।

३. **बभृज्जिरे** । भृजी + परोक्षा-इरे। 'भृजी' धातु से परोक्षासंज्ञक 'इरे' प्रत्यय, धातु को द्विर्वचनादि तथा प्रकृत सूत्र से जकार को द्वित्व ॥८३०।

## ८३१. अस्य वमोर्दीर्घः [३।८।११]

### [सूत्रार्थ]

वकार-मकार के पर रहते अकार को दीर्घ आदेश होता है ॥८३१।

### [दु० वृ०]

अकारस्य दीर्घो भवति वमोः परतः। पचामि, पचावः, पचामः। दीव्यामि, दीव्यावः, दीव्यामः। अस्येति किम् ? दध्वः, दध्मः। यदि दीर्घः स्यात् तदा आलोपो न स्यात् । कथं पचमानः, अपचम् ? वमोर्वर्णयोराद्ययोः साहचर्यात् ॥८३१।

### [दु० टी०]

अस्य० । ननु प्रत्युदाहरणमिदं युक्तम् 'चिनुमः, जुहुमः' इति? सत्यम् । **कश्चिदाह– तपर**स्तत्कालस्य ग्राहकः, अतत्परश्च सामान्यस्य ग्राहक इति। 'दध्वः, दध्म.' इति दीर्घस्य दीर्घत्वबलादभ्यस्तानामाकारस्य लोपो न स्यादित्यर्थः, तत्प्रत्युदाहरणेनैव निरस्यति, आकारादाकारस्य जात्यन्तरत्वात् । कथमित्यादि । आनप्रत्यये मकारांगमे कृते ह्यस्तन्या

अम्प्रत्यये च **''असन्ध्यक्षरयोरस्य तौ तल्लोपश्च''** (३।६।४०) इति कृते दीर्घः प्राप्नोतीति भावः। परिहारमाह – वमोरित्यादि। वकारस्तावदयं प्रत्ययादिरेव सम्भवति, तत्साहचर्यान्मकारोऽपि प्रत्ययादिरित्यर्थः। अकारात् परे आनोऽकारान्तस्यैव मोऽन्तो भवतीति। अथवा वकारस्तावत् सस्वर एव प्रत्ययस्य सम्भवति, तत्साहचर्यान्मकारोऽपीत्यर्थः। 'आ' इति सिद्धे दीर्घग्रहण**मुत्तरार्थम्** ॥८३१।

## [वि० प०]

अस्य०। ननु तपरस्तत्कालस्य तद्विपरीतश्च सामान्यग्राहको वर्णः। ततोऽस्येति तपरत्वाभावाद् दीर्घस्यापि ग्रहणं भविष्यति। तदयुक्तम्। आकारादाकारस्येकारादीनामिव जात्यन्तरत्वात् कथं तद्ग्रहणेन ग्रहणम्। अत एव तपरस्तत्कालस्येत्यत्र नादृतमेवेति। एतदेव प्रत्युदाहरणेनाह – अस्येत्यादि। अन्यथा 'चिनुवः, चिनुमः' इति प्रत्युदाहर्तुमुचितमिति भावः। साहचर्यादिति। वकारस्तावदयं प्रत्ययस्यादिरेव सम्भवति, तत्साहचर्यान्मकारोऽपि प्रत्ययस्यादिरेव गृह्यते इति। ननु तथापि 'पचमानः' इत्यत्र **''आन्मोऽन्त आने''** (४।४।७) इत्यनेन मकारागमस्यानग्रहणेन गृह्यमाणत्वादयं प्रत्ययादिरेव मकार इति चेत्, न। तत्सूत्रार्थापरिज्ञानात्। तत्र ह्याकारात् परो य आनस्तस्मिन् अकारान्तस्यैव मोऽन्त इति। अकारान्तग्रहणेन मकारो गृह्यते, न तु आनग्रहणेनेति। अपचम् इत्यत्रापि असन्ध्यक्षरलोपे कृते कुतः प्रसङ्गः, मकारस्यानादित्वात् ॥८३१।

## [बि० टी०]

अस्य०। ननु अकारस्य वमोर्दीर्घो भवन् कथं स्याद् दीर्घ इति चेत्, वमोः परतो दीर्घो भवन् यावान् अकारो विद्यते तावत्येव स्यात्, तेन 'स्याव, स्याम, स्यावस्, स्यामस्' इत्यादौ संहितेऽपि दीर्घः। वमोर्वर्णयोरिति **वृत्तिः**। ननु कथमिदमुच्यते यावता मध्यश्चान्तोऽपि विद्यते तस्माद् वकारस्य साहचर्यादित्येव वक्तुं युज्यते ? सत्यम्, वमोरिति नैतत् साहचर्यम्, किन्तर्हि वमोरादिभूतयोरेव दीर्घः। तत्र हेतुमाह – साहचर्यादिति। **साहचर्य** पुनर्वकारस्य वेदितव्यम् ॥८३१।

## [समीक्षा]

'पचामि, पचावः, पचामः' इत्यादि शब्दरूपों के सिद्ध्यर्थ उभयत्र दीर्घविधान निर्दिष्ट है। पाणिनि का सूत्र है – ''अतो दीर्घो यञि'' (अ० ७।३।१०१)। पाणिनीय यञ् प्रत्याहार में 'य्, व्, र्, ल्, ञ्, म्, ङ्, ण्, न्, झ्, भ्' ये ११ वर्ण पढ़े जाते हैं, जब कि उदाहरणों के अनुसार केवल मकार-वकार के ही परे यह दीर्घ आदेश प्रवृत्त होता है। अतः कातन्त्रीय 'वमोः' पाठ स्पष्टतया तात्पर्यबोधक है, जबकि 'यञ्' पाठ अत्यन्त भ्रामक है।

## [विशेष वचन]

१. तपरस्तत्कालस्य ग्राहकः, अतत्परश्च सामान्यस्य ग्राहकः (दु० टी०)।

२. वकारस्तावदयं प्रत्ययादिरेव सम्भवति, तत्साहचर्यान्मकारोऽपि प्रत्ययादिरित्यर्थः (दु० टी०; वि० प०)।

३. 'आ' इति सिद्धे दीर्घग्रहणमुत्तरार्थम् (दु० टी०)।

४. वमोः परतो दीर्घो भवन् यावान् अकारो विद्यते तावत्येव स्यात् (बि० टी०)।

५. साहचर्यं पुनर्वकारस्य वेदितव्यम् (बि० टी०)।

**[रूपसिद्धि]**

१. **पचामि।** पच् + वर्तमाना-मि। 'डु पचष् पाके' (१।६०३) धातु से वर्तमानाविभक्तिसंज्ञक उत्तमपुरुष-ए० व० 'मि' प्रत्यय, "अन् विकरणः कर्तरि" (३।२।३२) से 'अन्' विकरण, 'न्' अनुबन्ध का प्रयोगाभाव, तथा प्रकृत सूत्र से अकार को दीर्घ आदेश।

२. **पचावः।** पच् + वर्तमाना-वस्। 'पच्' धातु से वर्तमानासंज्ञक उ० पु०-द्विव० 'वस्' प्रत्यय तथा शेष प्रक्रिया पूर्ववत्।

३. **पचामः।** पच् + वर्तमाना - मस्। 'पच्' धातु से वर्तमानाविभक्तिसंज्ञक उ० पु०-ब० व० 'मस्' प्रत्यय एवं शेष प्रक्रिया पूर्ववत्।

४. **दीव्यामि।** दिव् + वर्तमाना-मि। 'दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिकान्तिगतिषु' (३।१) धातु से वर्तमानासंज्ञक 'मि' प्रत्यय "दिवादेर्यन्" (३।२।३३) से 'यन्' विकरण, "नामिनो वोरकुर्छुरोर्व्यञ्जने" (३।८।१४) से इकार को तथा प्रकृत सूत्र से अकार को दीर्घ आदेश।

५. **दीव्यावः।** दिव् + वर्तमाना-वस्। 'दिव्' धातु से वर्तमानासंज्ञक 'वस्' प्रत्यय तथा शेष पूर्ववत्।

६. **दीव्यामः।** दिव् + वर्तमाना-मस्। 'दिव्' धातु से वर्तमानासंज्ञक 'मस्' प्रत्यय तथा शेष पूर्ववत् ॥८३१।

## ८३२. स्वरान्तानां सनि [३।८।१२]

**[सूत्रार्थ]**

सन् प्रत्यय के परे रहते स्वरान्त धातु के अन्तिम स्वर वर्ण को दीर्घ आदेश होता है ॥८३२।

**[दु० वृ०]**

स्वरान्तानां धातूनां सनि परे दीर्घो भवति। चिचीषति, जुहूषति, चिकीर्षति, तुष्टूषति। कथं शिश्रयिषति, बिभरिषति? गुणेनाघ्रातत्वात्। स्वरान्तानामिति **सुखार्थमेव** ॥८३२।

**[दु० टी०]**

स्वरान्ता०। अथ किमर्थं स्वरान्तग्रहणम्, दीर्घादयः स्वरस्यैव स्थाने निश्चिता एव? सत्यम्, अस्येत्यनुवर्तनाद् **'अन्त्याभावेऽन्त्यसदेशस्य'** (का० परि० ३९) अकारस्य दीर्घः प्रसज्येत, तदन्तविशेषणं च गरीयः स्यादिति ॥८३२।

**[वि० प०]**

स्वरान्ता०। गुणेनाघ्रातत्वादिति। **"इवन्तर्द्ध०"** (३।७।३३) इत्यादिना पक्षे इटि

कृते **''नाम्यन्तानामनिटाम्''** (३।५।१७) इत्यस्य गुणनिषेधस्याविषयत्वादित्यर्थः। ननु **दीर्घादयो हि स्वरधर्मा** इति सामर्थ्यप्राप्तेन स्वरेण तदन्तविधिर्भविष्यतीत्याह-स्वरेत्यादि ॥८३२।

## [बि० टी०]

स्वरान्ता० । कथं शिश्रयिषति, बिभरिषति' गुणेनाघ्रातत्वादिति **वृत्तिः**। ननु **''नाम्यन्तानामनिटाम्''** (३।५।१७) इत्यत्रानेन दीर्घत्वे गुणो न स्यादित्युक्तम् । यदि च दीर्घो गुणेन बाध्यते, तत्कथं 'दीर्घाणां च कृतो दीर्घो गुणं बाधेत' इत्यादि ग्रन्थः संगच्छते। तस्मादेतद्ग्रन्थस्यान्यथानुपपत्तौ गुणं बाधेतेति दीर्घकरणमिति चेत् ? सत्यम्, **''नाम्यन्तानामनिटाम्''** (३।५।१७) इत्यनेनानिटामगुणत्वं सनः स्यात् । सेटस्तु गुणो भवत्येव, विधिव्यावृत्तिबलात् । अन्यथा विधानेन किम् ? तर्हि सेटि सनि गुणबाधनार्थं विधिर्भवतु, कथमुक्तम् **'इनो लोपस्तु दुर्लभः'** इति **दुर्गवृत्तौ** इति चेत् ? सत्यम्, तत्रैवायमपि दोषः। तुशब्देन सूचितम् – 'नाम्यन्तानामनिटाम्' इत्यस्य व्यावृत्तिबलाद् दीर्घो गुणेन बाध्यते इत्याह-गुणेनाघ्रातत्वादिति ॥८३२।

## [समीक्षा]

'चिकीर्षति, तुष्टूषति, जिहीर्षति' इत्यादि शब्दरूपों के सिद्ध्यर्थ उभयत्र स्वर वर्णों के दीर्घादेश का विधान किया गया है। पाणिनि का सूत्र है – "अज्झनगमां सनि" (अ० ६।४।१६)। 'जिघांसति, अधिजिगांसते' शब्दों के सिद्ध्यर्थ पाणिनि ने 'हन्-गम्' धातुओं का भी इसमें पाठ किया है, परन्तु कातन्त्रकार ने सुखार्थ पृथक् सूत्र बनाया है।

## [विशेष वचन]

१. स्वरान्तानामिति सुखार्थमेव (दु० वृ०)।
२. तदन्तविशेषणं च गरीयः स्यात् (दु० टी०)।
३. दीर्घादयो हि स्वरधर्मा इति सामर्थ्यप्राप्तेन स्वरेण तदन्तविधिर्भविष्यति (वि० प०)।
४. तुशब्देन सूचितम् – नाम्यन्तानामनिटामित्यस्य व्यावृत्तिबलाद् दीर्घो गुणेन बाध्यते (बि० टी०)।

## [रूपसिद्धि]

१. **चिचीषति**। चि + सन् + अन् + ति। 'चिञ् चयने' (४।५) धातु से इच्छार्थक सन् प्रत्यय, द्विर्वचनादि, प्रकृत सूत्र से इकार को दीर्घ, सकार को षकार, धातुसंज्ञा, 'ति' प्रत्यय, अन् विकरण तथा अकारलोप।

२. **जुहूषति**। हु + सन् + अन् + ति। 'हु दाने' (२।६७) धातु से इच्छार्थक सन् प्रत्यय, द्विर्वचनादि, प्रकृत सूत्र से उकार को दीर्घ तथा विभक्तिकार्य।

३. **चिकीर्षति**। कृ + सन् + अन् + ति। 'डु कृञ् करणे' (७।७) धातु से 'कर्तुमिच्छति' इस अर्थ में सन् प्रत्यय, द्विर्वचनादि तथा विभक्तिकार्य।

४. **तुष्टूषति।** स्तु + सन् + अन् + ति। 'ष्टुञ् स्तुतौ' (२।६५) धातु से 'स्तोतुमिच्छति' इस अर्थ में सन् प्रत्यय, द्विर्वचनादि तथा विभक्तिकार्य ॥८३२।

## ८३३. हनिङ्गमोरुपधायाः [३।८।१३]

### [सूत्रार्थ]

सन् प्रत्यय के परे रहते 'हन्' धातु तथा इङ्स्थानिक 'गम्' की उपधा को दीर्घ आदेश होता है ॥८३३।

### [दु० वृ०]

इङो गमः **इङ्गमः।** हनिङ्गमोरुपधाया दीर्घो भवति सनि परे। जिघांसति, अधिजिगांसते। इङो गम इति किम् ? संजिगांसते, तितांसति, तितनिषर्तीति वा वक्तव्यम् ॥८३३।

### [दु० टी०]

सनि०। इङो गमः इति इणो गमेर्गम्ल इत्यस्य च निवृत्तिरित्यर्थः। **'औपदेशिक-प्रायोगिकयोरौपदेशिकस्यैव प्राप्नोति'** (का० परि०४२) इति वा। यदा सम्पूर्वस्येणः आदेशस्तत्राप्यात्मनेपदमस्तीति अभेदेन एकं प्रत्युदाहरणं 'संजिगांसते वत्सो मात्रा' इत्यर्थः। जिगमिषर्तात्यपि प्रत्युदाहरणं युज्यते। नात्र व्यञ्जनादाविति विशेषणमस्ति। **केचित् पदकारमत**माश्रित्य 'हनिगमोरुपधायाः' इति पठन्ति। तेषां 'जिगांस्यते, अधिजिगांस्यते' इति इणिकोरपि गमेर्दीर्घो भवत्येव। एर्गमः **इगमः** इति व्याख्यानाद् गच्छतेर्न भवति। **भाष्ये** तु न चिन्तितमेतत् । 'हनिङोरुपधायाः' इति सिद्धे गमिग्रहणं **स्पष्टार्थम्। 'येन नाव्यवधानं तेन व्यवहितेऽपि स्यात्'** (व्या० परि० ३९) इत्युपधाया एव भविष्यतीत्यु-पधाग्रहण**मुत्तरार्थम्** ।

ननु तदन्तविधिर्व्यञ्जनादिश्च प्रत्यय एव नामिनो र्वोरिति सप्तमीं वर्णयिष्यामः। व्यञ्जने परे यौ रेफवकारौ तयोः परयोर्धातोर्नामिन इति नैवं रेफवकाराभ्यां धातुर्विशिष्यते, **'विशेषणेन च तदन्तविधिः'** व्यञ्जनादिश्च प्रत्यय एव सम्भाव्येत। ततश्च 'मूच्छ्र्यते, धूर्व्यते' इति न सिध्यति, दीर्घपाठोऽपि गणे गौरवाय स्यात् । **''राल्लोप्यौ''** (४।१।५८) इति 'मुरौ, मुरः, धुरौ, धुरः' इति च ह्रस्व इष्यते। तत्रोपधाधिकारबलादपेक्षयाऽन्तत्वमिति अन्त्यात् पूर्व उपधा इत्यपि न विरुध्यते। **उत्तरार्थं** क्रियमाणमिहापि **सुखप्रतिपत्त्यर्थ**मुच्यते। तनोतेर्वेति वक्तव्यम्, तत्रापि सनि व्यञ्जनादाविति। तेन तितनिषर्तात्यत्र दीर्घो न भवति। वक्तव्यं व्याख्येयमित्यर्थः। **केचिद्** दीर्घमिच्छन्ति **केचिन्ने**च्छन्ति, तेषां मतमिष्टमित्यर्थः ॥८३३।

### [वि० प०]

हनि०। इङ्गमः इति 'सनीनिङोर्गमिः' इत्यनेन य इङः स्थाने गमः स **इङ्गमः** इत्यर्थः । संजिगांसते इति सम्पूर्वो गम्ल इण् वा, पूर्ववद् गमिरादेशः। **''समो गमृछि०''** (३।२।४२-२०) इत्यादिना रुचादित्वादात्मनेपदम् । वक्तव्यमिति। अत्रापि सनि व्यञ्जनादाविति वान्यत्र न भवति। तितनिषति इति। **''इवन्तर्ध०''** (३।७।३३) इत्यादिना पक्षे इट् । वक्तव्यं व्याख्येयम् इति। **केचिदि**च्छन्ति **केचिन्ने**च्छन्ति, **ये** नेच्छन्ति **तन्मतमिह प्रमाणमित्यर्थः**॥८३३।

## [बि० टी०]

हनि० । ननु तत्रोपधाग्रहणं किमर्थम्, पूर्वतो दीर्घानुवृत्तौ दीर्घस्य स्वरधर्मत्वात् स्वरस्यैव स्यात्, न चेहोपधामन्तरेणान्यः स्वरः सम्भवति? सत्यम्, उपधाग्रहण **मुत्तरार्थम्**। अन्यथा **"नामिनो वोंo"** (३।८।१४) इत्यत्र रेफवकारसम्बन्धिनो नामिनो दीर्घः स्याद् इत्यर्थे सति विवृत्सतीत्यत्र वृधधातुसम्बन्धिन ऋकारस्य दीर्घः स्यादिति॥८३३।

## [समीक्षा]

'जिघांसति, अधिजिगांसते' इत्यादि शब्दरूपों के सिद्ध्यर्थ उभयत्र दीर्घविधान निर्दिष्ट है। पाणिनि ने अच् के साथ 'हन्-गम्' इन दोनों धातुओं को भी पढ़ दिया है– "अज्झनगमां सनि" (अ० ६।४।१६) । कातन्त्रकार ने एतदर्थ दो सूत्र बनाए हैं। 'अधि' उपसर्गपूर्वक 'इङ्' धातु के स्थान में होने वाला ही गम् आदेश अभीष्ट है, अतः सूत्र में 'इङ्गमः' पाठ है– इङो गमः इङ्गमः । पदकार के अनुसार 'हनिगमोः' भी पाठ माना जाता है। व्याख्याकारों के अनुसार भाष्यकार ने इस विषय पर चिन्ता नहीं की है।

## [विशेष वचन]

१. तितांसति, तितनिषतीति वा वक्तव्यम् (दु० वृ०) ।
२. केचित् पदकारमतमाश्रित्य हनिगमोरुपधाया इति पठन्ति (दु० टी०) ।
३. भाष्ये तु न चिन्तितमेतत् (दु० टी०) ।
४. हनिङोरुपधाया इति सिद्धे गमिग्रहणं स्पष्टार्थम् (दु० टी०) ।
५. उपधाग्रहणमुत्तरार्थम् (दु० टी०; बि० टी०) ।
६. उत्तरार्थं क्रियमाणमिहापि सुखप्रतिपत्त्यर्थमुच्यते (दु० टी०) ।
७. वक्तव्यं व्याख्येयमित्यर्थः । केचिद् दीर्घमिच्छन्ति केचिन्नेच्छन्ति, तेषां मतमिष्टमित्यर्थः (दु० टी०; वि० प०) ।

## [रूपसिद्धि]

१. **जिघांसति।** हन् + सन् + अन् + ति। 'हन हिंसागत्योः' (२।४) धातु से इच्छार्थक 'सन्' प्रत्यय, द्विर्वचनादि, प्रकृत सूत्र से उपधा को दीर्घ, धातुसंज्ञा, वर्तमानासंज्ञक 'ति' प्रत्यय, अन् विकरण तथा अकार का लोप ।

२. **अधिजिगांसते।** अधि + इङ् - गम् + सन् + अन् + ते। 'अधि' उपसर्गपूर्वक 'इङ् अध्ययने' (२।५६) धातु से इच्छार्थक सन् प्रत्यय, "सनीणिङोर्गमिः" (३।४।८६) से 'गम्' आदेश, द्विर्वचनादि, प्रकृत सूत्र से उपधा को दीर्घ, अनुस्वार, धातुसंज्ञा, 'ते' प्रत्यय, अन् विकरण तथा अकार का लोप ॥ ८३३।

# ८३४. नामिनो वोंरकुर्छुरोर्व्यञ्जने [३।८।१४]

## [सूत्रार्थ]

व्यञ्जनवर्ण के परे रहते धातुगत 'र्-व्' की उपधा में विद्यमान नामिसंज्ञक वर्ण के स्थान में दीर्घ आदेश होता है 'कुर्-छुर्' को छोड़कर ॥८३४।

## [दु० वृ०]

नात्र तदन्तविशेषणम् । वोंरुपधाया धातोर्नामिनो दीर्घो भवति व्यञ्जने परे न तु कुर्छुरोः। चिकीर्षति, बुभूर्षति, दीव्यति, सीव्यति, कूर्दते, खूर्दते। धातोरिति किम् ? कुर्कुरः। कथं कुर्कुरीयति? नामधातुत्वात् । नामिन इति किम् ? कर्ता, भव्यम् । वोंरिति किम् ? नृत्यति। अकुर्छुरोरिति किम् ? कुर्यात् । दीर्घविधिं प्रति न स्थानिवदिति छुर्यते। कथं री रेषणे– रिर्यतुः । वी प्रजने-विव्यतुः? अभ्यासे प्रतिषेध इति। व्यञ्जन इति किम् ? किरति, गिरति, नुवति ॥८३४।

## [दु० टी०]

नामि० । इह धात्वधिकारः स्मर्तव्यः, स च नामिनो विशेषणं विधेयस्य प्रधानाङ्गत्वात्। न च धात्वधिकारस्य श्रुतत्वाद् धातोरेव व्यञ्जने स्यादिति चोद्यम् अकुर्छुरोरिति प्रतिषेधात्। **केचिद्** अकुर्छुरोरिति। **पर्युदासाद्** धातोरित्याचक्षते रेफसाहचर्याद् वकारोऽप्यन्त एव गृह्यते इति **केचित्** । एवम् उब्जेरपि - न्युब्जति । कथमित्यादि। **'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः'** (का० परि० २) इति। यथा दिवमिच्छति दिव्यति, चतुर्य्यति। 'प्रतिदीव्नः' इति व्यञ्जने परे धातोरयमिकारो **व्युत्पत्तिपक्ष**स्येहाश्रयणाद् दिवेः कनौणादिकः। दीर्घ इत्यादि। न पदान्तद्विर्वचनवर्गान्तानुस्वारप्रथमतृतीयदीर्घलुग्विधिषु स्वरादेषो न स्थानिवदेवेत्यर्थः । **केचित्** कुरुच्छुरोरिति विकरणान्तमेव पठन्ति। कुरशब्द इति धातुनिवृत्त्यर्थम्, तेन कुर्यते, कुर्यात्। **भाष्ये** तु नैष पाठो धातुरेवास्तीति लक्ष्यते । अन्यथाऽलाक्षणिकत्वात् साहचर्याच्च कुरशब्द इत्यस्यैव ग्रहणं स्यात्, न कृतविकरणलोपस्येति । रिर्यतुरित्यादि। दीर्घविधौ यत्वलक्षणः स्वरादेशो न स्थानिवदेव, न पदान्त इत्यादिपरिभाषाया अनित्यत्वं साधितम् । तेनाभ्यासे प्रतिषेध इति न वक्तव्यम् ॥८३४।

## [वि० प०]

नामि०। ननु रेफवकाराभ्यां धातुर्विशिष्यते, विशेषणेन च तदन्तविधिरिति न्यायाद् रेफवकारान्तस्यैव धातोर्दीर्घः प्राप्नोति। कथं 'मूर्छति, धूर्वति' इत्यत्र दीर्घत्वं स्यात् । न च वक्तव्यम् - दीर्घवानयं पाठ इति। **''राल्लोप्यौ''** (४।१।५८) इति कृते 'मुरौ, मुरः, धुरौ, धुरः' इति न स्यात् । तदयुक्तमित्याह– नात्रेति। कथं पुनरत्र तदन्तविशेषणं नास्तीति? सत्यम् । येन नाव्यवधानं तेन व्यवहितेऽपि स्यादिति स्वरस्यैव दीर्घो भवन्नर्थाद् एकवर्णव्यवधानेऽपि तस्यैव भविष्यति। यत् पूर्वत्रोपधाग्रहणं **तदिहार्थम्** । यदि चेह तदन्तविशेषणं स्याद् इहापि तत्रोक्तेन न्यायेनोपधाया एव भविष्यतीति किमुपधाग्रहणेन? तस्मादुपधाग्रहणम् अनन्त्ययोरपि रेफवकारयोर्नाम्युपधापेक्षया अनन्त्यत्वे सति **उपधात्वप्रतिपत्त्यर्थम्** ।

एवं च सति न तदन्तविशेषणमिति स्थितम् । अत एव व्यञ्जनमिह सामान्यम् प्रकृतेः प्रत्ययस्य च भविष्यतीति। कुर्यादिति । ननु ये चेति विकरणोकारलोपस्य स्वरादेशत्वात् स्थानिवद्भावेन व्यञ्जनव्यवहितत्वाद् दीर्घो न भविष्यति किं प्रतिषेधेनेत्याह – दीर्घेत्यादि । न पदान्तद्विर्वचनेत्यादिना स्थानिवद्भावस्य प्रतिषेधोऽस्तीत्यर्थः । कथमिति । **''य इवर्णस्य०''**

(३।४।५८) इत्यादिना यत्वे कृते व्यञ्जनमस्तीति दीर्घः स्यात् । नैवम्, दीर्घविधावपि यत्वलक्षणस्वरादेशस्य स्थानिवद्भावान्न पदान्त इत्यादिपरिभाषाया अनित्यत्वाभ्युपगमात्। अतोऽभ्यासे प्रतिषेधः इति न वक्तव्यं भवति । नुवतीति। **'नु स्तवने'** (२।७) इति तौदादिकः ॥८३४।

## [समीक्षा]

'गीः, धूः, आशीः, चिकीर्षति, दीव्यति' इत्यादि शब्दरूपों के सिद्ध्यर्थ दोनों व्याकरणों में दीर्घविधान किया गया है – "वोंरुपधाया दीर्घ इकः" (अ० ८।२।७६) । पाणिनीय 'इक्' प्रत्याहार में 'इ, उ, ऋ ऌ' वर्ण पढ़े जाते हैं तथा कातन्त्रीय 'नामी' संज्ञा 'इ ई, उ, ऊ, ऋ ॠ, ऌ ॡ, ए ऐ, ओ औ' इन बारह वर्णों की होती है। वस्तुतः दीर्घ आदेश इकार-उकार को ही यहाँ प्रवृत्त होता है । अतः 'नामी' निर्देश की अपेक्षा पाणिनीय 'इक्' निर्देश ही लाघवबोधक कहा जाएगा ।

## [विशेष वचन]

१. इह धात्वधिकारः स्मर्तव्यः, स च नामिनो विशेषणम् (दु० टी०) ।
२. केचित् कुरुच्छुरोरिति विकरणान्तमेव पठन्ति (दु० टी०) ।
३. भाष्ये तु नैष पाठः, धातुरेवास्तीति लक्ष्यते (दु० टी०) ।
४. यत् पूर्वत्रोपधाग्रहणं तदिहार्थम् (वि० प०) ।
५. तस्मादुपधाग्रहणमनन्तययोरपि रेफवकारयोर्नाम्युपधापेक्षयाऽनन्त्यत्वे सति उपधात्व-प्रतिपत्त्यर्थम् (वि० प०) ।

## [रूपसिद्धि]

१. **चिकीर्षति।** कृ + सन् + अन् + ति । 'डु कृञ् करणे' (७।७) धातु से "धातोर्वा तुमन्तादिच्छतिनैककर्तृकात्" (३।२।४) से इच्छार्थक 'सन्' प्रत्यय, "चण्परोक्षाचेक्रीयितसनन्तेषु" (३।३।७) से 'कृ' को द्वित्व, "पूर्वोऽभ्यासः" (३।३।४) से पूर्ववर्ती 'कृ' की अभ्याससंज्ञा, "सन्यवर्णस्य" (३।३।२६) से अभ्यासघटित ऋकार को इकार, "कवर्गस्य चवर्गः" (३।३।१३) से ककार को चकार, "ऋदन्तस्येरगुणे" (३।५।४२) से ऋकार को इर् आदेश, प्रकृत सूत्र से इकार को दीर्घ, "निमित्तात् प्रत्ययविकारागमस्थः सः षत्वम्" (३।८।२६) से सकार को षकार, 'चिकीर्ष' की "ते धातवः" (३।२।१६) से धातुसंज्ञा, वर्तमानाविभक्तिसंज्ञक प्र० पु० – ए० व० 'ति' प्रत्यय, "अन् विकरणः कर्तरि" (३।२।३२) से अन् विकरण तथा "अकारे लोपम्" (२।१।१७) से अकार का लोप ।

२. **बुभूर्षति।** भृ + सन् + अन् + ति। 'भृञ् भरणे' (१।५९७) धातु से सन् प्रत्यय, द्विर्वचनादि, "उरोष्ठ्योपधस्य च" (३।५।४३) से उरादेश, प्रकृत सूत्र से उकार को दीर्घ तथा विभक्तिकार्य ।

३. **दीव्यति।** दिव् + यन् + ति । 'दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिकान्तिगतिषु' (३।१) धातु से वर्तमानासंज्ञक 'ति' प्रत्यय, "दिवादेर्यन्" (३।२।३३) से यन् विकरण तथा प्रकृत सूत्र से उपधासंज्ञक इकार को दीर्घ।

४. **सीव्यति।** सिव् + यन् + ति। 'षिवु तन्तुसन्ताने' (३।२) धातु से वर्तमानासंज्ञक 'ति' प्रत्यय, यन् विकरण तथा उपधादीर्घ ।

५. **कूर्दते** । कुर्द्+अन् + ते । 'कुर्द क्रीडायामेव' (१।३०९) धातु से वर्तमानासंज्ञक 'ते' प्रत्यय, अन् विकरण तथा प्रकृत सूत्र से रेफ की उपधा-उकार को दीर्घ आदेश ।

६. **खूर्दते**। खुर्द + अन् + ते । 'खुर्द क्रीडायामेव' (१।३०९) धातु से वर्तमानासंज्ञक 'ते' प्रत्यय, अन् विकरण तथा उकार को दीर्घ आदेश ॥८३४।

## ८३५. सस्य ह्यस्तन्यां दौ तः [३।८।१५]

### [सूत्रार्थ]

ह्यस्तनीविभक्तिसंज्ञक 'दि' प्रत्यय के परे रहते धातुघटित सकार के स्थान में तकारादेश होता है ॥८३५।

### [दु० वृ०]

सस्य ह्यस्तन्यां दौ परे तो भवति। अचकात्, अन्वशात् । ह्यस्तन्यामिति किम् ? अभैत्सीत् । ईटस्तद्ग्रहणेन ग्रहणात् । ह्यस्तन्यां सौ वा वक्तव्यम्-अचकात्त्वम् ॥८३५।

### [दु० टी०]

सस्य०। अभैत्सीदिति। **'आगमा यद्गुणीभूतास्ते तद्ग्रहणेन गृह्यन्ते'** (का०परि०१४) इत्यर्थः। तेन सिचो न भवतीति अधिकारमाश्रित्य सकारेण धातुर्विशिष्यते, तदा ह्यस्तनीग्रहणं **स्पष्टार्थम्** । ह्यस्तन्यां सौ वा वक्तव्यम् इति **मतान्तर**चोदितं न वक्तव्यमित्यर्थः ॥८३५।

### [वि० प०]

सस्य०। **'चकासृ दीप्तौ, शासु अनुशिष्टौ'** (२।३८,३९)। अदादित्वादनो लुक् । **''व्यञ्जनाद् दिस्योः''** (३।६।४७) इति दिलोपः । अभैत्सीदिति । **''व्यञ्जनान्तानामनिटाम्''** (३।६।७) इति वृद्धिः । यदीह ह्यस्तनीग्रहणं न स्यात्, अद्यतन्यामपि दौ सिचः सकारस्य तकारः स्यात् । न च वक्तव्यम् - इटा व्यवहितो दिरिति **'आगमा यद्गुणीभूतास्ते तद्ग्रहणेन गृह्यन्ते'** (का० परि० १४) इति। यदि पुनः सकारेणाधिकृतो धातुर्विशिष्यते, विशेषणेन च तदन्तविधिरिति । अतः सान्तस्य धातोर्विधिरुच्यते, न तदा सिचः प्रसङ्ग इति स्पष्टार्थमेव ह्यस्तनीग्रहणं भवति । वक्तव्यमिति व्याख्येयम्, **मतान्तर**मेतत् । अस्य तु न सम्मतमित्यर्थः ॥८३५।

### [समीक्षा]

'अचकात्, अन्वशात्' प्रयोगों के सिद्ध्यर्थ उभयत्र सकार को तकारादेश किया गया है । पाणिनि का सूत्र है – ''तिप्यनस्तेः'' (अ० ८।२।७३) । पाणिनीय तिप् प्रत्यय (लङ् लकार) के लिए कातन्त्र में ह्यस्तनीविभक्तिसंज्ञक 'दि' प्रत्यय पढ़ा गया है । पाणिनीय सूत्र में लङ् का पाठ नहीं किया गया है और न ही पूर्व सूत्र से उसकी अनुवृत्ति ही आती है। इसके विपरीत कातन्त्रीय सूत्र में साक्षात् 'ह्यस्तनी' शब्द का पाठ है, जो स्पष्टार्थावबोधक है ।

### [विशेष वचन]

१. ह्यस्तन्यां सौ वा वक्तव्यम् – अचकात्त्वम् (दु० वृ०) ।

२. ह्यस्तनीग्रहणं स्पष्टार्थम् (दु० टी०; वि० प०)।

३. ह्यस्तन्यां सौ वा वक्तव्यम् इति मतान्तरचोदितं न वक्तव्यमित्यर्थः (दु० टी०)।

४. यदीह ह्यस्तनीग्रहणं न स्यात्, अद्यतन्यामपि सौ सिचः सकारस्य तकारः स्यात् (वि० प०)।

५. वक्तव्यमिति व्याख्येयम्, मतान्तरमेतत्। अस्य तु न सम्मतमित्यर्थः (वि० प०)।

**[रूपसिद्धि]**

१. **अचकात्।** अट् + चकास् + अन्लोप + ह्यस्तनी-दि। 'चकासृ दीप्तौ' (२।३८) धातु से ह्यस्तनीविभक्तिसंज्ञक प्र० पु० – ए० व० 'दि' प्रत्यय, "अड् धात्वादिर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु" (३।८।१६) से धातुपूर्व अडागम, अन् विकरण का लुक्, प्रकृत सूत्र से सकार को तकार तथा "व्यञ्जनाद् दिस्योः" (३।६।४७) से 'दि' प्रत्यय का लोप।

२. **अन्वशात्।** अनु + शास् + अन्-लोप + ह्यस्तनी-दि। 'अनु' उपसर्गपूर्वक 'शासु अनुशिष्टौ' (२।३९) धातु से ह्यस्तनीसंज्ञक 'दि' प्रत्यय, अडागम, "वमुवर्णः" (१।२।९) से उकार को वकार, अन् विकरण का लुक्, प्रकृत सूत्र से सकार को तकार तथा 'दि' प्रत्यय का लोप ॥८३५।

## ८३६. अड् धात्वादिर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु [३।८।१६]

**[सूत्रार्थ]**

'ह्यस्तनी-अद्यतनी-क्रियातिपत्ति' विभक्तियों के परे रहते धातु से पूर्व अडागम होता है ॥८३६।

**[दु० वृ०]**

ह्यस्तन्यादिषु परतो धातोरादिरडागमो भवति। अकरोत्, अकार्षीत्, अकरिष्यत्। धातोरिति किम् ? न्यविशत ॥८३६।

**[दु० टी०]**

अड् धात्वादि०। टकारोऽयं **निर्देशसुखार्थः**, वृत्तावड्व्यवधानेऽपि विशेषणार्थः ॥८३६।

**[वि० प०]**

अड् धात्वादि०। अकरिष्यदिति। **"हनृदन्तात् स्ये"** (३।७।७) इतीट्। न्यविशतेति। **"नेर्विश्"** (३।२।४२-१) इति रुचादित्वाद् आत्मनेपदम् ॥८३६।

**[बि० टी०]**

अड् धात्वादि०। नन्वत्र आदिग्रहणादटो धातुग्रहणेन ग्रहणम्। ततश्च 'अपीपचत्' इत्यादौ चणि **"स्वरादेर्द्वितीयस्य"** (३।३।२) इति द्विर्वचनप्रसङ्गः। नैवम्, धातुसंज्ञाप्राप्तिकाले यः स्वरादिस्तस्य ग्रहणं भविष्यति। अन्यथा सर्वेषां चणि स्वरादित्वाद् बाधकत्वं नोपपद्यते। **"द्विर्वचनमनभ्यासस्य"** (३।३।१) इत्यत्र द्विर्वचनविधौ गुणग्रहणात्। **किञ्चादिग्रहणस्य सामीप्यार्थे न दोषः।** अथ् धातुग्रहणं किमर्थम् अडादिरित्यास्ताम्, अधिकृतधातुग्रहणाद्

धातोरिति लभ्यते ? सत्यम्, **उत्तरार्थम्** । अन्यथा स्वरादीनां वृद्धिरिति निर्देशो न युज्यते, अधिकृतधातुसम्बन्धेनैकवचनप्रसङ्गात् । किञ्च धातुसंज्ञाप्राप्तिकाले स्वरादिग्रहणे 'औह्यत' इत्यादीनामसिद्धेः । धातुग्रहणं धातुकार्येऽपि **उत्तरत्र परिग्रहार्थम्** ॥८३६।

## [समीक्षा]

'अकरोत्, अकार्षीत्, अकरिष्यत्' आदि शब्दरूपों को धातुपूर्व अडागम का विधान करके ही उभयत्र सिद्ध किया गया है। पाणिनि का सूत्र है – "लुङ्लङ्लृङक्ष्वडुदात्तः" (अ० ६।४।७१)। पाणिनीय लुङ् के लिए कातन्त्रकार ने अद्यतनी, लङ् के लिए ह्यस्तनी तथा लृङ् के लिए क्रियातिपत्ति का प्रयोग किया है । इस प्रकार पाणिनि की ये कृत्रिम संज्ञाएँ हस्तचेष्टादिवत् साङ्केतिक संज्ञाएँ हैं, जब कि कातन्त्र की संज्ञाएँ अन्वर्थक हैं ।

## [विशेष वचन]

१. टकारोऽयं निर्देशसुखार्थः (दु० टी०) ।

२. धातुग्रहणं ..... उत्तरार्थम् । ..... धातुग्रहणं धातुकार्येऽपि उत्तरत्र परिग्रहार्थम् (बि० टी०) ।

## [रूपसिद्धि]

१. **अकरोत्।** अट् + कृ + ह्यस्तनी–दि । 'डु कृञ् करणे' (७।७) धातु से ह्यस्तनीविभक्तिसंज्ञक प्र० पु० – ए० व० 'दि' प्रत्यय, प्रकृत सूत्र से धातुपूर्व अडागम, "तनादेरुः" (३।२।३७) से 'उ' विकरण, ऋ–उ को गुण तथा दकार को तकार।

२. **अकार्षीत्।** अट् + कृ + अद्यतनी–दि । 'कृ' धातु से अद्यतनीसंज्ञक 'दि' प्रत्यय, प्रकृत सूत्र से अडागम, सिच् प्रत्यय, ईट् आगम, वृद्धि तथा द् को त् ।

३. **अकरिष्यत्।** अट् + कृ + क्रियातिपत्ति–स्यत् । 'कृ' धातु से क्रियातिपत्तिविभक्तिसंज्ञक प्र० पु०–ए० व० 'स्यत्' प्रत्यय, प्रकृत सूत्र से धातुपूर्व अडागम, इडागम, गुण तथा सकार को षकारादेश ॥८३६।

# ८३७. स्वरादीनां वृद्धिरादेः [३।८।१७]

## [सूत्रार्थ]

'ह्यस्तनी – अद्यतनी – क्रियातिपत्ति' विभक्तियों के परे रहते स्वरादि धातु के आदि वर्ण को वृद्धि आदेश होता है ॥८३७।

## [दु० वृ०]

स्वरादीनां धातूनां ह्यस्तन्यादिष्वादेः स्वरस्य वृद्धिर्भवति आन्तरतम्यात् । ऐधत, ऐधिष्ट, ऐधिष्यत । कथम् ऐज्यत, औप्यत, औह्यत ? अन्तरङ्गत्वादडागमे यणि सम्प्रसारणे सन्धौ च वृद्धिः । पदान्तरङ्गा वा यणादयः ॥८३७।

## [दु० टी०]

स्वरादीनाम्०। पदान्तरङ्गा वा यणादयः इत्यस्मिन् पक्षे प्रागडागमो न भवति, पदापेक्षयाऽन्तरङ्गत्वं यणादीनाम्। तेषु सत्सु सम्प्रसारणे वृद्धिरिति । तत्रेह च विषयसप्तमीमाश्रित्याह–

ह्यस्तन्यादिषु धातोरिति । ह्यस्तन्यादिविषये धातोरित्यर्थः । धातुमात्रे विषयविज्ञानेऽस्तेरित्यत्र दोषं दर्शयिष्यामः इति । एवं सति न चोद्यम् अहन्नित्यादावेवाट् स्यात् । येन नाप्राप्तिन्यायेन भिन्नविषयेऽपि बाधा व्यञ्जनादीनामेवाट् स्यात् ॥८३७।

## [वि० प०]

स्वरादीनाम् ०। कथमित्यादि। केन प्रकारेणेत्यर्थः । यजिवपिवहीनां व्यञ्जनादित्वादित्यभिप्रायः। **'प्रकृतेः पूर्वं पूर्वं स्यादन्तरङ्गम्'** (का० परि० ७१) इत्यटो बाह्यप्रत्ययापेक्षस्यान्तरङ्गत्वम् । **पक्षान्तरमाह–** पदेत्यादि । पदापेक्षयाऽन्तरङ्गा यणादयः इति **एके** । एतदुक्तं भवति प्रकृतिप्रत्ययोः समुदायो हि **पदं प्रधानमुच्यते** । अतस्तत्कार्यतया यणादीनामन्तरङ्गत्वात् त एव भवन्तीति न त्वडागमः ॥८३७।

## [समीक्षा]

'ऐधत, ऐहिष्ट, ऐधिष्यत' आदि स्वरादि धातुओं से सिद्ध होने वाले शब्दरूपों में वृद्धिविधान उभयत्र किया गया है । पाणिनि के सूत्र हैं – "आडजादीनाम्, आटश्च" (अ० ६।४।७२; १।९०)। तदनुसार अजादि धातुओं में आट् आगम और इसके बाद वृद्ध्यादेश होता है। इस प्रकार पाणिनि के दो कार्यों की अपेक्षा कातन्त्रकार का केवल वृद्धिविधान लाघवबोधक कहा जाएगा ।

## [विशेष वचन]

१. पदान्तरङ्गा वा यणादयः (दु० वृ०) ।

२. प्रकृतिप्रत्ययोः समुदायो हि पदं प्रधानमुच्यते (वि० प०) ।

## [रूपसिद्धि]

१. **ऐधत।** एध्+अन्+ह्यस्तनी–त। 'एध वृद्धौ' (१।२९२) धातु से ह्यस्तनीविभक्तिसंज्ञक प्र० पु०– ए० व० 'त' प्रत्यय, प्रकृत सूत्र से आदि वृद्धि तथा अन्विकरण।

२. **ऐधिष्ट।** एध् + इट् + सिच् + अद्यतनी–त । 'एध वृद्धौ' (१।२९२) धातु से अद्यतनीसंज्ञक 'त' प्रत्यय, प्रकृत सूत्र से आदिवृद्धि, "सिजद्यतन्याम्" (३।२।२४) से सिच् प्रत्यय, "इडागमोऽसार्वधातुकस्यादिर्व्यञ्जनादेरयकारादेः" (३।७।१) से इट् आगम, "निमित्तात् प्रत्ययविकारागमस्थः सः षत्वम्" (३।८।२६) से सकार को षकार तथा "तवर्गस्य षटवर्गाट् टवर्गः" (३।८।५) से तकार को टकारादेश ।

३. **ऐधिष्यत।** एध् + इट् + क्रियातिपत्ति–स्यत। 'एध्' धातु से क्रियातिपत्तिसंज्ञक प्र० पु०– ए० व० 'स्यत' प्रत्यय, प्रकृत सूत्र से आदिवृद्धि, इट् आगम तथा सकार को षकारादेश ॥८३७।

# ८३८. अवर्णस्याकारः [३।८।१८]

## [सूत्रार्थ]

'ह्यस्तनी–अद्यतनी–क्रियातिपत्ति' विभक्तियों के परे रहते अवर्णादि धातुओं के आदि अवर्ण को आकारादेश होता है ॥ ८३८।

## [दु० वृ०]

स्वरादीनां धातूनामादेरवर्णस्याकारो भवति ह्यस्तन्यादिषु परतः। आटत्, आटीत्, आटिष्यत्। आप्नोत्, आपत्, आप्स्यत्। **'अवर्णः सर्वमुखस्थानम्'** इति **एके**। एकदेशेनान्तरतम्यात् सर्वा वृद्धयो मा भूवन् इति वर्णग्रहणम् ॥८३८।

## [दु० टी०]

अव०। ननु **"आरुत्तरे च वृद्धिः"** (३।८।३५) इत्याकारप्रश्लेषादाकारस्य वृद्धिसंज्ञायामिदं सूत्रं न वक्तव्यम्। तथा **"अस्योपधायाः"** (३।६।५) इत्यत्र दीर्घग्रहणम्, तथा **"वृद्धिरादौ सणे"** (२।६।४९) इत्यत्रादाविति प्रश्लेषः। **'स्थानेऽन्तरतमः'** (का० परि० १६) इति यथाऽकारस्य कण्ठ्यस्याकारः कण्ठ्यो भवति, एवं सर्वमुखस्थानीयस्य अकारस्य सर्वमुखस्थानीय आकारो भविष्यति। अथ **मतान्तरे**ऽपि प्रश्लेषनिर्देशो गरीयानिति चेत्, **"वृद्धिरादौ सणे"** (२।६।४९) इत्यत्र दुष्यति। तत्र तद्धितानामाकृतिप्रधानत्वात् तर्हि **विसन्धि**रेव क्रियताम् 'आ + आर्' इति द्विवचनं वा ? सत्यम्, **सुखपाठप्रतिपत्तिरेवाभिमतं न शब्दलाघवम्** इति। एकदेशेनेत्यादि। **'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः'** (का० परि०२) इत्यनित्यत्वाभ्युपगमे वर्णग्रिहणमित्यर्थः ॥८३८।

## [वि० प०]

अवर्ण०। आपदिति लृदनुबन्धत्वादण्। अथ वर्णग्रहणं किमर्थम् 'अस्याकारः' इत्थास्ताम्। **'आप्लृ व्याप्तौ'** (४।१४) इत्यादावाकारस्याकारकरणेन प्रयोजनाभावादित्याह– अवर्ण इत्यादि। न च वक्तव्यम् एकदेशेनान्तरतमस्य गौणत्वान्नायं प्रसङ्ग इति। गौणमुख्यपरिभाषायाः अनित्यत्वाभ्युपगमान्नेदमुच्यते। यथा ऋवर्णस्य वृद्धिगुणौ आर्-अरावितिः। **सिद्धान्तेऽपि** कण्ठ्यस्याकारस्य वृद्धिरार् स्यादिति वर्णग्रहणम् ॥८३८।

## [बि० टी०]

अवर्ण०। एकदेशेनेत्यादि। ननु यद्येकदेशेनान्तरतम्यं तदा एकारैकारयोः पूर्वभागोऽकारः परश्च भाग इकारः इत्युक्तत्वाद् 'एजृ कम्पने' (१।७०, ३४७) इति एजृधातोरपि अकारप्रसङ्ग इति वर्णग्रहणं स्वरूपार्थं कथं निरर्थकम् ? सत्यम्, तदात्र आकार इति ब्रूयात् ॥८३८।

## [समीक्षा]

'आटीत्, आप्नोत्, आप्स्यत्' इत्यादि शब्दरूपों के सिद्ध्यर्थ धात्वादिस्थ अकार-आकार को आकारादेश उभयत्र किया गया है। पाणिनि के सूत्र हैं – "आडजादीनाम्, आटश्च" (अ० ६।४।७२; १।९०)। तदनुसार धातु के आदि में पहले 'आट्' आगम और तब वृद्धि की जाती है। इन दो कार्यों के स्थान में कातन्त्रीय आकारविधान लाघवबोधक है।

## [विशेष वचन]

१. अवर्णः सर्वमुखस्थानम् इत्येके (दु० वृ०)।

२. सिद्धान्तेऽपि कण्ठ्यस्याकारस्य वृद्धिरार् स्यादिति वर्णग्रहणम् (वि० प०)।

## [रूपसिद्धि]

१. **आटत्।** अट् + अन् + ह्यस्तनी-दि । 'अट गतौ' (१।१०२) धातु से ह्यस्तनीविभक्तिसंज्ञक प्र० पु०-ए० व० 'दि' प्रत्यय, प्रकृत सूत्र से धात्वादिस्थ अकार को आकार, अन् विकरण तथा दकार को तकारादेश ।

२. **आटीत् ।** अट् + इट् + सिच् + ईट् + अद्यतनी-दि । 'अट गतौ' (१।१०२) धातु से अद्यतनीसंज्ञक 'दि' प्रत्यय, प्रकृत सूत्र से धात्वादिस्थ अकार को आकार, सिच् प्रत्यय, इट्-ईट् आगम, सिच्-लोप तथा दकार को तकारादेश।

३. **आटिष्यत् ।** अट् + इट् + क्रियातिपत्ति-स्यत् । 'अट गतौ' (१।१०२) धातु से क्रियातिपत्तिसंज्ञक प्र० पु०-ए० व० 'स्यत्' प्रत्यय, इडागम, धात्वादि अकार को दीर्घ तथा सकार को षकारादेश ।

४. **आप्नोत् ।** आप् + नु + ह्यस्तनी-दि । 'आप्लृ व्याप्तौ' (४।१४) धातु से ह्यस्तनीविभक्तिसंज्ञक प्र० पु०-ए० व० 'दि' प्रत्यय, "नुः ष्वादेः" (३।२।३४) से 'नु' विकरण "नाम्यन्तयोर्धातुविकरणयोर्गुणः" (३।५।१) से नु विकरणघटित उकार को गुण-ओकार तथा "पदान्ते धुटां प्रथमः" (३।८।१) से दकार को तकारादेश ।

५. **आपत् ।** आप् + अण् + अद्यतनी-दि । 'आप्लृ व्याप्तौ' (४।१४) धातु से अद्यतनीविभक्तिसंज्ञक प्र० पु०-ए० व० 'दि' प्रत्यय, "पुषादिद्युताद्यॢलृकारानुबन्धार्तिशास्तिभ्यश्च परस्मै" (३।२।२८) से 'अण्' प्रत्यय तथा "पदान्ते धुटां प्रथमः" (३।८।१) से दकार को तकारादेश ।

६. **आप्स्यत् ।** आप् + क्रियातिपत्ति-स्यात् । 'आप्लृ व्याप्तौ' (४।१४) धातु से क्रियातिपत्तिसंज्ञक प्र० पु०-ए० व० 'स्यत्' प्रत्यय तथा "आपितपितिपिस्वपिवपिस्वपिवपि-शपिछुपिक्षिपिलिपिलुपिसृपेः पात्" (३।७।२४) से इडागम का निषेध ॥८३८।

# ८३९. अस्तेः [३।८।१९]

## [सूत्रार्थ]

अगुण ह्यस्तनीसंज्ञक प्रत्ययों के परे रहते 'अस्' धातु के अकार को दीर्घ आदेश होता है ॥८३९।

## [दु० वृ०]

अस्तेर्ह्यस्तन्यामगुणेऽवर्णस्याकारो भवति । आस्ताम्, आसन्, व्यत्यास्त । परोऽप्यवर्णस्याकारो लोपेन बाध्यते, अस्तिमात्राश्रयत्वात् ॥८३९।

## [दु० टी०]

अस्तेः । परोऽपीत्यादि । परपरिभाषामन्तरङ्गपरिभाषा बाधते । **अन्तरङ्गत्वं** पुनरस्तेरादेरित्यस्याल्पाश्रयत्वादिति वचनम्, अथवा इदमेव **ज्ञापकम्** - ह्यस्तन्यादिविषयविज्ञानेऽपि निष्पन्नेऽस्मिन् धातुप्रत्ययकार्ये पश्चाद् वध्याकारादिति, तेनाभूदिति भूरादेशः प्रवर्तते । एवम् 'अगात्' इति इणो गादेशः प्रवर्तते । 'ऐयरुः' इत्यादिषु च कृते द्विर्वचनादिके पश्चाद् वृद्धिः। **तिबुनिर्देशो**ऽत्र स्वरूपग्राहकोऽभूदित्यस्याटोऽवर्णस्याकारो न भविष्यति, प्रतिपदोक्तस्यास्तेः सम्भवाच्च **सुखप्रतिपत्त्यर्थ** इति ॥८३९।

## [वि० प०]

अस्तेः । अद्यतनीक्रियातिपत्त्योर्भूरादेश एवास्तीति परिशिष्टा ह्यस्तनीह लभ्यते । तत्र गुणिनि पूर्वेणैव सिद्धे इत्यर्थादगुण इत्याह अस्तेर्ह्यस्तन्यामगुण इति । व्यत्यस्तेति । **''अनियमे चागतिहिंसाशब्दार्थहसः''** (३।२।४२-६६) इति रुचादित्वाद् व्यर्तीहारे **आत्मनेपदम्** । अथ गुणिनि चागुणेऽपि **''अस्तेरादेः''** (३।४।४१) इति लोपं बाधित्वा **परत्वादवर्णस्याकार** एव भविष्यति, किमनेनेत्याह – परोऽपीत्यादि । लोपे ह्यस्तनीमात्रमाश्रित्य **भवन्नल्पाश्रयत्वादन्तरङ्गो** बलीयान् इति भावः ॥८३९।

## [बि० टी०]

अस्तेः। अस्तेर्ह्यस्तन्यामगुणे इति **वृत्तिः** । नन्वनन्तरत्वाद् ह्यस्तन्यादयो वर्तन्ते । तत्र **पञ्जीकृतोक्तम्** **''अस्तेर्भूरसार्वधातुके''** (३।४।८७) इति भूरादेशः पारिशेष्याद् **ह्यस्तनीति कथं** सङ्गच्छते, यावता भूरादेशोऽसार्वधातुके भवन् श्वस्तन्यादौ 'भविता, भूतः' **इत्यादौ सार्थकः**, अनेन तु ह्यस्तन्यादौ अधिकारप्राप्तत्वादाकारः स्यादेव । कथमुक्तं ह्यस्तन्यामगुणे इति, **आकारपरत्वात्** । न च वाच्यम् आकारे कृते एकदेशविकृतत्वाद् भूर्भविष्यति **तिब्निर्देशस्य स्वरूपग्राहकत्वा**दिति ब्रूमः । सत्यम्, **व्यक्तिपक्षेऽ**सार्वधातुकविषयस्याकृतार्थत्वात् लोपवत् परमप्याकारं निरवकाशत्वाद् बाधते । **व्यक्तिपक्षस्य ज्ञापकस्तु 'अभून्नृपो विबुधसखः परन्तपः'** इत्यादि प्रयोग इति सर्वं **समञ्जसम्** ॥८३९।

## [समीक्षा]

'आस्ताम्, आसन्' इत्यादि शब्दरूपों के सिद्ध्यर्थ 'अस्' धातुघटित अकार के स्थान में आकारादेश की आवश्यकता होती है । इसकी पूर्ति दोनों व्याकरणों में की गई है । अन्तर यह है कि पाणिनि आट् आगम तथा वृद्धि करके ''आडजादीनाम्, आटश्च'' (अ० ६।४।७२; १।९०) उक्त रूप सिद्ध करते हैं, जबकि कातन्त्रकार ने 'अस्' धातुगत अकार को आकारादेश करके सिद्धि बताई है, जो लाघव की द्योतक कही जा सकती है ।

यह ध्यातव्य है कि पूर्ववर्ती सूत्र से ही यहाँ आकारादेश प्राप्त था, फिर इस सूत्र को बनाने की क्या आवश्यकता है ? इस पर कहा गया है कि ''अस्तेरादेः'' (३।४।४१) सूत्र से यहाँ अस्धातु के आदि अकार का परविधि के कारण लोप हो जाता, अतः अभीष्ट रूप की सिद्धि कथमपि सम्भव नहीं थी । अतः इस विशेष सूत्र को स्वतन्त्ररूप में बनाया गया है ।

## [विशेष वचन]

१. परोऽप्यवर्णस्याकारो लोपेन बाध्यते, अस्तिमात्राश्रयत्वात् (दु० वृ०) ।
२. तिब्निर्देशोऽत्र स्वरूपग्राहकः ------- सुखप्रतिपत्त्यर्थ इति (दु० टी०; बि०टी०)।
३. अल्पाश्रयत्वादन्तरङ्गो बलीयान् (वि० प०) ।

### [रूपसिद्धि]

१. **आस्ताम् ।** अस् + अन्लुक् + ह्यस्तनी-ताम् । 'अस् भुवि' (२।२८) धातु से ह्यस्तनीविभक्तिसंज्ञक प्र० पु०-द्विव० 'ताम्' प्रत्यय, "अन् विकरणः कर्तरि" (३।२।३२) से अन् विकरण, "अदादेर्लुग् विकरणस्य" (३।४।९२) से उसका लुक् तथा प्रकृत सूत्र से अकार को आकारादेश ।

२. **आसन् ।** अस् + अन्लुक् + ह्यस्तनी-अन् । 'अस् भुवि' (२।२८) धातु से ह्यस्तनीविभक्तिसंज्ञक प्र० पु०-ब० व० 'अन्' प्रत्यय, अन्लुक् तथा प्रकृत सूत्र से अकार को आकारादेश ।

३. **व्यत्यास्त ।** वि + अति + अस् + ह्यस्तनी-त । 'वि-अति' उपसर्गपूर्वक 'अस् भुवि' (२।२८) धातु से ह्यस्तनीविभक्तिसंज्ञक प्र० पु०-ए० व० 'त' प्रत्यय, अन्लुक्, इकार को यकार तथा प्रकृत सूत्र से अकार को आकार ॥८३९।

## ८४०. एतेर्ये [३।८।२०]

### [सूत्रार्थ]

ह्यस्तनीविभक्तिसंज्ञक प्रत्यय के परे रहते इण् धातु के स्थान में यकारादेश होने पर अट् आगम में अकार को आकार आदेश होता है ॥८४०।

### [दु० वृ०]

ह्यस्तन्यनि एतेर्ये परेऽटोऽवर्णस्याकारो भवति । आयन्, अध्यायन् । परापि वृद्धिरिण्मात्राश्रितेन यत्वेन बाध्यते । य इति किम् ? अगात् ॥८४०।

### [दु० टी०]

एते० । ह्यस्तन्या अन्यस्मिन् वचनेऽद्यतनीक्रियातिपत्योश्च यकारस्यासम्भवादित्याह– ह्यस्तन्यनीति । इण इकश्च ग्रहणमित्याह– एतेरिति । तर्हि 'एर्ये' इत्यास्ताम्, किं तिपा निर्देशेन ? सत्यम् । एतीति यस्य रूपमस्ति तस्य **परिग्रहार्थं तिब्ग्रहणम्,** तेन यत्वविधौ इणा इकोऽपि गृह्यते इत्यर्थः । अथ परस्मैपदिना इणा इति इक उपलक्ष्यते । **उपलक्षणं च लोकतः सिद्धम्,** तथा **पाठसुखार्थम्** इति । ये परेऽन्यस्याकारस्यासम्भवादित्याह – अटोऽवर्णस्येति ॥८४०।

### [वि० प०]

एतेर्ये । अत्रापीणः स्थानेऽन्यस्मिन् प्रत्यये यकारस्यासम्भवात् **परिशिष्ट**माह- ह्यस्तन्यनीति । यकारे चास्मिन् अन्यस्याकारस्यासम्भवादाह– अटोऽवर्णस्येति । इणश्चेति यकारः । इण्वद् इकोऽपीति दर्शयति – अध्यायन्निति । अत्रापि **"स्वरादीनां वृद्धिरादेः"** (३।८।१७) इति सिध्यतीति न च वक्तव्यमित्याह– परापीत्यादि । पूर्ववद् इणश्चेति यत्वमन्तरङ्गमित्यर्थः । अगादिति । **"इणो गा"** (३।४।८४), **"इण्स्था०"** (३।४।९३) इत्यादिना सिचो लुक् ॥८४०।

## [समीक्षा]

'आयन्, अध्यायन्' इत्यादि प्रयोगों के सिद्ध्यर्थ आदि में आकार की उपस्थिति आवश्यक होती है, जिसकी व्यवस्था दोनों ही आचार्यों ने की है। अन्तर यह है कि पाणिनि आट् आगम, वृद्धि तथा आय् "आडजादीनाम्, आटश्च, एचोऽयवायावः" (अ० ६।४।७२; १।९०, ७८) आदेश करके उक्त रूप सिद्ध करते हैं, जबकि कातन्त्रकार ने इकार को यकार, अट् आगम तथा अकार को आकार विधान किया है ।

इस सूत्र की पृथक् रचना में भी पूर्ववत् हेतु प्रस्तुत किया जाता है, क्योंकि "स्वरादीनां वृद्धिरादेः" (३।८।१७) से इकार को वृद्धि होने पर अभीष्ट रूप की सिद्धि की जा सकती है, परन्तु वृद्धिकार्य का बाधक सूत्र है – "इणश्च" (३।४।५९) । इससे वृद्धि को बाधकर यकारादेश हो जाने पर 'आयन्' आदि शब्दरूप सिद्ध नहीं किए जा सकते थे । अतः प्रकृत सूत्र की स्वतन्त्र रचना की गई है ।

## [विशेष वचन]

१. परापि वृद्धिरिण्मात्राश्रितेन यत्वेन बाध्यते (दु० वृ०) ।
२. एतीति यस्य रूपमस्ति तस्य परिग्रहार्थं तिब्ग्रहणम्, तेन यत्वविधौ इणा इकोऽपि गृह्यते इत्यर्थः (दु० टी०) ।
३. उपलक्षणं च लोकतः सिद्धम्, तथा पाठसुखार्थमिति (दु० टी०) ।
४. इण्वदिकोऽपि (वि० प०) ।

## [रूपसिद्धि]

१. **आयन् ।** अट् + इण् + ह्यस्तनी-अन् । 'इण् गतौ' (२।१३) धातु से ह्यस्तनी विभक्तिसंज्ञक प्र० पु०-ब०व० 'अन्' प्रत्यय, "अड् धात्वादिर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु" (३।८।१६) से अडागम, "अन् विकरणः कर्तरि" (३।२।३२) से अन् विकरण, "अदादेर्लुग् विकरणस्य" (३।४।९२) से उसका लुक्, "इणश्च" (३।४।५९) से इण्धातुगत इकार को यकार तथा प्रकृत सूत्र से अडागम के अकार को आकारादेश ।

२. **अध्यायन् ।** अधि + अट् + इङ् + अन्लुक् + ह्यस्तनी-अन् । 'अधि' उपसर्गपूर्वक 'इक् स्मरणे' (२।१२) धातु से ह्यस्तनीविभक्तिसंज्ञक प्र० पु०-ब०व० 'अन्' प्रत्यय तथा शेष प्रक्रिया पूर्ववत् ॥८४०।

# ८४१. न मामास्मयोगे [३।८।२१]

## [सूत्रार्थ]

'मा-मास्म' निपातों के योग में ह्यस्तनी-अद्यतनी-क्रियातिपत्तिनिमित्तक धातु से पूर्व अडागम आदि नहीं होता है ॥८४१।

## [दु० वृ०]

मायोगे मास्मयोगे च धातोर्ह्यस्तन्यादिष्वडागमादयो न भवन्ति । मा भवान् करोत्, मास्म करोत् । **'जुगुप्सतस्मैनमदुष्टभावं मैवं भवानक्षतसाधुवृत्तः'** इति मतम् । मा भवान्

कार्षीत्, मास्म कार्षीत् । संयुक्ते न स्यादिति मास्मग्रहणम् । साहचर्यान्मदो न स्यात् - मा भवानपश्यत् ॥८४१।

## [दु० टी०]

न मा०। माश्च स्मश्च **मास्मम्,** समाहारद्वन्द्वः । माश्च मास्मं च **मामास्मे,** ताभ्यां योग इत्यर्थः । इतरेतयोगद्वन्द्वे चोद्यं माग्रहणमनर्थकं स्यादिति । जुगुप्सतेत्यादि । **''इतीव वाचो निगृहीतकण्ठैः प्राणैररुध्यन्त महर्षिसूनोः''** इत्यपरार्द्धम् । व्यवहितेनापि स्मेन युक्तेन माशब्देन प्रतिषेधो दृश्यत इत्यर्थः । मायुक्तः स्मः **मास्मः** । संश्लिष्टनिर्देशोऽयं **भाष्यसम्मतः पक्षः** । माशब्दे स्मयुक्ते सम्बन्धस्य गौणत्वादित्याह – संयुक्त इत्यादि । तृतीयानिर्देशेनापि निर्वोढुं शक्यते । योगग्रहणं **स्पष्टार्थम्** । एवं मा भवानटत्, मास्म भवान् अटीत्, मा भवान् ऋच्छत्, मास्म भवान् ऋच्छीत्, मा भवन्तः सन्, मास्म भवन्तो यन् । साहचर्यादिति। यद्यपि त्वामा तु द्वितीयायाम् इत्यनेनास्मद्शब्दस्य द्वितीयैकवचनान्तस्य मादेशोऽस्ति, तथापि तस्य न ग्रहणं मास्मसहचरितस्याव्ययस्यैव ग्रहणमित्यर्थः ॥८४१।

## [वि० प०]

न मामास्म० । जुगुप्सतेत्यादि । व्यस्तेऽपीच्छन्तीति यन्मतमुक्तं तन्मतमित्यर्थः ।

**जुगुप्सतस्मैनमदुष्टभावं मैवं भवानक्षतसाधुवृत्तः ।**
**इतीव वाचो निगृहीतकण्ठैः प्राणैररुध्यन्त महर्षिसूनोः।।** इति।

**अत्रायमर्थः** – पुरा किल **दशरथेन** राज्ञा मृगयां गतेन मुनिकुमारस्तमसाभिधानायां नद्यां पितुरुदकप्रदानार्थं कुम्भं पूरयन् पूर्यमाणकुम्भसम्भवनिनादमाकर्ण्य द्विरदबृंहितमिदमिति मन्यमानेन धनुर्धरेण शब्दभेदिना शरेण विद्धः । ततोऽसौ हा तातेति क्रन्दितमाकर्ण्य किमिदं मया व्यापादितमिति विषण्णमनास्तत्प्रदेशमुपसृत्य मुनिकुमारं शरताडितोरस्कं सकुम्भमेवाद्राक्षीत् । ततो मुनिकुमारकोऽपि तमधिज्यधन्वानमुपालभ्य आः पाप! दुरात्मन् । किं त्वया कृतम्, न केवलमहं त्वया व्यापादितः किन्तु मच्चक्षुषावन्धौ पितरावपीत्यादि बहुशो निन्दितवानिति । अत्रान्तरे तस्य शरप्रहारजर्जरितमर्मणो गच्छतः प्राणानुत्प्रेक्षमाणः **कवि**रिदमाह– जुगुप्सतेत्यादि ।

एनं दशरथमेवमुक्तक्रमेण मा जुगुप्सतस्म मा निन्दत् । कीदृशमदुष्टभावमदुष्टाभिप्रायं वेतसवनपिहितप्रदेशवर्तीं हि भवान् दूरादविजानताऽनेन शब्दभेदिना शरेण विद्धः इत्यदुष्टाभिप्राय एवायम् । न चादुष्टभावो निन्दनीयः, अक्षतसाधुवृत्तो हि भवान् इतीव मन्यमानैः प्राणैरतिपूतस्य भूपालस्य निन्दामाचरतो महर्षिसूनो रोषादिव निगृहीतकण्ठैरवरुद्धगलप्रदेशैर्वाचोऽरुध्यन्त निरुद्धा वाच इत्यर्थः । अत्र पुनर**प्रयोगो**ऽयं यस्माद् मास्मशब्दोऽयमकृतद्वन्द्वः समुदायोऽङ्गीकृतः इत्युक्तमेव ।

मास्मशब्दैकदेशेन माशब्देन योगस्य गौणत्वान्न मायोग इति कृते मास्मयोगप्रतिषेधो न सिध्यतीत्याह– संयुक्त इत्यादि । मास्मशब्देनाव्ययेन सहचरितो माशब्दोऽप्यव्यय एवेत्याह – साहचर्यादिति । तेन **''त्वन्मदोरेकत्वे''** (२।३।३) इत्यादिना मादेशे माशब्दयोगे न भवतीत्यर्थः ॥८४१।

## [समीक्षा]

'मा भवान् करोत्, मास्म भवान् करोत्, मा भवान् कार्षीत्, मास्म भवान् ईक्षत' इत्यादि शब्दरूपों के सिद्ध्यर्थ धातुपूर्व अडागम-आडागम (धात्वादि स्वर को दीर्घ-वृद्धि) के अभाव की आवश्यकता होती है। इसकी पूर्ति उभयत्र की गई है। अन्तर यह है कि पाणिनि ने केवल 'मा' शब्द का ही सूत्र में पाठ किया और 'मा-स्म' में भी 'मा' की उपस्थिति मानकर अभीष्टसिद्धि दिखाई है, जबकि कातन्त्रकार ने 'मा-स्म' में दो निपात मानकर उनके योग में केवल माशब्द के अभाव से अभीष्टसिद्धि मे बाधा समझकर 'मा-मास्म' दोनों को सूत्र में पढ़ा है। पाणिनि का सूत्र है – "न माङ्योगे" (अ० ६।४।७४)।

## [विशेष वचन]

१. संयुक्ते न स्यादिति मास्मग्रहणम् (दु० वृ०)।
२. साहचर्यान्मदो न स्यात् – मा भवान् अपश्यत् (दु० वृ०)।
३. माश्च स्मश्च मास्मम्, समाहारद्वन्द्वः। माश्च मास्मं च मामास्मे, ताभ्यां योगे इत्यर्थः (दु० टी०)।
४. मायुक्तः स्मः मास्मः। संश्लिष्टनिर्देशोऽयं भाष्यसम्मतः पक्षः (दु० टी०)।
५. तृतीयानिर्देशेनापि निर्वोढुं शक्यते, योगग्रहणं स्पष्टार्थम् (दु० टी०)।
६. न चादुष्टभावो निन्दनीयः (वि० प०)।
७. मास्मशब्देनाव्ययेन सहचरितो माशब्दोऽप्यव्यय एवेत्याह– साहचर्यादिति। तेन त्वन्मदोरकत्वे इत्यादिना मादेशे माशब्दयोगे न भवतीत्यर्थः (वि० प०)।

## [रूपसिद्धि]

१. **मा भवान् करोत्।** मा + कृ + उ + ह्यस्तनी-दि। 'डु कृञ् करणे' (७।७) धातु से ह्यस्तनीविभक्तिसंज्ञक प्र० पु०-ए० व० 'दि' प्रत्यय, "अड् धात्वादि०" (३।८।१६) से प्राप्त अडागम का प्रकृत सूत्र द्वारा निषेध, "तनादेरुः" (३।२।३७) से 'उ' विकरण, "नाम्यन्तयोर्धातुविकरणयोर्गुणः" (३।५।१) से कृधातुगत ऋ तथा उ-विकरण को गुण तथा "पदान्ते धुटां प्रथमः" (३।८।१) से दकार को तकारादेश।

२. **मास्म करोत्।** मास्म + कृ + उ + ह्यस्तनी-दि। 'मास्म' पूर्वक 'कृ' धातु से ह्यस्तनीविभक्तिसंज्ञक प्र० पु० - ए० व० 'दि' प्रत्यय तथा शेष प्रक्रिया पूर्ववत्।

३. **मा भवान् कार्षीत्।** मा + कृ + सिच् + अद्यतनी-दि। 'मा' निपातपूर्वक 'डु कृञ् करणे' (७।७) धातु से अद्यतनीविभक्तिसंज्ञक प्र० पु०-ए० व० 'दि' प्रत्यय, अडागम का प्रकृत सूत्र द्वारा निषेध, "सिजद्यतन्याम्" (३।२।२४) से सिच् प्रत्यय, "सिचः" (३।६।९०) से ईट् आगम, "सिचि परस्मै स्वरान्तानाम्" (३।६।६) से कृधातुगत ऋकार को वृद्धि आर्, "निमित्तात् प्रत्ययविकारागमस्थः सः षत्वम्" (३।८।२६) से सकार को षकार तथा "पदान्ते धुटां प्रथमः" (३।८।१) से दकार को तकारादेश।

४. **मास्म कार्षीत्।** मास्म + कृ + सिच् + अद्यतनी-दि। 'मास्म' पूर्वक 'कृ' धातु से अद्यतनीविभक्तिसंज्ञक प्र० पु०-ए० व० 'दि' प्रत्यय तथा शेष प्रक्रिया पूर्ववत् ॥८४१।

## ८४२. नाम्यन्ताद् धातोराशीरद्यतनीपरोक्षासु धो ढः [३।८।२२]

### [सूत्रार्थ]

नाम्यन्त धातु से परवर्ती आशी:-अद्यतनी-परोक्षासंज्ञक प्रत्ययघटित धकार को ढकारादेश होता है ॥८४२।

### [दु० वृ०]

नाम्यन्ताद् धातोराशीरद्यतनीपरोक्षासु यो धकारस्तस्य ढकारो भवति । चेषीढ्वम्, कृषीढ्वम्, अध्यगीढ्वम्, समस्थिढ्वम्, तुष्टुढ्वे, चकृढ्वे । **अन्तग्रहणं** भूतपूर्वनाम्यन्तार्थम्, तेन प्रावरिषीढ्वम्, अलविढ्वम्, लुलुविढ्वे । धातोरिति संज्ञापूर्वकत्वादनित्यार्थम् । तेनासु सेट्सु **विभाषा** सिद्धा-प्रावरिषीढ्वम्, प्रावरिषीध्वम् । अलविढ्वम्, अलविध्वम् । दिदीयिढ्वे, दिदीयिध्वे इत्यपि स्यात् ॥८४२।

### [दु० टी०]

नाम्य० । पञ्चम्या निर्देशेऽप्याशीर्ग्रहणसामर्थ्याद् व्यवहितस्यापि प्रतिषेध इति **अन्ये** । अन्तग्रहणमित्यादि । नामिना धातुर्विशिष्यते, विशेषणेन च तदन्तविधिरिति भाव:। न च वक्तव्यं विहितविशेषणत्वेन च सिध्यतीति धातोर्नाम्यन्ताद् या आशीरद्यतनीपरोक्षा विहितास्तद्विषये धकारस्येति, तदा समस्थिढ्वमिति दुष्यति " स्थादोरिरद्यतन्यामात्मने" (३।५।२९) इति कृते नाम्यन्तत्वाद् नामी अन्ते यस्य दृष्ट: सोऽपि नाम्यन्त इति कृतेऽपि गुणो भवति। धातोरित्यादि । अर्थवशादधिकारस्मरणाच्च धातुरेवावसीयते । यदत्र धातुग्रहणम्, तदाशीरद्यतनीपरोक्षाविशेषणार्थम्, न धकारस्य प्रधानस्यापि स्थानिन इति । नाम्यन्ताद् धातोर्धकारस्येत्युच्यमाने कुत इड्व्यवधाने स्यात्, सार्थकत्वेऽपि हि सञ्ज्ञापूर्वको विधिरित्युपतिष्ठते। अन्य आह-विशेषणविशेष्यभावस्य प्रयोक्तुरायत्तत्वाद् आसामप्रधानानामपि विशेषणम् । सिचो धकार इति वचनबलाद् इहाद्यतनी ग्रहणसामर्थ्याच्च सिचो लोप:। पक्षे ढत्वं चेद् अन्यथा सिच: षत्वे धस्य षाट्टवर्गत्वे सिद्धमित्युक्तमेव । आशी:परोक्षयोश्च नित्यं ढत्वमित्यस्य मतं वर्णयिष्याम: । अत: एवाद्यतन्यां विभाषा न चोदितेति । आस्विति यद् बहुवचनं वृत्तौ तदधिकारवशादिति दीङोऽन्तत्वे यकारस्य भूतपूर्वगत्या भवतीत्याह– दिदीयिढ्वे इत्यपीति ॥८४२।

### [वि० प०]

नाम्यन्तात्० । अध्यगीढ्वमिति । अधिपूर्व: 'इङ् अध्ययने" (२।५६) अद्यतनीक्रियातिपत्त्योर्वा गीरादेश:, 'सिचो धकारे" (३।६।५०) इति सिचो लोप: । समस्थिढ्वमिति । **"समवप्रविभ्य:"** (३।२।४२-१४) इति रुचादिवचनादात्मनेपदम् । **"स्थादोरिरद्यतन्यामात्मने"** (३।५।२९) इतीत्त्वम् । **'येन विधिस्तदन्तस्य'** (का० परि० ३) इति सिद्धमित्याह– अन्तेत्यादि । अथ धातुग्रहणं किमर्थम् ? न ह्यमूषां विभक्तीनामधातोर्विधिरस्तीति ? सत्यम्, धातुग्रहणमासामप्रधानानामपि विशेषणार्थम्, न तु यकारस्य स्थानित्वेन प्रधानस्यापि, अत एव सूत्रार्थे नाम्यन्ताद् धातोर्धकारस्येति नोक्तम्।

एवं सति प्रावरिषीढ्वम्, अलविढ्वमित्यादौ व्यवहितस्यापि धस्य ढत्वं न दुष्यतीति सार्थकत्वेऽपीति **'सञ्ज्ञापूर्वको विधिरनित्यः'** (का० परि० ३०) इत्युपतिष्ठत एवेत्याह- धातोरित्यादि । दिदीयिढ्वे, दिदीयिध्वे इत्यपि **''दीङोऽन्तो यकार०''** (३।४।२६) इति कृतेऽपि भूतपूर्वगत्या नाम्यन्तत्वाद् इदमपि भवतीत्यर्थः । अन्तग्रहणाद् भूतपूर्वगत्या नित्यं प्राप्तमिति **संज्ञापूर्वकत्वादनित्यत्व**मुच्यते । यद्येवं कथं प्रग्रहीषीढ्वम्, प्रग्रहीषीध्वम् । संवलिषीढ्वम्, संवलिषीध्वम् इत्यादयः । न चैते न भवन्तीति सर्वैरिष्टत्वात् ।

**दुर्गसिंहोऽपि टीकायाम्** इटो दीर्घविधौ अग्रहीढ्वम्, अग्रहीध्वम् इत्युदाहरणद्वयं मन्यते इति लक्ष्यते ? सत्यम् । हयवरलकारेभ्योऽप्यासु सेट्सु विभाषैवानित्यत्वस्य लक्ष्यानुरोधात् । अन्यत्र न भवति आसिषीध्वम्, वर्तिषीध्वमिति । तर्हि किमन्तग्रहणेन भूतपूर्वनाम्यन्तार्थेन प्रावरिषीढ्वमित्यादेरस्य विषयत्वाद् विकल्पेन हि भवितव्यमिति? सत्यम् । तीर्षीढ्वम्, अतीर्ढ्वम् इत्यादावात्मनेपदे च सिजाशिषोरिति वचनादनिट्पक्षे एतदर्थं क्रियमाणमन्तग्रहणमेतदपि विषयीकरोति । अत एवोक्तं नित्यं प्राप्तं पक्षे **'सञ्ज्ञापूर्वको विधिरनित्यः'** (का० परि० ३०) इत्युच्यते ॥८४२।

## [समीक्षा]

'कृषीढ्वम्, चकृढ्वे, अध्यगीढ्वम्' इत्यादि शब्दरूपों के सिद्ध्यर्थ धकार को ढकारादेश की अपेक्षा होती है, जिसका विधान दोनों व्याकरणों में किया गया है । पाणिनि का सूत्र है– "इणः षीध्वंलुङ्लिटां धोऽङ्गात्" (अ० ८।३।७८) । 'लविषीढ्वम्, लविषीध्वम्' इत्यादि में वैकल्पिक ढकारादेश में कारण का स्पष्टीकरण करते हुए वृत्तिकार ने कहा है कि संज्ञापूर्वक की गई विधि अनित्य होती है, यहाँ पर भी 'धातु' इस संज्ञाशब्द का जो उल्लेख किया गया है, उसी कारण इडागम होने पर उक्त विधि की प्रवृत्ति वैकल्पिक मानी जाती है ।

## [विशेष वचन]

१. धातोरिति संज्ञापूर्वकत्वादनित्यार्थम्, तेनासु सेट्सु विभाषा सिद्धा (दु० वृ०) ।
२. विशेषणेन च तदन्तविधिरिति भावः (दु० टी०) ।
३. विशेषणविशेष्यभावस्य प्रयोक्तुरायत्तत्वात् (दु० टी०) ।
४. अन्तग्रहणाद् भूतपूर्वगत्या नित्यं प्राप्तमिति संज्ञापूर्वकत्वाद् अनित्यत्वमुच्यते (वि० प०) ।

## [रूपसिद्धि]

१. **चेषीढ्वम्** । चि + आशीः-षीध्वम् । 'चिञ् चयने' (४।५) धातु से आशीर्विभक्ति-संज्ञक उ० पु०-ए० व० 'सीध्वम्' प्रत्यय, ''नाम्यन्तयोर्धातुविकरणयोर्गुणः'' (३।५।१) से धातुगत इकार को गुण-एकार, ''निमित्तात् प्रत्ययविकारागमस्थः सः षत्वम्'' (३।८।२६) से सकारको षकार तथा प्रकृत सूत्र से धकार को ढकारादेश ।

२. **कृषीढ्वम्** । कृ + आशीः-सीध्वम् । 'डु कृञ् करणे' (७।७) धातु से आशीर्विभक्तिसंज्ञक उ० पु०-ए० व० 'सीध्वम्' प्रत्यय तथा शेष प्रक्रिया पूर्ववत् ।

३. **अध्यगीढ्वम्** । अधि + अट् + इङ् + अद्यतनी-ध्वम् । 'अधि' उपसर्गपूर्वक 'इङ् अध्ययने' (२।५६) धातु से अद्यतनीविभक्तिसंज्ञक उ० पु०-ए० व० 'ध्वम्' प्रत्यय, 'अद्यतनीक्रियातिपत्त्योर्वा गीरादेश इष्यते' इस वचन के आधार पर 'इङ्' को 'गी' आदेश, अडागम, प्रकृत सूत्र से धकार को ढकार तथा "इवर्णो यमसवर्णे न च परो लोप्यः" (१।२।८) से इकार को यकारादेश ।

४. **समस्थिढ्वम्** । सम् + अट् + स्था + अद्यतनी-ध्वम् । 'सम्' उपसर्गपूर्वक 'ष्ठा गतिनिवृत्तौ' (१।२६७) धातु से अद्यतनीविभक्तिसंज्ञक उ० पु०-ए० व० 'ध्वम्' प्रत्यय, अडागम, "तिष्ठतेरित्" (३।५।४७) से धातुगत आकार को इकारादेश तथा प्रकृत सूत्र द्वारा धकार को ढकारादेश ।

५. **तुष्टुढ्वे** । स्तु + परोक्षा-ध्वे । 'ष्टुञ् स्तुतौ' (२।६५) धातु से परोक्षाविभक्तिसंज्ञक उ० पु०-ए० व० 'ध्वे' प्रत्यय, द्विर्वचनादि तथा प्रकृत सूत्र द्वारा धकार को ढकारादेश।

६. **चकृढ्वे** । कृ + परोक्षा-ध्वे । 'डु कृञ् करणे' (७।७) धातु से परोक्षाविभक्ति-संज्ञक उ० पु०-ए० व० 'ध्वे' प्रत्यय, द्विर्वचनादि तथा प्रकृत सूत्र द्वारा धकार को ढकारादेश ॥८४२।

## ८४३. मर्जो मार्जिः [३।८।२३]

### [सूत्रार्थ]

'मृज्' धातु का जो गुणनिष्पन्न 'मर्ज' शब्दरूप, उसके स्थान में 'मार्जि' आदेश होता है ॥८४३।

### [दु० वृ०]

'मर्ज' इत्येतस्य मार्जिरादेशो भवति, मार्ष्टा, मार्क्ष्यति, अमार्ट् । मार्जो वर्तते । मर्ज इति किम् ? मृष्टः, मृष्टवान् । अगुणे स्वरे वा वक्तव्यम् – परिमार्जन्ति, परिमृजन्ति ॥८४३॥

### [दु० टी०]

मर्जो० । ननु 'अमार्ट्' इत्यत्राटा सह कथं मार्जिर्न भवति, अटस्तद्ग्रहणेन ग्रहणात्? सत्यम्, यद्यपि प्रकृतेः पूर्वोऽट्, तथापि साक्षाद् बाह्यप्रत्ययापेक्षित्वाद् बहिरङ्गो गुणस्त्वन्तरङ्गो भावनानिमित्तत्वात्, ततो मार्जिरप्यन्तरङ्ग इति, तदसत् । गुणरूपोपलक्षितस्य मर्जो ग्रहणेऽटः कुतः प्रसङ्गः । तथा मामार्जीत **चेक्रीयितलुगन्तमते** कुतः समुदायादेश इति। मृष्टः इति । तस् प्रत्ययो निष्ठा वा । अगुण इत्यादि । अप्राप्ते विभाषा, मृजेरिति सम्बन्धोऽर्थवशात् **केचिदिच्छन्ति केचिन्नेच्छन्ति, तन्मतं सूत्रकारस्येति** भावः । म्रष्टा, म्रष्टुमित्यपि प्रत्युदाहरन्त्**येके। येषां** मृजेरपि अकारागमोऽस्तीति मतम्, नैतद् **भाष्यचिन्तितम्** ॥८४३।

### [वि० प०]

मर्जो० । मार्जो वर्तते इति घञ्प्रत्ययेऽपि न गत्वम्, **अभिधानात्** । मृष्टः इति निष्ठा तस् वा, अगुणत्वादिह मृजेरुपधालक्षणगुणस्याभावान्न मर्जरूपमस्तीति भावः । वक्तव्यम् इति । **केचिदि**च्छन्ति **केचिन्नेच्छन्ति, ये** नेच्छन्ति **तन्मतमिह प्रमाणमित्यर्थः** ॥८४३।

## [बि० टी०]

मर्जो० । मार्जो वर्तते इति **वृत्तिः** । ननु कृति अपमृजत्यनेनास्मिन्निति वा **अपामार्गः** इति कथं गत्वम्, तत् कथं **पञ्ज्या**मुक्तम् **अभिधानादिति** चेदन्यत्र स्यात् ॥८४३।

## [समीक्षा]

'मार्ष्टा, मार्क्ष्यति, अमार्ट्' आदि शब्दरूपों के सिद्ध्यर्थ 'मृज्' धातुगत ऋकार के स्थान में 'आर्' आदेश की अपेक्षा होती है । इसकी पूर्ति पाणिनि ने वृद्धि-रपर के विधान से की है तथा कातन्त्रकार ने 'मार्ज्' आदेश करके । पाणिनि का सूत्र है – "मृजेर्वृद्धिः" (अ० ७।२।११४) ।

## [विशेष वचन]

१. मृजेरिति सम्बन्धोऽर्थवशात् केचिदिच्छन्ति, केचिन्नेच्छन्ति, तन्मतं सूत्रकारस्येति भावः (दु० टी०) ।

२. म्रष्टा, म्रष्टुम् इत्यपि प्रत्युदाहरन्त्येके (दु टी०) ।

३. नैतद् भाष्यचिन्तितम् (दु० टी०) ।

४. केचिदिच्छन्ति केचिन्नेच्छति । ये नेच्छन्ति तन्मतमिह प्रमाणमित्यर्थः (वि० प०)।

## [रूपसिद्धि]

१. **मार्ष्टा** । मृज् + ता । 'मृजू शुद्धौ' (२।२९) धातु से श्वस्तनीविभक्तिसंज्ञक प्र० पु०-ए० व० 'ता' प्रत्यय, "नामिनश्चोपधाया लघोः" (३।५।२) से मृज्धातु की उपधा ऋकार को गुण, प्रकृत सूत्र से 'मार्ज' आदेश, "भृजादीनां षः" (३।६।५९) से जकार को षकार तथा "तवर्गस्य षटवर्गाट्टवर्गः" (३।८।५) से तकार को टकारादेश ।

२. **मार्क्ष्यति** । मृज् + भविष्यन्ती-स्यति । 'मृजू शुद्धौ' (२।२९) धातु से भविष्यन्तीसंज्ञक प्र० पु०-ए० व० 'स्यति' प्रत्यय, गुण, मार्ज् आदेश, जकार को षकार, "षढोः कः से" (३।८।४) से षकार को ककार तथा सकार को षकार, 'क्-ष्' संयोग 'क्ष्' वर्ण निष्पन्न ।

३. **अमार्ट्** । अट् + मृज् + ह्यस्तनी-दि । 'मृज् शुद्धौ' (२।२९) धातु से ह्यस्तनीविभक्तिसंज्ञक प्र० पु०-ए० व० 'दि' प्रत्यय, अडागम, अन् विकरण, उसका लुक्, उपधागुण, मार्ज् आदेश, "व्यञ्जनाद् दिस्योः" (३।८।४७) से 'दि' प्रत्यय का लोप, जकार को षकार तथा षकार को टकार ॥८४३।

# ८४४. धात्वादेः षः सः [३।८।२४]

## [सूत्रार्थ]

धातुगणपठित धातु के आदि में विद्यमान षकार को सकार आदेश होता है ॥८४४।

## [दु० वृ०]

धातोराद्यावयवस्य षकारस्य सकारो भवति । षह-सहते । षिचिर्-सिञ्चति । धातोरिति किम् ? षट्, षण्डः । आदेरिति किम् ? लषिता, लषितुम् । कथं षण्डीयति ?

नामधातुत्वात् । धातोश्चारम्भको यिन् न षकार इति । **"ष्ठिवुक्लम्वाचमामनि"** (३।६।६७) इति निर्देशात् ष्ठीवति । ष्ठीवेरपि षकारष्ठकारपरस्थकारपरो वेति मतम् । तेन– 'टेष्ठीव्यते, तेष्ठीव्यते' इति सिद्धम् । ष्वक्केर्न स्यात् इति वक्तव्यम्– ष्वक्कते । इह निमित्ताद् विकारस्थस्य सस्य षत्वार्थः षोपदेशो धातूनामिति । तत्र च स्वरदन्त्यपराः सादयः **षोपदेशा** इति । ष्मिङ्ष्विदिष्वदिष्वपयश्च, सृपिसृजिस्तृस्त्यासीकृसेकृवर्जम् ॥८४४।

## [दु० टी०]

धा० । ननु कथं धातुग्रहणस्य प्रत्युदाहरणम् 'षट्-षण्डः इत्युपदेशबलादेव लिङ्गानामादेः षः सो न भविष्यति, तर्हि धातूनाम् इति कथम् ? सत्यम्, वक्ष्यति निमित्ताद् विकारस्थस्य षत्वार्थः षोपदेशो धातूनामिति, तथापि **मन्दमतिबोधनार्थं** प्रत्युदाहरणं युज्यते लषिता,लषितुमिति षोपदेशस्तर्हि किमर्थमिति **"लषपतपदामुकञ्"** (४।४।३४) इत्यत्र लषेर्ग्रहणं मा भूत्, न कखादावषान्त उपदेश इति नेरुपसर्गात् परस्य णत्वं न स्यात् प्रणिनिनीषतीति । नामधातुत्वादिति। द्रव्यसमवेत क्रियाभिधाने गौणत्वादित्यर्थः । धातोश्चेत्यादि । किञ्चादिशब्दोऽत्रावयववचनः, अवयवश्चारम्भको भवति । न च धातोरारम्भकः षः, किन्तर्हि यिन्निति ।

अपर आह– नाम्यन्ताद् धातोरित्यतो धातोरित्यनुवर्तते, अवयवलक्षणा चेयं षष्ठी । तेनोपदेशे भवतीति लक्ष्यते, नामधातवो नोपदिष्टाः, किन्तर्हि लक्षणेन प्रतिपादिताः । तेष्वनुमानात् प्रकृतिप्रत्ययोपदेशात् सम्प्रत्ययः । ष्ठिवेस्तर्हि **"धात्वादेः षः सः"** (३।८।२४) इति स्थीवतीत्यपि प्राप्नोति । षकारलक्षणानुरोधाद् धातुः कृतटवर्गः उच्चार्यते **'ष्ठा गतिनिवृत्तौ'** (१।२६७) इति, यथा **'निमित्ताभावे नैमित्तिकस्याप्यभावः'** (का० परि० २७) इति पुनस्थकार इत्याह – ष्ठिवुरित्यादि । धात्वादेः षः सो न भवति, अत एव निर्देशादित्यर्थः। तेष्ठीव्यते इति। थकार एव द्विरुच्यते स्मृतिविषयानुसन्धिप्रत्ययबलाद् अन्यथा अनर्थक एव थकारोपदेशः स्यात् । ठकारपरत्वे धात्वादेः षः सः इति कृते पुनष्ठकारेण सन्निपातेन ष्ठीवतीति सिद्धम् ।

**परमतमेतत् ।** मतमिति **मतद्वयमपि प्रमाणमित्यर्थः ।** ष्वक्केरित्यादि । वक्तव्यं व्याख्येयम् । ष्वक्कतेस्तु षकारोपदेशसामर्थ्यात् सो न भविष्यति चण्परोक्षाचेक्रीयितेषु अभ्यासस्थनिमित्ताभावात् सनि च स्तौतीनन्तयोरेव सनीति नियमात् । **गणपाठशुद्ध्यर्थ**मिदमाह- स्वरदन्त्येत्यादि । **'ष्मिङ् ईषद्धसने, ष्विदा गात्रप्रक्षरणे, ष्वद स्वाद स्वर्द आस्वादने, ञि ष्वप शये'** (१।४५७, ४७६, ३०७; २।३२) । एते च **षोपदेशा** इत्यर्थः । एषां [१]वकार ओष्ठ्यो न दन्त्योष्ठ्य इति भेदेनोच्यते । 'गम्लृ सृप्लृ गतौ, सृज विसर्गे, स्तृञ् आच्छादने, स्वृ शब्दोपतापयोः, [२]ष्टयै स्त्यै शब्दसंघातयोः, सीकृ सेकृ सेचने' (१।२७९; ३।११६; ८।१०; १।२७१, २५७, ३३१) इत्येतान् वर्जयित्वेत्यर्थः ॥८४४।

---

१. ष्विदादीनां पृथग्वचने हेतुमाह– एषामित्यादि । नञत्र भिन्नक्रमे योज्यः, वकारो नायमोष्ठः किन्तु दन्त्योष्ठ्यस्तेन ष्विदादिः पृथगुच्यते इति रमानाथकृतटिप्पणी ।

२. स्वृ शब्दोपतापयोः – अत्र स्तृधातुमपठित्वा स्वृ शब्दोपतापयोरितिपठितम्, तल्लेखक-

## [वि० प०]

धात्वादेः । नामधातुत्वादिति नामार्थसम्मिलितेच्छादिक्रियाभिधायित्वाद् गौणत्वमित्यर्थः। किञ्च धात्वादेरित्यादिशब्दोऽवयवार्थः, अवयवश्चारम्भको भवति, यथा घटादेः कपालादिः। इहाप्यारम्भको यिन्नेव, तस्मिन् सति "**ते धातवः**" (३।२।१६) इति प्रवर्तनात् । अतः षकारस्य धातोरनवयवत्वादेव न भविष्यतीत्याह– धातोरित्यादि । ष्ठिव्वित्यादि । यदि पुनरस्य धात्वादेः षः सो भवति तदा स्थिव्विति निर्दिशेदिति भावः । मतमिति **मतद्वयमपि सम्मतमित्यर्थः** । तेन "**शिट्परोऽघोषः**" (३।३।१०) इति षकारलोपे ठकारथकारयोर्द्वितीय-चतुर्थयोरित्यादिना प्रथमत्वे रूपद्वयं सिद्धमिति भावः । ष्वक्केरित्यादि । वक्तव्यं **व्याख्येयम्।** द्विषकारनिर्देशोऽयम् । संयुक्तानां सजातीयानां वर्णानामेकस्यानेकस्य चोच्चारणं प्रति भेदस्याभावादत्र प्रथमषकारो द्वितीयस्यादित्वनिरासार्थं प्रयुक्तः, न धातुग्रहणेन गृह्यते इत्यादेरनवयवत्वादेव न भवति द्वितीयस्यानादित्वादिति ।

ननु गणे सकार एवोपदिश्यताम् इत्याह – निमित्तादिति । गणपाठशुद्ध्यर्थमाह– तत्र चेति । ष्मिङ् इत्यादि । 'ष्मिङ् ईषद्धसने, ष्विदा गात्रप्रक्षरणे, ष्वद स्वाद स्वर्द आस्वादने, ञि ष्वप् शये' (१।४५७, ४७६, ३०७; २।३२) । एषामोष्ठ्यपरत्वेऽपि षोपदेशत्वमित्यर्थः । 'गम्ल सृप्ल गतौ, सृज विसर्गे, स्तृञ् आच्छादने, ष्टयै स्त्यै शब्दसंघातयोः, सीकृ सेकृ सेचने' (१।२७९; ३।११६; ८।१०; १।२७१, २५७, ३३१) एतान् स्वरदन्त्यपरान् वर्जयित्वेत्यर्थः ॥८४४।

## [बि० टी०]

धात्वादेः । नन्वनेन किम्, गणे दन्त्यसकारः पठ्यताम्, विकारस्थत्वात् षत्वार्थं चेत्, कुत्र विकारस्थः स इत्याह– तत्रेति । स्वरदन्त्यपराः षोपदेशाः । नन्वत्र ष्विदिष्वदिपाठेन किम्, तथाहि **टीकाकारः** – एषां वकार ओष्ठ्यो न दन्त्योष्ठः । अत्र **रमानाथः**– एषां वकारो न ओष्ठ्यः, अपि तु दन्त्योष्ठः । तेनैव सिद्धमिति चेत्, न। स्वपिवचीत्यादौ पाठात् सम्प्रसारणं 'सुप्तः' इत्यादि न स्यात् । **मनोरमामतं** कथम् उपपद्यते चेत्, 'उभयोः स्थाने **यो निष्पद्यते**' इत्यादिन्यायाद् एकतरव्यपदेशाददोषः । यथा "**उरोष्ठ्योपधस्य च**" (३।५।४३) **इत्यत्र दन्त्योष्ठ्यादपि संवुवूर्षते इतिवत्** । **स्वमते** तु व्यपदेशाश्रयणं यत्र याथार्थिकव्याख्यानात्र सिध्यति तत्रैव । कुत एवं व्याख्यातव्यं सम्प्रसारणविधौ अत्र तु आदृतमेव, अन्यथा तदुपादानं व्यर्थं स्यादिति **सम्प्रदायः** । **वस्तुतस्तु** स्वरदन्त्यपरा इत्यत्र स्वतन्त्रेण स्वरेण

---

प्रमादजमेव स्वनतिस्वदत्योरस्याप्यदन्त्यपरत्वादेव निरासात् । अन्यथा स्वपेरुपादानमनर्थकं स्यात् । अत एव पञ्जिकायां नैतादृशः पाठः । यद् वा यद्यपि स्वृधातोर्न षोपदेशत्वं सम्भवति, तथाप्यत्र तन्निषेधादन्य-स्यापि दन्त्योष्ठवकारपरस्य कस्यचित् षोपदेशत्वमिति ज्ञापितम्, तेन ष्वक्केः षोपदेशत्वं सिद्धम्, न तु सिद्धस्यैव दन्त्योष्ठस्वपादिपाठबलादिति पठन्ति । तेन ज्ञापकत्वं पर्यवस्यति । **अन्ये** तु **वर्णदेशनामते** ष्वपादीनामोष्ठ्यवकारत्वात् स्वृधातोर्दन्त्योष्ठवकारस्यापि दन्त्यत्वान्निषेधः कृतः इत्याहुः । एतत्तु दुष्टमिव लक्ष्यते इति रमानाथकृता टिप्पणी ।

सन्निधानाद् दन्त्यस्यापि स्वातन्त्र्यम्, आतिदेशिके तु गौणत्वमिति हृदि कृत्वा **पञ्जीकृदा**ह– एषामोष्ठ्योपधत्वेऽपि सर्वं सुस्थम् ॥८४४।

## [समीक्षा]

'सहते, सिञ्चति' इत्यादि शब्दरूपों के सिद्ध्यर्थ धातुगणपठित 'षह, षिचिर्' आदि धातुओं में आदि षकार को सकारादेश करने की आवश्यकता होती है, इसके निर्वाहार्थ दोनों व्याकरणों में सूत्र बनाए गए हैं । पाणिनि का सूत्र है – "धात्वादेः षः सः" (६।१।६४) । व्याख्याकारों के अनुसार गणपाठ में जो धातुएँ मूर्धन्य षकारादि पढ़ी गई हैं तथा जो दन्त्य सकारादि होने पर भी जिनके बाद स्वर वर्ण या दन्त्य वर्ण हैं उन सभी को षोपदेश माना जाता है । इनमें 'सृज्' आदि कुछ धातुओं को छोड़ दिया गया है ।

## [विशेष वचन]

१. इह निमित्ताद् विकारस्थस्य सस्य षत्वार्थः षोपदेशो धातूनामिति (दु० वृ०)।
२. स्वरदन्त्यपराः सादयः षोपदेशाः (दु० वृ०; बि० टी०) ।
३. मन्दमतिबोधनार्थं प्रत्युदाहरणं युज्यते (दु० टी०) ।
४. मतमिति । मतद्वयमपि प्रमाणमित्यर्थः (दु० टी०; वि० प०) ।
५. ष्मिङ् ईषद्धसने ------ एषामोष्ठ्यपरत्वेऽपि षोपदेशत्वमित्यर्थः (वि० प०) ।
६. गम्लृ गतौ -------- एतान् स्वरदन्त्यपरान् वर्जयित्वा (वि० प०) ।
७. अत्र रमानाथः– एषां वकारो न ओष्ठ्यः अपि तु दन्त्योष्ठ्यः (बि० टी०) ।
८. 'उभयोः स्थाने यो निष्पद्यते' इत्यादिन्यायादेकतरव्यपदेशाददोषः (बि० टी०)।
९. अन्यथा तदुपादानं व्यर्थं स्यादिति सम्प्रदायः (बि० टी०) ।
१०. वस्तुतस्तु स्वरदन्त्यपरा इत्यत्र स्वतन्त्रेण स्वरेण सन्निधानाद् दन्त्यस्यापि स्वातन्त्र्यम्, आतिदेशिके तु गौणत्वम् (बि० टी०) ।

## [रूपसिद्धि]

१. **सहते** । षह् + अन् + ते । 'षह मर्षणे' (१।५६०) धातु से वर्तमानासंज्ञक प्र० पु०-ए० व० 'ते' प्रत्यय, प्रकृत सूत्र द्वारा षकार को सकार तथा "अन् विकरणः कर्तरि" (३।२।३२) से अन् विकरण-न् अनुबन्ध का प्रयोगाभाव ।

२. **सिञ्चति** । षिचिर् + अन् + ति । 'षिचिर् क्षरणे' (५।११) धातु से वर्तमानासंज्ञक परस्मैपद– प्र० पु०-ए० व० 'ति' प्रत्यय, प्रकृत सूत्र से षकार को सकार, अन् विकरण, "मुचादेरागमो नकारः स्वरादनि विकरणे" (३।५।३०) से नकार का आगम, "मनोरनुस्वारो धुटि" (२।४।४४) से नकार को अनुस्वार तथा "वर्गे वर्गान्तः" (२।४।४५) से अनुस्वार को चवर्गान्त्य ञकारादेश ॥८४४।

# ८४५. णो नः [३।८।२५]

## [सूत्रार्थ]

धातु के आदि में स्थित णकार को नकारादेश होता है ॥८४५।

## [दु० वृ०]

धात्वादेर्णकारस्य नकारो भवति । णीञ्-नयति । णम-नमति । धात्वादेरिति किम् ? क्वणति । कथं णकारीयति ? नामधातुत्वात् । इहापि **''उपसर्गादसमासे णोपदेशस्य''** (कात० परि०-णत्व० १६) नस्य णत्वार्थो णकारपाठ इति । सर्वे नादयो **णोपदेशाः,** नृति-नन्दि-नर्दि-नक्कि-नाटि-नटि-नृ-नाथृ-नाधृवर्जम् ॥८४५।

## [दु० टी०]

णो० । पूर्ववदिहापि व्याख्येयम् । यथासङ्ख्यगौरवाच्च पृथगारम्भ इति । नृतीत्यादि। 'नृती गात्रविक्षेपे, टु नदि समृद्धौ, नर्द गर्द शब्दे, नक्क धक्क पशि नाशने, नट अवस्यन्दने, नट नृतौ, नृ नये, नाथृ नाधृ उपतापैश्वर्याशी:षु च' (३।७; १।२५, १७; ९।३२, १३; १।९४, ५०५, ८।२१; १।३१७), नवैते **वर्जनीयाः** ॥८४५।

## [वि० प०]

णो नः। इहार्पीत्यादि । यथा 'प्रणयति, प्रणमति, परिणमति' इत्यसमास इत्येव । प्रगतो नायको यस्मात् स **प्रनायको** देशः इति तदेतत् कथम्, तत्रापिग्रहणात् । 'नृती गात्रविक्षेपे, टु नदि समृद्धौ, नर्द गर्द शब्दे, नक्क धक्क पशि नाशने, नट अवस्यन्दने, नट नृतौ, नृ नये, नाथृ नाधृ उपतापैश्वर्याशी:षु च' (३।७; १।२५, १७; ९।३२, १३; १।९४, ५०५; ८।२१; १।३१७) इति नवैते **वर्जनीयाः** ॥८४५।

## [समीक्षा]

'नयति, नमति, नह्यति' इत्यादि शब्दरूपों के सिद्ध्यर्थ 'णीञ्' आदि धातुओं के आदि में पठित णकार को नकारादेश दोनों व्याकरणों में किया गया है । पाणिनि का सूत्र है – ''णो नः'' (अ० ६।१।६५) । 'नृती' आदि ९ धातुओं को छोड़कर सभी नकारादि धातुएँ णोपदेश मानी गई हैं । व्याख्याकारों ने कहा है कि 'धात्वादेः षः सः णो नः' यह एक सूत्र इसलिए नहीं किया गया है कि 'ष-स-ण्-न' में क्रमिक अन्वय से अभीष्टसिद्धि कथमपि नहीं हो सकती और यदि अभीष्टसिद्धि के लिए 'ष्-स्' का तथा 'ण्-न्' का अन्वय किया जाए तो गौरव उपस्थित होगा ।

## [विशेष वचन]

१. नस्य णत्वार्थो णकारपाठ इति (दु० वृ०) ।
२. सर्वे नादयो णोपदेशाः, नृति-नन्दि-नर्दि-नक्कि-नाटि-नटि-नृ-नाथृ-नाधृवर्जम् (दु० वृ०) ।
३. यथासङ्ख्यगौरवाच्च पृथगारम्भ इति (दु० टी०) ।

## [रूपसिद्धि]

१. **नयति ।** नी + अन् + ति । 'णीञ् प्रापणे' (१।६००) धातु से वर्तमानासंज्ञक परस्मैपद– प्र० पु०-ए० व० 'ति' प्रत्यय, प्रकृत सूत्र द्वारा णकार को नकार, अन् विकरण, ''नाम्यन्तयोर्धातुविकरणयोर्गुणः'' (३।५।१) से ईकार को गुण-एकार तथा ''ए अय्'' (१।२।१२) से एकार को अयादेश ।

२. **नमति**। णम् + अन् + ति । 'णम् प्रह्वत्वे शब्दे च' (१।१५९) धातु से वर्तमानासंज्ञक 'ति' प्रत्यय, प्रकृत सूत्र से णकार को नकार तथा अन् विकरण ॥८४५।

## ८४६. निमित्तात् प्रत्ययविकारागमस्थः सः षत्वम् [३।८।२६]

### [सूत्रार्थ]

नामिसंज्ञक वर्ण (इ ई, उ ऊ, ऋ ॠ, ऌ ॡ, ए ऐ, ओ औ), क् तथा रेफ से परवर्ती प्रत्ययस्थ, विकारस्थ एवं आगमस्थ दन्त्य सकार को मूर्धन्य षकार आदेश होता है ॥८४६।

### [दु० वृ०]

अन्त्यार्थोऽयमारम्भः । निमित्तान्नामिककाररेफात् परः प्रत्ययविकारागमस्थः सः षत्वमापद्यते। नामिनस्तावत् – चिचीषति, लुलूषति, सर्पिष्यति, धनुष्यति । ककारात् – शक्ष्यति, विवक्षति । रेफात् – चिकीर्षति । विकारस्थः– सिषेव, सुष्वाप । आगमस्थः– परिष्करोति। वचनाद् भिन्नपदेऽपि व्यपदेशिवद्भावात् । प्रत्ययविकारागमस्थः इति किम् ? सृप्ल्– सिसृप्सति । सेकृ – सिसेकिषति । तस्यैवापिशब्दन्यायं **प्रपञ्चार्थं** इति । तथा उपसर्गात् सुनोतिसुवतिस्यतिस्तौतिस्तोभतीनामङ्न्तरोऽपि – अभिषुणोति, अभ्यषुणोत्; अभिषुवति, अभ्यषुवत्; अभिष्यति, अभ्यष्यत्; अभिष्टौति, अभ्यष्टौत्; अभिष्टोभते,अभ्यष्टोभत। तथा स्थासेनिषेधतिसिच्सन्जस्वन्जामडभ्यासान्तरश्च – अभिष्ठास्यति, अभ्यष्ठात्, अभितष्ठौ। सेनया अभियाति अभिषेणयति, अभ्यषेणयत्, अभिषिषेणयिषति, प्रतिषेधति, प्रत्यषेधत्, प्रतिषिषेधयिषति; अभिषिञ्चति, अभ्यषिञ्चत्, अभिषिषिक्षति; अभिषजति, अभ्यषजत्, अभिषिषङ्क्षति; परिष्वजते, पर्यष्वजत्, परिषिष्वङ्क्षते ।

सदेरप्रतेः – निषीदति, न्यषीदत्, निषिषत्सति । अप्रतेरिति किम् ? प्रतिसीदति, प्रत्यसीदत्, प्रतिसिसत्सति । प्रतेरपि स्तन्भेः– प्रतिष्टभ्नाति, प्रत्यष्टभ्नात्, प्रतितष्टम्भ । एवम् अभिष्टभ्नाति, अभ्यष्टभ्नात्, अभितष्टम्भ । अवादोर्जित्यनिकटाश्रयेषु – मल्लस्यावष्टम्भः, अवष्टब्धा सेना, दण्डमवष्टभ्यास्ते । एष्विति किम् ? अवस्तब्धो वृषलः । शीतेन सङ्कोचित इत्यर्थः । वेश्च स्वनो भोजने – विष्वणति, अवष्वणति, व्यष्वणत्, अवाष्वणत्, विषष्वाण, अवषष्वाण, सशब्दं भुङ्क्ते इत्यर्थः । **एवमन्येऽप्यनुसर्तव्याः** ॥८४६।

### [दु० टी०]

निमि० । निमित्तान्नामिककाररेफादिति । नामिनश्च कश्च रश्च **नामिकरम्,** समाहारद्वन्द्वः। ननु येन विना यत्र भवति तत् तस्य निमित्तम्, तर्हि प्रत्ययविकारागमस्थसकारग्रहणैरपि किं तैर्विना तस्यासिद्धेः । नामिकरपरः प्रत्ययविकारागमस्थ इति वचनान्निमित्तवत् षत्वमित्यास्ताम्, एतत्तु न चोद्यम् । एवं तानि निमित्तानि स्युर्यदि षत्वस्य साधकानि सूत्रेणापि किम् ? यस्मात् तस्यैवापिशब्दस्यायं **प्रपञ्च** इति वक्ष्यति । सर्पिष्यति, धनुष्यतीत्यत्र षत्वार्थमिह प्रत्ययो व्युत्पाद्यः सृपेरिस् धनेरुसिति । कृसरादीनान्तु नेष्यते 'कृधूवाभ्यः सरक्' इति । अपिशब्देन बहुलार्थेन क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिर्वेति । व्यपदेशिवद्भावादिति । आगमे

तिष्ठतीत्याधाराधेयभावो न युज्यते सकारमात्रत्वात् । अर्थवत्ता व्यपदेशिन् इत्युक्तम्, भूषणाद्यर्थस्य द्योतकत्वादर्थवत्तास्तीत्यदोषः । एवं सिजादीनामप्यर्थवत्तास्तीति प्रत्ययस्थ इत्युच्यते । तर्हि विकारसकारस्यानर्थक्याद् विकारस्थ इति न युज्यते ? सत्यम्, **नार्थवत्तामपेक्ष्य व्यपदेशिवद्भावः,** किन्तर्हि समुदायैकदेशापेक्षायाम्- 'सिषेव, तिष्ठासति, परिष्वज्यते' इत्यादिषु यः सकारसमुदायो विकारस्तत्र तिष्ठतीति, अथवा विकरणं **विकारः,** क्रियायाः सम्बन्धित्वेन सकार उपादीयते। उपसर्गादित्यादि । उपसर्गस्थं निमित्तमुपसर्ग इहेति । तेन निसोऽपि स्यात् – निषुणोति । अभिषेणयतीति । यदा प्रागभिना सह सम्बन्धः सुनोतेस्तदा षत्वम्, यदा त्विनन्तेन सम्बन्धस्तदा न षत्वम्, नासावुपसर्गः सुनोतेरिति । कृतद्विर्वचनानां नेष्यते– अभिसुसूषति, अभ्यसुसूषत; परिसुसूषति, परिसुसूषत्, पर्यसुसूषत्, अभिसिसासति, अभ्यसिसासत् । स्थासेनीत्यादि । अडभ्यासान्तरश्चेति । अन्तरश्चेत्यर्थः ।

स्वन्जेस्तु परोक्षायामभ्यासस्यापिग्रहणात्– अभिषस्वन्जे । सेधतीति **तिब्निर्देशः** सिध्यतिनिवृत्त्यर्थः । सदेरप्रतेरिति । परोक्षायामभ्यासस्यैवापिग्रहणादेव– निषसाद, विषसाद। प्रतेरपि स्तन्भेरिति । **अपिग्रहणमुपसर्गानुवर्तनार्थम् ।** एवं वितिष्टम्भिषति, वितष्टम्भ । अपिग्रहणादेव चणि न स्यात् – व्यतस्तम्भत् । प्रतिस्तब्धनिस्तब्धयोर्न षत्वम् । अवादोर्जित्यनिकटाश्रयेष्विति । एष्वर्थेषु वर्तमान्स्य स्तन्भेरित्यर्थः, अत्रापि न चणि षत्वम्। अवास्तम्भत् । वेश्च स्वनो भोजने इति । **चकारोऽवानुकर्षणार्थः,** सशब्दं भोजनं स्वनेरर्थ इत्याहुः । **अपरो** भोजने स्वनो भोजनमिति । एवमित्यादि । परिनिविभ्यः सेवतेः – परिषेवते, पर्यषेवत, परिषिषेव । एवं निषेवते, विषेवते । सयसितयोश्च – परिषयः, निषयः, विषयः, परिषितम्, निषितम्, विषितम् । **'षिञ् बन्धने'** (४।२; ८।५) अच् प्रत्ययः क्तप्रत्ययश्च । **अन्ये** तु स्यतेरपि ग्रहणमिच्छन्ति, क्ते परिनिविभ्य एवेति नियमार्थ– मभ्यासान्तरश्चेति न सम्बध्यते – मा विषसयत्, मा पर्यषसयत् । सीव्यतेरचणि – परिषीव्यति, निषीव्यति, विषीव्यति । चणि तु मापरिसीसिवत् ।

अनोऽकारस्य सहश्च – परिषहते, निषहते, विषहते । चणि तु मापरिसीषहत् । अनोऽकारस्येत्येव – परिसोढः, निसोढः, विसोढः । अडन्तरयोर्विभाषा – पर्यषीव्यत्, पर्यसीव्यत् । न्यषीव्यत्, न्यसीव्यत् । व्यषीव्यत्, व्यसीव्यत् । पर्यषहत, पर्यसहत, न्यषहत, न्यसहत । व्यषहत, व्यसहत । स्तौतिस्वन्जोरपि – पर्यष्टौत्, पर्यस्तौत् । न्यष्टौत्, न्यस्तौत् । व्यष्टौत्, व्यस्तौत् । पर्यष्वजत, पर्यस्वजत । न्यष्वजत, न्यस्वजत । व्यष्वजत, व्यस्वजत । अन्वभिभ्यां च स्यन्दतेरप्राणिकर्तृकस्य वा – अनुष्यन्दते, अनुस्यन्दते। अभिष्यन्दते, अभिस्यन्दते । परिष्यन्दते, परिस्यन्दते । निष्यन्दते, निस्यन्दते । विष्यन्दते, विस्यन्दते । अप्राणीति **पर्युदासोऽयम् ।** तेन मृतो वत्सोऽनुष्यन्दते, अनुस्यन्दते इति वा स्यादेव । वेरनिष्ठायां स्कन्देः – विष्कन्दते, विस्कन्दते । निष्ठायान्तु विष्कन्नः, विष्कन्नवान् । परेर्निष्ठायामपि – परिष्कन्दते, परिस्कन्दते, परिष्कन्नः, परिस्कन्नः, परिष्कन्नवान्, परिस्कन्नवान् ।

निर्निविभ्यश्च स्फुरिस्फुल्योः – निःष्फुरति, निःस्फुरति । निष्फुरति, निस्फुरति । विष्फुरति, विस्फुरति । निःष्फुलति, निःस्फुलति । निष्फुलति, निस्फुलति । विष्फुलति,

विस्फुलति । वेः स्कभ्नातेर्नित्यम् – विष्कभ्नाति, विष्कभिता । **तिब्निर्देशः** स्कम्भतेर्निवृत्त्यर्थः– विस्कम्भते । निर्दुःसुविभ्यः सूतेः – निःषुतिः, दुःषुतिः, सुषुतिः, विषुतिः । अवकारस्य स्वपेः – निःषुप्तः, दुःषुप्तः, सुषुप्तः, विषुप्तः । अवकारस्येत्येव – निःस्वापः, दुःस्वापः, सुस्वापः, विस्वापः । प्रादुरुपसर्गाभ्यामस्तेः स्वरयकारयोः – प्रादुःषन्ति, प्रादुःष्यात्, अभिषन्ति, अभिष्यात् । अपिग्रहणादेव प्रतेर्न सुटः – प्रतिस्कीर्णं ते वृषल ! भूयात् । सत्स्वपि सूत्रेषु **व्यभिचारो** दृश्यते, तस्माद् **बाहुल्याश्रयणमेव** श्रेय इति ॥८४६।

## [वि० प०]

निमित्तात्० । सर्पिष्यति, धनुष्यतीति सृपेरिस्, धनेरुस् इति प्रत्ययस्थत्वात् यिनि षत्वम् । वचनादित्यादि । **''सुड् भूषणे सम्पर्युपात्''** (३।७।३८) इति सुट्, अत एवान्त्यार्थोऽयमारम्भ इत्युक्तम् । एतदर्थं च क्रियमाणमनन्त्यार्थमपि भवतीति चिचीषतीत्याद्यप्युदाहृतम् । व्यपदेशिवद्भावादिति सकारमात्रत्त्वादस्यागमे तिष्ठतीत्याधाराधेय-भावो न युज्यते । अतो व्यपदेशिवद्भावेनात्रागमस्थत्वात् षत्वमित्यर्थः । ननु किमर्थमिदं तत्रापिग्रहणादेव परिष्करोतीत्यस्मिन्नपि षत्वं भविष्यतीत्याह– तस्यैवेत्यादि। तथा इत्यपिशब्दस्य बहुलत्वादित्यर्थः । उपसर्गस्थनिमित्तमुपचारादुपसर्ग इहोच्यते । वेश्चेति चकारादवाच्चेत्यर्थः । **शिष्टप्रयोगानुसारेणापरेऽप्येवं वेदितव्य**। इत्याह– एवमित्यादि ॥८४६।

## [बि० टी०]

निमि० । अन्त्यार्थोऽयमारम्भ इत्यादि । एतच्च **टीकायां** सुटं प्रत्येवोक्तम् । तथा च परिष्करोतीत्यत्र प्रयोजनं ज्ञातव्यम् । यस्यैवानन्त्यस्येति न्यायान्निमित्ताभावादनन्त्यसमीपस्या-न्त्यत्वाच्च षत्वं न स्यात् । अत एव **ज्ञापकात्** परिशब्देन सुटः सम्बन्धात् षत्वमित्यर्थः। यत्तु अन्त्यसमीपोऽन्त्य इत्युक्तम्, तदपि तवर्गादेशं प्रत्येव षत्वम् पुनर्न स्यात् कृसरधूसरादिष्वित्यनेन प्रतिषेधसामर्थ्यादेव तत्स्थं न स्यात् । अन्यथा कृसरधूसरशब्द-योरन्तयोः समीपत्वादेव षत्वं न भविष्यति किं प्रतिषेधेन, किञ्च **'न सात् कृसर०'** (कात० परि० ष० ४१) इति सूत्रं ज्ञापयति– मूर्धन्यस्तु पदादप्यादेशः स्यात् तच्चापवादादेव ज्ञापकात् पदात् ज्ञापयति – पदात् पदादिसस्य षत्वं वर्णयतीति ततश्चोपसर्गात् सुनोतीत्यादिवचनं विध्यर्थम् । परिष्करोतीत्यत्र पुनर्विधेरभावात् षत्वं न स्यादित्याह – अन्त्यार्थ इति । अन्त्यसमीपोऽन्त्य एवार्थः प्रयोजनमस्येत्यर्थः । ननु यद्युपसर्गेभ्यः सुटः सम्बन्धस्तदा 'परिचस्कार' इत्यत्र द्विर्वचने यथा सुटो द्विर्वचनं तथा पर्युपसर्गस्यापि स्यात् चेत्, न । धातोरादौ सुटो विधानाद् धातुग्रहणेन ग्रहणं स्यात् , परन्तु सम्बन्धमाश्रयते षत्वार्थमन्यत्र कुतः स्यात् षत्वं प्रति **ज्ञापकात्** ॥८४६।

## [समीक्षा]

'चिचीषति, लुलूषति, चिकीर्षति, परिष्करोति, अग्निषु' आदि शब्दों के सिद्ध्यर्थ दोनों व्याकरणों में सकार को मूर्धन्यादेश किया गया है । पाणिनि के ३ सूत्र हैं – ''इण्कोः, नुम्विसर्जनीयशर्व्यवायेऽपि, आदेशप्रत्यययोः'' (अ० ८।३।५७-५९) । यह

ज्ञातव्य है कि पाणिनीय 'इण्' प्रत्याहार में 'ह्-य्-व्-ल्' वर्णों का तथा कवर्ग के अन्तर्गत 'ख्-ग्-घ्-ङ्' वर्णों का जो समावेश किया जाता है, उन वर्णों की यहाँ कोई सार्थकता नहीं है। इसकी अपेक्षा कातन्त्रकार द्वारा नामिसंज्ञक-ककार-रेफ का ग्रहण करना समीचीन प्रतीत होता है।

## [विशेष वचन]

१. तस्यैवापिशब्दस्यायं प्रपञ्चार्थ इति (दु० वृ०)।
२. एवमन्येऽप्यनुसर्तव्याः (दु० वृ०)।
३. अर्थवत्ता व्यपदेशिन इत्युक्तं भूषणाद्यर्थस्य द्योतकत्वादर्थवत्तास्तीत्यदोषः (दु० टी०)।
४. नार्थवत्तामपेक्ष्य व्यपदेशिवद्भावः, किन्तर्हि समुदायैकदेशापेक्षायाम् (दु० टी०)।
५. अपिग्रहणमुपसर्गानुवर्तनार्थम् (दु० टी०)।
६. सत्स्वपि सूत्रेषु व्यभिचारो दृश्यते, तस्माद् बाहुल्याश्रयणमेव श्रेय इति (दु० टी०)।
७. उपसर्गस्थनिमित्तमुपचारादुपसर्ग इहोच्यते (वि० प०)।
८. शिष्टप्रयोगानुसारेणापरेऽप्येवं वेदितव्याः (वि० प०)।
९. अन्त्यसमीपोऽन्त्य एवार्थः प्रयोजनमस्येत्यर्थः (बि० टी०)।

## [रूपसिद्धि]

१. **चिचीषति**। चि + सन् + अन् + ति। 'चिञ् चयने' (४।५) धातु से इच्छार्थ में (चेतुमिच्छति) "धातोर्वा तुमन्तादिच्छतिनैककर्तृकात्" (३।२।४) से 'सन्' प्रत्यय, "चण्परोक्षाचेक्रीयितसनन्तेषु" (३।३।७) से धातु को द्विर्वचन, "स्वरान्तानां सनि" (३।८।१२) से धातुघटित इकार को दीर्घ, प्रकृत सूत्र से सकार को षकार, "ते धातवः" (३।२।१६) से 'चिचीष' की धातुसंज्ञा, वर्तमानासंज्ञक परस्मैपद प्र० पु० - ए० व० 'ति' प्रत्यय, "अन् विकरणः कर्तरि" (३।२।३२) से 'अन्' विकरण तथा "अकारे लोपम्" (२।१।१७) से षकारोत्तरवर्ती अकार का लोप।

२. **लुलूषति**। लू + सन् + अन् + ति। लवितुमिच्छति। 'लूञ् छेदने' (८।९) धातु से इच्छार्थक सन् प्रत्यय तथा शेष प्रक्रिया पूर्ववत्।

३. **सर्पिष्यति**। सर्पिस् + यिन् + अन् + ति। आत्मनः सर्पिरिच्छति। 'सर्पिस्' शब्द से आत्मेच्छार्थ में 'यिन्' प्रत्यय, प्रकृत सूत्र से सकारको षकार, धातुसंज्ञा तथा विभक्तिकार्य।

४. **धनुष्यति**। धनुस् + यिन् + अन् + ति। "धनुस्' शब्द से आत्मेच्छार्थ में 'यिन्' प्रत्यय तथा शेष प्रक्रिया पूर्ववत्।

५. **शक्ष्यति**। शक् + स्यति-भविष्यन्ती। 'शक क्षमायाम्, शक्ल्ृ शक्तौ' (३।११८; ४।१५) धातु से भविष्यन्तीसंज्ञक परस्मैपद प्र० पु०-ए० व० 'स्यति' प्रत्यय, प्रकृत सूत्र से सकार को षकार तथा 'क् - ष्' वर्णों के संयोग से क्ष् वर्ण की निष्पत्ति, धातुसंज्ञा तथा विभक्तिकार्य।

६. **विवक्षति ।** वच् + सन् + अन् + ति । 'वच् भाषणे' (२।३०) धातु से इच्छार्थ में 'सन्' प्रत्यय, द्विर्वचनादि, सकार को षकार, चकार को ककार, क्-ष् संयोग से क्षकार, धातुसंज्ञा तथा विभक्तिकार्य ।

७. **चिकीर्षति ।** कृ + सन् + अन् + ति । 'डु कृञ् करणे' (७।७) धातु से इच्छार्थक (कर्तुमिच्छति) सन् प्रत्यय, "ऋदन्तस्येरगुणे" (३।५।४२) से ऋकार को इर् आदेश, द्विर्वचन, अभ्याससंज्ञा, ककार को चकार, "स्वरान्तानां सनि" (३।८।१२) से दीर्घ, प्रकृत सूत्र से सकार को षकार, धातुसंज्ञा तथा विभक्तिकार्य ।

८. **सिषेव ।** सिव् + परोक्षा-अट् । 'षिवु तन्तुसन्ताने' (३।२) धातु से परोक्षाविभक्तिसंज्ञक परस्मैपद प्र० पु०-ए० व० 'अट्' प्रत्यय, द्विर्वचनादि तथा प्रकृत सूत्र से सकार को षकारादेश ।

९. **सुष्वाप ।** स्वप् + परोक्षा-अट् । 'ञि ष्वप शये' (२।३२) धातु से परोक्षासंज्ञक 'अट्' प्रत्यय, द्विर्वचनादि तथा सकार को षकारादेश ।

१०. **परिष्करोति ।** परि + सुट् + कृ + उ + वर्तमाना-ति । 'परि' उपसर्गपूर्वक 'डु कृञ् करणे' (७।७) धातु से वर्तमानासंज्ञक 'ति' प्रत्यय, "सुड् भूषणे सम्पर्युपात्" (३।७।३८) से सुडागम, 'उ' विकरण, ऋकार तथा उकार को गुण तथा प्रकृत सूत्र से सकार को षकारादेश ॥८४६।

## ८४७. शासिवसिघसीनां च [३।८।२७]

### [सूत्रार्थ]

नामिसंज्ञक वर्ण, ककार तथा रेफ से परवर्ती 'शास्-वस्-घस्' धातुघटित सकार को षकारादेश होता है ॥८४७।

### [दु० वृ०]

निमित्तात् परः शासिवसिघर्सीनां च सः षत्वमापद्यते । शिष्यते, उष्यते, जक्षतुः । अविकारस्य इत्यारम्भः ॥८४७।

### [दु० टी०]

शासि० । 'आङः शासु इच्छायाम्' (२।४६) इत्यस्यापि क्विपीत्वं ज्ञापितमेव । तेन 'आशिषौ, आशिषः' इति । वसेः सम्प्रसारणे घसेरुपधालोपेऽघोषे प्रथमे सति निमित्तमित्याह- शिष्यते इत्यादि । कथं 'मित्रं शास्ति' इति **मित्रशीः,** शासेर्निमित्तत्वात् षत्वे कृते डत्वं प्रसज्येत ? सत्यम्, 'सजुषाशिषो रः" (२।३।५१) इत्यत्राशीर्ग्रहणस्योपलक्षणत्वाद् **भाष्यसम्मतमेतत् । सूत्रकारमतं** तु क्विबेवात्र न दृश्यते, **वाक्यकारसम्मतमेतत्** ॥८४७।

### [वि० प०]

शासि० । "**शासेरिदुपधायाः**" (३।४।४८) इतीत्त्वे कृते यजादित्वात् सम्प्रसारणे "**वा परोक्षायाम्**" (३।४।८०) इत्यदेर्घस्त्व आदेशे, "**गमहन०**" (३।६।४३) इत्यादिनोपधालोपे, अघोषे प्रथमे चेति निमित्तात् परः सकार इति षत्वम् ॥८४७।

## [समीक्षा]

'शिष्यते, उष्यते, जक्षतुः' इत्यादि शब्दरूपों के सिद्ध्यर्थ सकार को षकारादेश का विधान दोनों व्याकरणों में किया गया है। पाणिनि का सूत्र है – "शासिवसिघसीनां च" (अ०८।३।६०)। यहाँ शब्दावली तथा उदाहरण आदि में समानता ही दृष्ट होती है।

## [विशेष वचन]

१. अविकारस्थ इत्यारम्भः (दु० वृ०)।

२. "सजुषाशिषो रः" (२।३।५१) इत्यत्राशीर्ग्रहणस्योपलक्षणत्वाद् भाष्यसम्मतमेतत्। सूत्रकारमतं तु क्विबेवात्र न दृश्यते वाक्यकारसम्मतमेतत् (दु० टी०)।

## [रूपसिद्धि]

१. **शिष्यते**। शास् + यण् + ते। 'शासु अनुशिष्टौ' (२।३९) धातु से वर्तमाना-विभक्तिसंज्ञक आत्मनेपद– प्र० पु० - ए० व० 'ते' प्रत्यय, "सार्वधातुके यण्" (३।२।३९) से यण् प्रत्यय, "शासेरिदुपधाया अण्व्यञ्जनयोः" (३।४।४८) से शास्धातुघटित आकार को इकारादेश तथा प्रकृत सूत्र द्वारा सकार को षकारादेश।

२. **उष्यते**। वस् + यण् + ते। 'वस निवासे' (१।६१४) धातु से भाव अर्थ में वर्तमानासंज्ञक 'ते' प्रत्यय, यण् प्रत्यय, "स्वपिवचियजादीनां यण्परोक्षाशीःषु" (३।४।३) से वकार को सम्प्रसारण उकार तथा प्रकृत सूत्र से सकार को षकारादेश।

३. **जक्षतुः**। अद् + परोक्षा- अतुस्। 'अद भक्षणे' (२।१) धातु से परोक्षसंज्ञक परस्मैपद प्र० पु० - द्विव० 'अतुस्' प्रत्यय, "वा परोक्षायाम्" (३।४।८०) से 'अद्' को 'घस्लृ' आदेश, "चण्परोक्षाचेक्रीयितसनन्तेषु" (३।३।७) से 'घस्' को द्वित्व, पूर्ववर्ती 'घस्' की अभ्याससंज्ञा, "अभ्यासस्यादिर्व्यञ्जनमवशेष्यम्" (३।३।९) से सकार का लोप, "द्वितीय-चतुर्थयोः प्रथमतृतीयौ" (३।३।११) से घकार को गकार, "कवर्गस्य चवर्गः" (३।३।१३) से गकार को जकार, "गमहनजनखनघसामुपधाया स्वरादावनण्यगुणे" (३।६।४३) से 'घस्' की उपधा अकार का लोप, "अघोषेष्वशिटां प्रथमः" (३।८।९) से घकार को ककार, प्रकृत सूत्र से सकार को षकार तथा 'क्-ष्' के संयोग से 'क्ष्' वर्ण की निष्पत्ति ॥८४७॥

# ८४८. स्तौतीनन्तयोरेव षणि [३।८।२८]

## [सूत्रार्थ]

नामिसंज्ञक वर्ण, ककार तथा रेफ के परे 'स्तु' एवं इनन्त धातुओं में विद्यमान सकार को षकारादेश होता है यदि उससे सन् प्रत्ययस्थ सकार के स्थान में प्रवृत्त षकार उपस्थित हो तो ॥८४८॥

## [दु० वृ०]

निमित्तात् परः प्रत्ययविकारागमस्थः स्तौतीनन्तयोरेव षत्वभूते सनि सः षत्वमापद्यते। तुष्टूषति, सिषेधयिषति, सुष्वापयिषति। स्तौतीनन्तयोरेवेति किम् ? सिसिक्षति, सुसूषति।

षत्वभूत इति किम् ? तिष्ठासति, सुषुप्सति । कथं सोषुपिषते ? चेक्रीयिते षत्वं पश्चात् सन । अर्थान् प्रतीषिषति इति सनोऽवयवस्यानभ्यासस्थान्निमित्तात् षत्वं स्यादेव । स्विदिस्वदिसहीनामिनन्तानां नेष्यते – सिस्वेदयिषति, सिस्वादयिषति, सिसाहयिषति। तेनैवापिशब्देनान्यदपि व्यभिचार्य्यते । तथा सिचश्चेक्रीयिते न स्यात् – सेसिच्यते । सुनोतेः स्ये–अभिसोष्यते । सेधतेर्गतौ – अभिसेधयति गाम् । गमयतीत्यर्थः । एवमन्येऽप्यनुसर्तव्याः ॥८४८।

## [दु० टी०]

स्तौतिं०। षत्वं भूतमस्येत **षत्वभूतः । भावप्रत्ययस्तत्र सुखसमासप्रतिपत्त्यर्थः ।** सनि षभूत इत्युक्ते षो भूतः षभूतः इति गमकत्वान्निष्ठान्तः कर्मधारयस्तदा षकार एव व्यपदिश्यते न समुदाय इति । **'ष्टुञ् स्तुतौ, सिचिर् क्षरणे, ञि ष्वप शये'** (२।६५; ५।११; २।३२), विकारस्थत्वात् षत्वं सिद्धं शक्यते नियमान्तरेणैवकारो द्योतयितुम्, किन्तु स्तौतीनन्तयोः षण्येवेत्यपि स्यात् । ततश्च 'तुष्टाव, असूषुपत्' इत्यत्र न स्यात् सिसिक्षति, सुसूषतीत्यत्र तु स्यात्, तस्मान्नियम– विशेषप्रतिपत्त्यर्थ एवकार इति । विकृतनिर्देशादविकृते सनि नास्ति नियम इत्याह– षत्वभूत इत्यादि । सुषुप्सतीति । **''ग्रहिस्वपिप्रच्छां सनि''** (३।४।९) इति सम्प्रसारणम् । कथमित्यादि । स्वपेश्चेक्रीयिते कृते बहिरङ्गलक्षणः सन् अन्तरङ्गलक्षणं द्विर्वचनं तदाश्रयमपि षत्व**मन्तरङ्गलक्षणमि**त्यर्थः।

न च षणीति विषयसप्तमी किन्तर्हि परसप्तमी ? अर्थान् इत्यादि । प्रतिपूर्व **'इण् गतौ'** (२।१३) सन्, **''स्वरादेर्द्वितीयस्य''** (३।३।२) इति द्विर्वचनम्, **''सन्यवर्णस्य''** (३।३।२६) इतीत्त्वम्, ततश्च निमित्तात् षत्वम्, ततः स्तौतीनन्तयोरेव षणीति नियमात् सनो द्विर्वचनस्य षत्वं न प्राप्नोति तस्मादभ्यासस्येति वक्तव्यम् । तेन धातोः परस्य सकारस्य षत्वं स्यादेव, तन्न वाच्यम्, स्तौतीनन्तौ हि धातु, तत्प्रकारा धातव एव नियमेन व्यावर्त्यन्ते, सन एव हि द्विर्वचनात् सनोऽवयव इत्याह– सनोऽवयवस्यानभ्यासस्थान्निमित्तात् षत्वं स्यादेवेति । अथवा षणीत्यर्थवतो ग्रहणमि**हाचार्यस्या**पौनरुक्त्यात् समुदाय एवार्थवान् नावयवः, तस्मात् सिषशब्दोऽर्थवान् न षणिति । अथवा निमित्तं कार्यित्वेनाश्रीयते कथं तर्हि सन्यवर्णस्येतीत्त्वम् ? सत्यम्, सनि परे योऽभ्यास इति तत्रोक्तमेव । **अन्य** आह– एतन्निमित्तात् सनः कृतषत्वस्यैव द्विर्वचनम् । तदसत्, प्रकृत्याश्रितत्वात् द्विर्वचनमेवान्तरङ्गं नित्यं च द्विर्वचने कृते पुनः षत्वमनित्यं शब्दान्तराश्रयत्वात् तथाभ्यासान्तरस्य षत्वमुच्यते अभिषिषिक्षतीत्यादिषु । **तिबन्तग्रहणं स्पष्टार्थमेव** तथा सनोऽनुबन्धोऽपि । **अन्य** आह – अकार उच्चारणार्थोऽपि सम्भाव्येत-व्यतिसुषुपिषे (व्यतिसुषुवे) । सन्जेरिनन्तस्य वे**त्येके**– सिषञ्जयिषति. सिसञ्जयिषति ॥८४८।

## [वि० प०]

स्तौतीनन्त० । **षत्वभूत** इति षत्वं भूतमस्य, षत्वं भूतः प्राप्तः इति वा विग्रहः। सुष्वापयिषतीति । **''द्युतिस्वाप्योरभ्यासस्य''** (३।४।१६) सम्प्रसारणम् । अषत्वभूते सनि नायं नियम इति षत्वं स्यादेवेत्याह– षत्वेत्यादि । **''ग्रहिस्वपिप्रच्छां सनि''** (३।४।९)

इति स्वपेः सम्प्रसारणम्। कथमित्यादि। **''स्वपिस्यमिव्येञां चेक्रीयिते''** (३।४।७) इति सम्प्रसारणम्। अस्य च लोपे **''यस्याननि''** (३।६।४८) इति यलोपः। अर्थानित्यादि। प्रतिपूर्वः **'अट पट कट किट इट इ गतौ'** (१।१०२), **''स्वरादेर्द्वितीयस्य''** (३।३।२) इति सनो द्विर्वचनम्, **''सन्यवर्णस्य''** (३।३।२६) इर्तीत्त्वम्, निमित्तात् सनः षत्वम्। नियमबलादभ्याससकारस्यानभ्यासस्थान्निमित्तादिकारान्न प्राप्नोतीति कथमुक्तं षत्वं स्यादेवेति? सत्यम्। स्तौतीनन्तौ हि धातू, ततो धातव एव नियमेन व्यावर्त्यन्ते सादृश्यात्। अत्र तु सन एव द्विरुक्तत्वात् तदवयवस्य षत्वं भवतीत्यदोषः ॥८४८।

## [समीक्षा]

'तुष्टूषति, सुष्वापयिषति, सिषेधयिषति' इत्यादि शब्दरूपों के सिद्ध्यर्थ धातुगत सकार को षकारादेश दोनों व्याकरणों में किया गया है। पाणिनि का सूत्र है – ''स्तौतिण्योरेव षण्यभ्यासात्'' (अ० ८।३।६१)। पाणिनीय 'णिच्' प्रत्यय के लिए कातन्त्रकार ने 'इन्' प्रत्यय किया है – ''इन् कारितं धात्वर्थे, धातोश्च हेतौ, चुरादेश्च'' (अ० ३।२।९-११)। तदनुसार ही दोनों व्याकरणों में शब्दों का प्रयोग हुआ है।

## [विशेष वचन]

१. तेनैवापिशब्देनान्यदपि व्यभिचार्यते (दु० वृ०)।
२. एवमन्येऽप्यनुसर्तव्याः (दु० वृ०)।
३. भावप्रत्ययस्तत्र सुखसमासप्रतिपत्त्यर्थः (दु० टी०)।
४. नियमविशेषप्रतिपत्त्यर्थः एवकारः (दु० टी०)।
५. अन्तरङ्गलक्षणं द्विर्वचनं तदाश्रयमपि षत्वमन्तरङ्गलक्षणम् (दु० टी०)।
६. स्तौतीनन्तौ हि धातू, तत्प्रकारा धातव एव नियमेन व्यावर्त्यन्ते (दु० टी०; वि०प०)।
७. समुदाय एवार्थवान्, नावयवः (दु० टी०)।
८. तिबन्तग्रहणं स्पष्टार्थमेव (दु० टी०)।
९. अकार उच्चारणार्थोऽपि सम्भाव्येत (दु० टी०)।

## [रूपसिद्धि]

१. **तुष्टूषति।** स्तु + सन् + अन् + ति। 'ष्टुञ् स्तुतौ' (२।६५) धातु से सन् प्रत्यय, द्विर्वचनादि, दीर्घ, प्रकृत सूत्र द्वारा सकार को षकार, धातुसंज्ञा, 'ति' प्रत्यय, अन् विकरण तथा अकारलोप।

२. **सिषेधयिषति।** सिध् + इन् + सन् + अन् + ति। 'षिधु गत्याम्, षिधु संराद्धौ' (१।८; ३।३३) धातु से हेत्वर्थ में इन्, धातुगत उपधा को गुण, सन् प्रत्यय, द्विर्वचनादि, इडागम, गुण, अयादेश, प्रकृत सूत्र से सकार को षकार, धातुसंज्ञा तथा विभक्तिकार्य।

३. **सुष्वापयिषति।** स्वप् + इन् + सन् + अन् + ति। 'ञि ष्वप शये' (२।३२) धातु से इन् प्रत्यय, उपधादीर्घ, सन् प्रत्यय, द्विर्वचनादि, इडागम, गुण, अयादेश, धातुसंज्ञा तथा विभक्तिकार्य ॥८४८।

## ८४९. लुग्लोपे न प्रत्ययकृतम् [३।८।२९]

### [सूत्रार्थ]

'लुक्' शब्द का नाम लेकर जिसका लोप किया गया हो, उस प्रत्यय के परे रहते प्रकृति को निर्दिष्ट कार्य नहीं होता है ॥८४९।

### [दु० वृ०]

लुका लोपे सति प्रत्यये परे प्रकृतेर्यत् कार्यं तन्न भवति । लुका लोपो यस्येति विग्रहः । अङ्गाः, वङ्गाः, कलिङ्गाः, पञ्च, कति, दुग्धे, स्तुते । विकरणस्य लुकि न गुणः, लुकीति न कृतम्, लुग्लोपयोर्विशेषप्रतिपत्त्यर्थम् । तेन प्रत्ययलोपे प्रत्ययलक्षणमवधार्यते–अभित्त, अच्छित्त । प्रत्ययकृतमिति किम् ? परस्यान उस्-उदगुः, अदुः । कतीह पञ्चात्र । सन्धिः स्यादेव ॥८४९।

### [वि० प०]

लुक्० । अङ्गा इत्यादि । **"वृद्धिरादौ सणे, घुटि चासम्बुद्धौ, इरेदु-रोज्जसि, अनि च विकरणे नामिनश्चोपधायाः लघोः"** (२।६।४९; २।१७; १।५५; ३।५।३, २) इत्येतैरणादिषु प्रत्ययेषु वृद्ध्यादिकं यत्कृतं तदणादिलुकि **'निमित्ताभावे नैमित्तिकस्याप्यभावः'** (का० परि० २७) इत्यनेन निवृत्तम्, पुनः प्रत्ययलोपलक्षणन्यायेन वृद्ध्यादिक प्राप्तमनेन निषिद्धम् । अभित्त, अच्छित्तेति । **"धुटश्च धुटि"** (३।६।५१) इति सिचो लोपः । **"सिजाशिषोश्चात्मने"** (३।५।१०) इति पुनर्गुणनिषेधः । अन्यथा लुकीति कृतेऽदर्शनमात्रं मन्यमानः सिचो लोपोऽपि न प्रत्ययकृतमिति मन्यते इति भावः । प्रत्यय इत्यादि । प्रत्यये कृतं **प्रत्ययकृतम्** इति सप्तमीसमासात् प्रकृतेः प्रत्यये यत् कृतं कार्यम्, तन्न भवति प्रत्ययात् परस्य प्रत्ययस्य यत् कृतम्, तद् भवत्येव । यथा **"इण्स्थादा०"** (३।४।९३) इत्यादिना सिचो लुक्यपि **"अन उस् सिजभ्यस्त०"** (३।४।३१) इत्यादिना उस्, तथा प्रत्यये परे प्रकृतेर्यत् कार्यं कृतम्, तन्न भवति, तदपि परपदे भवतीति दर्शयति–कतीह पञ्चात्रेति ॥८४९।

### [समीक्षा]

'अङ्गाः, वङ्गाः, पञ्च, दुग्धे' आदि के सिद्ध्यर्थ प्रत्यय का लुक् हो जाने पर प्रत्ययलक्षणकार्य का दोनों ही व्याकरणों में निषेध किया गया है । पाणिनि का सूत्र है – "न लुमताङ्गस्य" (अ० १।१।६३) । पाणिनि ने 'लुक्-श्लु-लुप्' इन तीनों का विधान किया है, अतः इन तीनों के ग्रहणार्थ 'लुमत्' शब्द का निर्देश है । इससे तीनों का ग्रहण हो जाता है। इसके विपरीत कातन्त्र व्याकरण में लुक् का ही विधान होने से प्रकृत सूत्र में केवल उसी का उल्लेख किया गया है ।

### [विशेष वचन]

१. विकरणस्य लुकि न गुणः । लुकीति न कृतम्, लुग्लोपयोर्विशेषप्रतिपत्त्यर्थम् तेन प्रत्ययलोपे प्रत्ययलक्षणमवधार्यते (दु० वृ०) ।

२. कतीह, पञ्चात्र । सन्धिः स्यादेव (दु० वृ०) ।

३. अन्यथा लुकीति कृतेऽदर्शनमात्रं मन्यमानः सिचो लोपोऽपि न प्रत्ययकृतमिति मन्यते (वि० प०)।

## [रूपसिद्धि]

१. **अङ्गाः** । अङ्ग + अण् - लुक् । अङ्गस्यापत्यानि । 'अङ्ग' शब्द से "वाऽणपत्ये" (२।५।१) सूत्र द्वारा 'अण्' प्रत्यय, "रूढानां बहुत्वेऽस्त्रियामपत्य-प्रत्ययस्य" (२।४।५) से उसका लुक् तथा प्रकृत सूत्र द्वारा प्रत्ययलक्षण का अभाव । इससे "स्वरादीनां वृद्धिरादेः" (३।८।१७) से आदिवृद्धि नहीं होती है ।

२-३. **वङ्गाः** । वङ्गस्यापत्यानि । **कलिङ्गाः** । कलिङ्गस्यापत्यानि । 'अङ्ग-वङ्ग' शब्दों से अण् प्रत्यय का लुक् तथा प्रत्ययलक्षण का अभाव ।

४. **पञ्च** । पञ्चन् + जस्, शस् । "संख्यायाः ष्णान्तायाः" (२।१।७५) से जस्-शस् प्रत्ययों का लुक् तथा प्रकृत सूत्र से प्रत्ययलक्षण का अभाव ।

५. **कति** । कति + जस्, शस् । "कतेश्च जस्शसोर्लुक्" (२।१।७६) से जस्-शस् प्रत्ययों का लुक् तथा प्रत्ययलक्षण का अभाव ।

६. **दुग्धे** । दुह् + अन्लुक् + ते । 'दुह प्रपूरणे' (२।६१) धातु से वर्तमानासंज्ञक प्र० पु०-ए० व० 'ते' प्रत्यय, अन्किरण, उसका लुक्, प्रत्ययलक्षण के निषेध से गुणाभाव, "दादेर्घः" (३।६।५७) से हकार को घकार, "घढधभेभ्यस्तथोर्धोऽधः" (३।८।३) से तकार को धकार तथा "धुटां तृतीयश्चतुर्थेषु" (३।८।८) से घकार को गकारादेश ।

७. **स्तुते** । स्तु + अन्लुक् + ते । 'ष्टुञ् स्तुतौ' (२।६५) धातु से वर्तमानासंज्ञक आत्मनेपद-प्र० पु०-ए० व० 'ते' प्रत्यय, अन् विकरण, उसका लुक् तथा प्रत्ययलक्षण के अभाव से गुणनिषेध ॥८४९।

# ८५०. स्वरविधिः स्वरे द्विर्वचननिमित्ते कृते द्विर्वचने [३।८।३०]

## [सूत्रार्थ]

द्विर्वचननिमित्तक स्वरादिप्रत्यय के परे रहते प्रकृति से पूर्व अथवा पश्चात् द्विर्वचन करने पर परवर्ती स्वर के स्थान में कार्य होता है ॥८५०।

## [दु० वृ०]

द्विर्वचननिमित्ते स्वरादौ प्रत्यये परे प्रकृतेः पूर्वस्मिन् परस्मिन् वा द्विर्वचने कृते पश्चात् स्वरस्य स्थाने विधिर्भवति । पपतुः, आटिटत्, जग्मतुः, इयाय, निनाय, लुलाव, निनयिथ, लुलविथ, निन्यतुः, चक्रतुः । स्वरविधिरिति किम् ? असूषुपत् । सपरस्वरायाः सम्प्रसारणे कृते पश्चाद् द्विर्वचनम् । स्वर इति किम् ? जेघ्रीयते । द्विर्वचननिमित्त इति किम् ? दुद्यूषति । येन विना यत्र भवति तत् तस्य निमित्तम् । इह पुनरिटो विधिना सनि द्विर्वचनम्, तेनारिरिषतीति सिद्धम् । कथम् इयेष, उवोष ? न स्थानिवत्त्वम्, असवर्ण इति वचनात् ॥८५०।

## [दु० टी०]

स्वर० । द्विर्वचननिमित्तस्यावयवस्वरेऽपि द्विर्वचननिमित्तमिहोच्यते, मुख्येऽपि सति

चणादाववयवार्थकत्वाच्च समुदायस्येति । वर्णग्रहणे तदादौ कार्यसम्प्रत्यय इति परिभाषामाश्रयत्यन्य इत्याह – स्वरादावित्यादि । पूर्वस्मिन् परस्मिन्निति प्रक्रियामपेक्ष्योच्यते द्वे आवृत्ती भवतः इति नात्र नियमः, परस्मिन् देशे एवेति । द्विःप्रयोगो **द्विरुच्चारणं** परस्मिन् प्रयोगोऽस्तीति अतिनैकट्यात् । प्रायेण तु प्रक्रियायां पूर्वस्मिन् द्विर्वचनं कुरुते प्रसिद्धिवशाच्च प्रागुपन्यस्तमिति स्वरस्थाने विधिरिति किमर्थमुक्तं स्यात् । विधीयते इति **विधिः,** कर्मसाधनोऽयं न भावसाधनः । विधानं **विधि**रिति स्वरो विधातव्य इत्यर्थे वृद्धिसम्प्रसारणान्येव च स्युः । पपतुरिति । पश्चाद् आलोपोऽसार्वधातुके भवति । आटिटदिति। पश्चात् कारितलोपः, तथा जग्मतुरित्युपधालोपः । अन्यथा नित्यत्वादन्तरङ्गत्वाच्च **स्वरविधिरेव** स्यात् । न चात्र स्थानिवद्भावोऽस्ति तस्य द्विर्वचनं प्रति प्रतिषेधात् । इयायेति द्विर्वचने कृते पश्चाद् वृद्धौ कृतायाम् **''अभ्यासस्यासवर्णे''** (३।४।५६) इतीयादेशो भवति । एवं निनायेति पश्चाद् वृद्ध्यावादेशौ । निन्यतुरिति । प्रागिरादेशः प्राप्नोति एकाक्षरत्वात् । दुद्यूषतीति । **''च्छ्वोः शूटौ पञ्चमे च''** (४।१।५६) इत्यूडादेशे सति प्राक् षत्वं स्यादेवेत्यर्थः । येनेत्यादि। कार्यमपि निमित्तं भवति, यथा बीजमङ्कुरस्य, यद्यप्यन्यस्मात् कारणाज्जायते, तथापि बीजमिह निमित्तम् । इह त्विटो विधिना सनि द्विर्वचनमिति विधिना सूत्रेण सनन्त विषये द्विर्वचनं **''स्वरादेर्द्वितीयस्य''** (३।३।२) इति, न चात्र द्विर्वचने 'जग्मिव' इतिवद् इटो निमित्तत्वम् । कथमिति । इषेरुषेश्च कृते द्विर्वचने पश्चाद् गुणस्ततश्च स्वरादेश इत्यादिना न सवर्णत्वादियादेशः। **परिहार**माह – असवर्ण इति वचनात्, अन्यथा ह्यभ्यासस्यासवर्ण इत्यत्रासवर्णग्रहणमनर्थकं स्यात् । **केचिद्** इह कृतग्रहणं न पठन्ति, लुग्लोपे न प्रत्ययकृतमित्यतो नञमनुवर्तयन्ति । द्विर्वचननिमित्तस्वरे द्विर्वचने कर्तव्ये स्वरविधिर्न स्यात्, कृते द्विर्वचने पश्चाद् भवतीत्यर्थः,एतच्च द्विर्वचनग्रहणसामर्थ्यादिति ॥८५०।

## [वि० प०]

स्वरविधिः । द्विर्वचनं द्विःप्रयोगो द्विरुच्चारणमित्यर्थः । नात्र नियमः परस्मिन्नेव देशे तद् भवतीत्याह – पूर्वस्मिन्निति । अत्रापि नियमो नास्तीत्याह– परस्मिन्निति । यद्यपि परस्मिन् प्रत्ययोऽस्तीति नैकट्यात् परस्मिन्नेव द्विर्वचनं प्राप्नोति, तथापि प्रकृतीनां प्रायेण पूर्वस्मिन् द्विर्वचनं क्रियते, साध्यक्षतिः पुनरुभयथापि नास्तीति पूर्वस्मिन् परस्मिन् वा इत्युक्तम् । विधिशब्दः कर्मसाधनः, विधीयते इति **विधिः** कार्यम्, न पुनर्विधानं विधिरिति भावसाधनः, तदा स्वरस्येति कर्मणि षष्ठी, स्वरो विधातव्य इत्यर्थः स्यात् । एवं च सति स्वरविधिरिह वृद्ध्यादिकमेव स्यात्, न लोपादिकम्, तस्य विनाशरूपत्वादित्याह – स्वरस्य स्थाने विधिरिति । नित्यत्वादन्तरङ्गत्वाच्च **''आलोपोऽसार्वधातुके''** (३।४।२७) इत्यादिना स्वरस्य लोपे वृद्ध्यादौ कृते पपतुरित्यादयो न स्युरिति प्राग् द्विर्वचनारम्भः ।

असूषुपदिति । **''स्वापेश्चिणि''** (३।४।८) इति सम्प्रसारणम्, न हि स्वरव्यञ्जनयोर्विधिः स्वरविधिरिति भवितुमर्हतीति । जेघ्रीयते इति । **''घ्राध्मोरी''** (३।४।७७) इतीत्त्वे पश्चाद् द्विर्वचनम् । दुद्यूषतीति । दिवः सन्, **''छ्वोः शूटौ पञ्चमे च''** (४।१।५६) इति वकारस्योट्, नासौ द्विर्वचननिमित्त इति । तस्मिन् प्राक् षत्वम्, ततो द्विर्वचनम् । येनेत्यादि।

यथा मेघमन्तरेणाभवन्त्यावृष्टेर्मेघो निमित्तम् । इह पुनरिटो विधिना सनि द्विर्वचनमिति सनन्तविषये **''स्वरादेर्द्वितीयस्य''** (३।३।२) इतीटो विधिनाऽधिकारसूत्रेण **''चण्परोक्षा-चेक्रीयित०''** (३।३।७) इत्यादिना द्विर्वचनम्, अतः कार्यित्वमिटो निमित्तमिति पूर्वं स्वरादेशो गुणः, पश्चाद् रेफसहितस्येटो द्विर्वचनमिति भावः । ननु यथा बीजस्याङ्कुरोत्पत्तौ कार्यिणोऽपि निमित्तत्वम्, तेन बीजेन विना तस्याङ्कुरस्याभावात् तथेटोऽपि स्यात् । ततो यथा प्रोर्णुनविषतीत्यत्र सन्भक्तत्वादिटो द्विर्वचने निमित्ते कृते द्विर्वचने पश्चाद् गुणः स्वरविधिः । एवमर्तेरपि **''स्मिङ्पूङ्०''** (३।७।११) इत्यदिना कृतस्येटः **''स्वरादेर्द्वितीयस्य''** (३।३।२) इति द्विर्वचने पश्चाद् गुणः । स्वरविधिरिति । अरीषर्तीति भवितव्यम्, कथम् अरिरिषतीति । तदयुक्तम्, न रवल्वत्र शास्त्रे कार्यिणो निमित्तत्वमाश्रीयते, सर्वत्र तद्भावस्य भेदेनैवाभिधानात्, यथा कार्यिनिमित्तं कार्यमिति यदि च कार्यिणो निर्देशक्रमः इति निमित्तत्वमाश्रीयते, तदा कथमेतीत्यत्र गुणः स्यात्, **'इण् गतौ'** (२।१३) इत्यस्य णानुबन्धत्वात्? तस्मान्न शास्त्रे कार्यिणो निमित्तत्वमाश्रीयते । अत एव तत्र णानुबन्धप्रत्यय एवेति निश्चितम्। कथमित्यादि। **'इषु इच्छायाम्, उष दाहे'** (५।७०; १।२२९) द्विर्वचने कृते पश्चाद् उपधालक्षणो गुणः स्वरविधिस्ततश्च **'स्वरादेशः परनिमित्तकः पूर्वविधिं प्रति स्थानिवत्'** (का० परि० ९) इति इकारोकारयोः स्थानिवत्त्वात् सवर्णत्वाद् **''अभ्यासस्यासवर्णे''** (३।४।५६) इति इयुवौ न स्याताम् इति **पूर्वपक्षार्थः । परिहारमाह**– नेत्यादि । अन्यथाऽत्रासवर्ण-ग्रहणमनर्थकमेव स्यात् । कथमनर्थकम् **''अर्त्तिपिपर्त्योश्च''** (३।३।२५) इतीत्त्वे कृते 'इयृयात्, इयृयाताम्' इत्यादौ सार्वधातुकत्वात् ? सत्यम्, उवादेशं प्रत्यनर्थकमेवासवर्णग्रहणम् एकवाक्यनिर्दिष्टत्वाद् इयादेशं प्रत्यपि स्थानिवद्भावस्य **ज्ञापकं** भवतीत्यदोषः ॥८५०।

## [बि० टी०]

स्वरविधिः । स्वरविधिरिति किमिति **वृत्तिः** । स्वरस्य स्थाने विधिरिति किमित्यर्थः। ननु सम्प्रसारणमपि स्वरस्य स्थाने, तथा च **''सपरस्वरायाः''** (३।४।१) इति सम्प्रसारणम्। यद्यपि अन्तस्थाया इत्युक्तमस्ति, तेन नियमस्तु न शक्यते । तथाहि **''नाम्यन्तयोर्धातुविकरणयोः''** (३।५।१) इत्यत्र गुणप्रसङ्गे अरः एकदेशेन रेफेणान्तरतम्याद् ऋकारस्य स्थानित्वं प्रतिपादितं मूर्धन्यत्वादिति स्वरमात्रस्थानित्वे वा किं प्रमाणम् ? सत्यम्, स्वरमात्रस्थानी विधिर्गृह्यते, अन्यथा **''द्वयमभ्यस्तम्''** (३।३।५) इत्यत्र द्वयंग्रहणम् **''अभ्यस्तस्य च''** (३।४।१५) इत्यत्राभ्यस्तनिमित्तमुपचारार्थमिति विवृतम् । तत्र यदि सम्प्रसारणस्य स्वरविधित्वेनोपादेयता एकदेशस्य स्यात्, तदा द्विर्वचने सत्येव सम्प्रसारणात् कुत उपचारस्य फलमास्थेयम् । अथ स्वरस्य स्थाने विधिरित्यनेन स्वरस्य कार्यित्वं यत्र तदादेश एव गृह्यते, तत्र पुनरन्तस्थायाः कार्यित्वं चेत्, नैवम् । **''सपरस्वरायाः''** (३।४।१) इत्यत्र सहग्रहणात् स्वरस्य कार्यित्वम् प्रतिपादितं **टीकाकृता,** तस्मादुक्त एव **सिद्धान्तः** ॥८५०।

## [समीक्षा]

'पपतुः, पपुः, जग्मतुः, निनाय, चक्रतुः' इत्यादि शब्दरूपों के सिद्ध्यर्थ आकारलोप-द्विर्वचनादि की आवश्यकता होती है । इसका निर्वाह दोनों व्याकरणों में किया गया है।

अन्तर यह है कि पाणिनीय प्रक्रिया के अनुसार आकारलोपादि कार्य पहले प्रवृत्त हो जाते हैं, इसके बाद द्वित्वविधानार्थ उन कार्यों का स्थानिवद्भाव किया जाता है। उनका सूत्र है – "द्विर्वचनेऽचि" (अ० १।१।५९)। जब कि कातन्त्रकार द्विर्वचन के बाद आकारलोपादि का नियम बनाते हैं। वस्तुतः कातन्त्रकार की ही प्रक्रिया यहाँ प्रशस्त प्रतीत होती है।

**[विशेष वचन]**

१. येन विना यन्न भवति तत् तस्य निमित्तम् (दु० वृ०)।
२. द्विर्वचननिमित्तस्थावयवस्वरोऽपि द्विर्वचननिमित्तमिहोच्यते (दु० टी०)
३. विधीयते इति विधिः, कर्मसाधनोऽयं न भावसाधनः (दु० टी०)।
४. केचिदिह कृतग्रहणं न पठन्ति, लुग्लोपे न प्रत्ययकृतमित्यतो नञ्रम् अनुवर्तिष्यते (दु० टी०)।
५. द्विर्वचनं द्विः प्रयोगो द्विरुच्चारणमित्यर्थः (वि० प०)।
६. विधिशब्दः कर्मसाधनः, विधीयते इति विधिः कार्यम्, न पुनर्विधानं विधिरिति भावसाधनः (वि० प०)।
७. तस्मान्न शास्त्रे कार्यिणो निमित्तत्वमाश्रीयते (वि० प०)।
८. उवादेशं प्रत्यनर्थकमेवासवर्णग्रहणम्, एकवाक्यनिर्दिष्टत्वात् (वि० प०)।
९. सहग्रहणात् स्वरस्य कार्यित्वं प्रतिपादितं टीकाकृता, तस्मादुक्त एव सिद्धान्तः (बि० टी०)।

**[रूपसिद्धि]**

१. **पपतुः**। पा + परोक्षा - अतुस्। 'पा रक्षणे' (२।२१) धातु से परोक्षा-विभक्तिसंज्ञक परस्मैपद प्र० पु० - द्विव० 'अतुस्' प्रत्यय, "चण्परोक्षाचेक्रीयितसनन्तेषु" (३।३।७) से द्विर्वचन, अभ्याससंज्ञा, प्रकृत सूत्र के नियमानुसार द्विर्वचन के अनन्तर "आलोपोऽसार्वधातुके" (३।४।२७) से धातुगत आकार का लोप तथा "रसकारयोर्विसृष्टः" (३।८।२) से सकार को विसर्गादेश।

२. **आटिटत्**। अट् + इन् + चण् + अद्यतनी-दि। इनन्त 'अट गतौ' (१।१०२) धातु से अद्यतनी-प्र० पु०- ए० व० 'दि' प्रत्यय, आदिस्वरवृद्धि, चण् प्रत्यय, द्विर्वचनादि, प्रकृत सूत्र के नियमानुसार द्विर्वचन के बाद इन्-लोप, तथा दकार को तकारादेश।

३. **जग्मतुः**। गम् + परोक्षा-अतुस्। 'गम्ल्ृ गतौ' (१।२७९) धातु से परोक्षाविभक्ति-संज्ञक परस्मैपद-प्र० पु० - द्विव० 'अतुस्' प्रत्यय, द्विर्वचन, अभ्यासकार्य, प्रकृत सूत्र के नियमानुसार द्विर्वचन के पश्चात् "गमहनजनखनघसामुपधायाः स्वरादावनण्यगुणे" (३।६।४३) से धातु की उपधा अकार का लोप तथा सकार को विसर्गादेश।

४. **इयाय**। इण् + परोक्षा-अट्। 'इण् गतौ' (२।१३) धातु से परोक्षासंज्ञक 'अट्' प्रत्यय, द्विर्वचनादि, प्रकृत सूत्र के नियमानुसार द्विर्वचन के अनन्तर वृद्धि तथा आय् आदेश।

५. **निनाय** । नी + परोक्षा-अट् । 'णीञ् प्रापणे' (१।६००) धातु से परोक्षासंज्ञक अट् प्रत्यय, द्विर्वचनादि तथा आय् आदेश ।

६. **लुलाव** । लू + परोक्षा-अट् । 'लूञ् छेदने' (८।९) धातु से परोक्षासंज्ञक 'अट्' प्रत्यय, द्विर्वचनादि तथा आव् आदेश ।

७. **निनयिथ** । नी + परोक्षा-थल् । 'णीञ् प्रापणे' (१।६००) धातु से परोक्षासंज्ञक 'थल्' प्रत्यय, द्विर्वचनादि तथा अयादेश ।

८. **लुलविथ** । लू + परोक्षा - थल् । 'लूञ् छेदने' (८।९) धातु से परोक्षासंज्ञक 'थल्' प्रत्यय, द्विर्वचनादि तथा अवादेश ।

९. **निन्यतुः** । नी + परोक्षा-अतुस् । 'णीञ् प्रायणे' (१।६००) धातु से परोक्षासंज्ञक 'अतुस्' प्रत्यय, द्विर्वचनादि तथा यकारादेश ।

१०. **चक्रतुः** । कृ + परोक्षा-अतुस् । 'डु कृञ् करणे' (७।७) धातु से परोक्षासंज्ञक 'अतुस्' प्रत्यय, द्विर्वचनादि तथा ऋकार को रकारादेश ॥८५०।

## ८५१. योऽनुबन्ध्योऽप्रयोगी [३।८।३१]

### [सूत्रार्थ]

जो प्रत्यय आदि के साथ जोड़ा जाता है, उसे 'अनुबन्ध' कहते हैं । अनुबन्ध को अप्रयोगी माना जाता है । अर्थात् उसके स्थान में कोई कार्य नहीं होता है । उसे उच्चारण के लिए ही जोड़ा जाता है, जैसे 'गेंहूँ-चने' की सुरक्षा के लिए उनका आवरण होता है ॥८५१।

### [दु० वृ०]

अनुबध्यते इ**त्यनुबन्ध्यः** । अप्रयुक्तिर**प्रयोगः** । अनुबन्धो यः सोऽप्रयोगी अनुच्चारणीयो भवति । इङ् - अधीते । डु कृञ् - कुरुते । एवमन्येऽपि ॥८५१।

### [दु० टी०]

योऽनु० । अनुबध्यते इति कर्मणि घञ् । **अनुपूर्वो बन्धिर्विलोपने वर्तते** । यथा अग्नीषोमीयो गौरनुबध्यताम् इति । **अन्वर्थसंज्ञाविधानात् सिध्यति मन्दमतिबोधनार्थं परिभाष्यते** । ननु मत्वर्थीयेन बहुव्रीहिणा सिद्धम्, किमिना ? प्रयुज्यते इति **प्रयोगः** इति कर्मणि घञ्प्रत्ययेन वा? सत्यम्, तत्पुरुषादपि गमकत्वादिन्नभिधीयते इत्यदोषः **परमार्थतोऽनुबन्धाः कार्यार्थं शब्दव्यवहारिभिरुपादीयन्ते** इति मनसि कृत्वाह – ङानुबन्धत्वादात्मनेपदम्, ञनुबन्धत्वादुभयपदम् इति । **केचिद्** यद्ग्रहणं न पठन्ति । अप्रयोगी अनुबन्धसंज्ञो भवति । अनुबन्धप्रदेशाः – **"कर्तरि रुचादिङानुबन्ध्येभ्यः"** (३।२।४२) इत्येवमादयः ॥८५१।

### [वि० प०]

योऽनु० । अनुबध्यते इत्य**नुबन्धः**, कर्मणि घञ् । अनुपूर्वोऽयं बन्धिरिह विलोपने वर्तते । यथा गौरनुबध्यतामिति । एतेनान्वर्थबलादेवानुबन्धसंज्ञा सिद्धेति दर्शितम्, ततो नेतरेतराश्रयदोष इति । अप्रयोगोऽस्यास्तीतीन् । ननु न विद्यते प्रयोगो यस्येति सोऽप्रयोग

इति मत्वर्थीयेन विना बहुव्रीहिणैव सिध्यति किमिन् प्रत्ययेन ? सत्यम्, गमकत्वात् । कर्मधारयादपीन् प्रत्ययो यथाविधानं वेदितव्यमिति दर्शयति । तेनासंज्ञाभूतत्वात् कर्मधारयान्मत्वर्थीयो न भवति, तत्र बहुव्रीहिरेवेति । न च वक्तव्यं भवति – अन्वर्थसंज्ञाबलाा-देवाप्रयोगित्वं सिद्धम्, किमनेनेति । **मन्दमतिबोधनार्थ**त्वादिति ॥८५१।

## [समीक्षा]

प्रत्यय, आदेश, आगम आदि में कुछ विशेष प्रयोजनों से अनुबन्ध लगाने की शाब्दिक आचार्यों की परम्परा रही है । इन अनुबन्धों के प्रत्ययादिस्वरूप की रक्षा हेतु इन्हें लगाया जाता है, ठीक वैसे ही जैसे 'गेहूँ, चना' आदि धान्यकणों के रक्षार्थ उनके साथ एक-एक आवरण भी जुटा रहता है । अनुबन्धों की विशेषता यह है कि उच्चारण के बाद इनका ग्रहण नहीं होता, जिसके फलस्वरूप इनके स्थानों में कोई भी कार्य नहीं किया जाता है, परन्तु इन अनुबन्धों को निमित्त मानकर अनेक अभीष्ट कार्य सम्पन्न होते हैं । पाणिनीय व्याकरण में अनुबन्धों की इत् संज्ञा करके उनका लोप कर दिया जाता है । कातन्त्रव्याकरण में इसे अन्वर्थसंज्ञा के रूप में स्वीकार किया गया है । पाणिनि के इत्संज्ञाविधायक तथा लोपविधायक सूत्र इस प्रकार हैं – "उपदेशेऽजनुनासिक इत्, हलन्त्यम्, आदिर्ञिटुडवः, षः प्रत्ययस्य, चुटू, लशक्वतद्धिते, तस्य लोपः" (अ० १।३।२-३, ५-९) ।

## [विशेष वचन]

१. अन्वर्थसंज्ञाविधानात् सिध्यति मन्दमतिबोधनार्थं परिभाष्यते (दु० टी०) ।

२. केचिद् यद्ग्रहणं न पठन्ति । अप्रयोगी अनुबन्धसंज्ञो भवति (दु० टी०) ।

३. तेनसंज्ञाभूतत्वात् कर्मधारयान्मत्वर्थीयो न भवति, तत्र बहुव्रीहिरेवेति (वि० प०)।

## [रूपसिद्धि]

१. **अधीते** । अधि + इङ् + वर्तमाना-ते । 'अधि' उपसर्गपूर्वक 'इङ् अध्ययने' (२।५६) धातु से वर्तमानासंज्ञक आत्मनेपद प्र० पु० - ए० व० 'ते' प्रत्यय, आत्मनेपद का विधान "कर्तरि रुचादिङानुबन्धेभ्यः" (३।२।४२) के नियमानुसार प्रवृत्त होता है । अन् विकरण, उसका लुक्, तथा समानदीर्घ - इकारलोप ।

२. **कुरुते** । कृ + उ + वर्तमाना-ते । 'डु कृञ् करणे' (७।७) धातु से वर्तमानासंज्ञक 'ते' प्रत्यय, 'ञ्' अनुबन्ध के कारण यहाँ "इन्-ञ-यजादेरुभयम्" (३।२।४५) से उभयपद की प्रवृत्ति होती है । 'उ' विकरण, गुण तथा अकार को उकारादेश ॥८५१।

# ८५२. शिडिति शादयः [३।८।३२]

## [सूत्रार्थ]

'श्-ष्-स्-ह्' इन चार वर्णों की 'शिट्' संज्ञा होती है ॥८५२।

## [दु० वृ०]

शादयो वर्णा हपर्यन्ताः शिडिति संज्ञिताः । शिट्प्रदेशाः – **"शिट्परोऽघोषः"** (३।३।१०) इत्येवमादयः ॥८५२।

### [समीक्षा]

'श्-ष्-स्-ह्' इन चार वर्णों की कातन्त्रकार ने ऊष्मसंज्ञा की है – "शषसहा ऊष्माण:" (१।१।१५)। उन्हीं वर्णों का लाघव से बोध कराने के लिए पुन: इस 'शिट्' संज्ञा का विधान किया गया है। पूर्वाचार्य सर्वनाम के लिए इस संज्ञा का व्यवहार करते थे – "स्वाङ्गशिटामदन्तानाम्" (फिट्सूत्र २।६)। शिट् सर्वनाम (सि० कौ०)॥८५२।

## ८५३. सम्प्रसारणं य्वृतोऽन्तस्थानिमित्ता: [३।८।३३]

### [सूत्रार्थ]

अन्तस्थानिमित्तक 'इ-उ-ऋ' वर्णों की सम्प्रसारणसंज्ञा होती है ॥८५३।

### [दु० वृ०]

इश्च उश्च ऋच्चेति द्वन्द्व:। **तकार: सुखनिर्देशार्थ:**। अन्तस्थैव निमित्तम् उत्पत्तिर्येषां ते**ऽन्तस्थानिमित्ता** य्वृत: सम्प्रसारणमिति संज्ञिता:। सम्प्रसारणप्रदेशा: – **"सपरस्वराया: सम्प्रसारणमन्तस्थाया:"** (३।४।१) इत्येवमादय:। अन्तस्थानिमित्ता इति किम् ? स्थित: स्थितवान। **"तद् दीर्घमन्त्यम्"** (४।१।५२) न स्यात् ॥८५३।

### [दु० टी०]

सम्प्र०। अन्तस्थैव निमित्तमुत्पत्तिर्येषाम् इति। निमित्तं कारणं तच्च समवायिलक्षणमिहेति। यथा 'मृतपिण्डस्य घट:' इति। सम्प्रसार्यतेऽनेनेति सम्प्रसारणम् अवयवार्थो नास्ति। **पूर्वाचार्यसंज्ञेयम्** ॥८५३।

### [बि० टी०]

सम्प्रसारणम्०। दीर्घस्तावन्न गृह्यते **"तद् दीर्घमन्त्यम्"** (४।१।५२) इति ज्ञापकादित्याह– इश्च उश्च ऋच्चेति। अन्तस्थैव निमित्तमित्यनेन समवायलक्षण: सम्बन्ध: प्रतिपादित:। अधिकारसूत्रे तथा दर्शयन्नाह – सपरस्वराया इति ॥५८३।

**॥इत्याचार्यबिल्वेश्वरटीकायामाख्याते तृतीयाध्यायेऽष्टमो धुडादिपाद:॥**

●

### [समीक्षा]

यकार के स्थान में होने वाले इकार, वकार के स्थान में उकार तथा रकार के स्थान में ऋकार की सम्प्रसारणसंज्ञा पूर्वाचार्यों ने की थी। टीकाकार दुर्गसिंह ने कहा भी है – "पूर्वाचार्यसंज्ञेयम्"। काशकृत्स्नधातुव्याख्यान में यह संज्ञा उपलब्ध है – "यजां यवराणां य्वृत: सम्प्रसारणं कानुबन्धे" (सूत्र ९९)। गोपथब्राह्मण में एतदर्थ 'प्रसारण' शब्द का प्रयोग किया गया है – "को विकारी च्यवते प्रसारणमाप्नोति" (गो० ब्रा० १।१।२६)। अर्वाचीन जैनेन्द्र तथा मुग्धबोध व्याकरण में इस अर्थ में 'जि' संज्ञा स्वीकार की गई है– "इग्यणो जि:, यलोऽचेक् जि:" (जै० १।१।४५; मु०-सूत्र ५३६)। निरुक्त में यद्यपि साक्षात् इस शब्द का व्यवहार नहीं है, तथापि द्विप्रकृतिक धातुओं के प्रसङ्ग में भाष्यकार

दुर्गसिंह ने 'सम्प्रसारण' शब्द का उल्लेख करके निरुक्तकार की मान्यता को सूचित किया हो – "अतः परं सम्प्रसारणचिन्ता वर्तिष्यते, तदर्थमिदमारभ्यते – तद् यत्रेत्यादि" (नि० २।२।३-दु० भा०)।

'सम्प्रसार्यतेऽनेनेति सम्प्रसारणम्' इस व्युत्पत्ति के बल पर इस संज्ञा को अन्वर्थ माना जाता है, क्योंकि अर्धमात्रिक 'य्-व्-र्' के स्थान में एकमात्रिक 'इ-उ-ऋ' वर्णों के होने से उनका विस्तार सिद्ध है। महाभाष्यकार ने इसके व्यवहार में भाविपक्ष को स्वीकार किया है। जैसे कोई पुरुष तन्तुवाय-जुलाहे के पास जाकर कहता है कि इन सूत्रों से शाटी = साड़ी बुन दो। यहाँ यह विचारणीय हो जाता है कि यदि इसकी साड़ी यह संज्ञा है तो बुनने की कोई आवश्यकता नहीं और यदि बुना जाना है तो अभी उसे 'साड़ी' नाम से नहीं कह सकते हैं। इसका तात्पर्य यह है कि कहने वाले के अनुसार सूत्रों को इस प्रकार बुन देना है कि उसे साड़ी कहा जा सके – "यथा कश्चित् कश्चित् तन्तुवायमाह ---------- संज्ञा भविष्यति" (म० भा० १।१।४५)। सूत्र की व्याख्या वर्ण तथा वाक्य इन दोनों पक्षों में की जाती है। लकार के स्थान में ऌकार का कोई उदाहरण न होने से तीन वर्णों की ही सम्प्रसारण संज्ञा उचित कही जाऐगी, अतः पाणिनीय 'इक्-यण्' का उल्लेख समीचीन नहीं कहा जा सकता।

### [विशेष वचन]

१. तकारः सुखानिर्देशार्थः (दु० वृ०)।

२. सम्प्रसार्यतेऽनेनेति सम्प्रसारणमवयवार्थो नास्ति। पूर्वाचार्यसंज्ञेयम् ॥८५३॥

## ८५४. अर् पूर्वे द्वे सन्ध्यक्षरे च गुणः [३।८।३४]

### [सूत्रार्थ]

'अर्' तथा सन्ध्यक्षरसंज्ञक 'ए-ओ-ऐ-औ' इन चार वर्णों में से पूर्ववर्ती दो 'ए-ओ' वर्णों की वृद्धिसंज्ञा होती है ॥८५४॥

### [दु० वृ०]

अर् पूर्वे द्वे सन्ध्यक्षरे च 'गुणः' इति सञ्ज्ञिते। एकं पूर्वमैकारमपेक्ष्यापरं चौकारमपेक्ष्य इति। गुणप्रदेशाः - **"नाम्यन्तयोर्धातुविकरणयोर्गुणः"** (३।५।१) इत्येवमादयः ॥८५४॥

### [दु० टी०]

अर्०। एकमित्यादि। द्विवचनसन्निधानात् पूर्वशब्दद्वयम्। तच्च परापेक्षया भवतीति भावः। **द्विग्रहणं स्पष्टार्थम्**। किमियं सप्तमी। प्रथमा द्विवचनं वेति **बाला** विप्रतिपद्यन्ते ॥८५४॥

### [वि० प०]

अर्०। ननु पूर्वे द्वे सन्ध्यक्षरे चेत्युच्यमाने एकारैकारयोरेव कथं गुणसंज्ञा न स्यादित्याह – एकमित्यादि। द्विशब्दसन्निधानादिह पूर्वशब्दद्वयं वेदितव्यम्। अतो नोक्तदोषप्रसङ्ग इति, अत एव द्विग्रहणम्, अन्यथेयं सप्तमीत्यपि बालः संशयितो भवेदिति ॥८५४॥

## [समीक्षा]

'गुण' सञ्ज्ञा प्राय: सभी व्याकरणों में की गई है। अन्तर यह है कि पाणिनि आदि ने 'अ-ए-ओ' की गुणसंज्ञा की है, फलत: उन्हें रपरविधान भी करना पड़ता है। व्याकरण के अनुसार 'गुण-दोष' शब्दों की स्थिति अत्यन्त विलक्षण मानी जाती है, क्योंकि 'गुण' शब्द में गुण आदेश कभी नहीं होता, जब कि 'दोष' शब्द गुण आदेश होने पर ही निष्पन्न हो पाता है। जैसे कर्मों की गति विलक्षण होती है, वैसे ही इस स्थिति को भी विलक्षण माना गया है। 'गुण' शब्द के समान अवयव-अप्रधान आदि अनेक अर्थ किए जाते हैं, परन्तु संज्ञा के रूप में परिभाषित गुण का व्यवहार वृद्धिसंज्ञक आकारादि वर्णों की अपेक्षा अप्रधान अर्थ में किया गया है। जैसे ज्योतिषशास्त्र में संख्यासाम्य के आधार पर दशमी की दिक्संज्ञा तथा एकादशी की रुद्रसंज्ञा की जाती है, उसी प्रकार 'सत्त्व-रजस्- तमस्' इन तीन गुणों के आधार पर तीन वर्णों की गुणसञ्ज्ञा मानी जाती है।

यह संज्ञा 'तरिता, चेता, स्तोता' आदि में तद्भावित वर्णों की तथा 'पचन्ति, जयन्ति, अहं पचे' इत्यादि में अतद्भावित वर्णों की स्वीकार की जाती है। ओकार वर्ण का अतद्भावितपक्ष में कोई उदाहरण उपलब्ध नहीं होता है।

**प्राचीन आचार्यों द्वारा गुण संज्ञा का व्यवहार –**

**निरुक्त** शेव इति सुखनाम। शिष्यतेर्वकारो नामकरणोऽन्तस्थान्तरोपलिङ्गी। विभाषितगुण:। शितमित्यप्यस्य भवति (१०।२।९)।

**काशकृत्स्नधातुव्याख्यान** नामिनो गुण: सार्वधातुकार्धधातुकयो:। स्थूलदूरयुव-ह्रस्वक्षिप्रक्षुद्राणामन्त्यस्वरादेर्लोपो गुणश्च नामिनाम् (सू० २२, १३६)।

**ऋक्प्रातिशाख्य** गुणागमादेतनभावि चेतन (११।१०)।

**आपिशलि आचार्य का अभिमत** स्त:, सन्तीत्यादौ सकारमात्रस्य दर्शनात् 'स् भुवि' इत्येव धातु: पाठ्य:। अस्तीत्यादौ पिति सार्वधातुके अडागमो विधेय:। 'आस्ताम्, आसन्' इत्यादावाडागम: स्याद् इत्यापिशला मन्यन्ते। आगमौ गुणवृद्धी इति (प० म० १।३।२२)।

आपिशलिस्तु शब्विकरणे गुण इत्यभिधाय करोतेर्मिदेश्चेत्युक्तवान् (मा० धा० वृ०, पृ० ३५६-५७)।

**अर्वाचीन व्याकरणों में गुणसंज्ञा का व्यवहार–**

**जैनेन्द्र व्याकरण** अदेङेप् (१।१।१६)।

**हैमशब्दानुशासन** गुणोऽरेदोत् (३।३।२)।

**मुग्धबोधव्याकरण** इङोऽरलेङ् णु: (सूत्र ८)।

व्याकरणशास्त्र में 'दीधी-वेवी' धातुओं को तथा इडागम को गुणादेश नहीं होता – दीधीवेवीटाम् (अ० १।१।६), दीधीवेव्योश्च (३।५।१५)। इस आधार पर कहा जाता है कि कुछ व्यक्ति इसी प्रकार के संसार में देखे जाते हैं जिनमें गुण और वृद्धि कभी होती ही नहीं है –

**दीधीवेवीट्समः कश्चिद् गुणवृद्ध्योरभाजनम् ।**
**क्विप्प्रत्ययनिभः कश्चिद् यत्र सन्निहिते न ते ।।**

## [विशेष वचन]

१. एकं पूर्वमैकारमपेक्ष्यापरं चौकारमपेक्ष्य इति (दु० वृ०) ।
२. द्विग्रहणं स्पष्टार्थम् । किमियं सप्तमी प्रथमाद्विवचनं वेति बालाः विप्रतिपद्यन्ते (दु० टी०) ।
३. द्विशब्दसन्निधानादिह पूर्वशब्दद्वयं वेदितव्यम्, अतो नोक्तदोषप्रसङ्गः (वि० प०) ॥८५४।

# ८५५. आरुत्तरे च वृद्धिः [३।८।३५]

## [सूत्रार्थ]

'आर्' तथा सन्ध्यक्षरसंज्ञक 'ए-ऐ-ओ-औ' वर्णों में उत्तरवर्ती 'ऐ-औ' वर्णों की वृद्धिसंज्ञा होती है ॥८५५।

## [दु० वृ०]

आर् उत्तरे च द्वे सन्ध्यक्षरे वृद्धिरिति सञ्ज्ञिते । आर्, ऐ, औ । वृद्धिप्रदेशाः – **"वृद्धिरादौ सणे"** (२।६।४९) इत्येवमादयः ॥८५५।

**।। इति दौर्गसिंह्यां वृत्तावाख्याते तृतीयाध्यायेऽष्टमो धुडादिपादः समाप्तः ।।**

●

## [दु० टी०]

आर्० । इहापि पूर्ववद् व्याख्यानम् ॥८५५।

**।। इत्याचार्यदुर्गसिंहविरचितायां कातन्त्रवृत्तिटीकायामाख्याते तृतीयाध्यायेऽष्टमो धुडादिपादः समाप्तः ।।**

●

## [वि० प०]

आर्० । अत्रापि द्वे इत्यनुवर्तते । द्विवचनसन्निधानाच्चोत्तरपदद्वयं पूर्ववद् वेदितव्यम् ॥८५५।

**।। इत्याचार्यश्रीमत्त्रिलोचनदासकृतायां कातन्त्रवृत्तिपञ्जिकायामाख्यातेऽष्टमो धुडादिपादः समाप्तः ।।**

●

## [समीक्षा]

वृद्धिसंज्ञा प्रायः सभी व्याकरणों में की गई है । गुणसंज्ञा की तरह वृद्धिसंज्ञा के सञ्ज्ञियों में पाणिनि आदि आचार्य 'आर्' की जगह 'आ' का ही पाठ करते हैं, जिससे उन्हें सर्वत्र रपर का भी विधान करना पड़ता है – "उरण् रपरः" (अ० १।१।५१) । पाणिनि ने अष्टाध्यायी के प्रारम्भ में 'वृद्धि' शब्द से आदिमङ्गल, "भूवादयो धातवः"

(अ० १।३।१) में वकारागम से मध्यमङ्गल तथा "अ अ" (अ० ८।४।६८) में अकार से अन्तमङ्गल उपस्थित करते हैं। कातन्त्रकार आचार्य शर्ववर्मा ने " सिद्धो वर्णसमाम्नायः" (१।१।१) में 'सिद्ध' शब्द से आदिमङ्गल, "न ष्वोः पदाद्योर्वृद्धिरागमः" (२।६।५०) में वृद्धिशब्द से मध्यमङ्गल तथा प्रकृत सूत्र में पठित वृद्धिशब्द से अन्तिम मङ्गल का विधान करके शिष्टाचार का पालन किया है। महाभाष्यकार पतञ्जलि के अनुसार जिन ग्रन्थों के आदि-मध्य-अन्त में मङ्गलाचरण किया जाता है, उन शास्त्र-ग्रन्थों की प्रतिष्ठा होती है, इन्हें पढ़ने वाले भी आयुष्मान् और यशस्वी ही सिद्ध होते हैं – "मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते, वीरपुरुषाणि च भवन्ति, आयुष्मत्पुरुषाणि चाध्येतारश्च सिद्धार्था यथा स्युरिति" (म० भा०-पस्पशा०, पृ० ४१; १।१।१)।

**पूर्वाचार्यों द्वारा वृद्धिसंज्ञा का प्रयोग–**

**महाभाष्य** इहापि कृतः पूर्वैरभिसम्बन्धः। कैः ? आचार्यैः (१।१।१)।

**काशकृत्स्नधातुव्याख्यान** द्व्यादीनां वृद्धिस्तिसिमिषु, वृद्धिरादौ सणे (सूत्र ६९, १२६)।

**वाजसनेयिप्रातिशाख्य** तद्धिते चैकाक्षरवृद्धावनिहिते (५।२९)।

**अर्वाचीन आचार्यों द्वारा इस संज्ञा का व्यवहार –**

**जैनेन्द्रव्याकरण** आदैगैप् (१।१।१५)।

**हैमशब्दानुशासन** वृद्धिरारैदौत् (३।३।१)।

**मुग्धबोधव्याकरण** अच आरालैज् व्रिः (सू० ९)।

गुणसंज्ञक 'अ-ए-ओ' वर्णों की अपेक्षा वृद्धिसंज्ञक 'आ-ऐ-औ' के उच्चारण में मुख का विकास अधिक होता है, इसलिए उनकी वृद्धिसंज्ञा सार्थक (अन्वर्थ) मानी जाती है –

**'तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च'**

(पा० शि०, श्लोक २१) ॥८५५॥

**॥ इत्याख्याते तृतीयाध्याये समीक्षात्मकोऽष्टमो धुडादिपादः समाप्तः ॥**

**आचार्यशर्ववर्मप्रणीतं कातन्त्रं समाप्तम्**

●

## परिशिष्टम्– १=सूत्रपाठः

# १. आचार्यशर्ववर्मप्रणीतानि कातन्त्र-व्याकरणसूत्राणि

### प्रथमाध्याये सन्धिप्रकरणे प्रथमः पादः

सिद्धो वर्णसमाम्नायः[१] । तत्र चतुर्दशादौ स्वराः[२] । दश समानाः[३] । तेषां द्वौ द्वावन्योऽन्यस्य सवर्णौ[४] । पूर्वो ह्रस्वः[५] । परो दीर्घः[६] । स्वरोऽवर्णवर्जो नामी[७] । एकारादीनि सन्ध्यक्षराणि[८] । कादीनि व्यञ्जनानि[९] । ते वर्गाः पञ्च पञ्च पञ्च[१०] । वर्गाणां प्रथमद्वितीयाः शषसाश्चाघोषाः[११] । घोषवन्तोऽन्ये[१२] । अनुनासिका ङञणनमाः[१३] । अन्तःस्था यरलवाः[१४]। ऊष्माणः शषसहाः[१५] । अः इति विसर्जनीयः[१६] । x क इति जिह्वामूलीयः[१७] । ॐ प इत्युपध्मानीयः[१८] । अं इत्यनुस्वारः[१९] । पूर्वपरयोरर्थोपलब्धौ पदम्[२०] । व्यञ्जनमस्वरं परं वर्णं नयेत्[२१] । अनतिक्रमयन् विश्लेषयेत्[२२] । लोकोपचाराद् ग्रहणसिद्धिः[२३] ।

**सूत्रसंख्या २३**

●

### द्वितीयः पादः

समानः सवर्णे दीर्घीभवति परश्च लोपम्[१] । अवर्ण इवर्णे ए[२] । उवर्णे ओ[३] । ऋवर्णे अर्[४] । ऌवर्णे अल्[५] । एकारे ऐ ऐकारे च[६] । ओकारे औ औकारे च[७] । इवर्णो यमसवर्णे न च परो लोप्यः[८] । वमुवर्णः[९] । रमृवर्णः[१०] । लम् ऌवर्णः[११] । ए अय्[१२]। ऐ आय्[१३] । ओ अव्[१४] । औ आव्[१५] । अयार्दीनां यवलोपः पदान्ते न वा लोपे तु प्रकृतिः[१६]। एदोत्परः पदान्ते लोपमकारः[१७] । न व्यञ्जने स्वराः सन्धेयाः[१८] ।

**सूत्रसंख्या २३ + १८ = ४१**

●

### तृतीयः पादः

ओदन्ता अइउआ निपाताः स्वरे प्रकृत्या[१] । द्विवचनमनौ[२] । बहुवचनममी[३] । अनुपदिष्टाश्च[४] ।

**सूत्रसंख्या ४१ + ४ = ४५**

●

## चतुर्थः पादः

वर्गप्रथमाः पदान्ताः स्वरघोषवत्सु तृतीयान्[१] । पञ्चमे पञ्चमांस्तृतीयान् नवा[२] । वर्गप्रथमेभ्यः शकारः स्वरयवरपरश्छकारं नवा[३] । तेभ्य एव हकारः पूर्वचतुर्थं नवा[४] । पररूपं तकारो लचटवर्गेषु[५] । चं शे[६] । ङणना ह्रस्वोपधाः स्वरे द्विः[७] । नोऽन्तश्छयोः शकारमनुस्वारपूर्वम्[८] । टठयोः षकारम्[९] । तथयोः सकारम्[१०] । ले लम्[११] । जझञशकारेषु ञकारम्[१२] । शि न्चौ वा[१३] । डढणपरस्तु णकारम्[१४] । मोऽनुस्वारं व्यञ्जने[१५] । वर्गे तद्वर्गपञ्चमं वा[१६] ।

**सूत्रसंख्या ४५ + १६ = ६१**

●

## पञ्चमः पादः

विसर्जनीयश्चे छे वा शम्[१] । टे ठे वा षम्[२] । ते थे वा सम्[३] । कखयोर्जिह्वामूलीयं नवा[४] । पफयोरुपध्मानीयं नवा[५] । शे षे से वा वा पररूपम्[६] । उमकारयोर्मध्ये[७] । अघोषवतोश्च[८] । अपरो लोप्योऽन्यस्वरे यं वा[९] । आभोभ्यामेवमेव स्वरे[१०] । घोषवति लोपम्[११] । नामिपरो रम्[१२] । घोषवत्स्वरपरः[१३] । रप्रकृतिरनामिपरोऽपि[१४] । एषसपरो व्यञ्जने लोप्यः[१५] । न विसर्जनीयलोपे पुनः सन्धिः[१६] । गे रे लोपं स्वरश्च पूर्वो दीर्घः[१७]। द्विर्भावं स्वरपरश्छकारः[१८] ।

**सूत्रसंख्या ६१ + १८ = ७९**

●

## द्वितीयाध्याये नामचतुष्टयप्रकरणे प्रथमः पादः

धातुविभक्तिवर्जमर्थवल्लिङ्गम्[१] । तस्मात् परा विभक्तयः[२] । पञ्चादौ घुट्[३] । जस्शसौ नपुंसके[४] । आमन्त्रिते सिः संबुद्धिः[५] । आगम उदनुबन्धः स्वरादन्त्यात् परः[६] । तृतीयादौ तु परादिः[७] । इदुदग्निः[८] । ईदूत् स्त्र्याख्यौ नदी[९] । आ श्रद्धा[१०] । अन्त्यात् पूर्व उपधा[११]। व्यञ्जनान्नोऽनुषङ्गः[१२] । धुड् व्यञ्जनमनन्तःस्थानुनासिकम्[१३] । अकारो दीर्घ घोषवति[१४] । जसि[१५] । शसि सस्य च नः[१६] । अकारे लोपम्[१७] । भिस्भ्यस् वा[१८] । धुटि बहुत्वे त्वे[१९] । ओसि च[२०] । ङसिरात्[२१] । ङस् स्यः[२२] । इन टा[२३] । ङेर्यः[२४] । स्मै सर्वनाम्नः[२५] । ङसिः स्मात्[२६] । ङिः स्मिन्[२७] । विभाष्येते पूर्वादेः[२८] । सुगमि सर्वतः[२९] । जस् सर्व इः[३०]। अल्पादेर्वा[३१] । द्वन्द्वस्थाच्च[३२] । नान्यत् सार्वनामिकम्[३३] । तृतीयासमासे च[३४] । बहुव्रीहौ[३५]। दिशां वा[३६]। श्रद्धायाः स्लिलोपम्[३७] । टौमोरे[३८] । संबुद्धौ च[३९] । ह्रस्वोऽम्बार्थानाम्[४०] । औरीम्[४१] । ङवन्ति यै-यास्-यास्-याम्[४२] । सर्वनाम्नस्तु समवो ह्रस्वपूर्वाश्च[४३] । द्वितीयातृतीयाभ्यां वा[४४] । नद्या ऐ-आस्-आस्-आम्[४५] । संबुद्धौ ह्रस्वः[४६] । अम्शसोरादिर्लोपम्[४७]। ईकारान्तात्

सि:[४८] । व्यञ्जनाच्च[४९] । अग्नेरमोऽकार:[५०] । औकार: पूर्वम्[५१] । शसोऽकार: सश्च नोऽस्त्रियाम्[५२]। टा ना[५३] । अदोऽमुश्च[५४] । इरेदुरोज्जसि[५५] । संबुद्धौ च[५६] । ङे[५७] । ङसिङसोरलोपश्च[५८] । गोश्च[५९] । ङिरौ सपूर्व:[६०] । सखिपत्योर्ङि:[६१] । ङसिङसोरुम:[६२] । ऋदन्तात् सपूर्व:[६३] । आ सौ सिलोपश्च[६४] । अग्निवच्छसि[६५] । अर् ङौ[६६] । घुटि च[६७] । धातोस्तृशब्दस्याऽऽर्[६८] । स्वस्रादीनां च[६९] । आ च न संबुद्धौ[७०] । ह्रस्वनदीश्रद्धाभ्य: सिर्लोपम्[७१] । आमि च नु:[७२]। त्रेस्त्रयश्च[७३] । चतुर:[७४] । संख्याया: ष्णान्ताया:[७५] । कतेश्च जस्शसोर्लुक्[७६] । नियो ङिराम्[७७]।

**सूत्रसंख्या ७९ + ७७ = १५६**

●

## द्वितीय: पाद:

न सखिष्टादावग्नि:[१] । पतिरसमासे[२] । स्त्री नदीवत्[३] । स्त्याख्याविधुवौ वामि[४] । ह्रस्वश्च ङवति[५] । नपुंसकात् स्यमोर्लोपो न च तदुक्तम्[६] । अकारादसम्बुद्धौ मुश्च[७] । अन्यादेस्तु तु:[८] । औरीम्[९] । जस्शसो: शि:[१०] । धुट्स्वराद् घुटि नु:[११] । नामिन: स्वरे[१२] । अस्थिदधिसक्थ्यक्ष्णामन्नन्तष्टादौ[१३] । भाषितपुंस्कं पुंवद् वा[१४] । दीर्घमामि सनौ[१५]। नान्तस्य चोपधाया:[१६] । घुटि चासम्बुद्धौ[१७] । सान्तमहतोनोंपधाया:[१८] । अपश्च[१९] । अन्त्वसन्तस्य चाधातो: सौ[२०] । इन्हन्पूषार्यम्णां शौ च[२१] । उशन:पुरुदंशोऽनेहसां सावनन्त:[२२] । सख्युश्च[२३] । घुटि त्वै[२४] । दिव उद् व्यञ्जने[२५] । औ सौ[२६] । वाम्या[२७] । युजेरसमासे नुर्घुटि[२८]। अभ्यस्तादन्तिरनकार:[२९] । वा नपुंसके[३०] । तुदभादिभ्य ईकारे[३१] । हनेर्हेर्घिरुपधालोपे[३२]। गोरौ घुटि[३३] । अम्शसोरा[३४] । पन्थिमन्थ्यृभुक्षीणां सौ[३५] । अनन्तो घुटि[३६] । अघुट्स्वरे लोपम्[३७] । व्यञ्जने चैषां नि:[३८] । अनुषङ्गश्चाक्रुञ्चेत्[३९] । पुंसोऽन्शब्दलोप:[४०] । चतुरो वाशब्दस्योत्वम्[४१] । अनडुहश्च[४२] । सौ नु:[४३] । सम्बुद्धावुभयोर्ह्रस्व:[४४] । अदस: पदे म:[४५]। अघुट्स्वरादौ सेट्कस्यापि वन्सेर्वशब्दस्योत्वम्[४६] । श्वयुवमघोनां च[४७] । वाहेर्वाशब्दस्यौ[४८]। अन्चेरलोप: पूर्वस्य च दीर्घ:[४९] । तिर्यङ् तिरश्चि:[५०] । उदङ् उदीचि:[५१] । पात् पदं समासान्त:[५२] । अवमसंयोगादनोऽलोपोऽलुप्तवच्च पूर्वविधौ[५३] । ईङ्योर्वा[५४] । आ धातोरघुट्स्वरे[५५]। ईदूतोरियुवौ स्वरे[५६] । सुधी:[५७] । भूरवर्षाभूरपुनर्भू:[५८] । अनेकाक्षरयोस्त्वसंयोगाद् यवौ[५९] । भ्रूर्धातुवत्[६०] । स्त्री च[६१] । वाम्शसो:[६२] । भवतो वादेरुत्वं सम्बुद्धौ[६३] । अव्ययसर्वनाम्न: स्वरादन्त्यात् पूर्वोऽक् क:[६४] । के प्रत्यये स्त्रीकृताकारपरे पूर्वोऽकार इकारम्[६५] ।

**सूत्रसंख्या १५६+६५=२२१**

●

## तृतीय: पाद:

युष्मदस्मदो: पदं पदात् षष्ठीचतुर्थीद्वितीयासु वस्नसौ[१] । वां नौ द्वित्वे[२] । त्वन्मदोरेकत्वे ते मे त्वा मा तु द्वितीयायाम्[३] । न पादादौ[४] । चादियोगे च[५] । एषां विभक्तावन्तलोप:[६] ।

युवावौ द्विवाचिषु[७] । अमौ चाम्[८] । आन् शस्[९] । त्वमहं सौ सविभक्त्योः[१०] । यूयं वयं जसि[११] । तुभ्यम् मह्यं ङयि[१२] । तव मम ङसि[१३] । अत् पञ्चम्यद्वित्वे[१४] । भ्यसभ्यम्[१५] । सामाकम्[१६] । एत्वमस्थानिनि[१७] । आत्वं व्यञ्जनादौ[१८] । रैः[१९] । अष्टनः सर्वासु[२०] । औ तस्माज्जस्शसोः[२१] । अर्वन्नर्वन्तिरसावनञ्[२२] । सौ च मघवान् मघवा वा[२३] । जरा जरस् स्वरे वा[२४] । त्रिचतुरोः स्त्रियां तिसृ चतसृ विभक्तौ[२५] । तौ रं स्वरे[२६] । न नामि दीर्घम्[२७]। नृ वा[२८]। त्यदादीनाम विभक्तौ[२९] । किम् कः[३०] । दोऽद्वेर्मः[३१] । सौ सः[३२] । तस्य च[३३] । इदमियमयम्पुंसि[३४] । अद् व्यञ्जनेऽनक्[३५] । टौसोरनः[३६] । एतस्य चान्वादेशे द्वितीयायां चैनः[३७] । तस्माद् भिस् भिर्[३८] । अदसश्च[३९] । सावौ सिलोपश्च[४०] । उत्वं मात्[४१] । एद् बहुत्वे त्वी[४२] । अपां भे दः[४३] । विरामव्यञ्जनादिष्वनडुन्नहिवर्न्सानां च[४४] । स्त्रसिध्वसोश्च[४५] । हशषछान्तेजादीनां डः[४६] । दादेर्हस्य गः[४७] । चवर्गदृगादीनां च[४८] । मुहादीनां वा[४९] । हचतुर्थान्तस्य धातोस्तृतीयादेरादिचतुर्थत्वमकृतवत्[५०] । सजुषाशिषो रः[५१] । इरुरोरीरूरौ[५२]। अह्नः सः[५३] । संयोगान्तस्य लोपः[५४] । संयोगादेर्धुटः[५५] । लिङ्गान्तनकारस्य[५६] । न संबुद्धौ[५७]। न संयोगान्तावलुप्तवच्च पूर्वविधौ[५८] । इसुस्दोषां घोषवति रः[५९] । धुटां तृतीयः[६०] । अघोषे प्रथमः[६१] । वा विरामे[६२] । रेफसोर्विसर्जनीयः[६३] । विरामव्यञ्जनादावुक्तं नपुंसकात् स्यमोर्लोपेऽपि[६४] ।

**सूत्रसंख्या २२१+६४=२८५**

●

## चतुर्थः पादः [ कारकम् ]

अव्ययीभावादकारान्ताद् विभक्तीनाममपञ्चम्याः[१] । वा तृतीयासप्तम्योः[२] । अन्यस्माल्लुक्[३]। अव्ययाच्च[४] । रूढानां बहुत्वेऽस्त्रियामपत्यप्रत्ययस्य[५] । गर्गयस्कबिदादीनां च[६]। भृग्वत्र्याङ्गिरसकुत्सवसिष्ठगोतमेभ्यश्च[७] । यतोऽपैति भयमादत्ते वा तदपादानम्[८] । ईप्सितं च रक्षार्थानाम्[९] । यस्मै दित्सा रोचते धारयते वा तत् सम्प्रदानम्[१०] । य आधारस्तदधिकरणम्[११]। येन क्रियते तत् करणम्[१२] । यत् क्रियते तत् कर्म[१३] । यः करोति स कर्ता[१४] । कारयति यः स हेतुश्च[१५] । तेषां परमुभयप्राप्तौ[१६] । प्रथमा विभक्तिर्लिङ्गार्थवचने[१७] । आमन्त्रणे च[१८]। शेषाः कर्मकरणसम्प्रदानापादानस्वाम्याद्यधिकरणेषु[१९] । पर्यपाङ्योगे पञ्चमी[२०]। दिगितरतेऽन्यैश्च[२१]। द्वितीयैनेन[२२] । कर्मप्रवचनीयैश्च[२३]। गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि[२४]। मन्यकर्मणि चानादरेऽप्राणिनि[२५] । नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगे चतुर्थी[२६] । तादर्थ्ये[२७]। तुमर्थाच्च भाववाचिनः[२८] । तृतीया सहयोगे[२९] । हेत्वर्थे[३०] । कुत्सितेऽङ्गे[३१] । विशेषणे[३२]। कर्तरि च[३३] । कालभावयोः सप्तमी[३४] । स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैः षष्ठी च[३५] । निर्धारणे च[३६] । षष्ठी हेतुप्रयोगे[३७] । स्मृत्यर्थकर्मणि[३८] । करोतेः प्रतियत्ने[३९] । हिंसार्थानामज्वरेः[४०] । कर्तृकर्मणोः कृति नित्यम्[४१] । न निष्ठादिषु[४२] । षडो णो ने[४३] । मनोरनुस्वारो धुटि[४४] । वर्गे वर्गान्तः[४५]। तवर्गश्चटवर्गयोगे चटवर्गौ[४६] । नामिकरपरः

प्रत्ययविकारागमस्थः सिः षं नुविसर्जनीयषान्तरोऽपि[४७] । रषृवर्णेभ्यो नो णमनन्त्यः स्वरहयवकवर्गपवर्गान्तरोऽपि[४८] । स्त्रियामादा[४९]। नदाद्यन्चिवाहव्यन्स्यन्तृसखिनान्तेभ्य ई[५०]। ईकारे स्त्रीकृतेऽलोप्यः[५१] । स्वरो ह्रस्वो नपुंसके[५२] ।

सूत्रसंख्या २८५+५२=३३७

## पञ्चमः पादः [समासः] ●

नाम्नां समासो युक्तार्थः[१] । तत्स्था लोप्या विभक्तयः[२] ।
प्रकृतिश्च स्वरान्तस्य[३] । व्यञ्जनान्तस्य यत्सुभोः[४] ।।१।
पदे तुल्याधिकरणे विज्ञेयः कर्मधारयः[५] ।
संख्यापूर्वो द्विगुरिति ज्ञेयः[६] । तत्पुरुषावुभौ[७] ।।२।
विभक्तयो द्वितीयाद्या नाम्ना परपदेन तु ।
समस्यन्ते समासो हि ज्ञेयस्तत्पुरुषः स च[८] ।।३।
स्यातां यदि पदे द्वे तु यदि वा स्युर्बहून्यपि ।
तान्यन्यस्य पदस्यार्थे बहुव्रीहिः[९] । विदिक् तथा[१०] ।।४।
द्वन्द्वः समुच्चयो नाम्नोर्बहूनां वापि यो भवेत्[११] ।
अल्पस्वरतरं तत्र पूर्वम्[१२] । यच्चार्चितं द्वयोः[१३] ।।५।
पूर्वं वाच्यं भवेद् यस्य सोऽव्ययीभाव इष्यते[१४] ।
स नपुंसकलिङ्गं स्यात्[१५]। द्वन्द्वैकत्वम्[१६]। तथा द्विगोः[१७] ।।६।
पुंवद् भाषितपुंस्कानूङपूरण्यादिषु स्त्रियाम् ।
तुल्याधिकरणे[१८] । संज्ञापूरणीकोपधास्तु न[१९] ।।७।
कर्मधारयसंज्ञे तु पुंवद्भावो विधीयते[२०] ।
आकारो महतः कार्यस्तुल्याधिकरणे पदे[२१] ।।८।
नस्य तत्पुरुषे लोप्यः[२२] । स्वरेऽक्षरविपर्ययः[२३] ।
कोः कत्[२४]। का त्वीषदर्थेऽक्षे[२५]। पुरुषे तु विभाषया[२६] ।।९।
याकारौ स्त्रीकृतौ ह्रस्वौ क्वचित्[२७] । ह्रस्वस्य दीर्घता[२८] ।
अनव्ययविसृष्टस्तु सकारं कपवर्गयोः[२९] ।।१०।

सूत्रसंख्या ३३७+२९=३६६

●

## षष्ठः पादः [तद्धितः]

वाऽणपत्ये[१] । ण्य गर्गादेः[२] । कुञ्जादेरायनण् स्मृतः[३] ।
स्त्र्यत्र्यादेरेयण्[४] । इणतः[५] । बाह्वादेश्च विधीयते[६] ।।१।

रागान्नक्षत्रयोगाच्च समूहात् साऽस्य देवता ।
तद् वेत्त्यधीते तस्येदमेवमादेरणिष्यते[७] ।।२।
तेन दीव्यति संसृष्टं तरतीकण् चरत्यपि ।
पण्याच्छिल्पान्नियोगाच्च क्रीतादेरायुधादपि[८] ।।३।
नावस्तार्ये विषाद् वध्ये तुलया संमितेऽपि च ।
तत्र साधौ यः[९] । ईयस्तु हिते[१०] । यदुगवादितः[११] ।।४।
उपमाने वतिः[१२] । तत्वौ भावे[१३] । यण् च प्रकीर्तितः[१४] ।
तदस्यास्तीति मन्त्वन्त्वीन्[१५] । संख्यायाः पूरणे डमौ[१६] ।।५।
द्वेस्तीयः[१७]। त्रेस्तृ च[१८]। अन्तस्थो डेर्षोः[१९]। कतिपयात् कतेः[२०] ।
विंशत्यादेस्तमट्[२१] । नित्यं शतादेः[२२] । षष्ट्याद्यतत्परात्[२३] ।।६।
विभक्तिसंज्ञा विज्ञेया वक्ष्यन्तेऽतः परं तु ये ।
अद्व्यादेः सर्वनाम्नस्ते बहोश्चैव पराः स्मृताः[२४] ।।७।
तत्रेदमिः[२५] । रथोरेतेत्[२६] । तेषु त्वेतदकारताम्[२७] ।
पञ्चम्यास्तस्[२८]। त्र सप्तम्याः[२९]। इदमो हः[३०]। किमः[३१]। अत् क्व च[३२]।।८।
तहोः कुः[३३] । काले किंसर्वयदेकान्येभ्य एव दा[३४] ।
इदमो र्ह्यधुनादानीम्[३५] । दादानीमौ तदः स्मृतौ[३६] ।।९।
सद्यआद्या निपात्यन्ते[३७] । प्रकारवचने तु था[३८] ।
इदंकिम्भ्यां थमुः कार्यः[३९] । आख्याताच्च तमादयः[४०] ।।१०।
समासान्तगतानां वा राजादीनामदन्तता[४१] ।
डानुबन्धेऽन्यस्वरादेर्लोपः[४२] । तेर्विंशतेरपि[४३] ।।११।
इवर्णावर्णयोर्लोपः स्वरे ये च[४४] । नस्तु क्वचित्[४५] ।
उवर्णस्त्वोत्वमापाद्यः[४६] । एयेऽकद्र्वास्तु लुप्यते[४७] ।।१२।
कार्यावावावादेशावोकारौकारयोरपि[४८] ।
वृद्धिरादौ सणे[४९] । न य्वोः पदाद्योर्वृद्धिरागमः[५०] ।।१३।

सूत्रसंख्या ३६६+५०=४१६

●

## तृतीयाध्याये आख्यातप्रकरणे प्रथमः पादः

अथ परस्मैपदानि नव[१] । पराण्यात्मने[२] । त्रीणि त्रीणि प्रथममध्यमोत्तमाः[३] । युगपद्वचने परः पुरुषाणाम्[४] । नाम्नि प्रयुज्यमानेऽपि प्रथमः[५] । युष्मदि मध्यमः[६] । अस्मद्युत्तमः[७] । अदाब्दाधौ दा[८] । क्रियाभावो धातुः[९] । काले[१०] । सम्प्रति वर्तमाना[११] । स्मेनार्तीते[१२] । परोक्षा[१३] । भूतकरणवत्यश्च[१४] । भविष्यति भविष्यन्त्याशीःश्वस्तन्यः[१५] । तासां स्वसंज्ञाभिः कालविशेषः[१६] । प्रयोगतश्च[१७] । पञ्चम्यनुमतौ[१८] । समर्थनाशिषोश्च[१९] । विध्यादिषु सप्तमी

च[२०] । क्रियासमभिहारे सर्वकालेषु मध्यमैकवचनं पञ्चम्या:[२१] । मायोगेऽद्यतनी[२२] । मास्मयोगे ह्यस्तनी च[२३] । वर्तमाना[२४] । सप्तमी[२५] । पञ्चमी[२६] । ह्यस्तनी[२७] । एवमेवाद्यतनी[२८] । परोक्षा[२९] । श्वस्तनी[३०] । आशी:[३१] । स्यसंहितानि त्यादीनि भविष्यन्ती[३२] । द्यादीनि क्रियातिपत्ति:[३३] । षडाद्या: सार्वधातुकम्[३४] ।

**सूत्रसंख्या ४१६+३४=४५०**

●

## द्वितीय: पाद:

प्रत्यय: पर:[१] । गुप्तिज्किद्भ्य: सन्[२] । मान्बध्दान्शान्भ्यो दीर्घश्चाभ्यासस्य[३] । धातोर्वा तुमन्तादिच्छतिनैकककर्तृकात्[४] । नाम्न आत्मेच्छायां यिन्[५] । काम्य च[६] । उपमानादाचारे[७]। कर्तुराय: सलोपश्च[८] । इन् कारितं धात्वर्थे[९] । धातोश्च हेतौ[१०] । चुरादेश्च[११] । इनि लिङ्गस्यानेकाक्षरस्यान्त्यस्वरादेर्लोप:[१२] । रशब्द ऋतो लघोर्व्यञ्जनादे:[१३] । धातोर्यशब्दश्चेक्रीयितं क्रियासमभिहारे[१४] । गुपूधूपविच्छिपणिपनेराय:[१५] । ते धातव:[१६] । चकासकासप्रत्ययान्तेभ्य आम् परोक्षायाम्[१७] । दययासश्च[१८] । नाम्यादेर्गुरुमतोऽनृछ:[१९] । उषविदजागृभ्यो वा[२०] । भीह्रीभृहुवां तिवच्च[२१] । आम: कृञनुप्रयुज्यते[२२] । अस्भुवौ च परस्मै[२३] । सिजद्यतन्याम्[२४]। सणनिट: शिडन्तान्नाम्युपधाददृश:[२५] । श्रिद्रुस्रुकमिकारितान्तेभ्यश्चण् कर्तरि[२६] । अण् असुवचिख्यातिलिपिसिचिह्व:[२७] । पुषादिद्युताद्यृलृकारानुबन्धार्तिशास्तिभ्यश्च परस्मै[२८] । इजात्मनेपदे: प्रथमैकवचने[२९] । भावकर्मणोश्च[३०] । सार्वधातुके यण्[३१] । अन् विकरण: कर्तरि[३२] । दिवादेर्यन्[३३] । नु: स्वादे:[३४] । श्रुव: शृ च[३५] । स्वराद् रुधादे: परो नशब्द:[३६] । तनादेरु:[३७]। ना क्र्यादे:[३८] । आन व्यञ्जनान्ताद्धौ[३९] । आत्मनेपदानि भावकर्मणो:[४०] । कर्मवत् कर्मकर्ता[४१]। कर्तरि रुचादिङानुबन्धेभ्य:[४२] । चेक्रीयितान्तात्[४३] । आय्यन्ताच्च[४४]। इन्ञ्यजादेरुभयम्[४५]। पूर्ववत् सनन्तात्[४६] । शेषात् कर्तरि परस्मैपदम्[४७] ।

**सूत्रसंख्या ४५०+४७=४९७**

●

## तृतीय: पाद:

द्विर्वचनमनभ्यासस्यैकस्वरस्याऽऽद्यस्य[१] । स्वरादेर्द्वितीयस्य[२] । न नबदरा: संयोगादयोऽये[३]। पूर्वोऽभ्यास:[४] । द्वयमभ्यस्तम्[५] । जक्षादिश्च[६] । चण्परोक्षाचेक्रीयितसनन्तेषु[७] । ह्वोत्यादीनां सार्वधातुके[८] । अभ्यासस्याऽऽदिर्व्यञ्जनमवशेष्यम्[९] । शिट्परोऽघोष:[१०] । द्वितीयचतुर्थयो: प्रथमतृतीयौ[११] । हो ज:[१२] । कवर्गस्य चवर्ग:[१३] । न कवतेश्चेक्रीयिते[१४] । ह्रस्व:[१५] । ऋवर्णस्याकार:[१६] । दीर्घ इण: परोक्षायामगुणे[१७] । अस्यादे: सर्वत्र[१८] । तस्मान्नागम: परादिरन्तश्चेत् संयोग:[१९] । ऋकारे च[२०] । अश्नोतेश्च[२१] । भवतेर:[२२] । निजिविजिविषां गुण: सार्वधातुके[२३] । भृञ्हाङ्माङामित्[२४] । अर्तिपिपत्योंश्च[२५] । सन्यवर्णस्य[२६] । उवर्णस्य

जान्त:स्थापवर्गपरस्यावर्णे[२७] । गुणश्चेक्रीयिते[२८] । दीर्घोऽनागमस्य[२९] । वन्चिस्रन्सिध्वन्सिभ्रन्सि-कसिपतिपदिस्कन्दामन्तो नी[३०] । अतोऽन्तोऽनुस्वारोऽनुनासिकान्तस्य[३१] । जपादीनां च[३२] । चरफलोरुच्च परस्यास्य[३३] । ऋमतो री:[३४] । अलोपे समानस्य सन्वल्लघुनीनि चण्परे[३५]। दीर्घो लघो:[३६] । अत् त्वरादीनां च[३७] । इतो लोपोऽभ्यासस्य[३८] । सनि मिमीमादारभलभ-शकपतपदामिस् स्वरस्य[३९] । आप्नोतेरी:[४०] । दन्भेरिच्च[४१] । दिगि दयते: परोक्षायाम्[४२] ।

**सूत्रसंख्या ४९७+४२=५३९**

●

## चतुर्थ: पाद:

सपरस्वराया: सम्प्रसारणमन्त:स्थाया:[१] । ग्रहिज्यावयिव्यधिवष्टिव्यचिप्रच्छिप्रश्चिभ्रस्जी-नामगुणे[२] । स्वपिवचियजादीनां यण्परोक्षाशी:षु[३] । परोक्षायामभ्यासस्योभयेषाम्[४] । व्यथेश्च[५]। न वाश्योरगुणे च[६] । स्वपिस्यमिव्येञां चेक्रीयिते[७] । स्वापेश्चणि[८] । ग्रहिस्वपिप्रच्छां सनि[९] । चाय: किश्चेक्रीयिते[१०] । प्याय: पि: परोक्षायाम्[११] । श्वयतेर्वा[१२] । कारिते च संश्चणो:[१३] । ह्वयतेर्नित्यम्[१४] । अभ्यस्तस्य च[१५] । द्युतिस्वाप्योरभ्यासस्य[१६] । न सम्प्रसारणे[१७] । वशेश्चेक्रीयिते[१८]। प्रच्छादीनां परोक्षायाम्[१९] । सन्ध्यक्षरान्तानामाकारोऽविकरणे[२०] । न व्ययते: परोक्षायाम्[२१] । मीनातिमिनोतिदीङां गुणवृद्धिस्थाने[२२] । सनि दीङ:[२३] । स्मिजिक्रीङामिनि[२४]। सृजिदृशोरागमोऽकार: स्वरात् परो धुटि गुणवृद्धिस्थाने[२५] । दीङोऽन्तो यकार: स्वरादावगुणे[२६]। आलोपोऽसार्वधातुके[२७] । इटि च[२८] । दामागायतिपिबतिस्थास्यतिजहातीनामीकारो व्यञ्जनादौ[२९]। आशिष्येकार:[३०] । अन उस् सिजभ्यस्तविदादिभ्योऽभुव:[३१] । इचस्तलोप:[३२] । हेरकारादहन्ते:[३३]। नोश्च विकरणादसंयोगात्[३४] । उकाराच्च[३५] । उकारलोपो वमोर्वा[३६] । करोतेर्नित्यम्[३७] । ये च[३८] । अस्योकार: सार्वधातुकेऽगुणे[३९] । रुधादेर्विकरणान्तस्य लोप:[४०] । अस्तेरादे:[४१] । अभ्यस्तानामाकारस्य[४२] । क्र्यादीनां विकरणस्य[४३] । उभयेषामीकारो व्यञ्जनादावद:[४४] । इकारो दरिद्राते:[४५] । लोप: सप्तम्यां जहाते:[४६] । धुटि हन्ते: सार्वधातुके[४७] । शासेरिदुपधाया अण्व्यञ्जनयो:[४८] । हन्तेर्ज हौ[४९] । दाम्न्योरेऽभ्यासलोपश्च[५०] । अस्यैकव्यञ्जनमध्येऽनादेशादे: परोक्षायाम्[५१] । थलि च सेटि[५२] । तृफलभजत्रपश्रन्थिग्रन्थिदम्भीनां च[५३] । न शसददवादिगुणिनाम्[५४] । स्वरादाविवर्णोवर्णान्तस्य धातोरियुवौ[५५] । अभ्यासस्यासवर्णे[५६] । नोर्विकरणस्य[५७] । य इवर्णस्यासंयोगपूर्वस्यानेकाक्षरस्य[५८] । इणश्च[५९] । नोर्वकारो विकरणस्य[६०]। जुहोते: सार्वधातुके[६१] । भुवो वोऽन्त: परोक्षाऽद्यतन्यो:[६२] । गोहेरूदुपधाया:[६३] । दुषे: कारिते[६४] । मानुबन्धानां ह्रस्व:[६५] । इचि वा[६६] । जनिवध्योश्च[६७] । ओतो यिन्नार्यौ स्वरवत्[६८]। औतश्च[६९] । नाम्यन्तानां यणायियिन्नार्शाश्चिवचेक्रीयितेषु ये दीर्घ:[७०] । इणोऽनुपसृष्टस्य[७१] । ऋत ईदन्तश्चिवचेक्रीयिततियिन्नायिषु[७२] । इरन्यगुणे[७३] । यणाशिषोर्ये[७४] । गुणोऽर्तिसंयोगाद्यो:[७५]। चेक्रीयिते च[७६] । घ्राध्मोर्री[७७] । यिन्यवर्णस्य[७८] । अदेर्घस्व मनद्यतन्यो:[७९] । वा परोक्षायाम्[८०]। वेञश्च वयि:[८१] । हन्तेर्वधिराशिषि[८२] । अद्यतन्यां च[८३] । इणो गा[८४] । इङ: परोक्षायाम्[८५]।

सर्नीणिङोर्गमि:[८६] । अस्तेर्भूरसार्वधातुके[८७] । ब्रुवो वचि:[८८] । चक्षिङः ख्याञ्[८९] । वा परोक्षायाम्[९०] । अजेर्वी[९१] । अदादेर्लुग् विकरणस्य[९२] । इण्स्थादापिबतिभूभ्य: सिच: परस्मै[९३] ।

**सूत्रसंख्या ५३९+९३=६३२**

●

## पञ्चम: पाद:

नाम्यन्तयोर्धातुविकरणयोर्गुण:[१] । नामिनश्चोपधाया लघो:[२] । अनि च विकरणे[३] । करोते:[४] । मिदे:[५] । अभ्यस्तानामुसि[६] । न णकारानुबन्धचेक्रीयितयो:[७] । अभ्यस्तस्य चोपधाया नामिन: स्वरे गुणिनि सार्वधातुके[८] । सनि चानिटि[९] । सिजाशिषोश्चात्मने[१०] । ऋदन्तानां च[११] । स्थादोश्च[१२] । भुव: सिज्लुकि[१३] । सूते: पञ्चम्याम्[१४] । दीधीवेव्योश्च[१५] । रुदविदमुषां सनि[१६] । नाम्यन्तानामनिटाम्[१७] । सर्वेषामात्मने सार्वधातुकेऽनुत्तमे पञ्चम्या:[१८] । द्वित्वबहुत्वयोश्च परस्मै[१९] । परोक्षायां च[२०] । सर्वत्रात्मने[२१] । आशिषि च परस्मै[२२] । सप्तम्यां च[२३] । हौ च[२४] । तुदादेरनि[२५] । आमि विदेरेव[२६] । कुटादेरनिनिचट्सु[२७] । विजेरिटि[२८] । स्थादोरिरद्यतन्यामात्मने[२९] । मुचादेरागमो नकार: स्वरादनि विकरणे[३०] । मस्जिनशोर्धुटि[३१] । रधिजभो: स्वरे[३२] । नेटि रधेरपरोक्षायाम्[३३] । रभिलभोरविकरणपरोक्षयो:[३४] । हुधुड्भ्यां हेर्धि:[३५] । अस्ते:[३६] । शा शास्तेश्च[३७] । लोपोऽभ्यस्तादन्तिन:[३८] । आत्मने चानकारात्[३९] । शेतेरिरन्तेरादि:[४०] । आकागदट औ[४१] । ऋदन्तस्येरगुणे[४२] । उरोष्ठ्योपधस्य च[४३] । इन्यसमानलोपोपधाया ह्रस्वश्चणि[४४] । न शास्वृदनुबन्धानाम्[४५] । लोप: पिबतेरीच्चाभ्यासस्य[४६] । तिष्ठतेरित्[४७] । जिघ्रतेर्वा[४८] ।

**सूत्रसंख्या ६३२+४८=६८०**

●

## षष्ठ: पाद:

अनिदनुबन्धानामगुणेऽनुषङ्गलोप:[१] । नशब्दाच्च विकरणात्[२] । परोक्षायामिन्धिश्रन्थिग्रन्थिदन्भीनामगुणे[३] । दन्शिसञ्जिस्वञ्जिरञ्जीनामनि[४] । अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिचट्सु[५] । सिचि परस्मै स्वरान्तानाम्[६] । व्यञ्जनान्तानामनिटाम्[७] । अस्य च दीर्घ:[८] । वदव्रजरलन्तानाम्[९] । श्वियजाग्रोर्गुण:[१०] । अर्तिसत्योंरणि[११] । जागर्ते: कारिते[१२] । यणाशिषोर्यें[१३] । परोक्षायामगुणे[१४] । ऋतश्च संयोगादे:[१५] । ऋदन्तानां च[१६] । ऋच्छ ऋत:[१७] । शीङ: सार्वधातुके[१८] । अर्यायें[१९] । आयिरिच्यादन्तानाम्[२०] । शाछासाह्वाव्यावेपामिनि[२१] । अर्तिह्रीब्लीरीक्नूयीक्ष्माय्यादन्तानामन्त: पो यलोपो गुणश्च नामिनाम्[२२] । पातेर्लोऽन्त:[२३] । धृङ्प्राणात्योर्न:[२४] । स्फायेर्वादेश:[२५] । शदेरगतौ त:[२६] । हन्तेस्त:[२७] । हस्य हन्तेर्धिरिनिचो:[२८] । लुप्तोपधस्य च[२९] । अभ्यासाच्च[३०] । जेर्गि: सनपरोक्षयो:[३१] । चे: कि वा[३२] । सणोऽलोप:

स्वरेऽबहुत्वे[३३] । दरिद्रातेरसार्वधातुके[३४] । व्रश्चिमस्जोर्धुटि[३५] । यन्योकारस्य[३६] । आकारस्योसि[३७]। सन्ध्यक्षरे च[३८] । अस्तेः सौ[३९] । असन्ध्यक्षरयोरस्य तौ तल्लोपश्च[४०] । दीर्घीवेव्योरिवर्ण-यकारयोः[४१] । नामिव्यञ्जनान्तादायेरादेः[४२] । गमहनजनखनघसामुपधायाः स्वरादावनण्यगुणे[४३]। कारितस्यानामिड्विकरणे[४४] । यस्यापत्यप्रत्ययस्यास्वरपूर्वस्य यिन्नायिषु[४५] । नलोपश्च[४६] । व्यञ्जनाद् दिस्योः[४७] । यस्याननि[४८] । अस्य च लोपः[४९] । सिचो धकारे[५०] । धुटश्च धुटि[५१]। ह्रस्वाच्चानिटः[५२] । इटश्चेटि[५३] । स्कोः संयोगाद्योरन्ते च[५४] । चवर्गस्य किरसवर्णे[५५] । हो ढः[५६] । दादेर्घः[५७] । नहेर्धः[५८] । भृजादीनां षः[५९] । छशोश्च[६०] । भाषितपुंस्कं पुंवदायौ[६१] । आदातामाथामादेरिः[६२] । आते आथे इति च[६३] । याशब्दस्य च सप्तम्याः[६४] । याम्युसोरियमियुसौ[६५] । शमादीनां दीर्घो यनि[६६] । ष्ठिवुक्लम्वाचमामनि[६७] । क्रमः परस्मै[६८]। गमिष्यमां छः[६९] । पः पिबः[७०] । घ्रो जिघ्रः[७१] । ध्मो धमः[७२] । स्थस्तिष्ठः[७३] । म्नो मनः[७४]। दाणो यच्छः[७५] । दृशेः पश्यः[७६] । अर्तेर्ऋच्छः[७७] । सर्तेर्धावः[७८] । शदेः शीयः[७९] । सदेः सीदः[८०] । जा जनेर्विकरणे[८१] । ज्ञश्च[८२] । प्वादीनां ह्रस्वः[८३] । उतो वृद्धिर्व्यञ्जनादौ गुणिनि सार्वधातुके[८४] । ऊर्णोतेर्गुणः[८५] । ह्यस्तन्यां च[८६] । तृहेरिड् विकरणात्[८७] । ब्रुव ईड् वचनादिः[८८] । अस्तेर्दिस्योः[८९] । सिचः[९०] । रुदादिभ्यश्च[९१] । अदोऽट्[९२] । सस्य सेऽसार्वधातुके तः[९३] । अणि वचेरोदुपधायाः[९४] । अस्यतेस्थोऽन्तः[९५] । पतेः पप्तिः[९६] । कृपे रो लः[९७] । गिरतेश्चेक्रीयिते[९८] । वा स्वरे[९९] । तृतीयादेर्घढधभान्तस्य धातोरादिचतुर्थत्वं सध्वोः[१००] । लोपे च दिस्योः[१०१] । तथोश्च दधातेः[१०२] ।

**सूत्रसंख्या ६८०+१०२=७८२**

●

## सप्तमः पादः

इडागमोऽसार्वधातुकस्यादिर्व्यञ्जनादेरयकारादेः[१] । स्नुक्रमिभ्यां परस्मै[२] । रुदादेः सार्वधातुके[३]। ईशः से[४] । ईड्जनोः सध्वे च[५] । से गमः परस्मै[६] । हनृदन्तात् स्ये[७] । अन्जेः सिचि[८] । स्तुसुधूञ्भ्यः परस्मै[९] । यमिरमिनम्यादन्तानां सिरन्तश्च[१०] । स्मिङ्पूङ्रन्ज्व-शूकृगृदृधृप्रच्छां सनि[११] । इटो दीर्घो ग्रहेरपरोक्षायाम्[१२] । अनिडेकस्वरादातः[१३] । इवर्णादश्विश्रिडीङ्शीङः[१४] । उतोऽयुरुणुस्नुक्षुक्ष्णुवः[१५] । ऋतोऽवृङ्वृञः[१६] । शकेः कात्[१७]। पचिवचिसिचिरिचिमुचेश्चात्[१८] । प्रच्छेश्छात्[१९] । युजिरुजिरञ्जिभुजिभजिभञ्जि-सञ्जित्यजिभ्रस्जियजिमस्जिसृजिनिजिविजिस्वञ्जेर्जात्[२०] । अदितुदिनुदिक्षुदिस्विद्यतिविद्यति-विन्दतिविनत्तिछिदिभिदिहदिशदिसदिपदिस्कन्दिखिदेर्दात्[२१] । राधिरुधिक्रुधिक्षुधिबन्धिशुधि-सिध्यतिबुध्यतियुधिव्यधिसाधेर्धात्[२२] । हनिमन्यतेर्नात्[२३] । आपितपितिपिस्वपिवपि-शपिछुपिक्षिपिलिपिलुपिसृपेः पात्[२४] । यभिरभितभेर्भात्[२५] । यमिरमिनमिगमेर्मात्[२६] । रिशिरुशिक्रुशिलिशिविशिदिशिदृशिस्पृशिमृशिदन्शेः शात्[२७] । द्विषिपुष्यतिकृषिश्लिष्यति-

त्विषिपिषिविषिशिषिशुषितुषिदुषे: षात्[२८] । वसतिघसे: सात्[२९] । दहिदिहिदुहिमिहिरिहिरुहि-लिहिलुहिनहिवहेर्हात्[३०] । ग्रहगुहो: सनि[३१] । उवर्णान्ताच्च[३२] । इवन्तर्धभ्रस्जदम्भुश्रूर्णुभरज्ञपि-सनितनिपतिदरिद्रां वा[३३] । भुव: सिज्लुकि[३४] । सृवृभृस्तुद्रुस्रुश्रुव एव परोक्षायाम्[३५] । थल्यृकारात्[३६]। कृञोऽसुट:[३७]। सुड् भूषणे सम्पर्युपात्[३८]।

**सूत्रसंख्या ७८२+३८=८२०**

●

## अष्टम: पाद:

पदान्ते धुटां प्रथम:[१] । रसकारयोर्विसृष्ट:[२] । घढधभेभ्यस्तथोर्धोऽध:[३] । षढो: क: से[४]। तवर्गस्य षटवर्गाट्टवर्ग:[५] । ढे ढलोपो दीर्घश्चोपधाया:[६] । सहिवहोरोदवर्णस्य[७] । धुटां तृतीयश्चतुर्थेषु[८] । अघोषेष्वशिटां प्रथम:[९] । भृज: स्वरात् स्वरे द्वि:[१०] । अस्य वमोर्दीर्घ:[११]। स्वरान्तानां सनि[१२] । हनिङ्गमोरुपधाया:[१३] । नामिनो वोरकुर्छुरोर्व्यञ्जने[१४] । सस्य ह्यस्तन्यां दौ त:[१५] । अड् धात्वादिर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु[१६] । स्वरादीनां वृद्धिरादे:[१७] । अवर्णस्याकार:[१८] । अस्ते:[१९] । एतेर्ये[२०] । न मामास्मयोगे[२१] । नाम्यन्ताद् धातोराशी-रद्यतनीपरोक्षासु धो ढ:[२२] । मर्जो मार्जि:[२३] । धात्वादे: ष: स:[२४] । णो न:[२५] । निमित्तात् प्रत्ययविकारागमस्थ: स: षत्वम्[२६] । शासिवसिघर्सानां च[२७] । स्तौतीनन्तयोरेव सनि[२८] । लुग्लोपे न प्रत्ययकृतम्[२९] । स्वरविधि: स्वरे द्विर्वचननिमित्ते कृते द्विर्वचने[३०] । योऽनुबन्धोऽप्रयोगी[३१] । शिडिति शादय:[३२] । सम्प्रसारणं व्यृतोऽन्त:स्थानिमित्ता:[३३] । अर् पूर्वे द्रे सन्ध्यक्षरे च गुण:[३४] । आरुत्तरे च वृद्धि:[३५] ।

**सूत्रसंख्या ८२० + ३५ = ८५५**

**आचार्यशर्ववर्मप्रणीतोऽध्यायत्रितयात्मक: सूत्रपाठ: समाप्त: ।**

●

# परिशिष्टम् – २

# कातन्त्रपाणिनीयव्याकरणयोस्तुलनात्मकसूत्रसूची

| क्र.सं. | व्याकरणम् | सूत्रम् | सन्दर्भः | कार्यम् | समीक्षा |
|---|---|---|---|---|---|
| १. | **का०** | **अं इत्यनुस्वारः** | १।१।१९ | अनुस्वारसंज्ञा | – |
| | पा० | सञ्ज्ञासूत्राभावः । मोऽनुस्वारः | ८।३।२३ | विधिसूत्रम् | – |
| २. | **का०** | **अः इति विसर्जनीयः** | १।१।१६ | विसर्जनीयसंज्ञा | – |
| | पा० | सञ्ज्ञासूत्राभावः। | | | – |
| | | खरवसानयोर्विसर्जनीयः | ८।३।१५ | विधिसूत्रम् | |
| ३. | **का०** | **अकारादसम्बुद्धौ मुश्च** | २।२।७ | सि-अम्-लोपः मु-आगमश्च | सूत्रसंख्या-लाघवम् |
| | पा० | अतोऽम्, अतो गुणे | ७।१।२४; ६।१।९७ | अम्-आदेशः पररूपं च। | सूत्रसंख्या-गौरवम् |
| ४. | **का०** | **अकारे लोपम्** | २।१।१७ | अकारलोपः | सरलता |
| | पा० | अमि पूर्वः | ६।१।१०७ | पूर्वरूपम् | दुरूहता |
| ५. | **का०** | **अकारो दीर्घं घोषवति** | २।१।१४ | दीर्घादेशः | साम्यम् |
| | पा० | नामि, सुपि च | ६।४।३; ७।३।१०२ | दीर्घादेशः | साम्यम् |
| ६. | **का०** | **अग्निवच्छसि** | २।१।६५ | अग्निवद्भावः | अतिदेश-गौरवम् |
| | पा० | अतिदेशाभावः । तस्माच्छसो नः पुंसि, प्रथमयोः पूर्वसवर्णः | ६।१।१०३, १०२ | नकारादेशः, पूर्वसवर्णश्च | लाघवम् |
| ७. | **का०** | **अग्नेरमोऽकारः** | २।१।५० | अमोऽकारलोपः | स्पष्टता |
| | पा० | अमि पूर्वः | ६।१।१०७ | पूर्वरूपम् | दुरूहता |
| ८. | **का०** | **अघुट्स्वरादौ सेट्कस्यापि वन्सेर्वशब्दस्योत्वम्** | २।१।४६ | उकारादेशः | लाघवम् |
| | पा० | वसोः सम्प्रसारणम् सम्प्रसारणाच्च | ६।४।१३१ ६।१।१०८ | सम्प्रसारणं पूर्वरूपं च | गौरवम् |
| ९. | **का०** | **अघुट्स्वरे लोपम्** | २।२।३७ | अन्त्यवर्णलोपः | लाघवम् |
| | पा० | अचोऽन्त्यादि टि, भस्य टेर्लोपः | १।१।६४ ७।१।८८ | टिसंज्ञा टिलोपश्च | गौरवम् |

| | | | | | |
|---|---|---|---|---|---|
| १०. | **का० अघोषवतोश्च** | १।५।८ | उकारादेश: | लाघवम् |
| | पा० ससजुषो रु:, हशि च | ८।२।६६, ६।१।११४ | रुत्वमुत्वं च | गौरवम् |
| ११. | **का० अघोषे प्रथम:** | २।३।६१ | वर्गीयप्रथमवर्णादेश: | साम्यम् |
| | पा० खरि च | ८।४।५५ | चर्त्त्वम् | प्रत्याहार-गौरवम् |
| १२. | **का० अघोषेष्वशिटां प्रथम:** | ३।८।९ | वर्गीयप्रथमवर्णादेश: | स्पष्टता |
| | पा० खरि च | ८।४।५५ | चर्त्त्वम् | दुरूहता |
| १३. | **का० अजेर्वी:** | ३।४।९० | वी-आदेश: | साम्यम् |
| | पा० अजेर्व्यघञपो: | २।४।५६ | वी-आदेश: | साम्यम् |
| १४. | **का० अड् धात्वादिर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु** | ३।८।१६ | अडागम: | साम्यम् |
| | पा० लुङ्लङ्लृङ्क्ष्वडुदात्त: | ६।४।७१ | अडागम: | साम्यम् |
| १५. | **का० अणि वचेरोदुपधाया:** | ३।६।९४ | ओकारादेश: | लाघवम् |
| | पा० वच उम्, आद् गुण: | ७।४।२० ६।१।८७ | उमागमो गुणादेशश्च | गौरवम् |
| १६. | **का० अणसुवचिख्याति-लिपिसिचिह्व:** | ३।२।२७ | अण्प्रत्यय: | लाघवम् |
| | पा० च्लि लुङि, अस्यतिवक्ति-ख्यातिभ्योऽङ्, लिपि-सिचिह्वश्च | ३।१।४३, ५२,५३ | च्लिप्रत्यय:, अङादेशश्च | गौरवम् |
| १७. | **का० अतोऽन्तोऽनुस्वारोऽनुनासिकान्तस्य** | ३।३।३१ | अनुस्वारागम: | लाघवम् |
| | पा० नुगतोऽनुनासिकान्तस्य | ७।४।८५ | नुगागम: | गौरवम् |
| १८. | **का० अत् क्व च** | २।६।३२ | अत्प्रत्यय: क्वादेशश्च | साम्यम् |
| | पा० किमोऽत्, क्वाति | ५।३।१२; ७।२।१०५ | '' '' | साम्यम् |
| १९. | **का० अत् त्वरादीनां च** | ३।३।३७ | अत्-आदेश: | लाघवम् |
| | पा० अत् स्मृदृत्वरप्रथम्रदस्तृ-स्पशाम्, विभाषा वेष्टि-चेष्ट्यो:, ई च गण: | ७।४।९५ -९७ | अत्-आदेश: | गौरवम् |

| | | | | | |
|---|---|---|---|---|---|
| २०. | **का०** | **अत् पञ्चम्याद्वित्वे** | २।३।१४ | अत् - आदेशः | लाघवम् |
| | पा० | पञ्चम्या अत्,एकवचनस्य च | ७।१।३१-३२ | अत्-आदेशः सूत्रसंख्या- | गौरवम् |
| २१. | **का०** | **अथ परस्मैपदानि** | ३।१।१ | परस्मैपदसंज्ञा | लाघवम् |
| | पा० | लः परस्मैपदम् | १।४।९९ | परस्मैपदसंज्ञा | गौरवम् |
| २२. | **का०** | **अदसः पदे मः** | २।२।४५ | मकारादेशः | सूत्रगौरवम् |
| | पा० | अदसोऽसेर्दादु दो मः | ८।२।८० | उकारमकारादेशौ | सूत्रलाघवम् |
| २३. | **का०** | **अदसश्च** | २।३।३९ | भिरादेशः | साम्यम् |
| | पा० | नेदमदसोरकोः | ७।१।११ | ऐसादेशनिषेधः | साम्यम् |
| २४. | **का०** | **अदादेर्लुग् विकरणस्य** | ३।४।९१ | अनो लुक् | साम्यम् |
| | पा० | अदिप्रभृतिभ्यः शपः | २।४।७२ | शपो लुक् | साम्यम् |
| २५. | **का०** | **अदाब्दाधौ दा** | ३।१।८ | दासंज्ञा | अन्वर्थसंज्ञा |
| | पा० | दाधा घ्वदाप् | १।१।२० | घुसंज्ञा | साङ्केतिकसंज्ञा |
| २६. | **का०** | **अदितुदिनुदिक्षुदिस्विद्यति०** | ३।७।२१ | इडागमनिषेधः | साम्यम् |
| | पा० | एकाच उपदेशेऽनुदात्तात् | ७।२।१० | इडागमनिषेधः | साम्यम् |
| २७. | **का०** | **अदेर्घस्लृ सनद्यतन्योः** | ३।४।७८ | घस्लृ-आदेशः | साम्यम् |
| | पा० | लुङ्सनोर्घस्लृ | २।४।३७ | घस्लृ-आदेशः | साम्यम् |
| २८. | **का०** | **अदोऽट्** | ३।६।९२ | अडागमः | साम्यम् |
| | पा० | अदः सर्वेषाम् | ७।३।१०० | अडागमः | साम्यम् |
| २९. | **का०** | **अदोऽमुश्च** | २।१।५४ | अमु-नादेशौ | लाघवम् |
| | पा० | अदसोऽसेर्दादु दो मः, | ८।२।८० | 'उ-म-ना'- | गौरवम् |
| | | आङो नाऽस्त्रियाम् | ७।३।१२० | आदेशाः | साम्यम् |
| ३०. | **का०** | **अद्यतन्यां च** | ३।४।८२ | वधादेशः | साम्यम् |
| | पा० | लुङि च | २।४।४३ | वधादेशः | साम्यम् |
| ३१. | **का०** | **अद् व्यञ्जनेऽनक्** | २।३।३५ | अत्-आदेशः | साम्यम् |
| | पा० | हलि लोपः | ७।२।११३ | इद्-लोपः | साम्यम् |
| ३२. | **का०** | **अन उस् सिजभ्यस्त-विदादिभ्योऽभुवः** | ३।४।३० | उसादेशः | साम्यम् |
| | पा० | सिजभ्यस्तविदिभ्यश्च | ३।४।१०९ | जुसादेशः | साम्यम् |
| ३३. | **का०** | **अनडुहश्च** | २।२।४२ | वाशब्दस्योत्वम् | साम्यम् |
| | पा० | चतुरनडुहोरामुदात्तः | ७।१।९८ | आमागमः | साम्यम् |
| ३४. | **का०** | **अनतिक्रमयन् विश्लेषयेत्** | १।१।२२ | परिभाषा | वैशिष्ट्यम् |
| | पा० | सूत्राभावः | | | |

| | | | | | |
|---|---|---|---|---|---|
| ३५. | **का०** | **अनन्तो घुटि** | २।२।३६ | अन्-आदेशः | लाघवम् |
| | पा० | इतोऽत् सर्वनामस्थाने, थो न्थः | ७।१।८६, ८७ | 'अ-न्थ' आदेशौ | गौरवम् |
| ३६. | **का०** | **अनव्ययविसृष्टस्तु सकारं कपवर्गयोः** | २।५।२९ | सकारादेशः | लाघवम् |
| | पा० | विसर्जनीयस्य सः, सोऽपदादौ, नमस्पुरसोर्गत्योः- इडाया वा | ८।३।३४, ३८, ४०-५४ | सकारादेशः | गौरवम् |
| ३७. | **का०** | **अनि च विकरणे** | ३।५।३ | गुणादेशः | लाघवम् |
| | पा० | सार्वधातुकार्धधातुकयोः, पुगन्तलघूपधस्य च | ७।३।८४, ८६ | गुणादेशः | गौरवम् |
| ३८. | **का०** | **अनिडेकस्वरादातः** | ३।७।१३ | इडागमनिषेधः | अर्थलाघवम् |
| | पा० | एकाच उपदेशेऽनुदात्तात् | ७।२।१० | इडागमनिषेधः | शब्दलाघवम् |
| ३९. | **का०** | **अनिदनुबन्धानामगुणेऽनुषङ्गलोपः** | ३।६।१ | अनुषङ्गलोपः | साम्यम् |
| | पा० | अनिदितां हल उपधायाः क्ङिति | ६।४।२४ | नकारलोपः | साम्यम् |
| ४०. | **का०** | **अनुनासिका ङञणनमाः** | १।१।१३ | अनुनासिकसंज्ञा | साम्यम् |
| | पा० | मुखनासिकावचनोऽनुनासिकः | १।१।८ | अनुनासिकसंज्ञा | साम्यम् |
| ४१. | **का०** | **अनुपदिष्टाश्च** | १।३।४ | प्रकृतिभावः | वैशिष्ट्यम् |
| | पा० | प्लुतप्रगृह्या अचि नित्यम् | ६।१।१२५ | प्रकृतिभावः | सामान्यम् |
| ४२. | **का०** | **अनुषङ्गश्चाक्रुञ्चेत्** | २।२।३९ | अनुषङ्गलोपः | वैशिष्ट्यम् |
| | पा० | नकारलोपो नापेक्ष्यते 'विद्वस्' इत्यादिप्रातिपदिकेषु नकाराभावात्। | | | |
| ४३. | **का०** | **अनेकाक्षरयोस्त्वसंयोगाद् यवौ** | २।२।५९ | 'य्-व्' आदेशौ | स्पष्टता |
| | पा० | एरनेऽकाचोऽसंयोगपूर्वस्य | ६।४।८२ | यणादेशः | व्याख्यापेक्षा |
| ४४. | **का०** | **अन्चेरलोपः पूर्वस्य च दीर्घः** | २।२।४८ | अकारलोप-दीर्घादेशौ | सूत्रलाघवम् |
| | पा० | अचः, चौ | ६।४।१३८ | अकारलोप- | सूत्रसंख्या- |
| | | | ६।३।१३८ | दीर्घादेशौ | गौरवम् |
| ४५. | **का०** | **अन्जेः सिचि** | ३।७।८ | इडागमः | साम्यम् |
| | पा० | अञ्जेः सिचि | ७।२।२१ | इडागमः | साम्यम् |
| ४६. | **का०** | **अन्तःस्था यरलवाः** | १।१।१४ | अन्तस्थासंज्ञा | अन्वर्थता |
| | पा० | सञ्ज्ञासूत्राभावः | - | यण्प्रत्याहारः | कृत्रिमता |
| ४७. | **का०** | **अन्तस्थो डे र्षोः** | २।६।१९ | 'थ'-आगमः | साम्यम् |

| | | | | | |
|---|---|---|---|---|---|
| | पा० | तस्य पूरणे डट्, षट्कति- | ५।२।४८, | डट्प्रत्यय- | साम्यम् |
| | | कतिपयचतुरां थुक् | ५१ | स्थुगागमश्च | साम्यम् |
| ४८. | **का०** | **अन्त्यात् पूर्व उपधा** | २।१।११ | उपधासञ्ज्ञा | साम्यम् |
| | पा० | अलोऽन्त्यात् पूर्व उपधा | १।१।६५ | उपधासञ्ज्ञा | साम्यम् |
| ४९. | **का०** | **अन्त्वसन्तस्य चाधातोः** | २।२।२० | दीर्घादेशः | साम्यम् |
| | पा० | अन्त्वसन्तस्य चाधातोः | ६।४।१४ | दीर्घादेशः | साम्यम् |
| ५०. | **का०** | **अन्यस्माल्लुक्** | २।४।३ | विभक्तिलुक् | साम्यम् |
| | पा० | अव्ययादाप्सुपः | २।४।८२ | विभक्तिलुक् | साम्यम् |
| ५१. | **का०** | **अन्यादेस्तु तुः** | २।२।८ | 'सि-अम्' लोपः तु-आगमश्च | लाघवम् |
| | पा० | अदड्डतरादिभ्यः पञ्चभ्यः | ७।१।२५ | अदड्-आदेशः | गौरवम् |
| ५२. | **का०** | **अन् विकरणः कर्तरि** | ३।२।३२ | अन्प्रत्ययो विकरणसंज्ञा च | साम्यम् |
| | पा० | कर्तरि शप् | ३।१।६८ | शप्प्रत्ययः | साम्यम् |
| ५३. | **का०** | **अपरो लोप्योऽन्यस्वरे यं वा** | १।५।९ | विसर्गलोपो | लाघवम् |
| | पा० | ससजुषो रुः, भोभगोअघो- | ८।२।६६; | यकारादेशश्च | |
| | | अपूर्वस्य योऽशि, लोपः शाकल्यस्य | ३।१७, १९ | 'रु-य-लोप-'आदेशाः | गौरवम् |
| ५४. | **का०** | **अपश्च** | २।२।१९ | उपधादीर्घः | साम्यम् |
| | पा० | अप्तृन्तृच्स्वसृनप्तृनेष्ट्रत्वष्ट्र० | ६।४।११ | उपधादीर्घः | साम्यम् |
| ५५. | **का०** | **अपां भे दः** | २।३।४३ | दकारादेशः | साम्यम् |
| | पा० | अपो भि | ७।४।४८ | दकारादेशः | साम्यम् |
| ५६. | **का०** | **अभ्यस्तस्य च** | ३।४।१४ | सम्प्रसारणम् | लाघवम् |
| | पा० | अभ्यस्तस्य च | ६।१।३३ | सम्प्रसारणम् | गौरवम् |
| ५७. | **का०** | **अभ्यस्तस्य चोपधाया नामिनः स्वरे०** | ३।५।८ | गुणनिषेधः | साम्यम् |
| | पा० | नाभ्यस्तस्याचि पिति सार्वधातुके | ७।३।८७ | गुणनिषेधः | साम्यम् |
| ५८. | **का०** | **अभ्यस्तादन्तिरनकारः** | २।२।२९ | नकारलोपः | लाघवम् |
| | पा० | नाभ्यस्ताच्छतुः | ७।१।७८ | नुमागमनिषेधः | गौरवम् |
| ५९. | **का०** | **अभ्यस्तानामाकारस्य** | ३।४।४१ | आकारलोपः | साम्यम् |
| | पा० | श्नाभ्यस्तयोरातः | ६।४।११२ | आकारलोपः | साम्यम् |

| | | | | | |
|---|---|---|---|---|---|
| ६०. | **का० अभ्यस्तानामुसि** | ३।५।६ | गुणादेशः | साम्यम् |
| | पा० जुसि च | ७।३।८२ | गुणादेशः | साम्यम् |
| ६१. | **का० अभ्यासस्यादिर्व्यञ्जनमव-शेष्यम्** | ३।३।९ | आदिव्यञ्जनशेषः | साम्यम् |
| | पा० हलादिः शेषः | ७।४।६० | आदिव्यञ्जनशेषः | साम्यम् |
| ६२. | **का० अभ्यासस्यासवर्णे** | ३।४।५६ | इय्-उवादेशौ | साम्यम् |
| | पा० अभ्यासस्यासवर्णे | ६।४।७८ | इय्-उवादेशौ | साम्यम् |
| ६३. | **का० अभ्यासाच्च** | ३।६।३० | घकारादेशः | लाघवम् |
| | पा० अभ्यासाच्च | ७।३।५५ | घकारादेशः | गौरवम् |
| ६४. | **का० अमौ चाम्** | २।३।८ | आम्-आदेशः | अर्थलाघवम् |
| | पा० ङेप्रथमयोरम् | ७।१।२८ | अम्-आदेशः | लाघवम् |
| ६५. | **का० अम्शसोरा** | २।२।३४ | आकारादेशः | गौरवम् |
| | पा० औतोऽम्शसोः | ६।१।९३ | आकारादेशः | लाघवम् |
| ६६. | **का० अम्शसोरादिर्लोपम्** | २।१।४७ | अकारलोपः | लाघवम् |
| | पा० अमि पूर्वः,प्रथमयोः पूर्वसवर्णः | ६।१।१०७, १०२ | पूर्वरूपम्, पूर्व-सवर्णदीर्घश्च | गौरवम् |
| ६७. | **का० अयादीनां यवलोपः पदान्ते न वा०** | १।२।१६ | 'य'-व लोपः स्वर-सन्ध्यभावश्च | लाघवम् |
| | पा० लोपः शाकल्यस्य, पूर्वत्रासिद्धम् | ८।३।१९; ८।२।१ | लोपोऽसिद्धभावश्च | गौरवम् |
| ६८. | **का० अयीर्ये** | ३।६।१९ | अयादेशः | साम्यम् |
| | पा० अयङ् यि क्ङिति | ७।४।२२ | अयङादेशः | साम्यम् |
| ६९. | **का० अर् ङौ** | २।१।६६ | अरादेशः | लाघवम् |
| | पा० ऋतो ङिसर्वनामस्थानयोः, उरण् रपरः | ७।३।११० १।१।५१ | गुणो रपरत्वं च | गौरवम् |
| ७०. | **का० अर्तिपिपर्त्योश्च** | ३।३।२८ | इकारादेशः | साम्यम् |
| | पा० अर्तिपिपर्त्योश्च | ७।४।७७ | इकारादेशः | साम्यम् |
| ७१. | **का० अर्तिसर्त्योरणि** | ३।६।११ | गुणादेशः | साम्यम् |
| | पा० ऋदृशोऽङि गुणः | ७।४।१६ | गुणादेशः | साम्यम् |
| ७२. | **का० अर्तिह्रीब्लीरीक्नूयीक्ष्माय्याद०** | ३।६।२२ | पकारागमो | लाघवम् |
| | पा० लोपो व्योर्वलि,अर्तिह्री-ब्लीरी०, पुगन्त० | ६।१।६६; ७।३।३६,८६ | यलोपगुणौ च | गौरवम् |

| | | | | | |
|---|---|---|---|---|---|
| ७३. | **का०** | **अर्तेर्ऋच्छः** | ३।६।७७ | ऋच्छादेशः | अर्थलाघवम् |
| | पा० | पाघ्राध्मास्थाम्नादाण्दृश्यर्ति० | ७।३।७८ | ऋच्छादेशः | सूत्रलाघवम् |
| ७४. | **का०** | **अरुर्पूर्वे द्वे सन्ध्यक्षरे च गुणः** | ३।८।३४ | गुणसंज्ञा | लाघवम् |
| | पा० | अदेङ् गुणः | १।१।२ | गुणसंज्ञा | गौरवम् |
| ७५. | **का०** | **अर्वन्नर्वन्तिरसावनञ्** | २।३।२२ | अर्वन्ति-आदेशः | लाघवम् |
| | पा० | अर्वणस्त्रसावनञ्, उगिदचां सर्वनाम० | ६।४।१२७, ७।१।७० | तृ-आदेशो नुमागमश्च | गौरवम् |
| ७६. | **का०** | **अलोपे समानस्य सन्वल्लघुनीनि०** | ३।३।३५ | सन्वद्भावः | साम्यम् |
| | पा० | सन्वल्लघुनि चङ्परेऽनग्लोपे | ७।४।९३ | सन्वद्भावः | साम्यम् |
| ७७. | **का०** | **अल्पस्वरतरं तत्र पूर्वम्** | २।५।१२ | पूर्वनिपातः | साम्यम् |
| | पा० | अल्पाच्तरम् | २।२।३४ | पूर्वनिपातः | साम्यम् |
| ७८. | **का०** | **अल्पादेर्वा** | २।१।३१ | इकारादेशः | साम्यम् |
| | पा० | जसः शी | ७।१।१७ | ी-आदेशः | साम्यम् |
| ७९. | **का०** | **अवमसंयोगादनोऽलोपो०** | २।२।५३ | लोपोऽलुप्तवद्भावश्च | लाघवम् |
| | पा० | अल्लोपोऽनः | ६।४।१३४ | अकारलोपः | गौरवम् |
| ८०. | **का०** | **अवर्ण इवर्णे ए** | १।२।२ | ए-आदेशः इवर्णलोपश्च | लाघवम् |
| | पा० | एकः पूर्वपरयोः, आद् गुणः | ६।१।७५,८७ | अधिकार-गुणौ | गौरवम् |
| ८१. | **का०** | **अवर्णस्याकारः** | ३।८।१८ | आकारादेशः | लाघवम् |
| | पा० | आडजादीनाम्, आटश्च | ६।४।७२, १।९० | आडागमो वृद्धिश्च | गौरवम् |
| ८२. | **का०** | **अव्ययसर्वनाम्नः स्वरादन्त्यात् पूर्वोऽक् कः** | २।२।६४ | अक्-कप्रत्ययौ | लाघवम् |
| | पा० | अव्ययसर्वनाम्नामकच् प्राक् टेः, अज्ञाते | ५।३।७१, ७३-७७ | अकच्-क-कन्-प्रत्ययाः | गौरवम् |
| ८३. | **का०** | **अव्ययाच्च** | २।४।४ | विभक्तिलुक् | साम्यम् |
| | पा० | अव्ययादाप्सुपः | २।४।८२ | विभक्तिलुक् | साम्यम् |
| ८४. | **का०** | **अव्ययीभावादकारान्ताद्०** | २।४।१ | अमादेशः | साम्यम् |
| | पा० | नाव्ययीभावादतोऽम् त्वपञ्चम्याः | २।४।८३ | अमादेशः | साम्यम् |

| | | | | |
|---|---|---|---|---|
| ८५. | **का० अश्नोतेश्च** | ३।३।२१ | नकारागमः | साम्यम् |
| | पा० अश्नोतेश्च | ७।४।७२ | नुडागमः | साम्यम् |
| ८६. | **का० अष्टनः सर्वासु** | २।३।२० | आकारादेशः | साम्यम् |
| | पा० अष्टन आ विभक्तौ | ७।२।८४ | आकारादेश. | साम्यम् |
| ८७. | **का० असन्ध्यक्षरयोरस्य तौ०** | ३।६।४० | अकारसन्ध्यक्षरादेशलोपौ | साम्यम् |
| | पा० अतो गुणे | ६।१।९७ | पररूपम् | साम्यम् |
| ८८. | **का० अस्तेः** | ३।५।३६ | धि-आदेशः | साम्यम् |
| | पा० हुझल्भ्यो हेर्धिः | ६।४।१०१ | धि-आदेशः | साम्यम् |
| ८९. | **का० अस्तेः** | ३।८।१९ | आकारादेशः | लाघवम् |
| | पा० आडजादीनाम्, आटश्च | ६।४।७२; १।९० | आडागमो वृद्धिश्च | गौरवम् |
| ९०. | **का० अस्तेः सौ** | ३।६।३९ | सकारलोपः | साम्यम् |
| | पा० तासस्त्योर्लोपः | ७।४।५० | सकारलोपः | साम्यम् |
| ९१. | **का० अस्तेरादेः** | ३।४।४१ | आकारलोपः | साम्यम् |
| | पा० श्नाभ्यस्तयोरातः | ६।४।११२ | आकारलोपः | साम्यम् |
| ९२. | **का० अस्तेर्दिस्योः** | ३।६।८९ | ईडागमः | साम्यम् |
| | पा० अस्तिसिचोऽपृक्ते | ७।३।९६ | ईडागमः | साम्यम् |
| ९३. | **का० अस्तेर्भूरसार्वधातुके** | ३।४।८६ | भू-आदेशः | साम्यम् |
| | पा० अस्तेर्भूः | २।४।५२ | भू-आदेशः | साम्यम् |
| ९४. | **का० अस्थिदधिसक्थ्यक्ष्णाम०** | २।२।१३ | अनादेशः | साम्यम् |
| | पा० अस्थिदधिसक्थ्यक्ष्णामनडुदात्तः | ७।१।७५ | अनडादेशः | साम्यम् |
| ९५. | **का० अस्भुवौ च परस्मै** | ३।२।२३ | अनुप्रयोगः | साम्यम् |
| | पा० कृञ्चानुप्रयुज्यते लिटि | ३।१।४० | अनुप्रयोगः | साम्यम् |
| ९६. | **का० अस्मद्युत्तमः** | ३।१।७ | उत्तमपुरुषविधानम् | साम्यम् |
| | पा० अस्मद्युत्तमः | १।४।१०७ | उत्तमपुरुषविधानम् | साम्यम् |
| ९७. | **का० अस्य च दीर्घः** | ३।६।८ | दीर्घादेशः | सरलता |
| | पा० वदव्रजहलन्तस्याचः | ७।२।३ | वृद्धिः | काठिन्यम् |
| ९८. | **का० अस्य च लोपः** | ३।६।४९ | अकारलोपः | साम्यम् |
| | पा० अतो लोपः | ६।४।४८ | अकारलोपः | साम्यम् |
| ९९. | **का० अस्यतेस्थोऽन्तः** | ३।६।९५ | थकारागमः | लाघवम् |
| | पा० अस्यतेस्थुक् | ७।४।१७ | थुगागमः | गौरवम |

| | | | | |
|---|---|---|---|---|
| १००. **का० अस्य वमोर्दीर्घः** | ३।८।११ | दीर्घादेशः | | लाघवम् |
| पा० अतो दीर्घो यञि | ७।३।१०१ | दीर्घादेशः | बोधे भ्रान्तिः | |
| १०१. **का० अस्यादेः सर्वत्र** | ३।३।१८ | दीर्घादेशः | | साम्यम् |
| पा० अत आदेः | ७।४।७० | दीर्घादेशः | | साम्यम् |
| १०२. **का० अस्यैकव्यञ्जनमध्ये०** | ३।४।५१ | एत्वमभ्यासलोपश्च | | साम्यम् |
| पा० अत एकहल्मध्येऽनादेशादेर्लिटि | ६।४।१२० | एत्वमभ्यासलोपश्च | | साम्यम् |
| १०३. **का० अस्योकारः सार्वधातुके०** | ३।४।३९ | उकारादेशः | | साम्यम् |
| पा० अत उत् सार्वधातुके | ६।४।११० | उकारादेशः | | साम्यम् |
| १०४. **का० अस्योपधाया दीर्घो वृद्धि०** | ३।६।५ | दीर्घो वृद्धिश्च | | लाघवम् |
| पा० अचो ञ्णिति,अत उपधायाः | ७।२।११५, ११६ | वृद्ध्यादेशः | | गौरवम् |
| १०५. **का० अह्नः सः** | २।३।५३ | सकारादेशः | | लाघवम् |
| पा० अहन्, रोऽसुपि | ८।२।६८,६९ | 'रु-र' आदेशौ | | गौरवम् |
| १०६. **का० आकारस्योसि** | ३।६।३७ | आकारलोपः | | साम्यम् |
| पा० आतो लोप इटि च | ६।४।३४ | आकारलोपः | | साम्यम् |
| १०७. **का० आकारादट औ** | ३।५।४१ | आकारादेशः | | लाघवम् |
| पा० आत औ णलः | ७।१।३४ | आकारादेशः | | गौरवम् |
| १०८. **का० आकारो महतःकार्यस्तुल्या०** | २।५।२१ | आकारादेशः | | साम्यम् |
| पा० आन्महतः समानाधिकरण० | ६।३।४६ | आकारादेशः | | साम्यम् |
| १०९. **का० आख्याताच्च तमादयः** | २।६।४० | तमादिप्रत्ययाः | | लाघवम् |
| पा० अतिशायने तमबिष्ठनौ---- वा बहूनां० | ५।३।५५-५७,९२,९३ | 'तमप्' आदि-प्रत्ययाः | | गौरवम् |
| ११०. **का० आगम उदनुबन्धः स्वरादन्त्यात्०** | २।१।६ | उदनुबन्धागमव्यवस्था | | लाघवम् |
| पा० मिदचोऽन्त्यात् परः | १।१।४७ | मिदागमव्यवस्था | | गौरवम् |
| १११. **का० आ च न सम्बुद्धौ** | २।१।७० | 'आर्-आ' आ-देशाभावः | | लाघवम् |
| पा० ह्रस्वस्य गुणः, उरण् रपरः | ७।३।१०८; १।१।५१ | गुणो रपरत्वं च | | गौरवम् |
| ११२. **का० आते आथे इति च** | ३।६।६३ | इकारादेशः | | लाघवम् |
| पा० आतो ङितः | ७।२।८१ | इयादेशः | | गौरवम् |
| ११३. **का० आत्मने चानकारात्** | ३।५।३९ | नलोपादेशः | | गौरवम् |

| | | | | |
|---|---|---|---|---|
| | पा० आत्मनेपदेष्वनतः | ७।१।५ | अत्-आदेशः | लाघवम् |
| ११४. | **का० आत्मनेपदानि भावकर्मणोः** | ३।२।४० | आत्मनेपदप्रत्ययाः | साम्यम् |
| | पा० भावकर्मणोः | १।३।१३ | आत्मनेपदप्रत्ययाः | साम्यम् |
| ११५. | **का० आत्वं व्यञ्जनादौ** | २।३।१८ | आकारादेशः | साम्यम् |
| | पा० युष्मदस्मदोरनादेशे | ७।२।८६ | आकारादेशः | साम्यम् |
| ११६. | **का० आदातामाथामादेरिः** | ३।६।६२ | इकारादेशः | लाघवम् |
| | पा० आतो ङितः | ७।२।८१ | इयादेशः | गौरवम् |
| ११७. | **का० आ धातोरघुट्स्वरे** | २।२।५५ | आकारलोपः | साम्यम् |
| | पा० आतो धातोः | ६।४।१४० | आकारलोपः | साम्यम् |
| ११८. | **का० आन व्यञ्जनान्ताद्धौ** | ३।२।३९ | आनविकरणम् | लाघवम् |
| | पा० हलः श्नः शानज्झौ | ३।१।८३ | शानजादेशः | गौरवम् |
| ११९. | **का० आन् शस्** | २।३।९ | आन्-आदेशः | लाघवम् |
| | पा० शसो नः, द्वितीयायां च | ७।१।२९; २।८७ | 'न्-आ' आदेशौ | गौरवम् |
| १२०. | **का० आपितपितिपिस्वपि-वपिशपिछुपि०** | ३।७।२४ | इडागमनिषेधः | लाघवम् |
| | पा० एकाच उपदेशेऽनुदात्तात् | ७।२।१० | इडागमनिषेधः | गौरवम् |
| १२१. | **का० आप्नोतेरीः** | ३।३।४० | ईकारादेशोऽभ्यासलोपश्च | लाघवम् |
| | पा० आप्ज्ञप्यृधामीत् | ७।४।५५ | ईकारादेशोऽभ्यासलोपश्च | गौरवम् |
| १२२. | **का० आभोभ्यामेवमेव स्वरे** | १।५।१० | यकारादेशोविसर्गलोपश्च | लाघवम् |
| | पा० ससजुषो रुः, भोभगोअघोअपूर्वस्य योऽशि, लोपः शाकल्यस्य | ८।२।६६; ३।१७, १९ | रु-य-लोपादेशाः 'क-य-लोप' आदेशाः | गौरवम् |
| १२३. | **का० आमः कृञनुप्रयुज्यते** | ३।२।१२ | कृधातोरनुप्रयोगः | साम्यम् |
| | पा० कृञ्चानुप्रयुज्यते लिटि | ३।१।४० | कृधातोरनुप्रयोगः | साम्यम् |
| १२४. | **का० आमन्त्रणे च** | २।४।१८ | प्रथमाविधानम् | साम्यम् |
| | पा० संबोधने च | २।३।४७ | प्रथमाविधानम् | साम्यम् |
| १२५. | **का० आमन्त्रिते सिः सम्बुद्धिः** | २।१।५ | सम्बुद्धिसंज्ञा | लाघवम् |
| | पा० सम्बोधने च, साऽऽमन्त्रितम्, एकवचनं सम्बुद्धिः | २।३।४७, ४८, ४९ | आमन्त्रित-संबुद्धिसंज्ञे | गौरवम् |
| १२६. | **का० आमि च नुः** | २।१।७२ | नु-आगमः | लाघवम् |
| | पा० ह्रस्वनद्यापो नुट् | ७।१।५४ | नुडागमः | गौरवम् |

| | | | | |
|---|---|---|---|---|
| १२७. **का० आमि विदेरेव** | ३।५।२६ | गुणनिषेधः | लाघवम् |
| पा० असंयोगाल्लिट् कित् | १।२।५ | किद्वद्भावः | गौरवम् |
| १२८. **का० आयिरिच्यादन्तानाम्** | ३।६।२० | आयि-आदेशः | साम्यम् |
| पा० आतो युक् चिण्कृतोः | ७।३।३३ | युगागमः | साम्यम् |
| १२९. **का० आय्यन्ताच्च** | ३।२।४४ | आत्मनेपदम् | लाघवम् |
| पा० अनुदात्तङित आत्मनेपदम्(क्यङ्) | १।३।१२ | आत्मनेपदम् | गौरवम् |
| १३०. **का० आरुत्तरे च वृद्धिः** | ३।८।३५ | वृद्धिसंज्ञा | लाघवम् |
| पा० वृद्धिरादैच् | १।१।१ | वृद्धिसंज्ञा | गौरवम् |
| १३१. **का० आलोपोऽसार्वधातुके** | ३।४।२७ | आकारलोपः | गौरवम् |
| पा० आतो लोप इटि च | ६।४।६४ | आकारलोपः | लाघवम् |
| १३२. **का० आशिषि च परस्मै** | ३।५।२२ | गुणनिषेधः | लाघवम् |
| पा० किदाशिषि | ३।४।१०४ | किद्वद्भावः | गौरवम् |
| १३३. **का० आशिष्येकारः** | ३।४।३० | उसादेशः | लाघवम् |
| पा० सिजभ्यस्तविदिभ्यश्च | ३।४।१०९ | जुसादेशः | गौरवम् |
| १३४. **का० आशीः** | ३।१।३१ | आशीःसंज्ञा | अन्वर्थकता |
| पा० आशिषि लिङ्लोटौ | ३।३।१७३ | आशीर्लिङ्लकारः | कृत्रिमता |
| १३५. **का० आ श्रद्धा** | २।१।१० | श्रद्धासंज्ञा | वैशिष्ट्यम् |
| पा० संज्ञासूत्राभावः | २।१।१० | श्रद्धासंज्ञा | गौरवम् |
| १३६. **का० आ सौ सिलोपश्च** | २।१।६४ | आ-आदेशः सिलोपश्च | लाघवम् |
| पा० ऋदुशनस्०, सर्वनामस्थाने०, नलोपः प्रातिपदिकान्तस्य | ७।१।९४; ६।४।८; ८।२।७ | अनङादेशः, उपधा-दीर्घो नलोपश्च | गौरवम् |
| १३७. **का० इकारो दरिद्रातेः** | ३।४।४४ | इकारादेशः | साम्यम् |
| पा० इद् दरिद्रस्य | ६।४।११४ | इकारादेशः | साम्यम् |
| १३८. **का० इङः परोक्षायाम्** | ३।४।८४ | इङो गादेशः | साम्यम् |
| पा० गाङ् लिटि | २।४।४९ | इङो गाङादेशः | साम्यम् |
| १३९. **का० इचस्तलोपः** | ३।४।३० | तप्रत्ययलोपः | साम्यम् |
| पा० चिणो लुक् | ६।४।१०४ | तप्रत्ययलोपः | साम्यम् |
| १४०. **का० इचि वा** | ३।४।६५ | ह्रस्वादेशः | सारल्यम् |
| पा० चिण्णमुलोर्दीर्घोऽन्यतरस्याम् | ६।४।९२ | दीर्घादेशः | वैचित्र्यम् |

| | | | | |
|---|---|---|---|---|
| १४१. **का० इजात्मने पदेः प्रथमैकवचने** | ३।२।२९ | इच् प्रत्ययः | | लाघवम् |
| पा० चिण् ते पदः | ३।१।६० | च्लेश्चिणादेशः | | गौरवम् |
| १४२. **का० इटश्चेटि** | ३।६।५३ | सिचो लोपः | | साम्यम् |
| पा० इट ईटि | ८।२।२८ | सिचो लोपः | | साम्यम् |
| १४३. **का० इटि च** | ३।४।२७ | आकारलोपः | | गौरवम् |
| पा० आतो लोप इटि च | ६।४।६४ | आकारलोपः | | लाघवम् |
| १४४. **का० इटो दीर्घो ग्रहेरपरोक्षायाम्** | ३।७।१२ | इटो दीर्घः | | साम्यम् |
| पा० ग्रहोऽलिटि दीर्घः | ७।२।३७ | इटो दीर्घः | | साम्यम् |
| १४५. **का० इडागमोऽसार्वधातुकस्यादि०** | ३।७।१ | इडागमः | | लाघवम् |
| पा० आर्धधातुकस्येड् वलादेः | ७।२।३५ | इडागमः | | गौरवम् |
| १४६. **का० इणतः** | २।६।५ | इण् प्रत्ययः | | साम्यम् |
| पा० अत इञ् | ४।१।९५ | इञ् प्रत्ययः | | साम्यम् |
| १४७. **का० इणश्च** | ३।४।५८ | यकारादेशः | | अर्थलाघवम् |
| पा० इणो यण् | ६।४।८१ | यणादेशः | | शब्दलाघवम् |
| १४८. **का० इणोऽनुपसृष्टस्य** | ३।४।७० | दीर्घादेशः | | लाघवम् |
| पा० एतेर्लिङि | ७।४।२४ | ह्रस्वविधिव्याख्या | | गौरवम् |
| १४९. **का० इणो गा** | ३।४।८३ | इणो गादेशः | | साम्यम् |
| पा० इणो गा लुङि | २।४।४५ | इणो गादेशः | | साम्यम् |
